श्रीमद्वाग्भटविरचिते

अष्टाङ्गहृदये शारीरस्थानम्।

****

श्रीमदरुणदत्तविरचितया सर्वाङ्गसुन्दराख्यव्याख्यया समुल्लसितम्

****

प्रथमोऽध्यायः।

श्रीगणेशाय नमः। अथ सूत्रस्थानादनन्तरं शारीरस्थानमिदमारभ्यते। तत्रायं सम्बन्धः,-पूर्वस्मिन्स्थाने कायादीन्यष्टावङ्गानि चिकित्साधारभूतानि सकलतन्त्रसारभूतानि सूत्रितानि "कायबाल" (हृ. सू. आ.१/५) इत्यादिना ग्रन्थेन। कायश्च निजागन्तूनां व्याधीनामधिष्ठानम्। तस्य च कायस्य चतुर्वर्गसा धनस्य पालनार्थं हेतुलिङ्गौषधस्कन्धभेदेन त्रिस्कन्धोऽयं गन्थो ग्रन्थकृता प्रणीतः। ततश्च शरीरस्य प्रथमं सूत्रितत्वात्प्राधान्याच्च प्राक् सूत्रस्थानमनन्तरं शारीरस्थानमिदमारभ्यत इत्याह-

अथातो गर्भावक्रान्ति शारीरं व्याख्यास्यामः।

इति ह स्माहुरात्रेयादयो महर्षयः।

(गद्यसूत्रे॥२॥)

शरीरमधिकृत्य कृतो ग्रन्थः शारीरः। गर्भस्यावक्रान्तिः-अवक्रमणं सम्प्राप्तिः, यथाऽगर्भो गर्भतां सम्पद्यत इत्यर्थः। गर्भावक्रान्तिर्विद्यते यस्मिन्नध्याय इति मत्वर्थे कप्रत्ययः। त स्य "अध्यायानुवाकयोर्लुक्" इति लुक्। अथादिशब्दानामर्था आयुष्कामीयाध्याये (हृ.सू.अ.९) व्याख्याता एव।

शुद्धे शुक्रार्तवे सत्वः स्वकर्मक्लेशचोदितः।

गर्भः सम्पद्यते युक्तिवशादग्निरिवारणौ॥१॥

शुक्रं-अन्त्यो धातुः। ऋतौ भवमार्तवम्, स्त्रीणां यदपत्यमार्गात् शुद्धमीषत्कृष्णं विगन्धं च बायुप्रेरितं लेहितं प्रवर्तते तदार्तवमुच्यते। शुक्रं चार्तवं च शुक्रार्तवम्, पिण्डे पित्रोः सम्बन्धि गर्भबीजम्, तस्मिन् शुक्रार्तवे, शुद्धे-वातादिभिरदूषितेऽधिष्ठानभूते, सत्वो-जीवः, गर्भः सम्पद्यते। किल नासौगर्भः, अथ च गर्भतामासादयति। कीदृशः सत्वः ? स्वकर्मेत्यादि। कर्माणि-पूर्वजन्मार्जितानि शुभाशुभानि, स्वानि च तानि कर्माणि च स्वकर्माणि। क्लेशयन्ति-लोकान् दुःखयन्तीति, क्लेशाः। ते च-अविद्यास्मितारागद्वेषाभिनिवेशाः। अतथावस्तुनि तथेति ("अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्म)ख्यातिः-अविद्या। दृग्दर्शनशक्त्योरेकात्मता अस्मिता। सुखानुशयी-रागः। दुःखानुशयी-द्वेषः। स्वरसवाही विदुषोऽपि तथा रूढः-अभिनिवेशः" (पात.यो.सू २/५-६-७-८-९)। स्वकर्माणि च क्लेशाश्च, स्वकर्मक्लेशाः, तैश्चोदितः-प्रेरितो गर्भः सम्पद्यते, न तु कर्मक्लेशवियुक्तः। अत एव वीतरागाणां जन्मासम्भवः, कर्मक्लेशरहितत्वात्। तथा चोक्तम्-"चित्तमेव हि संसारि रागादिक्लेशदूषितम्। तदेव तैर्विनिर्मुक्तं मुक्तमित्यभिधीयते॥" इति। अथ किं शुद्धे शुक्रार्तवे एव स्वकर्मक्लेशचोदित एव गर्भः सम्पद्यतेऽथवाऽन्यदपि किञ्चिदपेक्षते ? इत्याह-युक्तिवशादिति। योजनं युक्तिः, उपादेयस्यार्थस्येतिकर्तव्यतासाधनोपायार्थम्। युक्तेर्वशः-सामर्थ्यं प्रभावो, युक्तिवशः। ततः शुद्धे शुक्रर्तवे स्वकर्मक्लेशचोदित एव स सत्वो गर्भः सम्पद्यते, नान्यथा। कथम् ? इत्याह-युक्तिवशादग्निरिवारणौ। तथा हि, -मथ्यमन्थनमथकादिसामग्रीमन्ततेणारणावग्निर्यथा न जायते, तथा गर्भोऽपि यथोक्तसामग्रीवैकल्यात् न भवति। सकलसामग्रीसद्भावत एव भवतीति भावः।

तदेवं गर्भस्य सम्पत्तिमभिधाय यथा तस्य कुक्षौ वृद्धिः स्यात्तथा वक्ति-

बीजात्मकैर्महाभूतैः सूक्ष्मैः सत्वानुगैश्च सः।
मातुश्चाहाररसजैः क्रमात्कुक्षौ विवर्द्धते॥२॥

बीजात्मकैः-गर्भजरायुस्वभावैः शुक्रार्तवरूपतां परिणतैः। कैः ? महाभूतैः,-आकाशादिभिः सत्वरजस्तमोमयैः, "तत्र सत्वबहुलमाकाशम्, रजोबहुलो वायुः, सत्वरजोबहुलोऽग्निः, सत्वतमोबहुला आपः, तमोबहुला पृथ्वी चेति।" (सु.शा.अ.१/२०) इत्येवंरूपैः। सः-गर्भः, कुक्षौ विवर्द्धते-विशेषेण वृद्धिं याति। किम्भूतैः ? सूक्ष्मैः,-अतीन्द्रियैर्योगिदृश्यैः। तथा, सत्वं-चेतोऽनुगच्छन्तीति सत्वानुगानि, तैः। यत्र सत्वं तिष्ठति

तत्रावश्यं तान्यपि तिष्ठन्ति, सात्वानुशायित्वात्तेषाम्। तथा चोक्तम्(चरके शा.अ.२/३७)-"अतीन्द्रियैस्तैरतिसूक्ष्मरूपैरात्मा कदाचिन्न वियुक्तपूर्वः।" इत्यादि। चशब्दो हेतुसमुच्चयार्थः। [न केवलं महाभूतैर्हेतुभूतैर्गर्भो विवर्द्धते यावन्मातुश्चाहाररसजैरित्यतो वक्ष्यमाणाद्धेतोरपि वर्द्धत इत्यर्थः। मातुरित्यादि। मातुः सम्बन्धिभिराहाररसजैश्च कुक्षौ विवर्द्धते। चशब्दोऽत्रानुक्तसमुच्चयार्थः।] न केवलं पूर्वोक्ताद्यथानिर्दिष्टाद्धेतोर्गर्भः कुक्षौ विवर्द्धते, यावदनिर्दिष्टादपि मातुः सौमनस्यादेः कललार्बुद पेश्याद्यवस्थाभावेन विशेषतो वृद्धिं यातीति। कथं विवर्द्धते ? इत्याह-क्रमात्,-न झटित्येव। ननु, "मातुश्चाहाररसजैः" इति कथमुक्तम् ? यतः पञ्चभूतात्मक एवाहाररसः। न च यदात्मकोऽसौ स तस्यैव जन्मकारणं भवितुमर्हति, अव्यतिरिक्तत्वात्। तस्मादेवमयं व्याख्यातव्यः,-आहाररसे जातैराहाररसजैः। सप्तम्यन्तादुपपदाज्जनेर्डः। मातुराहाररसात्मना परिणतैरिति।

ननु, सत्वः कुक्षौ प्रविष्टो गर्भस्य वर्द्धने हेतुरक्तः, न चास्य प्रवेश उपलभ्यते, इत्याह-

तेजो यथाऽर्करश्मीनां स्फटिकेन तिरस्कृतम्।

नेन्धनं दृश्यते गच्छत्सत्वो गर्भाशयं तथा॥३॥

न केवलं दृश्यत्वादृश्यत्वाभ्यां वस्तुसद्भावासद्भावौ व्यवस्था-

प्येते, येनादृश्यत्वात्सत्वस्य कुक्षौ प्रवेशासम्भवः। किन्तर्हि ? तत्कार्यान्यथानुपपत्त्याऽपि बस्तुसद्भावो व्यवस्थाप्यत एव। तथा च, -यथाऽर्करश्मीनां सम्बन्धि तेजः स्फटिकेन-सूर्यकान्ताख्येन, तिरस्कृतं-व्यवहितं, स्फटिकस्याधस्तात् स्थिमिन्धनं गच्छत्-व्रजेत्, न दृश्यते। अथ च तेजःकार्यमिन्धनं गतं[दृश्यते नान्यसम्बन्धि कार्यम्। तदेवं तेजःकार्यान्यथानुपपत्त्या तेजस इन्धनगमनं], तथा तत्र तस्य सद्भावोऽप्यधिगम्यते। एवं सत्वो गर्भाशयं गच्छन्-व्रजन्, न दृश्यत एव। वस्तुप्रभावाद्गच्छति च। सत्वशब्द उपलक्षणार्थः, महाभूतान्यपि तदन्तर्गतानि न दृश्यन्त एव, अथ च कार्येणोपलभ्यन्त एव। तदेवं सत्वानुयायिभिर्महाभूतैर्गर्भः कुक्षौ विवर्द्धते, न तु केवलैः सत्वानधिष्ठितैः। चेतोवक्रान्त्या हि क्रमात्कललादिना वस्तुजातं विवृद्धिविमलतामापद्यते, नान्यथा मृतशरीरवत्।

ननु, सत्वो भूतानुग एकरूप एव। तत्कथमनेकजात्याकृत्या नरतुरगोरगगजगवयादिमत्याऽऽलिङ्गितः सम्पद्यते ? इत्यस्मिन् पर्यनुयोग इदमाह-

कारणानुविधायित्वात्कार्यणां तत्स्वभावता।

नानायोन्याकृतीः सत्वो धत्तेऽतो द्रुतलोहवत्॥४॥

कारणं-हेतुं, अवश्यमनुविदधतीति कारणानुविधीयीनि। आवश्यके णिनिः। कारणस्वभावानि कार्याणि भवन्ति सर्वाण्येव, तस्माद्धेतोः कार्याणां तत्स्वभावता। स्वभावशब्दः सदृशार्थः। तच्छब्देन कारणं परामृश्यते, तस्य-कारणस्य स्वभावता, तत्सादृश्यम्। तस्मात्कार्यकारणसादृश्याद्धेतोः सत्वोमहाभूतानुग एकरूप एव, अनेकरूपा नानायोन्याकृतीः- जातिबिम्बविशेषान्, धत्ते-धारयति। कथमिव? द्रुतलोहवत्। यथा रूप्यादिवस्तुजातमग्निना द्रुतरूपतां गतमेकरूपमेव सिक्थादिकल्पितायां नानारूपायां मनुष्याद्याकृतौ तन्निषिक्तं तां तामाकृतिं यथाकल्पितां धत्ते, एवं स सत्वो नानायोनौ गच्छति, तां तां यथास्वमाकृतिं धारयति।

तथा-

अत एव च शुक्रस्य बाहुल्याज्जायते पुमान्।

रक्तस्य स्त्री, तयोः साम्ये क्लीबः .....

अत एव च-पूर्वोक्तात्कार्यकारणसादृश्याख्याद्धेतोः, शुक्रस्यपुरेतसो, बाहुल्यात्-बहुत्वात्, सामर्थ्यलभ्याच्च स्त्रीरेतोरजोल्पत्वात् पुमान् जायते न स्त्री, तथाविधस्य कारणस्याभावात्। ["तथा, अत एव-पूर्वोक्तात्कार्यकारणसादृश्यात् स्त्रीरेतसो" रक्तस्य, बाहुल्यात्-बाहुत्वात्, सामर्थ्यलभ्याच्च पुरेतोल्पत्वात् स्त्री जायते न पुमान्, तथाविधस्य कारणस्याभावात्।] पुरेतो हि बलवत्, अल्पं स्त्रीरजोऽभिभूय पुंगर्भस्य कारणतां याति। यदा तु स्त्रीरजसो बलवत्वमल्पत्वं च पुरेतसः, तदाऽल्पं तु पुरेतोऽभिभूय स्त्रीरजः स्त्र्याख्यस्य गर्भस्य कारणतामापद्यते। यदा तु शुक्रार्तवयोः साम्यं-तुल्यत्वं भवति, तदा न स्त्री न पुमान् जायते, अपि तु लिङ्गद्वयालिङ्गितः क्लीबः-षण्ढो, जायते। एवं पितुः सम्बन्धि शुक्रं स्त्रीरक्तमिश्रितं गर्भकारणम्। न केवलंपितृसम्बन्ध्येव मातुर्वा। दारुवाहिना तूक्तम्-"स्त्रीपुंसयोस्तु संयोगे यद्यादौ विसृजेत्पुमान्। शुक्रं, ततः पुमान् वीरो जायते बलवान् दृढः॥अथ चेद्वनिता पूर्वं विसृजेद्रक्तसंयुतम्। ततो रूपान्विता कन्या जायते दृढसंहिता॥" इति। अत एव च पुंगर्भाः केचित्किञ्चिन्मातृसदृशा दृश्यन्ते, स्त्रीगर्भाश्च केचित्किञ्चित्पितृसदृशा दृश्यन्ते। ननु, "रसाद्रक्तं ततो मांसं मांसान्मेदस्ततोऽस्थि च। अस्थ्नो मज्जा ततः शुक्रं

शुक्राद्गर्भः प्रजायते॥" (ह्. शा. अ. ३/६२) इत्यविशिष्य निर्दिष्टम्, न तु पुंशुक्राद्गर्भः प्रजायत इत्येवं निर्दिष्टम्। उभयोरपि च स्त्रीपुंसयोरवश्यं सप्तधातुकत्वमभ्युपगन्तव्यम्, न पुंस एव। तदेवं तरुणीनां कुसुमशराक्रान्तमानसानां तथाविधेन पुरुषसंयोगेन विना केवलात् स्मृतिसंस्पर्शदर्शनाच्चलितप्रस्रुत (रक्त)रेतसां किमिति गर्भो न जायते? शुक्रर्तवं हि गर्भकारणम्। तच्च सन्निहितमेवेति केचित्। तान् ब्रूमहे। पुंशुक्राभावात्। पुंशुक्रं हि स्त्रीरेतोरक्तयुक्तं गर्भकारणम्। न च तदत्रास्ति। तदभावाद्गर्भस्यानुत्पत्तिः। तथा सङ्ग्रहेऽप्यध्यगीष्ट (शा. अ. १)-"योषितोऽपि स्रवन्त्येव शुक्रं पुंसः समागमे। गर्भस्य तु न तत्किञ्चित्कतोतीति न चिन्त्यते॥" इति।

सम्प्रतं यथाऽनेकगर्भत्वं तुल्यकालं स्यात्तथा प्रतिपादयितुमाह-

..... शुक्रार्तवे पुनः॥५॥

वायुना बहुशो भिन्ने यथास्वं बह्वपत्यता।

वातेन यथास्वं शुक्रार्तवे बहुशो भिन्ने-बहुधा कृते सति, बह्वपत्यता भवति। यथास्वमिति यदा शुक्रमाधिक्येन वर्तमानं वातेन बहुधा भिद्यते तदा पुंगर्भानेकत्वम्, यदा तु स्त्रीरज आधिक्येन वर्तमानं वायुना बहुधा भिद्यते तदा स्त्रीगर्भानेकत्वम्, इति बह्वपत्यता भवति। सूकरसारमेयादिजातिषु त्वनेनैव हेतुना सदाऽवेकापत्यता।

ननु, कथं वियोनयो विकृताकाराश्च गर्भाः स्युः? इत्याह-

वियोनिविकृताकारा जायन्ते विकृतैर्मलैः॥६॥

वियोनयश्च विकृताकाराश्च वियोनिविकृताकाराः, ते तथाविधा गर्भा जायन्ते। कथम्? इत्याह-विकृतैर्मलैः। वातादिभिर्दुष्टैरुन्मार्गगामिभिः।

मासि मासि रजः स्त्रीणां रसजं स्रवति त्र्यहम्।
वत्सराद्वादशादूर्ध्वं याति पञ्चाशतः क्षयम्॥७॥

स्त्रीणां मासि मासि-प्रतिमासं, रजो-रक्तं, त्र्यहं स्रवति-त्रीणि दिनानि प्रवर्तते। ननु, "शुद्धे शुक्रार्तवे" इति पूर्वं शुक्रमेवोद्दिष्टम्, ततस्तस्यैव निर्देशो न्याय्य इति शुक्रमानुपूर्वीप्राप्तमुल्लङ्घ्य कस्माद्रक्तं निर्दिष्टम्? उच्यते। बहुवक्तव्यत्वात्। रक्ते हि बहुवक्तव्यमस्ति, अतस्तदेव प्राग्वक्तुं युक्तम्। त्र्यहमिति "कालाध्वनोः" इति द्वितीया। किम्भूतं रजः ? रसाज्जातंरसजम्। ननु, रक्तं रसजमेव। वक्ष्यति हि (ह्.शा.अ.३/६२) -"रसाद्रक्तं ततो मांसं" इत्यादि। तत्किमर्थं रसजमित्युक्तम्? ब्रूमहे। रसात्-आहाररसात् परिणमतो जातं रसजमित्यत्र निर्दिष्टम्, न तु रसधातोः, इत्यचोद्यमेतत्। कुतःप्रभृति तद्रजः प्रवर्तते ? इत्याह-वत्सरादित्यादि। द्वादशाद्वर्षादूर्ध्वं-अनन्तरं, स्रवति। पञ्चाशतो वर्षादूर्ध्वं-परेण, क्षयं याति। द्वादशानां पूरणं वर्षमिति "तस्य पूरणो डट्" इति डट्। द्वादशादिति प्रायिकमेतत्, एकादशवार्षिकाणामपि स्त्रीणां रक्तप्रवृत्तिदर्शनात्। पञ्चाशतः क्षयमित्यत्राप्येवमेव स्त्रीणां रक्तप्रवृत्तिदर्शनात्। पञ्चाशतः क्षयमित्यत्राप्येवमेव चिन्त्यम्।

पूर्णषोडशवर्षा स्त्री पूर्णविंशेन सङ्गता।

शुद्धे गर्भाशये मार्गे रक्ते शुक्रेऽनिले हृदि॥८॥

वीर्यवन्तं सुतं सूते

पूर्णानि षोडशवर्षाणि यस्याः सा, एवंविधा स्त्री पूर्णविंशेन नरेण सङ्गता-मिथुनतां याता सती, गर्भाशयादिषु शुद्धेषु वीर्यवन्तं-सामर्थ्ययुक्तं, पुत्रं सूते-जनयति। प्रायिकं चैतत्, अर्वागपि साधुगर्भदर्शनात्। अत एवायमेव तन्त्रकारोऽन्यथा सङ्ग्रहे जगाद (शा. अ. १)-षोडशवर्षायां पञ्चविंशतिवर्षः पुत्रार्थं प्रयतेत।"इति। विंशतेः पूरण इति डटिति "विंशते" इति तिलोपे विंशशब्दः। पूर्णो विंशो यस्येति पूर्णविंशः। गर्भस्याशयो गर्भाशयः, तस्मिन्। शुद्धे-निर्मले, वातादिभिरदुष्टे। तथा, मार्गे-प्रकृतत्वादपत्यमार्गे, वातादिभिरदुष्टे। तथा, रक्तेस्त्रीरजसि, शुद्धे। तथा, शुक्रे-पुंबीजे, शुद्धे। तथा, अनिले शुद्धेपित्तादिभिरनावृते। तथा, हृदि-शुद्धे-दोषानधिष्ठितेऽसन्तप्ते।

ततो न्यूनाब्दयोः पुनः।

रोग्यल्पायुरधन्यो वा गर्भो भवति नैव वा॥९॥

ततः-पूर्वोक्ताद्वयःपरिमाणात्, न्यूनाब्दयोः-हीनवर्षयोः स्त्रीपुरुषयोः पञ्चदशाष्टादशवर्षयोः, रोगी भवति। रोगीत्यतिशय इनिर्मत्वर्थायः। तथोत्पन्नोऽल्पायुरधन्यश्च-अप्रशस्तो, गर्भो भवति। न भवत्येव वा।

ननु, दम्पत्योः शुक्रार्तवसंयोगेऽपि सति क्वचिद्गर्भसम्मूर्तिर्न दृश्यते। तत्कथमेतत्? इत्याशङ्क्योदमाह-

वातादिकुणपग्रन्थिपूयक्षीणमलह्वयम्।

बीजासर्मथं रेथोस्त्रम्

आदिशब्देन पित्तश्लेष्मणोः परिग्रहः। वातादयश्च कुणपं च ग्रन्थिश्च पूयश्च क्षीणं च मलं चेति द्वन्द्वः। एत आह्वयः- संज्ञाः, यस्य रेतोस्त्रस्य तदेवम्। आह्वयशब्दः प्रत्येकं वातादिषु योज्यः। रेतश्चास्त्रं च रेतोस्त्रं वाताद्याह्वयम्। वातसंज्ञं शुक्रं वातशुक्रम्। एवं पित्तशुक्रं कफशुक्रम्। कुणपगन्धित्वात्कुणपं नाम शुक्रं कुणपशुक्रम्, तद्रक्तेन दुष्टेन भवति। एवं ग्रन्थिशुक्रं पूयशुक्रं क्षीणशुक्रम्। मलाह्वयं तु द्विधा,-मूत्रपुरीषभेदात्। मूत्रसदृशं शुक्रं मूत्रशुक्रम्। एवं पुरीषशुक्रम्। आर्तवमपि शुक्रवद्दोषदूषितमबीजमेव। तस्य लिङ्गं नाम च शुक्रवद्वेद्यम्। यथा,-वातार्तवं पित्तार्तवमित्यादि, यावत्पुरीषार्तवमिति। साध्यासाध्यविभागश्च तद्वदेव। शुक्रार्तवदोषेषु च चिकित्सामपि तुल्यां ब्रूते। यत्र तु विशेषं द्रक्ष्यति, तत्र विशेषमभिधास्यति। यथा (श्लो.१५)-"पिबेद्भन्थ्यार्तवे पाठा" इत्यादि।

स्वलिङ्गैर्दोषजं वदेत्॥ १०॥

रक्तेन कुणपं, श्लेष्मवाताभ्यां ग्रन्थिसन्निभम्।

पूयाभं रक्तपित्ताभ्यां, क्षीणं मारुतपित्ततः॥ ११॥

स्वानि च तानि लिङ्गानि-लक्षणानि च, स्वलिङ्गानि,-यथास्वं वातादीनां रूपाणि। यथा,-रूक्षश्यावारुणादीनि वायोः, विस्रगन्ध्यौष्ण्यादीनि पित्तस्य, स्निग्धपाण्डुपिच्छिलादीनि कफस्य तैः स्वलिङ्गैर्वातादिदोषजं वदेत्- जानीयात्,वैद्यः इति शेषः। रक्तेन दुष्टेन कुणपं-कुणपगन्धित्वात्कुणपसंज्ञं, अन्वर्थं रेतोस्रं भवति। एवं ग्रन्थ्यादीनामप्यन्वर्थसंज्ञता बोध्या। श्लेष्मवाताभ्यां दुष्टाभ्यां ग्रन्थिसन्निभं-ग्रन्थ्याकारम्। पूयाभं-पूयसदृशम्, रक्तपित्ताभ्यां रेतोस्रं पूयाह्वयं भवति। क्षीणं नाम रेतोस्रं मारुतपित्ततो भवति, मारुतपित्ताभ्यां दुष्टाभ्यां दुष्टं तद्दूषणात् क्षीणतां नीतमिर्यर्थः।

कृच्छ्राण्येतान्यसाध्यं तु त्रिदोषं मूत्रविद्भ्रमम्।

पूर्वोक्तानीमानि वातादिशुक्रार्तवानि क्षीणशुक्रार्तवान्तानि कृच्छ्रसाध्यत्वात् कृच्छ्राणि। असाध्यं त्विति। मूत्रं च विट् च मूत्रविशौ, तयोरिव प्रभा यस्य तदेवम्। रेतोस्रमुभयमपि मलसंज्ञम्। त्रिदोषं-त्रिदोषदुष्टम्। असाध्यं-साधयितुमशक्यम्।

इदानीमुपक्रममाह-

कुर्याद्वातादिभिर्दुष्टे स्वौषधम्

स्वं-आत्मीयं, च तदौषधं च स्वौषधम्, वाताद्यौषधमित्यर्थः। तेन वायोः कुपितस्य यदौषधं-प्रशमोपायः स्निग्धोष्णाम्ललवणादि, पित्तस्य मधुरशीतकषायादि, श्लेष्मणः कटुकरूक्षकषायादि, तत्तस्य भेषजमित्यवतिष्ठते। विशेषतस्तु-"वातजेशुक्रदोषे वसुकसैन्धवफलाम्लसिद्धं यवक्षारप्रतीवापं सर्पिष्पानम्, बिल्वविदारीसिद्धं क्षीरयुक्तमास्थापनम्, मधुभद्रद्रारुसिद्धं तैलमनुवासनम्, क्षीरकुलीररससिद्धं तैलमनुवासनमुत्तरबस्तिश्च। पैत्तिके काण्डेक्षुश्वदंष्ट्रागुडूचीक्काथसिद्धं मूर्वामधूकप्रतीवापं सर्पिष्पानम्, त्रिवृच्चूर्णः सघृतो विरेकः पयस्याश्रीपर्णीसिद्धं क्षीरयुक्तमास्थापनम्, मधुकमुद्गपर्णीसिद्धं तैलमनुवासनमुत्तरवस्तिश्च। श्लैष्मिके पाषाणभेदाश्मन्तकामलकक्काथसिद्धं पिप्पलीमधुकचूर्णप्रतीवापं सर्पिष्पानम्, मदनफलकषायो वमनम्, दन्तीविडङ्गचूर्णस्तैलली ढो विरेकः, राजवृक्षमदनफलकषाय-

प्रगाढमास्थापनम्, मधुकपिप्पलीसिद्धं तैलमनुवासनमुत्तरबस्तिश्च। वातजे पुष्पदोषे भार्गीभद्रदारुसिद्धं सर्पिष्पानम्, काश्मर्यक्षुद्रसहासिद्धं वा क्षीरम्, मधुकश्रृगालविन्नाकल्कं पयःसर्पिःसहितं प्रियङ्गुतिलकल्कं वा योनौ धारयेत्, सरलमुद्गपर्णीकषायः प्रक्षलनम्। पित्तजे काकोलीद्वयविदारीमूलक्काथमुत्पलपद्मकक्काथं मधुकपुष्पकाश्मर्यफलक्काथं वा सशर्करं पिबेत्, श्वेतचन्दनक्काथं वा सक्षौद्रम्।" इत्यादिकं सङ्ग्रहात् (शा. अ. १) बोध्यम्।

इदानीं कुणपचिकित्सामाह-

कुणपे पुनः॥ १२॥

धातकीपुष्पखदिरदाडिमार्जुनसाधितम्।

पाययेत्सर्पिरथवा विपक्वमसनादिभिः॥ १३॥

कुणपाह्वये तु रेतसि धातक्यादिद्रव्यसाधितं घृतं पाययेत्, वैद्य इति शेषः। अथवा, असनादिभिः-असनादिगुणोद्दिष्टैर्भेषजैः (ह्र.सू.अ.१५/१९) विपक्वं घृतं पाययेत्। ननु, कुणप इति सामान्योक्तावपि कथं रेतसीति विषेषो लभ्यते। ब्रूमः। रेतःप्रकरणात्। अपि च कुणपास्त्रस्य पुरस्तादुपक्रमं वक्ष्यति (श्लो.१६)-"पेयं कुणपपूयास्त्रे" इति। तस्माद्रेतस एवेह ग्रहणं युक्तम्। पुनर्ग्रहणमत्र वातादिदुष्टे रेतस्यस्रोक्तां क्रियां कुर्यादिति द्योतयति।

साम्प्रतं ग्रन्थिसंज्ञे रेतस्युपक्रमं ब्रूते-

पलाशभस्माश्मभिदा ग्रन्थ्याभे

पलाशस्य भस्म पलाशभस्म। अश्मभित्-पाषाणभेदः। पलाशभस्म चाश्मभिच्च, तेन विपक्वं घृतं ग्रन्थ्याभे-ग्रन्थिनाम्नि रेतसि, पाययेत्।

पूयरेतसि।

परुषकवटादिभ्याम्

पूयाख्ये रेतसि परूषकवटादिभ्यां विपक्वं घृतं पाययेत्। परुषकश्च वटश्च परूषकवटौ, तावादी ययोर्गणयोस्तौ परुषकवटादी, ताभ्याम्। "परुषकं वरा द्राक्षा" (ह्र.सू.अ.१५/१३) इति परुषकादिः। तथा, "न्यग्रोधपिप्पल" (ह्र.सू. अ. १५/४१) इति वटादिः।

क्षीणे शुक्रकरी क्रिया॥ १४॥

क्षीणे-क्षीणत्वात् क्षीणाह्वये रेतसि, शुक्रकरी क्रिया। कार्येति शेषः। शुक्रलमतिशयेन सेव्यमित्यर्थः।

संशुद्धो विद्रभे सर्पिर्हिङ्गुसेव्यादि(ग्नि)साधितम्।

पिबेत्

संशुद्धः-कृतवमनविरेचनः, विद्रभे-विण्मलसदृशे रेतसि, आतुरो घृतं पिबेत्। किम्भूतम्? हिङ्गुसेव्यादिसाधितम्। अत्रादिशब्दो व्यवस्थावाची। तेन सङ्ग्रहोक्तस्य (शा. अ. १) - "हिङ्गुशीर[चित्रकैरथवा] चित्रक [वितुन्नक] प्रियङ्गु[हिङ्गु] समङ्गामृणालसिद्धमेलाचोच-चूर्णप्रतीवापम्।" इत्यस्य पाठस्य सूचना भवति। हिङ्गुसेव्याग्निसाधितमित्यपरे पेठुः। ननु, "असाध्यं तु त्रिदोषं मूत्रविद्रभम्।" (श्लो.१२) इत्युवाच तन्त्रकृत्। तत्किमित्यस्य चिकित्सोपदिष्टा? ब्रूमः। किञ्चित्साध्यताऽप्यस्यास्तीति प्रतिपादयितुं चिकित्सामुपदिदेश शास्त्रकारः। अत एव मूत्रप्रभस्यासाध्यत्वाच्चिकित्सां नोपादिशत्। मूत्रप्रभार्तवविद्रभार्तवयोरप्यसाध्यत्वादेवोपक्रमं नाभ्यधात्।

वातघ्नार्तवेषु

स्वौषधं कुर्यात्" (श्लो.१२) इत्युक्तम्। कुणपग्रन्थ्यघ्नार्तवेषु विशेषेण चिकित्सां वक्ष्यति -

ग्रन्थ्यार्तवे पाठाव्योषवृक्षकजं जलम्॥ १५॥

ग्रन्थ्यार्तवे-ग्रन्थिनाम्न्यार्तवे स्त्रीरजसि, जलं पिबेत्। किम्भूतम्? पाठादिजातम्। पाठा-प्राचीना। व्योषं-त्रिकटुकम्। वृक्षकः-कुटजः।

पेयं कुणपपूयास्त्रे चन्दनं वक्ष्यते तु यत्।
गुह्यरोगे च तत्सर्वं कार्यं सोत्तरबस्तिकम्॥ १६॥

कुणपाख्ये रजसि पूयाख्ये चापि चन्दनं पेयम्। अत्र 'द्रवानुक्तौ जलं देयम्' (ह्. क. अ. ६/२३) इति परिभाषया जलेन पातव्यमिति बोध्यम्। क्षीणार्तव इह चिकित्सितं नोक्तम्, तच्च स्वधियोह्यम्। यथा क्षीणरेतसि शुक्रकरी क्रिया कार्येत्युक्तम्, तथा क्षीणे रक्ते रक्तकरी क्रिया कार्येति। न च केवलमेतत्पूर्वोक्तमेव चिकित्सितं कार्यम्, यावद्गुह्यरोगप्रतिषेधे यद्वक्ष्यते-भणिष्यते, तदपि सर्वं साधनं यथायोगं वमनादि योनौ पिचुकधारणादिकं च कार्यम्। किम्भूतम् ? सोत्तरबस्तिकम्। सहोत्तरबस्तिना वर्तत इति सोत्तरवस्तिकम्। उत्तरबस्तिरपि तत्र कार्य इत्यर्थः। सोत्तरवस्तिकमिति "तेन सहेति तुल्ययोगे" इति वहुव्रीहिः, "शेषाद्विभाषा" इति कप्, 'वोपसर्जनस्य" इति सभावः। उत्तरबस्तिरपि तत्रौषधमित्यर्थः।

बीजासमर्थं रेतोस्त्रमभिधाय साम्प्रतं शुद्धं यच्छुक्रार्तवं बीजसमर्थं तल्लक्षाणार्थमाह-

शुक्रं शुक्लं गुरु स्निग्धं मधुरं बहलं बहु।
घृतमाक्षिकतैलाभं सद्गर्भाय

शुद्धे शुक्रार्तव इति पूर्वं शुक्रस्योपदेशात्प्राधान्याच्च शुक्रस्य पूर्वमुपन्यासः। "तत्राहाररसस्य सम्यक्परिणतस्य क्रमान्मज्जानमनुप्राप्तस्य सारः शुक्रसंज्ञां लभते। तच्च क्षीर इव सर्पिरिक्षुरस इव गुडः शरीरे शुक्रधारां कलामाश्रित्य सर्वाङ्गव्यापितया स्थितम्। विशेषतश्च मज्जमुष्कस्तनेषु। हर्षोदीरितं तु सङ्घट्टनेन हृदयावेशात् पिण्डीभूतमङ्गादङ्गात्प्रवर्तते (सङ्ग्रहे शा. अ.१)।" तच्च शुक्लादिगुणयुक्तं शुक्रम्। तथा, घृताभं माक्षिकाभं तैलाभं वा सद्गर्भार्य-शोभनगर्भार्थं, भवति। तव घृताभेन गौरवर्णत्वं गर्भस्य, माक्षिकाभेन श्यामवर्णत्वं, तैलाभेन कृष्णवर्णत्वं, भवति।

आर्तवं पुनः॥ १७॥

लाक्षारसशशास्त्राभं धौतं यच्च विरज्यते।

"रक्तमेव स्त्रीणां मासि मासि गर्भकोष्ठमनुप्राप्य त्र्यहं प्रवर्तमानमार्तवमाचक्षते। अतिप्रसङ्गेनानृतौ वा प्रवर्तमानं तदेवासृग्दरादिसंज्ञां लभते" (सं.शा.अ.१)। यदार्तवं लाक्षा रसाभं-अलक्तकरससदृशम्, तथा शशरुधिरसदृशम्, तथा यच्च धौतं सद्विरज्यते-वस्त्रादिलग्नं धौतं सल्लौहित्यं जहातीत्यर्थः। तदीदृशमार्तवं तु सद्गर्भाय सम्पद्यते।

शुद्धशुक्रार्तवलक्षणमुक्त्वा, इदानीं गर्भसम्भवात्पूर्वमिति कर्तव्यतामाह-

शुद्धशुक्रार्तवं स्वस्थं संरक्तं मिथुनं मिथः॥१८॥
स्नेहैः पुंसवनैः स्निग्धं शुद्धं शीलितबस्तिकम्।

शुक्रं चार्तवं च शुक्रार्तवे, शुद्धे शुक्रार्तवे यस्य मिथुनस्य तच्छुद्धशुक्रार्तवम्,-स्त्रीपुरुषयुगलं, समुपाचरेदिति सम्बन्धः। तथा, स्वस्थं-अरोगं, रोगलेशेनाप्यनाक्रान्तम्। तथा, मिथः परस्परं, संरक्तं-अनुरागयुक्तमन्योन्यदर्शनेन कुसुमचापाविष्टमेवंविधम्। स्नेहैः पुंसवनैः-यथाभिमतगर्भग्रहणप्रभावैः फलसर्पिर्महाकल्याणकादिभिः, स्निग्धम्। तथा, शुद्धं-कृतवमनविरेचनम्। तथा शीलितबस्तिकम्, शीलिताः-अभ्यसेनानुष्ठिताः, बस्तयो येन-मिथुनेन, तच्छीलितबस्तिकम्। न सकृदेवानुष्ठितबस्तिकमित्यर्थः।

एवं दम्पत्योस्तुल्यामितिकर्तव्यतामभिधाय, इदानिमनयोः पृथग्वक्ति _

नरं विशेषात्क्षीराज्यैर्मधुरौषधसंस्कृतैः॥१९॥

विशेषात्-विशेषेणातिशयेन, नरं क्षीरैर्घृतैश्च समुपाचरेदिति सम्बन्धः। विशेषादित्यनेनैतत् द्योतयति। विशेषेण नरं क्षीराज्यैः समुपाचरेत्, न पुनर्नारीमपि तैर्न समुपाचरेदिति। किम्भूतैः? मधुरौषधसंस्कृतैः मधुराणि-मधुरप्रायाणि मधुरप्रभावानि च तान्यौषधानि-जीवनियादीनि, [च]तैर्मधुरौषधैः, संस्कृतैः-सिद्धैः।

नारीं तैलेन माषैश्च पित्तलैः समुपाचरेत्।

नारीं तैलेन माषैश्च समुपाचरेत्। चशब्दोऽत्र भिन्नक्रमः। पित्तलैश्च समुपाचरेदित्यर्थः। पित्तलानि हि रक्तवृद्धिहेतवः। उक्तं हि(हृ. सू. अ. ११/२६)-"आश्रयाश्रयिणां मिथः। यदेकस्य तदन्यस्य वर्द्धनक्षपणौषधम्॥" इति। एवं च तैलं पित्तकृत्त्वादेवोपन्यस्तम्। विशेषादित्यत्राप्यनुवर्तते। क्षीरज्येभ्योऽपि विशेषेण नारि तैलदिभिः समुपाचरेदित्यर्थः। पुरुषस्य तु रजसोऽभावात्तद्वद्धिहेतवस्तैलादयो नोपयुज्यन्त एव।

पूर्वोक्तसकलसामग्रीयुक्तादपि मिथुनाद्विशिष्टकालमन्तरेण गर्भस्यासम्भव इति स्त्रीमधिकृत्य तद्गर्भग्रहणयोग्यं कालं दर्शयितुमाह-

क्षामप्रसन्नवदनां स्फुरच्छ्रोणिपयोधराम्॥२०॥
स्वस्ताक्षिकुक्षिं पुंस्कामां विद्यादृतुमतीं स्त्रियम्।

काश्यर्हेतुं विना क्षामं, तथा प्रसन्नं-निर्मलं, वदनं-मुखं, यस्याः सैवंभूता, ताम्। श्रोणिश्च पयोधरौ च श्रोणिपयोधरम्, स्फुरत्-कम्पमानं, श्रोणिपयोधरं यस्याः सा, ताम्। श्रोणिः-कटिः। स्वस्ते-च(ग)लिते, इवाक्षिणी कुक्षिश्च यस्याः सा ताम्। तथा, पुंसि कामः-अभिलाषो, यस्याः सा, ताम्। एवंविधां स्त्रियमृतुमतीं-ऋतुयुक्तां, विद्यात्। तस्याः स गर्भग्रहणकाल इत्यर्थः। पुंस्कामामिति "संपुंकानां सो वक्तव्यः" इति मकारस्य सकारदेशाद्धत्वाभावः।

"सर्वं च हेतुमद्ब्रूयात्" इत्यागमः, अत आह-

पद्मं सङ्कोचमायाति दिनेऽतीते यथा, तथा॥२१॥
ऋतावतीते योनिः, सा शुक्रं नातः प्रतीच्छति।

यथा दिवा प्रफुल्लं पद्ममनन्तरं दिवसातिक्रान्तौ सङ्कोचमायाति-मुकुलभावं प्राप्नोति, तत्स्वभावत्वात्तस्य। तथा-तेनैव प्रकारेण, ऋतावतीते-अतिक्रान्ते द्वादशरात्रस्वभावे योनिः सङ्कोचमायति। सा च-योनिः, [अतः] सङ्कुचितत्वात् शुक्रं न प्रतीच्छतीति।

विवृताविवृतमुखत्वं हि योनेर्गर्भग्रहणाग्रहणहेतुः। तच्च वायोः क्रियावतः कालसहायस्यायत्तमित्याह_

मासेनोपचितं रक्तं धमनीभ्यामृतौ पुनः॥२२॥

ईषत्कृष्णं विगन्धं च वायुर्योनिमुखान्नुदेत्।

मासेन यदुपचितमाहाररसतो वृद्धिं प्राप्तं रक्तं तत्पुनर्मासेनोपचितं रक्तमृतौ वायुर्योनिमुखान्नुदेत्-प्रेरयेत्। विधौ लिङ्। तदा योनिमुखं विवृतं सम्पद्यते। केन नुदेत्? धमनीभ्यांस्रोतोविशेषाभ्यां। किम्भूतं रक्तम्? ईषात्कृष्णं, तथा विगन्धंविस्रगन्धरहितम्। प्रकृतिस्थप्रेरकपवनसम्पर्कादीषत्कृष्णता, न तु कुपितसमीरणप्रेरणसंश्लेषवशादिवात्यन्तं कृष्णता। नापि पित्तेन तथाभूतेन युक्तम्, येन विस्रगन्धि स्यात्। नापि श्लेष्मणा तथाभूतेन युक्तम्, येन तद्वर्णयुक्तं स्यात्। तस्माच्छुद्धं विशिष्टे काले योनिमुखात्प्रवर्तमानं रक्तमार्तवसंज्ञां लभते। तदेव चान्यदा योनिमुखात्प्रवर्तमानमसृग्दरसंज्ञामासादयति।

शुद्धं च रक्तं पुष्पसंज्ञम्, गर्भाख्यस्य फलस्य भविष्यतोऽभिव्यञ्जकत्वात्। अत एवाह-

ततः पुष्पेक्षणादेव कल्याणध्यायिनी त्र्यहम्॥२३॥

मृजालङ्काररहिता दर्भसंस्तरशायिनी।

क्षैरेयं यावकं स्तोकं कोष्ठशोधनकर्षणम्॥२४॥

पर्ण शरावे हस्ते वा भुञ्जीत ब्रह्मचारिणी।

पुष्पेक्षणात्-पुष्पस्य दर्शनादेवानन्तरं, स्त्री त्र्यहं-त्रीणि दिनानि, कल्याणं-शुभं, अवश्यं ध्यायति-चिन्तयतीति कल्याणध्यायिनी स्यात्। आवश्यके णिनिः। तथा, मृजा-स्नानक्रिया, अलङ्कारः-कटकादिः पुष्पादिर्वा, अलङ्क्रियते-भूष्यते शरीरमेभिरिति कृत्वा, एवं गन्धमाल्यस्याप्यलङ्कारत्वम्। तथा च वक्ष्यति (हृ. चि. अ. ५/८२)-"गन्धमाल्यादिकां भूषाम्" इति। मृजालङ्काराभ्यां रहिता-वर्जिता। तथा दर्भाणां संस्तरः-शय्या, तत्र शेते सा दर्भसंस्तरशायिनी। "व्रते" इति णीनिः। तथा, क्षैरेयं-क्षीरसिद्धं, यावकं-यवान्नविशेषं, पर्णे शरावे हस्ते वा भुञ्जीत-भक्षयेत्। कियन्मात्रम् ? स्तोकं-अल्पमात्रम्। तत्क्षैरेयमुपयुक्तं कीदृशं स्यात् ? इत्याह-कोष्ठशोधनकर्षणमिति। शोधनं च कर्षणं च शोधनकर्षणम्। कोष्ठस्य शोधनकर्षणमिति षष्ठीसमासः। शरीरस्य महास्रोतो मध्यमो भाग आमपक्वस्याशयः कोष्ठशब्दवाच्यः। स एव गर्भाधिष्ठानम्, अतस्तस्यैव शोधनम्। तथा, तदज्ञानां कर्षणमिति व्याख्येयम्। न पुनः कोष्ठस्य शोधनमन्येषां चाज्ञानां कर्षणम्। तथा हि-त्रिवृतादिना विरिच्यते, नैवमनेन यावकेन। वस्तुस्वाभाव्यात् कोष्ठशोधनकर्षणमात्रमेव क्रियते। क्षैरेयमिति "क्षीराड्ढञ्" इति ढञ्। याव एव यावक इति "यावादिभ्यः कन्" इति कन्। तथा, ब्रह्मचारिणी-त्यक्तव्यवाया, स्यात्।

चतुर्थेऽह्नि ततः स्नाता शुक्लमाल्याम्बरा शुचिः॥२५॥
इच्छन्ती भर्तृसदृशं पुत्रं पश्येत्पुरः पतिम्।

ततः-त्र्यहादूर्ध्वं,चतुर्थे वासरे स्नाता, तथा शुक्लानि माल्यन्यम्बराणि च यस्याः सैवम्, तथा शुचिः-अन्तर्बहिश्च पवित्रा सती, पुरः-पूर्वं, पतिं पश्येत्। सङ्ग्रहेऽप्युक्तम् (शा. अ. १)-चतुर्थे त्वहन्युद्वर्तिता शीतसलिलस्नाताऽनुलिप्ताऽलङ्कृता शुक्लमाल्याम्बरा कृतमङ्गलस्वस्त्ययनैवंविधमेव भर्तारं पश्येदनन्यमनाः। तदा हि यादृशं पश्यति चिन्तयति वा तादृशमेव प्रसूत इति।" इति।

तत्किं त्र्यहमेव ऋतुः, अत्रैव पुष्पदर्शनात्। अथोत्तरकालमपि ? इत्याशङ्क्याह-

ऋतुस्तु द्वादश निशाः पूर्वास्तिस्रोऽत्र निन्दिताः॥२६॥

एकादशी च, युग्मासु स्यात्पुत्रोऽन्यासु कन्यका।

पुष्पदर्शनात्प्रभृति यावद्वादशरात्रयस्तावदृतुर्योषितः, न पुनरत्र्यहमेव, यत्र पुष्पं प्रवर्तते, इति ऋतुशब्देन दर्शयति। अत्र-अस्मिन् द्वादशनिशावधावृतुकाले, याः पूर्वास्तिस्रो निशाः, यासु प्रायः पुष्पं प्रवर्तते, ता निन्द्याः-गर्ह्याः सद्भिः। न तत्र सन्मतिः स्त्रियं सङ्गच्छेत्। अत एवात्र ब्रह्मचारित्वोपदेशः। तथा, एकादशी निशा निन्द्या-अप्रशस्ता। चशब्दोऽत्रानुक्तायास्त्रयोदश्याः समुच्चयार्थः। त्रयोदश्यां हि मिथुनीभावे नपुंसकस्योत्पत्तिरिति केचिदाहुः। युग्मासु-चतुर्थषष्ठाष्टमदशमद्वादशलक्षणासु निशासु, सङ्गमे पुत्रः स्यात्, अचिन्त्यत्वादृतुभावस्य। तासु हि रात्रिष्वार्तवमल्पीभवति। अन्यासुअयुग्मासु निशासु पञ्चमीसप्तमिनवमीषु, कन्या जायते। तदा हि शुक्रमल्पीभवति, पूर्वोक्ताद्धेतोः। यदि पुनराहारादिवशात् शुक्रस्याधिकत्वमयुग्मासु, युग्मासु चार्तवपूर्णता स्यात्, तदा पुमान् स्त्र्याकृतिर्दुर्बलो हीनाङ्गो वा जायते, स्त्री च पुरुषाकृतिर्दुर्बला हीनाङ्गा वा। एकादशीत्रयोदश्योस्तु नपुंसकमिति। तदेवं दम्पती पुंगर्भमिच्छन्तौ युग्मासु निशासु पुंसवनादिकं कर्माचरेताम्, स्त्रीगर्भमिच्छन्तौ त्वयुग्मासु रात्रिषु।

उपाध्यायोऽथ पुत्रीयं कुर्वीत विधिवद्विधिम्॥२७॥

नमस्कारपरायास्तु शुद्राया मन्त्रवर्जितम्।

अथेत्यानन्तर्ये मङ्गलसूचको निर्दिष्टः। अत एवायमात्रार्थः-ऋतुकालादनन्तरं मङ्गलपूर्विकां सर्वामिमां वक्ष्यमाणामितिकर्तव्यतां कुर्यादिति। उपाध्यायः-पुरोहितोऽथर्ववेदवित्, पुत्रीयं-पुत्राय हितं, विधिमित्थं कुर्वीत। कथम्? विधिवत् न यथाकथञ्चित्। विधिवदिति प्रशंसायां मतुप्। क्रियाविशेषणं चैतत्, तेन प्रशस्तं वेदोक्तमन्यूनातिरिक्तविधानं यथा भवति तथाविधं कुर्वीतेत्यवतिष्ठते। ब्रह्माणदिवर्णत्रयस्येमंविधिं कुर्वीत। शूद्रायाः पुनर्नमस्कारपरायाः-नमस्कारप्रधानायाः, यथोक्तं सर्वं विधिं मन्त्रवर्जितं कुर्यात्। पुत्रीयमिति "पुत्राच्छ च" इति च्छः।

अवन्ध्य एवं संयोगः स्यादपत्यं च कामतः॥२८॥

एवं-यथोक्तविध्यनुष्ठाने, दम्पत्योर्यः संयोगो-मिथुनीभावः, स न वन्ध्यः स्यात्। अपि तु सफलो गर्भसम्भवहेतुर्भवेदित्यर्थः। न केवलं दम्पत्योःसंयोग एवं निष्फलो न भवेत्, अपत्यं च कामतः-यथाभिमतं पुंगर्भरूपं स्त्रीगर्भरूपं वा, स्यात्।

अत एवाह-

सन्तो ह्याहुरपत्यार्थं दम्पत्योः सङ्गतिं रहः।

रहःशब्देन ग्राम्यवचसाऽत्र ग्राम्यधर्मं सूचयति। हियस्मात्, सन्तः-साधवः, अपत्यार्थं-अपत्यजननाय, दम्पत्योः स्त्रीपुरुषयोः, रहः-एकान्ते, विशिष्टकालोचितं विशिष्टसंयोगं सङ्गतिमाहुः, न ग्राम्यसुखलिप्सायै।

न चापत्यमात्रायेत्याह-

दुरपत्यं कुलाङ्गारो गोत्रे जातं महत्यपि॥२९॥

दुष्टापत्यं स्त्रीगर्भः पुंगर्भो वा, महत्यपि गोत्रे जातं-उत्कृष्टेऽपि कुल उत्पन्नं, आङ्गारकार्यकरणसामर्थ्यात्समस्तत्कुलविनाशहेतुत्वात्कुलाङ्गार इत्युच्यते।

इच्छेतां यादृशं पुत्रं तद्रूपचरितांश्च तौ।

चिन्तयेतां जनपदांस्तदाचारपरिच्छदौ॥३०॥

तौ-दम्पती, यादृशं पुत्रमिच्छेतां-कामयेतां, तद्रूपचरितान् रूपं-वर्णसंस्थानप्रमाणशाकृत्यादि। तथा चरितं-श्रद्धाश्रुतसत्यार्जवानृशंस्यदानदयादाक्षिण्यस्वभावाति। तस्य-मनीषितस्य, सदृशे रूपचरिते येषां तान् जनपदान् चिन्तयेतां-ध्यायेतां। पुत्रशब्दोऽपत्यमात्रोपलक्षणार्थोऽत्र। तथा हि दुहितरमपि कश्चिदिच्छत्येव। किम्भूतौ तौ पितरौ? तदाचारपरिच्छदौ। आचरणं-आचारः, कुलानुरूपस्य देशानुरूपस्य चेतिकर्तव्यतालक्षणस्य कर्मणोऽनुष्ठानम्। परिच्छदो-

मनुजगवाश्वधनधान्यवस्त्रालङ्काररत्नरथायुधगृहोद्यानवीणापणवगायनशय्यास्तरणादिः। आचारश्च परिच्छदश्चाचारपरिच्छदौ। तदित्यनेनाभिलषितापत्यं परामृश्यते। तस्यैवाचारपरिच्छदौ ययोस्तौ दम्पती इच्छा सदृशरूपचरितान् जनपदान् ध्ययेताम्।

कर्मान्ते च पुमान् सर्पिःक्षीरशाल्योदनाशितः।

प्राग्दक्षिणेन पादेन शययां मौहूर्तिकाज्ञया॥ ३१॥

आरोहेत् स्त्री तु वामेन तस्य दक्षिणपार्श्वतः।

तैलमाषोत्तराहारा तत्र मन्त्रं प्रयोजयेत्॥ ३२॥

कर्मान्ते च-पुत्रीयविध्यनुष्ठानावसाने च, पुमान् स्त्रीतः प्राक्-पूर्वं, शय्यामारोहेत्-आक्रमेत्। किम्भूतः ? सर्पिःक्षीरशाल्योदनाशितः,-सर्पिर्मिश्रक्षीरशाल्योदनेनाशितो-भोजितः। कथमारोहेत् ? दक्षिणेन पादेन, मौहूर्तिकाज्ञया-ज्योतिः शास्त्रविदादिष्टः। स्त्री तु वामेन पादेन तस्य दक्षिणपार्श्वतः शय्यामारोहेत्, मौहूर्तिकाज्ञयेति योज्यम्। तुरवधारणे, उभयत्रापि। पुमान् दक्षिणेनैव पादेन प्रागेव, स्त्री पश्चादेव वामेनैव पादेन पुंसो दक्षिणपार्श्वत एव, शय्यामारोहेत्, नान्यथा कृत्वेति। "पुमान् सर्पिःक्षीरशाल्योदनाशितः" इत्युक्तम्। स्त्रियास्तु तत्कालोचितमाहारं निरूपयन्नाह-तैलेत्यादि। तैलं च माषश्च, ताभ्यामुत्तरः-अधिकः, आहारो यस्याः सैवम्। उत्तरशब्दोऽत्र तैलमाषौ पित्तलौ रक्तवृद्धिहेतू तयाऽयन्तं सेवितव्यौ, न पुनस्तथा शुक्रवृद्धिकराण्यन्यान्यपि क्षीरादीनि द्रव्याणिति प्रतिपादयति। तत्र च मन्त्रं वक्ष्यमाणं प्रयोजयेत्-पठेत्।

ॐ आहिरसि आयुरसि सर्वतः प्रतिष्ठासि धाताँ त्वां

दधातु विधाता त्वां दधातु ब्रह्मवर्चसा भवेति।

ब्रह्मा बृहस्पतिर्विष्णूः सोमः सूर्यस्तथाऽश्विनौ।

भगोऽथ मित्रावरुणौ वीरं ददतु मे सुतम्॥ ३३॥

आहिरसीत्यादि [वीरं ददतु मे सुतमित्यन्तं मन्त्रं पठेत्]

सान्त्वयित्वा ततोऽन्योन्यं संविशेतां मुदान्वितौ।
ऊत्ताना तन्मना योषित्तिष्ठेदङ्गैः सुसंस्थितैः॥३४॥

ततो-मन्त्रपाठादनन्तरं, परस्परं सान्त्वयित्बा-प्रियवचनादिना प्रीतिमुत्पाद्य, सावशेतां-मिथुनीभावं गच्छेताम्। किम्भूतौ? मुदा-हर्षेण, अन्वितौ-युतौ। तत्र च संवेशने योषिदुत्ताना तच्चित्ता चावयवैः सुसंस्थितैस्तिष्ठेत्।

किमेवंसति भवति ? इत्याह-

तथा हि बीजं गृह्णाति दोषैः स्वस्थानमास्थितैः।

हि-यस्मात्, तथा-तेन प्रकरेण, सा बीजं गृह्णाति, दोषैः-वातादिभिः स्वस्थानावस्थितैः सद्भिः। सङ्ग्रहे तूक्तम् (शा. अ. १)-"न चासावधस्तिष्ठेत्। तथा हि स्त्रीचेष्टः पुमान् जायते पुंचेष्टा वा स्त्री। न च न्युब्जां पार्श्वगतां वा सेवेत। न्युब्जाया वातो बलवान् स योनिं पीडयति। दक्षिणपार्श्वगायाः श्लेष्मा पीडितश्च्युतोऽपिदधाति गर्भाशयम्। वामपार्श्वगायास्तद्वत्पित्तं विदहति रक्तशुक्रे। तस्मादुत्ताना बीजं गृह्णीयात्।" इति।

लिङ्गं तु सद्योगर्भाया योन्या बीजस्य सङ्ग्रहः॥३५॥
तृप्तिर्गुरुत्वं स्फुरणं शुक्रास्राननुबन्धनम्।
हृदयस्पन्दनं तन्द्रा तृड्ग्लानिर्लोमहर्षणम्॥३६॥

सद्यः-तत्क्षणात्, गर्भो यस्याः सैवम्, तस्याः सद्योगर्भाया लक्षणं बीजस्य-गर्भाख्यस्य, योन्या-करणभूतया, सङ्ग्रहः सम्यग्ग्रहणम्। तथा, तृप्तिरिव तृप्तिः गुरुत्वं स्फुरणं च कुक्षेर्भवति। तथा, शुक्रं चास्रं च-शुक्रास्रे, अनुबन्धनं-प्रवर्तनम्, नानुबन्धनं-अननुबन्धनम्,

शुक्रास्त्रयोरप्रवर्तनं-शुक्रास्त्राननुबन्धनम्,-शुक्रास्त्रयोर्योनिमुखादवमनं बहिरनिःसरणम्, अत्र च योन्या गृहीतबीजत्वं हेतुः। तथा, हृदयस्पन्दनादयः पञ्च सद्योगर्भाया लक्षणानि भवन्ति। लोमहर्षणं हर्षवशाद्भवति। तथा च सङ्ग्रहे (शा. अ. २)-"प्रहर्षो हृल्लासः" इत्यादि।

इदानीं गर्भस्यावस्थाः प्रदर्शयितुमाह-

अव्यक्तः प्रथमे मासि सप्ताहात्कललीभवेत्।
गर्भः पुंसवनान्यत्र पूर्वं व्यक्तेः प्रयोजयेत्॥३७॥

सप्ताहादर्वाग्गर्भगोलकः श्लेष्मपिण्डीभुतो भवेत्। सप्ताहादनन्तरं यावन्मासस्तावदव्यक्ताकृतिः कललीभवेत्। अत्र कललीभूते यावत्स्त्रीपुरुषाद्युत्पत्तिलक्षणा व्यक्तिर्न भवति तावद्व्यक्तेः प्राक् प्रथमे मासि पुंसवनानि प्रयोजयेत्।

ननु, "शुद्धेशुक्रार्तवे सत्वः स्वकर्मक्लेशचोदितः। गर्भः सम्पद्यते"(श्लो.१) इत्युक्तम्। तत्र यदि प्राक्कृतेन कर्मणा स्त्रीगर्भः कुक्षिमाक्षिप्तस्तदा पुरुषप्रयत्ने सत्यपि पुंगर्भः कर्तुं न शक्यते। तस्मात्पुंसवनमनर्थकमेवेत्याशङ्क्याह-

बली पुरुषकारो हि दैवमप्यतिवर्तते।

हि-यस्मात्, पुरुषकारो बलवान् दुर्बलं दैवमतिवर्ततेअतिक्रम्य वर्तते। अपिशब्दात् पुरुषकारमपि दुर्बलं दिष्टं बलीयोऽतिक्रम्य वर्तत इति प्रतिपादयति। अत एव प्राक्कृतेन कर्माणा बलीयसाऽऽक्षिप्तस्य स्त्रीगर्भस्य पुंसवनादिदानेन पौरुषेण कर्मणा शतशोऽपि प्रयोजितेन न कथञ्चित्पुंगर्भता कर्तुं पार्यत इति। उक्तं च (चरके वि.अ. ३/३६)-"दैवं पुरुषकारेण दुर्बलं ह्युपहन्यते। दैवेन चेतरत्कर्म प्रकृष्टनोपहन्यते॥" इति। अत्र पुंसवनादि सम्यक् प्रयोजितं सिध्यसिध्यनुमीयमानं प्राक्कृतस्य कर्मणो हीनबलत्वप्रबलत्वमवगमयति।

अधुना पुंसवनादिप्रयोगमाह-

पुष्ये पुरुषकं हैमं राजतं वाऽथवाऽऽयसम्॥३८॥
कृत्वाऽग्निवर्णं निर्वाप्य क्षीरे तस्यञ्जलिं पिबेत्।

पुष्ये-पुष्यनक्षत्रयुक्ते काले, पुरुषकं-पुत्तलकं, हेमादिकृतमग्निवर्णं कृत्वा सुध्माततया, ततः क्षीरे निर्वाप्य-निवेश्य, तस्य-क्षीरस्य, अञ्जलिं-पलचतुष्टयाख्यं, पिबेत्। पुरुषकमिति पुरुष इवेत्यस्मिन्नर्थे "इवे प्रतिकृतौ" इति कन्। हैममिति हेम्नोविकारार्थेऽण् "नस्तद्धिते" इति टिलोपः। राजतमिति "प्राणिरजतादिभ्योऽञ् इत्यञ्। आयसमिति "तस्येदम्" इत्यण्।

गौरदण्डमपामार्गं जीवकर्षभसैर्यकान्॥३९॥
पिबेत्पुष्ये जले पिष्टनेकद्वित्रिसमस्तशः।

गौरदण्डादींश्चतुरो द्रव्यविशेषान् पिबेत्। किम्भूतान्? जले पिष्टान्-कल्कीकृतान्। कथं कृत्वा? एकद्वित्रिसमस्तशः एकादिषु प्रत्येकं शस्त्रत्ययार्थयोगः। तेनैकमेकं कृत्वा, द्वौ द्वौ कृत्वा, त्रींस्त्रीन्कृत्वा, चतुरश्चतुरः कृत्वा, एतान् पिबेदित्यर्थोऽवतिष्ठते। कदा प्राश्यम्? पुष्ये-पुष्ययुक्ते काले।

क्षीरेण श्वेतबृहतीमूलं नासापुटे स्वयम्॥४०॥
पुत्रार्थं दक्षिणे सिञ्चेद्वामे दुहितृवाञ्छया।

शुक्लपुष्पकण्टकारिकाया मूलं क्षीरेण कल्कीकृत्य स्वयं-स्त्री, दक्षिणे नासापुटे पुत्रार्थं-पुत्रसम्पत्तये, सिञ्चेत्। दुहितृवाञ्छया-सुताकाम्यया, वामे नासापुटे सिञ्चेत्।

पयसा लक्ष्मणामूलं पुत्रोत्पादस्थितिप्रदम्॥४१॥

नासयाऽऽस्येन वा पीतं वटशुङ्गाष्टकं तथा।

ओषधीर्जीवनीयाश्च बाह्यान्तरुपयोजयेत्॥४२॥

पयसा-क्षीरेण, लक्ष्मणामूलं कल्कीकृत्य पीतं पुत्रोत्पादप्रदं पुत्रस्थितिप्रदं च भवति। कथं पीतम्? नासयाऽऽस्येन वा, कदाचिन्नासिकया कदाचिदास्येन। यस्याः पुत्रो नोत्पद्यते तथोत्पन्नो वा स्थितिं न लभते-चिरं न जीवति, तयैवं पातव्यमित्यर्थः। वटशुङ्गाष्टकं तथा-तेनैव प्रकारेण नासया आस्येन वा पीतं पुत्रोत्पादस्थितिप्रदं भवति। न्यग्रोधस्य प्रथमोद्भिन्नः प्ररोहो-वटशुङ्गः, तस्याष्टकमिति। प्रभावस्याचिन्त्यत्वादेतत्सङ्ख्यावच्छिन्नत्वम्। जीवनीया या ओषध्यो-जीवन्तीकाकोल्याद्या दश, याः शोधनादिगणसङ्ग्रहोक्ताः (ह्.सू.अ.१५/८), ता बाह्यान्तरुपयोजयेत्। तत्र स्नानोद्वर्तनादिना बाह्य उपयोगः, आहारपानादिनाऽन्तरुपयोगः।

उपचारः प्रियहितैर्भर्त्रा भृत्यैश्च गर्भधृक्।

नवनीतघृतक्षीरैः सदा चैनामुपाचरेत्॥४३॥

उपचारः-उपचरणम्। प्रियाः-इष्टाः, हिताः-पथ्याः, आहारविहाराः, तैः प्रियहितैर्य उपचारो भर्त्रा-पथ्या कृतो, भृत्यैश्च य एवंभूतः कृतः, स गर्भधृक्-तदनुष्ठानाद्गर्भः स्थितिं दधातीत्यर्थः। एनां च स्त्रियं नवनीतादिभिर्यथासात्म्यं सदोपाचरेत्।

अतिव्यवायमायासं भारं प्रावरणं गुरु।

अकालजागरस्वप्नं कठिनोत्कटकासनम्॥४४॥

शोकक्रोधभयोद्वेगवेगश्रद्धाविधारणम्।

उपवासाध्वतीक्ष्णोष्णगुरुविष्टम्भिभोजनम्॥४५॥

रक्तं निवसनं श्वभ्रकूपेक्षां मद्यमामिषम्।

उत्तानशयनं यच्च स्त्रियो नेच्छन्ति तत्त्यजेत्॥४६॥

तथा रक्तस्रुतिं शुद्धिं बस्तिमामासतोऽष्टमात्।

एभिर्गर्भः स्रवेदामः कुक्षौ शुष्येन्म्रियेत वा॥४७॥

गर्भिणी स्त्री अतिव्यवायादीनुत्तानशयनान्तांस्त्यजेत्। न केवलमेतान् अन्यद्यच्चाहारविहारादिवस्तुजातं स्त्रियो-बहुशः प्रसूतास्तत्कालव्यापारनिपुणा वा याः काश्चन स्त्रियो, नेच्छन्ति तदपि वर्जयेत्। तथा रक्तस्रुतिं, शुद्धिं च-वमनविरेचनरूपां, वर्जयेत्। बस्तिं-अनुवासनं, अष्टमं मासं मर्यादीकृत्य वर्जयेत्। आष्टमे तु मासे बस्तिं प्रयोजयेदेवेत्यर्थः। एभिः-वर्ज्यैर्वस्तुभिरासेव्यमानैः, गर्भ आमः-असम्पूर्णः, स्रवेत्-पतेत्, कुक्षौ वा शुष्येत्, म्रियेत वा-मृत्युं वा गर्भः प्राप्नुयात्।

वातलैश्च भवेद्गर्भः कुब्जान्धजडवामनः।

पित्तलैः खलतिः पिङ्गः श्वित्री पाण्डुः कफात्मभिः॥४८॥

वातलैश्चाहारैर्मात्रा सेवितैः कुब्जोऽन्धो जडो वामनो वा गर्भो भवति। पित्तलैराहारैर्मात्रा सेवितैः खलतिः-खल्वाटः, पिङ्गो वा स्यात्। कफकृद्भिराहारैर्मात्रा सेवितैः श्वित्रवान् पाण्डुर्वा स्यात्।

व्याधींश्चास्या मृदुसुखैरतीक्ष्णैरौषधैर्जयेत्।

अस्याश्च-गर्भिण्याः, ये व्याधयो जायन्ते, तान् व्याधीन् मृदुसुखैरौषधैस्तथाऽतीक्ष्णैर्जयेत्। मृदूनि च तानि सुखानि च-मृदुसुखानि। मृदूनि-अकर्कशानि वीर्यादिभिर्नात्कृष्टसामर्थ्यानि सुकुमारोचितानि। मुखानि-सुखोपभोग्यानि, प्रियाणीति यावत्। ननु, मृदूनि परिहृत्यातीक्ष्णानि चेति निर्देष्टव्यम्। किमुभयोरुपादानेन? यतो मृदूनि-अकर्कशानि, अतीक्ष्णान्यपि-अकर्कशानि, इत्यनर्थान्तरत्वमेतयोः। अत्रोच्यते। मृदूनि-अकर्कशानि शर्करादीनि, उत्कृष्टशक्तीनि मरिचादीनि-अतीक्ष्णानि, तिक्ष्णानि पुनस्तीक्ष्णगुणयुक्तानि राजिकादीनि दोषोत्क्लेशकराणि भेषजानि भवन्ति, इति द्वयोरुपादानं युक्तम्। तन्त्रान्तरे (सङ्ग्रहे) त्वेवमुक्तम् (शा.अ.२)-"इत्यनात्ययिके व्याधौ विधिरात्ययिके पुनः। तीक्ष्णैरपि क्रियायोगैः स्त्रियं यन्त्रेन पालयेत्॥" इति। यच्च व्यवायादि गर्भिण्याः

परिहार्यत्वेन निर्दिष्टम्, तथा "व्याधींश्चास्या मृदुसुखैरतीक्ष्णैरौषधैर्जयेत्।" इति। तदस्मिन् काले विशेषेणेति द्रष्टव्यम्, न तथाऽन्यदा। तथा चान्यदाऽतिव्यवायादिसेवनान्न तथा प्रत्यवायभयम्, तथा तीक्ष्णौषधप्रयोगाच्च। अत एव "तथा रक्तस्रुतिं शुद्धिं बस्तिमामासतोऽष्टमात्।" इत्येतत्पृथङ्निर्दिशत्यतिव्यवायादिपरिहार्यगणमध्ये।

प्रथमे मास्यत्यक्तलिङ्गः कललावस्थो गर्भो भवेत्। द्वितीये तु मासि गर्भः कीदृशः स्यात्? इत्याह-

द्वितीये मासि कललाद्घनः पेश्यथवाऽर्बुदम्॥४९॥

पुंस्त्रीक्लीबाः क्रमात्तेभ्यः

द्वितीये मासि कललाद्घनः पेश्यथवाऽर्बुदं गर्भः स्यादिति योज्यम्। तेभ्यो-घनादिरूपेभ्यः, क्रमात्-परिपाट्या, पुंस्त्रीक्लीबाः सम्पद्यन्ते। घनात् पुमान्। पेश्याः स्त्री। अर्बुदात् क्लीबः-षण्ढो, न स्त्री न पुमानिति।

तत्र व्यक्तस्य लक्षणम्।

क्षामता गरिमा कुक्षेर्मूर्च्छा च्छर्दिररोचकः॥५०॥

जृम्भा प्रसेकः सदनं रोमराज्याः प्रकाशनम्।

अश्लेष्टता स्तनौ पीनौ सस्तन्यौ कृष्णचूचुकौ॥५१॥

पादशोफो विदाहोऽन्ये श्रद्धाश्च विविधात्मिकाः।

तत्र-व्यक्ताव्यक्तयोर्मध्यात्, व्यक्तो निर्धार्यते। व्यक्तस्य गर्भस्य वक्ष्यमाणं लक्षणं क्षामतेत्यादिकम्। गरिमेति गुरोर्भाव इति "पृथ्वादिभ्य इमनिज्वा" इतीमनिच्, "प्रियस्थिर" इत्यादिना गरादेशः। विदाहोऽन्य इति। अन्ये आचार्या विदाहो देहे भवतीत्याहुः। नानाप्रकाराश्च श्रद्धाः-पथ्यापथ्यविषया अभिलाषाः, व्यक्तस्य गर्भस्य लक्षणम्। सङ्ग्रहे

तूक्तम् (शा.अ.२)-"तस्याश्च रजोवाहिनां स्रोतसां वर्त्मान्युपरुध्यन्ते गर्भेण। तस्मात्ततः परमार्तवं न दृश्यते। ततस्तदधः प्रतिहतमपरमपरं चोपचीयमानमपरेत्याहुः।" इति।

गर्भिण्याश्च श्रद्धासूत्पन्नासु किमपथ्यं तस्यै देयं न वा ? इत्येवं संदेहे तद्युदासार्थमाह-

मातृजं ह्यस्य हृदयं मातुश्च हृदयेन तत्॥५२॥

सम्बद्धं तेन गर्भिण्या नेष्टं श्रद्धाविमाननम्।

हि-यस्मात्, अस्य-गर्भस्य, यद्धृदयं-चेतनाधिष्ठानं, तन्मातृजम्। तथा चोक्तम् (हृ. शा.अ.३/४)-"मृद्धत्र मातृजं रक्त" इत्यादि। तच्च-गर्भहृदयं, मातृहृदयेन सम्बद्धं-संयुक्तं, भवति। ततश्च गर्भिणीहृदयेन सन्तप्तेन गर्भहृदयमपि सन्तप्यते। परस्परं हृदयस्य सम्बद्धत्वात्। अत एव च गर्भिणी द्विहृदया दौर्हृदिनीत्युच्यते। अत एव च परायत्तहृदयत्वात्तत्कालेस्वस्वभावोचितमभिलाषं विहाय नानाभिलाषो जायते। यतश्चैवं तेन कारणेन गर्भिण्याः श्रद्धाविमाननं-आभिलाषाप्रतिपूरणं, नेष्टम्।

तदर्थमाह-

देयमप्यहितं तस्यै हितोपहितमल्पकम्॥५३॥

तस्यै-गर्भिण्यै, हितेन-पथ्येन, युक्तमहितं-अपथ्यमपि विदाहिविष्टम्भ्यादि पूर्वनिषिद्धं यत्तदपि, देयम्। अपिशब्देनकिमु तस्यै प्रार्थ्यमानायै हितं देयमिति गमयति। किं मात्रामनपेक्ष्यैवाहितं देयम् ? नेत्याह। अल्पकं-अतिशयेनाल्पम्।

ननु, यद्यहितं तत्कस्माद्दीयते ? इत्याह-

श्रद्धाविघाताद्गर्भस्य विकृतिश्च्युतिरेव वा।

यदि चिरकालोषितः कुक्षौ गर्भस्तदा तस्य गर्भस्य विकृतिःवैरूप्यं भवेत्, श्रद्धाविमाननचिन्तानिदानकुपितसमीरत्वात्। तथाऽचिरोषितो गर्भस्तदा तस्य गर्भस्य च्युतिः-विनाशो भवेत्, अत एव श्रद्धाविमाननचिन्तानिदानकुपितपवनत्वाद्धेतोः। लब्धदौर्हृदा तु वीर्यवन्तं चिरायुषं च सुतं सूते।

व्यक्तीभवति मासेऽस्य तृतीये गात्रपञ्चकम्॥५४॥

मूर्द्धा द्वे सक्थिनी बाहू सर्वसूक्ष्माङ्गजन्म च।

सममेव हि मूर्द्धाद्यैर्ज्ञानं च सुखदुःखयोः॥५५॥

अस्य-गर्भस्य, तृतीये मासि गात्रपञ्चकं व्यक्तीभवति,-अव्यक्तरूपं व्यक्तं तदानीं तदानीं सम्पद्यत इत्यर्थः। तदेव पञ्चाङ्गमाह मूर्द्धा द्वे सक्थिनी बाहू इति। सर्वेषां सूक्ष्माणां चाङ्गानां चेतनाधिष्ठानानां जन्म-उत्पतिः, अन्यत्र जन्मोत्तरकालजेभ्यो दन्तादिभ्यः। तथा, सममेव-तुल्यकालमेव, मूर्द्धाद्यैः सुखदुःखयोर्ज्ञानं भवति,-तदानीं सुखसंविद्दुःखसंविच्च गर्भस्य जायत इत्यर्थः। चः समुच्चये। हिर्यस्मादर्थे।

अत्र मात्राऽभ्यवहृताभ्यामन्नपानाभ्यां कथं गर्भो वर्द्धते ? इत्याह-

गर्भस्य नाभौ मातुश्च हृदि नाडी निबध्यते।

यया स पुष्टिमाप्नोति केदार इव कुल्यया॥५६॥

एकैव नाडी गर्भस्य नाभौ मातुश्च हृदये निबध्यते-अदृष्टवशात्संश्लिष्यते। यया-नाड्या, सः-गर्भः पुष्टिमाप्नोति आवहति। क इव ? केदार इव कुल्यया,-लघुनद्या जलं वहन्त्या केदारस्थः शाल्यादिर्यथाऽभिवर्द्धते, तथैव मातृहृदया श्रितया नाड्या मात्राऽभ्यवहृतादाहा-राज्जाठराग्निना पच्यमानात् प्रसादाख्येन रसेन। यस्मात् "व्यक्तीभवदङ्गप्रत्यङ्गस्य [अस्य] नाभ्यां प्रतिबद्धा नाडी, नाड्यामपरा, तस्यां मातृहृदयम्। ततो मातृहृदयादाहाररससारो धमनीभिः स्यन्दमानोऽपरामुपैति। ततः क्रमान्नाभिं च। ततश्च स पुनर्गर्भस्य पक्वाशये [स्व] कायाग्निना पच्यमानः प्रसादबाहुल्याद्धात्वादि पुष्टिकरः सम्पद्यते। तथा रोमकूपैरुपस्नेह एव प्रविशति। (स्नेहो रस एव च पयोभूतः। अजातस्य) साक्षादन्नपानाननुप्रवेशात् रसस्य वा समलत्वाभावात् (अमलत्वाच्च रसस्य) गर्भस्य स्थूलमूत्रपुरीषाद्यसम्भवः।" (सं.शा.अ.२)।

चतुर्थे व्यक्तताऽङ्गानां, चेतनायाश्च पञ्चमे।

गर्भस्येत्यनुवर्तते। चतुर्थे मासि गर्भस्य सर्वेषामङ्गानां सूक्ष्मत्वादव्यक्तरूपाणां व्यक्तता भवति। चेतनायाः पुनर्मनोद्वितीयनामिकाया अव्यक्तरूपायाः पञ्चमे मासि व्यक्तता जायते।

षष्ठे स्नायुसिरारोमबलवर्णनखत्वचाम्॥५७॥

षष्ठे मास्यव्यक्तरूपाणां स्नाय्वादीनां व्यक्तता जायते।

सर्वैः सर्वाङ्गसम्पूर्णो भावैः पुष्यति सप्तमे।

सप्तमे मासि सर्वैः-सकलैः, भावैः-वस्तुभिः, सर्वाङ्गसम्पूर्णो गर्भः पुष्यति-पोषं याति। अङ्गसम्पूर्णः पुष्यतीत्येतावतैव प्रकृतार्थावगतेः सर्वग्रहणमधिकार्थद्योतनाय। तेन सर्वेण जन्मजीवनलक्षणेनार्थोनाङ्गैश्च सम्पूर्णो भवतीत्यवतिष्ठते। अकालप्रसवत्वात्तु न तथा गर्भस्य जन्मजीवनलक्षणो योऽसावर्थः सोऽप्यस्मिन् भवतीति ज्ञाप्यते। तथा चास्मिन् मासि गर्भो जातो जीवति, किन्त्वकालप्रसवत्वान्न तथा दीर्घजीवितत्वादिकं स्यात्। वक्ष्यति हि (श्लो.६६)-"कालः सूतेरतः परम्" इति। अमुमेव च न्यायं चेतसि विधायाष्टमे मास्योजःस्वरूपनिगदनप्रस्तावे "जातो न जीवति शिशुः" इति वक्ष्यति (श्लो. ६३)। अन्यथाऽकालप्रसवत्वादेवास्मिन् गर्भस्य जीवनं न सम्भाव्यत एव। "जातो न जीवति" इत्येतद्वाक्यमनर्थकमिव स्यात्। तस्मात्सप्तमे मासि जातो जीवतीति सुप्रतिपादितमेतत्।

गर्भेणोत्पीडिता दोषास्तस्मिन् हृदयमाश्रिताः।

कण्डूं विदाहं कुर्वन्ति गर्भिण्याः किक्किसानि च॥५८॥

गर्भेणोत्पीडिताः-ऊर्ध्वं पीडिताः, दोषाः-वातादयः, तस्मिन् काले हृदयमाश्रिता गर्भिण्याः कण्डूं विदाहं [च] कुर्वन्ति। तथा, किक्किसानि कुर्वन्ति। ऊरुस्तनोदरे वलिविशेषा रेखाकारास्तत्काले प्रायो ये जायन्ते ते-किक्किससंज्ञाः। कैश्चित् 'शुकैरिव पूर्णता-किक्किसानि' इति व्याख्यायि। पाणिपादां समूलेषु विविधः सन्तापो-विदाह उच्यते।

नवनीतं हितं तत्र कोलाम्बुमधुरौषधैः।

सिद्धमल्पपटुस्नेहं लघु स्वादु च भोजनम्॥५९॥

चन्दनोशीरकल्केन लिम्पेदूरुस्तनोदरम्।

श्रेष्ठया वैणहरिणशशशोणितयुक्तया॥६०॥

अश्वघ्नपत्रसिद्धेन तैलेनाभ्यज्य मर्दयेत्।

पटोलनिम्बमञ्जिष्ठासुरसैः सेचयेत्पुनः॥६१॥

दार्वीमधुकतोयेन मृजां च परिशीलयेत्।

तत्र-तेषु कण्ड्वादिषु, उपशमार्थं नवनीतं हितम्, अन्तर्बहिश्चोपयोगितया। कीदृशम्? कोलाम्बुना मधुरौषधैः द्राक्षादिभिश्च कल्कीकृतैः, सिद्धं-पक्वम्। तथा, तत्र भोजनं हितम्। किम्भूतम्? अल्पं पटु-लवणं, स्नेहश्च यत्र तदेवम्। तथा, लघु-मात्रास्वभावाभ्याम्। तथा, स्वादु-मधुरम्। तथा, चन्दनोशीरयोर्यः कल्कः-पिष्टो जलेनालोडितः, तेमोरुस्तनोदरं लिम्पेत्। श्रेष्ठया वा-त्रिफलया वा, ऊरुस्तनोदरं लिम्पेत्। किम्भूतया? एणादिरुधिरपिष्टया। तथा, अश्वघ्नपत्रसिद्धेन तैलेनाभ्यज्य-अभ्यक्तमङ्गं कृत्वा, अनन्तरं पटोलनिम्बमञ्जिष्ठासुरसैर्मर्दयेत्। अश्वघ्नः-करवीरः। सेचयेत्पुनः-परिषेकं च कुर्यात्। दार्वीमधुकतोयेन-दारुहरिद्रामधुयष्टिकाभ्यां क्थितेन जलेन, मृजां-शुद्धिं स्नानादिकां, शीलयेत्। सङ्ग्रहे तूक्तम् (शा.अ.३)-"परिषेकः पुनर्मालतीमधुकसिद्धेनाम्भसा। कण्डूयनं वर्जयेत् त्वग्भेदवैरूप्यपरिहारार्थम्। स्नानोद्वर्तनं च शीलयेत्। मधुरं चाहारमल्पमल्पस्नेहलवणमल्पोदकानुपानं भुञ्जीत।" इति।

इदानीमष्टमे मासि गर्भस्वरूपं तत्रेतिकर्तव्यतां चाचष्टे-

ओजोऽष्टमे सञ्चरति मातापुत्रौ मुहुः क्रमात्॥६२॥

तेन तौ ह्लानमुदितौ तत्र जातो न जीवति।

शिशुरोजोनवस्थानान्नारी संशयिता भवेत्॥६३॥

ओजः-सर्वधातूनां तेजः कर्तृ, मातापुत्रौ कर्मभूतौ, सञ्चरति। माता च पुत्रश्चेति द्वन्द्वः। "आनङृतो द्वन्द्वे" इत्यानङादेशः। कथं सञ्चरति? मुहुर्मुहुः। क्रमात्-क्रमेण, कदाचिद्गर्भिणीमोजः सञ्चरति कदाचित्पुत्रमिति। एवं [तेन-] कदाचित्केनौजःसञ्चरणेन, तौ-मातापुत्रौ, ग्लानमुदितौस्याताम्। तया पूर्वनिरुपितया गर्भगर्भिण्युभयसम्बद्धया नाड्योभयत्र सञ्चरत्तदोज उभयसम्बद्धं यदा गर्भं सञ्चरति तदा गर्भो मुदितो-हृषितो, भवेदोजःसम्पत्त्या, गर्भिणी च ग्लाना भवेत्। यदा च तदोजो गर्भिणीं सञ्चरति तदा तयैवोजः सम्पत्त्या गर्भिणी मुदिता भवेत्, शिशुर्ग्लानो भवेदोजः सम्पत्त्यभावात्। [तत्र-] तस्मिन् काले, शिशुः-बालो, जातः-उत्पन्नो, न जीवति। कुतः ? ओजोनवस्थानात्। ओजसस्तदानीं शिशावनवस्थितत्वात्, -अचिरकालप्ररूढत्वादोजसः। गर्भिण्यां तु न सर्वमचिरकालमनवस्थितमोजः, यथा गर्भे। तस्मान्न तस्या निरोजस्त्वम्। अत एवाह-नारीसंशयिता भवेत्,-कदाचिज्जीवति कदाचिन्न जीवतीति संशयितार्थः।

क्षीरपेया च पेयाऽत्र सघृताऽन्वासनं घृतम्।

मधुरैः साधितं शुद्ध्यै पुराणशकृतस्तथा॥६४॥

शुष्कमूलककोलाम्लकषायेण प्रशस्यते।

शताह्वाकल्कितो बस्तिः सतैलघृतसैन्धवः॥६५॥

अत्र-अष्टमे मासि, क्षीरसंस्कृता पेया पातव्या। किम्भूता? सघृता। तथा, अन्वासनं घृतं शस्यते। कीदृक्? मधुरैः-द्राक्षादिभिः, साधितं-पक्वम्। तथा-तेनैव प्रकारेण, पुराणशकृतः शुद्ध्यर्थं, बस्तिः-निरूहः , प्रशस्यते-युज्यते। तत्र च बस्तौ कः कषायः ? कः कल्कः? इत्याह-शुष्कमूलकेति। शुष्कमूलकादीनां कषायेण, तथा शताह्वाकल्कितः, तथा सह तैलेन घृतेन सैन्धवेन च।

तस्मिंस्त्वेकाहयातेऽपि कालः सूतेरतः परम्।

एकं च तदहश्चैकाहम्। "राजाहःसखिभ्यष्टच्" इति टच्। "अह्नष्टखोरेव" इति टिलोपः। एकाहेन यातोऽतिक्रान्तोऽन्तरितोऽष्टमो मासः-एकाहयातः, [तस्मिन्।] तस्मिन्-

अष्टमेमासि, पुनरेकदिवसातिक्रान्तेऽप्यतः परं सूतेः-प्रसवस्य, कालो यावद्वर्षम्। अपिशब्दाद्याते त्वष्टमे मास्यतः परं सूतेः काल इति गम्यते। अष्टमान्मासादनन्तरं नवमदशमैकादशद्वादशमासान् यावत्। एषु मासेषु गर्भो जातो दीर्घायुष्ट्वादियुक्तो जीवति।

वर्षाद्विकारकारी स्यात्कुक्षौ वातेन धारितः॥६६॥

वर्षादित्यानन्तर्ये पञ्चमी। वर्षात्-द्वादशमासादनन्तरं, गर्भः कुक्षौ वातेन धारितो-रुद्धनिष्क्रमणो, विकारकारी भवेत् विकारमवश्यं करोति। गर्भस्य सन्निवेशोऽपि सङ्ग्रहे प्रोक्तः, यथा (शा. अ. २)-"गर्भस्तु मातृपृष्ठाभिमुखो ललाटे कृताञ्जलिः सङ्कुचिताङ्गो गर्भकोष्ठे दक्षिणम् पार्श्वमाश्रित्यावतिष्ठते पुमान्, वामं स्त्री, मध्यं नपुंसकम्। तत्र स्थितश्च गर्भो मातरि स्वपत्यां स्वपिति प्रतिबुद्धायां प्रतिबुध्यते।" इति।

शस्तश्च नवमे मासि स्निग्धो मांसरसौदनः।
बहुस्नेहा यवागूर्वा पूर्वोक्तं चानुवासनम्॥६७॥

नवमे मासि स्निग्धो मांसरसयुक्त ओदनः शस्तो-हितः। अथवा, पेया बहुस्नेहा शस्तेति लिङ्गविपरिणामेन सम्बन्धः। पूर्वोक्तमनुवासनं-"घृतं मधुरैः साधितं" इत्यादि, तच्च शस्तम्।

तत एव पिचुं चास्या योनौ नित्यं निधापयेत्।
वातघ्नपत्रभङ्गाम्भः शीतं स्नानेऽन्वहं हितम्॥६८॥

तत एव-अन्वासनघृतात्, पिचुं-नक्तकं, अस्याः-गर्भिण्याः, योनौ नित्यं-सदा, निधापयेत्-तत्र स्थापयेत्, वातविजयार्थम्। पवनेनानाक्रान्तयोनिर्हि सुखं गर्भं सूते। तथा, वातघ्नानां द्रव्याणां पत्राणि, तेषां भङ्गः-समूहः, तेन क्वथितमम्भः शीतं कृत्वा स्नानेऽन्वहं-अहरहः, गर्भिण्यै हितम्। अन्वहमित्यनश्चेति टच्।

निःस्नेहाङ्गी न नवमान्मासात्प्रभृति वासयेत्।

निःस्नेहगात्रां गर्भिणीं न वासयेत्, अपि तु सस्नेहाङ्गीं स्थापयेत्। निःशेषेण निरस्तः स्नेहो यस्मादङ्गात्तदेवं निःस्नेहमङ्गं यस्याः सा निःस्नेहाङ्गी, ताम्। अङ्गगात्रकण्ठेभ्यो वक्तव्यमितिङीप्। कुतः कालादारभ्य? नवमान्मासात्प्रभृति। यद्यपि कालोऽत्र न निर्दिष्टः, तथाऽपि नवमान्मासादारभ्य सामर्थ्याद्यावन्मुक्तगर्भशल्या स्यात्, तावन्निःस्नेहाङ्गीं गर्भिणीं न स्थापयेदिति लभ्यते। सस्नेहाङ्गधारणं च तस्याः कुपितवायोर्नित्यं सन्निहितत्वात्।

इदानीम् गर्भिण्या यैर्लक्षणैरव्यभिचारिभिः पुत्रदुहितृनपुंसकयमकप्रसवोऽनुमीयते, तान्याह _

प्राग्दक्षिणस्तनस्तन्या पूर्वं तत्पार्श्वचेष्टिनी॥ ६९॥

पुन्नामदौर्हृदप्रश्नरता पुंस्वप्नदर्शिनी।

उन्नते दक्षिणे कुक्षौ गर्भे च परिमण्डले॥ ७०॥

पुत्रं सूतेऽन्यथा कन्यां या चेच्छति नृसङ्गतिम्।

नृत्यवादित्रगान्धर्वगन्धमाल्यप्रिया च या॥ ७१॥

प्राक्-पूर्वं, दक्षिणे स्तने स्तन्यं-क्षीरं, यस्याः प्रादुर्भवति सा पुत्रं सूत इति सम्बन्धः। तथा, पूर्वं तत्पार्श्वचेष्टिनी। तच्चब्देन दक्षिणपार्श्वं परामृश्यते। तेन-दक्षिणेन पार्श्वेन, चेष्टितं-गमनस्वपनादिकं, यस्याः सा-तत्पार्श्वचेष्टिनी, पुत्रं सूत इति सर्वत्र योज्यम्। तथा गच्छन्त्याः पूर्वं दक्षिणपादोत्क्षेपः, हस्तकरणीये च पूर्वं दक्षिणेन पाणिना चेष्टते, इति तत्पार्श्वचेष्टा बोध्या'। पुन्नामेत्यादि। पुंलिङ्गोपलक्षितं नाम-पुन्नाम, दौर्हृदं च प्रश्नश्च दौर्हृदप्रश्नौ। पुन्नाम्नोर्दौर्हृदप्रश्नयो रताअभियुक्ता, पुन्नाम्नि दौर्हृदे रता। दौर्हृदकाले योऽभिलाषविशेषो गर्भिण्याः स दौर्हृदशब्दवाच्यः। तथा, पुन्नाम्नि प्रश्नेऽभिरता-पुनः पुनः पुन्नामप्रश्नं करोति। तथा, पुन्नामधेयान् स्वप्नान्-पुरुषगजवाजिवराहादीन् आम्रदाडिमाशोकवृक्षादीन् वा, द्रष्टुं शीलं यस्याः सैवम्। तथा, उन्नते दक्षिणे गर्भकोष्ठाख्ये कुक्षौ। तथा, गर्भे-गर्भसंस्थाने, परिमण्डले-वर्तुले सति, पुत्रं सूते। अन्यथा-पुत्रप्रसवसूचकाद्धेतोर्वैपरीत्ये च, कान्यां सूते। यथा-प्राग्दक्षिणस्तनस्तन्येत्यादि पुत्रप्रसवसूचकं लक्षणम्, अतोऽन्यथा प्राग्वामस्तनस्तन्येत्यादि लक्षणं गर्भिण्याः कन्याप्रसवसूचकम्। न केवलं पुत्रप्रसवलक्षणाद्विपर्ययेण कन्यां सूते, यावत्

या चेच्छति नृसङ्गतिम्। या च-गर्भिणी पुरुषेण सह सङ्गतिमिच्छति-कामयते, सा कन्यां सूते। तथा या च नृत्यादिप्रिया सा कन्यां सूते।

इदानीम् षण्ढप्रसवलक्षणमाह-

क्लीबं तत्सङ्करे, तत्र मध्यं कुक्षेः समुन्नतम्।

तदित्यनेनात्र पुत्रप्रसूतिलक्षणं दुहितृप्रसूतिलक्षणं च द्वयमपि परामृश्यते। द्वयस्यैतस्य लक्षणस्य सङ्करे-सङ्कीर्णलक्षण तायां, क्लीबं-नपुंसकं गर्भं, सूते। तत्र-तस्मिन् क्लीबे गर्भे कुक्षिस्थिते, कुक्षेर्मध्यं समुन्नतं भवति।

यमौ पार्श्वद्वयोन्नामात्कुक्षौ द्रोण्यामिव स्थिते॥७२॥

यमौ द्वौ गर्भौ, गर्भिणी सूते। कथमिति तल्लक्षणार्थमाह पार्श्वद्वयोन्नामात्, -पार्श्वद्वयोत्सेधात्। अत एव कुक्षौ-उदरे, द्रोण्यामिव स्थिते। द्रोणी-मध्यनिम्ना, कुक्षिरपि पार्श्वद्वयोन्नत्या मध्यनिम्ना भवति।

प्राक् चैव नवमान्मासात् सा सूतिगृहमाश्रयेत्।
देशे प्रशस्ते सम्भारैः सम्पन्नं साधकेऽहनि॥७३॥

सा-गर्भिणी, सूतिगृहं-सूतिकागारं, नवमान्मासात्पूर्वमेवाश्रयेत्। कुत्र देशे कृतम्? इत्याह-देशे प्रशस्ते,-प्राक्प्रवण उदक्प्रवणे वा, वास्तुविद्याविद्भिः परिक्ष्य कल्पितम्। कीदृशम्? सम्भारैः सम्पन्नं,-सकलैरुपकरणैर्युक्तम्। तथा, साधकेऽहनिशुभपुंनक्षत्रे दिवसे सति।

तत्रोदीक्षेत सा सूतिं सूतिकापरिवारिता।

तत्र-सूतिकागृहे, स्थिता सूतिमुदीक्षेत,-अहमत्र प्रसविष्य इति चेतसि निधाय सा-गर्भिणी, तत्रासीतेत्यर्थः। किम्भूता? सूतिकापरिवारिता,-अनेकवारप्रसवानुभूत-तत्कालोचितव्यवहारकुशलाभिः स्त्रीभिः परिवारिता। सङ्ग्रहे तूक्तम् (शा. अ. ३) "बहुशः प्रसूताभिरनुरक्ताभिरविषादिनीभिरविसंवादिनीभिःक्लेशसहाभिः परिवृता स्वस्त्ययनपराऽनुलोमनैराहारविहारैरनुलोमितवातमूत्रपुरीषा प्रसवकालमुदीक्षेत। स्वल्पेऽपि च विण्मूत्रविबन्धे फलवर्तीः प्रयोजयेत्।" इति।

इदानीमासन्नप्रसवाया लक्षणमाह-

अयश्वःप्रसवे ग्लानिः कुक्ष्यक्षिश्लथता क्लमः॥७४॥

अधोगुरुत्वमरुचिः प्रसेको बहुमूत्रता।

वेदनोरूदरकटीपृष्ठहृद्वस्तिवङ्क्षणे॥७५॥

योनिभेदरुजातोदस्फुरणस्रवणानि च।

अद्य वा श्वो वा आसन्नः प्रसवः, तस्मिन् आसन्न (अद्यश्वः)-प्रसवे ग्लान्यादयो भवेयुः, गर्भिण्या इति सम्बन्धः। ग्लानिः-हर्षक्षयः। तथा, कुक्षी चाक्षिणी च कुक्ष्यक्षि, तस्य श्लथता शिथिलत्वं, स्वस्थानाच्चलितत्वमिव। तथा, क्लमः-उपतापः। तथा, अधोगुरुत्वादीनि भवन्ति। तथा, अधोगुरुत्वादीनि भवन्ति। तथा,ऊर्वादिषु वेदनापीडा भवति। तथा, योनिभेदादयः स्युः।

आवीनामनु जन्मातस्ततो गर्भोदकस्रुतिः॥७६॥

अतः-अस्माद्योनिभेदादेः, अनु-पश्चात्, आवीनां-गर्भनिष्क्रमणकालशूलविशेषाणां, जन्म-उत्पादः। ततः-अनन्तरं, गर्भोदकस्रुतिः-तत्कालं योनितो जलस्रावः, स्रावमात्रः स गर्भोदकसंज्ञः।

अथोपस्थितंगर्भां तां कृतकौतुकमङ्गलाम्।

हस्तस्थपुन्नामफलां स्वभ्यक्तोष्णाम्बुसेचिताम्॥७७॥

पाययेत्सघृतां पेयां

अथ-गर्भोदकस्रुतेरनन्तरं, तां-गर्भिणीं, उपस्थितगर्भांअभिमुखीभुतगर्भामा-विजन्मोदकस्रावादिना ज्ञात्वा, सघृतां पेयां पाययेत्। किम्भूताम्? कृतकौतुकमङ्गलाम्। विशिष्टकाल एव यो रक्षाबन्धो बाह्वादौ बध्यते स कौतुकवाच्यः। कौतुकाख्यं मङ्गलं कौतुकमङ्गलम्। कृतं कौतुकमङ्गलं यस्याः, ताम्। तथा, हस्तस्थं पुन्नाम-दाडिमादि, फलं यस्याः, ताम्। तथा, सुष्ठु अक्तां-अभ्यक्ताम्। तथा, उष्णाम्बुसेचिताम्। इत्यस्यानन्तरं "पाययेत्पेयां" इति पाठेनोष्णाम्बुसेचनादनन्तरं पेयापानं कार्यमिति बोधयति।

तनौ भुशयने स्थिताम्।

आभुग्नसक्थिमुत्तानामभ्यक्ताङ्गीं पुनः पुनः॥७८॥

अधो नाभेर्विमृद्नीयात्कारयेज्जृम्भचङ्क्रमम्।

तनौ-मृदुनि, भूशयने स्थितां मृद्नीयात्,-न खट्वादिशयने स्थिताम्। तथा चोक्तं सङ्ग्रहे (शा. अ. ३)-"सुरक्तार्षभचर्मप्रच्छदे मृदुनि भूशयने शयानां" इत्यादि। कुतोऽङ्गात्प्रभृति विशेषेण मृद्नीयात्? नाभेरधः,-नोर्ध्वं नाभेः। किम्भूतां ताम्? आभुग्नसक्थिम्, आसमन्ताद्भुग्ने-कुटिले, सक्थनी यस्याः साऽऽभुग्नसक्थः, तां तथाविधां मृद्नीयात्। तथा, पुनःपुनरभ्यक्ताङ्गीं वातकोपभयात्। तथा, जृम्भो चङ्क्रमं च तां कारयेत्। जृम्भो -जृम्भणम्। चङ्क्रमः-चङ्क्रमणं द्रुतगमनम्।

किमेवमनुष्ठिते सति भवति? इत्याह-

गर्भः प्रयात्यवागेवं, तल्लिङ्गं हृद्विमोक्षतः॥७९॥

आविश्य जठरं गर्भो बस्तेरुपरि तिष्ठति।

एवं-अनयेतिकर्तव्यतयाऽनुष्ठितया, गर्भोऽवाक् प्रयातिऊर्ध्वादधो गच्छति, हृत्स्थानं परित्यज्याधोऽवस्थितिं करोतीत्यर्थः। सङ्ग्रहे तूक्तम्(शा. अ. ३)-"दद्यात् कुष्ठलाङ्गलिकीवचाचव्यचित्रकचिरिबिल्वचूर्णमुपाघ्रातुं मुहुर्मुहुः। तथा भूर्जपत्रशिंशिपासर्जर-सानामन्यतमधूममन्तरान्तरा च। पार्श्वपृष्ठकटीसक्थिदेशान् कोष्णेन तैलेनाभ्यज्यानुसुखमस्या विमृद्नीयात्। एवमवाक् परिवर्तते गर्भः।" इति। मुसलेनोलूखलं धान्यपूर्णमाहननीयं गर्भस्यावाक्स्थितय इति केचिदाहुः। तदयुक्तम्। यतो गर्भिण्यास्तावद्यायामवर्जनं सततमुपदिष्टम्। विशेषतश्च प्रसवकाले प्रचलितसर्वधातुदोषायाः सुकुमारायानार्याः, मुसलव्यायामप्रेरितो हि वायुः प्राणान् हिंस्यादिति। विमर्दनादिक्रियां च गर्भिण्यास्तावत्कारयेत् यावद्गर्भनिष्क्रमणं न भवति। अथ मातृहृदयान्मुक्तो गर्भः केन लक्षणेन ज्ञायते ? इत्याह-तल्लिङ्गमित्यादि। तदित्यनेन गर्भः परामृश्यते। तस्य गर्भस्य, लिङ्गं-लक्षणं, तल्लिङ्गम्। गर्भस्यैतल्लिङ्गं यद्धृद्विमोक्षतो हृदयमोचनादनन्तरं स गर्भो जठरमाविश्य बस्तेरुपति तिष्ठति।

आव्योऽभित्वरयन्त्येनां खट्वामारोपयेत्ततः॥८०॥

आव्यः-प्रसवकालशूलविशेषाः, यस्मादेनां-गर्भिणीं, अभित्वरयन्ति, अनवरतमुत्पद्यमानत्वात्। ततःतस्मात्, एनां गर्भिणीं, खट्वामारोपयेत्-आरोहयेत्।

अथ सम्पीडिते गर्भे योनिमस्याः प्रसारयेत्।

अथ-खट्वारोहणादनन्तरं खट्वास्थिताया गर्भे सम्पीडिते समन्तात्पीडिते, वायुना योनिमुखाक्रान्ततया, अस्या गर्भिण्या योनिं प्रसारयेत्-आभ्यङ्गादिदानेन विकासयेत्।

मृदु पूर्वं प्रवाहेत बाढमाप्रसवाच्च सा॥८१॥

ततः सा-गर्भिणी, गर्भं मृदु कृत्वा पूर्वं प्रवाहेत, यावद्योनिमुखे नागतो गर्भः। गर्भं योनिद्वारमागतं तु ज्ञात्वा बाढंभृशं प्रवाहेत, आप्रसवात्-प्रसवं यावत्। तथा चोक्तं सङ्ग्रहे (शा. अ. ३)-"शनैः शनैश्च पूर्वं प्रवाहिष्ठाः, निर्गमे बाढं गर्भस्य योनिमुखप्रतिपत्तौ बाढतरमाप्रसवादिति।" इति। आङ्मर्यादा वचन इत्याडः कर्मप्रवचनीयत्वे पञ्चम्यपाङ्गरिभिरिति पञ्चमी।

हर्षयेत्तां मुहुः पुत्रजन्मशब्दजलानिलैः।

तां-गर्भिणीं, अनन्तरं [मुहुः] हर्षयेत्-सुमनसं मुहुः कारयेत्। केन? पुत्रजन्मशब्देन,-प्रसूता प्रसूताऽसि सुभगे धन्यं पुत्रमित्येवंरूपेणासकृत् स्त्रीभिरुच्चारितेन, तथा जलेन शीतलेन, तथाऽनिलेन। सङ्ग्रहेऽप्युक्तम् (शा. अ. ३)-"एनां ब्रूयाच्च सुभगे शनैः शनैः प्रवाहयस्व शोभनस्ते मुखवर्णः पुत्रं जनयिष्यसीति। तथाऽन्या तु वामकर्णेऽस्या मन्त्रमिमं जपेत्। 'क्षितिर्जलं वियत्तेजो वायुर्विष्णुः प्रजापतिः। सगर्भां त्वां सदा पातु वैशल्यं चादधात्विति॥ प्रसूष्व त्वमविक्लिष्टमविक्लिष्टा शुभानने। कार्तिकेयद्युतिं पुत्रं कार्तिकेयाभिरक्षितम्॥' इति। तथा, 'इहामृतं च सोमश्च चित्रभानुश्च भामिनि। उच्चैःश्रवाश्च तुरगो मन्दिरे निवसन्तु ते॥इदममृतमपां समुद्भूतं वै तव लघु गर्भमिमं प्रमुञ्चतु स्त्रि। तदनलपवनार्कवासवास्ते सह लवणाम्बुधरौर्दिशन्तु शान्तिम्॥' इति। अथापरा स्त्री गर्भिणीमनुशिष्यात्। अनाततायां वेदनायां मा प्रवाहिष्ठाः। अकालप्रवाहणं हि विण्मूत्रादिवेगानामिवोदीरणमनर्थकरमहितं च। गर्भस्य श्वासकासशोफकुब्जतादिकरत्वात्।' इति।

अथ किं हर्षाद्युत्पादनेन स्यात् ? इत्याह-

प्रत्यायान्ति तथा प्राणाः सूतिक्लेशावसादिताः॥ ८२॥

तथा-तेन प्रकारेण हर्षादिजननेन, प्राणाः सूतेः क्लेशाः-आधयः, तत्कृतानि दुःखानि, तैरवसादिताः-ग्लानिं नीताः, गर्भिण्याः प्रत्यायान्ति-पुनर्नवीभवन्ति।

धूपयेद्गर्भसङ्गे तु योनिं कृष्णाहिकञ्चुकैः।
हिरण्यपुष्पीमूलं च पाणिपादेन धारयेत्॥८३॥
सुवर्चलां विशल्यां वा जराय्वपतनेऽपि च।
कार्यमेतत्तथोत्क्षिप्य बाह्वोरेनां विकम्पयेत्॥८४॥
कटीमाकोटयेत्पाष्ण्र्या स्फिजौ गाढं निपीडयेत्।
तालुकण्ठं स्पृशेद्वेण्या मूर्ध्नि दद्यात्स्नुहीपयः॥८५॥
भूर्जलाङ्गलिकीतुम्बीसर्पत्वक्कुष्ठसर्षपैः॥
पृथग्द्वाभ्यां समस्तैर्वा योनिलेपनधूपनम्॥८६॥
कुष्ठतालीसकल्कं वा सुरमण्डेन पाययेत्।
यूषेण वा कुलत्थानां बाल्वजेनासवेन वा॥८७॥

गर्भस्य सङ्गे-सक्तौ, योनिं कृष्णसर्पनिर्मोकेन धूपयेत्-धूपनं योनौ कुर्यात्। धूपयेदिति "गुपूधूप" इत्यादिना आयप्रत्ययः, ततो विधौ लिङ्। तथा, हिरण्यपुष्पीमूलं पाणिना पादेन च सा गर्भिणी धारयेत्। अथवा, सुवर्चलां विशल्यां वा धारयेत्। एतत्-गर्भसङ्गोक्तं, जरायोः-अपराख्यस्य, अपतने-अनिष्क्रान्तौ, कार्यं-विधातव्यम्। न केवलं गर्भसङ्गोक्तं कार्यं यावदेनां-अपतितजरायुं, बाह्वोर्द्वयोरुत्क्षिप्य विकम्पयेत्-विधुनीत। सङ्ग्रहे तूक्तम्(शा. अ. ३)-"न चेदपरा पतति ततो दक्षिणेन पाणिना नाभेरुपतिष्टाद्वलवदुत्पीड्यान्येन पृष्ठत उपसङ्गृह्य विधुनुयात्।" इति। तथा, पाष्ण्र्या कटीमाकोटयेदिति पुनः पुनः कट्यां पार्ष्णिघातं कुर्यादित्यर्थः। तथा, स्फिजौ युतौ सुष्ठु निपीडयेत्। तथा, वेण्या-केशरचनाविशेषाख्यया, तालुकण्ठं स्पृशेत्। सङ्ग्रहेऽप्युक्तम्(शा. अ. ३)-"वेण्याऽङ्गुल्या वा केशवेष्टितया वा तालुकण्ठं परामृशेत्।" इति। तथा, मूर्ध्नि-मस्तके, स्नुहीपयः-सुधादुग्धं दद्यात्। तथा भूर्जादिभिर्द्रव्यैः पृथक्-प्रत्येकं, अथवा द्वाभ्यां कृत्वा, समस्तैर्वा, योन्या लेपनं धूपनं च कार्यमिति शेषः। कुष्ठतालीसपत्रयोः कल्कं वा सुरामण्डेन-सुराभागेनोपरिस्थितेन, तां पाययेत्। अथवा, कुलत्थानां यूषेण-क्काथेन, पाययेत्। बाल्वजेनासवेन वा। बल्वजं वारिणा

आसुत्य रात्रौ धारितं तच्छीतकषायो बाल्बज आसव उच्यते। सङ्ग्रहेऽप्युक्तम् (शा.अ.३) -"भूर्जपत्रकाचमणिसर्पनिर्मोकैश्च योनिं धूपयेत्। भूर्जगुग्गुलुभ्यां वा। शालिमूलसिद्धेन वा सर्पिषा योनिमभ्यज्य कटुकालाबुजालिनीनिम्बसर्पनिर्मोकैर्धूपयेत्। अनभ्यक्तां वा कटुतैलमिश्रैः कल्कीकृतैर्वा तैलाक्तैरालिम्पेत्। गुडनागरकल्केन वा। तदेव वा भक्षयेत्। लाङ्गलीमूलकल्केन वा पाणिपादमुदरं च लिम्पेत्।" इति। तथोक्तम् (सं. शा. अ. ३)-"कुष्ठैलाकल्कं वा सुरया पाययेत्। अर्कार्लर्ककषायं वा सुरोन्मिश्रम्। कुष्ठलाङ्गलिकीमूलकल्कं वा मद्यमूत्रान्यतरेण। [वत्सकादिचूर्णं वा मद्येन।] शतपुष्पाकुष्ठमदनहिङ्गुसिद्धस्य च तैलस्य पिचुं ग्राहयेत्।" इति।

शताह्वासर्षपाजाजीशिग्रुतीक्ष्णकचित्रकैः।

सहिङ्गुकुष्ठमदनैर्मूत्रे क्षीरे च सार्षपम्॥ ८८॥

तैलं सिद्धं हितं पायौ योन्यां वाऽप्यनुवासनम्।

शतपुष्पावचाकुष्ठकणासर्षकल्कितः॥ ८९॥

निरुहः पातयत्याशु सस्नेहलवणोऽपराम्।

तत्सङ्गे ह्यनिलो हेतुः सा निर्यात्याशु तज्जयात्॥ ९०॥

शताह्वादिभिर्द्रव्यैः सार्षपं तैलं मूत्रे क्षीरे चोभयस्मिन् सिद्धं पक्वं, अनुवासनं हितम्। क्व? पायौ-गुदे। अथवा योन्यां गर्भनिष्क्रमणद्वारे। तथा, शताह्वादिभिर्द्रव्यैः कल्कितो निरुहोबस्तिकल्पोक्तौ यौगिकः, सह स्नेहेन लवणेन च वर्तमानः, आशु शीघ्रमेव, अपरां-जरायुसंज्ञां, पातयति। यस्मात्तत्सङ्गेऽनिलो हेतुः-वायुः, कारणम्। तज्जयात्-वातजयात्, सा-अपरा, निर्याति-कुक्षितो बहिर्निष्क्रामति। पवनविजये च बस्तिः प्रधानम्। तथा चोक्तम् (हृ. सू. अ. १९/१)-"वातोल्बणेषु दोषेषु वाते वा बस्तिरिष्यते।" इत्यादि। सङ्ग्रहे तु गर्भिण्या आस्थापनेऽनुवासने च सन्निवेशविशेष उक्तः। यथा (शा. अ. ३)-"गर्भिणीं तु न्युब्जामास्थापयेदनुवासयेच्च। तथाऽस्या विवृतमार्गतया सम्यगौषधमनुप्रविशति।" इति।

कुशला पाणिनाऽक्तेन हरेत्क्लृप्तनखेन वा।

अथवा कुशला-तद्व्यापारनिपुणा योषित्, पाणिना सर्पिषाऽभ्यक्तेन तां हरेत्। किम्भूतेन पाणिना ? क्लृप्तनखेन, क्लृप्ताः-कल्पिताः शस्त्रेण, नखा यस्य तेन, तथाविधेन पाणिना

नालानुसारत आकर्षेत्। सङ्गहेऽप्युक्तम् (शा. अ. ३)-"[उमा] शाल्मलीपिच्छया वा सघृतया योनिं पूरयित्वा विधुनुयात्।" इति।

मुक्तगर्भापरां योनिं तैलेनाङ्गं च मर्दयेत्॥९१॥

गर्भश्चापारा च गर्भापरम्, मुक्तं गर्भापरं यया योन्या, तां योनिं तैलेन मर्दयेत्। अङ्गं-शरीरं च, मर्दयेत्।

मक्कल्लाख्ये शिरोबस्तिकोष्ठशूले तु पाययेत्।
सुचूर्णितं यवक्षारं घृतेनोष्णजलेन वा॥९२॥
धान्याम्बु वा गुडव्योषत्रिजातकरजोन्वितम्।

मक्कल्लाख्ये रोग उत्पन्ने शिरोबस्तिकोष्ठशूललक्षणे सति यवक्षारं सूक्ष्मचूर्णितं घृतेनाथवोष्णजलेन तां सूतां पाययेत्। धान्याम्बु वा तां पाययेत्। किम्भूतम्? गुडदव्योषत्रिजातकरजोन्वितम्। गुड इति सामान्योक्तावपि पुराणोऽत्र गुडो ग्राह्यः, पथ्यत्वात्। मक्कल्लाख्यो-रोगः। शिरोबस्तिकोष्ठशूल इति लाघवेन तन्त्रकृताऽस्य लक्षणमुक्तम्।

अथ बालोपचारेण बालं योषिदुपाचरेत्॥९३॥

अथ बालं-जातमात्रमेव, उपाचरेत्-उपपादयेत्। का? योषित्,-बहुकृत्वः प्रसूता, न पुमान्। केन? बालोपचारेण, बालोपचरणीयोक्तेनाहारविहारादिना।

सूतिका क्षुद्वती तैलाद्धृताद्वा महतीं पिबेत्।
पञ्चकोलकिनीं मात्रामनु चोष्णं गुडोदकम्॥९४॥
वातघ्नौषधतोयं वा, तथा वायुर्न कुप्यति।
विशुध्यति च दुष्टास्रं द्वित्रिरात्रमयं क्रमः॥९५॥

सूतिका क्षुद्वती-बुभुक्षिता सती, तैलादथवा घृतान्महतीं मात्रां पिबेत्। किम्भूताम्? पञ्चकोलकं विद्यते यस्या मात्रायास्तां पञ्चकिलकिनीम्। सूक्ष्मचूर्णिकृतपञ्चकोलकयुक्तां तां मात्रां पिबेदित्यर्थः। अष्टाभिर्यामैर्या जरां गच्छति सा स्नेह मात्रा महती। अनु चोष्णं गुडोदकं पिबेदिति योज्यम्। वातहरद्रव्यक्काथं वा पश्चात्पिबेत्। तथा-एवं कृते सति, वार्युन कुप्यति-न कोपं याति शून्यं कोष्ठं प्राप्य। दुष्टं रक्तं च विशुध्यति। अयं-एषः, क्रमो द्विरात्रं त्रिरात्रं वा यथायोगं कार्यः।

स्नेहायोग्या तु निःस्नेहममुमेव विधिं भजेत्।

पीतवत्याश्च जठरं यमकाक्तं विवेष्टयेत्॥९६॥

स्नेहपानायोग्या तु स्त्री-या स्नेहं नार्हति सा, निःस्नेहं-स्नेहं विना, अमुमेव-पूर्वोक्तं विधिं, भजेत्। पीतवत्याश्च तस्या जठरं यमकाक्तं-तैलघृताभ्यामभ्यक्तं, विवेष्टयेद्वाससेति शेषः। पीतवत्या इत्यविशेषनिर्देशः कदाचित् स्नेहयोग्या स्नेहं पीतवती, स्नेहायोग्या तूष्णं गुडोदकं पीतवती, अथवा वातघ्नौषधतोयं पीतवती, इति सामान्येन यो निर्देशस्तस्यार्थः।

जीर्णे स्नाता पिबेत्पेयां पूर्वोक्तौषधसाधिताम्।

त्र्यहादूर्ध्वं विदार्यादिवर्गक्काथेन साधिता॥९७॥

हिता यवागूः स्नेहाढ्या सात्म्यतः पयसाऽथवा।

सप्तरात्रात्परं चास्यै क्रमशो बृंहणं हितम्॥९८॥

स्नेहे जीर्णे कवोष्णगुडोदके वातघ्नौषधतोये वा, अनन्तरं स्नाता सती पूर्वोक्तौषसाधितां-पञ्चकोलकृतां, पेयां पिबेत्। त्र्यहादूर्ध्वं-अनन्तरं, विदार्यादिवर्गोक्तौषधैः सिद्धा यवागूः - पेया,स्नेहाढ्या हिता। अथवा सात्म्यतः-सात्म्यवशात्, पयसा-क्षीरेण साधिता, यवागूर्हिता। सप्तरात्रात्परं-अनन्तरं, क्रमशो-न सहसा, तस्यै बृंहणं हितम्। बृंहणं च जीवनीयबृंहणीयमधुरवर्गसिद्धैरभ्यङ्गोद्वर्तनपरिषेकावगाहनैर्हृद्यैश्चान्नपानैर्विधातव्यम्।

द्वादशाहेऽनतिक्रान्ते पिशितं नोपयोजयेत्।

द्वादशाहेऽनतिक्रान्ते-अपरिसमाप्ते, पिशितं-मासं, नोपयोजयेत्-नाभ्यवहारयेत्, स्कन्दादिद्वादशग्रहाभिषङ्गपरिहारार्थम्। मांसभोजनेन हि कदाचित्तैरभिषङ्गो भवेत्, तेषां मांसादत्वात्।

यन्त्रेनोपचरेत्सूतां दुःसाध्यो हि तदामयः॥९९॥

गर्भवृद्धिप्रसवरुक्क्लेदास्रस्रुतिपीडनैः।

सूतां स्त्रीं यत्नेन-तात्पर्येण, उपचरेत्-उपक्रमेत्। कुतो हेतोः ? इत्याह-हि-यस्मात्, तस्या आमयो-रोगो दुःसाध्यः-कृच्छ्रेणोपक्रम्यः। किमिति कृच्छ्रसाध्यः ? इत्याह-गर्भेत्यादि। वृद्धिश्च प्रसवश्च वृद्धिप्रसवौ, गर्भस्य वृद्धिप्रसवौ च रुक् च क्लेदास्रस्रुतिश्च पीडनं च गर्भवृद्धिप्रसवरुक्क्लेदास्रस्रुतिपीडनानि, तैर्हेतुभूतैस्तदामयो दुःसाध्यः। रुक्-प्रवाहवेदना।

एवं च मासाद्ध्यर्धान्मुक्ताहारादियन्त्रणा॥१००॥

गतसूताभिधाना स्यात्पुनरार्तवदर्शनात्॥१०० १/२॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां द्वितीये शारीरस्थाने गर्भावक्रान्तिर्नाम प्रथमोऽध्यायः॥१॥

एवं-अनेन प्रकारेण, सार्धं मासमुपस्कृता क्रमेण मुक्ताहारविहारयन्त्रणा स्यात्। अध्यर्धमासात्परेण गतसूताभिधानाव्यपेतप्रसूतिव्यपदेशा, पुनरार्तवदर्शनाद्भवेत्। सङ्ग्रहे तूक्तम् (शा. अ. २)-"जरायुणा मुखे छन्ने कण्ठे च कफवेष्टिते। वायोर्मार्गनिरोधाच्च न गर्भस्थः प्ररोदिति॥" इति।

इतिश्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टाङ्गहृदय- टीकायां सर्वाङ्गसुन्दराख्यायां द्वितीये शरीरस्थाने गर्भा-वक्रान्तिर्नाम प्रथमोऽध्यायः समाप्तः॥१॥

****

द्वितीयोऽध्यायः।

गर्भावक्रान्तिशारीरादनन्तरं गर्भव्यापदं शारीरमारभ्यते। गर्भस्य व्यापत्प्रतीकारविज्ञानार्थमाह -

अथातो गर्भव्यापदं शारीरं व्याख्यास्यामः।

इति ह स्माहुरात्रेयादयो महर्षयः।

(गद्यसूत्रे॥२॥)

गर्भस्य व्यापत् गर्भव्यापत्, सा विद्यते यस्मिन्निति छः, तस्य "अध्यायानुवाकयोर्लुक्" इति लुक्। यद्यपि चात्र गर्भव्यापदश्चिकित्साऽप्युक्ता न केवलं व्यापत्, तथाऽपि बाहुल्यादिदमुक्तमिति वेद्यम्। अथादीनां पूर्ववद्व्याख्या।

गर्भिण्याः परिहार्याणां सेवया रोगतोऽथ वा।

पुष्पेदृष्टेऽथवा शूले बाह्यान्तः स्निग्धशीतलम्॥१॥

सेव्याम्भोजहिमक्षीरिवल्ककल्काज्यलेपितान्।

धारयेद्योनिबस्तिभ्यामार्द्रार्द्रान् पिचुनक्तकान्॥२॥

गर्भिण्याः परिहार्याणां-आहारविहाराणां पूर्वोक्तानामतिव्यवायादीनां, सेवनेन पुष्पे दृष्टे, अथवा रोगतः पुष्पे दृष्टे, रोगस्य च स्वभावापथ्यसर्षपशाकमन्दकदध्या-देराहारान्मात्रादेशकालादिवशाद्वा सम्भवः, गर्भाख्यफलहेतुत्वाद्रक्तं पुष्पमुच्यते, तस्मिन् दृष्टे-चक्षुर्गोचरं प्राप्ते, अथवा शूले-दृष्टे-प्रश्नादिनोपलब्धे सति, दृशिरत्रोलाब्धिवचनः, बाह्यान्तः स्निग्धशीतलं साधनं-अन्नपानप्रदेहपरिषेकादि, कार्यम्। बहिः-स्नानावगाहादौ, अन्तश्चभोजनानुपानादावित्यर्थः। रोगत इति तृतीयार्थे तसिः। तथा, स्त्री योनिबस्तिभ्यां पिचुनक्तकान् धारयेत्। किम्भूतान्? सेव्यादिभिर्लेपितान्। सेव्यं-उशीरम्। अम्भोजं-पद्मम्। हिमं चन्दनम्। क्षीरं विद्यते येषां ते क्षीरिणो वृक्षाः-पिप्प्लादयः, येषां शस्त्रादिच्छिन्नानां क्षीरं दृश्यते। वल्कं-वल्कलम्। सेव्यं चाम्भोजं च हिमं च क्षीरिवल्कं च, तेषां कल्कश्चाज्यं च, तैर्लेपितान्। तथा च किम्भूतान्? आर्द्रार्द्रान्-अतिशयेनाद्रीकृतान्। पिचुशब्देन विकेशिकासदृशः कार्पासमयः। नक्तकः-चैलखण्डः।

शतधौतघृताक्तां स्त्रीम् तदम्भस्यवगाहयेत्।

ससिताक्षौद्रकुमुदकमलोत्पलकेसरम्॥३॥

लिह्यात् क्षीरघृतं खादेच्छृङ्गाटककसेरुकम्।

पिबेत्कान्ताब्जशालूकबालोदुम्बरवत्पयः॥४॥

श्रृतेन शालिकाकोलीद्विबलामधुकेक्षुभिः।

पयसा रक्तशाल्यन्नमद्यात्समधुशर्करम्॥५॥

रसैर्वा जाङ्गलैः

शतशब्दो बहुवारपर्यायः, न सङ्ख्यावाचीत्यर्थः। तथा च सङ्ग्रहेऽधीतम्(शा. अ. ४)-सहस्रधौतसर्पिषाऽधोनाभेः सर्वतः प्रदिह्यात्।" इति। शताधौतेन-बहुधा प्रक्षालितेन घृतेन, अक्तां-अभ्यक्तां, स्त्री तदम्भस्यवगाहयेत्-तत्र तां निमज्जनं कारयेत्। तदित्यनेन हि सेव्यादिद्रव्यपरामर्शः। स्त्रीमिति वाम्शसोरितीयङ्विकल्पात्पूर्वरूपम्। तथा क्षीरं घृतं च लिह्यात्। किम्भूतम्? ससितेत्यादि। सह सितया तथा क्षौद्रेण तथा कुमुदकमलोत्पलानां केसरेण-किञ्जल्केन सहितम्। अन्ये तु क्षीराहृतं क्षीरोद्भवं घृतं क्षीरघृतमिति व्याचक्षते। तथा,

खादेच्छृङ्गाटकं कसेरुकं च। तथा, पयः-क्षीरं, पिबेत्। किम्भूतम्? कान्तेत्यादि। कान्ता-गन्धप्रियङ्गुः। अप्सु जातं-अब्जम्, कमलादि। शालूकं-उत्पलमूलम्। बालमुदुम्बरं-अपक्वमुदुम्बरफलम्। कान्ता चाब्जं च शालूकं च बलोदुम्बरं च तानि विद्यन्ते यस्य पयसस्तदेवम्, तैः श्रृतं क्षीरं पिबेदित्यर्थः। यैर्हि तत्पयः श्रृतं तानि तत्रावश्यं विद्यन्ते। क्षीरश्रपणविधिश्चातीसारचिकित्सोक्तः (ह्. चि. अ. ९/३९)-"पयस्युत्काथ्य मुस्तानां विंशतिं" इत्याद्यनुसारेणात्र कल्प्यः। तन्त्रान्तरे त्वेवमुक्तम्-"द्रव्यादष्टगुणं क्षीरं क्षीरात्तोयं चतुर्गुणम्। क्षीरावशेषः कर्तव्यः क्षीरपाके त्वयं विधिः॥" इति। अन्ये तु कान्तादिद्रव्याणां चूर्णेन युक्तं कल्केन वा युक्तं पयः पिबेदित्याहुः। पयसा रक्तशाल्यन्नं समधुशर्करं सुशीतं भुञ्जीत। किम्भूतेन क्षीरेण? शाल्यादिभिः श्रृतेन-सिद्धेन। देशसात्म्याद्यनुरोधाज्जाङ्गलैर्वा रसैः शाल्यन्नमद्यात्।

शुद्धिवर्जं चास्रोक्तमाचरेत्।

शुद्धिं वर्जयित्वा, अस्रोक्तं-रक्तपित्ताभिहितं, यत्साधनं तद्वाह्यान्तराचरेत्-सेवेत। अस्रशब्दस्योपलक्षणार्थत्वाद्रक्तपित्तं गम्यते।

असम्पूर्णत्रिमासायाः प्रत्याख्याय प्रसाधयेत्॥ ६॥

आमान्वये च

असम्पूर्णास्त्रयो मासा यस्याः गर्भिण्याः सैवम्। तस्याः पुष्पदर्शने सति गर्भः प्रायो न तिष्ठति, असञ्जातसारत्वात्। तस्मात् प्रयाख्याय-प्रत्याख्यानं कृत्वा, प्रसाधयेत्-प्रकर्षेण यत्नेन साधयेत्। आमान्वये च। अत्रापि प्रत्याख्याय प्रसाधयेदित्यनुवर्तते। आमानुगते रक्तदर्शने सम्पूर्णत्रिचतुरादिमासाया अपि सञ्जातसारेऽपि गर्भे सति विरुद्धोपक्रमत्वात् प्रत्याख्याय साधनं कारयेत्। तथा हि,-रूक्षतीक्ष्णोष्णकटुप्रायमामन्नं गर्भिण्या विरुद्धम्, शीतस्निग्धप्रायं चामस्य।

एवमप्यामरक्तयोर्द्वयोर्यदविरुद्धं तदुपदेष्टुमाह-

तत्रेष्टं शीतं रूक्षोपसंहितम्।

उपवासो घनोशीरगुडूच्यरलुधान्यकाः॥७॥

दुरालभापर्पटकचन्दनातिविषाबलाः।

क्वथिताः सलिले पानं तृणधान्यानि भोजनम्॥८॥

मुद्गादियूषैरामे तु जिते स्निग्धादि पूर्ववत्।

तत्र-आमान्वये सामतायां सत्यां, शीतं यदन्नपानादि, तत्सर्वं बाह्यतोऽन्तश्च हितम्। शीतं रक्तस्य पथ्यं, आमस्य वितुद्धत्वादपथ्यं, इत्याशङ्क्याह-रूक्षोपसंहितम्,-रूक्षेण-तिक्तकषायादिना, युक्तम्। तथा, देशसत्वाद्यनुरोधादुपवासो हितः, न केवलं शीतं रूक्षोपसंहितम्। तथा घनादयो द्रव्यविशेषाः सलिले क्वथिताः पानं हितम्। घनो-मुस्तः। अरलुः-स्योनाकः। तथा, तृणधान्यानि-नीवारकोद्रवश्यामाकादीनि, भोजनं-आहारः, तत्र-आमान्वये, हितम्। कैः सह? मुद्गादियूषैः। आदिग्रहणेन मकुष्टमसूरादयः शिम्बीधान्यविशेषाः पित्तश्लेष्महरा गृह्यन्ते। सामतायामेवोत्पन्नायामयमुपक्रमः। आमे तु जिते स्निग्धादि पूर्ववत्। पूर्वस्मिन्निव पूर्ववत्। सप्तम्यन्ताद्वतिः। यथा प्रथमं रक्तदर्शने स्निधशीतलादि हितं, तथाऽत्रापि पूर्वनिर्दिष्टं स्निग्धादि हितमित्यर्थः। स्निग्धशीतानि बह्यान्तरुपयोज्यानि।

गर्भे निपतिते तीक्ष्णं मद्यं सामर्थ्यतः पिबेत्॥९॥

गर्भकोष्ठविशुद्ध्यर्थमर्तिविस्मरणाय च।

लघुना पञ्चमूलेन रूक्षां पेयां ततः पिबेत्॥१०॥

पेयाममद्यपा कल्के साधितां पाञ्चकौलिके।

बिल्वादिपञ्चकक्वाथे तिलोद्दालकतण्डुलैः॥११॥

मासतुल्यदिनान्येवं पेयादिः पतिते क्रमः।

लघुरस्नेहलवणो दीपनीययुतो हितः॥१२॥

गर्भिण्या एवमासेवमानाया अप्यदृष्टवशाद्गर्भे निपतिते-निःशेषेण पतिते सति, तिक्ष्णं-कर्कशं, मद्यं सामर्थ्येन पिबेत्,-बहु पिबेदित्यर्थः। किमर्थम्? इत्याह-गर्भकोष्ठेत्यादि। गर्भकोष्ठविशुद्ध्यर्थमर्तेः-पीडायाः, विस्मृत्यर्थं च। ततो-मद्यपरिणामादनन्तरं, रूक्षां पेयां पिबेत्। किम्भूताम्? लघुना पञ्चमूलेन-बृहत्यादिना (हृ.सू.अ.६/१६८), कृताम्। अमद्यपा तु या स्त्री सा गर्भे निपतिते पेयां पिबेत्, न तु मद्यम्। क्व साधितां? कल्के। किं सम्बन्धिनि? पाञ्चकौलिके,-पञ्चकोलस्यायं पाञ्चकौलिकः, तस्मिन्। पञ्चकोलकं कल्कीकृत्य तत्र पेयां साधितामित्यर्थः। तथा, बिल्वादिपञ्चकक्काथे-महत्पञ्चमूलकषाये (हृ. सू. अ. ६/१६७), साधितां पेयां पिबेदिति योज्यम्। कैः साधिताम्? तिलोद्दालकतण्डुलैः। उद्दालकोव्रीहिविशेषः। मासैस्तुल्यनि दिनानि-माससङ्ख्या वासराः। यावन्तो मासा गर्भस्य तावन्त्यहानि गर्भे निपतिते सति, एवं-पूर्वोक्तेन प्रकारेण, पेयादिः क्रमः कार्यः। किम्भूतः? लघुरस्नेहलवणः। न विद्यते स्नेहलवणे यस्य। तथ, दीपनीयैः-अग्निकृद्भिर्मरिचचित्रकादिभिर्द्रव्यैर्युतः। सः-तथाविधः, तत्र क्रमो हितः। किमर्थम्?

दोषधातुपरिक्लेदशोषार्थं विधिरित्ययम्।

दोषौ-पित्तकफावत्र गृह्येते। वातस्य क्लेदासम्भवात्। दोषौ च धातवश्च, तेषां परिक्लेदः, तस्य शोषार्थं-शोषाणाय, अयं विधिरिति।

स्नेहान्नबस्तयश्चोर्ध्वं बल्यदीपनजीवनाः॥१३॥

ऊर्ध्वं-अतो दोषधादुपरिक्लेदशोषादनन्तरं, स्नेहान्नबस्तयोहिताः। स्नेहश्चतुर्विधः पानादौ हितः। तथा, आन्नं स्निग्धं न रूक्षं, हितम्। बस्तयोऽपि स्निग्धा एव-न रूक्षा हिताः, वातकोपभयात्। किम्भूताः स्नेहान्नबस्तयः? बल्यदीपनजीवनाः। बल्याः-बलाय हिताः। दिपनाः-वह्नेः सन्धुक्षणकृतः। तथा, जीवनाः-ओजोवृद्धिकराः।

इदानीमुपविष्टकनागोदरयोर्गर्भयोर्हेतुलिङ्गौषधानि वितानयितुमाह-

सञ्जातसारे महति गर्भे योनिपरिस्रवात्।

वृद्धिमप्राप्नुवन् गर्भः कोष्ठे तिष्ठति सस्फुरः॥१४॥

उपविष्टकमाहुस्तं, वर्द्धते तेन नोदरम्।

सञ्जातः सारो-बलं, यस्यासौ सञ्जातसारो-बलवान् गर्भः, तस्मिन्। तथा, महति-प्रवृद्धे सति। गर्भिण्याः परिहार्यापरिहारद्योऽसौ योनेः परिस्रवः-परिस्रवणं, तस्मात्। परिस्रव इति च सामान्येन निर्देशात् कदाचिद्रक्तरूपः कदाचिदन्यादृशोऽपि गर्भात्स्रवति। परिस्रवाच्च कारणात् वृद्धिमप्राप्नुवन्-अगच्छन्, कोष्ठ एव-गर्भाधार एव, तिष्ठति गर्भः। यतो योनिपरिस्रवात्कारणात् वायुः कुपितः पित्तश्लेष्माणौ परिगृह्य गर्भस्य रसवहां नाडीम् प्रतिपीड्यावतिष्ठते। ततो नाड्यां दोषैः कुल्यायामिव तृणपत्रादिभिः प्रतिच्छन्नायां रसस्यासम्यग्वहनान्नाडीरोधाद्दृद्ध्याभावो गर्भस्य। किम्भूतः कोष्ठे तिष्ठति? सस्फुरः। स्फुरणंस्फुरः। अज्विधौ भयादीनामुपसङ्ख्यानमित्यच्। गाङ्कुटादिभ्यो ञ्णिङिदिति ङित्त्वाद्गुणाभावः। सह स्फुरेण-चलनेन, वर्तत इति सस्फुरः। एतावन्मात्रविशेषावस्थः कोष्ठे तिष्ठति। तं-तथाविधं गर्भं, उपविष्टकसंज्ञमाहुः। 'मुनयः' इति शेषः। तेन-तथाभूतेन गर्भेण कोष्ठस्थितेन, तस्या उदरं न वर्द्धते-न वृद्धिं याति, गर्भस्यैवावृद्धेः। न हि यद्यस्य वृद्धौ वर्द्धते तदवृद्धौ तस्य वृद्धिः स्यात्। तथा हि,-चन्द्रवृद्धावेव समुद्रवेलाया वृद्धिः। उपविष्टकावस्थश्च गर्भो न वर्द्धते। अतस्तत्कारणाभवादुदरस्याप्यवृद्धिः।

एवमुपविष्टकमुक्त्वा नागोदराख्यं वक्तुमाह-

शोकोपवासरूक्षाद्यैरथवा योन्यतिस्रवात्॥१५॥

वाते क्रुद्धे कृशः शुष्येद्गर्भो नागोदरं तु तम्।

उदरं वृद्धमप्यत्र हीयते स्फुरणं चिरात्॥१६॥

शोकोपवासरूक्षाद्यैः-गर्भगर्भिण्यपचयकारिभिः पवनप्रकोपकारिभिर्हेतुभिः, वाते क्रुद्धे-कुपिते, अथवा गर्भगर्भिण्योरुपचयप्रदैराहारविहारैरुपचितयोर्गर्भगर्भिण्योरपि कदाचिदत्यर्थं रक्तस्रुतिकारणान्यासेवेत स्त्री, तदनीम् तस्या योन्यतिस्रवो जायते।

तस्माद्योन्यतिस्रवात्कारणादपि पवने कुपिते, कृशो गर्भः सम्पद्यते। शुष्येदित्यत्र चशब्दो लुप्तनिर्दिष्टो द्रष्टव्यः। न केवलं कृशो भवति शुष्येच्चेत्यर्थः। तं-तथाभूतं गर्भं, नागोदरसंज्ञकं केषांचिन्मते चोपशुष्ककसंज्ञकं विद्यात्। अत्र-नागोदरसंज्ञके गर्भेऽन्तःस्थिते, उदरं वृद्धमपि-महदपि सत्, हीयते-हानिं याति। स्फुरणं च चिरात्-चिरेण भवति। उपविष्टके तु केवलमवृद्धिर्न तु हानिः।

तयोर्बृंहणवातघ्नमधुरद्रव्यसंस्कृतैः।

घृतक्षीररसैसतृप्तिरामगर्भांश्च खादयेत्॥ १७॥

तैरेव च सुभिक्षायाः क्षोभणं यानवाहनैः।

तयोः-उपविष्टकनागोदराख्ययोर्गर्भयोः, घृतक्षीररसैस्तृप्तिर्गर्भिण्याः कार्येति शेषः। किम्भूतैस्तैः ? बृंहणवातघ्नमधुरद्रव्य संस्कृतैः-सिद्धैः। बृंहणानि च तानि वातघ्नानि च मधुराणि च, एवंभूतानि यानि द्रव्याणि द्राक्षाशर्करादीनि, न तु व्यस्तानि बृंहणानि वातघ्नानि मधुराणि च। तत्र केवलं बृंहणानि-प्रियङ्गुप्रबृतीनि, न तु वातघ्नानि। वातघ्नानि च बृंहणानि, न तु मधुररसानि, यथा-नागरादीनि। मधुराणि न वातघ्नानि नापि बृंहणानि, यथा-तण्डुलीयमसूरादीनि। तदेतैर्व्यस्तगुणैर्द्रव्यैः संस्कृतेन घृतादिना तृप्तिर्न कार्या, किं तर्हि ? समस्तबृंहणादिगु-णयुक्तैर्द्रव्यैः संस्कृतैरिति बोध्यम्। तथा च सङ्ग्रहेऽधिजगे (शा.अ.४)-'तयोर्जीवनीयबृंहणीयमधुरौषधसिद्धानां सर्पिषामुपयोगः।" इत्यादि। तथा, तद्गर्भपुष्टये तां गर्भिणीमामगर्भांश्च खादयेत्, वैद्य इति शेषः। आगमगर्भान् स्वादन्त्याः कदाचिद्गर्भिण्या जुगुप्सा स्यात्, अतो गर्भगर्भिण्योर्द्वयोरपि व्यापदो भवेयुरिति ण्यन्तोऽत्र खादिर्निर्दिष्टः। वैद्यो हि तां तथा युक्त्या खादयेत्, यथाऽसौ न जुगुप्सेत। आमगर्भा अपरिपूर्णगर्भा उच्यन्ते। तथा, तैरेवबृंहणादिद्रव्यसंस्कृतैर्घृतक्षीररसैरामगर्भैश्च, सुभिक्षायाः-तृप्तिं प्राप्तायाः, क्षोभणं कार्यम्। कैः ? यानैः-रथादिभिः, वाहनैः गजतुरगादिभिः। तत्रारोप्य तां गर्भिणीं वेगेन नयेदित्यर्थः ।

अथ लीनाख्यस्य गर्भस्य चिकित्सामाह-

लीनाख्ये निस्फुरे श्येनगोमत्स्योत्कोशबर्हिजाः॥ १८॥

रसा बहुघृता देया माषमूलकजा अपि।

बालबिल्वंतिलान्माषान्सक्तूंश्च पयसा पिबेत्॥१९॥

समेद्यमांसं मधु वा कट्यभ्यङ्गं च शीलयेत्।

अस्योपिविष्टकनागोदराभ्यामेव हेतुलक्षणयोरुक्तत्वात् यदेव निस्फुरणत्वादि विशेषान्तरं तदेवेह तन्त्रकृतोक्तम्। सङ्ग्रहे तु पपाठ (शा. अ. ४)-"यस्याः पुनर्वातोपसृष्टस्रोतसो लीनो गर्भः प्रसुप्तो न स्पन्दते तं लीनमित्याहुः।" इति। तत्र लीनाख्ये गर्भे सति गर्भिण्याः श्येनादिजा रसा बहुघृता देयाः। आदिशब्देन (उपलक्षणत्वेन) [सङ्ग्रहोक्तानां] तित्तिरिकुक्कुटादीनां ग्रहणम्। तथा, माषमूलकजा रसा बहुघृता देयाः। तथा, सात्म्यादिवशात् बालविल्बादीन् समस्तानैकध्यं कृत्वा क्षीरेण पिबेत्। तथा सह मेदुरमासेन मार्द्वीकं वा पिबेत्। कट्यां चाभ्यङ्गं शीलयेत्-अभ्यसेत्।

हर्षयेत्सततं चैनामेवं गर्भः प्रवर्द्धते॥२०॥

सततं-मुहुर्मुहुश्च, एनां-गर्भिणीमुपविष्टकनागोदरलीनाख्यगर्भोदरस्थां, हर्षयेत्-मुदितां कुर्यात्। एवं-अनयेतिकर्तव्यतया कृतया, गर्भः प्रवर्द्धते-वृद्धिं याति।

पुष्टोऽन्यथा वर्षगणैः कृच्छ्राज्जायेत, नैव वा।

अन्यथा-अन्येन प्रकारेण पूर्वोक्तविपर्ययेण रूक्षात्मना सेवितेन मातुराहाररसेनाल्पेन, पुष्टः-चेतनामात्रावशेष एव, वत्सरसन्दोहैः कृच्छ्राज्जायेत-कष्टेन योनितो निष्क्रामेत्। नैव वेति। अथवा यावज्जीवं गर्भीण्याः कुक्षावेवावसीदेत् न ततो निष्क्रामेत् कुक्षावेवावतिष्ठेत।

उदावर्तं तु गर्भीण्याः स्नेहैराशुतरां जयेत्॥२१॥

योग्यैश्च बस्तिभिर्हन्यात्सगर्भां स हि गर्भीणीम्।

गर्भिण्या यद्युदावर्ताख्यो व्याधिः स्यात्, तं स्नेहैः-चतुर्भिर्यथायोग्यौषधसाधितैः पानादिना सेवितैः, आशुतरां-अतित्वरितं, जयेत्। तथा, योग्यैः-तत्कालोचितैः, बस्तिभिः-अनुवासनैः, जयेत्। ननु, गर्भिण्या वर्ज्येषु "बस्तिमामासतोऽष्टमात्" इति प्रागुक्तम् (हृ. शा. अ. १/४७)। तत्कथमिह सामान्येनानुवासनं तन्त्रकृदुपादिक्षत् ? इत्याह-हन्यादित्यादि। स यस्मादुदावर्तो गर्भेण सह गर्भिणीं हन्यात्, अतस्तमाशुतरां जयेत्।

गर्भेऽतिदोषोपचयादपथ्यैर्दैवतोऽपि वा॥ २२॥

मृतेऽन्तरुदरं शीतं स्तब्धं ध्मातं भृशव्यथम्।

गर्भास्पन्दो भ्रमतृष्णा कृच्छ्रादुच्छ्वसनं क्लमः॥ २३॥

अरतिः स्रस्तनेत्रत्वमावीनामसमुद्भवः।

दोषाणां-वातादीनां, उपचयः-प्रवृद्धत्वम्, अतिशयेन दोषोपचयोऽतिदोषोपचयः, तस्माद्धतोः, अन्तः-उदरमध्ये, गर्भे मृते सति, अपथ्यैः-स्वभावमात्राकालादिविरुद्धस्वभावैर्वा, अन्तर्मृते, अथवा दैवात् (दैवतः)-अन्यजन्मार्जितशुभाशुकर्मवशात्, अन्तर्मृते गर्भे सति, गर्भिण्या उदरं शीतं-ऊष्मरहितं, भवति। तथा, स्तब्धं-निश्चलं, भवति। तथा, ध्मातंदृतिवद्वातपूरितम्। तथा, भृशव्यथं-अतिवेदनं, भवति। तथा, गर्भास्पन्दो-गर्भस्यास्फुरणं, भ्रमस्तृष्णा च भवति। तथा, कृच्छ्रात्-कृच्छ्रेण, गर्भिण्या उच्छ्वसनं-ऊर्ध्वश्वसनम्। तथा क्लमो-ग्लानिः। तथा, अरतिः-स्थानासनशयनादिष्वनवस्थितत्वं चेतसः। तथा, स्रस्ते च ते नेत्रे च, तयोर्भावः स्रस्तनेत्रत्वम्, स्रस्ते-स्थानाच्युते इव। तथा, आवीनां-आसन्नप्रसवकालजशूलविशेषाणां, असमुद्भवः-अनुत्पादः।

तस्याः कोष्णाम्बुसिक्तायाः पिष्ट्वा योनिं प्रलेपयेत्॥

गुडं किण्वं सलवणं तथान्तः पूरयेन्मुहुः।

घृतेन कल्कीकृतया शाल्मल्यतसिपिच्छया॥ २५॥

मन्त्रैर्योगैर्जरायूक्तैर्मूढगर्भो न चेत्पतेत्।

अथापृच्छ्येश्वरं वैद्यो यत्नेनाशु तमाहरेत्॥ २६॥

हस्तमभ्यज्य योनिं च साज्यशाल्मलिपिच्छया।

हस्तेन शक्यं तेनैव

तस्याः-अन्तर्मृतगर्भायाः ईषदुष्णजलसिक्ताया योनिं प्रलेपयेत्-प्रदेहयेत्। गुडादिकं पिष्ट्वा सामर्थ्याद्गुडादिकेनैव लेपयेदिति योज्यम्। तथाऽन्तः पूरयेत्, शाल्मल्यतसिपिच्छयेति सम्बन्धनीयम्। योनेः प्रकृतत्वात्तस्या अन्तः-अभ्यन्तरं, अन्तर्बहिश्च। कीदृश्या पिच्छया ? घृतेन कल्कीकृतया, -पिष्टया। एवं योनेर्मुहुर्मुहुरभ्यन्तरं पूरयित्वाऽनन्तरं मूढगर्भपातनार्थं मन्त्रान् सिद्धान् प्रयोजयेत्। तथा, जरायूक्ताः-जराय्वपतने कथिताः तांश्च योगान् प्रयोजयेत्। मन्त्रैः-सङ्ग्रहोक्तैः (शा.अ.३)-"क्षितिर्जलं" इत्यादिभिः, अथर्ववोदोक्तैश्च मन्त्रैर्जरायोः पातनार्थमुक्तैः। एवमनुष्ठीयमानेऽपि मूढगर्भो यदि न पतति, अथ-अनन्तरं, ईश्वरं-नृपं, आपृच्छय-तदाज्ञां गृहीत्वा, तं-मूढगर्भं, आशु गर्भिण्या आहरेत्-आकर्षेत्। कथम् ? हस्तमभ्यज्य-लेपयित्वा, तथा योनिमभ्यज्य। केन ? साज्येत्यादि। शाल्मत्याः पिच्छा शाल्मलिपिच्छा-निर्यासः, सहाज्येन वर्तत इति साज्या, साज्या शासौ शाल्मलिपिच्छा च तया, हस्तंयोनिं चाभ्यज्य यत्नेन गर्भमाहरेत्। हस्तेन शक्यमाक्रष्टुं तेनैव-हस्तेन साज्यशाल्मलिपिच्छाक्तेन, तं-गर्भं, समाकर्षेत्।

गात्रं च विषमं स्थितम्॥२७॥

आञ्छनोत्पीडसम्पीडविक्षेपोत्क्षेपणादिभिः।

आनुलोम्य समाकर्षेद्योनिं प्रत्यार्जवागतम्॥२८॥

गात्रं च गर्भस्य विषमं कृत्वा स्थितं-अयथामार्गेण स्थितं, आञ्छनादिभिरानुलोम्य-स्पष्टत्वं प्राप्ते गात्रे सति, योन्यभिमुखमार्जवेन-ऋजुमार्गेणागतं सन्तं, आहरेत्। आञ्छनेन-आयामेन दीर्घतया स्थापनेन, तथोत्पीडनेन-ऊर्ध्वं पीडनेन, तथासमन्तात्पीडनेन, तथा विक्षेपेण-विशेषप्रेरणेन, तथा उत्कर्षण क्षेपणं-उत्क्षेपणं तेन, आदिग्रहणादेवंप्रायैरन्यैरपि स्वबुद्धिपरिकल्पतैः, स्पष्टत्वं प्राप्ते सति।

इदानीम् शस्त्रोपायसाध्यां मूढगर्भचिकित्सामाह-

हस्तपादशिरोभिर्यो योनिं भुग्नः प्रपद्यते।

पादेन योनिमेकेन भुग्नोऽन्येन गुदं च यः॥२९॥

विष्कम्भौ नाम तौ मूढौ शस्त्रदारणमर्हतः।

हस्तेन पादेन शिरसा, अतुल्यकालं-कदाचिद्धस्तेन कदाचित्पादेन कदाचिच्छिरसा, योनिं प्रति भुग्नः-कुटिलः, प्रपद्यतेआयाति, यः स एको विष्कम्भो नाम मूढगर्भः। तथा, पादेनैकेन योनिं तथा द्वितीयपादेन गुदं-पायुं, भुग्नः सन् यो मूढगर्भः प्रपद्यते, सोऽपरो विष्कम्भः। तौ-एतौ द्वौ, विष्कम्भौ नाम मूढौ-मूढगर्भौ, शस्त्रदारणमर्हतः। हस्तेनाक्रष्टुमशक्यत्वात्तयोः शस्त्रदारणं कार्यमित्यर्थः।

अत एवाह-

मण्डलाङ्गुलिशस्त्राभ्यां तत्र कर्म प्रशस्यते॥३०॥

मण्डलं चाङ्गुलिश्च मण्डलाङ्गुली। मण्डलशब्देन मण्डलाग्रं शस्त्रमुपलक्ष्यते, अङ्गुलिशब्देन चाङ्गुलिशस्त्रम्। ते नामनी ययोः शस्त्रयोस्ते मण्डलाङ्गुलिशस्त्रे शस्त्रविध्यध्यायोक्ते (हृ. सू. अ. २६/५-१३), ताभ्यां मण्डलाङ्गुलिशस्त्राभ्यां [तत्र-] तयोर्विष्कम्भाख्ययोर्मूढगर्भयोः, कर्म प्रशस्यते। ताभ्यां शस्त्राभ्यां दारणमेतयोः कार्यमित्यर्थः।

वृद्धिपत्रं हि तीक्ष्णाग्रं न योनाववचारयेत्।

वृद्धिपत्रसंज्ञं शस्त्रं यस्मात्तीक्ष्णाग्रमतस्तद्योनौ नावचारयेत्-तेन तत्र विदारणं न विधेयम्, प्रत्यवायभयात्।

दारणं च यथा विधेयं तथाऽऽह-

पूर्वं शिरःकपालानि दारयित्वा विशोधयेत्॥ ३१॥

कक्षोरस्तालुचिबुकप्रदेशेऽन्यतमे ततः।

समालम्ब्य दृढं कर्षेत्कुशलो गर्भशङ्कुना॥ ३२॥

अभिन्नशिरसं त्वक्षिकूटयोर्गण्डयोरपि।

पूर्वं शिरःसम्बन्धीनि कपालानि विशोधयेत्। किं कृत्वा ? शस्त्रेण दारयित्वा,-छित्वा। एवं शिरःकपालानि शोधयित्वागर्भिणीकोष्ठबाह्यानि कृत्वा, ततः-अनन्तरं, कक्षोरस्तालुचिबुकप्रदेशेऽन्यतमे-तद्विषये, समालम्ब्य-तं गर्भं गृहीत्वा, दृढं कृत्वा आकर्षेत्। के न ? गर्भशङ्कुना। कः ? कुशलः,-अभ्यस्तकर्मा वैद्यः। अभिन्नशिरसं-अविदारितोत्तमाङ्गं पुनर्गर्भं, अक्षिकूटयोस्तथा गण्डयोस्तद्विषयेऽन्यतमे प्रदेशे-कदाचिदक्षिकूटप्रदेशे कदाचिद्गण्डप्रदेशे, समालम्ब्य तं गर्भं दृढं गर्भशङ्कुना गृहीत्वा कर्षेत्।

बाहुं छित्वांऽससक्तस्य वाताध्मातोदरस्य तु॥ ३३॥

विदार्य कोष्ठमन्त्राणि बहिर्वा सन्निरस्य च।

अंसाभ्यां सक्तोंऽससक्तः, तस्य बाहुं छित्वाऽऽकर्षणं कुर्यात्। वामेनांसेन सक्तस्य वामं बाहुं दक्षिणेनांसेन सक्तस्य दक्षिणं बाहुं छित्वेत्यर्थः। वातेनाध्मातं-दृतिवत्पूरितं, उदरं यस्य मूढगर्भस्याऽसौ वाताध्मातोदरः, तस्य तु कोष्ठं-आमपक्वाशयाश्रयं, विदार्य-पाटयित्वा, अन्त्राणी च बहिः सम्यङ्निरस्य-बाह्यतः प्रक्षिप्य, आकर्षेत्।

कटीसक्तस्य तद्वच्च तत्कपालानि दारयेत्॥ ३४॥

कटीसक्तस्येति तृतिया समासः। कट्या सक्तस्य-ककुद्मत्या लीनस्य, तद्वच्चेति तेन-वाताध्मातोदरेण, तुल्यं कर्म दारणत्मकं कृत्वा, तत्कपालानि तस्याः-कट्याः, कपालानि-खण्डनि, विदारयेत्।

इति विशेषेण गर्भस्याकर्षणमुक्त्वा, सामान्येन मूढगर्भचिकित्सामाह-

यद्यद्वायुवशादङ्गं सज्जेद्गर्भस्य खण्डशः।
तत्तच्छित्त्वाऽऽहरेत्सम्यग्रक्षेन्नारीं च यत्नतः॥३५॥

यद्यदङ्गं मूढगर्भस्य वायुवशात् सज्जेत्-संश्लिष्येत्, तत्तदङ्गं खण्डशो-लवशः, छित्वा-दारयित्वा, सम्यगाहरेत्। किलैकवेलया सकलगर्भशरीरच्चेदनादन्तस्थितमूढगर्भाया नार्या अपि बलवच्छस्त्रनिपातनाद्विघातः सम्भाव्यत इति खण्डश इत्युक्तम्। अत एवाह-रक्षेदित्यादि। नारीं च यत्नेन-तात्पर्यं कृत्वा, रक्षेत्। यथा नार्या अङ्गं किञ्चिदपि न चिद्यते तथा विधेयमित्यर्थः।

गर्भस्य हि गतिं चित्रां करोति विगुणोऽनिलः।
तत्रानल्पमतिस्तस्मादवस्थापेक्षमाचरेत्॥३६॥

यस्माद्गर्भस्य चित्रां-नानारूपां, गतिं-अवस्थितिं, विगुणः प्रकुपितः, प्रभञ्जनः करोति, तस्माद्योऽनल्पमतिः-महाबुद्धिर्वैद्यः, स तत्र-तस्यां गतौ, अवस्थापेक्षमाचरेत्,-मूढगर्भं प्रत्यनुक्तमप्यवस्थितं कर्म कुर्यादित्यर्थः।

छिन्द्याद्गर्भं न जीवन्तं मातरं स हि मारयेत्।
सहात्मना, न चोपेक्ष्यः क्षणमप्यस्तजीवितः॥३७॥

जीवन्तं गर्भं गर्भिण्यन्तर्मृतगर्भलक्षणानभिज्ञो वैद्याभिमानी यः स तं गर्भं न दारयेत्। कुतो हेतोः ? इत्याह-यस्मात्समातरं मारयेत्। कथम् ? सहात्मना, -मातरमात्मानं च, स छिन्नो गर्भो व्यापादयेदित्यर्थः। न चास्तजीवितो-गर्भिण्या अन्तर्मृतो गर्भः, क्षणमपि-मुहूर्तमात्रमपि, उपेक्ष्यः। अपि तु तस्य द्रागेव प्रतिक्रियां कुर्यात्।

इदानीमुपेक्ष्यां मूढगर्भा स्त्रियमाह-

योनिसंवरणभ्रंशमक्कल्लश्वासपीडिताम्।
पूत्युद्वारां हिमाङ्गी च मूढगर्भां परित्यजेत्॥ ३८॥

योनेः संवरणं-संवृतयोनित्वम्, तथा तस्या एव योनेर्भ्रंशः स्वस्थानाच्च्यवनम्, तथा मक्कल्लः-शिरोबस्तिकोष्ठशूललक्षणः प्रागुक्तो व्याधिः, तैर्योनिसंवरणादिभिः पीडिताम्। तथा, पूत्युद्वाराम्। तथा, हिमाङ्गीम्। एवंविधां मूढगर्भां त्यजेत्-नोपक्रमेत्।

अथापतन्तीमपरां पातयेत्पूर्ववद्भिषक्।
एवं निर्हृतशल्यां तु सिञ्चेदुष्णेन वारिणा॥ ३९॥
दद्यादभ्यक्तदेहायै योनौ स्नेहपिचुं ततः।
योनिर्मृदुर्भवेत्तेन शूलं चास्याः प्रशाम्यति॥ ४०॥

अथ-मूढगर्भाहरणादनन्तरं, अपरां-जरायुसंज्ञां, अपतन्तीमनिष्क्रामन्तीं, पूर्ववत्पातयेत्। पूर्वेण तुल्यं-पूर्ववत्, पूर्वोक्तेनापरापातनोक्तविधिना "हिरण्यपुष्पीमूलं च" (ह्.शा. अ. १/८३)इत्यादिनेत्यर्थः। एवं-अनन्तरोक्तेन विधिना, निर्हृतं शल्यं-गर्भजरायुसंज्ञं, यस्यास्तां तु स्त्रियमुष्णेन जलेन सिञ्चेत्। ततः-स्नानादनन्तरं, अभ्यक्तशरीरायै स्त्रियै योनौ स्नेहपिचुं दद्यात्। तेन-स्नेहपिचुना, अस्याः-योषितः, योनिर्मृदुर्भवेत्। शूलं-रुजा च, प्रशम्यति।

दीप्यकातिविषारास्नाहिङ्ग्वेलापञ्चकोलकात्।
चूर्णं स्नेहेन कल्कं वा क्काथं वा(तां)पाययेत्ततः॥ ४१॥
कटुकातिविषापाठाशाकत्वग्घिङ्गुतेजिनीः।

तद्वच्च दोषस्यन्दार्थं वेदनोपशमाय च॥४२॥

त्रिरात्रमेवं, सप्ताहं सेन्हमेव ततः पिबेत्।

सायं पिबेदरिष्टं च तथा सुकृतमासवम्॥४३॥

शिरीषककुभक्काथपिचून् योनौ विनिक्षिपेत्।

उपद्रवाश्च येऽन्ये स्युस्तान् यथास्वमुपाचरेत्॥४४॥

ततः-स्नानाभ्यङ्गादनन्तरं, दीप्यकादेश्चूर्णं स्नेहेन-घृतादिना प्रकृत्यादिवशात् यथायोग्येन, तां-स्त्रियं, पाययेत्। कल्कं वादीप्यकादेर्जलेन पिष्ट्वा, स्नेहेन तां पाययेत्। क्काथं वा दीप्यकादेस्तां पाययेत्। तथा, कटुकादीनि तद्वत् तां स्त्रियं पाययेत्। एतानि द्रव्याणि चूर्णिकृत्य स्नेहेन कल्कीकृत्य क्काथीकृत्य वा पाययेत्। शाकं-खरच्छदम्। त्वक्-त्वचम्। तेजिनी-तेजोवती। किमर्थं पाययेत्? दोषस्यन्दार्थम्। दोषस्य-रक्तादेः, स्यन्दः-स्रवणं, तदर्थं पाययेत्। तथा, वेदनायाः-पीडायाः, उपशान्त्यर्थं च। त्रिरात्रमेवं मूढगर्भाकर्षणदिनात्प्रभृति कार्यम्। ततः-त्रिरात्रादनन्तरं, सा मूढगर्भा, सप्ताहं स्नेहमेव पिबेत्, न तु रूक्षौषधम्, इत्येवकारोऽवधारणार्थो द्योतयति। सायं-दिनान्ते, अरिष्टं-पूर्वोक्तलक्षणं, पिबेत्। तथा, शोभनं कृत्वा कृतं-निष्पादितं, आसवं-मद्यविशेषं, तथा शिरीषककुभक्काथाक्तान् पिचून्-विकेशिकाप्रायान् कार्पासादिमयान्, योनौ विनिक्षिपेत्। उपद्रवा ज्वरादयश्चान्ये ये भवेयुः, तान्-उपद्रवान्, यथास्वमुपाचरेत्,-यस्य ज्वरादेर्य आत्मीय उपक्रमः, तेन तमुपक्रमेदित्यर्थः।

एतच्च पूर्वोक्तमासेव्य, अनन्तरं यत्कर्तव्यं मूढगर्भायाः स्त्रियास्तदाह -

पयो वातहरैः सिद्धं दशाहं भोजने हितम्।

रसो दशाहं च परं लघुपथ्याल्पभोजना॥४५॥

स्वेदाभ्यङ्गपरा स्नेहान् बलातैलादिकान् भजेत्।

ऊर्ध्वं चतुर्भ्यो मासेभ्यः सा क्रमेण सुखानि च॥४६॥

पयः-क्षीरं, अनन्तरं तस्यै दशाहं भोजने हितम्। किम्भूतम्? वातहरैः-रास्नादिभिर्द्रव्यैः, सिद्धं-श्रृतम्। दशाहादनन्तरं द्वितीयं च दशाहं रसो भोजने हितः। परं-अतो दिनविंशतेरनन्तरं, सा-स्त्री, लघुपथ्याल्पभोजना सती, तथा स्वेदाभ्यङ्गपरातत्प्रधाना सती, स्नेहान्-बलातैलादिकान्, भजेत्। ऊर्ध्वं-अनन्तरं चतुर्भ्यो मासेभ्यः पञ्चममासात्प्रभृति, सा-निष्क्रान्तमूढगर्भा स्त्री, क्रमेण-न तु सहसा, सुखानि-अन्नपानाहारविहाररूपाणि, भजेत्।

अथ बलातैलं निरूपयति-

बलामूलकषायस्य भागाः षट् पयसस्तथा।

यवकोलकुलत्थानां दशमूलस्य चैकतः॥४७॥

निष्काथभागो भागश्च तैलस्य तु चतुर्दशः।

द्विमेदादारुमञ्जिष्ठाकाकोलीद्वयचन्दनैः॥४८॥

सारिवाकुष्ठतगरजीवकर्षभसन्धवैः।

कालानुसार्याशैलेयवचागुरुपुनर्नवैः॥४९॥

अश्वगन्धावरीक्षीरशुक्लायष्टीवरारसैः।

शताह्वाशूर्पपर्ण्यैलात्वक्पत्रैः श्लक्ष्णकल्कितैः॥५०॥

पक्वं मृद्वग्निना तैलं सर्ववातविकारजित्।

सूतिकाबालमर्मास्थिहृतक्षीणेषु पूजितम्॥५१॥

ज्वरगुल्मग्रहोन्मादमूत्राघातान्त्रवृद्धिजित्।

धन्वन्तरेरभिमतं योनिरोगक्षयापहम्॥५२॥

बलाया मूलानि, तेषां कषायः-क्वाथः, तस्य भागाः षट्। तैलैकभागापेक्ष-यैतद्बोध्यम्। पयसस्तथा-क्षीरस्य षडेव भागाः। यवकोलकुलत्थानां दशमूलस्य चैकतः-एकत्र क्वथितानां निष्क्वाथभागः। यवादीनां तैलसमो निष्क्वाथभाग एक इत्यर्थः। एवं त्रयोदश भागा भवन्ति। तैलस्य तु चतुर्दशो भागः। चतुर्दशानां पूरणः "तस्य पूरणे डट्" इति डट्। एतदेव स्पष्टीक्रियते शिष्यहितार्थम्। तत्र यदा षोडशपलानि तैलस्य श्रपयितव्यानि तदा

बलामूलपलानि चतुर्विंशतिर्भवन्ति, जलपलशतानि त्रीणि चतुरशीत्यधिकानि, ततश्चतुर्थांशेन षण्णवतिः क्वाथपलानि। क्षीरपलानि षण्णवतिः। यवादीनां पलानि चत्वारि, पानीयपलानि चतुःषष्टिः, षोडशपलानि कषायस्य। द्विमेदादीनि द्रव्याणिप्रत्येकमर्धकर्षप्रमाणानि रक्तिकया पञ्चमभागसहितया सधानकयाऽधिकानीति। कालानुसार्या-उत्पलसारिवा। क्षीरशुक्ला-क्षीरविदारी। वरा-त्रिफला। रसो-बोलः। योऽयं यवकोलकुलत्थदशमूलैरेको भागः परिकल्पितः, तत्र यवकोलकुलत्थानां त्रयोंऽशा दशमूलस्य दशांशा इति व्याख्येयम्। "कल्पयेत्सदृशान्भागान् प्रमाणं यत्र नोदितम्।" (हृ. क. अ. ६/२४) इति वचनात्। सङ्ग्रहेऽप्युक्तम् (शा. अ. ४)-"यवकोलकुलत्थदशमूलकषायस्य भागः" इति। ये तु यवकोलकुलत्थानां त्रयोंऽशा दशमूलस्य चतुर्थोंऽश इति भागोऽयं कल्प्य इत्याहुः, ते तु पौर्वापर्यं न पर्यालोचयन्त्येव। यतः "कल्पयेत्" इत्यादिकया परिभाषया द्रव्याणामेषां समांशत्वं नियमितमेव। पृथक् षष्ठ्याऽत्र यो निर्देशः स छन्दोनुरोधादेव बोध्यः। तथा चानेनैव तन्त्रकृता सङ्ग्रहे समस्तान्येवैतानि द्रव्याणि निर्दिष्टानि। अपि च, दशमूलस्याधिक्येन वातरोगहन्तृत्वं यथाऽस्य तैलस्य, न तथा यवादिभिरिति सर्वथा पूर्वं व्याख्यानं श्रेयः। मृद्वग्निनेति मृदुशब्दोऽग्निविशेषणाय प्रयुक्तः। किल खरतरदहनसम्पर्कात् क्षीरबाहुल्येनास्य तैलस्य झटिति पाकातिक्रान्तताऽपि किञ्चित्सम्भाव्यते। एतच्च तैलमशेषवातरोगहन्तृ। तथा, सूतिकादिषु प्रशस्तम्। तथा, ज्वरादिजित्। तथा, भगवतो धन्वन्तरेरभिमतम्, अतिशयगुणवत्वात्। तथा, योनिरोगं क्षयं चापहन्ति।

बस्तिद्वारे विपन्नायाः कुक्षिः प्रस्पन्दते यदि।

जन्मकाले ततः शीघ्रं पाटयित्वोद्धरेच्छिशुम्॥५३॥

विपन्नायाः-मृताया गर्भिण्याः, यदि कुक्षिः प्रस्पन्दते-अत्यन्तं चलति। क्व प्रदेशे ? बस्तिद्वारे,-तत्समीपे। कदा ? जन्मकाले,-गर्भप्रसवोन्मुखे काले। तदा कुशलो वैद्यः शीघ्रं [ततः-] कुक्षिप्रस्पन्दनादनन्तरं, पाटयित्वा शिशुं-बालं, उद्धरेत्।

मधुकं शाकबीजं च पयस्या सुरदारु च।

अश्मन्तकः कृष्णतिलास्ताम्रवल्ली शतावरी॥५४॥

वृक्षादनी पयस्या च लता सोत्पलसारिवा।

अनन्ता सारिवा रास्ना पद्मा च मधुयष्टिका॥५५॥

बृहतीद्वयकाश्मर्यक्षीरिशुङ्गत्वचा घृतम्।

पृश्निपर्णी बला शिग्रुः श्वदंष्ट्रा मधुपर्णिका॥५६॥

शृङ्गाटकं बिसं द्राक्षा कसेरु मधुकं सिता।

सप्तैतान् पयसा योगानर्द्धश्लोकसमापनान्॥५७॥

क्रमात्सप्तसु मासेषु गर्भे स्रवति योजयेत्।

मधुकादिद्रव्योपलक्षितान् सप्त योगान् क्रमात्-यथाक्रमनिर्दिष्टानतिक्रमेण, सप्तसु मासेषु गर्भे स्रवति तद्रक्षार्थं तान् योजयेत्। कीदृशान् योगान्? अर्द्धश्लोकेन समापनं-समाप्तिः, येषां तानर्द्धश्लोकसमापनान्। अश्मन्तको-यमलपत्रकः। ताम्रवल्ली-रामतरुणी, मञ्जिष्ठेत्येके। लता-गन्धप्रियङ्गुः, गौरसारिवेत्यन्ये। उत्पलसारिवा-कृश्णसारिवा। क्षीरिणां-न्यग्रोधादीनां, शुङ्गाः, तथा तेषामेव त्वक् चेति द्वन्द्वः। "द्वन्द्वाच्चुदषहान्तात्" इति टच्।

कपित्थबिल्वबृहतीपटोलेक्षुनिदिग्धिकात्॥५८॥

मूलैः श्रृतं प्रयुञ्जीत क्षीरं मासे तथाऽष्टमे।

नवमे सारिवानन्तापयस्यामधुयष्टिभिः॥५९॥

योजयेद्दशमे मासि सिद्धं क्षीरं पयस्यया।

अथवा यष्टिमधुकनागरामरदारुभिः॥६०॥

कपित्थादीनां समाहारद्वन्द्वः। कपित्थादेर्द्रव्यान्मूलैः श्रृतं क्षीरमष्टमे मासि प्रयुञ्जीत। नवमे मासि सारिवादिभिः सिद्धं क्षीरं प्रयुञ्जीत। दशमे मासि काकोल्यादिसिद्धं क्षीरमथवा यष्ट्यादिभिः सिद्धं योजयेत्।

अवस्थितं लोहितमङ्गनाया
वातेन गर्भं ब्रुवतेऽनभिज्ञाः।
गर्भाकृतित्वात्कटुकोष्णतीक्ष्णैः
स्रुते पुनः केवल एव रक्ते॥६१॥

गर्भं जडा भूतहृतं वदन्ति
मूर्तेन दृष्टं हरणं यतस्तैः।
ओजोशनत्वादथवाऽव्यवस्थै-
र्भूतैरुपेक्ष्येत न गर्भमाता॥ ६२॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचिता-यामष्टाङ्गहृदयसंहितायां द्वितीये शारीरस्थाने गर्भव्यापन्नाम द्वितीयोऽध्यायः॥ २॥

लोहितं वातेन हेतुनाऽवस्थितं-कुक्षौ पवनेन रुद्धं, गर्भं ब्रुवतेऽनभिज्ञाः। नञत्र पर्युदासे, अभिज्ञसदृशा इत्यर्थः। कुतस्तेषां भ्रान्तिः? इति तद्बीजमाह-गर्भाकृतित्वादिति। गर्भस्याकृतिः-संस्थानमुन्नत्यादिकम्, तथा "हृल्लासदौर्हृद" (ह. नि. अ. ११/५१) इत्यादि रक्तगुल्मनिदानोक्तं लक्षणं, वातरुद्धलोहितावस्थितौ गर्भस्थितौ चोभयत्र समानम्। अतोऽल्पबुद्धित्वादवस्थितं लोहितं गर्भं ब्रुवते। कटुकोष्णादिभिः-अवस्थितलोहितस्रुतिहेतुभिः, स्रुते केवल एव रक्ते-गर्भरहिते, जडाः निर्बुद्धयो, भूतहृतमिति गर्भं वदन्ति। पुनःशब्दः शिरसः कम्पं कृत्वा तेषामसम्भाव्याङ्गीकारेण सर्वजनप्रथितेन जडत्वं सहेतुकं प्रतिपादयति। अत एवाह-यतो,-यस्मात्, मूर्तेः-शरीरस्य, हरणं तैः-भूतैः, न दृष्टं-न क्वचिदुपलब्धम्, अतः-असम्भव्यवस्तुप्रतिज्ञानात्, तेषां जडत्वमित्यर्थः। ननु, एतदपि कथमुच्यते? इत्याह-ओजोशनत्वात्। यस्मात्ते भूता ओजोशनाः-ओजोभक्षणमर्यादाः। अथवा कदाचित्ते-भूता उल्लङ्घितमर्यादाःस्युः। तैः-तथाभूतैः, अव्यवस्थैः-अव्यवस्थावस्थितैः, भूतैर्गर्भस्य माता नोपेक्ष्येत, अपि तु ह्रियेतैव। तथा हि-यथा गर्भमातोपचितशरीरा न तथा गर्भ इति। उपजातीन्द्रवज्राख्ये वृते।

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टङ्गहृदय- टीकायां सर्वाङ्गसुन्दरा-ख्यायां द्वितीये शरीरस्थाने गर्भ व्यापन्नाम द्वितीयोऽध्यायः समाप्तः॥ २॥

****

तृतीयोऽध्यायः।

गर्भव्यापदोऽनन्तरमङ्गविभाग उच्यते। अङ्गप्रत्यङ्गविज्ञाने हि सति सम्यग्गर्भस्याहरणादिकं कर्तुं शक्यते, नान्यथा। इतीदमाह-

अथातोऽङ्गविभागं शारीरं व्याख्यास्यामः।

इति ह स्माहुरात्रेयादयो महर्षयः।

(गद्यसूत्रे॥२॥)

अङ्गस्य-शरीरस्य, विभागो-विभजनं, अङ्गप्रत्यङ्गादिना पृथक्करणं-अङ्गविभागः। अथेत्यादि पूर्ववत्।

अथ तान्येवाङ्गानि विभक्तुकाम आह-

शिरोऽन्तराधिर्द्वौ बाहू सक्थिनीति समासतः।

षडङ्गमङ्गं प्रत्यङ्गं तस्याक्षिहृदयादिकम्॥१॥

षडङ्गं-षडवयवं, अङ्गं-शरीरम्। तान्येव षडङ्गान्याहशिरः, तथाऽन्तराधिः, तथा द्वौ बाहू-वामदक्षिणौ, तथा सक्थिनी द्वे-वामदक्षिणे, इति-एवं, समासतः-सङ्क्षेपेण, षडङ्गम्। विस्तरेण पुनरनेकावयवम्। अन्तराधिशब्देन शिरोबाहुसक्थिवर्जः सर्वो मध्यभाग उच्यते।

आधीयन्ते-निबध्यन्ते यथायथं शरीरस्यान्तः स्थाप्यन्ते प्राक्कृतेन कर्मणा शिरःप्रभृतयः पञ्चावयवा यस्मिन् सोऽन्तराधिः। तस्य-षडवयवस्याङ्गस्य, अक्षिहृदयादिकं प्रत्यङ्गम्। आदिशब्देन कर्णनासापाणिपादादिपरिग्रहः। अवयवमवयवं प्रति योऽवयवः, तत्प्रत्यङ्गमुच्यते। शरीरं व्योमवाय्वादिपञ्चमहाभूतात्मकं चेतनादीनामधिष्ठानम्। अतस्तमेव प्रत्येकं महाभूतगुणमाह-

शब्दः स्पर्शश्च रूपं च रसो गन्धः क्रमाङ्गुणाः।

खानिलाग्न्यब्भुवाम्

शब्दादयः पञ्च गुणाः क्रमात्-क्रमेण, खादीनां पञ्चानां भवन्ति। खं चानिलश्चाग्निश्चापश्च भूश्च खानिलाग्न्यब्भुवः, तासाम्। तत्र शब्दः खस्य-आकाशस्य गुणः, सुषिरेऽतिरेक्तस्पर्शादिगुणचतुष्टयायोगित्वेन शब्दमात्रस्यैवोपलम्भात्। स्पर्शो वायोः। रूपमग्नेः। रसोऽपां-पानीयस्य। गन्धो भूमेः। एतेषां गुणानां खाद्याश्रितत्वात्तेषां गुणा इत्युच्यन्ते।

किमेकैक एवाकाशस्येव वाय्वादीनां यथोक्तो गुणः ? उतान्येऽपि सन्ति ? इत्याह-

एकगुणवृध्द्यन्वयः परे॥२॥

एकेन गुणेन वृद्धिः, तयाऽन्वयः-सम्बन्धः। परे-वाय्वादौ महाभूते। अथवा, एकस्य गुणस्य वृद्धिः, तयाऽन्वयः-अनुगमस्तद्भावित्वं पर इति। चतुर्णां महाभूतानां परत्वोक्ति-भात्त्वमाकाशापेक्षया। तेन वाय्वादौ महाभूते एकगुणवृध्द्यन्वयः। आकाशस्त्वेकगुण एव। तस्य परत्वासम्भवान्न तस्यैकगुणवृध्द्यन्वयः। आकाशात्परे-अनन्तरे महाभूते वाय्वाख्ये, एकगुण वृध्द्यन्वयेन द्विगुणत्वात् शब्दस्पर्शगुणत्वम्। ततः परे महाभूतेऽग्न्याख्ये, एकगुणवृद्ध्यन्वयेन त्रिगुणत्वात् शब्दस्पर्शरूपगुणत्वम्। ततः परे-जलाख्ये महाभुते, एकगुणवृध्द्यन्वयेन चतुर्गुणत्वात् शब्दस्पर्शरूपरसगुणत्वम्। ततः परे-पृथिव्याख्ये महाभूते, एकगुणवृध्द्यन्वयेन पञ्चगुणत्वात् शब्दस्पर्शरूपरसगन्धगुणत्वम्। एवं पञ्चानां खादीनामेकगुणवृध्द्यैकद्वित्रिचतुः पञ्चगुणत्वं बोध्यम्।

इदानीं यथाक्रमनिर्दिष्टेभ्यो भूतेभ्यो ये भावा भवन्ति, तान् दर्शयति-

तत्र खात् खानि देहेऽस्मिन् श्रोत्रं शब्दो विविक्तता।

वातात्स्पर्शत्वगुच्छ्वासा वह्नेर्दृग्रूपपक्तयः॥३॥

आप्या जिह्वारसक्लेदा घ्राणगन्धास्थि पार्थिवम्।

[तत्र-] तेषु पञ्चसु महाभूतेषु मध्ये, अस्मिन् देहे-मनुष्यादौ स्थूलतया परिणते, नान्यस्मिन्नतीन्द्रिये भूतादौ। खात्-आकाशात् सत्वबहुलात्, खानि-छिद्राणि, 'भवन्ति' इति शेषः। एवं श्रोत्रेन्द्रियाधिष्ठानं-श्रोत्रम्। तथा, शब्दो-घोषः। तथा, विविक्तता-शून्यता रिक्तता, खादेव छिद्रविशेषः। यद्यपि छिद्रादिषु सर्वभूतानामेव व्यापारः, तथाऽप्याकाशस्यैवात्र विशिष्टं कारणत्वम्। यथा-घटादौ मृद्दण्डचक्रसलिलसूत्रादिकारणसमुदायनिष्पन्नेऽपि मृद एव विशिष्टकारणत्वम्। अत एवासौ मृन्मय एवोच्यते। एवं सर्वेषु वक्ष्यमाणेषु वातादिजेषु स्पर्शादिषु बोधयम्। वातात्-अनिलाद्भजोबहुलात्, स्पर्शादयो भवन्ति। स्पर्शः-स्पर्शनम्। त्वगिह स्पर्शनेन्द्रियाधिष्ठानम्। तथा, उच्छ्वासः-प्राणाख्यः। वह्नेः सत्वरजोबहुलाद्दृगादयो भवन्ति। दृक्-दृष्टिः, चक्षुरिन्द्रियाधिष्ठानम्। तथा, रूपाख्यो गुणः। पक्तिः-पाकः। उपलक्षणं चेदम्। तेजःपित्तोष्ममेधावर्णशौर्यादयोऽपि वह्नेरेव वेद्याः। अभ्यः सत्वतमोबहुलाभ्यो जाता आप्या जिह्वादयो भवन्ति। जिह्वाशब्देनात्र जिह्वाया विशिष्ट एकदेशो रसनेन्द्रियाधिष्ठानं विवक्षितः, न सर्वैव जिह्वा। तथा, रसाख्यो गुणः। तथा, क्लेदाख्यो भावः। उपलक्षणं चेदम्। स्वेदस्नेहमूत्रादयोऽप्याप्या एव। घ्राणादि पार्थिवं भवति। घ्राणं-नासाया विशिष्ट एकदेशो घ्राणेन्द्रियाधिष्ठानम्। गन्धो गुणः। तथा, अस्थि भावः। एतानि सर्वाणि पृथिव्याख्यात्तमोबहुलान्महाभूताज्जातानि।

देहेऽस्मिन् किं मातृजम्? किं पितृजम्? इत्याह-

मृद्वत्र मातृजं रक्तमांसमज्जगुदादिकम्॥४॥

पैतृकं तु स्थिरं शुक्रधमन्यस्थिकचादिकम्।

चैतनं चित्तमक्षाणि नानायोनिषु जन्म च॥५॥

अत्र-अस्मिन् देहे, अनेकसामग्रीकेऽपि यन्मृदु वस्तु तन्मातृजम्। मातुराधिक्येन कारणभाव इत्यर्थः। मातृजमिति "पञ्चम्यामजातौ" इति जनेर्डः। किं पुनस्तन्मृदु? इत्याह-रक्तेत्यादि। आदिशब्देन नाभीहृदययकृत्प्लीहामाशयादीनां ग्रहणम्। ननु, गुदस्य मांसप्रायत्वान्मांसग्रहणेनैव सिद्धं ग्रहणम्। तत् किं गुदग्रहणेन? ब्रूमः। मांसत्वस्याप्यस्यानिश्चयात् पृथगुपादानं कृतम्। तथा च वक्ष्यति (हृ.शा.अ.४/४५)-"मांसमर्म गुदोऽन्येषां" इति। यद्वस्तु स्थिरं तत् पैतृकं-पितृजम्। किं तत्? इत्याह-शुक्रादिकम्। आदिशब्देन शिरास्नायुरोमादीनां ग्रहणम्। पैतृकमिति "पितुर्यच्च" इति ठक्। "इसुसुक्तान्तात्कः" इति कादेशः। चेतना-आत्मैव, प्राक्कृतशुभाशुभकर्मबीजक्षेत्रमित्यर्थः। ततो जातं चैतनम्। किं तत्? इत्याहचित्तमित्यादि। चित्तं-इन्द्रियसारथिः। तथा, अक्षाणि-श्रोत्रादीनि। ननु, चैतनान्यक्षाणीत्येतत्पूर्वापरव्याहतमिव मन्यामहे। यतः पूर्वमुक्तम् (श्लो.३)-"खात्खानि देहेऽस्मिन्" इति। तत्कथमिह चैतनान्यक्षाणीत्युच्यन्ते? ब्रूमः। नात्र तत्र वाऽवधारणं कृतम्। यथा चैतनान्येवाक्षाणि खादेव खानीति। तस्मादाकाशं चेतना च द्वयमप्यक्षाणां कारणमित्यवेहि। तथा, नानायेनिषु-गजाजवाजिबस्तशशशम्बरप्रभृतिषु, यज्जन्म-सम्भवः, तदपि चैतनम्। उपलक्षणं चेदम्। कामक्रोधलोभभर्यहर्षधर्माधर्मशीलतास्मृतिबुद्धीच्छाद्वेषप्रयत्नाहङ्कारसुखदुःखायुःस्वरविशेशाद योऽपि हि चैतना एव।

सात्म्यजं त्वायुरारोग्यमनालस्यं प्रभा बलम्।

सात्म्यं त्रिविधम्, व्याधिसात्म्यं देशसात्म्यं देहसात्म्यं च। तत्रेह व्याधिसात्म्यं न गृह्यते। यतो देहस्य सम्भवतः सम्भूतमात्रस्य चेयं विचारणा प्रस्तुता, कुतः किं सम्भवति? इति। अतो व्याधिचर्चेहाप्रस्तावान्नोपयुज्यते। [तस्माद्देशसात्म्यं देहसात्म्यं च गृह्यते। देहस्य हि सम्भवतः सम्भूतमात्रस्य च मात्राहारविहारादि यदपथ्यमप्यतिशयेन शीलितं तदप्यस्य देहस्योचिततां गच्छत्सुखनुबन्धत्वेन सात्म्यमुच्यते।] तस्माद्देशसात्म्यं देहसात्म्यम् च ग्रहीतुं युक्तम्। सात्म्याजातं-सात्म्यजम्। किं तत्? आयुः,-जीवितम्। तथा, आरोग्यं-धातुसाम्यम्। तथा, अनालस्यं-सर्वचेष्टासूद्योगः,-उत्साहः। तथा, प्रभाकान्तिः। तथा, बलं-शक्तिः। उपलक्षणं चेदम्। अलोलुपत्वेन्द्रियप्रसादस्वरवर्णवीर्योजःसम्पत्प्रहर्षाद्यपि हि सात्म्यजमेव।

रसजं वपुषो जन्म वृत्तिर्वृद्धिरलोलता॥ ६॥

रसात्-आहाररसात् परिणताज्जातं रसजम्। किं तत्? जन्म,-सम्भवः। कस्य? वपुषः,-सकलस्य शरीरस्य। तथा, वृत्तिः-वर्तनं, जीवितानुबन्धः। रसं हि विना जीवितस्याप्यभावः। तथा, वृद्धिः-आयामविस्ताराभ्यां यथासंस्थानस्य शरीरस्याधिक्यम्। तथा, अलोलिता-अलौल्यम्। अलोलता रसजेति लिङ्गविपरिणामे सति सम्बन्धः। उदाहरणमात्रं चेदम्। उत्साहपुष्टितृप्तयोऽपि हि रसजा एव।

सातिविकं शौचमास्तिक्यं शुक्लधर्मरुचिर्मतिः।

राजसं बहुभाषित्वं मानकृद्दम्भमत्सरम्॥ ७॥

तामसं भयमज्ञानं निद्राऽऽलस्यं विषादिता।

सत्वजं शौचादिकम्। शौचं-वाक्कायमनसां शुद्धिः सत्यवाक्याद्यभिधायित्वं-वाक्शुद्धिः, मृज्जलादिना क्षालनादि शास्त्रोदितं-कायिकं शौचम्। मानसं तु शौचं-जगद्बन्धुता करुणाशुद्धसन्तानत्वमास्तिक्यादि। शौचमिति "इगान्ताच्च लघुपूर्वात्" इत्यण्। आस्तिक्यमिति अस्ति परलोक इति मतिरस्येत्यास्तिकः। "अस्ति नास्ति" इत्यादिना ठक्। आस्तिकस्य भाव आस्तिक्यम्। ब्राह्माणादित्वात् ष्यञ्। तथा, शुक्ले धर्मे निर्व्याजे, रुचिः-भक्तिः। मतिः-प्रज्ञा। उपलक्षणं चेदम्। कृतज्ञतादाक्षिण्यव्यवसायशौर्य-गाम्भीर्यस्मृतिमेधादयोऽपि हि सात्त्विका एव। राजसानि बहुभाषित्वादीनि। उपलक्षणं चेदम्। शौर्यदुरुपचारतालोलुपत्वहर्षकामादयोऽपि राजसा एव। तामसानि भयादीनि। उपलक्षणं चेदम्। प्रमादशोकादीन्यपि तामसान्येव। तत्र सत्वं-मनः, तस्योपप्लवो रजस्तमश्चेति। सुश्रुते (सङ्ग्रहे) चोक्तम् (सू.अ.२०)-"वय्वाकाशधातुभ्यां वायुः, आग्नेयं पित्तम्, अम्भःपृथिवीभ्यां श्लेष्मा।" इति। आयुर्वेदावतारे तूक्तम्-"शीतोष्णशमवृद्ध्याऽऽप्यं न पित्तं द्रुतताम्रवत्। करकाम्भः कफो भौमौ नानिलानलसंहतः॥ (?) इति।

अधुना देहाश्रितसर्वभावोपसंहारं कुर्वन् प्रधानो यो भावो देहस्य, तस्य प्राधान्यं दर्शयन्निदमाह-

इति भूतमयो देहः

सर्वेभ्यो देहाश्रितभावेभ्यो महाभूतानामेव प्राधान्यम्, तन्मयत्वाद्देहस्य सर्वभावाधारभूतस्य।

इत्येवमनेन ग्रन्थेन देहस्य भूतमयत्वमभिधाय, इदानीं देहस्य प्रतिभागशो निरूपयन्नाह-

तत्र सप्त त्वचोऽसृजः॥८॥

पच्यमानात्प्रजायन्ते क्षीरात्सन्तानिका इव।

तत्र-तस्मिन् महाभूतमये देहे, असृजो-रक्तात् सप्तत्वगुत्पादनसमर्थेन धातूष्मणा पच्यमानात्, सप्त त्वचः प्रकर्षेण जायन्ते। कुतः का इव? यथा क्षीरात् पच्यमानाच्छीतीभूतात्तदुपरि घनभागस्वभावाः सन्तानिकाः-जालिकाः, जायन्ते तद्वदसृजः पच्यमानात्सप्त त्वचो भवन्ति। तत्र "भासिनी लोहिनी श्वेता ताम्रा त्वग्वेदिनी तथा। स्याद्रोहिणी मांसधरा सप्तमी परिकीर्तिता॥१॥ व्रीहेरष्टादशांशाऽऽद्या द्वितीया षोडशांशिका। द्वादशांशा तृतीया तु चतुर्थ्यष्टांशमात्रिका॥२॥ पञ्चमी पञ्चमांशा तु षष्ठी व्रीहिप्रमाणिका। व्रीहिद्वयप्रमाणा तु सप्तमी भिषजां मता॥३॥ खादिच्छायापञ्चकस्य भासिन्याधारतां गता। मन्यन्ते षट् त्वचः केचित्तासां बाह्योदकाश्रया॥४॥ द्वितीयाऽसृग्धरा सिध्मश्चित्राधारा तृतीयका। चतुर्थी सर्वकुष्ठानामधिष्ठानत्वमागता॥५॥ विद्रध्यलज्यधिष्ठाना पञ्चमी रोगकारिणी। षष्ठ्यत्र यस्यां च्छिन्नायां ताम्यत्यन्धं तमो विशेत्॥६॥यामधिष्ठाय जायन्ते स्थूलमूलानि पर्वसु। अरूंषि कृष्णरक्तानि दुश्चिकित्स्यतमानि च॥७॥" इति।

इदानीं कला आह-

धात्वाशयान्तरक्लेदो विपक्वः स्वंस्वमूष्मणा॥९॥

श्लेष्मस्नाय्वपराच्छन्नः कलाख्यः काष्ठसारवत्।

ताः सप्त

धातूनां-रसादीनां, आशयाः-आधाराः, जलाशयवत्तेषामन्तराण्यन्तरालानि, तेषु धात्वाशयान्तरेषु क्लेदो धात्वाशयान्तरक्लेदः। स विपक्वः कलाख्य उध्यते-कलासंज्ञां लभते। केन विपक्वः ? स्वम्स्वमूष्मणा,-आत्मीयेनात्मीयेन वह्निना। यथा रसधात्वाशयान्तरस्थः क्लेदो रसधातूष्मणा विपक्वः कलैका भवति। यावच्छुक्रधात्वाशयान्तरस्थः शुक्रधातूष्मणा विपक्वः सप्तमी कला भवति। कीदृशो विपक्वः ? श्लेष्मणा स्नाय्वाऽपरया च-जराय्वाख्यया, छन्नः-छादितः। "वा दान्तशान्त" इत्यादौ चदेर्ण्यन्तात् छन्नशब्दो निपातितः। किंवत् ? काष्ठसारवत्। यथा काष्ठस्य सारः, तथाऽयं धातुसारशेषोऽल्पत्वात्कलासंज्ञः। धात्वाशयान्तरमर्यादाः सप्त कलाः। तत्र-"आद्या मंसधरा यस्यां धमन्यः स्नायवः सिराः। स्रोतांसि च प्ररोहन्ति प्रतानैर्व्यापिभिः कला॥१॥ द्वितीयाऽसृग्धराऽस्यां तु मांसान्तः शोणितं स्थितम्। विशेषतः सिराश्लीहयकृत्सु क्षतजं क्षतात्॥२॥ मांसात्प्रवर्तते क्षीरं क्षीरिवृक्षादिव क्षतात्। मेदोधरा तृतीयाऽत्र मेदाऽस्थ्नामुदरे स्थितम्॥३॥ भवत्यणुषु मज्जाऽन्तः स्थूलास्थिष्वथ मूर्द्धनि। मस्तुलुङ्गकपालान्तश्चतुर्थी तु कफाश्रया॥४॥तत्स्थः कफो द्रढयति सन्धीनस्थ्नां शरीरजान्। पञ्चम्यासां विडाधारा साऽऽमपक्वाशयाश्रया॥५॥ उन्दुकस्थं विभजते मलं, पित्तधरा पुनः। षष्ठी पक्वाशयान्तस्था वह्न्यधिष्ठानभावतः॥६॥ पक्वाशयोन्मुखं कृत्वा बलापित्तस्य तेजसा। शोषयन्ती पचत्यन्नं तदेव च विमुञ्चति॥७॥दोषदुष्टाऽथ दौर्बल्यादाममेव निरस्यति। लभते ग्रहणीसंज्ञामस्याश्चाग्निबलं बलम्॥८॥शरीरं धारयत्यग्निबलोपष्टम्भबृंहिता। अन्त्या कला शुक्रधरा मूत्रमार्गमुपाश्रिता॥९॥द्वयङ्गुले दक्षिणे पार्श्वे बस्तिद्वारस्य चाप्यधः। शरीरं व्याप्य सकलं सा शुक्रं वर्तयत्यपि॥१०॥" इति।

कलाख्यं भावमाख्याय, आधाराख्यान् भावानाह-

सप्त चाधारा रक्तस्याद्यः क्रमात् परे॥१०॥

कफामपित्तपक्वानां वायोर्मूत्रस्य च स्मृताः।

गर्भाशयोऽष्टमः स्त्रीणां पित्तपक्वाशयान्तरे॥११॥

न केवलं कलाः सप्त यावदाधारा अपि सप्त। रक्तादीनामस्मिन् देहे सम्भवन्तीति वाक्यशेषः। रक्तस्याद्यो-रसाख्योधातुः, परे-अन्ये ये धातवः षट्, ते क्रमात्-यथाक्रमं,

कफादीनामाधाराः स्मृताः-उक्ताः। आमस्यान्नस्य य आधारः सोऽत्रामशब्देनोक्तः। तथा पक्वस्यान्नस्य-पुरीषतां प्राप्तस्य, य आधारः स पक्वशब्देनोच्यते। गर्भाशयो-गर्भाधारो, यः सोऽष्टमः स्त्रीणामेव देहे सम्भवति न पुंसाम्। क्व शरीरदेशे स्त्रीणां सम्भवति? इत्याह-पित्तपक्वाशयान्तर इति। पक्वशब्देनेह पक्वान्नमुच्यते। पित्तं च पक्वं च पित्तपक्वे, तयोराशयौ आधारौ, पित्तपक्वाशययोरन्तरं-मध्यं, पित्तपक्वाशयान्तरम्। तस्मिन् गर्भस्याशयः।

कोष्ठाङ्गानि स्थितान्येषु हृदयं क्लोम फुप्फुसम्।
यकृत्प्लीहोन्दुकं वृक्कौ नाभिडिम्भान्त्रबस्तयः॥१२॥

एषु-रक्ताद्याधारेषु, कोष्ठाङ्गानि-उदरावयवा हृदयादीनि, स्थितानि-आश्रितानि। तत्र-"कफरक्तप्रसादात्स्याद्धृदयं स्थान मोजसः। चेतनानुगभावानां परमं चिन्तितस्य च॥१॥

मांसपेशीचयो रक्तपद्माकारमधोमुखम्। तस्य दक्षिणतः क्लोम यकृत्फुप्फुसमास्थितम्॥२॥ समानवायुप्रध्माताद्रक्ताद्देहोष्मपाचितात्। किञ्चिदुच्छ्रितरूपस्तु जायते क्लोमसंज्ञकः॥३॥ तत्तुल्यहेतुजे प्लीहयकृती भिषजां मते। रक्तकिट्टादुन्दुकं स्यात्फुप्फुसो रक्तफेनजः॥४॥ मेदोसृजः पच्यमानात् स्यातां वृक्कौ प्रसादजौ। नाभिः सर्वशिराणां स्यादाधारः,शकृतः पुनः॥५॥ डिम्भं स्याद्रक्तमांसस्य प्रसादादन्त्रसम्भवः। सार्धत्रिव्याममन्त्राणि पुरुषाणां तु तानि च॥६॥ स्त्रीणां त्रिव्याममात्राणि, बस्तिर्मूत्रस्य चाशयः।" इति। सङ्ग्रहे चोक्तम् (शा.अ.५)-"कफरक्तवाहिस्रोतसां महाभूतानां च प्रसादादिन्द्रियाणि। तेष्वपि नेत्रे श्लेष्मणः प्रसादाच्छुक्लमण्डलम्, तत्पितृजम्। असृजः कृष्णमण्डलम्, तन्मातृजम्। मध्ये दृष्टिमण्डलम्, तदुभयात्मकम्। पक्ष्मवर्त्मशुक्लकृष्णदृष्ट्याख्यानि पञ्च मण्डलानि। तत्सन्धयश्चत्वारो द्वौ चापाङ्गकनीनयोरिति [ते षट्] षट् [च] पटलानि। द्वे वर्त्मनी। बाह्यं चाश्रितमन्यम्भसी, द्वितीयं मांसं, तृतियं मेदः, चतुर्थमस्थि, तेषां बहलता दृष्टेः पञ्चमांशेन। बन्धनगुणास्तु चत्वारः सिराकण्डरामेदःकफात्मकाः। श्लेष्मा तु परं सर्वसन्धिबन्धनमित्युक्तं प्राक्। नेत्राश्रितं तेजो बाह्यतेजसा स्वयोनिना योगाच्छस्त्रमिवाश्मना कर्मण्यं भवति। अतियोगादुपहन्यते। तच्च वैद्युतवद्वडवामुखवच्चाम्भो मध्यगमपि वीर्योत्कर्षात्तेजस्त्वं न जहाति।" इति।

अधुना यानि विशेषेण जीवितस्य स्थानानि-देहावयवाः, तान्याह-

दश जीवितधामानि शिरोरसनबन्धनम्।

कण्ठोऽस्रं हृदयं नाभिर्बस्तिः शुक्रौजसी गुदम्॥ १३॥

शिरश्च रसनं च शिरोरसनम्। रसनं-जिह्वा। बध्यतेऽनेनेति बन्धनम्। शिरोरसनस्य बन्धनं शिरोरसनबन्धनम्। शिरोरसनबन्धनादीनि दश जीवितस्य स्थानानि। एतेषु स्थानेषु विशेषेण जीवितं-शरीरेन्द्रियसत्वात्मसंयोगलक्षणं, अवतिष्ठते।

जालानि कण्डराश्चाङ्गे पृथक् षोडश निर्दिशेत्।

षट् कूर्चाः सप्त सीवन्यो मेढ्रजिह्वाशिरोगताः॥ १४॥

शस्त्रेण ताः परिहरेच्चतस्रो मांसरज्जवः।

चतुर्दशास्थिसङ्घाताः, सीमन्ता द्विगुणा नव॥ १५॥

अस्थ्नां शतानि षष्टिश्च त्रीणि दन्तनखैः सह।

जालानीव जालानि शरीरे षोडश आदिशेत्। कण्डराश्च पृथगेव षोडश आदिशेत्-ब्रूयात्। आचार्य इति शेषः। तथा, षट् कूर्चा अङ्गे स्युः। तथा सीवन्यः सप्तसङ्ख्या मेढ्रादिस्थिताः। ताः शस्त्रेण परिहरेत्, प्रत्यवायभयात्। न तासु शस्त्रं पातयेदित्यर्थः । तत्र-"शिरास्नाय्वस्थिपिशितैश्चत्वारि माणिबन्धने। एकत्रैकत्र गुल्फे च जालान्येवं तु षोडश॥ १॥ हस्तयोर्द्वे पादयोर्द्वे ग्रीवाभागेऽथ पृष्ठतः। प्रत्येकं तु चतस्रः स्युः कण्डरा इति षोडश॥ २॥ करयोर्द्वौ पादयोर्द्वौ ग्रीवायां मेहने तथा। एकैकमिति षट् कूर्चाः, सीवन्यः सप्त कीर्तिताः॥ ३॥ एका मेढ्रेऽथ जिह्वायां भवेयुः पञ्च मूर्द्धनि। पृष्ठवंशे ह्युभयतश्चतस्रो मांसरज्जवः॥ ४॥ बाह्ये द्वे अन्तरे द्वे च, गुल्फे जानुनि वङ्क्षणे। त्रिके शिरसि कक्षायां कूर्परे मणिबन्धने ॥ ५॥ अस्थ्नां भवेयुः सङ्घाता अमी अत्र चतुर्दश। सीमन्ताः पञ्च मूर्ध्नि स्युर्गुल्फादिष्वस्थिसङ्ववत्॥ ६॥ अस्थ्नां शतानि षष्टिश्च त्रीणि दन्तनखैः सह। पञ्च पादनखाः सक्थ्नि प्रत्यङ्गुल्य स्थिकत्रयम्॥ ७॥ एवं पञ्चदशैतानि शलाकाः पञ्च तु स्मृताः। एकस्तत्प्रतिबन्धश्च जङ्घायां कूर्चगुल्फके॥ ८॥ द्वे द्वे इति षडेव स्युः पाष्णर्ावूरौ च जानुनि। एकैकमित्ये कसक्थ्नि पञ्चत्रिंशत्तथाऽपरे॥ ९॥ भुजयोः सक्थितुल्यानि भेदा एषां तु नामतः। पाणिः स्यात्पादवतत्र हस्तमूलं च पार्ष्णिवत्॥ १०॥

मणिबन्धो गुल्फतुल्यः कूर्चतुल्यो द्वयेऽपि च। प्रकोष्ठौ जङ्घया तुल्यौ जानुवत्कूर्परो भवेत्॥११॥ ऊरुवद्बाहुपृष्ठं स्यान्दन्तराधौ तु पर्शुकाः। चतुर्विंशतिरेतेषु स्थालकान्यर्बुदानि च॥१२॥ तावन्ति पृष्ठे त्रिंशत्स्युरुरस्यष्टौ त्रिके भगे। एकैकं स्यादक्षकयोरंसयोस्तत्फलाख्ययोः॥१३॥ नितम्बे तु भवेतां द्वे शतमेतत्सविंशति। गण्डयोः कर्णयोर्द्वे द्वे शङ्खयोश्चाथ तालुनि॥१४॥ तथा जत्रुण्येकमेकं ग्रीवायां तु त्रयोदश। कण्ठनाड्यां तु चत्वारि हनुबन्धे द्वयं भवेत्॥१५॥ द्वात्रिंशदेव दन्ताः स्युस्तत्सङ्घोलूखलानि च। त्रीणि घ्राणे षट् शिरसि शतमूर्ध्वमिति स्मृतम्॥१६॥ शाखान्तराध्यूर्ध्वभेदादेवं षष्टिशतत्रयम्। कपालं रुचकं चैव तरुणं वलयं तथा॥१७॥ नलकं पञ्चधेति स्युर्नितम्बे गण्डजानुनि। तालुमध्ये शिरस्यंसे कपालाख्यानि निर्दिशेत्॥१८॥ दशना रुचकाख्याः स्युर्घ्राणे कर्णेऽक्षिकोशके। तरुणानि पृष्ठपार्श्वे चरणे वलयानि तु॥१९॥ शेषाणि नलकाख्यानि नामाख्यातानि च।" इति।

धन्वन्तरिस्तु त्रीण्याह, सन्धीनां च शतद्वयम्॥१६॥

दशोत्तरं

धन्वन्तरिसंज्ञः पुनस्तन्त्रकृदस्थ्नां शतानि त्रीण्येवाह, नाधिकानि। तथा, अस्थिसन्धीनां शतद्वयं दशोत्तरं धन्वन्तरिराहेति योज्यम्। "सङ्ख्यायन्ते सन्धयोऽत्र चतस्रोऽङ्गुलयः पदे। चतसृष्वङ्गुलीषु स्युः प्रत्येकं त्रय एव तु॥१॥ द्वावङ्गुष्ठे वङ्क्षणे स्यादेको गुल्फेऽथ जानुनि। सत्थ्येकस्मिन् सप्तदश तावन्तोऽपि द्वितीयके॥२॥ भुजयोः सक्थितुल्यानि अन्तराधौ त्विमे मताः। त्रयः कटीकपालेषु विंशतिश्चतुरुत्तरा॥३॥ पृष्ठे तद्वत्पार्श्वयोश्च, उरस्यष्टौ तथोर्ध्वतः। शिरोधरायामष्ट स्युः कण्ठनाड्यां त्रयः स्मृताः॥४॥ हृदयक्लोमयकृतां नाडीष्वष्टादश स्मृताः। द्वात्रिंशद्दन्तमूलेषु एकैके घ्राणकाकले॥५॥ मूर्ध्नि च, द्वौ कर्णशङ्खे गण्डनेत्रे च वर्त्मनि। हनुसन्धौ च विज्ञेयौ द्वौ भ्रुवोश्चोपरि स्मृतौ॥६॥ पञ्च मूर्द्धकपालेषु ऊर्ध्वमेवं त्र्यशीतिकाः। संज्ञयैतेऽष्टधा ज्ञेया मणिबन्धेऽथ जानुनि॥७॥ गुल्फेऽङ्गुलौ कोरसंज्ञा द्विजमूलेषु वङ्क्षणे। कक्षायां चोलूखलाख्या अंसपीठे गुदे भगे॥८॥ नितम्बे चैव सामुद्गा ग्रीवायां पृष्ठवंशके। प्रतराः, स्युर्मूर्द्धकटीकपाले तुन्नसीवनाः॥९॥ हनूभये काकतुण्डाः, कण्ठस्य यकृतस्तथा। हृदयक्लोमनेत्राणां नाड्यां मण्डलनामकाः॥१०॥ श्रोत्रशृङ्गाटकाख्येषु शङ्खावर्ता इति स्मृताः।" इति।

अथात्रेयमतं ब्रूते-

सहस्रे द्वे निजगादात्रिनन्दनः।

अत्रिनन्दनो द्वे सहस्रे सन्धीनां निजगाद-प्रोवाच। स हि स्नायुपेशीसिराश्रितैः सन्धिभिः सह गणयति। एतच्च बाहुल्येनोक्तम्। तथा हि-नवसु स्नायुशतेषु नवशतानि सन्धीनाम्, पञ्चसु पेशीशतेषु पञ्चशतानि,, सप्तसु सिराशतेषु सप्तशतानि, इत्येकविंशतिशतानि प्रायेण प्राप्नुवन्तीति मन्यामहे।

स्नाव्नां नवशती

स्नायूनामस्मिन् देहे नवशती। नवानां शतानां समाहारो नवशती, "द्विगोः" इति ङीप्, नवशतानित्यर्थः। तत्र "पदे पञ्च स्युरङ्गुल्यः प्रत्यङ्गुलि तु तानि षट्। त्रिंशदेवं, दश दश कूर्चे पादतले तथा॥१॥ गुल्फे चेति, त्रिंशदेव जङ्घायां, दश जानुनि। चत्वारिंशत्स्युरूरौ च, वङ्क्षणे दश, सक्थिनि॥२॥सार्धं शतं, द्वितीयेऽपि तद्वद्वाह्वोश्च सक्थिवत्। शाखास्वेवं षड्शतानि, कट्यां द्वे विंशती स्मृते॥३॥विंशतिर्मुष्कयोर्मेढ्रबस्त्यन्त्रेषु च कीर्तिताः। अशीतिः पृष्ठभागे स्युः, पार्श्वयोः षष्टिरक्षयोः॥४॥चत्वार्युरस्यष्टदश, अष्टावंसयुगे स्मृताः। मध्ये शतद्वयं त्रिंशद्वे द्वे मन्यावटौ स्मृते॥५॥ नेत्रौष्ठतालुनि तथा, ग्रीवायां त्रिंशदीरिताः। जत्रुणि त्रीणि, चत्वारि हन्वोः पञ्च तु कीर्तिताः॥६॥ जिह्वायां, दन्तमांसेषु द्वादशैवाथ मूर्ध्नि षट्। एवं शतानि स्नायूनां नवैतेषु विनिर्देशेत्॥७॥ आमपक्वाशयान्त्रेषु बस्तौ च सुषिराणि तु। प्रतानवन्ति शाखासु महास्नावानि कण्डाराः॥८॥ वृत्तानि, पार्श्व पृष्ठोरःशिरसि स्युः पृथूनि च। सिरादिभ्योऽप्यस्थितोऽपि रक्षेत्स्नावानि यत्नतः॥९॥" इति। तथा चोक्तम्(सुश्रुते शा.अ. ५/३५)- "न ह्यस्थीनि तथा हिंस्युर्न पेश्यो न च सन्धयः। व्यापादिता अपि सिरा यथा स्नायूनि देहिनाम्॥ स्नायूनि यो वेत्ति सम्यग्बाह्यान्याभ्यन्तराणि च। स गूढं शल्यमाहर्तुं देहाच्छक्नोति देहिनः॥" इति।

पञ्च पुंसां पेशीशतानि तु॥१७॥

अधिका विंशतिः स्त्रीणां योनिस्तनसमाश्रिताः।

"पेश्यः सम्प्रति भण्यन्ते पञ्चाङ्गुल्योऽथ तासु ताः। प्रत्येकं तिस्र इत्येवं ताः पञ्चदश कीर्तिताः॥१॥ दश पादतले गुल्फे तथा पादस्य चोपरि। कूर्चे तु (च) विंशतिः स्यात्तु जङ्घायां, पञ्च जानुनि॥२॥ऊरौ विंशतिरित्येवं शतं सक्थ्येकतो भवेत्। शतं द्वितीयेऽपि तथा, सक्थिवद्भुजयोर्मताः॥३॥चत्वार्येवं शतानि स्युः शाखास्वेकैव मेहने। सीवन्यां च, वृषणयोर्द्वे, स्फिजोस्तु दश स्मृताः॥४॥तिस्रो गुदे, बस्तिमूर्ध्नि द्वे, चतस्रस्तु कोष्टगाः। नाभ्यामेकाऽथ, हृद्येका, स्यादेकाऽऽमाशयेऽपि, षट्॥५॥ यकृत्प्लीहोन्दुकेषु, स्युश्चतस्रः, दश। पार्श्वयोर्वक्षसि दश, चतस्रश्चाक्षकांसयोः॥६॥ इत्यन्तराधौ षष्टिः, स्युर्ग्रीवायां दश, गण्डयोः। अष्टौ, हनुप्रदेशेऽष्टावेकैका काकले तथा॥७॥ जिह्वायां मूर्ध्नि गलके, द्वे ललाटेऽथ तालुनि (द्वे द्वे तालुललाटयोः)। द्वे ओष्ठयोः, कर्णयोर्द्वे, नासायां द्वे च कीर्तिते॥८॥ पुरुषाणां भवेदेतत्पेशीनां शतपञ्चकम्। दशाधिकाः स्युः स्तनयोर्दश योनौ च योषिताम्॥९॥प्रत्येकं स्तनयोः पञ्च, तासां वृद्धिस्तु यौवने। योन्यन्तराश्रिते द्वे तु द्वे च वृत्ते मुखाश्रिते॥१०॥ गर्भमार्गाश्रयास्तिस्रो यत्र गर्भोऽवतिष्ठते। शङ्खनाभ्याकृतिर्योनिस्त्र्यावर्ता जायते स्त्रियाः ॥११॥ तस्यास्तृतीय आवर्ते रोहितस्याकृतिर्भवेत्। गर्भशय्याऽथ तिस्रश्च भवेयुः सम्प्रवेशिकाः॥१२॥ शुक्रस्य चार्तवस्यैवं पेशीस्तन्त्रविदो विदुः।" इति। (सङ्ग्रहे चोक्तम् शा.अ.५)-"एताभिर्हि शरीरे तनुबहलस्थूलाणुवक्रवृत्तह्रस्वदीर्घस्थिरमृदुश्लक्ष्णकर्कशाभिः सन्ध्यस्थिसिरास्नावानि प्रच्छादितानि। सिराधमनीनां चाणुशो विभज्यमानानामेकोनत्रिंशच्छतसहस्राणि नव च शताणि षट्च्चाशानि भवन्ति। ताभिरिदं शरीरं गवाक्षितं पिनद्धमाततं च। तावन्ति च केशश्मश्रुलोमानि। तासां हि मुखानि तत्प्रतिबद्धानि। अतस्तानि ताभिराप्याय्यन्ते। तैश्च ताः स्वेदमभिवहन्ति। तथाऽभ्यङ्गालेपादिवीर्यं त्वचिविपक्वमन्तर्नयन्ति। स्पर्शं च गृह्णन्ति। स्रोतांसि पुनरसङ्ख्येयान्येव।" इति। अन्ये त्वाहुः-"शरीरे रोम्णां द्वासप्ततिः कोट्यो भवन्ति।" इति।

इदानीं सिराः सङ्ख्यातुमाह-

दश मूलसिरा हृत्स्थास्ताः सर्वं सर्वतो वपुः॥१८॥

रसात्मकं वहन्त्योजस्तन्निबद्धं हि चेष्टितम्।

हृदि तिष्ठन्तीति हृत्स्थाः, दश मूलसिराः। यतोऽन्यासां सिराणं सर्वासां मूलभूतत्वेनैवैताः स्थिताः, ततः प्रधानभूता इत्यर्थः । हृत्स्थाः-हृदयसम्बद्धाः। ताः सर्वं वपुः-सकलं देहं, ओजो वहन्ति-प्रापयन्ति। कथम्? सर्वतः,-सर्वदिक्कम्। वपुरोजो वहन्तीति वहेर्द्विकर्मकत्वात् वपुरोजश्च कर्म। किम्भूतमोजः? रसात्मकं,-रसस्वभावम्, आहारात्सारकिट्टतया परिणतात् सारम्। तन्निबद्धं हि चेष्टितम्। तासु-दशसु सिरासु, निबद्धं-निश्चयेन स्थितं, चेष्टितं-वाक्कायमनोव्यापारः। हिशब्दो यस्मादर्थे। यस्मात्तन्निबद्धं चेष्टिमतस्ता मूलसिराः।

इदानीम् संस्थानमासां निर्दिशति -

स्थूलमूलाः सुसूक्ष्माग्राः पत्ररेखाप्रतानवत्॥ १९॥

भिद्यन्ते तास्ततः सप्तशतन्यासां भवन्ति तु।

स्थूलं मूलं यासां ता एवम्। सुष्ठु सूक्ष्ममग्रं-प्रान्तो यासां ता एवम्। स्थूलमूलत्वेन तासां व्यानवायुविक्षिप्तो रसः शीघ्रमेव चान्तः प्रविशति। सूक्ष्मप्रान्तत्वेन रोमराज्यामप्यन्तः प्रविश्य तेषां रोम्णां वृद्धिहेतुः सम्पद्यते। ततश्चास्मिन् देहे स्थूलमूलाः सुसूक्ष्माग्राः पत्ररेकाप्रतानवत् भिद्यन्ते-अनेकधा सम्पद्यन्ते। यथा, वृक्षस्य पलाशरेकानां प्रतानाः-समूहाः, स्थूलमूलाः सुसूक्ष्माग्रा अनेकधा जायन्ते तथैवैताः सिराः स्थूलमूलाः सूक्ष्माग्रा अनेकधा सम्पद्यन्ते नानारूपा यतः, ततः-तस्माद्धेतोः, पलाशरेखाप्रतानवदनेकधा गमनादासां सिराणां सप्तशतानि भवन्ति। तुशब्दोऽवधारणे भिन्नक्रमः, सप्तैव शतानि।

तत्रैकैकं च शाखायां शतं, तस्मिन्न वेधयेत्॥ २०॥

सिरां जालन्धरां नाम तिस्रश्चाभ्यन्तराश्रिताः।

तासामेकैकस्मिन् सक्थ्नि शतम्। तस्मिन्-सिराशते, सिरां जालन्धरां नाम-या जालानि धारयति तां, न विध्येत्। तिस्रश्चेति। याश्चान्यास्तिस्रः सिरा अभ्यन्तराश्रिताः-अन्तर्मुखाः, ता अपि न वेध्या इति चशब्दार्थः। एवं सक्थ्याश्रिते सिराशते चतस्रः सिरा न

वेध्याः। द्वितीयेऽपि सक्थ्नि चतस्र एव। सक्थिवद्बाह्वोरपि। एवं चतुर्षु सिराशतेषु शाखास्वाश्रितेषु षोडश सिरा न वेध्याः।

षोडशद्विगुणाः श्रोण्यां, तासांद्वे द्वे तु वङ्क्षणे
द्वे द्वे कटिकतरुणे शस्त्रेणाष्टौ स्पृशेन्न ताः।

षड्विंशच्छतमन्तराधौ। तत्र षोडशद्विगुणाः श्रोण्यां-द्वात्रिंशच्छ्रोण्यवयवाश्रिता सिराः। तासां मध्ये द्वे द्वे तु वङ्क्षणेद्वयोर्वङ्क्षणयोः प्रत्येकं द्वे सिरे। द्वे द्वे कटीकतरुणे-द्वयोः कटीकतरुणयोः प्रत्येकं द्वे सिरे। एवं श्रोण्याश्रिता अष्टौ सिराः शस्त्रेण न् स्पृशेत्।

पार्श्वयोः षोडशैकैकामूर्ध्वगां वर्जयेत्तयोः॥२२॥

पार्श्वयोः षोडश सिराः। तासामेकैकामूर्ध्वगां पार्श्वसन्धिसंज्ञां प्रत्येकं वर्जयेत्।

द्वादशद्विगुणाः पृष्ठे पृष्ठवंशस्य पार्श्वयोः।
द्वे द्वे तत्रोर्ध्वगामिन्यौ न शस्त्रेण परामृशेत्॥२३॥

द्वादशद्विगुणाः पृष्ठे-चतुर्विंशतिः सिराः पृष्ठमाश्रिताः। तासां पृष्ठवंशस्य पार्श्वयोः-पृष्ठवंशमुभयतः, द्वे द्वे तत्रोर्ध्वगामिन्यौ। एवं चतस्रः शस्त्रेण न परामृशेत्।

पृष्ठवज्जठरे तासां मेहनस्योपरि स्थिते।
रोमराजीमुभयतो द्वे द्वे शस्त्रेण न स्पृशेत्॥२४॥

पृष्ठवज्जठरे-पृष्ठेन तुल्याः सिरा उदरे, तत्सङ्ख्या चतुर्विंशतिरित्यर्थः। तासां-उदराश्रितानां शिराणां मध्यात्, मेहनस्य मेढ्रस्योपरि स्थिते, रोमराजीमुभयतः-उभयपार्श्वयोः, द्वे द्वे सिरे। एवं चतस्रः सिराः। ताः शस्त्रेण न परामृशेत्।

चत्वारिंशदुरस्यासां चतुर्दश न वेधयेत्।

स्तनरोहिततन्मूलहृदये तु पृथग्द्वयम्॥२५॥

अपस्तम्भाख्ययोरेकां तथाऽपालापयोरपि।

चत्वारिंशदुरसि सिराः। तासां मध्यात् चतुर्दश सिरा न वेधयेत्। ता एव दर्शयति-स्तनरोहितेत्यादि। तयोः-स्तनयोर्मूले तन्मूले। तत्र स्तनरोहितयोः, तथा स्तनमूलयोः तथा हृदये, पृथक्-प्रत्येकं, द्वयं-द्वे द्वे सिरे, न विध्येत्। अपस्तम्भाख्ययोः प्रत्येकमेकां सिरां, तथाऽपालापयोः प्रत्येकमेकां सिरां न विध्येत्।

ग्रीवायां पृष्ठवत्तासां नीले मन्ये कृकाटिके॥२६॥

विधुरे मातृकाश्चाष्टौ षोडशेति परित्यजेत्।

ग्रीवायां पृष्ठवत् सिराणां सङ्ख्या-चतुर्विंशतिः सिराः। तासां सिराणां मध्यान्नीले द्वे, मन्ये द्वे, कृकाटिके द्वे, विधुरे द्वे, अष्टौ च मातृकाः-मातृकाख्यानि मर्माणि, इति-एवं, षोडश परित्यजेत्-न शस्त्रं तासु पातयेत्।

हन्वोः षोडश, तासां द्वे सन्धिबन्धनकर्मणी॥२७॥

हन्वोर्द्वयोः षोडश सिराः संश्रिताः। तासां सिराणां मध्याद्वेसिरे परित्यजेत्। किंकर्मणी ते आह? सन्धिबन्धनकर्मणी। बध्यतेऽनेनेति बन्धनम्। सम्धेर्बन्धनं सन्धिबन्धनम्। अर्थाद्धनुसम्बन्धिनः सन्धेर्बन्धनं कर्म-क्रिया, ययोः सिरयोस्ते सन्धिबन्धनकर्मणी सिरे।

जिह्वायां हनुवत्तासामधो द्वे रसबोधने।

द्वे च वाचःप्रवर्तिन्यौ

जिह्वायां हनुवत् सिरासङ्घा-षोडशैव सिराः। तासां मध्यात् जिह्वाया अधो ये द्वे स्थिते रसबोधने-याभ्यां रसो ज्ञायते मधुरादिरसबोधिन्यौ, द्वे च वाचःप्रवर्तिन्यौ ये सिरे, एवं चतस्रो जिह्वाश्रिताः सिराः परित्यजेत्।

नासायां चतुरुत्तरा॥ २८॥

विंशतिर्गन्धवेदिन्यौ तासामेकां च तालुगाम्।

नासायां चतुरुत्तरा विंशतिः सिराणाम्, एवं चतुर्विंशतिः सिरा नासाश्रिताः। तासां मध्याद्वे गन्धवेदिन्यौ-गन्धं वेदितुं शीलं ययोस्ते गन्धवेदिन्यौ सिरे, तथैकां तालुगां सिराम्, एवं नासाश्रिताः सिरास्तिस्रः परित्यजेत्।

षट्चाशन्नयनयोर्निमेषोन्मेषकर्मणी॥ २९॥

द्वे द्वे, अपाङ्गयोर्द्वे च तासां षडिति वर्जयेत्।

षट्चाशन्नयनयोः सिराः। तासां मध्यान्निमेषोन्मेषकर्मणी। निमेषोन्मेषौ-निमिलनोन्मीलने, कर्मणी ययोस्ते निमेषोन्मेषकर्मणी सिरे द्वे द्वे प्रत्येकम्, तथाऽपाङ्गयोर्द्वे सिरे, एवं षट् सिरा वर्जयेत्-तत्र श्स्त्रं न पातयेत्।

नासानेत्राश्रिताः षष्टिर्ललाटे, स्थपनीश्रिताम्॥ ३०॥

तत्रैकां, द्वे तथाऽऽवर्तौ, चतस्त्रश्च कचान्तगाः।

सप्तैवं वर्जयेत्तासाम्

नासानेत्रगता याः सिरा उक्ताः। तासां मध्याल्ललाटे षष्टिः सिरा भवन्ति। तत्र-तासां मध्यात्, स्थपनीश्रितां-स्थपनीनाममर्मविशेषस्तत्रस्थां, एकां सिरां न विध्येत्। द्वे तथाऽऽवर्तौमर्मणी, तयोरावर्तयोः स्थिते द्वे सिरे न विध्येत्। चतस्रश्च कचान्तगाः-केशान्तस्थाः सिराः, न विध्येत्। एवं सप्त सिरा ललाटे वर्जयेत्।

कर्णयोः षोडशात्र तु॥ ३१॥

द्वे शब्दबोधने शङ्खौ सिरास्ता एव चाश्रिताः।

द्वे शङ्खसन्धिगे तासाम्

कर्णयोर्द्वयोः षोडश सिराः। अत्र तु-अस्मिन् षोडशसङ्ख्ये सिरोद्देशे, कर्णयोरास्थिते द्वे सिरे शब्दबोधने-याभ्यां शब्दो बुध्यते-ज्ञायते ते, वर्जयेत्। शङ्खौ सिरास्ता एव कर्णाश्रिताः। तासां मध्याद्वे सिरे शङ्खसन्धिगे-शङ्खसन्ध्याश्रिते, वर्जयेत्।

मूर्ध्नि द्वादश तत्र तु॥ ३२॥

एकैकां पृथगुत्क्षेपसीमन्ताधिपतिस्थिताम्।

मूर्ध्नि विषये द्वादश सिराः। तत्र तु-तासु द्वादशसु सिरासु मध्येऽष्टौ सिराः शस्त्रेण वर्जयेत्। ता एवाह-एकैकामिति। एवं प्रत्येकमुत्क्षेपयोर्द्वयोरेकैकां, सीमन्तेषु पञ्चस्वेकैकां, अधिपतावेकां, इत्यष्टौ।

इत्यवेध्यविभागार्थं प्रत्यङ्गं वर्णिताः सिराः॥ ३३॥

इति-समप्तौ प्रकारे वा। अवेष्यसिराविभागविज्ञानार्थं तन्निमित्तं, प्रत्यङ्गं-शिरस्यन्तराधौ बाह्वादिषु, याः सिरास्ता वर्णिताः-उक्ताः ता वर्णयितुं समाप्ता इति, अथवाऽनेन प्रकारेण पूर्वोक्तेन वर्णिताः ।

अवेध्यास्तत्र कार्त्स्न्येन देहेऽष्टानवतिस्तथा।

सङ्कीर्णा ग्रथिताः क्षुद्रा वक्राः सन्धिषु चाश्रिताः॥३४॥

तत्र-तासु सिरासु मध्ये, कार्त्स्न्येन -साकल्येन, अष्टानवतिः सिरा अवोध्या वर्णिताः। देहे-शरीरे। न केवलमेत एवावेध्याः, यावत्सङ्कीर्णादयश्चेति तथाशब्दस्यार्थः। सङ्कीर्णाः-परस्परं निबद्धाः। ग्रथिता इव-ग्रथिताः। क्षुद्राः-अल्पाःसूक्ष्मा न महत्यः। वक्राः-कुटिलाः। तथा सन्धिषु-अस्थिसन्धिषु, या आश्रितास्ता अपि न वेध्याः।

तासां शतानां सप्तानां पादोऽस्रं वहते पृथक्।

वातपित्तकफैर्जुष्टं शुद्धं चैवं स्थिता मलाः॥३५॥

शरीरमनुगृह्णन्ति पीडयन्त्यन्यथा पुनः।

तासां सिराणां सम्बन्धीनि यानि सप्तशतानि, तेषां पादः-पञ्चसप्तत्यधिकं शतं, अस्रं वहते, अस्मिन् देहे। किम्भूतं तद्रक्तम्? वातपित्तकफैर्जुष्टं-सेवितं, शुद्धं च-रैरनाक्रान्तमजुष्टं कृत्वा। पृथत्-प्रत्येकं कृत्वा, पादोऽस्रं वहते। एवं वातजुष्टं रक्तं सिराशतं पञ्चसप्तत्यधिकं वहते। पित्तजुष्टं पञ्चसप्तत्यधिकं शतं, तथा कफजुष्टं पञ्चसप्त्यधिकं शतं, तथा शुद्धं रक्तं पञ्च सप्त्यधिकं शतं वहते। एवं-पूर्वोक्तेन प्रकारेण, मलाःस्थिताः शरीरमनुगृह्णन्ति-वर्तयन्ति। अन्यथा पुनः-व्यत्ययेन स्थिताः, पीडयन्ति-विकारेण योजयन्ति।

किंलक्षणाः सिरा वातादिजुष्टमस्रं वहन्ति? इत्याह-

तत्र श्यावारुणाः सूक्ष्माः पूर्णरिक्ताः क्षणात्सिराः॥३६॥

प्रस्पन्दिन्यश्च वातास्रं वहन्ते

तत्र-तासु सिरासु मध्ये, श्यावारुणा वर्णेन याः सिरास्ता वातास्रं-वातरक्तं, वहन्ते। तथा सूक्ष्माः। तथा पूर्णरिक्ताः वायोश्चलत्वात् क्षणात्पूर्णाः क्षणाद्रिक्ताः-शून्या एव। तथा प्रस्पन्दिन्यः। किल स्पन्दनं सर्वासां विद्यते, प्रकर्षेण तु वातरक्तवाहिनीनामिति प्रशब्देन द्योत्यते।

पित्तशोणितम्।

स्पर्शोष्णाः शीघ्रवाहिन्यो नीलपीताः

सिराः पित्तशोणितं वहन्ते। किंविधाः ? स्पर्शोष्णाःस्पर्शेनोष्णाः, न शीताः। तथा, शीघ्रवाहिन्यः । तथा, नीलपीता वर्णेन।

कफं पुनः॥३७॥

गौर्यः स्निग्धाः स्थिराः शीताः

कफं पुनर्गौर्यो वहन्ते। तथा स्निग्धादिविशेषणाः। कफमिति कफशोणितम्, शोणितशब्दलोपात्। स्निग्धाः-स्निग्धच्छायाः। तथा, स्थिराः-न तु चपलाः। तथा, शीताः स्पर्शेन।

संसृष्टं लिङ्गसङ्करे।

लिङ्गसङ्करे-यथा निर्दिष्टस्य लक्षणस्य सङ्कीर्णत्वे, संसृष्टं-कपावातजुष्टं वातपित्तजुष्टं कफपित्तजुष्टं त्रिभिरपि दोशैर्जुष्टं, रक्तं सिरा वहन्ति-सकलं शरीरं प्रापयन्ति।

गूढाः समस्थिताः स्निग्धा रोहिण्यः शुद्धशोणितम्॥

गूढाः-अन्तर्गताः, तथा समं कृत्वा स्थिताः-समस्थिताः, तथा स्निग्धाः-स्निग्धच्छायाः, रोहिण्यः-सिरापरसंज्ञा लोहिताभासा वा प्रसरणशीला वा, शुद्धशोणितं देहेऽस्मिन् वहन्ति।

धमन्यो नाभिसम्बद्धा विंशतिश्चतुरुत्तरा।

ताभिः परिवृता नाभिश्चक्रनाभिरिवारकैः॥३९॥

ताभिश्चोर्ध्वमधस्तिर्यग्देहोऽयमनुगृह्यते।

धमन्यो नाभिसम्बद्धा विंशतिश्चतुरुत्तरा-चतुर्विंशतिरित्यर्थः। ताभिः-धमनीभिः, नाभिः परिवृता-परिवेष्टिता। कथम्? चक्रनाभिरिवारकैः,-यथा रथाङ्गस्य मध्यमभागो नाभिशब्दवाच्योऽरकैः परिव्रियते तद्वन्नाभिः-शरीरमध्यभागो, धमनीभिः। ध्मानाद्धमन्यः स्रोतोविशेषा उच्यन्ते। ताभिः धमनीभिः, अयं देह ऊर्ध्वमधस्तिर्यक् चानुगृह्यते-रसादिप्रापणकर्मणा ताः कायस्यानुग्रहं कुर्वन्ति। ताभिरयं देह आय्यायते, आराम इव जलहारिणीभिः केदार इव कुल्याभिः। सङ्ग्रहे चोक्तम्(शा. अ.६)-"तासां खलु धमनीनां मध्याद्दश धमन्य ऊर्ध्वं प्रसृता दशाधः प्रसृतास्तिर्यक् चतस्रः। ताभिर्यथास्वमङ्गावयवा ऊर्ध्वाधस्तिर्यक् समाश्रिता धार्यन्ते आप्याय्यन्ते च। तासामूर्ध्वगा हृदयमभिप्रपन्नाः प्रत्येकं त्रिधा जायन्ते। एवं ताश्त्रिंशत्। त्रिंशतो मध्याद्वे द्वे वातपित्तकफरक्तरसान् वहतः। एवं दश। द्वे द्वे शब्दरूपरसगन्धान् गृह्णीतः। एवमष्टाभिः शब्दरूपरसगन्धा गृह्यन्ते। द्वाभ्यां द्वाभ्यां भाषते घोषं करोति स्वपिति प्रतिबुध्यते च। एवमष्टौ द्वे चाश्रु वहतः। तथैव द्वे स्तनाश्रिते नार्याः स्तन्यं नरस्य शुक्रम्। अधोगमाः पक्वाशयस्था दश त्रिधा जायन्ते। एवं ता अपि त्रिंशत्। तत्राद्याः पूर्ववद्दश द्वे द्वे वातपित्तकफरक्तरसान् वहतः। द्वे वहतोऽन्नमन्त्राश्रयेण, द्वे तोयं द्वे मूत्रम्। द्वे शुक्रं वहतो द्वे च मुञ्चतः। त एव नारीणामार्तवं वहतः। द्वे वर्चोनिरसन्यौ स्थूलान्त्रप्रतिबद्धे। एवं द्वादश। शेषास्त्वष्टौ धमन्यस्तिरश्चीनाः स्वेदमभिवर्द्धयन्ति। तिर्यग्गामिन्यस्तु चतस्रो भिद्यमानाः सुबहुधा भवन्ति।" इति।

इदानीम् स्त्रीपुरुषाणां दृश्यानि स्रोतांसि निरुपयितुमाह-

स्रोतांसि नासिके कर्णौ नेत्रे पाय्वास्यमेहनम्॥ ४०॥

स्तनौ रक्तपथश्चेति नारीणामधिकं त्रयम्।

स्रोतांसि पुंसां नव,-द्वौ नासापुटौ, द्वौ कर्णौ, द्वे नेत्रे, पायुः- गुदम्, आस्यं-मुखम्, मेहनं-मूत्रनिष्क्रमणद्वारम्। स्त्रीणामेतानि तथाऽन्यानि त्रीणि,-द्वौ स्तनौ, तथैको रक्तपथो-रक्तमार्गः, प्रतिमासं यतो योनौ रक्तं प्रवर्तते। तदेवं स्त्रीणां त्रीणिस्रोतांसि पुंभ्योऽधिकानि।

एवं स्रोतांसि दृश्यान्यभिधाय शरीरे यान्यदृश्यानि स्रोतांसि तान्याह-

जीवितायतनान्यन्तः स्रोतांस्याहुस्त्रयोदश॥ ४१॥

प्राणधातुमलाम्भोन्नवाहीनि

अन्तः-शरीराभ्यन्तरे, त्रयोदश स्रोतांसि वदन्ति। आचार्याः' इति शेषः। तानि च स्रोतांसि जीवितायतनानि-विशेषेण जीवितस्याधिष्ठानानि। किम्भूतानि? प्राणधातुमलम्भोन्नवाहीनि। प्राणाख्यं वातं वहन्ति यानि तानि-प्राणवाहीनि। धातुवाहीनि-रसादिधातुन् यनि वहन्ति। मलवाहीनि-मूत्रशकृत्स्वेदान् यानि वहन्ति। तथा, अम्भोवाहीनि-उदकवाहीनि। तथा, अन्नवाहीनि-अन्नमभ्यवहृतं यानि वहन्ति। एवं त्रयोदश। सङ्ग्रहे चोक्तम् (शा.अ.६) - "तत्र प्राणवाहिनां हृदयं मूलं महास्रोतश्च। तानि क्षयरौक्ष्यपिपासाक्षुड्व्यायामवेगविधारणादिभिर्दुष्यन्ति। ततोऽतिसृष्टं प्रतिबद्धं कुपितमल्पाल्पमभीक्ष्णं वा सशब्दशूलमुच्छ्वसनं कुर्वन्ति। तत्र श्वासवत्साधनम्। उदकवाहिनां तालु मूलं क्लोम च। तान्यामभयातिपानोष्णशुष्कान्नतृड्ग्रहादिभिर्दुष्यन्ति। ततोऽतितृष्णा मुखशोषः कर्णक्ष्वेडनं तमोदर्शनं च। तत्र तृष्णोक्तमौषधम्। अन्नवाहिनामामाशयो मूलं वामपार्श्वं च। तेषां दुष्टौ सर्वं मात्राशितीयोक्तमवगध्छेत्। रसवाहिनां हृदयं मूलं दश धमन्यश्च। रक्तवाहिनां यकृत् प्लीहा च। मांसवाहिनां स्नावानित्वक् च। मेदोवाहिनां वृक्कौ मांसं च। अस्थिवाहिनां जघनं मेदश्च। मज्जवाहिनां पर्वाण्यस्थीनि च। शुक्रवाहिनां स्तहौ मुष्कौ मज्जा च। मूत्रवाहिनां बस्तिर्वङ्क्षणौ च। शकृद्वाहिनां पक्वाशयः स्थूलान्त्रं च। स्वेदवाहिनां मेदो रोमकूपाश्च। स्रोतसामेव विशेषाः सिरा धमन्यः। अपरे त्वन्यत्वमिच्छन्ति

सिराधमनीस्रोतसाम्। सरणात् सिराः। ध्मानाद्धमन्यः। स्रवणात्स्रोतांसि। केवलं परस्परसन्निकर्षात् सदृशकर्मत्वात् सौक्ष्म्याच्च विभक्तकर्मणामप्यविभाग इव लक्ष्यते। अन्ये पुनरेवमाचक्षते। स्रोतांसि सिरा धमन्यो रसायन्यो वाहिन्यो नाड्यः पन्थानोऽयनानि मार्गाः शरीरच्छिद्राणि संवृतानि स्थानान्याशया क्षया निकेताश्चेति शरीरे धात्ववकाशानां लक्ष्यालक्ष्याणं पर्ययेण नामानीति।" इति।

अहितसेवनात्।

तानि दुष्टानि रोगाय, विशुद्धानि सुखाय च॥४२॥

अहितानामाहारविहारादीनां सेवनात्-शीलनात्, तानि,-स्रोतांसि, दुष्टानि रोगाय सम्पद्यन्ते। तेषां विज्ञानार्थं दोषादिविज्ञानीयोक्तमवगच्छेत्। विशुद्धानि-अदुष्टानि स्रोतांसि, सुखाय आरोग्याय, सम्पद्यन्ते।

स्वधातुसमवर्णानि वृत्तस्थूलान्यणूनि च।

स्रोतांसि दीर्घाण्याकृत्या प्रतानसदृशानि च॥४३॥

स्वो धातुः स्वधातुः,-यो यो यस्य यस्य स्रोतस आधारस्याधेयर्वेन स्थितो धातुः, तेन तेन स्वधातुना समः-समानो, वर्णो येषां स्रोतसां तानि स्वधातुसमवर्णानि। यथा,-रसधातुतुल्यवर्णानि रसवाहिस्रोतांसि, यावच्छुक्रधातुसदृशवर्णानि शुक्रवाहिस्रोतांसि। तथा, सर्वस्रोतसां मध्ये कानिचिद्दृत्तानि-वर्तुलानि, कानिचित्स्थूलानि, कानिचिदणूनि-सुक्ष्माणि स्रोतांसि। तथा, आकृत्या-संस्थानेन, दीर्घाणि सर्वाण्येव। तथा, प्रतान सदृशानि-पत्ररेखातुल्यानि। पत्ररेखातुल्यरुपत्वेन शाखा प्रशाखतयाऽनेकधा दूरं प्रविसृतानीति गमयति।

यतश्चाहिताहारविहारसेवनं स्रोतोदुष्टिकारणम्, अतस्तानि तद्दुष्टिकारणानि वक्ति-

आहारश्च विहारश्च यः स्याद्दोषगुणैः समः।

धातुभिर्विगुणो यश्च स्रोतसां स प्रदूषकः॥४४॥

आहारः-पानाशनादिलक्षणः, दोषगुणैः-वातपित्तश्लेष्मगुणैरौक्ष्यादिभिः यः समः-तुल्यः समानगुणः, स स्रोतसां प्रदूषकः। विहारोऽपि-यो वाग्देहमनश्चेष्टालक्षणः, सोऽपि दोषगुणैः समानगुणो यथायथं स्रोतसां प्रदूषकः। यश्चाहारस्तथाविहारो धातुभिः-रसादिभिः, विगुणो-विरुद्धगुणो रससमानगुणर्विपरीतगुणः, स यथायथमेव स्रोतसां प्रदूषकः।

स्रोतासां दुष्टिः कथं ज्ञायते ? इत्याह-

अतिप्रवृत्तिः सङ्गो वा सिराणां ग्रन्थयोऽपि वा।

विमार्गतो वा गमनं स्रोतसां दुष्टिलक्षणम्॥४५॥

अतिशयेन प्रवृत्तिः, यथा-मूत्रवाहिस्रोतसां प्रमेहवद्बहुमूत्रता। सङ्गः-अप्रवृत्तिः, किञ्चिद्वा प्रवृत्तिर्मूवकृच्छ्रवत्। शकृद्वाहिनां स्रोतसामतीसारवत्पुरीषातिसरणं-अतिप्रवृत्तिः। सङ्गः स्तोकं स्तोकं कृत्वा पुरीषस्य प्रवृत्तिः, अथवा सर्वसर्विकयोदावर्तवत्पुरीषस्याप्रवृत्तिः। एवं मूत्रवाहिस्रोतसां मूत्रातिप्रवृत्त्य प्रवृत्ती तत्स्रोतोदुष्टेर्लक्षणम्। तथैव पुरीषवाहिनां पुरीषाति प्रवृत्त्यप्रवृत्ती पुरीशवाहिस्रोदुष्टेर्लक्षणम्। एवमन्येषामपि स्रोतसां यथायथं वस्तुवाहिनां यथास्वं वस्त्वतिप्रवृत्त्यप्रवृत्ती तेषां दुष्टेर्लक्षणम्। अथवा सिराणां-स्रोतसां, ग्रन्थयः-कुटिभावत्वं, दुष्टेर्लक्षणम्। विमार्गतो वेति। अथवा स्वं मार्गमुज्झित्वा मार्गान्तरासादनं स्रोतसां दुष्टेर्लक्षणम्।

बिसानामिव सूक्ष्माणि दूरं प्रविसृतानि च।

द्वाराणि स्रोतसां देहे रसो यैरुपचीयते॥४६॥

बिसानां-मृणालानां, यथा सूक्ष्माणि द्वाराणि-छिद्राणि, दूरं प्रविसृतानि-सकलं बिसं गतानि, तथैव स्त्रोतसां द्वाराणि मुखानि, सूक्ष्माणि देहे दूरं प्रविसृतानि-कृत्स्नं देहं प्रकर्षेण गतानि। यैः-द्वारैछिद्रैः, देहे-शरीरे, अभ्यवहृतस्याहारस्य कायाग्निना पच्यमानस्य प्रसादभावो यः समुद्भवति स रसः प्रसादाख्य उपचीयते-वृद्धिं नीयते।

व्यधे तु स्त्रोतसां मोहकम्पाध्मानवमिज्वराः।

प्रलापशूलविण्मूत्ररोधा मरणमेव वा॥४७॥

स्त्रोतोविद्धमतो वैद्यः प्रत्याख्याय प्रसाधयेत्।

उद्धृत्य शल्यं यत्नेन सद्यःक्षतविधानतः॥४८॥

स्त्रोतसां तु व्यधे-ताडने सति, मोहादयो भवन्ति। मोहादीनामतिरेतरद्वन्द्वः प्रलापादीनां च। विण्मूत्रयो रोधेन सम्बन्धः। अथवा मरणमेव भवति। अतः-अस्माज्जीवित संशयाद्धेतोः, वैद्यः प्रत्याख्याय-"अक्रियायां ध्रुवो मृत्युः" (ह्.चि.अ.११/४४) इत्याद्युक्त्वा, शल्यमुद्धृत्य-बहिर्निष्कास्य, प्रसाधयेत्। कथम्? यत्नेन-नावहेलया। केन प्रसाधयेत्? सद्यःक्षतविधानतः-सद्योव्रणप्रतिषेदोक्तविधिना।

अन्नस्य पक्ता पित्तं तु पाचकाख्यं पुरेरितम्।

दोषधातुमलादीनामूष्मेत्यात्रेयशासनम्॥४०॥

तुरवधारणे। अनेकविधस्याहारस्याभ्यवहृतस्य पित्तमेव पक्ता। किम्भूतं पित्तम्? पाचकाख्यं पुरेरितं,-पूर्वं दोषभेदीयेऽध्याय उक्तम्। यथा (ह्.सू.अ.१२/१०)-"पक्वामाशयमध्यगम्" इत्यारभ्य यावत् "पाचकं नाम तत्स्मृतम्।" इति। तदीदृश पित्तमाहारं पाचयतीति धन्वन्तरिमतम्। दोषधात्विति। ओत्रेयस्य-अत्रिपुत्रस्य, शासनं-आज्ञा, इति-एवं, दोषादीनामूष्माऽग्निरिति। दोषाः-वातादयः, धातवो-रसादयः, मलाः-मूत्रपुरीषस्वेदाः, आदिशब्देन दूषिकादयः। तेषां दोषादीनां सम्बन्धी ऊष्मा-अग्निः, यः स एवान्नस्य पक्ता, न तु पित्तं पाचकाख्यमिति।

तदधिष्ठानमन्नस्य ग्रहणाद्ग्रहणी मता।

सैव धन्वन्तरिमते कला पित्तधराह्वया॥५०॥

आयूररोग्यवीर्यौजोभूतधात्वग्निपुष्टये।

स्थिता पक्वाशयद्वारि भुक्तमार्गार्गलेव सा॥५१॥

तस्य-अग्रेर्जाठरस्य, अधिष्ठनं-आधारो, यत्रासौ शारीरोऽग्निस्तिष्ठति, साऽन्नस्य ग्रहणात् तत्संज्ञा ग्रहणीति मता। आमाशयस्थो विशिष्टो धमनीविशेष इत्यर्थः। सैव ग्रहणी धन्वन्तरिमते कला पित्तधरा नाम कथ्यते। यत एवं ग्रहण्यग्नेराधारभूता, तथाऽन्नग्रहणात्तत्संज्ञा, अत आयुरादिपुष्टये 'सम्पद्यते' इति वाक्यशेषः। भूतधात्वोरग्निना सम्बन्धः। आयुरादीनां द्वन्द्वः। आयुः-शरीरेन्द्रियसत्वात्मसंयोगविशेषः। आरोग्यं-धातुसाम्यम्। वीर्यं-शक्तिः, कर्मणि सामर्थ्यम्। ओजः-आहारस्य परं प्रसादजं सर्वधात्वाप्यायकं यद्वस्तुजातं तदुच्यते। पुष्टिशब्द एषां प्रत्येकं योज्यः, आयुःपुष्टये आरोग्यपुष्टये वीर्यपुष्टये ओजःपुष्टये पञ्चमहाभूताग्निपुष्टये धात्वग्निपुष्टये चेति पिण्डार्थः। पक्वाशयस्य द्वाः पक्वाशयद्वाः, तस्यां स्थिता। सा हि-ग्रहणी, भुक्तस्य सहसा पक्वाशयान्तःप्रवेशरोधिनी। सा चार्गलेव-यथा द्वारि कपाटमागरोधेऽर्गला स्थिता, तथा भुक्तं ह्यभ्यवहृतं कण्ठनाडीलुठितं कायस्य महानिम्नदेशं कोष्टाख्यमवरीर्णं ग्रहणी गृहीत्वाऽवतिष्ठते। अनन्तरं जाठरेणाऽग्निना विपक्वं शनैः पक्वाशये मुञ्चति। अत एवोच्यते- 'स्थिता पक्वाशयद्वारि भुक्तमार्गार्गलेव सा। इति।

पक्वाच्चान्नादायुरादयः पुष्यन्ति, नापक्वादित्याह-

भुक्तमामाशये रुध्वा सा विपाच्य नयत्यधः।

बलवत्यबला त्वन्नमाममेव विमुञ्चति॥५२॥

भुक्तं-अभ्यवहृतमन्नं, आमाशये-आमान्नस्थाने यत्राममन्नं तत्र, सा-ग्रहणी, रुद्धा-अवष्टभ्य, अधो नयति। किं कृत्वा ? पिपाच्य,-विविधैः प्रकारैः पाचयित्वा। बलवतीति। बलवती भुक्तं विपाच्याधो नयति। अबला पुनः सती सा आममेव-अपक्वमेव विमुञ्चति। ननु, जाठराग्निरन्नं ग्रहणीस्थं पचति, न ग्रहणी। ततश्च कथमुक्तम् ? "सा विपाच्य नयत्यधः" इति।

अत्रोच्यते। अग्निग्रहण्योराधाराधेयभावेन स्थितत्वाद्युज्यत एवैतद्वक्तुम्। ग्रहणी ह्यग्नेराधारः। तथा च प्रागुक्तम् (श्लो.५०)-"कला पित्तधराह्वया" इति। पित्तं च वह्निः। तथा चाधुनैव वक्ष्यति (श्लो.९०)-"पित्तं वह्निः" इत्यादि। तदेवं वह्न्याधारा या कला साऽन्नग्रहणाद्ग्रहणीत्युच्यते। ततश्चाधारतया ग्रहणीमाश्रित्याग्निः पाककरणसमर्थो भवति, नाधारमन्तरेण केवल एव। तदेवमग्न्याधारस्य ग्रहण्याख्यस्य पाकनिर्वर्तनं प्रति कर्तृत्वं युक्तमेवेति। अतः "सा विपाच्य नयत्यधः" इत्येतदुपपन्नमेव।

अग्निग्रहण्योराधाराधेयभावतयाऽवस्थानात् परस्परबलाधानेनोपकर्योपकारकभावः सम्भाव्यत इत्याह -

ग्रहण्या बलमग्निर्हि स चापि ग्रहणीबलः।

दूषितेऽग्नावतो दुष्टा ग्रहणी रोगकारिणी॥५३॥

हि यस्मादर्थे। यस्माद्ग्रहण्या यद्बलं-सामर्थ्यं, तस्य हेतुरग्निः। अग्नितो ग्रहण्या बलमुत्पद्यते। स चाप्यग्निर्ग्रहणीबलः, ग्रहणी बलं यस्याग्नेः स एवम्। अपिशब्दान्न केवलमग्निर्ग्रहण्या बलम्, ग्रहण्यप्यग्नेर्बलम्। अतो हेतोर्दूषितेऽग्नौ दुष्टाग्रहणी रोगकारिणी सम्पद्यते। एवं चार्थाद् ग्रहण्यामपि दुष्टायामग्निर्दुष्यति। दुष्टश्च सोऽपि रोगकारी सम्पद्यते। एवं या पित्तधरा कला साऽदुष्टा सत्यायुरादीनां पुष्टये भवतीत्युक्तम्। अन्नग्रहणाद्ग्रहण्या एवंरूपता।

तच्चान्नं विपक्वमेव देहधात्वादिपोषणम्, नापक्वम्। तस्य चान्नपाकस्य हेतुरग्निः, अत आह-

यदन्नं देहधात्वोजोबलवर्णादिपोषणम्।

तत्राग्निर्हेतुराहारान्न ह्यपक्वाद्रसादयः॥५४॥

यदन्नं-आहारो, देहधात्वादिपोषणं भवति, तत्राग्निर्हेतुः। कुतः ? इत्याह-न हीत्यादि। हि-यस्मात्, अपक्वादाहाराद्रसरुधिरादयो न सम्भवन्ति। अतो देहधात्वादिपोषणे सर्वत्राग्निः कारणम्, पाकक्रियानिर्वर्तनात्। तदेवमन्वयव्यतिरेकाभ्यामवगम्यते, अन्नं देहधात्वादिहेतुरग्निप्रभावादेव, तस्मादग्निः पाककारणम्, पक्वमन्नं देहादिपोषणम्। इति परस्परकारणत्वमनयोः।

"न ह्यपक्वाद्रसादयः" इत्युक्तम्। अतः पाकस्यैवेतिकर्तव्यतां निरुपयन्नाह-

अन्नं कालेऽभ्यवहृतं कोष्ठं प्राणानिलाहृतम्।

द्रवैर्विभिन्नसङ्घातं नीतं स्नेहेन मार्द्दवम्॥५५॥

सन्धुक्षितः समानेन पचत्यामाशयस्थितम्।

औदर्योऽग्निर्यथा बाह्यः स्थालीस्थं तोयतण्डुलम्॥५६॥

काले-"प्रसृष्टे विण्मूत्रे" (ह्.सू.अ.८/५५) इत्यादिना ग्रन्थेन प्राङ्निरूपिते। अन्नमभ्यवहृतं कोष्ठं-हृदयाद्यङ्गनिबन्धनं स्थानं, प्रणाख्येन वायुनाऽऽहृतं-आनीतम्। "ष्ठीवनक्षवथूद्गार" (ह्.सू.अ.१२/५) इत्यादिनैव प्राणानिलाहृतत्वे लब्धे पुनरुक्तं स्पष्टार्थम्। तच्च द्रवैः-द्रवगुणोपलक्षितैस्तोयव्यञ्जनमद्यक्षीरादिभिः, विभिन्नसङ्घातं-अपनीतपिण्डितभावम्। तथा, स्नेहेन-घृतादिना, मृदुत्वं प्रापितम्। तथा, आमाशयस्थितमग्निः पचति। "नाभिस्तनान्तरं जन्तोरामाशय इति स्मृतः।" इति व्याख्यात आमाशयस्तन्त्रान्तरे (चरके वि. अ. २/२३)। किम्भूतोऽग्निः ? औदर्यो-जठरभवः। तथा समानाख्येन वायुना सन्धुक्षितः-उद्दीपतः। कालग्रहणस्योपलक्षणार्थत्वान्मात्रादिसहायेन जाठराग्निना समोनोद्दीपितेन पक्वमन्नं देहधात्वादिपोषणम्। ननु, औदर्योऽग्निरदृश्यत्वान्न ज्ञायते कथं पचति ? अतस्तदर्थं बाह्यं दृष्टान्तं निरुपयितुं ग्रन्थकृदाह यथेत्यादि। यथा बाह्योऽग्निः स्थालीस्थं तोयतण्डुलं पचति। तोयं च तण्डुलाश्च तोयतण्डुलम्, द्वन्द्वैकवद्भावः। तथैवासावौदर्योऽग्निः सन्धुक्षितः समानेनामाशयस्थितं चतुर्विधमन्नं-अशितपीतलीढखादितभेदभिन्नं, प्राणानिलाहृतं पचति। ननु, दोषभेदीयेऽध्याये पूर्वमुक्तम् (ह्.सू.अ. १२/४)-"प्राणोऽत्र मूर्धगः। इत्यारभ्य यावत् "निश्वासान्नप्रवेशकृत्।" इति। अन्नस्य प्रवेशं-आहरणं, करोतीत्यन्नप्रवेशकृत्। प्राणानिला हृतमित्यनेनाप्ययमर्थः प्रत्यपादि। तत्किमेतेन ? अत्रोच्यते। अन्नप्रवेशकृदित्यनेनान्नप्रवेशकरणमात्रमुक्तम्, न तु कोष्ठप्रापणमिति। प्राणस्य हि वार्योर्मूर्धाश्रितस्योरो यावत्संचार उक्तः, न ततोऽधः। एवमन्नप्रवेशकरणं तावत्प्राप्तं यावदुरः, न

कोष्ठमिति। कोष्ठं प्राणानिलाहृतमित्यनेन तु कोष्ठप्रापणाख्योऽर्थविशेष उक्तः। इति द्वयमप्येतद्वक्तुं युक्तम्। [ननु,] 'सन्धुक्षितः समानेन' इति च न वाच्यम्। यतः प्रागुक्तम् (हृ.सू.अ.१२/८)-"समानोऽग्निसमीपस्थः कोष्ठे चरति सर्वतः।" इति। एवं जाठरेणाग्निना सहचरः समनो वायुः सन्धुक्षयतीत्यर्थोऽवतिष्ठते। तस्मात् "सन्धुक्षितः समानेन " इत्यनेन नार्थः। उच्यते। अर्थविशेषसम्प्रत्ययार्थमेतदुक्तम्। तथा हि-"समानोऽग्निसमीपस्थः कोष्ठे चरति सर्वतः। अन्नं गृह्णाति पचति " इति समानसयैव पाककियां प्रति वह्निसन्धुक्षणद्वारेण कर्तृत्वमुक्तम्, नाग्नेः। इह पुनः सन्धुक्षितः समानेनाग्निः पचति, न समानो वायुः, इत्यपौनरुक्त्यमेव। यद्यपि चैकप्रत्ययजनितं न किञ्चिदस्ति, तथाऽप्यन्नपाककियां प्रत्यग्नेरेव कर्तृत्वम्, न समानादेः। समानादयो ह्युपकारका एव। अतो युक्तमिदं 'अग्निः पचति' इति।

तस्यान्नस्येदानीमग्निसमीपस्थस्य या अवस्थास्ताः कथयन् पुनस्तमेव पाकं निर्दिशति -

आदौ षड्रसमप्यन्नं मधुरीभूतमीरयेत्।
फेनीभूतं कफं, यातं विदाहादम्लतां ततः॥५७॥
पित्तमामाशयात्कुर्याच्यवमानं, च्युतं पुनः।
अग्निना शोषितं पक्वं पिण्डितं कटु मारुतम्॥५८॥

आदौ-प्रथमं, षड्रसमपि, अपिशब्दाद्वित्रादिरसमपि, अन्नं-अभ्यवहृतमशितपीतादिकं, तत्पच्यमानं मधुरीभुतं-अमधुरं मधुरं सम्पन्नं सत्, कफमीरयेत्। किम्भूतं कपम्? फेनीभूतम्। पानीयादेरपि पच्यमानस्य प्रथमं फेनोत्पत्तिदर्शनादेवमुक्तम्। विदाहादिति। ततः-प्रथमावस्थातो माधुर्यप्रायाया अनन्तरं, मध्यमावस्थां प्राप्य जाठरेण वह्निना पक्वं षड्रसमप्यन्नमभ्यवहृतमम्लतां यातं-अनम्लमम्लं सम्पन्नं, पित्तं विदध्यात्। कस्मात्पुनरम्लतां याति? इत्याह-विदाहात्। विरुद्धो विषमो वा दाहो-विदाहः। ततो विदाहाद्धेतोरम्लतां यातम्। किम्भूतमन्नम्? आमाशयाच्च्यवमानं,-नामाशयस्थितमेव। च्युतंपुनः-तत आमशयात्पक्वाशयं प्राप्तं, जाठराग्निना पक्वं शोषितमन्नं, तथा पिण्डितं-तदानीम् पिण्डं सञ्जातं संहतं सम्पन्नं, तथा कटुकं जातं, अन्यां(न्त्यां) तृतीयामवस्थां प्राप्य मारुतं कुर्यादिति योज्यम्। एतच्च सर्वं स्वभवसिद्धं स्वसंवेद्यप्रायं कार्यानुमेयं च। अत एव रसषट्केऽपि यद्द्रव्याणां विपाकत्रैविध्यं

मधुराम्लकटुकलक्षणमुक्तं, तदनया रीत्योपपन्नतरं भवति। तथा हि-षड्रसस्याप्यन्नस्य जाठराग्निना पच्यमानस्य रसत्रयोपलक्षितेन मधुराम्लकटुकस्वभावेनावस्थात्रयेण परिणामो भवति। अथ (ननु,) अन्नमित्यत्र कस्मात् "अदो जग्धिर्ल्यप्तिकिति" इति जग्ध्यादेशो न भवति?। ब्रूमः। अन्न इति निपातनात् "बहुलं छन्दसि" इति बहुलवचनाद्वा जग्ध्यादेशाभावः। ननु, विदाहादम्लतां गतमिति सामान्येनोक्तम युक्तमिवाभाति। यतो द्राक्षेक्षुशर्करादीनामविदाहित्वं श्रूयते। अपि च विदाहादीनि च वर्जयेदिति तन्त्रकारः (ह्र.सू.अ. ८/३२) पठति। अनया च रीत्या अवदाहिद्रव्याभाव एव स्यात्। तस्मात्सामान्येन विदाहित्वमभ्युपगम्यमानमन्याय्यमिव मन्यामहे। उच्यते। विदाहस्य द्वैविध्याददोषः। इह हि द्विविधो विदाहः प्रथितो दोषस्थानकृतो द्रव्यकृतश्च। तत्र हि दोषस्थानकृतस्य ग्रहणम्। [ननु,] आमाशयाच्युतमग्निना पक्वमिति कथमुक्तम्? यतः पक्वाशयस्थस्याग्निना पाकोऽनुपपन्नः। दूरव्यवधानो ह्यग्निरामाशयस्थः। तस्मात्पक्वाशयस्थस्यान्नस्य पक्वत्वमनुपपन्नम्। अत्रोच्यते। पक्वाशयेऽप्यस्ति पाकः, तन्त्रकारवचनात्। तथा हि प्राग्बस्तिविधावभ्यधात् (ह्र.सू.अ.१९/३४)-"यथा वा स्नेहपक्तिः स्यादतोऽत्युल्बणमारुतान्। व्यायामनित्यान् दीप्ताग्नीन्" इत्यादि। तदेवं पक्वाशयस्थस्याप्यनुवासनस्य स्नेहपाकोऽभिहितः। तथा पक्वाशयेऽप्यग्निना पक्वस्य पुनः पाको युक्त एव। तन्त्रान्तरेषु मांसादीनामपि विक्लेददर्शनादन्यत्रापि पाकोऽनुज्ञात एव।

जाठरस्याग्नेः कर्माभिधाय, इदानीमन्येषामप्यग्नीनां कर्माभिधातुमाह-

भौमाप्याग्नेयवायव्याः पञ्चोष्माणः सनाभसाः।

पञ्चाहारगुणान्स्वान् स्वान् पार्थिवादीन् पचन्त्यनु॥

भूमेरयं भौमः। आप्य इति चिन्त्यम्। आग्नेय इति "अग्नेर्ढक्" इति ढक्। वायव्य इति "साऽस्य देवता" इत्यर्थे "वाय्वृतुपित्रुषसो यत्" इति यत्। तदत्रौपम्यर्थो बोध्यः, वायव्य इव वायव्य इति। के पुनस्ते? इत्याह-पञ्चोष्माण इति। किम्भूताः? सनभसाः। सह नाभसेनोष्मणा पञ्चोष्माणःपञ्चाग्नयः। भौम ऊष्मा यावन्नाभस ऊष्मेति। तदेतेऽग्नयः पञ्चाहारगुणान् अनु-पश्चात्, पचन्ति। कुतोऽनु? प्रकृतत्वा दौदार्याग्निनिर्वर्तितादन्नपाकात्।

किम्भूतानाहारगुणान्? स्वान्खान् पार्थिवादीन्। यो यस्य माहाभुतोष्मणः पार्थिवादेरात्मीयो गुणः, तं गुणं स एव पार्थिवाद्यूष्मा पचति।

अनया चोक्त्या आहारः शरीरगतानां भावानां समानगुणानां गुणद्वारेण वर्द्धनहेतुः,विपरीत गुणानां च क्षयहेतुः इति प्रतिपादयति-

यथास्वं ते च पुष्णन्ति पक्का भूतगुणान् पृथक्।

ते च-गुणाः, पञ्चमहाभुताश्रिताः। यथास्वं ये येषां महाभूतानामात्मीया गुणाः, ते यथास्वमात्मीयेन वह्निना पक्का आत्मीयानेव देहस्थान् महाभूतगुणान् पुष्णन्ति। कथं पुष्णन्ति? इत्याह-पृथक्,-प्रत्येकं कृत्वा, नैकं सर्वे, न सर्वानेकः।

तामेव प्रत्येकं भूतगुणपुष्टिं पञ्चोष्मपक्काहारगुणकृतां स्पष्टी कुर्वन्नाह-

पार्थिवाः पार्थिवानेव शेषाः शेषांश्च देहगान्॥ ६०॥

पार्थिवा महाभूतगुणाः पार्थिवानेव महाभूतगुणान् देहगान् पुष्णन्ति-वृद्धिं नयन्ति। शेषाः-पार्थिवगुणेभ्यो येऽन्ये महाभूतगुणा आप्यास्तैजसा वायव्या नाभसाश्च, ते शेषान् पार्थिवगुणव्यतिरिक्तानाप्यादिमहाभूतगुणान्, पुष्णन्ति-आप्याययन्ति। गुणानां च निराधाराणामसम्भवात् सहाधारेण पृथिव्यादिना महाभूतेन सह पक्का एते महाभूतगुणा-स्तथाविधानेव महाभूतगुणान् पुष्णन्तीति सामर्थ्यलभ्योऽर्थः। अत्र चोदयन्ति। ननु, पृथिव्यादिमहाभूतचतुष्टयव्यतिरिक्तस्योद्देशमात्रत्वादाकाशस्य सत्तैव दुर्घटा। कुतः पुनस्तस्योष्मणः सम्भवः? इति। अत्रोच्यते। आकाशस्य सत्ता तावत् द्रव्यनिर्णयप्रस्ताव प्राक् (ह.सू.अ.९/१) प्रतिपादितैव। तथा नासिकाश्रोत्रास्यादिषु सुषिरेषु स्थानेषु स्थित ऊष्मा दाहपाकादीन् कुर्वन् नाभस ऊष्मेत्युपचर्यते। इत्यौपचारिक ऊष्माऽप्यस्योपपन्न एव। एवं पञ्च भौतिका अग्नय एते, एक उदराग्निः, सप्त च धात्वग्नयो वक्ष्यमाणाः, इति त्रयोदशाग्नयः। ननु, पार्थिवाद्यूष्मभिः पक्कस्य पुनर्धातूष्मभिः पाककाले धातूनामपि पाञ्चभौतिकत्वात्तत्रापि

पार्थिवाद्यूष्मभावः। तैश्च पार्थिवाद्यूष्मभिः पुनः पाकः, इत्येवमष्टदश प्राप्नुवन्ति। सत्यमेवतत्। किन्तु त एव पञ्चोष्माणः पार्थिवादयः स्थानन्तरप्राप्ता धातूष्माण इति व्यपदेश मासादयन्ति। यथा-उदकं स्थानान्तरगतं लसीकादिव्यपदेशं लभते। तथा चोक्तम्-"तच्छरीरगतं लसीकादिव्यपदेशं प्राप्नोति।" इति। अन्ये त्वेवमाहुः-एते त्रयोदशाग्नयः, तथा सप्तसु सिराशतेषु सप्ताग्निशतानि, पञ्चसु मांसपेशी शतषु च पञ्चाग्निशतानि "। इति। एवं पञ्चमहाभूतात्मकादाहाराद्यथास्वमग्निना पक्वाद्रस आहारसारः। तत्रस्थैर्महाभूतगुणैर्देहगा महाभूतगुणा रसधात्वाश्रिता यथास्वमभिर्द्धन्ते।

किट्टं सारश्च तत्पक्वमन्नं सम्भवति द्विधा।

तदन्नं पक्वं द्विधा सम्भवति-द्विप्रकारं जायते, किट्टरूपप्रसादरूपतया।

किट्टमपि यदेतन्नस्य पक्वस्य, तदप्यच्छानच्छभेदेन द्विधेत्याह-

तत्राच्छं किट्टमन्नस्य मूत्रं विद्याद्घनं शकृत्॥ ६१॥

तत्र-तयोरच्छानच्छभेदभिन्नयोः किट्टयार्मध्यात्, यदच्छमन्नस्य किट्टं तन्मूत्रं विद्यात्। यद् घनं-सहतं, अन्नस्य किट्टं तत् शकृत्-पुरीषं, जानीयात्।

सारस्तु सप्तभिर्भूयो यथास्वं पच्यतेऽग्निभिः।

सारः पुनः-प्रसादाख्यो भागो, भूयः सप्तभिरग्निभिः पच्यते। उदराग्निना पञ्चभिश्च भूताग्निभिः पूर्वं पक्वः सन् पाश्चात्सारीभूतो धातूष्मभिः पच्यत इति प्रतिपादनर्थं भूयो ग्रहणम्। कथं पच्यते ? यथास्वं,-यस्य सारस्य रसादिसप्त धातुस्थस्य योऽग्निः स आत्मियः, तेन तेन स स सारः पच्यत इत्यर्थः। रसधातुस्थः सारो रसधात्वग्निना पच्यत इति भावः।

चतुर्विधोऽप्याहाराऽभ्यवहृतो जठराग्निना भूतसहायेन पक्वः किट्टसारतां याति। ततो यः सारः प्रसादाख्यः स पूर्वं हृदयं याति। ततो हृदयान्तःस्थेन व्यानेन विक्षिप्तस्तत्स्थाभिः सिराभिर्दशभिर्मूलभूताभिः कृत्स्नं शरीरमुह्यमानो रसधातुना सहैकतां प्राप्तो रसधात्वशयस्थेन वह्निना भूताग्निसहायेन पच्यमानो रक्तधातुसारतया परिणमति। रक्तधातुसारतया परिणतो मांसधातुसारतया परिणमति। यावत्स एवाहाररसः क्रमेण गर्भतया परिणमितीति।

अमुमर्थं द्योतयितुमुवाच-

रसाद्रक्तं ततो मांसं मांसान्मेदस्ततोऽस्थि च॥ ६२॥

अस्थ्नो मज्जा ततः शुक्रं शुक्राद्गर्भः प्रजायते।

रसात्-धातुरसादाहाररसेन सहैकतामापन्नात्, रक्तं प्रजायते-स धातुरसस्तथाभूतो रक्ततया सम्पद्यते। तावद्यावत्स एव गर्भत्वेनेति योज्यम्। अत्र चोदयन्ति। ननु, यद्याहाररसो व्यानविक्षिप्तो रसधातुना सहैकतां परिणमन् क्रमेण रक्तादीन् भावान् गर्भावसानान् परिणमति। तर्हि कथमुक्तं "सारस्तु सप्तभिभूयो यथास्वं पच्यतेऽग्निभिः।" इति ? अत्रोच्यते। कार्ये कारणोपचारदेतदुक्तमित्यवेहि। सारकार्येषु रसरक्तादिषु सप्तभिर्धात्वग्निभिः पच्यमानेषु "सारस्तु सप्तभिभूयो यथास्वं पच्यतेऽग्निभिः।" इत्युक्तम्। तस्माद्रसादिधातव एव साराख्यान्मूलकारणादुत्थिताः परमार्थेन पच्यन्त इति बोध्यम्। ननु, यदि क्रमेणाहाररसाद्रसो रसाद्रक्तं रक्तान्माम्समित्यादिक्रम आश्रीयते, तत्कथमुक्तं (श्लो.६८)-"व्यानेन रसधातुर्हि विक्षेपोचित कर्मणा।" इति? अत्र हि युगपदिति च निर्दिश्यते। युगपत्-एककालं, व्यानेन रसो देहे विक्षिप्यते। विक्षिप्ताच्च रसात् सर्वधातूत्पत्तिरिति प्रत्यज्ञायि। इह च रसरक्तमांसादिक्रमेणाहाररसाद्धातुनिष्पत्तिरित्युच्यते। तदेतत् परस्परं विरुद्धमिव लक्ष्यते। ब्रूमः। युगपच्छब्दोऽत्र शीघ्रक्रमार्थः। तथा चोवाच साङ्ख्ये (सां.का.३)-"युगपच्चतुष्टयस्य तु वृत्तिः क्रमशश्च तस्य निर्दिष्टा।" इति। अस्यार्थः-मनोबुद्ध्यहङ्कारास्त्रयश्चक्षुःश्रोत्रादीनां मध्यादन्यतम इत्येवं चतुष्टयमेतत्। अस्य च वृत्तेर्युगपन्निर्दिष्टा क्रमेण च। तत्र युगपद्वृत्तिरुत्पलपत्रशतसूचीभेदनन्यायेन। क्रमेण च वृत्तिर्यथा,-चक्षुरादि रूपादिकं पश्यति, मनस्तत्र संशेते, बुद्धिर्निश्चिनोति, अहं करोमीत्यहङ्कार उद्यमयति। तद्वदत्रापि युगपत्क्रमेण च विक्षेपो न विरुद्धः। अस्त्वेतत्। रसधातुरित्येतत्कथमुक्तम् ? यतो रसाख्यो धातुस्तेन न विक्षिप्यत, किन्तर्हि ? आहाररसः। अत एव धातुशब्दोपादानमनर्थकम्। ब्रूमः। धातुशब्द आधाराभिधेयत्वेनेहोपात्तो रसस्य देहधारणत्वं दर्शयितुम्। सर्वेषां हि धातूनां यद्देहधारणस्वभावत्वं तदाहाररसाप्यायितानामेषां, न त्वनाप्यायितानाम्। अतः स आहाररसो

धातुनामाधारः उद्भवस्थानम्। यथा,-लोके हेमादीना य आधारः प्रतिनियता विशिष्टा मृत् स धातुसंज्ञया भण्यते। इयं मृद्धेमधातुरियं रजतधातुरिति। एवमाहाररसा व्यानेन विक्षिप्यत, न रसाख्यो धातुः, इति स्थितमेतत्। किञ्च, आहाररसादेककालं सप्तसुधातुस्त्रोतःसु प्रवेशिताद्रसरक्तादयो धातव उत्पद्यन्ते, इति यद्येष एककालधातुपोषणपक्ष आश्रीयते, तदानीमिदं विरुध्यते-"पूर्वो धातुः परं कुर्याद्वृद्धः क्षीणाश्च तद्विधम्।" (ह.सू.अ. ११/३५) इति। यतः सर्वे धातव आहाररसेन युगपद्व्यानविक्षिप्तेन स्वे स्वे स्त्रोतस्यवतिष्ठमानाः स्वातन्त्र्येणाहाररसाप्यायिताः पुष्यन्ति, अनाप्यायिताः क्षयं यान्ति। तदेवं कथं पूर्वस्य धातोर्वृद्धौ परस्य वृद्धिः पूर्वस्य धातोः क्षये परस्य क्षयः स्यात्? न हि कदाचिद्घटते मैत्रे तृप्ते चैत्रः सुहितः स्यात्, अतृप्ते वाऽसुहितः स्यात्। तथा स्थूलस्य मेद एवोपचीयत इति दृष्टम्। न च समं कृत्वा सप्तसु धातुस्त्रोतःसु विनिक्षिप्ते रसे मेदसोऽधिका वृद्धिः कथञ्चिदुपपद्यते। क्रमपरिणामपक्षे तु स्थूलस्याहाररसो रसधातुतया परिणमिति। रसधातू रक्ततया, रक्तधातुर्मांसतया, मांसधातुर्मेदस्तया परिणमति। मेदस आहारपूर्णस्य स आहाररसो मेदस्त्वं प्राप्तः पुनः प्रतिस्त्रोतोन्यायेन मांसस्य विशेषवतीम् वृद्धिं करोति, अनन्तरं रक्तस्य, अनन्तरं रसस्य। पुनश्च रसधातुरतिपूर्णो रक्तस्य वृद्धिं विधत्ते, रक्तधातुर्मांसस्य, मांसधातुर्मेदसः, इत्येवमतिस्थूलस्य मेदोवद्रसादयो मांसावसाना अप्युपचीयन्ते। अस्थ्यादयश्चास्थ्यादिस्त्रोतसां मेदसाऽऽवृतत्वान्न तथोपचीयन्ते। तस्मादाहाररसेन मेदोभावेन परिणमता उदकपरिपूर्णाभिनवमृत्कुम्भजललवस्यन्दनन्यायेनास्थ्यादयो धातवः केवलमाप्याय्यन्ते, न तु तथोपचीयन्ते। तथा च मुनिः (च. सू. अ. २१/४)- "स्थूलस्य मेद एवोपचीयते, न तथेतरे धातवः।" इति। अस्य ह्ययमर्थः,-मेदसो येऽन्येऽस्थ्यादयः शुक्रावसानास्ते न तथोपचीयन्ते, न पुनः पूर्वे रसादयो धातवः स्थूलस्य नोपचीयन्त इति। अत एवाह मुनिः (च. सू. अ.२१/९)- "मेदोमांसातिवृद्धत्वाच्चलस्फिगुदरस्तनः। अयथोपचयोत्साहो नरोऽतिस्थूल उच्यते॥" इति। अपि च, यदि क्रमपरिणामपक्षो नोररीक्रियेत तदानीं गर्भस्य शुक्रधातुसारोत्पन्नस्य रसादयो मज्जावसाना धातवो न स्युः। कारणानुविधायीनि हि कार्याणि भवन्तीत्युक्तम्। क्रमपरिणामपक्षे पुनः शुक्रप्रसादस्य सर्वधातुप्रसादरूपतया परिणतत्वात् स शुक्रप्रसादो गर्भतया परिणमंस्तथारुप एव परिणमति। कारणानुरूपत्वात्कार्याणाम्। तथा च बीजकारणे वटधवप्ररोहादौ सकलान्यवश्यं तत्पदार्थजातानि तथारूपाण्यव्यक्तरूपतया तान्यवतिष्ठन्ते। यानि कार्यरूपतया परिणमन्ति, सर्वाण्यभिव्यक्तिं यान्ति कार्ये दृश्यन्ते। ननु, क्रमपरिणामपक्षे धातोर्धात्वन्तरोत्पत्तावाश्रीयमाणायां यो यो धातुर्धात्वन्तरभावेन देहे परिणमति। तस्य तस्य धातोर्धात्वन्तरभावेन परिणातत्वादभावः प्राप्नोति पूर्वस्य पूर्वस्य। ततश्च शुक्रप्रसादस्यैव देहे सद्भावः स्यात्, न रसादीनां धातूनाम्। तथा चैवमाहारविनिवृत्तावपि स्त्रीगमनसामर्थ्यं स्यात्,

शुक्रस्य विद्यमानत्वात्। अत्रोच्यते। अनवच्छिन्नप्रवाहसन्तानक्रमेणांशांशिकतया धातूनां धात्वन्तरभावापत्तिः, न तुल्य कालं सर्वैरवयवैरुत्पत्तिः। इति कृत्वा यो यो धातुर्धात्वन्तरभावेन देहे परिणमति न तस्य तस्य धातोः पूर्वस्याभावः प्राप्नोति, सर्वैरवयवैरपतिणतत्वात्। तदेवं सर्वथा क्रमपरिणामपक्ष एवाश्रयितुं न्याय्यः। तथा चाष्टाङ्गसङ्ग्रहेऽप्यधीतम् (शा. अ.६) -"तत्राहाररसो व्यानविक्षिप्तो यथास्वं सप्तसु धात्वग्निषु क्रमात्पच्यमानः स्वात्मभावप्रच्युतिसमनन्तरमेव प्राप्तरक्तादिसंज्ञः कालवदस्खलितप्रयाणो देहमूर्जयन्" इत्यादि। तथा चरकसंहितायां दृढबलोऽप्याह (चि. अ. १५/१४)- "रसाद्रक्तं ततो मासं मांसान्मेदस्ततोऽस्थि च। अस्थो मज्जा ततः शुक्रं शुक्राद्गर्भः प्रसादजः॥ इत्युक्तवन्तमाचार्यं शिष्यस्तिवदमचोदयत्। रसाद्रक्तं विसदृशात्कथं देहेऽभिजायते॥ रसस्य न च रागोऽस्ति स कथं याति रक्तताम्। रसाद्रक्तात् स्थिरं मांसं कथं तज्जायते नृणाम्॥ रसाद्रक्तात्तथा मांसान्मेदसः श्वेतता कथम्। श्लक्ष्णाभ्यां मांसमेदोभ्यां खरत्वं कथमस्थिषु॥ खरेष्वस्थिषु मज्जा च केन स्निग्धो मृदुस्तथा। मज्ज्ञश्च परिणामेन यदि शुक्रं प्रजायते॥ कथं सर्वगतं शुक्रं प्रवदन्ति मनीषिणः॥ अथ प्रसादान्मज्ज्ञश्च शुक्रं भवति देहिनाम्॥ छिद्रं न दृश्यतेऽस्थां च तन्निःसरति वा कथम्। एवमुक्तस्तु शिष्येण गुरुः प्राहेदमुत्तरम्॥ तेजो रसानां सर्वेषामम्बुजानां यदुच्यते। पित्तोष्मणः स रागेण रसो रक्तत्वमृच्छति॥ वाय्वग्नितेजसायुक्तं रक्तं मांसत्वमृच्छति। श्लेष्माणं च समाश्रित्य मांस स्नेहाभिसंयुतम्॥ स्थिरतां प्राप्य शौक्ल्यं च मेदो देहेऽभिजायते। पृथिव्यम्भ्यनिलादीनां सङ्घातः श्लेष्मणा वृतः॥ खरत्वं प्रकरोत्यस्य जायतेऽस्थि ततो नृणाम्। करोति तत्र सौषिर्यमस्थां मध्ये समीरणः॥ मेदसा तानि पूर्यन्ते स्नेहो मज्जा ततः स्मृतः। तस्मान्मज्ज्ञश्च यः स्नेहः शुक्रं सञ्जायते ततः॥ वाय्वाकाशादिभिर्भावैः सौषिर्यं जायतेऽस्थिषु। येन स्रवति तच्छुक्रं नवात्कुम्भादिवोदकम्॥ स्रोतोभिः स्यन्दते देहात्समन्ताच्छुक्रवाहिभिः। हर्षणोदीरितं रागात्सङ्कल्पाच्च मनोभवात्॥[विलीनं घृतवज्यायामोष्मणा स्थानविच्युतम्।] बस्तौ सम्भृत्य निर्याति स्थलान्निम्नमिवोदकम्।" इति। तथा चरकमुनिरपि साक्षादधिजगे (चि.अ.८/३७)-"स्रोतसा च यथास्वेन धातुः पुष्यति धातुना।" इति। तथा (च.सू.अ.२८/३)-"धातवो हि धात्वाहाराः प्रकृतिमनुवर्तन्ते।" इति। नन्नजिदप्याह-"तत्राहाररसात्पूर्वं रसधातुर्विवद्धते। रक्तधातू रसाच्चैव रक्ताख्यान्मांसमेव च॥ मेदोधातुस्ततो मांसादस्थ्याख्यो मेदसस्तथा। मज्जधातुस्ततोऽस्थ्याख्यान्मज्ज्ञः शुक्राख्य एव च॥ शुक्रात्परं च गर्भस्य सम्भवः परिकीर्तितः।" इति। तस्मात्क्रमपरिणामपक्ष एव युक्तः ।

एवं रसादीनां धातूनां प्रसादं दर्शयित्वा, किट्टं यथाक्रमं दर्शयितुमाह-

कफः पित्तं मलाः खेषु प्रस्वेदो नखरोम च॥६३॥

स्नेहोऽक्षित्वग्विशामोजो धातूनां क्रमशो मलाः।

कफादयो धातूनां क्रमेण मलाः। रसस्य कफो मलः। रक्तस्य पित्तं मलः। खेषु नासिकाविवरादिषु यो मलोऽन्तः सम्भवति स मांसस्य मलः। यः शरीरे प्रस्वेदो-रोमभ्यः सलिलसम्भवः, स मेदसो मलः। नखा रोमाणि चास्थ्नां मलः। मज्ज्ञः स्नेहो मलः। स्नेहः केषां सम्बन्धी ? नेत्रयोस्त्वचो विशः-पुरीषस्य, च। यत्तदोजः-सर्वधातूनां तेजः शरीरसम्भवं, स शुक्रस्य मलः।

न केवलामाहारस्य प्रसादकिट्टतया द्वैविध्यम्, यावद्धातूनामप्याहाररसाप्यायितानां प्रसादकिट्टतया द्वैविध्यमिति दर्शयन्नाह-

प्रसादकिट्टौ धातूनां पाकादेवं द्विधर्छतः॥६४॥

धातूनां-रसादीनां, एवं-अनेन प्रकारेण यथादर्शितेन पाकादग्न्याहितात्, प्रसादिकिट्टौ द्विधा ऋच्छतः-द्वैविध्यं व्रजतः। किट्टशब्दस्यात्र पुंस्त्वं लोकाश्रयत्वाल्लिङ्गस्येति बोध्यम्, अर्धर्चादिषु त्वपाठ एवास्य।

परस्परोपसंस्तम्भाद्धातुस्नेहपरम्परा।

धातूनां स्नेहः-सारो धातुस्नेहः। आहाररसस्य धात्वात्मनापरिणमतो यथायथं धात्वग्निभिः पच्यमानस्य क्षीरस्येव श्रृतस्य सारः-तथापाकवशाद्धातूनां यथोत्तरं यथारूपः स्नेहो जायते, तस्य धातुस्नेहस्य परम्परा-आहाररसाप्यायिता याऽव्युच्छिन्नप्रवन्धप्रबृत्ततया विशिष्टैव यथोत्तरं धातुस्नेहोत्कर्षक्रमपरिणतिः सा धातुस्नेहपरम्परा, परस्परमुपसंस्तम्भात्-उपसंश्लेषात्, जायते। अत एव शोणितप्रभृतीनां धातूनामुत्तरोत्तरं गौरवं यथोत्तरं स्नेहोत्कर्षः।

इदानीं परिणतिकालमाहारस्य निरूपयन्नाह-

केचिदाहुरहोरात्रात्षाडहादपरे, परे॥ ६५॥

मासेन याति शुक्रत्वमन्नं पाकक्रमादिभिः।

केचिदाचार्याः अहोरात्रात्-रात्रिंदिनेन, अन्नं शुक्रत्वं यातीत्याहुः। कैः ? पाकक्रमादिभिः। पाकस्य जाठराग्निना भूताग्निभिर्धात्वग्निभी रसरक्तादिपरिपाट्येत्येवंप्रकारः क्रमः, स आदिर्येषां-वीर्यप्रभावादीनां, तैः। अपरे-अन्ये आचार्याः, षडहात्षड्भिर्दिनैः, अन्न पाकक्रमादिभिः शुक्रत्वं यातीति वदन्ति। परे अन्ये, त्वाहुः,-अहोरात्रात्प्रभृति मासः परः प्रमाणावधिरन्नस्य रसादिपाकक्रमादिना परिणमतः शुक्रत्वगमने, न तत ऊर्ध्वं कदाचिदपि। तथा च पराशरोऽष्टरात्रेणान्नं परिणमच्छुक्रत्वं यातीति सङ्गिरते। तथा च तद्ग्रन्थः-"आहारोऽद्यतनो यश्च श्वो रसत्वं स गच्छति। शोणितत्वं तृतीयेऽह्नि, चतुर्थे मांसतामपि॥ मेदस्त्वं पञ्चमे, षष्ठे अस्थित्वं, सप्तमे व्रजेत्। मज्जतां, शुक्रतामेति दिवसे त्वष्टमे नृणाम्॥ तस्माद्धि पथ्यापथ्याभ्यामाहाराभ्यां नृणां ध्रुवम्। सप्तरात्रेण शुध्यन्ति प्रदुष्यन्ति च धातवः॥" इति

अथैतदन्नं रसादिभावेन परिणमच्छुक्रत्वं याति। किञ्चिच्छिन्नं कृत्वाऽथ कालवदनवरतं कृत्वा पाकक्रमेण ? अत आह-

सन्तता भोज्यधातूनां परिवृत्तिस्तु चक्रवत्॥ ६६॥

भोज्याश्च ते धातवश्च भोज्यधातवः। भोज्यशब्देनेह यस्य धातोर्य आहारस्तस्य सर्वस्य ग्रहणम्। उक्तं हि (च.सू.अ.२८।१३)-"धातवो हि धात्वाहाराः।" इति। एतदुक्तं भवति,-यस्य धातोर्यस्मादुत्पत्तिः स यस्याहार इति। भोज्यधातूनां परिवृत्तिः-परिवर्तनं भ्रमणं गतिः, स चक्रवत्सन्तता अव्युच्छिन्नप्रबन्धस्वरूपा, आहाररसेनाप्यायितत्वात्।

एवं पूर्वोक्तेन कालावधिना वृष्याद्यपि यद्वस्तुजातं तदपि शुक्रत्वं यातीत्याशङ्कायामिदमाह-

वृष्यादीनि प्रभावेण सद्यः शुक्रादि कुर्वते।

वृष्याणि क्षीररसमधुकमाषकूष्माण्डहंसादिपक्ष्यण्डप्रायाणि। तथा, आदिग्रहणाद्विषगरप्रशमनमूढगर्भजरायुनिष्क्रमणक्रियाप्रायाणि। सद्यः-तत्क्षणादेव, सुसूक्ष्मं दुर्लक्ष्यं तथाविधं प्रभावमासाद्य तानि परिणमन्ति शुक्रबलादि कुर्वते नापरिणमन्ति।

प्रायः करोत्यहोरात्रात्कर्मान्यदपि भेषजम्॥ ॥६७॥

वृष्यादिद्रव्यव्यतिरिक्तमन्यदपि भेषजं-चूर्णगुटिकादि दीपनादिक्रियं, अहोरात्रेण प्रायः स्वं स्वं कर्म करोति। प्रायोग्रहणं किञ्चिद्भेषजमहोरात्रादप्यूर्ध्वं किञ्चित्ततोऽप्यवाक् वीर्यादिवशात् कर्म करोतीति द्योतनार्थम्।

आहाररसो रसधातुना सहैकतमापन्नो रसरक्तादिभावेन परिणमति यावच्छुक्रप्रसादो गर्भत्वेनेत्युक्तम्। तत्कथं कदाचिदेकदेशे रोगकृद्रुधिरमांसाद्येकदेशवृद्धिक्षयविकारकृत्त्वाद्भवति ? इति संशयापनोदार्थमिदमाह-

व्यानेन रसधातुर्हि विक्षेपोचितकर्मणा।
युगत्पसर्वतोऽजस्रं देहे विक्षिप्यते सदा॥६८॥
क्षिप्यमाणः खवैगुण्याद्यसः सज्जति यत्र सः।
तस्मिन्विकारं कुरुते खे वर्षमिव तोयदः॥६९॥

आहाररसो जठराग्निना पक्वः प्रसादो धात्वाकारत्वाद्धातुवाच्यो यस्माद्यानेन सदा सर्वतः-सर्वस्मिन् देहे, विक्षिप्यते विशेषेण प्रेर्यते। सर्वत इत्याद्यादित्वात्तसिः। किम्भूतेन? विक्षेपः-प्रेरणमेव, उचितं-योग्यं, कर्म यस्य, तेन विक्षेपो चितकर्मणा। कथं विक्षिप्यते? युगपत्-एककालम्, तथाऽजस्रं-अनवरतम्। सः-रसधातुराहाररसप्रसादाख्यो, व्यानेन विक्षिप्यमाणः खवैगुण्यात् स्रोतोदुष्टेः, यत्र प्रदेशे स्वरुपाप्रच्युतोऽपि सज्जति-सक्तः सम्पद्यते, तस्मिन् प्रदेशे देहस्य विकारं कुरुते, न सर्वत्र। एतदेव दृष्टान्तद्वारेण स्पष्टयति। खे वर्षमित्यादि। यथा खे-वियति, तोयदो-मेघो, वातवशात् क्षिप्यते वर्षं-वृष्टिं, क्वचिदेव देशे कुरुते, न सर्वत्र। खस्य वैगुण्यं खवैगुण्यमिति षष्ठीसमासः। "पूरणगुण" इत्यादिना चात्र यथा समासनिषेधो न भवति, तथा "शिरोर्तीन्द्रियदौर्बल्य" (ह्.सू.अ. ४/९) इत्यत्र प्रतिपादितमेव। तस्मिन् विकारं कुरुत इत्यत्रात्मनेपदं न प्राप्नोति, रसस्य कर्त्रभिप्रायाभावात्। न हि तस्य चित्रमुत्पद्यत इति करोतीति प्राप्नोति। ब्रूमः। औपचारिकोऽत्र कर्त्रभिप्रायः कल्प्यः। अनेनैव न्यायेन 'व्रीहीनातपः शोषयति' इत्याद्यप्युपपन्नम्। व्यानो रसधातुं यत्र नयति तत्र विकारः, इति तावद्रसस्य विक्षेपः।

दोषाणामपि चैवं स्यादेकदेशप्रकोपणम्।

एवमिति दोषप्रकोपत्रमातिदेशार्थम्। यथा रसः क्षिप्यमाणः खवैगुण्याद्यत्र सज्जति तस्मिन् विकारं कुरुते, एवं-अनेन न्यायेन, दोषाणामपि-वातादीनां व्यानेन विक्षिप्यमाणानां, एकदेशप्रकोपणं-विकारकरणं, स्यात्। अत एव सिध्मदद्रुश्वयथ्वाद्येकदेशे जायते। एवं क्षेप्याणां स्वभावस्थानामप्यस्वातन्त्र्याद्विकारकारित्वं भवति।

अन्नभौतिकधात्वग्निकर्मेति परिभाषितम्॥ ७०॥

भूतमेव भौतिकम्। विनयादिभ्यष्टक्। अन्नं च भौतिकं च धातवश्चान्नभौतिकधातवः, तेषामग्निरन्नभौतिकधात्वग्निः, तस्य कर्म अन्नभातिकधात्वग्निकर्म। इति प्रकारे। इति-पूर्वोक्तेन प्रकारेण, अन्नभौतिकधात्वग्निकर्म परिभाषितं-उक्तं निश्चयीकृतम्। तत्र "अन्नं कालेऽभ्यवहृतं" (श्लो.५५) इत्यादिना "कटु मारुतम्" इत्यन्तेन ग्रन्थेन। तथा, अन्नं सारकिट्टतया यत्परिणमति

तदेतज्जाठाराग्नेः कर्म। "भौमाप्याग्नेय" (श्लो.५९) इत्यारभ्य" शेषाः शेषांश्च देहगान्" इत्येवमन्तेन ग्रन्थेन यन्निर्देष्टं तद्भूताग्नेः कर्म। "सारस्तु सप्तभिर्भूयो" (श्लो ६२) इत्यारभ्य "प्रसादकिट्टौ धातूना" इत्येवमन्तेन यन्निर्दिष्टं तद्धात्वग्निकर्मेति।

अन्नस्य पक्ता सर्वेषां पक्तृणामधिको मतः।

तन्मूलास्ते हि तद्वद्धिक्षयवृद्धिक्षयात्मकाः॥७१॥

तस्मात्तं विधिवद्युक्तैरन्नपानेन्धनैर्हितैः।

पालयेत्प्रयतस्तस्य स्थितौ ह्यायुर्बलस्थितिः॥७२॥

सर्वेषां पक्तृणां मध्ये योऽन्नस्य पक्ता-पाचको जाठराग्निः, सोऽधिको मतः-बलीयानभिप्रेतः। तन्त्रकृतामिति शेषः। कुतः श्रेष्ठः ? इत्याह-तन्मूला इत्यादि। सः जाठरानलो, मूलं प्रधानं, येषां-भूताग्न्यादीनां ते यस्मात्तन्मूलाः। मूलमिव मूलम्। यथा, वृक्षादीनां प्रधानमवयवो मूलं, सर्वेषां हि तदवयवानां जन्मादिषु तत्कारणम्, तेन विना तेषां जन्माद्यसम्भवात्। यस्माच्चैवं मूलं-सर्वावयवेभ्यः प्रधानमवयवः। तस्मात्ते-भूतधात्वग्नयः, तद्वद्धिक्ष्यवृद्धिक्षयात्मकाः,-वृद्धिश्च क्षय वृद्धिक्षयौ, तस्य-जाठराग्नेः, वृद्धिक्षयौ-चयापचयौ, ताभ्यां वृद्धिक्षयौ तद्वद्धिक्षयवृद्धिक्षयौ, तावात्मा-स्वभावो, येषां ते तद्वद्धिक्षयवृद्धिक्षयात्मकाः। एतदुक्तं भवति,-जाठरानलवृद्ध्या परेषामग्नीनां वृद्धिः तत्क्षयेण तेषां क्षयः। तस्मात्तं पाचकमग्निं, विधिवत्-प्रशस्तेन विधानेन, युक्तैः-योजितैः, अन्नपानेन्धनैर्हितैः-पथ्यैः, पालयेत्। अन्नपानान्येवेन्धनानि, तैः। कथं पालयेत् ? प्रयतः-यत्नवान् नावहेलया। हि-यस्मात्, तस्य-अन्नस्य पक्तुः, स्थितौ-सद्भावे, आयुर्बलस्थितिः-तत्स्थितावायुरवतिष्ठते बलं च। तथा चोक्तम् (सङ्ग्रहे चि.अ.१२)- "अग्निमूलं बलं पुंसां बलमूलं हि जीवितम्।" इति।

जाठराग्निमधुना चतुर्विधं वक्ति-

समः समाने स्थानस्थे विषमोऽग्निर्विमार्गगे।

पित्ताभिमूर्च्छिते तीक्ष्णो मन्दोऽस्मिन्कफपीडिते॥७३॥

समाने वायौ स्थानस्थे-खाशयस्थिते सति, समोऽग्निर्भवति। विमार्गगे-मार्गमुज्झित्वोत्पथप्रवृते समाने सति, विषमोऽग्निर्भवति। पित्तेनाभिमूर्च्छिते-एकलोलीभूते समाने, तीक्ष्णोऽग्निर्भवति। अस्मिन्-समाने, कफपीडिते-श्लेष्माभिभूते, मन्दोऽग्निर्भवति।

समोऽग्निर्विषमस्तीक्ष्णो मन्दश्चैवं चतुर्विधः।

एवं-समादिभेदेन, चतुर्विधोऽग्निर्भवति।

इदानीमस्य चतुर्विधस्याग्नेर्लक्षणं वक्ति-

यः पचेत्सम्यगेवान्नं भुक्तं सम्यक् समस्त्वसौ॥ ७४॥

विषमोऽसम्यगप्याशु सम्यग्वाऽपि चिरात्पचेत्।

तीक्ष्णो वह्निः पचेच्छीघ्रमसम्यगपि भोजनम्॥ ७५॥

मन्दस्तु सम्यगप्यन्नमुपयुक्तं चिरात्पचेत्।

कृत्वाऽऽस्यशोषाटोपान्त्रकूजनाध्मानगौरवम्॥ ७६॥

वह्निरिति वक्ष्यमाणेन सम्बन्धः। यो वह्निः सम्यक्-यथाविधि, भुक्तमन्नं सम्यगेव पचेत्, स सम एव भवति, इति तुशब्दोऽवधारयति। अन्नमिति प्रकृतम्। योऽसमयगपिदेशकालमात्राविधिभ्रष्टमपि, अन्नं भुक्तमाशु पचेत्, सम्यग्वाऽन्नं भुक्तं चिरात्पचेत्, स विषमः। योऽसम्यगप्यन्नं भुक्तं द्राक् पचेत्, स तीक्ष्णः। यस्तु सम्यगप्यन्नमुपयुक्तमास्यशोषादीन् कृत्वा चिरात्पचेत्, स मन्दः। आटोपः-क्षोभः। मन्देऽग्नौ च सभक्तमेवौषधं प्रायेणोपयोक्तुं युज्यते। तथा च सङ्ग्रहे पपाठ (सू. अ. ११) -"यामैश्चतुर्भिर्द्वाभ्यां च भोज्यभेषज्ययोः समे। पाकोऽग्नौ युक्तयोर्द्राक् च तीक्ष्णे, मन्दे पुनश्चिरात्॥ सभक्तमौषधं तस्मान्मन्दाग्नेरवचारयेत्।" इति।

एवमग्निमुक्त्वा, अन्यायत्तत्वाद्बलस्य बलत्रैविध्यं दर्शयति-

सहजं कालजं युक्तिकृतं देहबलं त्रिधा।

सह जायत इति सहजम्, कालाज्जातं कालजम्, युक्तिभिरूपजातं युक्तिजम्, इति देहबलं-शरीरबलं, त्रिधा।

तत्र सत्त्वशरीरोत्थं प्राकृतं सहजं बलम्॥ ७७॥

वयस्कृतमृतूत्थं च कालजं, युक्तिजं पुनः।

विहाराहारजनितं तथोर्जस्करयोगजम्॥ ७८॥

तत्र-तेषु बलेषु मध्ये, सत्त्वरजस्तमःसमुत्थं शरीरोद्भूतं च यद्बलं तत्प्राकृतं-स्वभाविकम्। सत्त्वशब्देन गुणत्रयमुपलक्ष्यते। शरीरं-त्वग्रक्तादिसारमयं यद्वस्तुजातं तत्। वयो-बाल्ययौवनादि, तेन कृतं वयस्कृतम्,-वयोनुसारेण निष्पादितम्, ऋतुभ्यो-हेमन्तादिभ्य उद्भूतमृतूत्थम्, एतदुभयमपि कालजं बलम्। वयस्कृतमित्यत्र "अतः कृकमि" इत्यनेन सः। युक्तिजं पुनर्बलं,-विहरणं-विहारो वाङ्मनश्चेष्टालक्षणोऽनेकप्रकारः, आहारः-पूर्वमुक्तः, ताभ्यां विहाराहाराभ्यां जनितं विहाराहारजनितं यद्बलं तद्युक्तिजम्। युक्तिः-योग इतिकर्तव्यता, ततो जातं युक्तिजम्। तथा, ऊर्जस्करास्त्विमे योगाः-"तद्यथा,-बलवत्पुरुषे देशे जन्म [तद्विधे च काले] सुखश्च कालयोगो बीजक्षेत्रगुणशरीराहारसत्वसम्पत्तयश्च" (सं. शा. अ. ८)। तथा ये योगा रसायनवाजीकरणोक्ताः, तेभ्यो जातमूर्जस्करयोगजं यद्बलं तदपि युक्तिजम्।

सम्प्रति देशत्रैविध्यं दर्शयति-

देशोऽल्पवारिद्रुनगो जाङ्गलः स्वल्परोगदः।

आनूपो विपरीतोऽस्मात्समः साधारणः स्मृतः॥ ७९॥

स्तोकजलवृक्षशैलाक्रान्तः स्वल्परोगदो जाङ्गलो देशः शुद्धस्रोतस्तया। तथा च-मरुदेशोद्भवा अल्परोगाश्चिरजीविनश्च दृश्यन्ते। अस्मात्-जाङ्गलात्, विपरीतो-

बहूदकतरुगिरिसमधिष्ठितो बहुरोगदश्च, आनूपः। समस्तु देशो यो नात्यम्बुवृक्षपर्वतो, न चात्यल्पवारितरुगिरिः, स साधारणो मध्यस्थरोगारोग्यः।

एवं भूमिलक्षणं देशमुक्त्वा मज्जादीनां परिमाणार्थमाह-

मज्जमेदोवसामूत्रपित्तश्लेष्मशकृन्त्यसृक्।
रसो जलं च देहेऽस्मिन्नेकैकाञ्जलिवर्द्धितम्॥८०॥

मज्जादिद्रव्यं जलावसानं, अस्मिन्-पौरुषे देहे, एकैकाञ्जलिवर्द्धितम्। तेन मज्ज्ञ एकोऽञ्जलिः, द्वौ मेदसः, यावज्जलस्य देहाश्रितस्य दशाञ्जलयः।

पृथक् स्वप्रसृतं प्रोक्तमोजोमस्तिष्करेतसाम्।
द्वावञ्जली तु स्तन्यस्य चत्वारो रजसः स्त्रियाः॥८१॥

ओजोमस्तिष्कशुक्राणां देहगानां पृथक्-प्रेत्येकं, स्वप्रसृतं प्रमाणम्। स्त्रियाः स्तन्यस्य द्वावञ्जली, रजसो-रक्तस्यार्तवस्य चत्वारोऽञ्जलयः। स्वेन मानेनाञ्जलिप्रसृताविह हस्तसंथानविशेषवाच्यौ गृह्येते, न तु चतुष्पलद्विपलपरिमाणौ मानवाच्यौ, स्वशब्दप्रयोगात्। प्रसृतशब्दे तु मानवाचिनि गृह्यमाणे स्वशब्दोऽनर्थक एवेह स्यात्। ननु, यथा मज्जादीनां समत्वाधिक्यहानयो विद्यन्ते, तथा पवनस्यापि। तथा च प्रागभ्यधायि (हृ. सू. अ. ११/१) -"उत्साहोच्छ्वासनिःश्वास" इत्यादि। तथा (हृ. सू. अ. ११/५)-"वृद्धस्तु कुरुतेऽनिलः। कार्श्य" इत्यादि। तथा (हृ. सू. अ. ११/१ ५)-"लिङ्गं क्षीणेऽनिलेऽङ्गस्य" इत्यादि। तस्माद्वायोरपि प्रमाणं वाच्यं स्यात्। तत्कथमिह नोक्तम्? अत्रोच्यते। पवनस्यामूर्त्तत्वात्प्रमाणं वक्तुमयुक्तम्। तथा च चरकः (?)-"न मानोन्मानता वायोररूपत्वात्तु युज्यते।" इति। तस्माल्लिङ्गैरेव समत्वाधिक्यहानयोऽनिलस्य वक्तुं युक्ताः।

समधातोरिदं मानं विद्याद्बुद्धिक्षयावतः॥८२॥

समधातोः-समप्रकृतेः, एतन्मानं विद्यात्, नैकदोषाधिकप्रकृतीनां द्विदोषाधिकप्रकृतीनां वा। तेषां ह्यत एव यथोक्तादञ्जलिप्रमाणादिकाद्यथायथं मज्जादीनां वृद्धिक्षयौ विद्यात्।

अधुना यदुक्रमायुष्कामीयाध्याये (हृ. सू. अ. १/९)-"शुक्रार्तवस्थैर्जन्मादौ विषेणेव विषक्रियेः। (तैश्च तिस्रः प्रकृतयः" इत्यादि सूत्रस्यैव विवरणमाह-

शुक्रासृग्गर्भिणीभोज्यचेष्टागर्भाशयर्तुषु।
यः स्याद्दोषोऽधिकस्तेन प्रकृतिः सप्तधोदिता॥८३॥

शुक्रं चासृक् चेत्यादिद्वन्द्वः। गर्भिणी-सम्पद्यमाना गर्भामाता, तस्या भोज्यचेष्टे-आहारविहारौ, एतेषु योऽधिको दोशो-वातादिः, तेन प्रकृतिः सप्तधा-सप्तप्रकारा, [उदिता-] अभिहिता, सूत्रस्थाने (अ.१/१०)। य इति जातावेक वचनम्। तेन यो दोषो, यौ दोषौ, ये दोषाः, इत्यर्थोऽवतिष्ठते। एकदोषद्विदोषत्रिदोषप्रकृतिषु यथासङ्ख्यमेको दोशो द्वौ दोषो त्रयो दोषा अधिका इत्यर्थः। ननु, समधातोर्वातादीनां समत्वात् कथमिवाधिक्यं स्यात्? ब्रूमः। समधातोरपि समानां त्रयाणामपि तस्मिन् काले स्वप्रमाणतो यथास्वं तुल्ये नाधिकत्वं भवतीति युक्तं तत्राप्याधिक्यम्। यदि वा दोषोऽधिक इति बाहुल्येनोक्तम्। तेन षड्वेव प्रकृतिषु दोषाधिकभावः, न तु समधाताविति वेद्यम्।

अधुना वातस्य प्राधान्यं षड्भिः कारणैः प्रदर्श्य वातप्रकृति प्रागभिधत्ते-

विभुत्वादाशुकारित्वाद्बलित्वादन्यकोपनात्।
स्वातन्त्र्याद्बहुरोगत्वाद्दोषाणां प्रवलोऽनिलः॥८४॥

विभुत्वात्-व्यापित्वात्। तथा, आशुकारित्वात्। तथा, बलित्वात्, यथा हि वायुर्व्याप्याशुकारी बली च, न तथा पित्तश्लेष्माणौ। तथा, अन्यकोपनात्, स्वजातीयापेक्षयाऽन्यौपित्तश्लेष्माणौ, अनेन यथा कोप्येते, न ताभ्यां तथाऽयम्। तथा, स्वातन्त्र्यात्-प्रेरकत्वात्, तथा हि नासावन्येन प्रेर्यतेऽतः स्वतन्त्रोऽसौ। तथा, बहुरोगत्वात्।

तथा चोक्तम्-"अशीतिर्वातजा रोगाश्चत्वारिंशच्च पित्तजाः । विंशतिः श्लेष्मजाश्च" इति। एवं त्रयाणां दोषाणं मध्येऽनिलः प्रबलः-प्रधानम्।

प्रायोऽत एव पवनाध्युषिता मनुष्या
दोषात्मकाः स्फुटितधूसरकेशगात्राः।
शीतद्विषश्चलधृतिस्मृतिबुद्धिचेष्टा-
सौहार्ददृष्टिगतयोऽतिबहुप्रलापाः॥८५॥
अल्पवित्तबलजीवितनिद्राः
सन्नसक्तचलजर्जरवाचः।
नास्तिका बहुभुजः सविलासा
गीतहासमृगयाकलिलोलाः॥८६॥
मधुराम्लपटूष्णसात्म्यकङ्क्षाः
कृशदीर्घाकृतयः सशब्दयाताः।
न दृढा न जितेन्द्रिया न चार्या
न च कान्तादयिता बहुप्रजा वा॥८७॥
नेत्राणि चैषां खरधूसराणि
वृत्तान्यचारूणि मृतोपमानि।
उन्मीलितानीव भवन्ति सुप्ते
शैलद्रुमांस्ते गगनं च यान्ति॥८८॥

अभ्या मत्सराध्माताः स्तेनाः प्रोद्वृद्धपिण्डिकाः।
श्वश्रृगालोष्ट्रगृध्राखुकाकानूकाश्च वातिकाः॥८९॥

प्रायोग्रहणं क्वचिद्व्यभिचारार्थम्। अत एव-अस्मादेव कारणात्, पवनाध्युषिताः-वायुनाऽधिष्ठिताः, मनुष्याः प्राय एवंरूपा भवन्ति। कारणानुविधायित्वात् कार्याणाम्। दोषात्मकाः-न तु गुणस्वभावाः, न शुभस्वभावा भवन्ति। शुक्रार्तवरूपावस्थामारभ्याजीवितं पवनाध्युषिता मानवाः स्फुटितधूसरकेशगात्राः। स्फुटितानि धूसराणि च केशगात्राणि येषां त एवम्। तथा, शीतम् द्विषन्तीति शीतद्विषः, उष्णाभिलाषित्वात्। तथा, चला धृत्यादयो गत्यन्ता येषां ते तथोक्ताः। तथा, अतिशयेन बहुः प्रलापः-सम्भाषणं, येषां त एवम्। वसन्ततिलकावृत्तम्। अल्पाः वित्तादयो निद्रान्ता येषां त एवम्। तथा, सन्ना सक्ता चला जर्जारा वाक् येषां त एवम्। केषाञ्चित्सन्ना-अवसादं नीता, केषाञ्चित्सक्ता-भाषणे विलम्ब्य विलम्ब्य प्रवृत्ता, केषाञ्चिच्चला, केषाञ्चिज्जर्जरा-भिन्नकांस्यस्वनसदृशी वागिति। तथा नास्ति परलोक मतिर्येषां ते नास्तिकाः। "अस्ति नास्ति दिष्टं मतिः" इति ठक्। तथा, बहुभुजः-अनल्पाशनाः। तथा, सविलासाः-सलीलाः। तथा, गीतहासादिलोलाः तत्प्रियाः। स्वागतावृत्तम्। तथा, मधुराम्लपटूष्णसात्म्या मधुराद्यभिलाषिणश्च। कृशाश्च ते दीर्घाकृतयश्च, ते कृशदीर्घाकाराः। तथा, सशब्दं यातं-गमनं, येषां ते सशब्दयाताः। न दृढाः-न दृढशरीराः। न जितेन्द्रियाः। न चार्याः-असन्तः। कान्तानां स्त्रीणां, न च दयिताः-[न] अभिमताः। न च बहुप्रजाः-अपि तु स्वल्पसन्ततयः। "या(र्या)वन्तः(न्तं)शेषं(ष)पूर्वसाम्यादौपच्छन्दसिकं वदन्ति सन्तः।" एषां च-वातप्रकृतीनां, नेत्राणी खराणि-परुषाणि, तथा धूसराणि-पांसुनेवावकीर्णानि, वृत्तानिवर्तुलानि, अचारूणि, मृतोपमानि च, तथा सुप्ते-स्वप्ने, उन्मीलितानीव-उद्घाटितानीव, भवन्ति। ते-वातप्राकृतयः, स्वप्ने सति शैलद्रुमान् गगनं च गच्छन्ति। इन्द्रवज्रावृत्तम्। ते च, अधन्याः-अभव्याः, मत्सरेणाध्माताः-द्वेषपूर्णाः। तथा, स्तेनाः-चौराः। प्रोद्बद्धपिण्डिकाः-जङ्घायाः पश्चिमाद्भागात् प्रकर्षेणोन्नताः पिण्डिका येषां त एवम्। अणुकं-स्वभावः, स्वररूपचेष्टानुकरणम्। श्वादीनामिवानूकं येषां-वातिकानां, त एवम्। वातिका इति भूम्नि मत्वर्थीयष्ठक्, वातभूयिष्ठा इत्यर्थः।

अधुना पित्तप्रकृतिलक्षणं प्रस्तौति-

पित्तं वह्निर्वह्निजं वा यदस्मा-
त्पित्तोद्रिक्तस्तीक्ष्णतृष्णाबुभुक्षः।
गौरोष्णाङ्गस्ताम्रहस्ताङ्घ्रिवक्त्रः

शूरो मानी पिङ्गकेशोऽल्परोमा॥९०॥

दयितमाल्यविलेपनमण्डनः

सुचरितः शुचिराश्रितवत्सलः।

विभवसाहसबुद्धिबलान्वितो

भवति भीषु गतिर्द्विषतामपि॥९१॥

मेधावी प्रशिथिलसन्धिबन्धमांसो

नारीणामनभिमतोऽल्पशुक्रकामः।

आवासः पलिततरङ्गनीलिकानां

भुङ्क्तेऽन्नं मधुरकषायतिक्तशीतम्॥९२॥

घर्मद्वेषी स्वेदनः पूतिगन्धि

र्भूर्युच्चारक्रोधपानाशनेर्ष्यः।

सुप्तः पश्येत्कर्णिकारन्पलाशान्

दिग्दाहोल्काविद्युदर्कानलांश्च॥९३॥

तनूनि पिङ्गानि चलानि चैषां

तन्वल्पपक्ष्माणि हिमप्रियाणि।

क्रोधेन मद्येन रवेश्च भासा

रागं व्रजन्त्याशु विलोचनानि॥९४॥

मध्यायुषो मध्यबलाः पण्डिताः क्लेशभीरवः।

व्याघ्रर्क्षकपिमार्जारयक्षानूकाश्च पैत्तिकाः॥९५॥

धन्वन्तरिमतेन पित्तमेव वह्निः पाकादिकर्मकरणात्। अथवा वह्निजं-वह्नेर्जातं, अभ्याधारत्वात्। यदस्मात्-यतश्चैवमतो हेतोः, पित्ताधिकः पुरुषस्तीव्रतृष्णाबुभुक्षो भवति। तथाविधात्कारणादुत्पन्नत्वात् अब्यात् रसधातुश्च तस्य द्रागेव शुष्यतीतिभावः। तथा, गौर उष्णाङ्गश्च। तथा, ताम्रवर्णं हस्ताङ्घ्रिवक्त्रं यस्य स एवम्। तथा,शूरो मानी च। तथा, कपिलकेशोऽल्परोमा च। शालिनीवृत्तम्। दयतानि माल्यादीनि यस्य स एवम्। तथा,

सुचरितः-शोभनचेष्टितः। तथा, शुचिः-कायवाङ्मनोव्यापारैर्मलिनैरसंस्पृष्टः। आश्रितानां वत्सलः-प्रियकृत्, विभवादियुक्तश्च। तथा, भीषु-भयेषु, द्विषतामपिगतिः शरण्यत्वाद्भवति। अपिशब्दात्सुहृदां मध्यस्थानां किमु स गतिर्न भवति ? इति द्योतयति। द्रुतविलम्बितं वृत्तम्। मेधावीति प्रशंसार्थे "अस्मायामेधास्रजो विनिः" इति विनिः। सम्धिबन्धाश्च मांसानि च, तानि प्रशिथिलानि यस्य स एवम्। तथा, स्त्रीणामनभीष्टः। अल्पौ शुक्रकामौ यस्य स एवम्। पलितादीनामावासः-तान्यस्य बहूनि सन्तीत्यर्थः। स च मधुराद्यन्नं भुङ्क्ते। प्रहर्षिणीवृत्तम्। घर्मद्वेषीति "बहुलमाभीक्ष्ण्ये" णिनिः। स्विद्यतीति स्वेदनः। पूतिर्गन्धो यस्य स पूतिगन्धिः। "गन्धस्येदुत्पूति" इत्यादिना इदादेशः। भुरयः-प्रभूताः, उच्चारादयो यस्य स एवम्। स च पैत्तिकः सुप्तः सन् कर्णिकारादीन् पश्येत्। शालिनीवृत्तम्। एषां च-पैत्तिकानां विलोचनानि तनुत्वादिगुणयुक्तानि भवन्ति। तानि च क्रोधाद्यैर्द्रागेव लौहित्यं यान्ति। उपजातिवृत्तम्। ते च पैत्तिका मध्यायुष्ट्वादियुक्ता भवन्ति। व्याघ्रादीनामिवानूकं येषां त एवम्।

अथ श्लेष्मप्रकृतिलक्षणार्थमाह-

श्लेष्मा सोमः श्लेष्मलस्तेन सौम्यो
गूढस्निग्धश्लिष्टसन्ध्यस्थिमांसः।
क्षुत्तृड्खक्लेशघर्मैरतप्तो
बुद्ध्या युक्तः सात्विकः सत्यसन्धः॥९६॥

प्रियङ्गुदूर्वाशरकाण्डशस्त्र-
गोरोचनापद्मसुवर्णवर्णः।
प्रलम्बबाहुः पृथुपीनवक्षा
महाललाटो घननीलकेशः॥९७॥

मृद्वङ्गः समसुविभक्तचारुदेहो
बह्वोजोरतिरसशुक्रपुत्रभृत्यः।
धर्मात्मा वदति न निष्ठुरं च जातु

प्रच्छन्नं वहति दृढं चिरं च वैरम्॥९८॥

समदद्विरदेन्द्रतुल्ययातो
जलदाम्भोधिमृदङ्गसिंहघोषः।
स्मृतिमानभियोगवान् विनीतो
न च बाल्येऽप्यतिरोदनो न लोलः॥९९॥

तिक्तं कषायं कटुकोष्णरूक्ष-
मल्पं स भुङ्क्ते बलवांस्तथाऽपि।
रक्तान्तसुस्निग्धविशालदीर्घ-
सुव्यक्तशुक्लासितपक्ष्मलाक्षः॥१००॥

अल्पव्याहारक्रोधपानाशनेहः
प्राज्यायुर्वित्तो दीर्घदर्शी वदान्यः।
श्राद्धो गम्भीरः स्थूललक्षः क्षमावा-
नार्यो निद्रालुर्दीर्घसूत्रः कृतज्ञः॥१०१॥

ऋजुर्विपश्चित्सुभगः सुलज्जो
भक्तो गुरूणां स्थिरसौहृदश्च।
स्वप्ने सपद्मान्सविहङ्गमालां -
स्तोयाशयान् पश्यति तोयदांश्च॥१०२॥

ब्रह्मरुद्रेन्द्रवरुणतार्क्ष्यहंसगजाधिपैः।
श्लेष्मप्रकृतयस्तुल्यास्तथा सिंहाश्वगोवृषैः॥१०३॥

यस्माच्छ्लेष्मा सोमः, तेन हेतुना श्लेष्मलो नरः सौम्यो भवति। कारनानुविधायित्वात्कार्याणाम्। सोम इव सौम्यः, शाखादित्वाद्यञ्। तथा, गूढस्निग्धश्लिष्टानि सन्ध्यस्थिमांसानि यस्य स एवम्। तथा, क्षुद्रादिभिरतप्तः-अक्षोभितो भवति। तथा, बुध्द्याऽन्वितः प्रशस्तसत्वश्च। तथा, सत्यं सन्दधाति प्रतिजानीते, इति सत्यसन्धः। "आतश्चोपसर्गे" इत्यड्। शालिनीवृत्तम्। प्रियङ्वादितुल्येन वर्णेन एकैकेन युक्तः। कश्चित्प्रियङ्गुसमानवर्णः कश्चिद्दूर्वासदृशवर्णः कश्चिच्छरस्तम्बसदृशवर्णः कश्चिहच्छस्त्रतुल्यवर्णः कश्चिद्गोरोचनातुल्यवर्णः कश्चित्पद्मतुल्यवर्णः, कश्चित्सुवर्णसदृशवर्णः। तथा, प्रलम्बबाहुः दीर्घभुजः। तथा, विस्तीर्णपीवरवक्षाः। तथा, महल्ललाटम् अलिकं, यस्य स तथा। तथा, घननीलकेशः। उपजातिवृत्तम्। मृदङ्गः-कोमलावयवः। समः सुष्ठु विभक्तो-विभक्तावयवः, चारुर्देहो यस्य स एवम्। बहवस्तेजोरतिरसादयो यस्य स एवम्। तथा, धर्मस्वभावः। निष्ठुरं न कदाचिद्वदति। प्रच्छन्नं-गूढं कृत्वा, वैरं दृढं चिरं वहति-न तु शिथिलयति। प्रहर्षिणीवृत्तम्। समदस्य द्विरदेन्द्रस्य तुल्यं यातं-गमनं, यस्य स एवम्। तथा, जलदादिसदृशशब्दः। तथा, प्रशस्तस्मृतिः शोभनाभियोगी विनयी च भवति। बाल्येऽपि-बालत्वेऽपि नातिरोदनो न च लोलुपः। औपच्छन्दसिकं वृत्तम्। स चान्नं तिक्तादिरसयुक्तं बलक्षेपकं भुङ्क्ते, तथाऽल्पमपि भुङ्क्ते, तथाऽपि स्वभावाद्बली भवति। रक्तावन्तौ ययोस्ते रक्तान्ते, तथा सुस्निग्धे विशाले दीर्घे च, तथा सुव्यक्तौ शुक्लासितौ ययोस्ते सुव्यक्तशुक्लासिते, तथा पक्ष्मले, एवंभूते अक्षिणि यस्य स एवम्। इन्द्रवज्रावृतम्। अल्पा व्याहारादयो यस्य स एवम्। [*व्याहारो-भाषणम्। पानं-पानीयादि। अशनं-भोजनम्। ईहा-कायिका चेष्टा।] प्राज्ये-प्रभूते, आयुर्वित्ते यस्य स एवम्। दीर्घदर्शी-भावि कार्यं पश्यति, इदं कुर्वत इदमवश्यं सम्पद्यत इति। वदान्यो-वल्गुभाषी दाता च। श्राद्धो-दानादौ श्रद्धावान्। गम्भीरो-महाचित्तः। स्थूललक्षो-भूरिदाता। क्षमावान्-क्षान्तियुक्तः। आर्यः-सज्जनः। निद्रालुः-बहुनिद्रः। दीर्घसूत्रः-चिरकारी। कृतं जानातीति कृतज्ञः। वैश्वदेवीवृत्तम्। ऋजुः-अकुटिलचित्तः। विपश्चित्-पण्डितः। सुभगो-जनप्रियः। सुष्ठु लज्जत इति सुलज्जः। गुरूणां-पित्रादीनां, भक्तः-सेवकः। तथा, स्थिरं-दृढं, सौहृदं-मैत्री, यस्य स एवम्। स्वप्ने तोयाशयान्-तडागादीन्, सजलजान् पक्षिपङ्क्तियुक्तांश्च पश्यति, तोयदांश्च पश्यति। उपजातिवृत्तम्। ब्रह्मादिभिः श्लेष्मप्रकृतयः समानाः, सिंहादिभिश्च। [*तार्क्ष्यो-गरुडः। गजाधिपः-एरावतः।]

एवं पृथग्वातादिप्रकृतीस्तिस्रोऽभिधाय द्वन्द्वसर्वदोषप्रकृतिलक्षणाभिधित्सयेदमाह-

प्रकृतीर्द्वयसर्वात्था द्वन्द्वसर्वगुणोदये।

द्वयात्-संसर्गात्, उद्भूतास्तिस्रः प्रकृतयः, सर्वोत्था-सर्वदोषोद्भूता, एका प्रकृतिः, एवं प्रकृतयो द्वयसर्वोत्थाश्चतस्रः। गुणशब्दोऽत्र धर्मवचनो लिङ्गवचनो वा। द्वन्द्वशब्देन दोषद्वयं सर्वशब्देन च दोषत्रयं लक्ष्यते। द्वन्द्वं च सर्वे च द्वन्द्वसर्वे, तेषां गुणाः-दोषद्वयदोषत्रयाणां धर्मा लिङ्गानि वा, तेषामुदयः-प्रादुर्भावो, द्वन्द्वसर्वगुणोदयः, तस्मिन् द्वन्द्वसर्वगोणोदये सति, द्वयसर्वोत्थाः प्रकृतीर्वदेत्-आदिशेत्। द्वयं च सर्वे च द्वयसर्वे, तेभ्य उत्थः-उत्थानं, यासां ताः। एवं द्वन्द्वदोषगुणोदये द्वन्द्वोत्थाः प्रकृतीर्वदेत्, सर्वदोषगुणोदये सर्वोत्थां प्रकृतिं वदेत्। उत्थ इत्युत्पूर्वात्तिष्ठतेः "सुपि स्थः" इति योगविभागात्कः। "उदः स्थास्तम्भोः पूर्वस्य" इति पूर्वसवर्णादेशः। "अत्राद्यास्त्रयो नित्यातुरा दोषानुशयितशरीरत्वात्। विशेषतश्च द्वन्द्वप्रकृतयः। तेषु हि गुणमिश्रविकारकारिषु क्षुत्पिपासादिष्विवारोग्यव्यपदेशः"

(सं. शा. अ. ८) ।

एवं वातादिप्रकृतीर्निर्दिश्य, सत्त्वादिप्रकृतीर्निर्दिदिक्षुराह-

शौचास्तिक्यादिभिश्चैवं गुणैर्गुणमयीर्वदेत्॥ १०४॥

चशब्दो भिन्नक्रमे, गुणमयीश्चेत्यत्र द्रष्टव्यः। एवं-वातादिप्रकृतिवत्, पृतग्द्वन्द्वसर्वोत्थाः शौचास्तिक्यादिभिः सत्त्वादिगुणैः (श्लो. ७) सप्त सत्त्वादिगुणमयीश्च प्रकृतीर्वदेत्। आदिग्रहणात् शुक्लधर्मरुच्यादिभिः सत्त्वादीनां गुणैर्यथायथं सत्त्वादिप्रकृतीर्वातादिप्रकृतयः परस्परमनुरुध्यन्ते, सत्त्वादिप्रकृतयश्च वातादिप्रकृतीरनुरुध्यन्ते। एवं वातादिप्रकृतयः सप्त, सत्त्वादिप्रकृतयोऽपि सप्तैव। जातिकुलदेशकालवयोबलप्रत्यात्मसंश्रयाश्च सप्तैव। तथा हि-दृश्यन्ते पुरुषाणां जात्यादिनियतास्ते ते भावविशेषाः परस्परविलक्षणाः सत्त्वाद्यसङ्ख्येयभेदावेशाच्च रूपस्वरचरितानुकरणमप्यनूकशब्दवाच्यमसङ्ख्यभेदं भवति। सत्त्वाद्यावेशस्त्वनन्तर-जन्माभ्यासवासनया जन्यते। तस्माद्देवमानुषतिर्यक्प्रेतनारकाणां तत्तद्विशेषाणां च यथायथमेवानूकं पुरुषस्यान्वीक्षेत।

यस्माच्छरीरं सत्त्वादीननुरुध्यते, सत्त्वादयोऽपि शरीरम्। प्रकृतिविभागश्चायं तदनुरूपचिकित्साप्रवृत्तये वैद्यस्योपयुज्यते। तत्राद्यास्त्रयो नित्यतुराः, दोषानुशयितशरीरत्वात्। विशेषतश्च द्वन्द्वप्रकृतयः। तस्माद्विपरीतगुणेन विधिना दोषोपक्रमणीयोक्तेन तानुपाचरेत्। समधातुप्रकृतिस्तु सर्वरसेन सात्म्येनोपचरणीयः। तथा च मुनिः (च.सू.अ.७/४१)- "समसर्वरसं सात्म्यं समधातोः प्रशस्यते।" इति।

एवं वातादिप्रकृतीः सत्त्वादिप्रकृतीश्च परस्परानुरोधिनीर्निर्दिश्य, वयोज्ञानार्थमाह-

वयस्त्वाषोडशाद्बालं तत्र धात्विन्द्रियौजसाम्।

वृद्धिरासप्ततेर्मध्यं तत्रावृद्धिः परं क्षयः॥१०५॥

कालकृता शरीरावस्था-वयः। तच्च त्रिधा, बालमध्यवृद्धभेदेन। वयः पुनराषोडशाद्वर्षात्-षोडशं वर्षं यावत्, बालम्। तदपि त्रिविधम्,-क्षीरक्षीरान्नान्नवृत्त्या। तत्र-बाले वयसि, धातूनां-रसादीनां, इन्द्रियाणां चक्षुरादीनां तथा सर्वधात्वाप्यायकस्य-ओजोसो, वृद्धिः। श्लेष्माधिक्याच्च बालस्य स्नेहमार्दवसौकुमार्याल्पक्रोधत्वसौभाग्यानि भवन्ति। आसप्ततेर्मध्यं वयः। आङत्र मर्यादायाम्, नाभिविधौ। ततश्चैकोनसप्ततिं यावन्मध्यं वयः। तदपि त्रिविधम्,-यौवनं सम्पूर्णत्वमपरिहानिश्च। तस्मिन् पित्तोद्रेकः, तेन दीप्ताग्निता प्रज्ञापरिपाको व्यवसायश्चेति भवति। तत्राविंशतो यौवनम्, आचत्वारिंशतः सर्वधात्विन्द्रियबलवीर्यपौरुषस्मरणवचनविज्ञानप्रश्रयगुणसम्पूर्णत्वम्, अतःपरमपरिहानिः। तत्रेत्यादि। [तत्र-] तस्मिन्मध्ये वयसि, धात्वादीनामवृद्धिः-अवर्धनं, भवति। परं क्षयः। परं-एकोनसप्ततेराजीवितं यावत्, धात्विन्द्रियौजसां क्रमेण क्षयः, तथा बलवीर्यपौरुषवचनस्मरणविज्ञानप्रश्रयगुणानां च। तथा, "वलीपलितकासश्-वासाग्निसादादिभिरभिभूयमानं जीर्णं भवनमिवाभिवृष्टं सीदति। तस्मिन्मारुतोद्रेकः, तेन श्लथासारमांससन्ध्यस्थिता त्वक्पारुष्यमवनामः कायस्य वेपथुः श्लेष्मसिङ्घाणकोदीरणं धातुक्षयश्च" (सं. शा. अ. ८)। इति।

स्वं स्वं हस्तत्रयं सार्द्धं वपुः पात्रं सुखायुषोः।

न च यद्युक्तमुद्रिक्तैरष्टाभिर्निन्दितैर्निजैः॥१०६॥

अरोमशासितस्थूलदीर्घत्वैः सविपर्ययैः।

स्वंस्वं-आत्मीयमात्मीयं, हस्तत्रयं सार्द्धं प्रमाणतो यद्वपुः-शरीरं, तत्सुखायुषोः पात्रं-भाजनम्। एवंभूतमपि यत्-वपुः, उद्रिक्तैः-अधिकैर्निमित्तैः, निन्दितैः-अप्रशस्तैः, निजैः-सहजैः, अष्टाभिर्न युक्तम्। कैः ? अरोमशादिभिः। तेनारोमशं यद्वपुस्तत्सुखायुषोर्न पात्रम्। तथा, यदतिरोमशं तच्च सुखायुषोर्न पात्रम्। असितादिष्वप्येवं योज्यम्। एवमीषद्रोमादियुक्तं यत्पुनर्हस्तत्रयं सार्द्धं तत्सुखायुषोः पात्रम्।

सुस्निग्धा मृदवः सूक्ष्मा नैकमूलाः स्थिराः कचाः॥

ललाटमुन्नतं श्लिष्टशङ्खमर्धेन्दुसन्निभम्।

कर्णौ नीचोन्नतौ पश्चान्महान्तौ श्लिष्टमांसलौ॥१०८॥

नेत्रे व्यक्तासितसिते सुबद्धघनपक्ष्मणी।

उन्नताग्रा महोच्छ्वासा पीनर्जुर्नासिका समा॥१०९॥

ओष्ठौ रक्तावनुद्वृत्तौ, महत्यौ नोल्बणे हनू।

महदास्यं, घना दन्ताः स्निग्धाः श्लक्ष्णाः सिताःसमाः

जिह्वा रक्ताऽऽयता तन्वी, मांसलं चिबुकं महत्।

ग्रीवा ह्रस्वा घना वृत्ता, स्कन्धावुन्नतपीवरौ॥१११॥

उदरं दक्षिणावर्तगूढनाभि समुन्नतम्।

तनुरक्तोन्नतनखं स्निग्धमाताम्रमांसलम्॥११२॥

दीर्घाच्छिद्राङ्गुलि महत्पाणिपादं प्रतिष्ठितम्।

गूढवंशं बृहत्पृष्ठं, निगूढाः सन्धयो दृढाः॥११३॥

धीरः स्वरोऽनुनादी च, वर्णः स्निग्धः स्थिरप्रभः।

केशाः सुस्निग्धादिगुणयुक्ताः 'श्रेष्ठाः' इत्यनुक्तमप्यर्थाद्गम्यते। तथा चैवंगुणविशिष्टैरेतैर्युक्तं वपुः सुखायुषोः पात्रं भवति। एवं ललाटादिष्वपि चिन्त्यम्।

ललाटमुन्नतं-ऊर्ध्वं गतम्। तथा, श्लिष्टौ-अनुल्बणौ, शङ्खौ यस्मिंस्तदेवम्। तथा, अर्धेन्दुसन्निभं-अर्धचन्द्राकारम्।

कर्णौ नीचोन्नतौ,-अधो नीचौ-ह्रस्वौ, ऊर्ध्वमुन्नतौ। पश्चान्महान्तौ-विस्तीर्णौ। तथा, श्लिष्टौ च तौ मांसलौ च, श्लिष्टौरम्यौ, मांसलौ-उपचितमांसौ।

नेत्रे-व्यक्तौ स्फुटौ, असितसितौ वर्णौ ययोस्त एवम्। कृष्णो भागः कृष्ण एव शुक्लः शुक्ल एव, न वर्णान्तरव्यामिश्रे। तथा, सुबद्धे-सुसन्धिनी, घने-संहते, पक्ष्मणी ययोस्त एवम्।

नासिका-घ्राणम्। उन्नतमग्रं यस्याः सैवम्। तथा, महानुच्छ्वासो यस्याः सैवम्। तथा, पीना-अशिथिला। तथा, ऋजुः-अवक्रा। तथा, समा-अनिम्नोन्नता।

ओष्ठौ रक्तौ। तथा, अनुद्दत्तौ-बहिरनिर्गतौ।

द्वे हनू महत्यौ। नोल्बणे-नोन्नते। हनुशब्दस्य स्त्रीत्वमत्र चिन्त्यम्।

आस्यं-मुखम्, महत्।

दन्ताः-द्विजाः। घनाः-अविरलाः। श्लक्ष्णाः-कोमलस्पर्शाः। स्निग्धाः-स्निग्धरुचयः। सिताः-शुक्लाः। समाः-समपङ्क्तयः।

जिह्वा-रसना, रक्ता। तथा, आयता-दीर्घा। तथा, तन्वी-न स्थूला।

चिबुकं मांसलं महच्च।

ग्रीवा-शिरोधरा, ह्रस्वा-अदीर्घा, घना-निबिडा, वृत्तावर्तुला च।

स्कन्धौ-अंसौ। उन्नतौ च रौ पीवरौ च।

दक्षिण आवर्तो यस्या नाभेः सा दक्षिणावर्ता। दक्षिणावर्ता गूढा-निम्ना [च], नार्भिर्यस्य तद्दक्षिणावर्तगूढनाभि जठरम्। तथा, समुन्नतं-सम्यगुन्नतं श्रेष्ठत्वेनोन्नतम्।

तनवो रक्ता उन्नता नखा यस्य तदेवंभूतं पाणिपादं प्रतिष्ठितं-प्रशस्तं, भवति। तथा, स्निग्धं-स्निग्धच्छायम्। तथा, आताम्रं च तन्मांसलं च,-आताम्रमाम्सलम्। समन्तात्ताम्रंआताम्रम्। मांसलं-उपचितमांसम्। तथा, दीर्घाः-आयताः, अच्छिद्राः-परस्परं संश्लिष्टाः, अङ्गुलयो यस्य तदेवम्। तथा, महत्-विस्तीर्णम्।

तथा, गूढः-अदृश्यो, वंशो यस्य तदेवंविधं पृष्ठं प्रशस्तम्। तथा, बृहत्-विस्तीर्णम्।

सन्धयो निगूढाः-अन्तर्गताः, दृढाः-अत्रुटनशीलाः।

धीरः-अकृपणः। स्वरः-शब्दः। अनुनादी-घण्टादिवदनुरणनन्यायेन।

वर्णः स्निग्धः-अरूक्षः। स्थिरा प्रभा-कान्तिः, यस्य स एवं प्रशस्तः।

स्वभाजं स्थिरं सत्त्वमविकारि विपत्स्वपि॥ ११४॥

सत्त्वं स्वभावाज्जातं स्वभवजम्,-अनाहार्यं प्राकृतमबाह्यहेतुजं न मद्यादिहेतुजम्। स्थिरं-अहार्यम्। अत एव विपत्स्वप्यविकारि-अक्षोभि। अपिशब्दात् किमुत सम्पत्सु न स्यादेवंविधं सत्त्वं स्वभावजमहार्यं च ?।

उत्तरोत्तरसुक्षेत्रं वपुर्गर्भादिनीरुजम्।
आयामज्ञानविज्ञानैर्वर्द्धमानं शनैः शुभम्॥११५॥

क्षेत्रमिव क्षेत्रम्, शोभनं क्षेत्रं सुक्षेत्रम्। वपुः-शरीरम्। तस्य यथावत्प्रशस्तं प्रमाणलक्षणं "स्वं स्वं हस्तत्रयं सार्द्धं" इत्यादिग्रन्थोक्तम्। तथा, तदवयवानां ललाटादीनां यथावत्प्रशस्तं गुणलक्षणं "ललाटमुन्नतं" (श्लो.१०८) इत्यादिग्रन्थोक्तम्। तथा, प्रशस्तं सत्त्वलक्षणं "स्वभावजंस्थिरं" इत्यादिग्रन्थोक्तम्। उत्तरोत्तरं सुक्षेत्रं यस्मिन्वपुषि तदुर्रोत्तरसुक्षेत्रं प्रशस्तलक्षणभूमिकं वपुः शुभमित्यत्र योज्यम्। एतदुक्तं भवति,-योथोक्तं प्रमाणं सुक्षेत्रं वपुः शुभम्, ततोऽपि यथोक्तलक्षणललाताद्यवयवं सुक्षेत्रं वपुः शुभतरम्, ततोऽपि यथोक्तसत्त्वलक्षणगुणं सुक्षेत्रं वपुःशुभतमम्, इत्युत्तरोत्तरसुक्षेत्रशब्दस्यार्थः। तथा, गर्भादिनीरुजम्। गर्भ आदिर्येषां-बालल्यौवनादीनां वयोवस्थाविशेषाणां, त एवम्। गर्भदयो नीरुजा यस्य-वपुषः, तद्गर्भादिनीरुजं वपुः शुभम्। आयामेत्यादि। आयामो-दैर्घ्यम्, ज्ञानं-लौकिको व्यवहारलेशः, विज्ञानं-विशिष्टं ज्ञानं शास्त्राभ्यासादिसमुत्थितं परमार्थावबोधपर्यन्तम्, तैर्यद्वपुः शनैर्वर्द्धमानं-वृद्धिमाप्नुवन्न सहसा, तच्छुभम्।

इति सर्वगुणोपेते शरीरे शरदां शतम्।
आयुरैश्वर्यमिष्टाश्च सर्वे भावाः प्रतिष्ठिताः॥११६॥

इति-एवं प्रकारेण यथोक्तेन। सर्वगुणैरुपेते-युक्ते, शरीरे शरदां-समानां, शतमायुः-जीवितम्, तथैश्वर्यं, तथेष्टाः-शुभा ये केचिद्भावास्ते, तत्र तथाभूते देहे सर्वे प्रतिष्ठिताःव्यवस्थिता वर्षशतानुबन्धिनः।

एवं वपुषः प्रशस्तलक्षणमुक्त्वा बलप्रमाणज्ञानार्थमाह _

त्वग्रक्तादीनि सत्त्वान्तान्यग्र्याण्यष्टौ यथोत्तरम्।

बलप्रमाणज्ञानार्थं साराण्युक्तानि देहिनाम्॥ ११७॥

सारैरुपेतः सर्वैः स्यात्परं गौरवसंयुतः।

सर्वारम्भेषु चाशावान्सहिष्णुः सन्मतिः स्थिरः॥ ११८॥

त्वग्रक्तादीनि सत्त्वान्तानि देहिनां साराणि यथोत्तरमग्र्याणिउत्तरोत्तरश्रेष्ठानि, अष्टावुक्तानि। तेन त्वग्रक्तमांसमेदोस्थिमज्जशुक्रसत्त्वानीति बोध्यम्। "एवं वर्षशतमायुःप्रमाणमस्मिन् काले। सन्ति च पुनः कर्मविशेषादूनाधिकवर्षशतजीविनो मनुष्याः। तेषां यथोक्तैः प्रकृतिविशेषैरायुःप्रमाणमुपलभ्य वयस्त्रिधा विभजेत्।" (सं. शा. अ. ८) इति। किमर्थं साराण्युक्तानि ? बलप्रमाणज्ञानार्थम्। तथा च देहमात्रदर्शनादेवं भिषङ् [न] मुह्येत्,-अयमुपचयेन महाशरीरत्वाद्बलवान्, अयं कृशत्वादल्पशरीरत्वादल्पबलः, इति। तच्चोभयमप्यन्यथा दृष्टं गजसिंहे। सर्वैः-अष्टभिरेतैः, सारैर्युक्तः परं-अतिशयेन, गौरवेण संयुतः स्यात्। सर्वेत्यादि। सर्वारम्भेषु-अशेषचिकीर्षितकार्येषु, आशावान् स्यात्। अस्मात्कर्तव्यात् कृतादिदमिदं सम्पद्यत इत्याशाशब्दार्थः। तथा, सहिष्णुः-सहनशीलः। अत एव शारीरमानसैर्दुःखैर्नासावभिभूयत इति यावत्। तथा, सन्मतिः-सुधीः। तथा, स्थिरः-कर्तव्येषु स्थिरबुद्धिः। मुनिना च लक्षणमुक्तम्(च. वि. अ. ८/१४-७-१ १)-तद्यथा। त्वप्रक्तमांसमेदोऽस्थिमज्जशुक्रसत्त्वानि। तत्र स्निग्धश्लक्ष्णमृदुप्रसन्नसूक्ष्माल्पगम्भीर-सुकुमारलोमा सप्रमेव च त्वक् त्वक्साराणाम्। सा सारता सुखसौभाग्यैश्वर्योपभोगबुद्धिविद्-यारोग्य प्रहर्षान्ययुष्यानि त्वरमाचष्टे॥ कर्णाक्षिमुखजिह्वानासौष्ठपाणिपादतलनखलललाटमेहनं स्निग्धं रक्तं श्रीमद्भाजिष्णु रक्तसाराणाम्। सा सारता सुखमुदग्रतां मेधां मनस्वित्वं सौकुमार्यमनतिबलमक्लेशसहिष्णुतां चाचष्टे॥ शङ्खललाटकृकाटिकाक्षि-गण्डहनुग्रीवास्कन्धोदरवक्षःकक्षापाणिपादसन्धयः स्थिरगुरुमांसोपचिता मांससाराणाम्। सा सारता क्षमां धृतिमलौल्यं वित्तं विद्यां सुखमार्जवमारोग्यं बलमायुश्च दीर्घमाचष्टे॥ वर्णस्वरनेत्रकेशलोमनखदन्तौष्टमूत्रपूरिषेषु विशेषेण स्नेहो मेदः साराणाम्। सा सारता वित्तैश्वर्यसुखोपभोगप्रदानात्यार्जवं सुकुमारोपचारतां चाचष्टे॥ पार्ष्णिगुल्फजान्वर-ल्निजत्रुचिबुकशिरःपर्वस्थूलाः स्थूलास्थिनखदन्ताश्चास्थिसाराः। ते महोत्साहाः क्रियावन्तः क्लेशसहाः सारस्थिरशरीरा भवन्त्यायुष्मन्तश्च॥ तन्वङ्गा बलवन्तश्च स्निग्धवर्णस्वराः

स्थूलदीर्घवृत्तसन्धयश्च मज्जसाराः। ते दीर्घायुषो बलवन्तः श्रुतविज्ञानवित्तापत्यसन्मानभाजनाश्च सदा भवन्ति॥ सौम्याः सौम्यप्रेक्षिणः क्षीरपूर्णलोचना इव प्रहर्षबहुलाः स्निग्धवृत्तसारसमसंहतशिखरदशनाः प्रसन्नस्निग्धवर्णास्वरा भ्राजिष्णवो महास्फिजश्च शुक्रसाराः। ते स्त्रीप्रियोपभोगा बलवन्तः सुखाभोग्यवित्तैश्वर्यसमानाः फलभाजश्च भवन्ति॥ स्मृतिमन्तो भक्तिमन्तः कृतज्ञाः प्राज्ञाः शुचयो महोत्साहा दक्षा धीराः समरविक्रान्तयोधिनस्त्यक्तविषादाः स्ववस्थितगतिगम्भीरबुद्धिचेष्टाः कल्याणाभिनिवेशिनश्च सत्वसाराः। तेषां स्वलक्षणैरेव गुणा व्याख्याताः ॥ तत्र सर्वैः सारैरुपेताः पुरुषा भवन्त्यतिबलाः परमगौरवयुक्ताः क्लेशसहाः सर्वारम्भेष्वात्मनि जातप्रत्ययाः कल्याणाभिनिवेशिनः स्थिरसमाहितशरीराः सुसमाहितगतयः सानुनादस्निग्धगम्भीरमहास्वराः सुखैश्वर्यवित्तोपभोगसन्मानभाजो मन्दजरसो मन्दविकाराः प्रायस्तुल्यगुणविस्तीर्णापत्याश्चिरजीविनश्च भवन्ति ॥ अतो विपरीतास्त्वसाराः॥" इति। सङ्ग्रहे च प्रमाणमप्युक्तम्। यथा (शा.अ.८)-"स्वाङ्गुलैः पादाङ्गुष्ठप्रदेशिन्यौद्व्यङ्गुलायते। तिस्रोऽन्याः क्रमेणोत्तरोत्तरं पञ्चमभागहीनास्तन्नखहीना वा। चतुरङ्गुलायताः पृथक्प्रपदपादतलपार्ष्णयः षट्चचतुरङ्गुलविस्तृताः। चतुर्दशैवायामेन पादश्चतुर्दशैव परिणाहेन। तथा गुल्फौ जङ्घामध्यं च। चतुरङ्गुलोत्सेधः पादः। अष्टादशायामा जङ्घा षोडश परिणाहेन। चतुरङ्गुलं जानु षोडशाङ्गुलपरिणाहम्। ऊरु त्रिंशत्परिणाहावष्टादशायामौ। वृषणौ षडायामौ परिणाहेन चाष्टाङ्गुलौ। मेढ्रः षडङ्गुलायामोऽर्द्धपञ्चपरिणाहः। षोडशविस्तारा कटी पञ्चाशत्परिणाहा। दशाङ्गुलं बस्तिशिरः। द्वादशाङ्गुलमुदरम्। दशविस्तारे द्वादशायामे पार्श्वे। द्वादशोत्सेधं त्रिकम्। अष्टादशोत्सेधं पृष्ठम्। द्वादशकं स्तनान्तरम्। द्व्यङ्गुलः स्तनपर्यन्तः। चतुर्विंशत्यङ्गुलविशालं द्वादशोत्सेधमुरः। द्व्यङ्गुलं हृदयम्। अष्टकौ स्कन्धौ कक्षे च। षट्कावंसौ। षोडशकौ प्रबाहू। पञ्चदशकौ प्रपाणी। दशाङ्गुलौ पाणी। तत्रापि पञ्चाङ्गुला मध्यमाङ्गुलिः। ततोऽर्धाङ्गुलहीने प्रदेशिन्यनामिके। सार्धव्यङ्गुलौ कनिष्ठिकाङ्गुष्टौ। चतुरुत्सेधा द्वाविंशतिपरिणाहा शिरोधरा । द्वादशोत्सेधं चतुर्विंशतिपरिणाहमाननम्। पञ्चाङ्गुलमास्यम्। चतुरङ्गुलं पृथक् चिबुकौष्ठनासादृष्ट्यन्तरकर्णललाटम्। शङ्खगण्डाश्चतुरङ्गुलाः। त्रिभागाङ्गुलविस्तारा नासापुटमर्यादा। द्वयङ्गुलायतमङ्गुष्ठोदरविस्तृतं नेत्रम्। तत्र शुक्लात्तृतीयांशः कृष्णः। कृष्णान्नवमांशा मसूरदलमात्रा दृष्टिः। षडङ्गुलोत्सेधं द्वात्रिंशत्परिणाहं शिर इति। सर्वं पुनः शरीरमङ्गुलानि चतुरशीतिः। तदायामविस्तारसमं सममुच्यते। तत्र यथोक्तपरिमाणमिष्टम्। तथा स्नातानुलिप्तमापादानुपूर्व्या शुष्यद्वरम्। अनिष्टं हीनमधिकं वा यथोक्तप्रमाणादिति।" इति।

सत्त्वादिप्रकृतीनां तिसृणां कथं सुखदुःखानुभवः स्यात् ? इत्याह-

अनुत्सेकमदैन्यं च सुखं दुःखं च सेवते।
सत्ववांस्तप्यमानस्तु राजसो नैव तामसः॥ ११९॥

अनुत्सेकं कृत्वा-अभिमानं हित्वा, सत्त्ववान् पुरुषः सुखं सेवते-अनुभवति। तथा, अदैन्यं-कार्पण्यं हित्वा, दुःखं सेवते-अनुभवति। तप्यमानस्त्विति। तुर्व्यतिरेके भिन्नक्रमे। राजसः पुनः पुरुषः तप्यमानोऽहमेवामुना प्रकृष्टेनानन्यसाधारणेन सुखेन सुखित्येवं सुखं सेवते। अहङ्काराक्रान्तमानसोऽहमेवेदं दुःखं सोढुं शक्त इत्येवं राजसो नरो दुःखमनुभवति। तामसः पुनः पुरुषो नैव सुखं सेवते, न दुःखम्, अत्यन्तमूढत्वात्। नासौ सुखेन सुखी, न च दुःखेन दुःखी, प्राप्ततृतीयावस्थो यथा पुरुषः। एवं द्वन्द्वप्रकृतिरपि सुखं न सेवते नापि दुःखम्, अत्यन्तमूढत्वात्। समसत्त्वादिप्रकृतिस्त्वनुत्सिक्तोऽदीनः सन् सुखदुःखे सेवते।

इदानीं प्रधानफलदायि यत्प्रधानं प्रशस्तं लक्षणं वपुषः, तद्दर्शयितुमाह-

दानशीलदयासत्यब्रह्मचर्यकृतज्ञताः।
रसायनानि मैत्री च पुण्यायुर्वृद्धिकृद्गणः॥ १२०॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचिता-यामष्टाङ्गहृदयसंहितायां द्वितीये शारीरस्थानेऽङ्गविभागो नाम तृतीयोऽध्यायः॥ ३॥

दानं-धनादित्यागः, तच्छीलयति-अभ्यस्यति दानशीलः। "शीलिकामि" इत्यादिना णः। दया-दीनेष्वभ्युपपत्तिः। मैत्री-सर्वसत्त्वानामात्मभावनम्। न केवलं पूर्वोक्तं (श्लो-१०६)-"स्वं स्वं हस्तत्रयं" इत्यादि "वर्द्धमानं शनैः" इत्येतत्पर्यन्तं यल्लक्षणं, तच्छरीरस्यायुर्वृद्ध्यादिहेतुः। यावदयं दानशीलादिगणो मैत्र्यवसानः पुण्यायुर्वृद्धिकृत्। दानादयश्च यथासम्भवं केचित्पुण्यकृतः, केचिदायुर्वृद्धिकृतः, केचिदुभयकृतश्च। अन्येभ्यश्च महापुरुषलक्षणेभ्योऽस्यैव गणस्य ज्यायस्त्वं प्रतिपादयता शास्त्रकृताऽध्यायावसाने ग्रन्थस्यास्य निर्देशः कृत इति।

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टाङ्गहृदय-टीकायां सर्वाङ्गसुन्दरा-ख्यायां द्वितीये शारीरस्थानेऽङ्गविभागो नाम तृतीयोऽध्यायः समाप्तः॥३॥

****

चतुर्थोऽध्यायः।

अङ्गविभागादन्तरं मर्मविभागं शारीरं प्रारभ्यते। मर्मणामङ्गाश्रितत्वात्। यतो मर्माण्यङ्गप्रत्यङ्गसमाश्रितानि, अतस्तत्रैव व्याख्यातुं युक्तानि, बहुवक्तव्यत्वात्पृथगुच्यन्ते। तस्मादस्यैवाध्यायस्यारम्भो युक्त इत्याह-

अथातो मर्मविभागं शारीरं व्याख्यास्यामः।

इति ह स्माहुरात्रेयादयो महर्षयः।

(गद्यसूत्रे॥२॥)

म्रियतेऽस्मिन्नङ्ग उपहत इति मर्म। विभजनं-विभागः, मर्मणां विभागो मर्मविभागः। सोऽस्मिन्नध्यायेऽस्तीति मर्मविभागः। अर्शआदित्वादच्। शारीरस्थान प्रतिबद्धत्वाच्च शारीरः। शेषं पूर्ववत्।

सुखग्रहणाद्यर्थं च पूर्वं मर्मणां सङ्ख्यां वक्तुमाह-

सप्तोत्तरं मर्मशतम्

सप्तोत्तराणि-अधिकानि, यस्मिन्-शते, तदेवम्।

तेषामेकादशादिशेत्।

पृथक्सक्ष्णोस्तथा बाह्वोस्त्रीणि कोष्ठे नवोरसि॥ १॥

पृष्ठे चतुर्दशोर्ध्वं तु जत्रोस्त्रिंशच्च सप्त च।

तेषां-मर्मणां मध्ये, पृथक्-प्रत्येकं कृत्वा, सक्ष्णोर्द्वयोर्बाह्वोश्च द्वयोरेकादशादिशेत्, एवं चतुश्चत्वारिंशन्मर्माणि शाकासु विद्यात्। कोष्ठे-जठरे, त्रीणि मर्माणि। उरसि-वक्षसि, नवसङ्ख्यानि। पृष्ठे चतुर्दश। जत्रोरूर्ध्वं-जत्रुण उपरिष्टात्, त्रिंशत्तथा सप्त, एवं सप्तत्रिंशदित्यर्थः। जत्रोरिति पुंस्त्वमत्र चिन्त्यम्। अथवा 'अनित्यमागमशासनम्' इत्यत्र नुम् न कृतः।

इदानीमेषां मर्मणामापादतलान्मस्तकं यावद्विशिष्टदेशसमाश्रयेण विशिष्टसंज्ञान्तराणि विशिष्टकर्माणि मर्माणि दर्शयितुमाह-

मध्ये पादतलस्याहुरभितो मध्यमाङ्गुलिम्॥ २॥

तलहृन्नाम रुजया तत्र विद्धस्य पञ्चता।

पादतलस्य मध्ये-मध्यप्रदेशे, मध्यमाङ्गुलिमभितो-मध्यमाङ्गुलेः पादसम्बन्धिन्या आभिमुख्येन, यत्पादतलं-पादपृष्ठं, तत्र तलहृन्नाम मर्माहुः, पूर्वाचार्या इति शेषः।

मध्यमाङ्गुलिमिति "आबितः [परितः समयानिकषाहाप्रतियोगेऽपि" इति] शब्दप्रयोगे द्वितीया। तत्र-तस्मिन्, विद्धस्य-आहतस्य, पञ्चता-मरणं, भवति। कया? रुजया,-वेदनया।

अङ्गुष्ठाङ्गुलिमध्यस्थं क्षिप्रमाक्षेपमारणम्॥३॥

अङ्गुष्ठश्चाङ्गुलिश्च, तयोर्मध्यस्थं-अङ्गुष्ठाङ्गुलिमध्यस्थितं, क्षिप्रं नाम मर्म। तद्विद्धमाक्षेपमारणं-आक्षेपकाख्येन वातव्याधिना मारयति।

तस्योर्ध्वं द्यङ्गुले कूर्चः पादभ्रमणकम्पकृत्।

तस्योर्ध्वं-तस्य क्षिप्राख्यस्य मर्मण उपरिष्टात्, द्यङ्गुले-द्यङ्गुलं विमुच्य, कूर्चौ नाम मर्म। तद्विद्धं पादस्य भ्रमणं कम्पं च करोति।

गुल्फसन्धेरधः कूर्चशिरःशोफरुजाकरम्॥४॥

गुल्फसन्धेरधः कूर्चशिरो नाम मर्म। तद्विद्धं शोफरुजाकरम्।

जङ्घाचरणयोः सन्धौ गुल्फो रुक्स्तम्भमान्द्यकृत्।

जङ्घाचरणयोः सन्धौ-सन्धिप्रदेशे, गुल्फो नाम मर्म। तद्विद्धं रुक् च स्तम्भश्च मान्द्यं च, तानि करोति। स्तम्भः स्तब्धत्वमिवाङ्गस्य।

जङ्घान्तरे त्विन्द्रबस्तिर्मारयत्यसृजः क्षयात्॥५॥

जङ्घन्तरे-जङ्घामध्ये पार्ष्णिप्रभृतिद्वादशभिरङ्गुलैः, इन्द्रबस्तिर्नाम मर्म। तद्विद्धं रक्तक्षयान्मारयति, नान्यथा। तस्माद्रक्तस्तम्भने यतितव्यमिति प्रतिपादनार्थमसृक्क्षयादिति

हेतुरुपन्यस्तः। एष एव न्यायोऽन्यत्राप्यनुसर्तव्यः। तेन यत्र यद्धेतुकं मारणादिकं कर्म व्यधे कथितं, तत्र तच्चिकित्सायां यतितव्यमिति।

जङ्घोर्वोः सङ्गमे जानु खञ्जता तत्र जीवतः।

जङ्घोर्वोः सङ्गमे-सन्धौ, जानुनाम मर्म। तत्र-जानुनि विद्धे, पुरुषो म्रियत एव। अथ जीवति ततोऽस्य जीवतः पुंसः खञ्जता स्यादिति। अर्थात् प्रायेण मरणं पुरुषस्येति बोधयति।

जानुनस्त्र्यङ्गुलादूर्ध्वमाण्यूस्तम्भशोफकृत्॥६॥

जानुनः-जानुसन्धेः, त्र्यङ्गुलादूर्ध्वमाणीनाम मर्म। तद्विद्धमूरुस्तम्भशोफकरम्।

उर्व्यूरुमध्ये तद्वेधात्सक्थिशोषोऽस्रसङ्क्षयात्।

उर्वी नाम मर्म ऊरुमध्ये। तद्वेधात्-तदभिघातात्, सक्थिशोषः-ऊरुकार्श्यम्। सक्थिशोषोऽस्रसङ्क्षयात्,स्यात् नान्यथा व्यधे सत्यपि।

ऊरुमूले लोहिताक्षं हन्ति पक्षमसृक्क्षयात्॥७॥

ऊरुमूले- उर्व्यास्तूर्ध्वं वङ्क्षणसन्धेरधस्ताल्लोहिताक्षं नाम मर्म। तद्विद्धं पक्षं हत्यसृक्क्षयात् व्यधे सत्यपि।

मुष्कवङ्क्षणयोर्मध्ये विटपं षण्ढताकरम्।

मुष्कवङ्क्षणयोर्मध्ये विटपं नाम मर्म। तद्विद्धं पुंसः षण्ढताकरं-निरपत्यताकरम्।

इति सक्थ्नोस्तथा बाह्वोर्मणिबन्धोऽत्र गुल्फवत्॥८॥

कूर्परं जानुवत्कौण्यं तयोर्विटपवत्पुनः।

कक्षाक्षमध्ये कक्षाधृक् कुणित्वं तत्र जायते॥९॥

इति-एवमनेन प्रकारेण, सक्थ्नोर्द्वयोः प्रत्येकमेकादश मर्माणि भवन्ति। तथा बाह्वोः-तेनैव प्रकारेण बाह्वोः, तलहृदादीन्येकादश मर्माणि भवन्ति। अथ किञ्चिन्मात्रमत्र विशेषमाहमणीत्यादि। अत्र-बाहुमर्मसु, गुल्फेन तुल्यो मणिबन्धः, संज्ञामात्रभेदः, जानुतुल्यं कूर्परम्। तयोः-मणिबन्धकूर्पराख्ययोर्बाहुमर्मणोः, विद्धयोः कौण्यं-पाणिपाण्यङ्गुलीकुब्जत्वम्। विटपेत्यादि। कक्षा चाक्षश्च कक्षाक्षौ, तयोर्मध्ये विटपेन तुल्यं कक्षाधृक्संज्ञं मर्म। तत्र विद्धे सति कुणित्वं-बाहुपाण्यङ्गुलिकुब्जता, जायते।

इति शाखासु मर्माणि चतुश्चत्वारिंशदुक्त्वा, अन्तराधौ कथयति _

स्थूलान्त्रबद्धः सद्योघ्नो विड्घातवमनो गुदः।

स्थूलान्त्रसूक्ष्मान्त्रभेदात् द्विधाऽन्त्रम्। तत्र स्थूलान्त्रबद्धो गुदो नाम मर्मविशेषः। स च विड्घातौ-वातवर्चसी, वमतिउद्गिरति, इति विड्घातवमनः। बाहुलकात्कर्तरि ल्युट्। स गुदः सद्यः-तत्क्षणादेव, हन्ति। सद्योघ्न इति "अमनुष्यकर्तृके च" इति ठक्। गुदशब्दस्यात्र पुंस्त्वं चिन्त्यम्, न चार्धर्चादिष्वयमस्ति।

अधुना बस्त्याख्यमाह-

मूत्राशयो धनुर्वक्रो बस्तिरल्पास्रमांसगः॥१०॥

एकाधोवदनो मध्ये कट्याः सद्यो निहन्त्यसून्।

ऋतेऽश्मरीव्रणाद्विद्धस्तत्राप्युभयतश्च सः॥११॥

मूत्रस्रावेकतो भिन्ने व्रणो रोहेच्च यत्नतः।

मूत्रस्याशय आधारो मूत्राशयो-यत्र मूत्रं तिष्ठति, स धनुर्वक्रः-चापवत् कुटिलः। अनेनास्य संस्थानमुक्तम्। स च बस्तिनाम मर्मविशेषः। अस्रं च मांसं चास्रमांसे, अल्पे अस्रमांसे गच्छति। "अन्येभ्योऽपि दृश्यते" इति ङः। तत्रास्थो न बहुरक्तमांसप्रदेश इत्यर्थः। तथा, एकमधोवदनं यस्यासावेकाधोवदनः। कट्या मध्य इति स्थाननिर्देशः। कट्या मध्यप्रदेशेऽसाववतिष्ठते। स विद्धः सद्यः-तत्क्षणादेव, असून्-प्राणान्, निहन्ति। ऋतेऽश्मरीव्रणात्-अश्मर्याहरणार्थं यो व्रणः क्रियते तं व्रणं वर्जयित्वा। तत्रापि-अश्मरीव्रणे, उभयतः-उभयपार्श्वतश्च, स विद्धस्तदाऽसौ सद्योऽसून्निहन्ति। तस्मिन् बस्तावेक [तः-एक]पार्श्वतो, भिन्ने-विद्धे सति, मूत्रस्रावी व्रणः स्यात्। स च यत्नतः-आदरेणोपक्रान्तो, रोहति नान्यथा।

देहामपक्वस्थानानां मध्ये सर्वसिराश्रयः॥१२॥

नाभिः सोऽपि हि सद्योघ्नो

आमं च पक्वं चामपक्वे, स्थानं च स्थानं च स्थाने, आमपक्वयोः स्थाने आमपक्वस्थाने, देहश्चामपक्वस्थाने च देहामपक्वस्थानानि, तेषां मध्ये। तत्रैकत्वाद्देहस्य देहमध्यप्रदेशे, तथोभयोरामपक्वाशययोर्मध्ये-अन्तराले, नाभिर्नाम मर्म। स सर्वासां सिराणां-सकलशरीरगानां आश्रयः-आधारः। सोऽपि हि सद्योघ्नः। अपिः समुच्चये। हिर्यस्मादर्थे। न केवलं गुदबस्ती सद्योघ्नौ यावन्नाभिरपि विद्धः सद्योघ्नः। नाभिशब्दस्य पुंस्तवं चिन्त्यम्।

द्वारमामाशयस्य च।

सत्वादिधाम हृदयम् स्तनोरः कोष्ठमध्यगम्॥१३॥

हृदयं नाम यन्मर्म तदपि सद्योघ्नम्। तच्चामाशयस्य द्वारंमुखम्। तेन हि द्वारेणान्नपानमामाशये प्रविशति। तच्च सत्वादीनां-सत्वरजस्तमसां, तथा विज्ञानस्य-इन्द्रियाणां चार्थपञ्चकस्य, तथाऽऽत्मनः-चेतसः, धाम-स्थानम्। तच्च स्तनोरः कोष्ठमध्यगम्। स्तनौ

चोरश्च कोष्ठश्च स्तनोरःकोष्ठं, तस्य मध्यं तत्र गच्छति-स्थितिं बध्नाति, कोष्ठवक्षसोः स्तनयोश्च मध्ये स्थितमित्यर्थः।

स्तनरोहितमूलाख्ये द्वयङ्गुले स्तनयोर्वदेत्।

ऊर्ध्वाधोऽस्रकफापूर्णकोष्ठो नश्येत्तयोःक्रमात्॥ १४॥

स्तनरोहितं च मूलं च प्रकृतत्वात्स्तनस्यैव, ते। स्तनरोहितस्तनमूले आख्ये-संज्ञे, ययोस्ते स्तनरोहितमूलाख्ये द्वे मर्मणी वदेत्। क्व प्रदेशे? स्तनयोः। क्रमादिति वक्ष्यमाणमिहापि सम्बध्यते। तेन स्तनयोरूर्ध्वं द्वयङ्गुले स्तनरोहिते। स्तनयोरधो द्वयङ्गुले स्तनमूले। तयोः-स्तनरोहितस्तनमूलाख्ययोर्मर्मणोर्विद्धयोः, पुरुशोऽस्रकफापूर्णकोष्ठः क्रमात्-यथाक्रमं, नश्येत्। तेन स्तनरोहिते विद्धे सत्यसृजा पूर्णकोष्ठे नरो नश्येत्, स्तनमूले विद्धे कफेन पूर्णकोष्ठो नश्येत्।

अपस्तम्भावुरःपार्श्वे नाड्यावनिलवाहिनी।

रक्तेन पूर्णकोष्ठोऽत्र श्वासात्कासाच्च नश्यति॥ १५॥

उरसः पार्श्वे द्वे नाड्यावपस्तम्भाख्ये मर्मणी। अनिलवाहिनी-वातवहे। अत्र मर्मद्वये विद्धे रक्तेन पूर्णकोष्ठः श्वासकासाभ्यां विपद्यते।

पृष्ठवंशोरसोर्मध्ये तयोरेव च पार्श्वयोः।

अधोंऽसकूटयोर्विद्यादपालापाख्यमर्मणी॥ १६॥

तयोः कोष्ठेऽसृजा पूर्णे नश्येद्यातेन पूयताम्।

पृष्ठवंशस्य तथोरसः, अनयोर्मध्ये-अन्तराले, तयोरेव चपृष्टोरसोः, ये पार्श्वे, तयोरुपरिभागयोरंसकूटयोरधः, अपालापाख्ये द्वे मर्मणी विद्यात्। तयोर्विद्धयो रक्तेन कोष्ठे पूर्णे, पूयतां यातेन-गतेन, लोहितेन नश्येत्। यावद्रक्तं पूयतां न यातं तावज्जीवति। न तु रक्तकोष्ठपूरणमात्रादेव म्रियत इति भावः।

इदानीं पृष्ठे वक्ति-

पार्श्वयोः पृष्ठवंशस्य श्रोणीकर्णौ प्रति स्थिते॥ १७॥

वंशाश्रिते स्फिजोरूर्ध्वं कटीकतरुणो स्मृते।

तत्र रक्तक्षयात्पाण्डुर्हीनरूपो विनश्यति॥ १८॥

पृष्ठवंशस्य पार्श्वयोः-उभयतः, प्रतिश्रोणीकर्णौ स्थिते। वंशाश्रिते-वंशप्रतिवद्धे, स्फिजोरूर्ध्वं-उपरिष्टात्, द्वेऽस्थिनी कटीकतरुणे-एतत्संज्ञे द्वे मर्मणी, स्मृते-उक्ते। तत्र-तस्मिन्मर्मद्वये विद्धे, रक्तक्ष्यात्पाण्डुर्हीनरूपो-विगतकान्तिः सन्, नरो विनश्यति।

पृष्ठवंशं ह्युभयतो यौ सन्धी कटीपार्श्वयोः।

जघनस्य बहिर्भागे मर्मणी तौ कुकुन्दरौ॥ १९॥

चेष्टाहानिरघःकाये स्पर्शाज्ञानं च तद्व्यधात्।

पृष्ठवंशस्योभयोः कटिपार्श्वयोर्यौ सन्धी जघनस्य बहिर्भागेनान्तः, तौ कुकुन्दरौ निम्नाकारौ सन्धिममर्मणी। तद्व्यधात्-तयोर्व्यधात्, अधःशरीरे चेष्टाहानिः-गमनाकुञ्चनप्रसारणादावधःकायोऽशक्तः सम्पद्यत इत्यर्थः। तथा, स्पर्शाज्ञानं-स्पर्शासंवित्तिर्भवति। पृष्ठवंशमुभयत इति "उभसर्वतसोः" इत्यादिनाद्वितीया।

पार्श्वान्तरनिबद्धौ यावुपरि श्रोणिकर्णयोः॥ २०॥

आशयच्छादनौ तौ तु नितम्बौ तरुणास्थिगौ।

अधःशरीरे शोफोऽत्र दौर्बल्यं मरणं ततः॥ २१॥

पार्श्वान्तरे-पार्श्वमध्ये, निबद्धौ-प्रतिवद्धौ लग्नौ, पार्श्वान्तरनिबद्धौ यौ, तथा श्रोणिकर्णयोरुपरि-उपरिष्टात्, मूत्रादीनां य आशयाः-अधारा बस्त्यादयः, तेषां छादनौ, नितम्बौ-नितम्बसंज्ञौ मर्मविशेषौ। तौ च तरुणास्थिगौ-तरुणसंज्ञेऽस्थि स्थितावित्यर्थः। अत्र-अस्मिन्मर्मद्वये विद्धे सति, अधःकाये शोफो भवति। तथा, दौर्बल्यं प्रकृतत्वादधःशरीर एव। दौर्बल्यं-अल्पबलत्वं स्वव्यापाराक्षमत्वम्। ततो-दौर्बल्यादनन्तरं, मरणं भवति।

पार्श्वान्तरनिबद्धौ च मध्ये जघनपार्श्वयोः।

तिर्यगूर्ध्वं च निर्दिष्टौ पार्श्वसन्धी तयोर्यधात्॥ २२॥

रक्तपूरितकोष्ठस्य शरीरान्तरसम्भवः।

पार्श्वयोरन्तरं-मध्यं, तत्र निबद्धौ-संश्लिष्टौ, सन्धी मर्मविशेषौ पार्श्वसन्धी इति निर्दिष्टौ। ततश्चैकस्मिन् पाश्वान्तर एकः सन्धिर्द्वितीयस्मिन् पार्श्वान्तरे द्वितीयः सन्धिः। क्व स्थितौ कथम्? जघनस्य पार्श्वे जघनपार्श्वे, तयोर्मध्ये तिर्यगूर्ध्वं च। एवमेकस्मिन् जघनपार्श्वमध्य एकः सन्धिर्द्वितीयस्मिन् द्वितीयः स्थित इति। तयोर्व्यधात् पुंसो रक्तपूरितकोष्ठस्य शरीरान्तरसम्भवः-अपरशरीरोत्पत्तिः, मरणमित्यर्थः।

स्तनमूलार्जवे भागे पृष्ठवंशाश्रये सिरे॥ २३॥

बृहत्यौ, तत्र विद्धस्य मरणं रक्तसङ्क्षयात्।

स्तनयोर्मूलं-स्तनमूलं तस्यार्जवे भागे-स्पष्ट उद्देशे, पृष्ठवंशाश्रये सिरे-पृष्ठवंशस्योभयपार्श्वप्रतिबद्धे सिरे, बृहत्यौ-एतत्संज्ञे मर्मणी। तत्र-मर्मद्वये, विद्धस्य मरणं भवति रक्तसङ्क्षयात्, नान्यथा।

बाहुमूलाभिसम्बद्धे पृष्ठवंशस्य पार्श्वयोः॥ २४॥

अंसयोः फलके बाहुस्वापशौषौ तयोर्व्यधात्।

बाह्वोर्मूले बाहुमूले,-यत्र बाहू प्रतिष्ठितौ। मूले हि प्रतिष्ठा, वृक्षमूलवत्। पृष्ठवंशस्य पार्श्वद्वये बाहुमूलयोराभिमुख्येन सम्बद्धे-संश्लिष्टे। के ते? अंसयोः फलके। असमासनिर्देशश्छन्दोनुरोधात्। फलकस्य च नपुंसकत्वं लोकाश्रयत्वाल्लिङ्गस्येति। अंसफलकाख्ये द्वे मर्मणी। तयोर्व्यधात् बाहुस्वापशोषौ भवतः। स्वाप इव स्वापः, यथा सुप्तस्य निश्चेतनमङ्गं भवति तथा बाहू अंसफलके विद्धे भवतः।

ग्रीवामुभयतः स्नाय्नी ग्रीवाबाहुशिरोन्तरे॥२५॥

स्कन्धांसपीठसम्बन्धावंसौ बाहुक्रियाहरौ।

ग्रीवाया उभयोः पार्श्वयोः स्नाय्नी द्वे अंसावुच्येते। क्व स्थितौ? ग्रीवाबाहुशिरोन्तरे। ग्रीवायास्तथा बाह्वोः शिरसश्च मध्ये तेषामन्तराले स्थितौ। किं प्रयोजनौ? स्कन्धेत्यादि। अंसयोः पीठ इव पीठे,-प्रतिष्ठाने, यत्रांसौ तिष्ठतः। स्कन्धे चांसपीठे च, तेषां सम्बन्धः-प्रयोजनं, ययोस्तावेवांसौ विद्धौ बाह्वोः क्रिया-आकुञ्चनप्रसारणादिका, तां हरतः, तौ बाहुक्रियाहरौ।

कण्ठनाडीमुभयतः सिरा हनुसमाश्रिताः॥२६॥

चतस्रस्तासु नीले द्वे मन्ये द्वे मर्मणी स्मृते।

स्वरप्रणाशवकृत्यं रसाज्ञानं च तद्व्यधे॥२७॥

कण्ठनाड्याः पार्श्वयोर्द्वयोः सिरा याश्चतस्रो हन्वोः समाश्रिताः, तासु मध्ये द्वे सिरे नीले नाम द्वे मर्मणी, मन्ये नाम द्वे मर्मणि स्मृते, तन्त्रकृद्भिरिति शेषः। तासां व्यधस्तद्वयधः, तस्मिन् तद्व्यधे स्वरप्रणाशादयो जायन्ते। स्वरस्य प्रणाशः स्वरप्राणाशः,-स्वरहानिः। अथवा वैकृत्यम्, तच्च प्रकृत्त्वात्स्वरस्यैव, स्वरभावान्यथात्वमित्यर्थः। रसाज्ञानं-रसानवबोधः।

कण्ठनाडीमुभयतो जिह्वानासागताः सिराः।

पृथक् चतस्रस्ताः सद्यो घ्नन्त्यसून्मातृकाह्वयाः॥२८॥

कण्ठनाड्या उभयपार्श्वयोः सिरा जिह्वागतास्तथा नासागताः पृथक्-प्रत्येकं, एकस्मिन् पार्श्वे चतस्रः द्वितीये पार्श्वे चतस्रः। ता मातृकाह्वयाः-मातृकासंज्ञाः, विद्धाः सद्योऽसून् घ्नन्ति। एतानि मातृकाख्यानि सिरामर्माणि।

कृकाटिके शिरोग्रीवासन्धौ, तत्र चलं शिरः।

शिरश्च ग्रीवा च, तयोः सन्धाने यौ सन्धी पार्श्वद्वये कृकाटिकाख्ये ते द्वे मर्मणी। तत्र-तस्मिन्मर्मद्वये विद्धे, चलं-सकम्पं, शिरो भवति।

अधस्तात्कर्णयोर्निम्ने विधुरे श्रुतिहारिणी॥२९॥

अधस्तात्कर्णयोः-कर्णपृष्ठयोरधो, निम्ने-नोन्नते, विधुराख्ये द्वे मर्मणी। ते च विद्धे सती श्रुतिं-शब्दश्रवणं, हरतः, श्रुतिहारिणी।

फणावुभयतो घ्राणमार्गं श्रोत्रपथानुगौ।
अन्तर्गलस्थितौ वेधाद्गन्धविज्ञानहारिणौ॥३०॥

फणौ नाम मर्मविशेषौ घ्राणमार्गस्योभयोः पार्श्वयोः श्रोत्रपथानुगौ-श्रोत्रमार्गप्राप्तौ। अन्तर्गलस्थितौ-गलाभ्यन्तरे स्थितौ। फणाविव संस्थानं रूपमनयोः फणाविति नाम। तौ वेधाद्गन्ध विज्ञानं-गन्धोपलब्धिः, तद्धरतस्तौ गन्धविज्ञानहारिणौ।

नेत्रयोर्बाह्यतोऽपाङ्गौ भ्रुवोः पुच्छान्तयोरधः।
तथोपरि भ्रुवोर्निम्नावावर्तावान्व्यमेषु तु॥३१॥

नेत्रेयोर्द्वयोर्बाह्यतः-बहिर्भागे, भ्रुवोः पुच्छान्तयोः-अवसानयोः, अधः, अपाङ्गौ नाम मर्मविशेषौ प्रसिद्धावेव। तथोपरिति तेनैवापाङ्गोद्दिष्टेन न्यायेन भ्रुवोः पुच्छान्तयोरुपरि निम्नावावर्तसंज्ञौ। एषु तु-अपाङ्गावर्ताख्येषु चतुर्षु, विद्धस्य नरस्यान्ध्यं भवति।

अनुकर्णं ललाटान्ते शङ्खौ सद्योविनाशनौ।

अत्रापि भ्रुवोः पुच्छान्तयोरुपति ललाटावसानेऽनुकर्णंकर्णसमीपे, शङ्खौ मर्मविशेषौ। तौ विद्धौ पुरुषस्य सद्योविनाशनौ भवतः।

केशान्ते शङ्खयोरूर्ध्वमुत्क्षेपौ, स्थपनी पुनः॥३२॥

भ्रुवोर्मध्ये, त्रयेऽप्यत्र शल्ये जीवेदनुद्धृते।

स्वयं वा पतिते पाकात्सद्यो नश्यति तूद्धृते॥३३॥

केशावसाने शङ्खयोरूर्ध्व-उपरि, उत्क्षेपौ मर्मणी। स्थपनी पुनर्मर्म भ्रुवोर्मध्ये। त्रयेऽप्यत्र-अस्मिन् मर्मत्रये द्वावुत्क्षेपावेका स्थपनी एवंभूते, विद्धे पुरुषोऽनुद्धृते शल्ये जीवेत्। कालान्तरेण पाकात्-पाकेन हेतुना, स्वयं वा पतिते शल्ये सति,-न तूद्धरणहेतुना, जीवेत् पुरुषः। सद्य इत्यादि। उद्धृते तु शल्ये सद्य एव नरो नश्यति, वायुकोपादिति भावः।

जिह्वाक्षिनासिकाश्रोत्रखचतुष्टयसङ्गमे।

तालुन्यास्यानि चत्वारि स्रोतसां, तेषु मर्मसु॥३४॥

विद्धः शृङ्गाटकाख्येषु सद्यस्त्यजति जीवितम्।

जिह्वा चाक्षिणी च नासिका च श्रोत्रे च तदेवम्। तस्य खानि, तेषां चतुष्टयं-चत्वारि स्रोतांसि, तेषां सङ्गमः-सन्निपातः, तस्मिंस्तालुनि-यत्र जिह्वादीनां तर्पणानि स्रोतांसि सन्निपत्यावतिष्ठन्ते, जिह्वादिस्रोतसां चत्वार्यास्यानि शृङ्गाटकाख्यानि। तेषु मर्मसु विद्धः पुरुषः सद्यस्त्यजति जीवितं-विद्धमात्र एव प्राणैर्वियुज्यते।

कपाले सन्धयः पञ्च सीमन्तास्तिर्यगूर्ध्वगाः॥३५॥

भ्रमोन्मादमनोनाशैस्तेषु विद्धेषु नश्यति।

शिरः सम्बन्धिनः पञ्च सन्धयः। पञ्चानां कपालखण्डानां संश्लेषा ये शिरस्यवतिष्ठन्ते तिर्यगूर्ध्वगाः, त एव सीमन्ताख्या मर्मविशेषाः। तेषु-सीमन्ताख्येषु, विद्धेषु भ्रमेण तथोन्मादेन तथा मनोनाशेन-चित्तविस्मृत्या च, नश्यति।

आन्तरो मस्तकस्योर्ध्वं सिरासन्धिसमागमः॥३६॥

रोमावर्तोऽधिपो नाम मर्म सद्यो हरत्यसून्।

मस्तकस्याभ्यन्तरतो यः स्थितः, तथोर्ध्वं-प्रकृतत्वान्मस्तकस्यैवोपरि, सिरासन्धि-समागमः-सिरासन्धीनां सन्निपातो, रोमावर्तलक्षणः सोऽधिपो नाम मर्मविशेषः। मर्मणामधिपो यथार्थनामा, तदायत्तानि हि सर्वाणि मर्माणीत्यर्थः। सोऽधिपो विद्धो नरस्य सद्योऽसून् हरति-पुरुषं मारयतीत्यर्थः।

इति सप्तोत्तरस्य मर्मशतस्य लक्षणान्युक्त्वा, सामान्येन यन्मर्मलक्षणं तदाख्यातुमाह-

विषमं स्पन्दनं यत्र पीडिते रुक् च मर्म तत्॥३७॥

यत्र-यस्मिन् देहदेशे, विषमं स्पन्दनं-स्फुरणं, तन्मर्म। यत्र च देहदेशे पीडिते सति रुक् च विषमा भवति, तच्च मर्म। अत्रापि विषममिति सम्बध्यते। विषमं च विषमा च विषमम्, "नपुंसकमनपुंसकेनैकवच्च" इति नपुंसकशेषः। तदेवं मर्मलक्षणं द्विधा मन्तव्यम्,-कस्यचिन्मर्मणः सिराधमन्यादिकस्य विषमं स्पन्दनं प्रायो लक्षणम्, मांसास्थिजातीयस्य मर्मणः पीडनात् प्रायः पीडोत्पत्तिर्लक्षणमिति। सङ्ग्रहे च मर्मविद्धस्य लक्षणमुक्तम्। यथा (शा. अ. ७)-"देहप्रसुप्तिर्गुरुता सम्मोहः शीतकामिता। स्वेदो मूर्च्छा वमिः श्वासो मर्मविद्धस्य लक्षणम्॥" इति। मरणकारित्वान्मर्म, मरणासदृशदुःखदायित्वाद्वा।

इदानीं मर्मणां सुप्रभेदं लक्षणं षड्विकारमाह-

मांसास्थिस्नायुधमनीसिरासन्धिसमागमः।
स्यान्मर्मेति च तेनात्र सुतरां जीवितं स्थितम्॥३८॥

मांसादीनां सन्ध्यन्तानां स्वजात्यपेक्षो यः समागमः-सन्निपातः, स मर्माख्यः, तन्मर्मेति तस्यैव नाम। तदेवं मांसपेशीसमागमो मांसमर्म, अस्थ्नां समागमोऽस्थिमर्म, स्नायूनां समागमः स्नायुमर्म, धमनीनां समागमो धमनीमर्म, सिराणां समागमः सिरामर्म, सन्धीनां समागमः सन्धिमर्मेति। यतो मांसादीनां यः समागमः स एव मर्मेत्युच्यते, तेन हेतुना, अत्र सुतरां जीवितं स्थितं-प्राणा व्यवस्थिताः।

ननु, यदि मांसादीनां समागमो मर्मेत्यभिधीयते, तदानीमनेकसङ्ख्याकानि मर्माणि शरीरे सम्भव्येरन्। मांसपेश्यादिभावानामनेकसङ्ख्याश्रयत्वात्। तथा च,-मांसपेशीशतानि पञ्च पुंसामुक्तानि स्त्रीणां तु विंशत्यधिकानि (हृ. शा. अ. ३/१ ७)। एवमस्थ्यादीन्यप्यनेकान्युक्तानि। ततश्च मर्मणामसङ्ख्येयत्वं प्राप्नोति। एवं च "सप्तोत्तरं मर्मशतम्" (श्लो १) इति विरुध्यत इत्याह-

बाहुल्येन तु निर्देशः षोढैवं मर्मकल्पना।
प्राणायतनसामान्यदैक्यं वा मर्मणां मतम्॥३९॥

सप्तोत्तरमेव मर्मणां शतमित्येव न। किं तर्हि ? पूर्वोक्तेन न्यायेन बहूनि मर्माणि। "सप्तोत्तरं मर्मशतम्" इत्ययं तु यो निर्देशः स बाहुल्येन-भूयसा, येषां मर्मणां मर्मत्वेन प्रसिद्धिस्तद्विषय एव। एवं-अनेन प्रकारेण मांसास्थ्यादीनां समागमो मर्मेति, मर्मणां-षोढा-षड्विधा, कल्पना भवति। कल्पनाशब्देनैतत्प्रति पादयति,-तदेवं मनुष्यस्य प्रसिद्धितो जीवितधामत्वेन मर्मणां कल्पना-निरूपणा। प्राणेत्यादि। अथवा न मर्मणां षोढा कल्पना। किं

तर्हि ? प्राणायतनसामान्यात्-जीवितस्याधिष्ठानमित्येवंलक्षणात्, ऐक्यं-एकत्वं, मर्मणां मतं-न षड्वम्। एवमेकैव मर्मकल्पना। एवं सङ्क्षेपविस्तरकौशलं मर्मसु दर्शितम्।

मांसादीनां सन्ध्यन्तानां यथास्वं प्रतिनियतनि मर्माणि सङ्ख्याऽभिधातुमाह-

मांसजानि दशेन्द्राख्यतलहृत्स्तनरोहिताः।

जङ्घयोरिन्द्राख्ये द्वे मर्मणी, बाह्वोर्द्वे एव, तलहृदाख्यानि चत्वारि-पादयोर्द्वे हस्तयोर्द्वे इति, स्तनरोहिते द्वे-प्रत्येकं स्तने एकैकम्, एवं दश मंसजानि।

शङ्खौ कटीकतरुणे नितम्बावंसयोः फले॥४०॥

अस्थ्यष्टौ

अस्थ्यष्टौ मर्माणि। शङ्खौ द्वे मर्मणी, कटीकतरुणे द्वे, नितम्बौ द्वे, अंसयोः फलके द्वे, इत्येवमष्टौ मर्माणि।

स्नावमर्माणि त्रयोविंशतिराणयः।

कूर्चकूर्चशिरोऽपाङ्गक्षिप्रोत्क्षेपांसबस्तयः॥४१॥

स्नावमर्माणि त्रयोविंशतिः। कथम् ? आणयश्चत्वारि-प्रत्येकमूरुमध्ये एकैकं बाह्वोः प्रत्येकमेकैकम्, एवं चत्वार्याणयः कूर्चाख्यानि चत्वारि-हस्तयोर्द्वे पादयोर्द्वे। कूर्चशिरःसंज्ञानि चत्वारि-पादयोर्द्वे हस्तयोर्द्वे इति चत्वारि। अपाङ्गाख्ये द्वे-"नेत्रयोर्बाह्यतः (श्लो.३१) इत्यादिना निर्दिष्टे द्वे। क्षिप्राख्यानि चत्वारि-"अङ्गुष्ठाङ्गुलिमध्यस्थं क्षिप्रं" (श्लो.३) इति, तच्च पादद्वये द्विविधं हस्तद्वये च। उत्क्षोपौद्वौ-"केशान्ते शङ्खयोरूर्ध्वमुत्क्षेपौ" (श्लो.३२) इति। अंसाख्ये द्वे-"स्कन्धांसपीठसम्बन्धावंसौ" (श्लो २६) इति। बस्तिरेको-"मूत्राशयो" (श्लो.१ ०) इत्यादिनोक्तः। एवं स्नावमर्माणि त्रयोविंशतिः ।

गुदापस्तम्भविधुरश्रृङ्गाटानि नवादिशेत्।

मर्माणि धमनीस्थानि

गुदः-स्थूलान्त्रबद्ध एकः। अपस्तम्भाख्ये द्वे-"अपस्तम्भाबुरःपार्श्वे नाड्यावनिलवाहिनी।" (श्लो.१५)इति, विधुराख्ये द्वे-"अधस्तात्कर्णयोर्निम्ने विधुरे" (श्लो.२९) इति। श्रृङ्गाटकाख्यानि चत्वारि-"जिह्वाक्षिनासिका" (श्लो.३४) इत्यादिनोक्तानि। एवं धमनीस्थानि-धमन्याश्रितानि, नव मर्माणि।

सप्तत्रिंशत्सिराश्रयाः॥४२॥

बृहत्यौ मातृका नीले मन्ये कक्षाधरौ फणौ।

विटपे हृदयं नाभिः पार्श्वसन्धी स्तनाधरे॥४३॥

अपालापौ स्थपन्युर्व्यश्चतस्रो लोहितानि च।

सिराश्रया मर्मविशेषाः सप्तत्रिंशत्। कथम्? इत्याह-बृहत्यावित्यादि। बृहत्यौ द्वे-"स्तनमूलार्जवे भागे" (श्लो २३) इत्यादिनोक्ते। मातृकाख्यानि-"कण्ठनाडीमुभयतो जिह्वानासागताः" (श्लो.२८) इत्यादिनोक्तान्यष्टौ। नीलाख्ये द्वे सिरे मन्याख्ये [च] द्वे-"कण्ठनाडीमुभयतः सिराहनुसमाश्रिताः। चतस्रः (श्लो.२६) इत्यादिनोक्तानि। कक्षाधरौ द्वौ-यथोक्तम् (श्लो.९) "कक्षाक्षमध्ये कक्षाधृक्" इत्यादि। फणौ द्वौ-"फणावुभयतो" (श्लो.३०) इत्यादिना कृतलक्षणौ। विटपे द्वे-"मुष्कवङ्क्षणयोर्मध्ये (श्लो.८) प्रत्येकं सक्थ्येकम्, द्वितीयेऽप्येवम्। हृदयमेकमेव, तस्य लक्षणम् (श्लो.१३)-"द्वारमामाशयस्य च" इत्यादि। नाभिरेक एव, तल्लक्षणम् (श्लो.१२)-"देहामपक्वस्थानानां" इत्यादि। पार्श्वसन्धी द्वौ-"पार्श्वान्तरनिबद्धौ च" (श्लो.२२) इत्यादिनोक्तौ। स्तनाधरे-स्तनयोरधो, द्वे। अपालापौ द्वावेव-"पृष्ठवंशोरसोः (श्लो.१६) इत्यादिनोक्तौ। स्थपनी एकैव, तल्लक्षणम्, (श्लो.३३)-"भ्रुवोर्मध्ये" इति। उर्व्यश्चतस्रः-ऊर्वोर्द्वयोर्द्वे बाह्वोश्च, "उर्व्यूरुमध्ये" (श्लो.७) इति तस्या लक्षणम्, इति सक्थ्नोस्तथा बाह्वोः (श्लो.८) इति चातिदेशः। लोहितानीति लोहिताक्षनामानि चत्वारि, "ऊरुमूले लोहिताक्षं" सक्थिवद्बाह्वोः" (श्लो.७-८) इति तल्लक्षणम्।

सम्प्रति सन्धिमर्माण्याह-

सन्धौ विंशतिरावर्तौ मणिबन्धौ कुकुन्दरौ॥४४॥
सीमन्ताः कूर्परौ गुल्फौ कृकाट्यौ जानुनी पतिः।

सन्धौ विंशतिर्मर्माणि। आवर्ताख्ये द्वे, तयोर्लक्षणम् (श्लो. ३१)-"तथोपरि भ्रुवोर्निम्नावावर्तौ" इति। मणिबन्धौ द्वौ, तल्लक्षणम् (श्लो.८)-मणिबन्धोऽत्र गुल्फवत्" इति। कुकुन्दरौ द्वौ, तल्लक्षणम् (श्लो.१९)-"जघनस्य बहिर्भागे मर्मणी तौ कुकुन्दरौ।" इति। सीमन्ताख्यानि पञ्च, तल्लक्षणम् (श्लो.३५)-"कपालसन्धयः पञ्च सीमन्ताः" इति। कूर्परौ द्वौ, तल्लक्षणम् (श्लो.९)-"कूर्परं जानुवत्" इति। कूर्परशब्द उभयलिङ्गः। गुल्फौ द्वे मर्मणी, तयोर्लक्षणम् (श्लो.५)-"जङ्घाचरणयोः सन्धौ गुल्फः" इति। कृकाट्यौ द्वे, तल्लक्षणम् (श्लो.२९)-"कृकाटिके शिरोग्रीवासन्धी" इति। जानुनी द्वे, तयोर्लक्षणम् (श्लो.६)-"जङ्घोर्वोः सङ्गमे जानु" इति। पतिः-अधिपतिर्मर्मणाम्, तच्चैकम्, तल्लक्षणम् (श्लो.३६)-"आन्तरो मस्तकस्योर्ध्वं" इत्यादिनोक्तम्। एवं सप्तोत्तरं मर्मशतं मांसादिपरिकल्पनया कल्पितम्।

मांसमर्म गुदोऽन्येषां,स्नाय्नि कक्षाधरौ तथा॥४५॥
विटपौ विधुराख्ये च, शृङ्गाटानि सिरासु तु।
अपस्तम्भावपाङ्गौ च, धमनीस्थं न तैः स्मृतम्॥४६॥

अन्येषामाचार्याणं मतेन गुदो मांसमर्म-न धमनीमर्म। स्नाय्नीत्यादि। तेषामेव मतेन कक्षाधरौ स्नावाश्रितौ न तु सिराश्रयौ। विटपौ विधुराख्ये च स्नावाश्रितौ। पूर्वमतेन तु विटपौ सिराश्रितौ, विधुरे च धमन्याश्रिते। शृङ्गाटकानि चत्वार्यपि सिरास्वेव, तुरवधारणे, न तु धमनीस्थानि, अपस्तम्भौ तथापाङ्गौ च। एतद्धमनीस्थमन्यैराचर्यैर्न स्मृतम्, अपि तु स्नावा [द्या]श्रितमभिहितम्।

इदानीं मांसादिजानां मर्मणां व्यधलक्षणमाह-

विद्धेऽजस्रमसृक्स्रावो मांसधावनवत्तनुः।

पाण्डुत्वमिन्द्रियाज्ञानं मरणं चाशु मांसजे॥ ४७॥

मांसजे मर्मणि विद्धे सति,[अजस्रं] अनवरतं, असृक्स्रावो भवति

मांसधावनवत्-मांसधावनोदकेन तुल्यः। तथा, तनुः-अच्छो भवति, न बहलः। पाण्डुत्वं-पीताभत्वं शरीरस्य। इन्द्रियैः-चक्षुरादिभिः, स्वविषयाज्ञानं-अनवबोधः। मरणंचाशु-शीघ्रं, भवति। तदेवमिन्द्रबस्त्यादिमांसजमर्मव्यधे निरन्तरस्रावादिसर्वलिङ्गदर्शनानुमानेन मरणमनुमीयमानं बुध्वा वैद्यः प्रत्याख्याय चिकित्सां प्रयोजयेत्। नियतायुषां क्वचिन्मरणस्य व्यभिचारदिति।

मज्जान्वितोऽच्छो विच्छिन्नः

स्रावो रुक् चास्थिमर्मणी।

अस्थिमर्मणि-शङ्खादिके, विद्धे मज्जान्वितः स्रावः तथाऽच्छो-न घनः, विच्छिन्नो-न मांसमर्मव्यध इव निरन्तरो, भवति। रुक्केत्यनेनात्यन्तं पीडा भवतीति प्रतिपादयति। रुङ्मात्रस्य सर्वमर्मस्वपि सद्भावात्।

आयामाक्षेपकस्तम्भाः स्नावजेऽभ्यधिकं रुजा॥ ४८।

यानस्थानासनाशक्तिर्वैकल्यमथवाऽन्तकः।

स्नावजे-कूर्चा(आण्या)दिके मर्मणि, विद्धे आयामादयो भवन्ति। आक्षेपकः-आक्षेपः, स्तम्भो-यथास्वमङ्गानाम्, अतिरुजा च। तथा, यानस्थानासनाशक्तिः-यातुं स्थातुमासितुं चासामर्थ्यम्। वैकल्यं चाङ्गानाम्। अथवाऽन्तको-मरणं, भवति।

रक्तं सशब्दफेनोष्णं धमनीस्थे विचेतसः॥४९॥

धमनीस्थे-[गुदा]पस्तम्भादौ मर्मणि, विद्धे सति विचेतसो-मूर्च्छितस्य सतो, रक्तं स्रवेत्। कीदृशम्? सशब्दफेनोष्णम्। सशब्दस्यात्र प्रत्येकं सम्बन्धः।

सिरामर्मव्यधे सान्द्रमजस्रं बह्वसृक्स्रवेत्।

तत्क्षयात्तृड्भ्रमश्वासमोहहिध्माभिरन्तकः॥५०॥

सिरामर्मणो-बृहत्यादेर्व्यधे सति, असृक् सान्द्रं-घनं, अजस्रं-निरन्तरं, बहु-प्रभूतं, स्रवति। तत्क्ष्यात्-तस्यासृजः क्षयात्, तृड्भ्रमादिभिरन्तको-जीवितनाशः।

वस्तु शूकैरिवाकीर्णं रूढे च कुणिखञ्जता।

बलचेष्टाक्षयः शोषः पर्वशोफश्च सन्धिजे॥५१॥

सन्धिजेमर्मणि-आवर्तादौ, विद्धे वस्तु शूकैरिवाकीर्णं भवति। वस्तुशब्देनाधिष्ठानं विद्धदेश उच्यते। तच्छूकैः-शालियवादिसम्बन्धिभिः किंशारुभिः, व्याप्तमिव भवति। रूढे च सति तस्मिन्मर्मव्यधे कुणिता खञ्जता वा भवति। तथा बलचेष्टयोः क्षयः, तथा शोषोऽङ्गस्य, पर्वसु शोफः-श्वयथुश्च, सन्धिजे भवति।

इदानीमेषामेव मर्मणां व्यधे जीवितनाशे कालं नियनयति-

नाभिशङ्खाधिपापानहृच्छृङ्गाटकबस्तयः।

आष्टौ च मातृकाः सद्यो निघ्नत्येकान्नविंशतिः॥५२॥

सप्ताहः परमस्तेषां कालः कालस्य कर्षणे।

नाभिशङ्खादीनि मर्माण्येकान्नविंशतिः सद्यो घ्नन्ति। नाभिरेकः, शङ्खौ द्वौ, अधिप एकः, अपानोऽप्येकः, हृदेकम्, शृङ्गाटकानि चत्वारि, बस्तिरेकः, आष्टौ मातृकाः एकान्नविंशतिरेतानि सद्यःप्राणहराणी। तेषां-मर्मणां, कालस्य-मृत्योः कर्षणे-आकर्षणे, सप्ताहः परमः कालः-प्रकृष्टोऽवधिः। एकान्नविंशतिरिति न विंशतिरिति सुप्सुपेति समासः, तत एकेन न विंशतिरिति तृतीयेति योगविभागात्समासः, त त : "एकादिश्चैकस्य" इत्यादिना नञः प्रकृतिभाव एकस्यादुगागमश्च, ऊनार्थेऽत्र नञ्, एकोनविंशतिरित्यर्थः।

त्रयस्त्रिंशदपस्तम्भतलहृत्पार्श्वसन्धयः॥५३॥

कटीतरुणसीमन्तस्तनमूलेन्द्रबस्तयः।

क्षिप्रापालापवृहतीनितम्बस्तनरोहिताः॥५४॥

कालान्तरप्राणहरा मासमासार्द्धजीविताः।

त्रयस्त्रिंशदपस्तम्भादयः कालान्तरप्राणहराः। मासं मासार्द्धं वा जीवितं येषु विद्धेष्विति मासमासार्द्धजीविताः, मासेन प्राणान् हरन्ति मासार्द्धेन वेत्यर्थः। सङ्ग्रहे तूक्तम् (शा. अ. ७)-"सौम्याग्नेयत्वात्तेषां पक्षाभ्यन्तरं कालः।" इति। त्रयस्त्रिंशदिति "त्रेस्त्रयः" इति त्रयसादेशः। तत्र, अपस्तम्भौ दौ, तलहृन्ति चत्वारि, पार्श्वसन्धी द्वौ, कटीकतरुणे द्वे, सीमान्ताः पञ्च, स्तनमूले द्वे, इन्द्रवस्तयश्चत्वारो-जङ्घामध्ययोर्द्वेबाहुमध्ययोर्द्वे, क्षिप्राणि चत्वारि-हस्तयोर्द्वे पादयोर्द्वे, अपालापवृहतीनितम्बस्तनरोहिताः प्रत्येकं द्वौ द्वाविति।

उत्क्षेपौ स्थपनी त्रीणि विशल्यघ्नानि, तत्र हि॥५५॥

वायुर्मांसवसामज्जमस्तुलुङ्गानि शोषयन्।

शल्यापाये विनिर्गच्चन् श्वासात्कासाच्च हन्त्यसून्॥

उत्क्षेपौ द्वौ स्थपन्येका, इत्येतानि त्रीणि विशल्यघ्नानि। कोऽत्र हेतुः ? इत्याह-तत्र हीत्यादि। हि-यस्मात्, तत्र-व्यधे, शल्यापाये वायुर्विनिर्गच्छन्-निर्यान्, मांसादीन् शोषयन् श्वास कासाभ्यां प्राणान् हन्ति। तत्र च हेतौ शतृप्रत्यः। निर्गमेन हि हेतुना मांसादीनां शोषणं भवति।

फणावपाङ्गौ विधुरे नीले मन्ये कृकाटिके।

अंसांसफलकावर्तविटपोर्वीकुकुन्दराः॥५७॥

सजानुलोहिताक्षाणिकक्षाधृक्कूर्चकूर्पराः।

वैकल्यमिति चत्वारि चत्वारिंशच्च कुर्वते॥५८॥

हरन्ति तान्यपि प्राणान् कदाचिदभिघाततः।

फणादीनि विटपान्तानि प्रत्येकं द्वौ द्वौ, उर्व्यश्चतस्रः, कुकुन्दरौ द्वौ, जानुनी द्वे, लोहिताक्षाणि चत्वारि, आणयश्चत्वारः, कक्षाधरौ द्वौ, कूर्चाश्चत्वारो-हस्तयोर्द्वौ पादयोर्द्वौ, कूर्परौ द्वौ, इत्येवं चत्वारि चत्वारिंशच्चेति चतुश्चत्वारिंशन्मर्माणि वैकल्यमङ्गस्य कुर्वते। कदाचित्त्वभिघातात् तान्यपिचतुश्चत्वारिंशत्, प्राणान् हरन्ति।

अष्टौ कूर्चशिरोगुल्फमणिबन्धा रुजाकराः॥५९॥

अष्टौ कूर्चदयो मर्मविशेषा रुजाकराः। "अग्निवायुसोमगुणबाहुल्यात्। अग्निवायू हि विशेषेण शूलकरौ। सोमस्तु प्राणावलम्बकः (सं.शा.अ.७)।" इति नैतानि प्राणहन्तृणि। तत्र कूर्चशिरांसि हस्तपादेषु चत्वारि, गुल्फौ द्वौ, मणिबन्धौ द्वौ, इत्यष्टौ।

इदानीम् मर्मणां यथायथं प्रमाणमभिधातुमाह-

तेषां विटपकक्षाधृगुर्व्यः कूर्चशिरांसि च।

द्वादशाङ्गुलमानानि

तेषां-मर्मणां मध्ये, विटपादीनि द्वादश मर्माण्यङ्गुलमानानि-अङ्गुलप्रमाणानि।

द्व्यङ्गुले मणिबन्धने॥ ६०॥

गुल्फौ च स्तनमूले च

मणिबन्धने-मणिबन्धौ, द्व्यङ्गुलप्रमाणौ। गुल्फौ स्तनमूले च द्व्यङ्गुले प्रत्येकम्। एकश्चशब्दः समुच्चयार्थो द्वितीयः पादपूरणे।

त्र्यङ्गुलं जानुकूर्परम्।

त्र्यङ्गुलप्रमाणौ जानू कूर्परौ च।

अपानबस्तिहृन्नाभिनीलाः सीमन्तमातृकाः॥ ६१॥

कूर्चशृङ्गाटमन्याश्च त्रिंशदेकेन वर्जिताः।

आत्मपाणितलोन्मानाः

अपानबस्त्यादयस्त्रिंशदेकेन वर्जिताः एकोनत्रिंशत्, आत्मपाणितलोन्मानाः-स्वहस्ततलपरिमाणाः।

शेषाण्यर्द्धाङ्गुलं वदेत्॥ ६२॥

पञ्चाशत्षट् च मर्माणि, तिलव्रीहिसमान्यपि।

इष्टानि मर्माण्यन्येषाम्

शेषाणि षट्पञ्चाशन्मर्माणी स्वेनाङ्गुलप्रिमाणोनार्द्धाङ्गुलप्रमाणान्यादिशेत्। अन्येषां तन्त्रकृतां तिलप्रमाणानि व्रीहिप्रमाणानि वा मर्माणीष्टानि-आभिमतानि। "परमतंमप्रतिषिद्धमनुमतमेव" इत्यस्यापि ग्रन्थकृत एतदेव मतमिति बोध्यम्।

इदानीं यथा मर्माभिघाते मरणं सम्पद्यते तथा दर्शयति-

चतुर्द्धोक्ताः सिरास्तु याः॥६३॥

तर्पयन्ति वपुः कृत्स्नं ता मर्माण्याश्रितास्ततः।

तत्क्षतात्क्षतजात्यर्थप्रवृत्तेर्धातुसङ्क्षये॥६४॥

वृद्धश्चलो रुजस्तीव्राः प्रतनोति समीरयन्।

तेजस्तदुद्धूतं धत्ते तृष्णाशोषमदभ्रमान्॥६५॥

स्विन्नस्रस्तश्लथतनुं हरत्येनं ततोऽन्तकः।

याः सिराश्चतुर्द्धा उक्ताः-प्राङ्निर्दिष्टा वातपित्तकफजुष्टशुद्धरक्तवाहिन्यः सप्तसङ्ख्याः, कृत्स्नं-अशेषं, शरीरं तर्पयन्ति प्रीणयन्ति, ता मर्माण्याश्रिताः-गताः प्राप्ताः। तत्क्षतादित्यादि । यत एवं सर्वाः सिरा मर्माणि प्राप्ताः, ततः कारणात्-मर्माश्रयलक्षणात्, तत्क्षतात्-तेषां मर्मणां क्षतं तत्क्षतं, तस्मान्मर्मक्षतात्कारणात्, क्षतजस्य-रक्तस्य, अतिप्रवृत्तिः। तस्मात्क्षतजात्यर्थप्रवृत्तेः कारणात्, यो धातुसङ्क्षयः-परम्पराक्रमायातो मांसादिधात्वपचयः, तस्मिन् धातुक्षये सति यो वृद्धश्चलो-वायुः, स तीव्राः-अत्यन्तदुःखदायिनीः, रुजः-शूलविशेषान्, प्रतनोति-करोति। किं कुर्वन्? तेजः-पित्तं, समीरयन्-उदीरयन् वृद्धिं नयन्, तत्-तेजः, उद्धूतं- बृहत्सम्पन्नं, तृष्णादीन् धत्तेकरोति। ततः-अनन्तरं तृष्णादिभ्यः, एनं-पुरुषं मर्मविद्धं, अन्तको हरति। किम्भूतम्? स्विन्ना स्रस्ता श्लथा तनुर्यस्य तम्। तदयमर्थः,-मर्माभिघते रक्तवाहिनीनां सिराणां मुखविकासो जायते। तद्विकासाज्जीविताधिष्ठानस्यासृजोऽत्यर्थं या निःसृतिर्यावत्तस्य क्षयः, तत्क्षयाच्च जीवितनाशः, अश्रयाभवात्।

अधुना मर्माभिघाते चिकित्सामाह -

वर्धयेत्सन्धितो गात्रं मर्मण्यभिहते द्रुतम्॥६६॥

छेदनात्सन्धिदेशस्य सङ्कुचन्ति सिरा ह्यतः।

जीवितं प्राणिनां तत्र रक्ते तिष्ठति तिष्ठति॥६७॥

मर्मण्यभिहते सति, गात्रं-शरीरं, आश्वेव छेदयेत्। कुतः ? सन्धितः,-सन्धिप्रदेशात्। हि-यस्मात्, सन्धिदेशस्य चेदनात्सिराः सङ्कुचन्ति-संवृतमुखा भवन्ति। वर्द्धयेदिति वर्द्धछेदनादाविति चौरादिकः। अतः-सिरासङ्कोचात्कारणात्, रक्तं न बहिर्निस्सरति। तत्र रक्ते तिष्ठति-बहिरवहति सति, जीवितं तिष्ठति।

तदनेन प्रकारेण मर्माभिघातक्षतान्मरणम्, न त्वमर्माभिघातक्षतात्। अत इदमाह-

सुविक्षतोऽप्यतो जीवेदमर्मणि न मर्मणि।

प्राणघातिनि जीवेत्तु कश्चिद्वैद्यगुणेन चेत्॥६८॥

असमग्राभिघाताच्च सोऽपि वैकल्यमश्नुते।

तस्मत्क्षारविषाग्न्यादीन् यत्नान्मर्मसु वर्जयेत्॥६९॥

यतो मर्माभिघातक्षतात् प्राणी म्रियते, नान्यथा क्षतमात्रात्। अतः-अस्मात्कारणात्, सुष्ठु कृत्वा विशेषेण क्षतोऽपिपरशतैर्विद्धोऽपि, अमर्मणि विद्धो जीवेत्, न तु मर्मणी विद्धो जीवेत्। किम्भूते ? प्राणघातिनि। द्विविधं हि मर्म-प्राणघात्येकमपरं वैकल्यकरम्। तत्र प्राणघातिनि मर्मणि कुशाग्रेणापि विद्धो न जीवति। अथ पुण्यवान्नियतायुश्च प्राणघातिन्यपि मर्मणि विद्धो वैद्यगुणेनासमग्रस्य-असकलस्य, मर्मणोऽभिघाताश्च कश्चिद्यदि विद्धो जीवेत्, सोऽपि वैकल्यमश्नुते-विकलतां प्राप्य जीवतीत्यर्थः। वैद्यशब्दः प्राधान्याद्द्रव्यादिपादत्रयमुपलक्षयति। वैद्यगुणेन-पादत्रयसम्पत्त्येत्यर्थः। यतश्चैवं मर्माभिघातः सापायः प्राणोपरोधकृत्, तस्मात्कारणात् मर्मसु क्षारादीन् यत्नात्-तात्पर्येण, वर्जयेत्-परिहरेत्

अग्न्यादीनत्रादिशब्देन भल्लातकरसकपिकच्छुशूकादीनां ग्रहणम्।

मर्माभिघातः स्वल्पोऽपि प्रायशो बाधतेतराम्।

रोगा मर्माश्रयास्तद्वत्प्रक्रान्ता यत्नतोऽपि च॥७०॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां द्वितीये शारीरस्थाने मर्मविभागो नाम चतुर्थोऽध्यायः॥४॥

एवं मर्माभिघातो रक्ष्यः। यस्मान्मर्माभिघातः सुष्ठ्वतिशयेनाल्पोऽपि प्रायशो-बाहुल्येन, बाधतेतरां-अतिशयेन पीडयति। न केवलं मर्माभिघातो बाधते यावद्रोगा अपि मर्माश्रयास्तद्वद्बाधन्ते। यत्नतोऽपि-आदरेणापि, प्रक्रान्ताः-उपक्रान्ताः, इति।

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टङ्गहृदय-टीकायां सर्वाङ्गसुन्दराख्यायां द्वितीये शारीरस्थाने मर्म-विभागो नाम चतुर्थोऽध्यायः समाप्तः॥४॥

****

पञ्चमोऽध्यायः।

मर्मविभागादनन्तरं विकृतिविज्ञानीयं शरीरमारभ्यते। यतो मर्मविभागे मर्मशब्द उपात्तः, मरणकारित्वान्मर्मेत्युच्यते, विकृतेरनन्तरं च मरणं दृश्यते, इत्ययमुच्यते-

अथातो विकृतिविज्ञानीयं शारीरं व्याख्यास्यामः।

इति ह स्माहुरात्रेयादयो महर्षयः।

(गद्यसूत्रे॥२॥)

प्रकृतिः-स्वभावः, प्रकृतेः-स्वभावात्, प्रच्युतिः-विकृतिः, तस्या विज्ञानं-अवबोधः, स विद्यते यस्मिन्निति "मतौ छः सूक्तसाम्नोः" इति छः, "अध्यायानुवाकयोर्लुक्" इति तस्य पाक्षिकत्वान्न लुक्, विकृतिविज्ञानीयः, तं शारीरं व्याख्यास्यामः। शेषं पूर्ववत्। विकृतिः पुनरत्र रिष्टमेव विज्ञेयम्।

अत एवाह-

पुष्पं फलस्य धूमोऽग्नेर्वर्षस्य जलदोदयः।
यथा भविष्यतो लिङ्गं रिष्टं मृत्योस्तथा ध्रुवम्॥१॥
(आयुष्मति क्रियाः सर्वाः सफलाः सम्प्रयोजिताः।
भवन्ति भिषजां भूत्यै कृतज्ञ इव भूभुजि॥१॥
क्षीणायुषि कृतं कर्म व्यर्थं कृतमिवाधमे।
अयशो देहसन्देहं स्वार्थहानिं च यच्छति॥२॥
तर्हीदानीं गतासूनां लक्षणं सम्प्रचक्षते।
विकृतिः प्रकृतेः प्राज्ञैः प्रदिष्टा रिष्टसंज्ञया॥३॥

यथा फलस्य भाविनो-भविष्यतः पुष्पम्, अग्नेर्भाविनो धूमः, वर्षस्य भविनो जलदोदयः, तथा-तेनैव दृष्टान्तेन, मृत्योर्भविष्यतो रिष्टं लिङ्गं-गमकं, ध्रुवं-निश्चितम्। ध्रुवशब्दनिर्देशादिदं द्योतयति,-रिष्टन्छायानुकारि तदाभासरूपं मृत्योर्न लिङ्गमिति।

अत एवाह-

अरिष्टं नास्ति मरणं दृष्टरिष्टं च जीवितम्।

न विद्यते पूर्वं रिष्टं यस्य मरणस्य तदरिष्टं तथाविधं मरणं नास्ति। तथा, दृष्टं रिष्टं यस्य जीवितस्य तदेवंभूतं जीवितमपि नास्ति। यत्तु पुष्पादर्शनेऽपि वटवृक्षादौ फलसद्भावो दृश्यते, तत्तु क्वचिदेव न सर्वत्र, इति नायं दोषोऽत्र चिन्त्यः। ननु, "दृष्टरिष्टं जीवितं नास्ति" इत्ययुक्तमेतत्, व्यभिचारात्। तथा च वक्ष्यति (श्लो. १२८)-"यं नरं सहसा रोगो दुर्बलं परिमुञ्चति। संशयप्राप्तमात्रेयो जीवितं तस्य मन्यते॥" इत्याह-

अरिष्टे रिष्टविज्ञानं न च रिष्टेऽप्यनैपुणात्॥२॥

परमार्थेन यद्रिष्टत्वेन न च निश्चयीकृतं, तस्मिन्नरिष्टे रिष्टविज्ञानं-रिष्टत्वावगमः। न च रिष्टेऽपि रिष्टविज्ञानं केषाञ्चिद्भवति। कुतो हेतोः ? इत्याह-अनैपुणात्। निपुणस्य भावो नैपुणम्। "हायनान्तयुवादिभ्योऽण्" इत्यण्। न नैपुणमनैपुणं तस्मात्-मिथ्याज्ञानादिर्यथः। तदेवं यदभ्रान्तरिष्टं तदव्यभिचारित्वान्मरणं निश्चितं सूचयति। यदन्यद्रिष्टच्छायानुकारि "यं नरं सहसा रोगो" इत्यादिलक्षणं तद्भ्रान्तमेव। यथा-अधूमे बाष्पादौ धूम इति ज्ञानम्। न च तस्मान्मिथ्याज्ञानादभ्युपलब्धिर्निश्चिता भवति। तस्माद्युक्तमुक्तं "अरिष्टं नास्ति मरणं" इत्यादि। मुनिरप्याह (?) (सङ्ग्रहेऽप्युक्तम्, शा. अ. १०)_"अरिष्टं नास्ति मरणं दृष्टरिष्टं च जीवितम्। अरिष्टेरिष्टविज्ञानं न च रिष्टेऽप्यनैपुणात्॥ इति। सुश्रुतस्तु पठति (सू. अ. २८/५)-"ध्रुवं हि रिष्टे मरणं ब्राह्मणैस्तत्किलामलैः। रसायनतपोदानतत्परैर्वा निवार्यते॥ इति।

कृष्णात्रेयस्तु द्विधा रिष्टमिच्छतीति तन्मतमाविष्कुर्वन्नाह-

केचित्तु तद्विधेत्याहुः स्थाय्यस्थायिविभेदतः।

केचिदाचार्यास्तत्-रिष्टं, द्विधा वदन्ति। कथम् ? इत्याह-स्थायीत्यादि। तृतीयार्थे तसिः। स्थाय्यस्थायिभेदेन द्विप्रकारम्।

तत्रास्थायिरिष्टभेदं दर्शयन्नाह-

दोषाणामपि बाहुल्याद्विष्टाभासः समुद्भवेत्॥३॥
स दोषाणां शमे शाम्येत्स्थाय्यवश्यं तु मृत्यवे।

अपिशब्दः समुच्चये भिन्नक्रमः। रिष्टाभासश्च दोषाणाम् बाहुल्यात्समुद्भवेत्। दोषाणां शमे-दोषाणां शान्तौ सत्यां, सः-रिष्टाभासः, शाम्येत्-न तु मरणाय सम्पद्यते। स्थायि तु रिष्टमवश्यं मृत्यवे-मरणाय, जायते। ननु, "अरिष्टं नास्ति मरणं' इत्ययुक्तमिवाभाति। रिष्टमन्तरेणाप्यकालमृत्यो राजचौराश्युदकादिभिर्दर्शनात्। अत्र सञ्चक्ष्महे। कालमृत्योरेव रिष्टपूर्वकत्वात्। तथा च वक्ष्यति (श्लो. १४)-सर्वे ते कालचोदिताः।" तथा च (श्लो.६१)-वशगाः समवर्तिनः।" इति। समवर्ती हि कालमृत्युरेव।

किं तद्रिष्टम् ? इत्याह-

रूपेन्द्रियस्वरच्छायाप्रतिच्छायाक्रियादिषु॥४॥

अन्येष्वपि च भावेषु प्राकृतेष्वनिमित्ततः।

विकृतिर्सा समासेन रिष्टं तदिति लक्षयेत्॥५॥

रूपं-गौरादिवर्णविशेषः, गौरः श्यामः कृष्णो गौरश्यामः कृष्णश्याम इति देहप्रकृतिवर्णाः। तद्भेदास्तु पद्मगौरादयः। "नीलश्यामताम्रहारिद्रशुक्लादयस्तु विकृतयः" (सं.शा.अ.९)- तथा, चक्षुषा यद्ग्राह्यं वस्तुजातं संस्थानादि तदपि रूपम्। इन्द्रियाणि-चक्षुरादीनि। स्वरः-शब्दः, प्रतिपुरुषं पिशिष्टो रवः। छाया-वर्णप्रभाश्रया वक्ष्यमाणलक्षणा। प्रतिच्छाया प्रतिबिम्बम्। क्रिया-देहवाङ्मानोव्यापारः। तत्र धावनप्लवनाद्यनेकरूपो व्यायमो नृत्यस्थानकादिः-कायिको व्यापारः। गीताध्ययनादिः-वाचिको व्यापारः। रागद्वेषभयेर्ष्यादिः-मानसः। आदिशब्दोऽन्येषामपि शरीरगतानां भावानां ग्रहणार्थम्। रूपं चेन्द्रियाणि च स्वरश्च च्छाया च प्रतिछ्छाया च क्रियादयश्च, तेषु रुपादिषु भावेषु, तथाऽन्येष्वपि प्राकृतेषु भावेषु, अनिमित्ततः-अकस्मान्निमित्तमन्तरेणैव, या विकृतिः सा (तत्) समासेन रिष्टमिति लक्ष्येत्-जानीयात्। प्रकृतौ भवा_-प्राकृताः। यथा वातपकृतौ चलधृतिस्मृत्यादयः। तदेवं रूपादिषु भावेषु क्रियादिपर्यन्तेष्वन्येषु च प्राकृतेषु भावेषु या विकृतिः-स्वभावप्रच्युतिः, सा (तत्) सङ्क्षेपेण रिष्टम्। विस्तरतस्त्वनेकधा वक्ष्यमाणम्।

केशरोम निरभ्यङ्गं यस्याभ्यक्तमिवेक्ष्यते।

केशाश्च रोमाणि च तत् केशरोम, यस्य निरभ्यङ्गं-अभ्यङ्गरहितं, अभ्यक्तमिवेक्ष्यते-दृश्यते, स कालचोदित इति वचनविपरिणामेन सम्बन्धः। एवमुत्तरत्रापि। एतद्रूपविकृतेरुदाहरणम्।

इन्द्रियाणामधिष्ठानस्य विकृतिः-इन्द्रियविकृतिः, इत्याह-

यस्यात्यर्थं चले नेत्रे स्तब्धान्तर्गतनिर्गते॥ ६॥

जिह्मे विस्तृतसङ्क्षिप्ते सङ्क्षिप्तविनतभ्रुणी।

उद्भ्रान्तदर्शने हीनदर्शने नकुलोपमे॥ ७॥

कपोताभे अलाताभे स्रुते लुलितपक्ष्मणी।

नेत्रशब्देन नेत्राधिष्ठानमिष्टम्, नेन्द्रियम्। यस्य चले लोचनेऽत्यर्थं-अतिशयेनेतश्चेतश्च परिभ्रमतः। तथा, यस्य नेत्रे स्तब्धे-निश्चले। तथा, यस्यान्तर्गते-अन्तःप्रविष्टे। तथा, यस्य निर्गते-बहिर्याते। तथा, यस्य जिह्मे-कुटिले। तथा, यस्य विस्तृते-विस्तारं गते। तथा, यस्य नेत्रे सङ्क्षिप्ते-सङ्कुचिते। तथा, सङ्क्षिप्ते विशेषेण नते भ्रुवौ ययोस्ते सङ्क्षिप्तविनतभ्रुणी। तथा, उद्भ्रान्तदर्शने-विभ्रान्तदृष्टिनी। तथा, हीनदर्शने-अल्पदर्शने नष्टदृष्टिनी वा। तथा, नकुलोपमे-नकुललोचनाभे। समुदायेषु हि प्रवृत्ताः शब्दा अवयवेष्वपि वर्तन्त इति नकुलशब्दोऽत्र नकुललोचनविषयो वेद्यः। यथा च नागानन्दनाटके (अं. १/१७)-"चक्षुस्तामरसानुकारि हरिणा वक्षःस्थलं स्पर्धते" इति। अत्र हि हरिवक्षसा वक्षः स्पर्धते इत्ययमर्थो वेद्यः। अथवा नकुललोचने उपमा ययोस्ते नकुलोपमे, इत्यत्र उत्तरपदलोपी समासः। एवं कपोताभे। तथा, अलाताभेउल्मुकसदृशे। तथा,स्रुते-निर्निमित्तमश्रु परिस्रवतः। तथा, लुलिते-वातोद्धत इव पक्ष्मणी ययोस्ते लुलितपक्ष्मणी।

नासिकाऽत्यर्थविवृता संवृता पिटिकाचिता॥ ८॥

उच्छ्वना स्फुटिता म्लाना

तथा, यस्य नासिका निर्निमित्तमत्यर्थं-अतिशयेन, विवृता। अथवा, संवृता-सङ्कुचिता। तथा, पिटिकाचिता-पिटिकाभिर्व्याप्ता। तथा, उच्छ्रूना-ऊर्ध्वं श्वयथुनाऽऽक्रान्ता। तथा, स्फुटिता म्लाना च।

यस्यौष्ठो यात्यधोऽधरः।
ऊर्ध्वं द्वितीयः स्यातां वा पक्वजम्बूनिभावुभौ॥९॥

यस्यौष्ठो-दन्तच्छदः, अधरः-अनुत्तरः, अधो याति। द्वितीयः-उपरिष्टाद्भवो यो दन्तच्छदः, स ऊर्ध्वं याति। तथा, यस्य च पक्वजम्भूफलनीलौ द्वावोष्ठौ भवतः।

दन्ताः सशर्कराः श्यावास्ताम्राः पुष्पितपङ्क्तिताः।
सहसैव पतेयुर्वा

तथा, यस्य दन्ताः सशर्कराः-शर्कराभिराचिताः, तथा श्यावास्तथा ताम्राश्च वर्णतः, तथा पुष्पिताः-सञ्जातपुष्पाः, तथा पङ्क्तिताः-सञ्जातपङ्क्तयः कर्दमोपलिप्ता इव, तथा सहसैवझगित्येव, यस्य वा द्विजाः पतेयुः-भ्रंशेयुः।

जिह्वा जिह्म्या विसर्पिणी॥१०॥
शूना शुष्का गुरुः श्यावा लिप्ता सुप्ता सकण्टका।

तथा, यस्य जिह्वा-जिह्वेन्द्रियाधिष्ठानं, जिह्मा-कुटिला, तथा विसर्पिणी-कारणं विना विशेषेण सर्पति तच्छिला, तथा शूना-निमित्तं विनाऽपि [श्वयथुयुक्ता], तथा शुष्का गुरुश्च, तथा श्यावा, तथालिप्ता, तथा सुप्ता-सुप्तवत्सुप्ता रसाज्ञानाद्विचेतनेत्यर्थः, तथा सकण्टका-कण्टकाचितेव।

शिरः शिरोधरा वोढुं पृष्ठं वा भारमात्मनः॥११॥

हनू वा पिण्डामास्यस्थं शुक्रुवन्ति न यस्य च।

यस्य पुंसः शिरोधरा-ग्रीवा, शिरो वोढुं न शक्नोति। तथा, यस्य पृष्ठं वा आत्मनो भारं-पृष्ठस्य वोढृत्वेनोपर्यारूढं ग्रीवादिकं धारयितुं, न शक्नोति। यस्य वा पुंसो हनू भक्तपिण्डं-कवलं, आस्यस्थं वोढुं न शक्नुतः। एवं शिरोधरादीनि त्रीण्यङ्गानि स्वमात्मीयं कायं यस्य वोढुं न शक्नुवन्ति, स कालचोदित इति योज्यम्।

यस्यानिमित्तमङ्गानि गुरूण्यति लघूनि वा॥ १२॥

यस्यानिमित्तं-कारणं विना, अङ्गान्यतिगुरूणि कदाचिदतिलघूनि वा भवन्ति।

विषदोषाद्विना यस्य खेभ्यो रक्तं प्रवर्तते।

तथा, यस्य विषदोषमन्तरेण खेभ्यः-छिद्रेभ्यो, रक्तं प्रवर्तते-आयाति।

उत्सिक्तं मेहनं यस्य वृषणावतिनिःसृतौ॥ १३॥

अतोऽन्यथा वा यस्य स्यात्

यस्य मेहनं-लिङ्गं, उत्सिक्तं-ऊर्ध्वं गतम्। तथा, वृष्णावतिनिःसृतौ-प्रलम्बौ। अतोऽन्यथा वा-उक्तप्रकाराद्विपरीतः प्रकारो यः सोऽन्यथा, यथा-वृषणावुत्सिक्तावतिनिःसृतं मेहनमिति।

सर्वे ते कालचोदिताः।

"केशरोम निरभ्यङ्गं" (श्लो.६) इत्यारभ्य यावत् "अतोऽन्यथा वा" इत्येतत्पर्यन्तग्रन्थोक्तं लक्षणं येषां जातं ते पुरुषाः सर्वे कालेन-मृत्युना, चोदिताः-अन्तकेनात्मसाकृता इत्यर्थः। ननु, अत्र कालनियमो न कृतः कियता कालेन मृत्युर्भवति मासेनार्धमासेन वा? इति सन्देहान्न युक्तमेतत्। अत्र ब्रूमः। अनिर्दिष्टकालानां संवत्सरोऽवधिरिति व्यवस्था वेद्या। तथा चाह (श्लो.२४)-"वर्षान्तं तस्य जीवितम्" तथा

(श्लो.२५)-"सोऽपि वर्षं न जीवति" इत्यादिवचनान्नास्ति वर्षादूर्ध्वं जातरिष्टस्य जीवितमिति निश्चयः।

यस्यापूर्वाः सिरालेखा बालेन्द्वाकृतयोऽपि वा॥ १४॥

ललाटे बस्तिशीर्षे वा षण्मासान्न स जीवति।

यस्य-पुंसः स्वस्थस्य निर्निमित्तमेव, ललाटे बस्तेर्वा शिरसि, अपूर्वाः-आभिनवा न तु प्रागवस्थिताः, सिरालेखाः-सिराराजयो, दृश्यन्ते। अथवा बालेन्द्वाकृतयो-वक्राः, स पुमान् षण्मासान्न जीवति।

पद्मिनीपत्रवत्तोयं शरीरे यस्य देहिनः॥ १५॥

प्लवते प्लवमानस्य षण्मासास्तस्य जीवितम्।

तथा, यस्य पुंसः प्लवमानस्य-जले स्नानं कुर्वतः, शरीरे पद्मिनीपत्रवत्-पद्मिनीपत्रस्थिततोयवत्, तोयं प्लवते-अनवस्थितस्थिति भवति, तस्यापि षण्मासा न जीवितम्। पद्मिनीपत्रवदिति सप्तम्यर्थे वतिर्न षष्ठ्यर्थे, शरीर इति सप्तम्या निर्दिष्टत्वात्। तथा चोक्तं भाष्यकृता-"उपमाने यः संशयः स उपमेयाद्यावर्तते।" इति।

हरिताभाः सिरा यस्य रोमकूपाश्च संवृताः॥ १६॥

सोऽश्लाभिलाषी पुरुषः पित्तान्मरणमश्नुते।

यस्य सिरा हरिताभा रोमकूपाश्च संवृताः स्युः, स नरोऽश्लाभिलाषी सन् पित्तेन मृत्युं प्राप्नोति।

यस्य गोमयचूर्णाभं चूर्णं मूर्ध्नि मुखेऽपि वा॥ १७॥

सस्नेहं, मूर्ध्नि धूमो वा, मासान्तं तस्य जीवितम्॥

यस्य पुरुषस्य तोमयचूर्णसदृशं चूर्णं सस्नेहं मूर्ध्नि मुखे वा भवेत्, तथा मूर्ध्नि धूमो यस्य वा भवति, तस्य मासान्तं जीवितं स्यात्।

मूर्ध्नी भ्रुवोर्वा कुर्वन्ति सीमन्तावर्तका नवाः॥ १८॥

मृत्युं स्वस्थस्य षड्रात्रान्त्रिरात्रादातुरस्य तु।

सीमन्तानामावर्तकाः-मण्डलानि,-सीमन्तावर्तकाः, शिरसि भ्रुवोर्वा नवाः-अपूर्वाः, स्वस्थस्य षाड्रात्रान्मृत्युं कुर्वन्ति। आतुरस्य पुनस्त्रिरात्रात् कुर्वन्ति। अनेकार्थत्वाद्धातूनां सूचयन्तीर्यर्थः, न तु विषवन्मारणे तेषां कर्तृत्वम्। तर्हि सूचयन्तीत्येतदेव कस्मान्न कृतम्? ब्रूमः। यदोत्पद्यन्ते सीमन्तावर्तकास्तदा निश्चितं स्थायि रिष्टं समुत्पन्नमित्यवगन्तव्यमिति प्रतिपादनार्थं कुर्वन्तीत्युक्तम्।

जिह्वा श्यावा मुखं पूति सव्यमक्षि निमज्जति॥ १९॥

खगा वा मूर्ध्नि लीयन्ते यस्य तं परिवर्जयेत्।

तथा, यस्य जिह्वा श्यावा भवति, तथा मुखं पूति-दुर्गन्धि, तथा सव्यं-वाममक्षि, निमज्जति-अन्तःप्रविशति, तथा यस्य खगाः-पक्षिणश्च, मूर्ध्नि लीयन्ते-श्लिष्यन्ति, तं परिवर्जयेत्। वैद्य इति शेषः।

यस्य स्नातानुलिप्तस्य पूर्वं शुष्यत्युरो भृशम्॥ २०॥

आर्द्रेषु सर्वगात्रेषु सोऽर्धमासं न जीवति।

यस्य स्नातानुलिप्तस्य-पूर्वं स्नातः पश्चादनुलिप्तस्तस्य, आर्द्रेषु सर्वगात्रेषु पूर्व-आदौ, भृशमुरः शुष्यति-अतिशयेन वक्षःशोषमायाति, सोऽर्धमासं-वक्षं, न जीवति। ननु,, "आर्द्रेषु सर्वगात्रेषु" इति न वक्तव्यम्, पुनरुक्तत्वात्। तथा हि-"पूर्वंशुष्यत्युरो भृशम्" इत्युक्ते "आर्द्रेषु सर्वगात्रेषु" इत्यर्थाद्गम्यत एव। अन्यथा पूर्वग्रहणमनर्थकं स्यात्। मैवम्। अत्र हि भृशग्रहणात् पूर्वमुरो भृशं शुष्यति, न पुनरन्यान्यपि गात्राणी न शुष्यन्तीत्यायाति। न चैतदिष्टं शास्त्रकृतः। अत एव "आर्द्रेषु" इत्याह। तदयमर्थोऽत्राभिप्रेतः-यथैवोरसो भृशंशोषः, तथैव

शोषाणामङ्गानां भृशार्द्रता स्यादिति, एतच्च प्रतिपादयितुं "आर्द्रेषु" इत्युक्तम्। सर्वगात्रेष्वाद्रेषु सत्सु पूर्वमुरो भृशं शुष्यतीत्यैतदाश्चर्यम्। आश्चर्यत्वाद्रिष्टम्।

अकस्माद्युगपद्गात्रे वर्णौ प्राकृतवैकृतौ॥ २१॥

तथैवोपचयग्लानिरौक्ष्यस्नेहादि मृत्यवे।

तत्र प्राकृतो वर्णौ-गौरादिः, प्रागुक्तः, वैकृतस्तु वर्णौ-नीलादिः, तौ प्राकृतवैकृतौ वर्णौ यस्य निमित्तमन्तरेणापि तुल्यकालं देहे भवतः, तौ मृत्यवे। तथैवोपचयग्लान्यादयः परस्परं प्रतिपक्षभूता युगपद्यस्योत्पद्यन्ते तस्य मृत्यवे। आदिशब्देन शैत्यौष्ण्यादीनि गृह्यन्ते।

यस्य स्फुटेयुरङ्गुल्यो नाकृष्टा न स जीवति॥ २२॥

क्षवकासादिषु तथा यस्यापूर्वो ध्वनिर्भवेत्।

ह्रस्वो दीर्घोऽति वोच्छ्वासः पूतिः सुरभिरेव वा॥ २३॥

यस्य आकृष्टा अङ्गुल्यो न स्फुटेयुः-न त्रुटेयुः, स न जीवति। यस्य क्षवादिष्वपूर्वो ध्वनिः-अलौकिकः शब्दः, स्यात् स न जीवति। यस्योच्छ्वासोऽतिह्रस्वोऽतिदीर्घो वा भवेत्, आथवोच्छासः पूतिगन्धिः सुरभिर्वा यस्य, स न जीवति।

आप्लुतानाप्लुते काये यस्य गन्धोऽतिमानुषः।

मलवस्त्रव्रणादौ वा वर्षान्तं तस्य जीवितम्॥ २४॥

तथा, आप्लुतानाप्लुते-स्नातास्नाते, काये यस्य मानुषमतिक्रान्तः-अतिमानुषः, गन्धः-सुरभिरसुरभिर्वा, भवति। यस्य मलवस्त्रव्रणादौ वाऽतिमानुषौ गन्धः स्यात्, वर्षान्तं तस्य जीवितं-तत्क्षणादारभ्य तावदसाववस्थितजीवितो यावद्वर्षम्। तदन्ते-वत्सरान्ते, मृत्युभाक् जायत इत्यर्थः।

भजन्तेऽयङ्गसौरस्याद्यं यूकामक्षिकादयः।

त्यजन्ति वाऽतिवैरस्यात्सोऽपि वर्षं न जीवति॥ २५॥

शोभनस्य रसस्य भावः सौरस्यम्, अङ्गस्य सौरस्यमङ्गसौरस्यम्, अतिशयेनाङ्गसौरस्याद्धेतोर्यूकामक्षिकादयो यं भजन्ते, अथवा यमतिरैरस्यत्त्यजन्ति, सोऽपि वर्षं न जीवति।

सततोष्मसु गात्रेषु शैत्यं यस्योपलक्ष्यते।

शीतेषु भृशमौष्ण्यं वा स्वेदः स्तम्भोऽप्यहेतुकः॥ २६॥

तथा, यस्य सततोष्मसु-सदोष्णेषु, गात्रेषु-अवयवेषु, भृशं शैत्यमुपलक्षयते-उपलभ्यते, शीतेषु वा गात्रेषु भृशमौष्ण्यं यस्योपलभ्यते, भृशशब्दस्यात्र हि विषयद्वयेऽपि सम्बन्धः। यस्याहेतुकः-निर्निमित्तः, अङ्गेष्वतिस्वेदः, तथा स्वेदविषयो यः स्तम्भः, सोऽपि यस्य स्यात्, सोऽपि वर्षं न जीवतीति योज्यम्।

यो जातशीतपिटिकः शीताङ्गो वा विदह्यते।

उष्णद्वेषी च शीतार्तः स प्रेताधिपगोचरः॥ २७॥

जाताः शीताः पिटिका यस्य स जातशीतपिटिकः,-कफोद्भूतपिटिकाक्रान्तदेहो, यो विदह्यते-विदाहमनुभवति, शीताङ्गः सन् यो वा विदह्यते, तथोष्णं द्वेष्टि यः पुरुषः शीतार्तः सन्, स प्रेताधिपगोचरः-स मृत्युनाऽऽत्मसात्क्रियत इत्यर्थः।

उरस्यूष्मा भवेद्यस्य जठरे चातिशीतता।

भिन्नं पुरीषं तृष्णा च यथा प्रेतस्तथैव सः॥ २८॥

उरसि-यस्योष्मा-औष्ण्यं, भवेत्, जठरे--उदरे चातिशैत्यम्, पुरीषं भिन्नं तृष्णा च भवति. स प्रेततुल्यः, प्राप्तमरणत्वादिति भावः।

मूत्रं पुरीषं निष्ठ्यूतं शुक्रं वाऽप्सु निमज्जति।

निष्ठ्यूतं बहुवर्णं वा यस्य मासात्स नश्यति॥ २९॥

यस्य मूत्रं पुरीषं निष्ठ्यूतं शुक्रं वा अप्सु निमज्जति-बृडति, यस्य वा निष्ठ्यूतं-निष्ठीवनं, अनेकवर्णं भवति, असौ मासेन नश्यति।

घनीभूतमिवाकाशमाकाशमिव यो घनम्।

अमूर्तमिव मूर्तं च मूर्तं चामूर्तवत्स्थितम्॥ ३०॥

तेजस्व्यतेजस्तद्वच्च शुक्लं कृष्णमसच्च सत्।

अनेत्ररोगश्चन्द्रं च बहुरूपमलाञ्छनम्॥ ३१॥

जाग्रद्रक्षांसि गन्धर्वान् प्रेतनन्यांश्च तद्विधान्।

रूपं व्याकृति तत्तच्च यः पश्यति स नश्यति॥ ३२॥

मरणाभिमुखः पुरुषो विपर्यासकारिभिर्दोषैरघनादि घनादिरूपं मन्यते, घनादि वाऽघनादि मन्यते, तद्विपर्ययेण। अत एवोपमार्थमिवशब्दं प्रायुङ्क्त। अघनो घनः सम्पन्नो घनीभूतः। च्विप्रत्ययान्तस्यास्य "च्वौ" इतीत्वम्। घनीभूतमिवान्तरिक्षमन्तरिक्षमिव घनं मेदिनीधर्ममन्तरिक्षमूर्ध्वस्थं यत्तदधःस्थं पातालस्थमिव पश्यति, स नश्यतीति वक्ष्यमाणेन सम्बन्धः।

चशब्दो भिन्नक्रम इवशब्दश्च। अमूर्तं च वातादिकं मूर्तमिव-रूपवन्तमिव, पश्यति। मूर्तं च वह्न्यादिकममूर्तमिव स्थितं यः पश्यति स नश्यति। भेडोऽप्यधीते (इं. अ. ७)- "यस्य दर्शनमायाति वायुरम्बरगोचरः। वह्निर्नायाति दीप्तोऽपि तस्या युःक्षयमादिशेत्॥" इति।

तथा, तेजस्वि-यद्वस्त्वभ्यादिकं भास्वरं, तदतेजो-निस्तेजो, यः पश्यति। तेजस्वीति "अस्मायामेधा" इत्यादिनाविनिः। तद्वच्चेति तेजस्व्यतेजोदर्शनेन तुल्यं-तद्वत्, शुक्लं कृष्णं यः पश्यति, असच्च यद्वस्तु तत्सत् यः पश्यति स नश्यति।

नेत्रेषु रोगो नेत्ररोगः स विद्यते यस्य नैव सोऽनेत्ररोगी, तिमिरादिकमन्तरेण बहुरूपं चन्द्रं पश्यति-बहून् शशाङ्काना लोकयत इत्यर्थः। यो वा अलाञ्छनं-अकलङ्कं, चन्द्रं पश्यति

स नश्यति। एषु च घनीभूतमित्यादिषु विशिष्टेषु वस्तुविपर्यासदर्शनमात्रलक्षन-स्यैकस्मिन्नेवोदाहरणत्वेन रिष्टे दर्शयितुं युक्ते यदनेकरिष्टप्रदर्शनं तत्प्रपञ्चार्थं वेद्यम्।

आसन्नमरणो नरो जाग्रदेव यथास्वरूपाणि रक्षःपिशाचादीनि यः पश्यति, न विपर्ययवस्तुरूपाणि। यतस्तदानीं तैरेव स उपास्यते। तथा च वक्ष्यति (श्लो.१३०)-"यमदूतपिशाचाद्यैर्यत्परासुरुपास्यते।" इति। रक्षांसीति बहुवचननिर्देशो बहुराक्षसदर्शने सुतरामस्य रिष्टस्य परिपूर्णत्वमिति द्योतयितुम्। एकस्मिन्नपि हि राक्षसे दृष्टे रिष्टं भवत्येव। जातौ वा बहुवचनम्। अन्यांश्च तद्विधान्-रक्षसादिप्रकारान्, यः पश्यति। तथा, विकृता-द्रष्टुं दुःशक्या, आकृतिर्यस्य-रूपस्य, तद्रूपं व्याकृति, रक्षःपिशाचादिव्यतिरिक्तं तत्तत्-अनेकं, यः पश्यति स नश्यति।

सप्तर्षीणां समीपस्थां यो न पश्यत्यरून्धतीम्।
ध्रुवमाकाशगङ्गां वा स न पश्यति तां समाम्॥३३॥

यो नरोऽरुन्धतीं सप्तर्षीणां समीपस्थां न पश्यति, स तां समां न पश्यति-स तस्य संवत्सरस्यान्तरे म्रियत इत्यर्थः। सप्तर्षीणां समीपस्थामित्यरुन्धत्या विशेषणं सप्तर्षिसमीपेऽरुन्धत्याः स्थितिर्भवतीति वेदयति। तथा चान्यैः सामान्येनैवोक्तम्। यथा "अरुन्धतीं ध्रुवं चैव सोमच्छायां महापथम्। यो न पश्येन्न पश्येत्स नरः संवत्सरात्परम्॥" इति। तथा, यो ध्रुवं न पश्यति, तथा आकाशगङ्गां यो न पश्यति, स तां समां न पश्यति।

इदानीं श्रोत्रेन्द्रियस्य विकृतिमाचिख्यासुराह-

मेघतोयौघनिर्घोषवीणापणववेणुजान्।
शृणोत्यन्यांश्च यः शब्दानसतो न सतोऽपि वा ॥३४॥
निष्पीड्य कर्णौ शृणुयान्न यो धुकधुकास्वनम्।
तद्वद्गन्धरसस्पर्शान् मन्यते यो विपर्ययात्॥३५॥
सर्वशो वा न यो, यश्च दीपगन्धं न जिघ्रति।

विधिना यस्य दोषाय स्वास्थ्यायाविधिना रसाः॥३६॥

यः पांसुनेव कीर्णाङ्गो योऽङ्गे घातं न वेत्ति वा।

अन्तरेण तपस्तीव्रं योगं वा विधिपूर्वकम्॥३७॥

जानात्यतीन्द्रियं यश्च तेषां मरणमादिशेत्।

मेघादिजान् वेणुपर्यन्तान् शब्दांस्तथाऽन्यांश्च शब्दांस्तथा रूपान्महतो यः पुरुषोऽसतः-परैरनुपलभ्यमानान्, शृणोति, तथा मेघादिजांस्तथाऽन्यांश्च यः शब्दान् सतो-विद्यमानान्, न शृणोति, तेषां मरणमादिशेदिति वक्ष्यमाणस्य वचनविपरिणामेनात्र सम्बन्धः कार्यः।

यो धुकधुकाशब्दं कर्णावङ्गुलीलिर्निष्पीड्य न शृणियात्। तैर्मेघादिजैः शब्दैस्तुल्यं-तद्वत्। यथा-मेघादिजान् शब्दान्योऽसतः शृणोति सतश्च न शृणोति, तद्वद्यो गन्धरस्पर्शान् विपर्ययात्-वैपरीत्येन मन्यते, न यथावस्तु -बलि। तत्र गन्धविपर्ययो यथा-सुगन्धि दुर्गन्धं मन्यते। रसपिपर्ययो यथा-मधुरमम्लमम्लं मधुरमित्यादि। स्पर्शविपर्ययो यथा मृदुस्पर्शं खरस्पर्शं मन्यते। सर्वसर्विकया गन्धादीन् वा योऽपि न मन्यते, सोऽपि नश्यति। तत्कालनिर्वाणस्य दीपस्य यो गन्धं न जिघ्रति-घ्राणेन्द्रियेण नानुभवति। विधिना-शास्त्रप्रयुक्तेन, प्रयुक्ता रसा यस्य दोषाय-रोगाय, अविधिना-शास्त्रविशिव्यतिक्रमेण, प्रयुक्ताः स्वास्थ्याय स्युः। तथा, यः पांसुनारजसेव, कीर्णाङ्गो-धूलिधूसरितशरीरः। यश्चाङ्गे घातं-हतिं, न वेत्ति। तपस्तीव्रमन्तरेण-उग्रं तपो विना, यः पुरुषोऽतीन्द्रियंदिन्द्रियभ्योऽतिक्रान्तं वेत्ति, इन्द्रियाणामगोचरं स्वर्गादि वेत्ति, तथा योगं वा विधिपूर्वकमन्तरेण योऽतीन्द्रियं जानाति। तेषां-पूर्वोक्तानआं सर्वेषां, मरणमादिशेत्। योगः-चित्तवृत्तिनिरोधः, विधिपूर्वको यथाशास्त्रं सम्यगुपदेशः। तथा, अन्योऽपि योगो-रसायनादिः। युज्यत इति योगो-विधिविशेषः। शास्त्रोद्दिष्टरसायनाञ्जनादिनाऽपि ह्यतीन्द्रियं दृष्यते दूरव्यवहितादि।

अधुना स्वरविकृतिमाह-

हीनो दीनः स्वरोऽव्यक्तो यस्य स्याद्वद्गदोऽपि वा॥३८॥

सहसा यो विमुह्योद्वा विवक्षुर्न स जीवति।

यस्य पुरुषस्य स्वरः-शब्दो, निमित्तमन्तरेण हिनोऽथवा दीनो-दैन्ययुक्तो, भवति। अव्यक्तः-अस्फुटो, यस्य स्यात्। गद्गदो-घर्घरो, वा यस्य भवति। यो वा विवक्षुः-वक्तुमिच्छन्, कारणमन्तरेण विमुह्येत्-वक्तुं न शक्नोति, स न जीवति।

स्वरस्य दुर्बलीभावं हानिं च बलवर्णयोः॥३९॥

रोगवृद्धिमयुक्त्या च दृष्ट्वा मरणमादिशेत्।

स्वरस्य-शब्दस्य, दौर्बल्यं दृष्ट्वा बलवर्णयोश्च हानिमयुक्त्या दृष्ट्वा मरणमादिशेत्। चशब्दः समुच्चये। रोगवृद्धिमयुक्त्या च दृष्ट्वा नरस्य मरणमादिशेत्। अयुक्त्या-निर्निमित्तमेवेत्यर्थः।

अपस्वरं भाषमाणं प्राप्तं मरणमात्मनः॥४०॥

श्रोतारं चास्य शब्दस्य दूरतः परिवर्जयेत्।

स्वभावस्वरादपगतम् भ्रष्टं-अपस्वरं,-हीनस्वरं कृत्वा, यो नरोऽहं मरिष्यामि मरिष्यामीत्येवमात्मनो मरणं भाषते परस्य, तं तथाभूतं दूरादेव वर्जयेत्-वैद्यो न चिकित्सेत्। तथा, अस्य शब्दस्य-अहं मरिष्यामीत्येवंभूतस्य योनरः श्रोता, तमपि वैद्यो दूरतो वर्जयेत्।

स्वराश्रय रिष्टमुक्त्वा छायाश्रयं रिष्टमभीधित्सुराह-

संस्थानेन प्रमाणेन वर्णेन प्रभयाऽपि वा॥४१॥

छाया विवर्तते यस्य स्वप्नेऽपि प्रेत एव सः।

संस्थानं-प्रतिपुरुषं विलक्षणं समविषमं रूपम्, आकृतिरित्यर्थः। तत्र यदि शरीरस्य समं संस्थानं भवति, छाया त्वस्य विषमा दृश्यते, तदा रिष्टम्। तथा, यदि शरीरस्य विषमं संस्थानं छाया तु समा भवति, तदा रिष्टम्। तथा, यदि दीर्घप्रमाणस्य सतो ह्रस्वा छाया भवति

ह्रस्वप्रमाणस्य वा दीर्घा भवति, तदपि रिष्टम्। एवं संस्थानेन प्रमाणेन च छायाविवृत्तिर्वेद्या। तथा, यस्य नाभसी छाया आग्नेय्या छाया या वर्णतो दृश्यते सा वर्णविवृत्तिः। एवं पृथिव्यादिमयीषु छायासु वर्णविवृत्तिर्योज्या। तथा, यस्य यथाभूता प्रभा साऽन्यथाभूता भवति सा प्रभाविवृत्तिः। एवं संस्थानाद्यन्यतमेन यस्य छाया विवर्तते-अन्यथाभूताऽन्यथा। सम्पद्यते, स्वप्नेऽपि स पुमान् प्रेत एव, किं पुनर्जाग्रदवस्थायां न प्रेतः ? इति एवकारेण रिष्टस्यास्याव्यभिचारित्वं सूचयति। उत्पन्नश्चेन्नरस्य छायाया अन्यथाभावः, तदानीं पुरुषो यमसात्सम्पन्नो मन्तव्य इत्यर्थः।

अस्याश्च छायाया द्वैरूप्यं दर्शयितुमाह-

आतपादर्शतोयादौ या संस्थानप्रमाणतः॥४२॥
छायाऽङ्गात्सम्भवत्युक्ता प्रतिच्छायेति सा पुनः।
वर्णप्रभाश्रया या तु सा छायैव शरीरगा॥४३॥

या शरीरादातपादर्शतोयघृतादौ शरीरसंस्थानप्रमाणानुरूपा सम्भवति प्रतिबिम्बकरूपा, सा प्रतिच्छायेत्युच्यते। तस्या हि न वर्णप्रभे आश्रयः। यस्याः पुनर्वर्णप्रभे आश्रयश्छायायाः, सा शरीरगैव-शरीरस्थैव, छाया। न प्रतिच्छायावच्छरीरादन्यत्रा-तपादर्शतोयादौ कुत्रचिदपयाति प्रतिबिम्बकरूपतया।

भवेद्यस्य प्रतिच्छाया छिन्ना भिन्नाऽधिकाऽऽकुला।
विशिरा द्विशिरा जिह्मा विकृता यदि वाऽन्यथा॥४४॥
तं समाप्तायुषं विद्यान्न चेल्लक्ष्यनिमित्तजा।
प्रतिच्छायामयी यस्य न चाक्ष्णीक्ष्येत कन्यका॥४५॥

यस्य पुंसः प्रतिच्छाया छिन्ना-द्विधा, दृश्यते। अथवा भिन्नाकिञ्चित्सच्छिद्रेव यस्य दृश्यते। तथा, यस्याधिका दृश्यते-न यथा प्रमाणा। यस्य वा आकुला-चलस्वरूपा

अनिश्चितप्रतिबिम्बा, भवति। तथा, यस्य विशिरा-शिरोरहिता। तथा, यस्य द्विशिरा। तथा, यस्य जिह्मा-कुटिला। विकृतेति उक्तप्रकारादन्यथा अन्येन प्रकारेण, यस्य विकृता दृश्यते आतापादर्शतोयादौ, तं पूर्वोक्तं च सर्वमेव, समाप्तायुषं-क्षीणजीवितं, विद्यात्। न चेदित्यादि। लक्षयितुं प्रत्यक्षादिभिः प्रमाणौ शक्यं-लक्ष्यम्। शक्यर्थेकृत्यः। लक्ष्यं च तन्निमित्तं च, तस्मात्तथाविधान्निमित्ताद्विकृताज्जाता [प्रति] च्छाया यदि न भवति तदा रिष्टम्, नान्यथा।

प्रतिच्छायामयी कन्यका-प्रतिबिम्बकुमारिकेति या लोके प्रसिद्धा, साऽक्षि-नेत्रे, यस्य नेक्ष्येत-नोपलभ्येत, तं समाप्तायुषं विद्यात्।

इदानीं यस्य महाभूतस्य यादृशी छाया स्यात्, तां कथयितुमाह-

खादीनां पञ्च पञ्चानां छाया विविधलक्षणाः।
नाभसी निर्मलाऽऽनीला सस्नेहा सप्रभेव च॥४६॥
वाताद्रजोऽरुणा श्यावा भस्मरूक्षा हतप्रभा।
विशुद्धरक्ता त्वाग्नेयी दीप्ताभा दर्शनप्रिया॥४७॥
शुद्धवैदूर्यविमला सुस्निग्धा तोयजा सुखा।
स्थिरास्निग्धा घना शुद्धा श्यामा श्वेता च पार्थिवी॥

खादीनां महाभूतानां पञ्चानां पञ्च छाया भवन्ति। ननु, खादीनां पञ्चत्वाच्छायानां पञ्चत्वमर्थाल्लब्धमेव। तत्किं पञ्चग्रहणेन? अस्त्येवैतत्। किन्तु यथा खादिभ्यः पञ्चभ्यो द्रव्यमेकं भूतोत्कर्षापकर्षभेदाच्चासङ्ख्येयं द्रव्यम्, तथा छायानामप्येकत्वं भूतोत्कर्षापकर्षभेदाच्चासङ्ख्येयत्वमाशङ्क्येत, तदाशङ्कानिवृत्त्यर्थं पञ्चग्रहणम्। पञ्चैव छाया भवन्ति, नोनाधिका इति। किम्भूताश्छायाः? विविधलक्षणाः,-विविधं लक्षणं वक्ष्यमाणं यासां ता एवम्।

आकाशजा छाया निर्मला-शुद्धा। तथा, आनीला-ईषन्नीला, इत्याकारप्रश्लेषोऽत्र वेद्यः। "शुद्धवैदूर्यविमला" हि "तोयजा" (श्लो.४८) इति वक्ष्यति। तथा, किञ्चित्स्निग्धा।

सप्रभेत्यनेन शोभनत्वमुक्तम्। एतदेव स्फूटयितुमिवशब्दं तन्त्रकृत्प्रायुङ्क। अन्यथा छायाप्रभयोर्भिन्नविषयत्वादनुपपन्नमेतद्वाक्यं स्यात्। भेदश्चानयोरधुनैव वक्ष्यति (श्लो.५१)।

वाताद्रजोरुणादियुक्ता छाया भवति।

आग्नेयी विशुद्धरक्तवर्णा, दीप्ताभा, तथा दर्शनं प्रियं यस्याः सैवंविधा, भवति।

तोयजा छाया निर्मलवैदूर्यविमला, सुष्ठु स्निग्धा, सुखा-सुखावहा।

पार्थिवी छाया स्थिरादिगुणयुक्ता। ननु, च, अग्निजलभुवां स्वयं वर्णादियोगादाग्नेय्यादिकानां तद्वर्णकत्वमुपपन्नम्। नभोमारुतयोस्तु स्वयं वर्णाद्ययोगात्कथं तच्छायानां वर्णादियोगो युज्येत ? इति केचित्। तान् ब्रूमहे। अचिन्त्यत्वाद्धेतुफलस्यादोषः। तथा हि,-मधुरादयो रसाः कालादमूर्ताद्भवन्तो दृश्यन्ते यथा, तथा तच्छाये अप्येते भविष्यतः। तत्र यस्य नरस्य कर्मादिसहायं नभश्छायामुत्पादयति तस्य नाभसीति युज्यत एव। एवं वायव्यामपि वाच्यम्।

इदानीमासां छायानां गुणनिर्देशमाह-

वायवी रोगमरणक्लेशायान्याः सुखोदयाः।

वायवी छाया रोगाद्यर्थं जायते। अन्याः-शेषाश्चतस्रः, छायाः सुखोदयाः-सुखावहाः।

प्रभोक्ता तैजसी सर्वा, सा तु सप्तविधा स्मृता॥ ४९॥

रक्ता पीता सिता श्यावा हरिता पाण्डुराऽसिता।

प्रभा सर्वा-सप्तप्रकाराऽपि, तैजसी-आग्नेयी, उक्ता-तन्त्रकृद्भिः स्मृता। तदेव सप्तविधत्वमाह-रक्तेत्यादि।

तासां याः स्युर्विकासिन्यः स्निग्धाश्च विमलाश्च याः।

ताः शुभा, मलिना रूक्षाः सङ्क्षिप्ताश्चाशुभोदयाः।

तासां-पूर्वोक्तानां प्रभाणां मध्यात्, याः प्रभा विकासिन्यः-प्रसृता इव, तथा स्निग्धा विमलाश्च स्युः, ताः शुभाः-कल्याणकारिण्यः। याश्च मलिनादिगुणयुक्तास्ता अशुभोदयाः-अमाङ्गल्यकारिण्यः।

छायाप्रभयोरन्यत्वं प्रदर्शयितुं लक्षणमाह-

वर्णमाक्रामति छाया प्रभा वर्णप्रकाशिनी॥५१॥

छाया रक्तादिवर्णमाक्रामति-परिभुयावतिष्ठते। प्रभा तु वर्णप्रकाशिनी-वर्णं प्रकाशयितुं शीलमस्याः सा वर्णप्रकाशिनी।

तथेदमपि छायाप्रभयोरन्यत्वे लक्षणमाह-

आसन्ने लक्ष्यते छाया विकृष्टे भा प्रकाशते।

निकटे छाया लक्ष्यते। प्रभा पुनर्विकृष्टे-दूरप्रदेशे, प्रकाशते-दूरादवभासत इत्यर्थः। यथा-पाषाणादिपरिपूर्णानामपि पर्वतादिप्रदेशानां दूराद्विलक्षणैव कान्तिः प्रकाशते।

एवं छायाप्रभयोरन्यत्वं प्रदर्श्य तयोरेव व्याप्ति प्रदर्शयति-

नाच्छायो नाप्रभः कश्चिद्विशेषाश्चिह्नयन्ति तु॥५२॥
नृणां शुभाशुभोत्पत्तिं काले छयासमाश्रयाः।

कश्चिदपि पुरुषश्छायारहितः प्रभाहीनश्च नास्ति। विशेषास्तु नृणां शुभाशुभोत्पत्तिं काले विशिष्टे चिह्नयन्ति-व्यञ्जयन्तीत्यर्थः। किम्भूता विशेषाः? छायासमाश्रयाः-छायाश्रिताः।

निकषन्निव यः पादौ च्युतांसः परिसर्पति॥५३॥

हीयते बलतः शश्वद्योऽन्नमश्नन् हितं बहु।

योऽल्पाशी बहुविण्मूत्रो बह्वाशी चाल्पमूत्रविट्॥५४॥

यो वाऽल्पाशी कफेनार्तो दीर्घं श्वसिति चेष्टते।

दीर्घमुच्छ्वस्य यो ह्रस्वं निःश्वस्य परिताम्यति॥५५॥

ह्रस्वं च यः प्रश्वसिति व्याविद्धं स्पन्दते भृशम्।

शिरो विक्षिपते कृच्छ्राद्योऽञ्चियित्वा प्रपाणिकौ॥५६॥

यो ललाटात्स्रुतस्वेदः श्लथसन्धानबन्धनः।

उत्थाप्यमानः सम्मुह्येद्यो बली दुर्बलोऽपि वा॥५७॥

उत्तान एव स्वपिति यः पादौ विकरोति च।

शयनासनकुड्यादेर्योऽसदेव जिघृक्षति॥५८॥

आहास्यहासी सम्मुह्यन् यो लेढि दशनच्छदौ।

उत्तरौष्ठं परिलिहन् फूत्कारांश्च करोति यः॥५९॥

यमभिद्रवति च्छाया कृष्णा पीताऽरुणाऽपि वा।

भिषग्भेषजपानान्नगुरुमित्रद्विषश्च ये॥६०॥

वशगाः सर्व एवैते विज्ञेयाः समवर्तिनः।

निकषन्-घर्षयन्निव, यः पादौ च्युतांसः-स्रस्तांसः सन्, भूमौ परिसर्पति। तथा, ये वक्ष्यमाणाश्च ते सर्वे समवर्तिनो वशगा इति योज्यम्; अन्तदीपकालङ्कारत्वादस्य।

तथा, योऽन्नमश्नन्-भक्तं भक्षयन्, बलान्नित्यं हीयते। किम्भूतमन्नम्? हितं-पथ्यम्। बहु-भूरि। योऽल्पाशी बहुविण्मूत्रो यश्च बह्वाशी-बह्वश्नाति, नित्यमल्पविण्मूत्रश्च। यश्चा(यो वाऽ)ल्पाशी कफेनार्तः-पीडितो, दीर्घं श्वसिति-बहुश्वासं मुञ्चति। तथा, चेष्टते-परिलुठति। तथा, यो दीर्घमुच्छ्वस्य-बहूर्ध्वं श्वासं मुक्त्वा, अनन्तरं ह्रस्वं निःस्श्वस्य-अल्पं श्वासं प्रत्यावृत्यान्तःकृत्वा, परिताम्यति-दुःखायते। यश्च ह्रस्वं प्रश्वसिति। व्याविद्धं-विषमं कृत्वा,

नाडीभिः स्पन्दते भृशं-अतिशयेन स्फुरति। यः प्रपाणिकौ-पाण्योः पश्चाद्भागस्थितावव यवविशेषौ, अञ्चयित्वा-सङ्कोच्य, कृच्छ्रेण शिरो-मूर्धानं विक्षिपते। यो ललाटात्-अलिकात्, स्रुतस्वेदः सन् शिथिलसन्धिबन्धो भवति। य उत्थाप्यमानो बली दुर्बलो वा सम्मुह्येत्-मोहमुपैति। य उत्तान एव-जातुचित्पार्श्वे न, स्वपिति। यश्च पादौ विकरोति-विकृति नयति। यः शयनादेरसत्-अविद्यमानमेव वस्तु, ग्रहीतुमिच्छति। यः अहास्ये-हास्यविषयाभावेऽपि, अभीक्ष्णं हसन् सम्मुह्यन् दशनच्छदौ लेढिजिह्वया परिमृशति। यश्चोत्तरौष्ठं परिलिहन् फूत्कारान्-नानाविधान् शब्दान्, करोति। यं-नरं, छायाऽभिद्रवति-अभिभवति। कीदृशी ? कृष्णा पीताऽरुणाऽपि वा। ये चभिषगादिद्विषः। एते सर्वे समवर्तिनो वशगा विज्ञेयाः। समंवर्तते रागद्वेषौ हित्वा समवर्ती,-यमः। सर्व एवेत्येतत् "निकषन्निव यः पादौ" इत्यत आरभ्य यावत् "भिषग्भेषजपानान्नगुरुमित्रद्विषश्च ये।" इत्येतत्पर्यन्तस्य ग्रन्थस्य सम्बन्धार्थम्।

(ग्रीवाललाटहृदयं यस्य स्विद्यति शीतलम्॥ ६१॥

उष्णोपरः प्रदेशश्च शरणं तस्य देवताः।)

[पूर्वरूपाणि सर्वाणि ज्वरादिष्वतिमात्रया।

यं विशंति विशत्येनं मृत्युर्ज्वरपुरःसरः॥ १॥]

(यस्य ग्रीवादिकं शीतलं सत् स्विद्यति-स्वेदयुक्तं भवति, अपरः प्रदेशश्चोष्णः, तस्य शरणं-रक्षणं, देवता नान्यत्।)

योऽणुज्योतिरनेकाग्रो दुःच्छायो दुर्मनाःसदा॥ ६२॥

बलि बलिभृतो यस्य प्रणीतं नोपभुञ्जते।

निर्निमित्तं च यो मेधां शोभामुपचयं श्रियम्॥ ६३॥

प्राप्नोत्यतो वा विभ्रंशं स प्राप्नोति यमक्षयम्।

यः पुमानणुज्योतिः-स्तोकदृक्, केचित्त्वल्पतेजा इत्याहुः। तथा, अनेकाग्रो-व्याकुलचेताः। दुःच्छायो-विवर्णच्छायो निन्दितकान्तिर्वा। दुर्मनाः सदा-सततमेव

शोकाक्रान्तमानसः। तथा, यस्य पुंसो बलिं प्रणीतं-तन्नामोद्दिश्य प्रदत्तं, बलिभृतो-बलिभुजो वायसादयो, नोपभुञ्जते-न खादन्ति, स यमक्षयं प्राप्नोतीति सम्बन्धः। बलिभृत इत्यतिशयार्थम्। किलकाका अपि नादन्ति किं पुनरन्ये ? इत्यर्थः।

तथा, यो नरो निर्निमित्तं मेधादिजननरसायनादिकारणमन्तरेण मेधादीन् प्राप्नोति। अतो वा-मेधादिभ्यो, भ्रशं प्राप्नोति। सोऽन्तकगृहं प्राप्नोति। श्रीरत्र घनं राज्यं वा। उपचयः-शरीरपुष्टिः।

गुणदोषमयी यस्य स्वस्थस्य व्याधितस्य वा॥ ६४॥

यात्यन्यथात्वं प्रकृतिः पण्मासान्न स जीवति।

यस्य नरस्य गुणमयी-सत्वादिमयी, प्रकृतिर्दोषमयी-वातादिमयी, स्वस्थस्यातुरस्य वाऽन्यथात्वं याति-स्वभावं हित्वा, सषण्मासान्न जीवति।

भक्तिः शीलं स्मृतिस्त्यागो बुद्धिर्बलमहेतुकम्॥ ६५॥

षडेतानि निवर्तन्ते षड्भिर्मासैर्मरिष्यतः।

षड्भिर्मासैर्मरिष्यतो नरस्य भक्त्यादीनि षट् अहेतुकं-कारणमन्तरेण, निर्वर्तन्ते। अहेतुकमिति निवर्तनक्रियाविशेषणम्। षडति नियमार्थम्। यदा षडपि निवर्तन्ते नैकैकं, तदा रिष्टमित्यर्थः।

मत्तवद्गतिवाक्कम्पमोहा मासान्मरिष्यतः॥ ६६॥

मासेन मरिष्यतो मत्तवत्-मत्तस्येव, गतिवाक्कम्पमोहा भवन्ति।

नश्यत्यजानन् षडहात्केशलुञ्चनवेदनाम्।

न याति यस्य चाहारः कण्ठं कण्ठामयादृते॥६७॥

कचोत्पाटनपीडामविन्दन् षडहान्नश्यति। यस्याहारः कण्ठामयं विना कण्ठं न याति, स च षडहान्तरे म्रियते।

प्रेष्याः प्रतीपतां यान्ति प्रेताकृतिरुदीर्यते।

यस्य निद्रा भवेन्नित्या नैव वा न स जीवति॥६८॥

प्रेष्याः-भृत्याः, यस्य प्रतीपतां-वैपरीत्यं, यान्ति, स नश्यति। यश्च प्रेताकार उपलक्ष्यते सोऽपि न जीवति। यस्य नरस्य नित्यं-सततं, निद्रा भवति, यस्य नैव वा-न कदाचिन्निद्रा भवति, सोऽपि न जीवति।

वक्त्रमापूर्यतेऽश्रूणां स्विद्यतश्चरणौ भृशम्।

चक्षुश्चाकुलतां याति यमराज्यं गमिष्यतः॥६९॥

यस्य नरस्याश्रूणां-अश्रुस्रोतसां, मुखं (वक्त्रं)-द्वारं, आपूर्यते स न जीवति। यस्य चरणौ-भृशं-अत्यर्थं, निर्निमित्तं स्विद्यतः स न जीवति। चक्षुरित्यादि। यमराज्यं यास्यतो नयनमाकुलत्वं याति।

यैः पुरा रमते भावैररतिस्तैर्न जीवति।

यैर्भावैः-पदार्थैः, पुरा-पूर्वं, रमते-सुखायते, तैः पदार्थैर्न रतिर्भवति यस्य, स न जीवति।

सहसा जायति यस्य विकारः सर्वलक्षणः॥७०॥

निवर्तते वा सहसा, सहसा स विनश्यति।

यस्य पुंसो विकारो-ज्वरादिः, सहसा-कारणं विना, सर्वलक्षणः-सकललिङ्गोपेतो, जायते। अथवा तादृशो विकारः सहसा-शीघ्रमेव, निवर्तते-नश्यति। सः-पुरुषः, सहसा अचिरादेव, विनश्यति।

अधुना प्रतिरोगं रिष्टं वक्तुं सर्वव्याधिप्रधानस्य ज्वरस्यैव तावद्विकृतिं लिलक्षयिषुराह-

ज्वरो निहन्ति बलवान् गम्भीरो दैर्घरात्रिकः॥७१॥

सप्रलापभ्रमश्वासः क्षीणं शूनं हतानलम्।

अक्षामं सत्कवचनं रक्ताक्षं हृदि शूलिनम्॥७२॥

सशुष्ककासः पूर्वाह्णे योऽपराह्णेऽपि वा भवेत्।

बलमांसविहीनस्य श्लेष्मकाससमन्वितः॥७३॥

ज्वरो बलवानित्यादिलक्षणः क्षीणादिलक्षणं पुरुषं हन्ति। बलवान्-हेत्वादिभिर्बलवद्भिर्युतः। गम्भीरः-अशेषधात्वन्तर्गतः। दैर्घरात्रिको-दीर्घकालानुबन्धी, अन्ये तु रात्रिजागरकारीत्याहुः। दीर्घा हि जाग्रतो रात्रिः। तथा चोक्तम्-"दीर्घश्रान्तस्य योजनम्।" इति। तथा, प्रलापादियुक्तः। कीदृशमातुरम्? क्षीणं-धातुक्षययुक्तम्। तथा, अक्षामं-सबलम्, ग्लानो न भवत्यथ च सक्तवचनः, तमक्षामं सक्तवचनम्। तथा, रक्तनेत्रं हृदयशूलान्वितम् हन्तीति योज्यम्।

यश्च ज्वरः सशूष्ककासः पूर्वाह्णेऽथवाऽपराह्णे भवेत्स द्विविधोऽपि हन्ति।

तथा यः श्लेष्मकाससमन्वितो ज्वरो बलमांसविहीनस्य पुंसः स्यात्, स तं निहन्ति। इति रिष्टत्रयमेतत्। ननु च, "हेतुभिर्बलिभिर्युक्तो बहुभिर्बहुलक्षणः। ज्वरः प्राणान्तकृद्यश्च शीघ्रमिन्द्रियनाशनः॥" (च. चि. अ. ३/४९) इत्येष ज्वरस्य रिष्टप्रकारः कस्मान्नोक्तः? उच्यते। उक्तप्राय एवायं बलवानिति वचनात्।

रक्तपित्तविकृतिलक्षणं रिष्टमधिकृत्याह-

रक्तपित्तं भृशं रक्तं कृष्णमिन्द्रधनुष्प्रभम्।
ताम्रहारिद्रहरितं रूपं रक्तं प्रदर्शयेत्॥७४॥
रोमकूपप्रविसृतं कण्ठास्यहृदये सजत्।
वाससोऽरञ्जनं पूति वेगवच्चाति भूरि च॥७५॥
वृद्धं पाण्डुज्वरच्छर्दिकासशोफातिसारिणम्।

रक्तपित्तमीदृग्रूपं कर्तृभूतं नरं हन्ति। कीदृक्? भृशं-अत्यर्थं, रक्तं-लोहितम्। तथा, अतिकृष्णम्। भृशशब्दो हि द्वयोरपि युज्यते। तथा, इन्द्रधनुषप्रभं-नानावर्णमित्यर्थः। किलेदृशे रक्तपित्ते रसमेदोमज्जादिमिश्रस्य रक्तस्य स्रवणान्नानावर्णत्वं सम्पद्यते। यच्च रक्तपित्तं कर्तृभूतं ताम्रहारिद्रहरितं रक्तं च रूपं दृश्यमाकाशं वा प्रदर्शयेत्, तन्निहन्ति। यच्च रक्तपित्तं विनाऽपि वर्णै रोमकूपेभ्यः समस्तेभ्यः प्रकर्षेण विसृतं-यातं प्रवृत्तम्, तच्च निहन्ति। तथा, कण्ठे मुखे हृदये च तुल्यकालं सजत्-संश्लिष्यत् सानुषङ्गम्, तच्च हन्ति। वाससोऽरञ्जनमिति वाससः अरञ्जनमित्यकारप्रश्लेषोऽत्र बोध्यः। वस्त्रस्य हि जीवशोणितं शुद्धशोणितरूपत्वान्न रञ्जकम्। अतस्तेन रक्तं वस्त्रं समनन्तरं प्रक्षालितं शुद्धं सम्पद्यते, न रागयुक्तम्। तथा ह्यस्मिन् व्याधौ रक्तपिताभ्यां परस्परमविभागापन्नत्वाद्वस्त्रस्य रञ्जनं प्राप्तम्। रक्तेन हि पित्तसहितेन वस्त्रं रज्यते, न च तद्धौतं शुद्धं सम्पद्यते। तथा चोक्तम्(हृ. क. अ. ३/३४)-शुङ्गंवा भावितं वस्त्रमावानं कोष्णवारिणा। प्रक्षालितं विवर्णं स्यात्पित्ते, शुद्धं तु शोणिते॥" इति। तथा, पूति-दुर्गन्धि, तद्धि धातूनुपक्लेदयति, उपक्लिन्नानां धातूनामत्यर्थं दुष्टता, इति निहन्त्येव। तथा, [अति] वेगवत्-वेगेन निर्गत्य रुद्धं पुनर्वेगेन प्रवर्तत इति। तथा, भूरि-प्रभूतम्। एवंविधं च रक्तपित्तं निहन्ति। वृद्धं-उद्रिक्तं रक्तपित्तं सत्, पाण्ड्वादियुतं नरं हन्ति।

कासश्वासौ ज्वरच्छर्दितृष्णातीसारशोफिनम्॥७६॥

कासश्वासौ ज्वरादिपञ्चविधोपद्रवोपेतं निहत इति वचनविपरिणामेन सम्बन्धः।

यक्ष्मा पार्श्वरुजानाहरक्तच्छर्द्यंसतापिनम्।

यक्ष्मा-राजयक्ष्मा, पार्श्वरुजादियुतं नरं हन्ति।

छर्धिर्वेगवती मूत्रशकृद्गन्धिः सचन्द्रिका॥७७॥

सास्रविद्भूयरुक्कासश्वासवत्यनुषङ्गिणी।

छर्दिर्हन्ति,। कीदृक्? वेगवती,-महता वेगेन प्रवर्तमाना। तथा, मूत्रशकृतोरिव गन्धो यस्याः सा, "उपमानाच्च" इति गन्धस्येदादेशः। तथा, सचन्द्रिका-जलतैलबिन्दुसंस्थाना चन्द्रिकोच्यते। तथा, सहास्रेण वर्तते विट् सास्रविट्। सास्रविट् च पूयश्च रुक् च कासश्च श्वासश्च, ते विद्यन्ते यस्यां सैवम्। तथा, आनुषङ्गिणी-दीर्घकालानुवर्तिनी।

तृष्णाऽन्यारोगक्षपितं बहिर्जिह्वं विचेतनम्॥७८॥

तृष्णेदृशं नरं हन्ति। कीदृशम्? अपररोगेण क्षपितं-कर्षितम्। बहिर्जिह्वं-बाह्यतो जिह्वां निःसारयन्तम्। तथा, विचेतनम्। एतत्समुदितं रिष्टलक्षणम्।

मदात्ययोऽतिशीतार्तं क्षीणं तैलप्रभाननम्।

मदात्ययोऽतिशयेन शीतपीडितं क्षीणं तैलप्रभमुखं च नर हन्ति।

अर्शांसि पाणिपन्नाभिगुदमुष्कास्यशोफिनम्॥७९॥

हृत्पार्श्वाङ्गरुजाछर्दिपायुपाकज्वरातुरम्।

अर्शांसि पाण्यादिशोफयुतं हृद्रुजाद्यातुरं नरं घ्नन्ति, इति वचनविपिरिणामेव सम्बन्धः। हृदादीनां रुजा सम्बन्धः। हृत्पार्श्वाङ्गरुजा च छर्दिश्च पायुपाकश्च ज्वरश्च तैरातुरं-पीडितम्।

अतीसारविकृतिमाह-

अतीसारो यकृत्पिण्डमांसधावनमेचकैः॥८०॥

तुल्यस्तैलघृतक्षीरदधिमज्जवसासवैः।

मस्तुलुङ्गमषीपूयवेसवाराम्बुमाक्षिकैः॥८१॥

अतिरक्तासितस्निग्धपूत्यच्छघनवेदनः।

कर्बुरः प्रस्रवन् धातून् निष्पुरीषोऽथवाऽतिविट्॥८२॥

तन्तुमान् मक्षिकाक्रान्तो राजीमांश्चन्द्रकैर्युतः।

शीर्णपायुवलिं मुक्तनालं पर्वास्थिशूलिनम्॥८३॥

स्रस्तपायुं बलक्षीणमन्नमेवोपवेशयन्।

सतृट्श्वासज्वरच्छर्दिदाहानाहप्रवाहिकः॥८४॥

अतीसारो यकृत्पिण्डादिभिर्माक्षिकान्तैस्तुल्यो हन्ति। मेचको-नीलवर्णः। अतिरक्तासितस्निग्धपूत्यच्छश्चासौ घनवेदनश्च, इति कर्मधारयः। कर्बुरो-नानावर्णः। कस्मात्पुनरनेकवर्णः? यस्माद्धातून्-रक्तमांसादीन् स्रवति, अत एवाह-धातुन् प्रस्रवन्। लक्षणेऽत्र शतृप्रत्ययः, धातुप्रस्रवणेन हि हेतुना नानावर्णत्वं लक्ष्यते। तथा, निष्पुरीषः-पुरीषरहितः। अथवा, अतिविट्-बहुपुरीषः। तथा, तन्तुमान् मक्षिकाक्रान्तो राजीमांश्चन्द्रकैर्युतश्च। ईदृशोऽतीसारो वक्ष्यमाणं नरं हन्ति। शीर्णा गुदवलयो यस्य तम्। [तथा,] मुक्तो नालो-नालक इव, यस्य तं मुक्तनालं,-मुक्तबन्धनमित्यर्थः। तथा, पर्वास्थिशूलो विद्यते यस्य तम्। तथा, स्रस्तपायुं-स्थानाच्युतगुदम्। तथा, बलेन क्षीणम्। पुनः प्रकृतत्वादतीसारो विशिष्यते। अन्नमेवापक्वमुपवेश्यन् सह तृडादिभिः सप्तभिरुपद्रवैर्युक्तः पूर्वोक्तविशेषणमातुरं हन्ति।

अश्मरी शूनवृषणं बद्धमूत्रं रूजार्दितम्।

अश्मरी शूनवृषणादियुक्तं नरं हन्ति।

मेहस्तृड्दाहपिटिकामांसकोथातिसारिणम्॥८५॥

मेहः-प्रमेहः, तृडाद्युपद्रवयुक्तं नरं हन्ति।

पिटिका मर्महृत्पृष्ठस्तनांसगुदमूर्द्धगाः।
पर्वपादकरस्था वा मन्दोत्साहं प्रमेहिणम्॥८६॥
सर्वं च मांससङ्कोथदाहतृष्णामदज्वरैः।
विसर्पमर्मसंरोधहिध्माश्वासभ्रमक्लमैः॥८७॥

पिटिका मर्मादिगा अथवा पर्वादिस्था मन्दोत्साहं प्रमेहातुरं घ्नन्ति। सर्वं च नरं मांससङ्कोथादिभिः क्लमान्तैर्युक्तं पिटिका घ्नन्ति।

गुल्मः पृथुपरीणाहो घनः कूर्म इवोन्नतः।
सिरानद्धो ज्वरच्छर्दिहिध्माध्मानरुजान्वितः॥८८॥
कासपीनसहृल्लासश्वासातीसारशोफवान्।

गुल्मः पृथुपरीणाहो यावच्छोफवान् हन्ति नरम्।

इदानीमुदरव्याधिनिमित्तं रिष्टमाह-

विण्मूत्रसङ्ग्रहश्वासशोफहिध्माज्वरभ्रमैः॥८९॥

मूर्च्छाच्छर्द्यतिसारैश्च जठरं हन्ति दुर्बलम्।

शूनाक्षं कुटिलोपस्थमुपक्लिन्नतनुत्वचम्॥९०॥

विरेचनहृतानाहमानह्यन्तं पुनः पुनः।

विण्मूत्रादिभिरतीसारान्तैरुपद्रवैर्हेतुभूतैर्जठरं च कर्तृभूतमातुरं हन्ति। कीदृशम्? दुर्बलं-हीनबलम्। तथा, शूने अक्षिणी यस्य तम्। "बहुव्रीहौ सक्थ्यक्ष्णोः" इति षच्। [तथा] कुटिल उपस्थो-बस्तिमेढ्रवृषणादिरूपो, यस्य तम्। तथा, उपक्लिन्ने देहत्वचौ यस्य तम्। [तथा,] विरेचनेन हृत आनाहो यस्य तमपि मुहुर्मुहुरानह्यन्तम्।

पाण्डुरोगरिष्टमाह-

पाण्डुरोगः श्वयथुमान् पीताक्षिनखदर्शनम्॥९१॥

पाण्डुरोगः श्वयथुयुतः पीताक्षिनखदर्शनमातुरं हन्ति।

शोफरिष्टं ब्रूते -

तन्द्रादाहारुचिच्छर्दिमूर्च्छाध्मानाति सारवान्।

अनेकोपद्रवयुतः पादाभ्यां प्रसृतो नरम्॥९२॥

नारीं शोफो मुखाद्धन्ति कुक्षिगुह्यादुभावपि।

राजीचितः स्रवंश्छर्दि ज्वरश्वासाति सारिणम्॥९३॥

तन्द्रादियुक्तः शोफोऽनेकैरुपद्रवैः - ज्वरश्वासादिभिः युतः पादतः प्रसृतो नरं हन्ति। मुखात्प्रसृतः शोफः पूर्वोक्तविशेषणयुक्तो नारीं हन्ति। कुक्षिगुह्यात्प्रसृत उभवपि स्त्रीपुंसौ,

हन्ति। तथा राजीचितो-यथास्वं दोषवर्णाभी रेखाभिर्व्याप्तः, तथा स्रवन्- यथादोषं स्रुतिं कुर्वन् , छर्द्यादियुतं पुरुषं हन्ति।

ज्वरातिसारौ शोफान्ते श्वयथुर्वा तयोः क्षये।

दुर्बलस्य विशेषेण जायन्तेऽन्ताय देहिनः॥९४॥

ज्वरातिसारौ स्वतन्त्रस्य शोफस्यान्ते- अवसाने, जायेते। अथवा श्वयथुस्तयोः - ज्वरातिसारयोः , क्षये जायते। एवं ज्वरातिसारशोफा यस्य शरीरिणो जायन्ते तस्य तेऽन्ताय- मृत्यवे, जायन्ते। दुर्बलस्य विशेषेणन्ताय, शीघ्रकारित्वात्।

श्वयथुर्यस्य पादस्थः परिस्रस्ते च पिण्डिके।

सीदतः सक्थिनी चैव तं भिषक् परिवर्जयेत्॥९५॥

श्वयथुः पादस्थो यस्य पिण्डिके च परिस्रस्ते - स्थानाच्च्युते ,सक्थिनी च सीदतः -सादं गच्छतः , तं - तादृशं नरं , वैद्यो वर्जयेत्।

आननं हस्तपादं च विशेषाद्यस्य शुष्यतः।

शूयेते वा विना देहात्स मासाद्याति पञ्चताम्॥९६॥

मुखं हस्तचरणं च यस्यैते विशेषेण शुष्यतः , देहं विना वा यस्य शूयेते, स आतुरो मासेन पञ्चतां - पञ्चमहाभूतसमत्वं , याति।

विसर्पः कासवैवर्ण्यज्वरमूर्छाङ्गभङ्गवान्।

भ्रमास्यशोफहृल्लासदेहसादातिसारवान्॥९७॥

विसर्पः कासादिमान् हन्ति।

कुष्टं विशीर्यमाणाङ्गं रक्तनेत्रं हतस्वरम्।
मन्दाग्निं जन्तुभिर्जुष्टं हन्ति तृष्णातिसारिणम्॥९८॥

कुष्टं च कर्तृ विशीर्यमाणाङ्गादियुक्तं नरं हन्ति। विशीर्यमाणाङ्गं -कोथवच्छरीरम्।
वायुः सुप्तत्वचं भुग्नं कम्पशोफरुजातुरम्।

वायुः सुप्तत्वगादियुक्तं नरं हन्ति।

वातास्रं मोहमूर्च्छायमदास्वप्नज्वरान्वितम्॥९९॥
शिरोग्रहारुचिश्वाससङ्कोचस्फोटकोथवत्।

वातास्रं -वातरक्तं मोहादियुतं हन्ति।

शिरोरोगारुचिश्वासमोहविड्भेदतृड्भ्रमैः॥१००॥
घ्नन्ति सर्वामयाः क्षीणस्वरधातुबलानलम्।

शिरोरोगेति। सर्वे च ते आमयाश्च ते (शीरोरोगादिभिः) क्षीणस्वरादिकं नरं घ्नन्ति।

वातव्याधिरपस्मारी कुष्ठी रक्त्युदरी क्षयी॥१०१॥
गुल्मी मेही च तान् क्षीणान् विकारेऽल्पेऽपि वर्जयेत्।

वाताख्यो व्यादिर्यस्य स नरः तथाऽपस्मारवान् कुष्ठवान् रक्तपित्ती जठरी क्षयवान् गुल्मवान् प्रमेही च, तान् - एतान् पुरुषान् , क्षीणान् सतोऽल्पेऽपि विकारे सति वर्जयेत्॥

बलमांसक्षयस्तीव्रो रोगवृद्धिररोचकः॥ १०२॥

यस्यतुरस्य लक्ष्यन्ते त्रीन् पक्षन्न स जीवति।

बलमांसयोरत्यन्तं क्षयः रोगस्य वृद्धिः तथाऽरोचकः एते यस्यातुरस्य लक्ष्यन्ते- उपलभ्यन्ते, स त्रीन् पक्षान् - सार्धं मासं , न जीवति।

वाताष्ठीलाऽतिसंवृद्धा तिष्टन्ती दारुणा हृदि॥ १०३॥

तृष्णया नु परीतस्य सद्यो मुष्णाति जीवितम्।

वाताष्ठीलाऽत्यन्तं प्रवृद्धा हृदि तिष्ठन्ती दारुणा- अतिरुक्करी , तृषायुक्तस्य पुंसः शीघ्रमेव जीवितहारिणी भवति।

शैथिल्यं पिण्डिके वायुर्नीत्वा नासां च जिह्मताम्॥ १०४॥

क्षीणात्यायम्य मन्ये वा सद्यो मुष्णाति जीवितम्।

वायुहृ पिण्डिके शैथिल्यं नीत्वा तथा नासां जिह्मतां - कुटिलतां नीत्वा तथा क्षीणस्य नरस्य मन्ये वा आयम्य आयामयित्वा द्राग् जीवितं मुष्णाति॥

नाभीगुदान्तरं गत्वा वङ्क्षौ वा समाश्रयन्॥ १०५॥

गृहीत्वा पायुहृदये क्षीणदेहस्य वा बली।

मलान् बस्तिशिरो नाभिं विबद्ध्य जनयन् रुजम्॥ १०६॥

कुर्वन् वङ्क्षयोः शूलं तृणां भिन्नपुरीषताम्।

श्वासं वा जनयन् वायुर्गृहीत्वा गुदवङ्क्षणम्॥ १०७॥

वायुर्नाभीगुदयोरनन्तरं - मध्यं गत्वा वङ्क्षौ वा समाश्रयन् जीवितं मुष्णाति।

बली वा पवनः पायुं हृदयं च गृहीत्वा अवष्टभ्यः , क्षीणदेहस्य पुंसः सद्यो मुष्णाति जीवितम्।

वायुर्मर्मलान् विबध्य - सन्निरुध्य , बस्तिशिरोनाभिं च विबध्य रुजं जनयन् सद्यो मुष्णाति जीवितम्।

वायुर्वङ्क्षणयोः शूलं तथा तृष्णां कुर्वन् भिन्नपुरीषतां च विदधथवा श्वासं जनयन् गुदं वङ्क्षणौ च गृहीत्वा सद्यो मुष्णाति जीवितम्।

वितत्य पर्शुकाग्राणि गृहीत्वोरश्च मारुतः।

स्तिमितस्याततताक्षस्य सद्यो मुष्णाति जीवितम्॥ १०८॥

मारुतः पर्शुकानां - पार्श्वस्थां , अग्राणि - प्रान्तानि , वितत्यप्रस्तार्य , तथोरः - वक्षो , गृहीत्वा स्तिमितस्य - आर्द्रतां गतस्य सखेदस्य निश्चलस्य वा , तथा आतताक्षस्य - प्रसारितनेत्रस्य , सद्यो मुष्णाति जीवितम्।

सहसा ज्वरसन्तापस्तृष्णा मूर्च्छा बलक्षयः।

विश्लेषणं चसन्धीनां मुमूर्षोरुपजायते॥ १०९॥

सहसा- झटित्येव , ज्वरसन्तापः , तथा तृष्णा मूर्च्छा बलक्षयः सन्धिविश्लेषश्च , इत्येतन्मुमूर्षोः - सद्यो मरिष्यतो जायते।

गोसर्गे वदनाद्यस्य स्वेदः प्रच्यवते भृशम्।

लेपज्वरोपतप्तस्य दुर्लभं तस्य जीवितम्॥ ११०॥

गोसर्गे - गवां मोक्षकाले प्रत्यूषसि , लेपज्वरेण - श्लेष्मज्वरेणोपतप्तस्य यस्यवदनात् स्वेदः प्रच्यवते , तस्य दुर्लभं जीवितम्। दुर्लभमिति " ईषद्दुःसुषु" इत्यादिना खल्। " न सुन्दुर्भ्यां " इति नुन्निषेधः। ननु ,रिष्टानां निश्चितानामिहाभिधानप्रस्तावात् किमिदमनिश्चितमुक्तं दुर्लभमिति? मैवम्। एकान्तिक एवार्थोऽयं हि दुर्लभशब्दः। तथा च वाल्मीकिना जगदे - " पुत्र वीक्षस्व पितरं सुहृष्टं च कुरु प्रियं। दिर्लभं जीवितं ह्यस्य पुनः पुत्रो भविष्यति॥" इति। तस्माद्दुर्लभशब्दस्य नास्ति जीवितमित्येष निश्चित एवार्थः प्रसिध्दः।

प्रवालगुलिकाभासा यस्य गात्रे मसूरिकाः।

उत्पद्याशु विनश्यन्ति न चिरात्स विनश्यति॥ १११॥

मसूरिकाः - मसूरसंस्थानाः पिटिकाः प्रवालगुटिकासदृशा यस्य शरीर उत्पद्य शीघ्रं विनश्यन्ति, स नरो द्रागेव विनश्यति।

मसूरविदलप्रख्यास्तथा विद्दमसन्निभाः।

अन्तर्वक्राः किणाभाश्च विस्फोटा देहनाशनाः॥ ११२॥

मसूरविदलाकाराः , तथा प्रवालसदृशाः , तथाऽन्तः - मध्ये , वक्रं - मुखं , येषां ते , तथा किणाभाः , एते चतुष्प्रकारा अपि विस्फोटा देहस्य नाशनाः।

कामलाऽक्ष्णोर्मुखं पूर्णं शङ्खयोर्मुक्तमांसता।

सन्त्रासश्चोष्णताऽङ्गे च यस्य तं परिवर्जयेत्॥ ११३॥

यस्याक्ष्णोः कामला - पीताभासत्वं भवति , मुखं पूर्णं - स्वाभाविकम्, शङ्खयोर्मुक्तमांसत्वम् , सन्त्रासः , उष्णता चाङ्गे भवति , तमातुरं वर्जयेत् - अयशः परिहृतये न चिकित्सेत्।

अकस्मादनुधावच्च विघृष्टं त्वक्समाश्रयम्।

अकस्मात् - कारणं विना , त्वक्समाश्रयं विघृष्टं यस्यानुधावच्च लक्ष्यतेन् तमपि वैद्यो वर्जयेत्।

(चन्दनोशीरमदिराकुणपध्वाङ्क्षगन्धयः।

शैवालकुक्कुटशिखाकुङ्कुमालमषीप्रभाः॥१॥

अन्तर्दाहा निरूष्माणः प्राणनाशकरा व्रणाः।)

यो वातजो न शूलाय मर्मजश्च रुजे न यः।

अचूर्णश्चूर्णकीर्णाभो यत्राकस्माच्च दृश्यते॥११५॥

रूपं शक्तिध्वजादीनां सर्वांस्तान्वर्जयेद्व्रणान्।

यो व्रणो वातजो लिङ्गानुमितः शूलाय न भवति , पित्तजो न दाहाय , कफजश्च न पूयाय , मर्मजश्च न पीडायै। तथा , यस्मिन् व्रणेऽचूर्णश्चूर्णेनाकीर्णाभः - चूर्णव्याप्त इव दृश्यते। तथा यस्मिन् व्रणे कारणं विना - अकस्मात् , रूपं शक्तिध्वजादीनां दृश्यते। आदिशब्देन शल्यतोमरादिपरिग्रः। तान् सर्वान् व्रणान् वर्जयेत् ।

विण्मूत्रमारुतवहं कृमिणं च भगन्दरम्॥११६॥

विण्मूत्रमारुता येन निःसरन्ति कृमिजुष्टश्च यः तं च भगन्दरं वर्जयेत्। कृमिणमिति "पमदित्वात्"('लोमादिपामादिपिच्छादिभ्यः शनेलचः।') नप्रत्ययः।

घट्टयन् जानुना जानु पादावुद्यम्य पातयन्।

योऽपास्यति मुहुर्वक्रमातुरो न स जीवति॥११७॥

यश्चातुरो जानुना जानु घट्टयन् तथा पादावुद्यम्य-उत्क्षिप्य, पातयन् - सङ्क्षिपन् , मुहुर्मुहुरात्मीयं वक्रं- मुखं, अपास्यति-कारणं विनाऽन्यत्र नयति, स न जीवति।

दन्तैश्छिन्दन्नखाग्राणि तैश्च केशांस्तृणानि च।

भूमिं काष्ठेन विलिखन् लोष्टं लोष्टेन ताडयन्॥ ११८॥

हृष्टरोमा सान्द्रमूत्रः शुष्ककासी ज्वरी च यः।

मुहुर्हसन् मुहुःक्ष्वेडन् शय्यां पादेन हन्ति यः॥ ११९॥

मुहुश्छिद्राणि विसृशन्नातुरो न स जीवति।

यश्चातुरो हृष्टरोमा सान्द्रमूत्रः तथा शुष्ककासी तथा ज्वरी , स इदमिदं कुर्वन्न जीवति। किं तत् ? इत्याह- दन्तैश्छिन्दनखाग्राणि, तथा तैरेव -दन्तैः , केशांश्छिन्दन्, तथा -तृणानि छिन्दन् , तथा भुवं काष्ठेन विलिखन् , लोष्टमपरलोष्टेन तडयन्, मुहुः पुनःपुनर्हसन् ,तथा मुहुः क्ष्वेडन् - शब्दं कुर्वन् , मुहुः शय्यां पादेन यो हन्ति , तथा छिद्राणि - अपराधान् विमृशन् - घोषयन्। केचिद्व्याचक्षते,- छिद्राणि-नासिकादीनि, विमृशन् -संस्पृशन्, इति।

मृत्यवे सहसाऽऽर्तस्य तिलकव्यङ्गविप्लवः॥ १२०॥

मुखे, दन्तनखे पुष्पं, जठरे विविधाः सिराः।

अर्तस्य-आतुरस्य, सहसा जातो मुखे-वदने, तिलकव्यङ्गविप्लवो मृत्यवे-मरणाय। तथा, दन्ताश्च नखाश्च दन्तनखं, तस्मिन् दन्तनखे, सहसा पुष्पं जातमातुरस्य मृत्यवे। तथा, जठरे सहसा विविधाः-नानाविधा वर्णेन संस्थानेन च, सिरा जाता आर्तस्य मृत्यवे-मरणं सूचयन्तीत्यर्थः।

ऊर्ध्वश्वासं गतोष्माणं शूलोपहतवङ्क्षणम्॥ १२१॥

शर्म चानधिगच्छन्तं बुद्धिमान् परिवर्जयेत्।

ऊर्ध्वश्वासादिमन्तमातुरं सुमतिवर्जयेत्-न चिकित्सेत्।

विकारा यस्य वर्धन्ते प्रकृतिः परिहीयते॥ १२२॥
सहसा सहसा तस्य मृत्युर्हरति जीवितम्।

विकाराः-ज्वरादयः, यस्यातुरस्याकस्माद्वर्धन्ते। प्रकृतिः-स्वभावः, परिहीयते। यथा, शूरः कातरः स्यात्, दाता वा तृष्णावान्, इत्यादि। अथवा, प्रकृतिः-वातादिः, तेन वातप्रकृतिः पित्तप्रकृतिर्भवेत्, इत्यादि। तस्य सहसा-शीघ्रमेव, जीवितं मृत्युर्हरति।

यमुद्दिश्यातुरं वैद्यः सम्पादयितुमौषधम्॥ १२३॥
यतमानो न शक्नोति दुर्लभं तस्य जीवितम्।

यमातुरमुद्दिश्य भिषग्यतमान औषधं सम्पादयितुं न शक्नोति, तस्य दुर्लभं जीवितम्।

विज्ञातं बहुशः सिद्धं विधिवच्चावचारितम्॥ १२४॥
न सिध्यत्यौषधं यस्य नास्ति तस्य चिकित्सितम्।

यस्यातुरस्यौषधं विज्ञातं बहुशः सिद्धं विधानेन चोपयुक्तं न सिध्यति, तस्य चिकित्सितं नास्ति।

भवेद्यस्यौषधेऽन्ने वा कल्प्यमाने विपर्ययः॥ १२५॥
अकस्माद्वर्णगन्धादेः स्वस्थोऽपि न स जीवति।

यस्यौषधे-कषायघृतलेहादौ, तथाऽन्ने-भक्तसूपादिके, वा कल्प्यमाने विपर्ययः-अन्यथासम्पत्तिर्वर्णगन्धरूपादेः, अकस्मात्-निमित्तं विनाऽपि भवेत्, स स्वस्थोऽपि न जीवति।

निवाते सेन्धनं यस्य ज्योतिश्चाप्युपशाम्यति॥ १२६॥

आतुरस्य गृहे यस्य भिद्यन्ते वा पतन्ति वा।

अतिमात्रममत्राणि दुर्लभं तस्य जीवितम्॥ १२७॥

यस्य चातुरस्य गृहे निवात इन्धनसहितं ज्योतिः-अग्न्यादिरूपं शाम्यति, तस्य दुर्लभं जीवितम्।

यस्य चातुरस्य गृहेऽमत्राणि-भाजनानि, अतिमात्रं-अत्यन्तं भिद्यन्ते, अथवा पतन्ति, तस्य दुर्लभं जीवितम्।

यं नरं सहसा रोगो दुर्बलं परिमुञ्चति।

संशयप्राप्तमात्रेयो जीवितं तस्य मन्यते॥ १२८॥

यं नरं दुर्बलं संशयप्राप्तं सन्तं सहसा-झटित्येव, रोगो मुञ्चति तस्य नरस्यात्रेयो जीवितं संशयप्राप्तं मन्यते-प्रतिपद्यते।

कथयेन्न च पृष्टोऽपि दुःश्रवं मरणं भिषक्।

गतासोर्बन्धुमित्राणां न चेच्छेत्तं चिकित्सितुम्॥ १२९॥

गतासोर्बन्धुमित्राणि तेषाम्, प्रकृतत्वाद्गतासुसम्बन्धि मरणं दुःश्रवं पृष्टोऽपि वैद्यो न कथयेत्, किमुतापृष्टः? तथा हि वैद्योक्ताद्दुःश्रवमरणशब्दश्रवणात् सन्ताप उत्पद्यते तत्सुहृदाम्। एवं च भिषजः परोपतापकरणात् पापेन योगः स्यात्। न च तं-गतासुं, चिकित्सितुं वैद्य इच्छेत्। तथाविधातुरचिकित्सनाद्धि वैद्यस्यायशःसंयोगः स्यात्। गतासोरिति भाविनिभूतवदुपचाराद्भविष्यति क्तो वैद्यः। यथा-"वृष्टो देवः सम्पन्नाः शालयः" इति।

चिकित्सानैष्फल्याच्च तं नोपक्रमेदिति प्रतिपादयन्नाह-

यमदूतपिशाचाद्यैयत्परासुरुपास्यते।
घ्नद्भिरौषधवीर्याणि तस्मात्तं परिवर्जयेत्॥ १३०॥

यमदूतपिशाचरक्षःप्रभृतिभिः, यत्-यस्मात्, परासुः गतासुः, उपास्यते-सेव्यते। कि म्भू तै ः ? औषधानां-रसायनादीनां, वीर्याणि-शक्तिः, घ्नद्भिः-यथायथं व्याधिप्रशमनसामर्थ्यमन्यथा कुर्वद्भिः। तस्मात्तं परिवर्जयेत्।

इदानीं रिष्टज्ञानादरस्य हेतुमाह-

आयुर्वेदफलं कृत्स्नं यदायुर्ज्ञे प्रतिष्ठितम्।
रिष्टज्ञानादृतस्तस्मात्सर्वदैव भवेद्भिषक्॥ १३१॥

यत्-यस्मात्, आयुर्ज्ञे-आयुर्वेदविदि वैद्ये, आयुर्वेदफलं सकलं प्रतिष्ठितम्। तस्माद्रिष्टाज्ञानादृतो भिषग्भवेत्। आयुर्वेदस्य ह्येतत्फलम्,-यदायुषः परिज्ञानं परिपालनं च। तच्चोभयं रिष्टज्ञानाज्जायते, तस्मादत्रादरः कार्यः।

मरणं प्राणिनां दृष्टमायुःपुण्योभक्षयात्।
तयोरप्यक्षयाद्दृष्टं विषमापरिहारिणाम्॥ १३२॥

इति श्री वैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भाटविरचिता-यामष्टाङ्गहृदयसंहितायां द्वितीये शारीरस्थाने विकृतिविज्ञानीयो नाम पञ्चमोऽध्यायः॥५॥

आयुश्च पुण्यं चोभयं च, प्रकृतत्वादायुःपुण्ययोरुभयोस्तेषामायुःपुण्योभयानां क्षय आयुःपुण्योभयक्षयः, तस्मादायुःपुण्योभक्षयात् मरणं प्राणिनां-शरीरिणां, दृष्टं-उपलब्धं,

मुनीन्द्रैः। तत्र सर्वोपकरणसम्पन्नामपि सम्यग्वाह्यमानरथवदुपभोगवशेन यथोचितप्रमाणायुःक्षयाद्यन्मरणं जायते, तदायुःकक्षयादिति बोध्यम्। ज्योतिःशास्त्रविद्भिर्जातकपरिकल्पितनियतायुषामन्येषां च यदाहाराद्यभावेन मरणं, तत्पुण्यक्षयाद्बोध्यम्। यत्रायुःक्षयो यथावल्लक्षितो दृश्यते, तथैव च पुण्यक्षयः, तदुभयक्षयान्मरणं बोध्यम्। न चैतदेव हेतुत्रयमायुःपुण्योभयक्षयलक्षणं शरीरिणां मरणे कारणम्। किन्तर्हि ? अन्यदपि विद्यत इत्याह-तयोरित्यादि। ननु, आयुःपुण्योभयक्षयात्मकं लक्षणत्रितयं प्रकृतम्। ततश्च तेषामिति निर्देशः प्राप्तः। नैतदेवम्। इह ह्यायुःपुण्ययोरेव परामर्शः सर्वनाम्नायुक्तो न तु तृतीयस्य हेतोः, तदात्मकत्वादुभयस्य। अतः 'तयोरप्यक्षयात्' इति युक्तो द्वयोर्निदेशः। तयोः-आयुःपुण्ययोः, अहानितोऽपि मरणं दृष्टम्। यस्माद्दीर्घायुषोपेतानां तथा पुण्यवत्त्वलक्षणं यत्सर्वोपकरणत्वं तत्सम्पन्नानामसेव्योद्भूतम्। विषमंचण्डमातङ्गतुरङ्गगोमहिषदुर्गन्धवेगश्वभ्रप्रपातकेसरीसरीसृपादिसेवनं, न तत्परिहरन्त्येवं शीलं येषां ते विषमापरिहारिणः, तेषां यन्मरणं तद्विषमापरिहरणाद्भवति। यद्यप्यायुःक्षयादेव सर्वं मरणम्, तथाऽपि पुण्यक्षयविषमापरिहरणाभ्यामायुःक्षयस्यैव कारणभूतत्वादेवमुक्तम्। तदेवं विद्यमानायुष्ट्वे तथा सर्वोपकरणसम्पन्नत्वे विषममपरिहरतां यन्मरणं तद्विषमापरिहारिणां बोध्यम्। बाह्यवाहकदोषादिकारणरथविनाशसदृशमिति।

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टाङ्गहृदयटी-कायां सर्वाङ्गसुन्दराख्यायां द्वितीये शारीरस्थाने विकृति-विज्ञानीयो नाम पञ्चमोऽध्यायः समाप्तः ॥५॥

****

षष्ठोऽध्यायः।

विकृतिविज्ञानीयाध्यायादनन्तरं दूतादिविज्ञानीयाध्यायारम्भेऽयं सम्बन्धः। उक्तमायुःप्रमाणं स्वस्थातुराणां रूपेन्द्रियस्वरच्छायादिविकृतिलक्षणैः प्रतिनियतविशिष्ट-व्याधिलक्षणैरपि। अयं पुनरध्यायो दूताद्याश्रयैः शुभाशुभनिमित्तैः शुभाशुभं सूचयितुमारभ्यते _

अथातो दूतादिविज्ञानीयं शारीरं व्याख्यास्यामः।

इति ह स्माहुरात्रेयादयो महर्षयः।

(गद्यसूत्रे॥२॥)

दूतः-स्त्रीपुरुषादिर्य आतुरेण प्रेष्यते स कथ्यते। दूत आदिर्येषां ते दूतादयः। आदिग्रहणाद्वैद्यस्य गृहान्निर्गच्छतः पथि गच्छतो यावदातुरगृहे प्रवेशः, प्रविष्टस्यापि यानि शुभाशुभसूचकानि निमित्तानि दृश्यन्ते श्रूयन्ते च, तेषां परिग्रहः। दूतादीनां विज्ञानं दूतादिविज्ञानम्। यथैते दूतादयः शुभा एतेऽशुभा इति विशिष्टं-निश्चितं, ज्ञानं-अवबोधः, परिच्छेद इत्यर्थः। तस्मै हितो दूतादिविज्ञानीयः। शेषं पूर्ववद्व्याख्येयम्।

पाखण्डाश्रमवर्णानां सवर्णाः कर्मसिद्धये।

त एव विपरीताः स्युर्दूताः कर्मविपत्तये॥१॥

पाखण्डः-षण्णवतिभेदभिन्नो व्रात्यविशेषः। आश्रमाः-ब्रह्मचारिगृहस्थभिक्षुवैखानसभेदेन चत्वारः। वर्णाः-ब्राह्मणक्षत्रियविड्शूद्राश्चत्वारः। ते च प्रतिलोमानुलोमतो बहवः। तेषां पाखण्डादीनां ये सवर्णाः-समानवर्णास्तुल्यजातयो, दूतास्ते च कर्मसिद्धये-कर्मसिध्यर्थं भवन्ति, कर्मसिद्धिं सूचयन्तीत्यर्थः यथा-पाखण्डस्य पाखाण्डो दूतः, ब्रह्मचारिणो ब्रह्मचारी, गृहस्थस्य गृहस्थो, वानप्रस्थस्य वानप्रस्थो, भिक्षोर्भिक्षुः यावच्छूद्रस्य शूद्रः शुभ इति। त एव-पाखण्डादयो, विपरीताः-विजातीयाः सवर्णा ये न भवन्ति ते, कर्मविपत्तये-चिकित्सानैष्फल्यायभवन्ति, चिकित्सानैष्फल्यं सूचयन्तीत्यर्थः।

दीनं भीतं द्रुतं त्रस्तं रूक्षामङ्गलवादिनम्।

शस्त्रिणं दण्डिनं षण्ढं मुण्डश्मश्रुजटाधरम्॥२॥

अमङ्गलाह्वयं क्रूरकर्माणं मलिनं स्त्रियम्।

अनेकं व्याधितं व्यङ्गं रक्तमाल्यानुलेपनम्॥३॥

तैलपङ्काङ्कितं जीर्णविवर्णार्द्रैकवाससम्।

खरोष्ट्रमहिषारूढं काष्ठलोष्टादिमर्दिनम्॥४॥

नानुगच्छेद्भिषग्दूतमाह्वयन्तं च दूरतः।

सवर्णमपि दूतं दीनभीतादिविशेषणविशिष्टं यावत्काष्ठलोष्टादिमर्दिनं भिषग् दृष्ट्वा नानुगच्छेच्चिकित्सानैष्फल्यादिति। रूक्षवादिनं-परुषभाषिणम्। अमङ्गलवादिनं-मरिष्यत्यसौ पतिष्यति न जीवतीत्याद्यभङ्गलवादी, तम्। तथा, षण्ढं-नपुंसकम्। तथा, मुण्डं-कृतवपनं, श्मश्रु-मुखव्यञ्जनं, यस्य स एवम्। मुण्डश्मश्रुश्चासौ जटाधरश्च तम्। तथा, अमङ्गलः-अकल्याणः, आह्वयो-नाम, यस्य तम्। व्यङ्गं-हीनाङ्गम्। तैलपङ्काभ्यामङ्कितं-दिग्धम्। तथा, जीर्णादिकं वासो यस्य तम्। तथा, दूरादाह्वयन्तं-आकारयन्तं, नानुयायात्।

अशास्तचिन्तावचने नग्ने छिन्दति भिन्दति॥५॥

जुह्वाने पावकं पिण्डान् पित्तृभ्यो निर्वपत्यपि।

सुप्ते मुक्तकचेऽभ्यक्ते रुदत्यप्रयते तथा॥६॥

वैद्ये दूता मनुष्याणामागच्छन्ति मुमूर्षताम्।

चिन्ता च वचनं च चिन्तावचने, अशास्ते चिन्तावचने यस्येति मत्वर्थे बहुव्रीहिः। वैद्येऽशास्तचिन्तां कुर्वति, अशास्त वचनं चोच्चारयति। मनुष्याणां मुमूर्षतां-आसन्नमृत्यूनां, सम्बन्धिनो दूता आयान्ति। मुमूर्षतामिति "आशङ्कायामुपसङ्ख्यानम् (यां सन् वक्तव्यः)" इति सन्। "म्रियतेर्लुङ्लिङोश्च" इति नियमादात्मनेपदाभावः। तथा च किम्भूते ? नग्ने-विवस्त्रे, छिन्दति भिन्दति किञ्चित्। तथा, पावकं-अग्निं जुह्वाने, पितृभ्यश्च पिण्डान् निर्वपति-अनुप्रयच्छति, यावदप्रयतेअशुचौ। मनुष्याणामित्युपलक्षणम्, स्त्र्यादयोऽपीह गृह्यन्त एव।

विकारसामान्यगुणे देशे कालेऽथवा भिषक्॥७॥

दूतमभ्यागतं दृष्ट्वा नातुरं तमुपाचरेत्।

विकारेण-ज्वरादिना, सामान्यः-तुल्यो, गुणो यस्यासौ विकारसामान्यगुणः, तस्मिंस्तथाविधे, देशे काले वा दूतमभ्यागतं-सम्मुखमागच्छन्तं, दृष्ट्वा भिषक्तमातुरं-दूतस्य

प्रेषकं, नोपचरेत्। यथा,-कफजे ज्वरादावामये घृतोदकादिद्रवसमीपे देशेऽनूपे वा काले वा प्रत्युषस्यागतो दूतोऽशुभः। पित्तामये वह्न्यादिना सन्तप्ते देशे काले मध्याह्ने दूतोऽशुभः। वाररोगे परुषरूक्षसिकतापाषाणशर्करादिविशिष्टे देशे काले सायाह्ने दूतोऽशुभः। विपरीतस्तु शुभः। छर्दिमेहातीसारादिषु सेतुभङ्गोऽशुभः। एष्वेव सेतुवन्धः शुभः।

स्पृशन्तो नाभिनासास्यकेशरोमनखद्विजान्॥८॥

गुह्यपृष्ठस्तनग्रीवाजठरानामिकाङ्गुलीः।

कार्पासबुससीसास्थिकपालमुशलोपलम्॥९॥

मार्जनीशूर्पचैलान्तभस्माङ्गारदशातुषान्।

रज्जूपानत्तुलापाशमन्यद्वा भग्नविच्युतम्॥१०॥

तत्पूर्वदर्शने दूता व्याहरन्ति मरिष्यताम्।

तदित्यनेन वैद्यः परामृश्यते। तस्य पूर्वदर्शनं-प्रथमदर्शनं, तस्मिन् सति तत्काल एव, मरिष्यतां-आसन्नमरणानां, सम्बन्धिनो दूता नाभ्याति स्पृशन्तो व्याहरन्ति। "लक्षणहेत्वोः क्रियायाः" इति हेतावत्र शतृप्रत्ययः। नाभ्यादिस्पर्शनं हि मुमूर्षुदूतव्याहरणस्य हेतुः। मुमूर्षोर्वयं दूता इति प्रतिपादयन्तीत्यर्थः। अनामिकाङ्गुलिः-कनीयसीनिकटस्थिता। दशा-वस्त्रवर्तिः। उपानत्-चर्मपादुका। तुला-मानविशेषः। न केवलं नाभ्यादि स्पृशन्तोऽपरमपि च भग्नविच्युतं च स्पृशन्त इति योज्यम्।

तथाऽर्धरात्रे मध्याह्ने सन्ध्ययोः पर्ववासरे॥११॥

षष्ठीचतुर्थीनवमीराहुकेतूदयादिषु।

भरणीकृत्तिकाऽऽश्लेषापूर्वाऽऽर्द्रापैत्र्यनैर्ऋते॥१२॥

नाभ्यादिकमस्पृशन्तोऽप्यर्धरात्रादिष्वागच्छन्तो मरिष्यतां दूता व्याहरन्ति। अर्धरात्र इति "अहःसर्वैकदेश" इत्यत्र चकारादच् समासान्तः। आगच्छन्त इत्यत्रापि योज्यम्। पैत्र्यनैर्ऋत इति मघामूलाख्ये नक्षत्रे। आदिशब्देनोत्पातदर्शनकृष्णचतुर्दश्यादयो गृह्यन्ते।

सङ्ग्रहेऽप्युक्तम् (श.अ.१ २) - "मध्याह्नोभयसन्ध्यार्धरात्रचतुर्थीषष्ठीनवमीपर्वदिनेषु ग्रहोपरागोत्पातदर्शनभरणीकृत्तिकार्द्राऽऽश्लेषामघामूलपूर्वासु चाशुभः।" इति।

यस्मिंश्च दूते ब्रुवति वाक्यमातुरसंश्रयम्।
पश्येन्निमित्तमशुभं तं च नानुव्रजेद्भिषक्॥ १३॥

यस्मिन् दूते आतुरसंश्रयं-आतुरप्रतिबद्धं, वाक्यं ब्रुवति सत्यशुभं निमित्तं भिषक् पश्येत्। तं-दूतमातुरचिकित्सार्थमागतं, नानुव्रजेत्।

किम् तदशुभं निमित्तम्? इत्याह-

तद्यथा विकलः प्रेतः प्रेतालङ्कार एव वा।
छिन्नं दग्धं विनष्टं वा तद्वादीनि वचांसि वा॥ १४॥
रसो वा कटुकस्तीव्रो गन्धो वा कौणपो महान्।
स्पर्शो वा विपुलः क्रूरो यद्वाऽन्यदपि तादृशम्॥ १५॥
तत्सर्वमभितो वाक्यं वाक्यकालेऽथवा पुनः।
दूतमभ्यागतं दृष्ट्वा नातुरं तमुपाचरेत्॥ १६॥

तद्यथाशब्दोऽशुभनिमित्तसंदर्शनसम्बन्धार्थः। विकलः-अङ्गहीनः काणकुण्ठादिकः। प्रेतो-मृत एव। प्रेतालङ्कारो यो मृतस्यानुलेपनवस्त्रादिनाऽलङ्कारो विधीयते। छिन्नं-रज्ज्वादिकम्। दग्धं-वस्त्रादिकम्। विनष्टं वा-घटभाजनादिकम्। तद्वादीनि-छिन्नदग्धविनष्टवाचकानि, वचांसि-वचनानि, श्रोत्रेण श्रूयन्ते। रसो वा कटुकस्तीव्र इत्यनेन रसाधारं द्रव्यमनाहारप्रतिबद्धमुपलक्षयते। रसो हि रसनेन्द्रियग्रह्य एव। तस्मात् कटुकरसाधिष्ठितं द्रव्यं मरिचादि कटुकरसशब्देनेह गृह्यते। लोकेऽपि रसेन द्रव्यं व्यपदिश्यत एव। यथा-इदं मधुरं द्रव्यमिदमम्लमिति। तदेवमुत्कटकटुकरसाधिष्ठितं द्रव्यं यदा चक्षुषा गृह्यते वैद्येन, तदा न शुभम्। तीव्रग्रहणादतीव्रस्य कुठेरकादेर्निरासः। गन्धश्च कौणपो-महान्

दुर्गन्धोऽतिशयेन, तत्काल एव घ्राणेन्द्रियेण गृह्यते, स्पर्शो वा विस्तीर्णः क्रूरः-अतिदुःसहः, तत्काल एवाभ्यादिसम्बन्धी स्पर्शनेन्द्रियेण गृह्यते, सोऽशुभः। यद्वेति। अथवाऽपरमपि यत्तादृशंविकलाद्यशुभनिमित्तसदृशमनिर्दिष्टमपि रक्तकरवीरकुसुमादिकं, तत्सर्वं वाक्यमभितः-आतुराश्रयाद्वाक्यादग्रे, अथवा वाक्यकाले-आतुराश्रयावाक्यमध्ये विकलाद्यशुभनिमित्तं तदानीमप्यशुभसूचकत्वात् तस्मिन् काले, दूतमभ्यागतं-आभिमुख्येन तत्कालमेवागतं, दृष्ट्वा येनासौ प्रेषितो दूतस्तमातुरं नोपाचरेत्।

अथान्यदप्यशुभं निमित्तमाह-

हाहाक्रन्दितमुत्कुष्टमाकुष्टं स्खलनं क्षुतम्।

वस्त्रातपत्रपादत्रव्यसनं व्यसनीक्षणम्॥ १७॥

चैत्यध्वजानां पात्राणां पूर्णानां च निमज्जनम्।

हतानिष्टप्रवादाश्च दूषणं भस्मपांसुभिः॥ १८॥

पथःच्छेदोऽहिमार्जारगोधासरठवानरैः।

दीप्तां प्रति दिशं वाचः क्रूराणां मृगपक्षिणाम्॥ १९॥

कृष्णधान्यगुडोदश्विल्लवणासवचर्मणाम्।

सर्षपाणां वसातैलतृणपङ्केन्धनस्य च॥ २०॥

क्लीबक्रूरश्वपाकानां जालवागुरयोरपि।

छर्दितस्य पुरीषस्य पूतिदुर्दर्शनस्य च॥ २१॥

निःसारस्य व्यवायस्य कार्पासादेररेरपि।

शयनासनयानानामुत्तानानां तु दर्शनम्॥ २२॥

न्युब्जानामितरेषां च पात्रादीनामशोभनम्।

हाहाक्रन्दितमित्यादिकमशोभनमिति वक्ष्यमाणेन सम्बन्धः। हाहेति क्रन्दितं-रुदितं क्रणनं हाहाक्रन्दितम्। तथा, उत्कुष्टं उच्चैः कृत्वा क्रुष्टं, आकृष्टं-आक्रोशः। स्खलनं-पतनं, वैद्यस्याऽन्यस्य वा। क्षुतं-छिक्का। वस्त्रादीनां-वैद्यस्य सम्बन्धिनां, व्यसनं-विनाशः। व्यसनिनां-आपद्गतानां, ईक्षणं-आलोकनं, न शोभनमिति सर्वत्र योज्यम्।

चैत्यादीनां निमज्जनं-पतनं ब्रुडनं च। तथा, हत इत्येवंरुपाणामनिष्टानां-अमङ्गलानां, प्रवादाः-उच्चैरुच्चरितानि वाक्यानि। दूषणं भस्मपांसुभिः-वैद्यस्यैव पथि गच्छतो भस्मना पांसुना व विकिरणमशोभनम्, कर्मसिद्ध्यभावादातुरस्यापि मरणसूचकत्वात्। एवमन्यत्राप्युभयोरशोभनत्वं योज्यम्।

पथःच्छेद इति मार्गस्य छेदः। कैः ? सर्पमार्जारादिभिः। सरठः-सर्पसदृशी रक्तवर्णादिमुखी प्राणिजातिश्चक्रलण्ड इत्यपरपर्य़ायः।

यस्यां दिशि सूर्यः स्थितः सा दीप्ता भण्यते। तथा चोक्तम् "अङ्गारिण्यर्कनिर्मुक्ता, दीप्ता तस्यां दिवाकरः। प्रधूमितैष्यर्सूर्या वै, शान्ताः पञ्चेतरा दिशः॥" इति। दीप्तां दिशं प्रति या वाचो-वाण्यः, क्रूराणां-क्रव्यभुजां, मृगाणां-द्वीपिश्वगालादीनां, पक्षिणां-गृध्रश्येनादीनां, ता अशोभना इति लिङ्गविपरिणामेन सम्बन्धः।

कृष्णधान्यादीनां यद्दर्शनं वैद्यस्य पथि गच्छत आतुरगृहे प्रविशतो वा तदशोभनम्, अशुभसूचकत्वात्। उदश्वित्-तक्रम्। सर्षपो-रक्ताभासः। क्रूरो-निष्ठुरवादी। श्वपाकः-चाण्दालः। जालं-आनायः। वागुरा-मृगबन्धनी। पूतिः-दुर्गन्धिः। दुर्दर्शनः-करालाकृतिः। निःसारस्य-व्यपेतसारस्य वस्तुनः। व्यवायस्य-मैथुनस्य। कार्पासादेरित्यादिशब्देन कार्पासबुससीसादेर्दूतचिन्तानिर्दिष्टस्य (श्लो. ९) ग्रहणम्। कार्पासादेः पदार्थस्य दर्शनं पथि गच्छत आतुरगृहं प्रविशतो वाऽशोभनम्। अरेर्दर्शनमशोभनम्। प्रकृतत्वाद्वैस्ध्यस्यात्मशत्रुदर्शनम्। तथा, शयनादीनामुत्तानानां-ऊर्ध्वमुखस्थितपादानां दर्शनम्, तथेतरेषां-पात्रादीनां घटशरावोदञ्चनादीनामधोमुखानां, दर्शनमशोभनम्।

पुंसंज्ञाः पक्षिणो वामाः स्त्रीसंज्ञा दक्षिणाः शुभाः॥२३॥

प्रदक्षिणं खगमृगा यन्तो, नैवं श्वजम्बुकाः।

पुंसंज्ञाः-पुंनामानः, पक्षिणो-वर्तकादयो, वामस्थिताः प्रशस्ताः। स्त्रीनामानो-बलाकासारिकादयो, दक्षिणस्थिताः शुभाः।

प्रदक्षिणमिति वामाद्दक्षिणं गच्छन्तः खगमृगाः शुभाः। खगाः-काकापारावतादयः। मृगाः-हरिणैणादयः।

यान्तो नैवं श्वजम्बुकाः,-किन्तर्हि ? दक्षिणाद्वामं गच्छन्तः शुभा इत्यर्थः।

अयुग्माश्च मृगाः शस्ताः

अयुग्माः-पञ्चसप्ता पि(दयो), मृगाः शुभाः।

शस्ता नित्यं च दर्शने॥२४॥

चाषभासभरद्वाजनकुलच्छागबर्हिणः।

चाषादयो मयूरान्ता नित्यं दर्शने-वामतो दक्षिणतो वा, शस्ताः।

अशुभं सर्वथोलूकबिडालसरठेक्षणम्॥२५॥

सर्वथा-सर्वेण प्रकारेण वामतो दक्षिणतो वा युग्मानाम युग्मानां वा, उलूकादीनां दर्शनमशुभम्। कीर्तने तु प्रशस्ता इत्येके।

प्रशस्ताः कीर्तने कोलगोधाहिशशजाहकाः।

न दर्शने न विरुते, वानरर्क्षावतोऽन्यथा॥२६॥

कोलादयः कीर्तने प्रशस्ताः। दर्शने विरुते [च] न प्रशस्ताः। कोलः-सूकरः।

वानरश्च ऋक्षश्च तौ दर्शने विरुते [च] शस्तौ। अतः-उक्तन्यायात्, अन्यथा-विपरीतौ, प्रशस्तौ। कीर्तनं तयोरप्रशस्तमित्यर्थः।

धनुरैन्द्रं च लालाटमशुभं, शुभमन्यतः।
अग्निपूर्णानि पात्राणि भिन्नानि विशिखानि च॥ २७॥

एन्द्रं धनुर्लालाटं-अभिमुखं, अशुभम्। अन्यतः-पुरःस्थितं सम्मुखं वर्जयित्वा तिर्यक् पृष्ठतो वा स्थितं, शुभम्। लालाटमिति भवार्थे अण्। लालाटशब्देनेह ललाटसमीपो देशो लक्ष्यते, सम्मुखमित्यर्थः। पात्राण्यग्निपूर्णान्यशोभनानि। तथा बिन्नानि-भग्नानि। तथा, विशिखानि-अन्तःशून्यानि। न शुभानीति वचनविपरिणामेन सम्बन्धः।

वैद्यस्यातुरगृहप्रवेशे शुभाशुभसूचकानि निमित्तान्याह-

दध्यक्षतादि निर्गच्छद्वक्ष्यमाणं च मङ्गलम्।
वैद्यो मरिष्यतां वेश्म प्रविशन्नेव पश्यति॥ २८॥

आदिशब्देनेक्षुनिष्पावादिपरिग्रहः। दध्यक्षतावादी (ता आदयो) यस्य मङ्गलस्य तदेवम्। वैद्यः प्रविशन्नेव-तत्काल एव, आतुरगृहाद्दध्यक्षतादि-यद्वक्ष्यमाणं, तन्निर्गच्छत्-निःसरत्, मरिष्यतां-आसन्नमरणानां, पश्यति।

दूताद्यसाधु दृष्ट्वैवं त्यजेदार्तमतोऽन्यथा।
करुणाशुद्धसन्तानो यत्नतस्तमुपाचरेत्॥ २९॥

एवं-पूर्वोक्तेन प्रकारेण, दूताद्यसाधु-अशुभं पूर्वनिर्दिष्टं, दृष्ट्वा आर्तं-आतुरं, त्यजेत्-न चिकित्सेत्। आदिशब्देन शकुनादेर्ग्रहणम्। अतोऽन्यथेति दूतादि शुभं दृष्ट्वा, तं आतुरं, वैद्यो यत्नेन समुपाचरेत्। किम्भूतः ? करुणाया शुद्धं निर्मलं, सन्तानं-चेतो, यस्य स एवंभूतः सन्।

अथ तदेव दध्यक्षताद्याह-

दध्यक्षतेक्षुनिष्पावप्रियङ्गुमधुसर्पिषाम्।
यावकाञ्जनभृङ्गारघण्टादीपसरोरुहाम्॥ ३०॥
दूर्वार्द्रमत्स्यमांसानां लाजानां फलभक्षयोः।
रत्नेभपूर्णकुम्भानां कन्यायाः स्यन्दनस्य च॥ ३१॥
नरस्य वर्धमानस्य देवतानां नृपस्य च।
शुक्लानां सुमनोवालचामराम्बरवाजिनाम्॥ ३२॥
शङ्खसाधुद्विजोष्णीषतोरणस्वस्तिकस्य च।
भूमेः समुद्धतायाश्च वह्नेः प्रज्वलितस्य च॥ ३३॥
मनोज्ञस्यान्नपानस्य पूर्णस्य शकटस्य च।
नृभिर्धेन्वाः सवत्साया वडावाया़ः स्त्रिया अपि॥ ३४॥
जीवञ्जीवकसारङ्गसारसप्रियवादिनाम्।
हंसानां शतपत्राणां बद्धस्यैकपशोस्तथा॥ ३५॥
रुचकादर्शसिद्धार्थरोचनानां च दर्शनम्।
गन्धः सुसुरभिर्वर्णः सुशुक्लो मधुरो रसः॥ ३६॥
गोपतेरनुकूलस्य स्वनस्तद्वद्ववामपि।
मृगपक्षिनराणां च शोभिनां शोभना गिरः॥ ३७॥
छत्रध्वजपताकानामुत्क्षेपणमभिष्टुतिः।
भेरीमृदङ्गशङ्खानां शब्दाः पुण्या़हनिःस्वनाः॥ ३८॥
वेदाध्ययनशब्दाश्च सुखो वायुः प्रदक्षिणः।
पथि वेश्मप्रवेशे च विद्यादारोग्यलक्षणम्॥ ३९॥

दध्यक्षतादीनां दर्शनं 'पथि वेश्मप्रवेशे च विद्यादारोग्यलक्षणम्।' इति वक्ष्यमाणेन सम्बन्धः। अक्षताः-यवाः, अखण्डितास्तण्डुला इत्यन्ये, धान्यमेवाखण्डितमक्षतशब्दवाच्यमित्यपरे। यावकं-अलक्तकः। भृङ्गारः-कनकालुका। अर्द्रमत्स्याः, आर्द्रमांसम्। आर्द्रग्रहणमत्र शुष्कपरिहारार्थम्। भक्षंमोदकादि। पद्मरागादिकं-रत्नम्। इभो-हस्ती। नरस्येति शौर्यत्यागप्रज्ञाराजसत्कारादिभिर्वधमानः-प्रतिदिनमुपचयं गतः, तथाविधस्य पुरुषस्य दर्शनं शुभम्। शुक्लानां सुमनःप्रभृतीनां दर्शनं शुभम्। बालचामरं-केशप्रकीर्णकम्। वाजी-तुरङ्गः। उष्णीषं-शिरोवेष्टनम्। मनोज्ञस्य-हृदयहारिणोऽन्नपानस्य। शकटस्य-रथस्य, नृभिः-नरैः, पूर्णस्य-सम्भृतस्य। धेन्वा इत्यादि। स्त्रिया अपीत्यपिशब्दः समुच्चये। यथा धेन्वाः सवत्साया दर्शनमेवं वडवायाः स्त्रियाश्च सवत्सायाः-सापत्याया इति। रुचिको-वलयः, आभरणविशेषः। सिद्धार्थो-गौरसर्षपः। गन्धः-सुष्ठु सुरभिः। वर्णः सुष्ठु शुक्लः-सितः। रसो मधुरः। गोपतेः-वृषभस्य, अनुकूलस्य-अकुपितस्य, स्वनःशब्दः। तद्वत्-गोपतिना तुल्यो, गवामप्यनुकूलानां शब्द इत्यर्थः। तथा, शोभिनां-प्रशस्तानां मृगादीनां, प्रशस्ता गिरः। विद्यादारोग्यलक्षणमिति योज्यम्। मृगपक्षिनरा ह्यशोभिनोऽपि शृगालोलूकपुल्कसचाण्डालादयः सन्ति, तद्व्यवच्छेदनार्थं शोभिनामिति विशेषणम्। शोभिनामपि मृगादीनां क्षामरोगार्तामिहतानामशोभना वाचः स्युः तत्त्यागार्थं शोभना इति विशेषणम्। छत्रादीनामुत्क्षेपणं-उत्थापनम्। पताका-वैजयन्ती। अभिष्टुतिः-प्रयाणकाले जनेन स्तुतिर्जयजयेत्यादिशब्दपूर्वाऽभिमुखमुच्चारिता। तथा, भेर्यादीनां शब्दाः, पुण्याहनिःस्वनाः-प्रशस्तशब्दा। अरोग्याय, न त्वप्रशस्तनिःस्वनाः प्रेतपटहादिजाः। वेदाध्ययनस्य-वेदपाठस्य, ये शब्दास्ते च शुभाः। प्रदक्षिणः-अनुकूलो, वायुः सुखः-सुखावहः। पथि वेश्मप्रवेशे चैतदारोग्यलक्षणं विद्यात्।

इत्युक्तं दूतशकुनं

इत्येवमर्थे परिसमाप्तौ वा। दूतः-स्त्रीपुरुषादिः, इत्यादि प्रागुक्तम्। तथा, चेतनाचेतनरूपः शुभाशुभसूचको दूतवर्जितो लोकप्रसिद्धः-शकुन उक्तः। यथा (श्लो. १७)-"हाहाक्रन्दितं" इत्यादि। इति-एवं, उक्तं-अभिहितम्।

स्वप्नानूर्ध्वं प्रचक्षते।

अतो दूतशकुनादूर्ध्वं-अनन्तरं, स्वप्नान् प्रचक्षते-सम्यग् भणिष्यति, तन्त्रकार इति शेषः। स्वप्नलक्षणमष्टङ्गसङ्ग्रहे कथितम्। यथा (सू. अ. ९)-"सर्वेन्द्रियव्युपरतौ मनोऽनुपरतं यदा। विषयेभ्यस्तदा स्वप्नं नानारूपं प्रपश्यति॥" इति। तथा (सं. सू. अ. ९)-"श्लेष्मावृतेषु स्रोतःसु श्रमादुपरतेषु च। इन्द्रियेषु स्वकर्मभ्यो निद्राऽऽविशति देहिनम्॥" इति निद्रालक्षणम्।

स्वप्ने मद्यं सह प्रेतैर्यः विपन् कृष्यते शुना॥४०॥

स मर्त्यौ मृत्युना शीघ्रं ज्वररूपेण नीयते।

यो मर्त्यः-पुरुषः, स्वप्ने-स्वप्नावस्थायां, प्रेतैः सह मद्यं पिबन् शुना कृष्यते-आक्रम्यते, स मृत्युना ज्वररूपेण शीघ्रं अहिरात् कतिपयैरेव दिवसैः, नीयते, लिकान्तरमिति शेषः।

रक्तमाल्यवपुर्वस्त्रो यो हसन् ह्रियते स्त्रिया॥४१॥

सोऽस्रपित्तेन

रक्तमाल्यो रक्तवपू रक्तवस्त्रश्च यो मर्त्यो हसन् स्त्रिया स्वप्ने ह्रियते-आकृष्यत आक्रम्यते, सोऽस्रपित्तेन मृत्युना शीघ्रं नीयते।

महिषश्वराहोष्ट्रगर्दभैः।

यः प्रयाति दिशं याम्यां मरणं तस्य यक्ष्मणा॥४२॥

यो महिषादिभिः करणभूतैर्याम्यां दक्षिणां दिशं, स्वप्ने प्रयाति, तस्य यक्ष्मणा मरणं भवति।

लता कण्टकिनी वंशस्तालो वा हृदि जायते।

यस्य तस्याशु गुल्मेन

मर्त्य इति प्रथमान्तोऽपीहार्थवशात् षष्ठ्यन्तः सम्बध्यते। यस्य मर्त्यस्य स्वप्ने कण्टकयुक्ता लता हृदये जायते, वंशो वा-अथवा तालः, तस्य शीघ्रं गुल्मेन मरणं भवेत्। सङ्ग्रहेत्वेवमुक्तम् (शा. अ. १२)-"यस्य कण्टकिनी लता वंश स्तालो वा हृदि जायते स गुल्मेन। यस्य तु शिरसि स शिरोरोगेण शस्त्रेण वा शिरःच्छेदनेन।" इति।

यस्य वह्निमनर्चिषम्॥४३॥

जुह्वतो घृतसिक्तस्य नग्नस्योरसि जायते।

पद्मं स नश्येत्कुष्ठेन

यस्य मर्त्यस्य नग्नस्याज्याभ्यक्तस्य वह्निमनर्चिषं-ज्वालारहितं, जुह्वत उरसि पद्मं स्वप्ने जायते, स नरः कुष्ठेन नश्येत्।

चण्डालैः सह यः पिबेत्॥४४॥

स्नेहं बहुविधं स्वप्ने स प्रमेहेण नश्यति।

चण्डालैः सह बहुविधं-अनेकप्रकारं, स्नेहं-घृततैलादिकं, यो मर्त्यः स्वप्ने पिबेत्, स प्रमेहेण नश्यति। स्वप्ने प्रकृतेऽपि पुनः स्वप्नग्रहणं कृतं स्पष्टार्थम्।

उन्मादेन जले मज्जेद्यो नृत्यन् राक्षसैः सह॥४५॥

उन्मादेन स नश्यति, यो राक्षसैः सह नृत्यन् जले मज्जेत्।

अपस्मारेण यो मर्त्यो नृत्यन् प्रेतेन नीयते।

स मर्त्योऽपस्मारेण नश्यति, यो नृत्यन् प्रेतेन स्वप्ने नीयते।

यानं खरोष्ट्रमार्जारकपिशार्दूलसूकरैः॥४६॥

यस्य प्रेतैः शृगालैर्वा स मृत्योर्वर्तते मुखे।

यस्य नरस्य स्वप्ने खरादिभिर्यानं भवति, स मृत्योर्मुखाभ्यन्तरे वर्तते, अत्यासन्नविनाशत्वात्।

अपूपशष्कुलीर्जग्ध्वा विबुद्धस्तद्विधं वमन्॥४७॥

न जीवति

अपूपान् शष्कुलीर्वा जग्ध्वा-भक्षयित्वैवं स्वप्ने दृष्ट्वा, विबुद्धः सन् तद्विधं-अपूपशष्कुलिप्रायमेव, वमेत्-उद्गिरेत्, स न जीवति।

अक्षिरोगाय सूर्यन्दुग्रहणेक्षणम्।

सूर्यचन्द्रयोर्ग्रहणदर्शनमक्षिरोगाय।

सूर्याचन्द्रमसोः पातदर्शनं दृग्विनाशनम्॥४८॥

स्वप्ने सूर्याचन्द्रमसोः पतनदर्शनं मर्त्यस्य दृष्टिविनाशनम्। सूर्याचन्द्रमसोरिति "देवताद्वन्द्वे च" इत्यानङादेशः।

मूर्ध्नि वंशलतादीनां सम्भवो वयसां तथा।

निलयो मुण्डता काकगृध्राद्यैः परिवारणम्॥४९॥

तथा प्रेतपिशाचस्त्रीद्रविडान्भ्रगवाशनैः।

सङ्गो वेत्रलतावंशतृणकण्टकसङ्कटे॥५०॥

श्वभ्रश्मशानशयनं पतनं पांसुभस्मनोः।

मज्जनं जलपङ्कादौ शीघ्रेण स्रोतसा हृतिः॥५१॥

नृत्यवादित्रगीतानि रक्तस्रग्वस्त्रधारणम्।

वयोङ्गवृद्धिरभ्यङ्गो विवाहः श्मश्रुकर्म च॥५२॥

पक्वान्नस्नेहमद्याशः प्रच्छर्दनविरेचने।

हिरण्यलोहयोर्लाभः कलिर्बन्धपराजयौ॥५३॥

उपानद्युगनाशश्च प्रपातः पादचर्मणोः।

हर्षो भृशं प्रकुपितैः पितृभिश्चावभर्त्सनम्॥५४॥

प्रदीपग्रहनक्षत्रदन्तदैवतचक्षुषाम्।

पतनं वा विनाशो वा, भेदनं पर्वतस्य च॥५५॥

कानने रक्तकुसुमे पापकर्मनिवेशने।

चितान्धकारसम्बाधे जनन्यां च प्रवेशनम्॥५६॥

पातः प्रासादशैलादेर्मत्स्येन ग्रसनं तथा।

काषायिणामसोम्यानां नग्नानां दण्डधारिणां॥५७॥

रक्ताक्षाणां च कृष्णानां दर्शनं जातु नेष्यते।

जातु नेष्यत इति वक्ष्यमाणेन सम्बन्धः। वंशलतादीनां मूर्ध्नि-शिरसि, सम्भवो-जन्म, जातु नेष्यते। एवमग्रेऽपि योज्यम्। तथा, वयसां-पक्षिणां, मूर्ध्नि निलयो-निलयनम्। तथा, मुण्डता-कृतमुण्डनत्वम्। काकाद्यैः परिवारणं-परिवृतत्वम्। न केवलं काकाद्यैः, प्रेताद्यैश्चेति तथाशब्दस्यार्थः। गवाशनाः गोमांसभक्षाः, तैः। वेत्रादिसङ्कटे-संवृते, सङ्गः-द्वारालाभः, तत्रैव निःसारमपश्यतः। श्वभ्रे श्मशाने च शयनं-स्वपनम्। पांसौ भस्मनि च पतनम्। जलपङ्कादिके मज्जनं-बृडनम्। आदिशब्देन कूपकलुषोदकादि गृह्यते। स्रोतसा शीघ्रेण हृतिः-हरणम्। नृत्यं च वादित्रं च गीतं च तानि। तथा, स्रक् च वस्त्रं च स्रग्वस्त्रे, रक्ते च ते स्रग्वस्त्रे

च, तयोर्धारणम्। वयश्चाङ्गं च, तयोर्वृद्धिः। अभ्यङ्गः-अभ्यञ्जनम्। विवाहः-परिणयः। श्मश्रुकर्म-मुखव्यञ्जनमुण्डनम्। पक्वान्नं-मण्डकादिः, स्नेहः-तैलादिः, मद्यं-सीध्वादि, तेषामाशो-भक्षणम्। प्रच्छर्दनं-वमिः। विरेचनं-विरेकः। हिरण्यस्य-रुक्मादेः, लोहस्य च लाभः। सङ्ग्रहे तूक्तम् (शा. अ. १२)-"लभते वा हिरण्यलोहलवण" इति। कलिः-अनर्थः। बन्धो-बन्धनम्। पराजयः-परिभवः। उपानद्युगस्य नाशः। पादस्य चर्मणश्च प्रकर्षेण पतनम्। भृशं-अतिशयेन, हर्षः। पितृभिः प्रकुपितैरवभर्त्सन-सन्तर्जनम्। प्रदीपादीनां पतनमथवा विनाशः। पर्वतस्य च भेदनम्। कानने-वने, रक्तपुष्पे प्रवेशनमिति सम्बन्धः। पापकर्माणां-पापिनां, निवेशने-गृहे, प्रवेशनम्। चिन्तायामन्धकारसम्बाधे-तमःसङ्कटे, जनन्यांमातरि, च प्रवेशनम्। प्रासादात् पर्वताद्वा पातः-पतनम्, आदिशब्देन वृक्षगृहादेर्ग्रहणम्। मत्स्येन ग्रसनं-निगरणम्। कषायेण रक्तं वस्त्रं-काषायम्, तद्विद्यते येषामितीनिः। तेषां काषायिणां-काशायवस्त्रावृतानां, तथा असौम्यानां-दुर्दर्शानां, तथा नग्नानां-विवस्त्राणां, तथा दण्डधारिणां-दण्डिनां, तथा रक्तयनानां कृष्णवर्णानां च नृणां जातु-कदाचित्, न दर्शनमिष्यते, स्वप्नेऽशुभहेतुत्वात्।

कृष्णा पापाननाचारा दीर्घकेशनखस्तनी॥५८॥

विरागमाल्यवसना स्वप्ने कालनिशा मता।

एवंविधा स्त्री स्वप्ने कालनिशा-तद्विधा, मता। कृष्णाकृष्णवर्णा। तथा, पापमाननमाचारश्च यस्याः सा। तथा, दीर्घाः केशा नखाः स्तनौ च यस्याः सैवम्। "स्वाङ्गाच्चोपसर्जनात्" इति ङीप्। माल्यं च वसनं च माल्यवसनम्। विगतो रागो यस्य माल्यवसनस्य तदेवंभूतं माल्यवसनं यस्याः सैवम्।

मनोवहानां पूर्णत्वात्स्रोतसां प्रबलैर्मलैः॥५९॥

दृश्यन्ते दारुणाः स्वप्ना रोगी यैर्याति पञ्चताम्।

अरोगः संशयं प्राप्य कश्चिदेव विमुच्यते॥६०॥

मनः-चेतो, वहन्ति यानि विशेषेण हृदाश्रितानि स्रोतांसि तानि मनोवहानि, तेषां मनोवहानां प्रबलैः-अतिबलवद्भिः, मलैः-मलिनीकरणस्वभवैर्वातपित्तश्लेष्मभिः, पुर्णत्वात् दारुणाः-घोरा अप्रशस्ताः, स्पप्ना दृश्यन्ते-अनुभूयन्ते। यैःस्वप्नैर्दृष्टैः, रोगी-आतुरः, पञ्चतां याति-मरणं प्राप्नोति, तथा स्वभावत्वादैषां स्वप्नानाम्। अरोग इत्यादि। स्वस्थो नरः संशयं-जीवितसंदेहं, प्राप्य कश्चिदेव-बहूनां मध्यात्पुण्यवान्नियतायुरेव, विमुच्यते, मरणादिति, शेषः।

स्वप्नभेदानिदानीमाह-

दृष्टः श्रुतोऽनुभूतश्च प्रार्थितः कल्पितस्तथा।
भाविको दोषजश्चेति स्वप्नः सप्तविधो मतः॥६१॥

चः समुच्चये। इतिः प्रकारे। दृष्टादिना प्रकारेण स्वप्नः सप्तविधो मतः,-सप्त स्वप्ना इत्यर्थः। दृष्टः स उच्यते,-यश्चक्षुषा जाग्रदवस्थायां किञ्चिद्वस्तुजातं दृष्ट्वा तदानीं सुप्तावस्थायां तादृशं वस्तुजातं संवित्तिरूपतयाऽनुभुयते। १। यश्च शब्दमात्रेण बस्तुजातं श्रोत्रेन्द्रियेण गृह्यते तदानीं सुप्तावस्थायं तादृक्संवित्तिरूपतयाऽनुभूयते, स श्रुत उच्यते। २। यस्तु जाग्रदवस्थायां यथायथमिन्द्रियैरनुभूयते सुप्तावस्थायां तादृगन्तःसंवित्तिरूपतयाऽनुभूयते, सोऽनुभूत उच्यते। ३। यस्मिन् दृष्टे श्रुतेऽनुभूते वा यत्पूर्वं जाग्रदवस्थायां वस्तुजातं मनसाऽभ्यर्थ्यते तथैव च सुप्तावस्थायामन्तःसंवित्तिरूपतयाऽनुभूयते, स प्रार्थित उच्यते। ४। यस्तु षड्भिः प्रत्यक्षानुमानादिभिर्न दृष्टो नापि श्रुतो नाप्यनुभूतो दृष्टश्रुतानुभूतत्वाभावादत एव न प्रार्थितः, अपि तु केवलं मनसा यथेच्छमुत्प्रेक्ष्य यत्किञ्चनरूपाभिः कल्पनाभिस्ताभिस्ताभिः कल्पितो जाग्रदवस्थायां वस्तुजातोऽन्तःसंवित्तावुपारुढः, तदानीं सुप्तावस्थायां तादृगनुभूयते, स कल्पित उच्यते। ५। यश्च दृष्टश्रुतादिभ्यः स्वप्नेभ्योऽन्यो विलक्षणस्वप्नो यथा दृश्यते सुप्तावस्थायामुत्तरकालं तथैव तत्स्वप्नदर्शिना नरेण तन्मुखावगततदर्थैरन्यैरपि प्रत्यक्षतो दृश्यते, स भाविकः। ६। दोषजः स स्वप्नः-यो वातजः पित्तजः कफजो वा यथायथं दोषगुणानुरूपोऽन्तःसंवित्तावनुभूयत इति। ७।

तेष्वाद्या निष्फलाः पञ्च यथास्वप्रकृतिर्दिवा।

विस्मृतो दीर्घह्रस्वोऽति

तेषु स्वप्नेषुमध्याद्ये पञ्चाद्याः-आदौ पठिता दृष्टादयः ते निष्फलाः-न ते यथानुरूपं फलं शुभमशुभं वा ददति। यथास्वप्नप्रकृतिः-यथादोषजो, यः स्वप्नः सोऽपि निष्फलः-नासौ यथानुरूपं शुभाशुभलक्षणं फलं ददाति। वातप्रकृतेर्वातप्रकृत्यनुरूपतः स्वप्नो यावद्वन्द्वप्रकृतेर्द्वन्द्वप्रकृत्यनरूपतः सन्निपातरूपतो वाऽफलः। तथा दिवा दृष्टो यः स्वप्नः, तथा विस्मृतः, तथाऽतिदीर्घोऽतिह्रस्वो वा यः स्वप्नः, स पञ्चविधव्यतिरिक्तोऽप्यफलः।

पूर्वरात्रे चिरात्फलम्॥६२॥

दृष्टः करोति तुच्छं च

पूर्वरात्रे दृष्टः स्वप्नश्चिरात्-चिरेण कालेन, फलं तुच्छं-अल्पं, न यथापरिभाषितं, विदधाति। केचित्त्वाहुः,-चेति विकल्पार्थे, चिरेण कालेन तुच्छं वेत्यर्थः। पूर्वरात्र इति "अहः सर्वैकदेश" इति समासान्तः।

गोसर्गे तदहर्महत्।

निद्रया वाऽनुपहतः प्रतीपैर्वचनैस्तथा॥६३॥

गोसर्गे-गवां मोक्षकाले, यो दृष्टः स्वप्नः स तदहः-तस्मिन्नेवाहनि, फलं महत्करोतीति योज्यम्। तदहरित्यहःशब्दः सप्तम्यर्थवृत्तिरव्ययः। शुभः स्वप्नो दृष्टो रात्रिशेषे निद्रया वा यद्यनुपहतो-यस्मिन्स्वप्ने दृष्टेऽनन्तरं न सुप्यते, स स्वप्नो महत् फलं करोति। अन्यथा स्वल्पम्। प्रतीपैः-अननुकूलैर्वचनैश्च, अनुपहतः-अनभ्याहतः, शुभः स्वप्नो दृष्टो महत् फलं करोति।

एवं शुभं स्वप्नं प्रत्युक्त्वाऽशुभं स्वप्नं प्रत्याह-

याति पापोऽल्पफलतां दानहोमजपादिभिः।

पापः-अशुभः स्वप्नः, अल्पफलतां याति। कैः ? दानादिभिः। आदिग्रहणात् ध्याननियमादयो गृह्यन्ते।

अकल्याणमपि स्वप्नं दृष्ट्वा तत्रैव यः पुनः॥६४॥
पश्येत्सौम्यं शुभं तस्य शुभमेव फलं भवेत्।

अकल्याणमपि- अशुभसूचकत्वादशुभं [अपि] , स्वप्नं दृष्ट्वा तत्रैव-तस्मिन्नेवावसरे-ऽशुभस्वप्नदर्शनसमनन्तरे काले, सौम्यकरंशुभसूचकत्वाच्छुभं स्वप्नं यः पश्येत्तस्य जन्तोस्तस्य वा स्वप्नस्य शुभमेव-कल्याणरूपमेव, फलं भवेत्, न पूर्वदृष्टमशुभमित्येवशब्दार्थः। अपिशब्दात् कल्याणं स्वप्नं दृष्ट्वा यस्तत्रैव वा स्वप्नमध्ये सुप्तोऽशुभं च स्वप्नं पश्येत्, तस्याशुभमेव फलं भवेत्, न पूर्वदृष्टं शुभमिति बोध्यम्। ननु, एवं सति स्वप्नानामनिश्चतफलत्वं प्राप्नोति। ततश्च "स्वप्ने मद्यं सह प्रेतैः" (श्लो.४०) इत्यादिना यदुक्तं तदन्यथाऽपि स्यात्। यतोऽशुभलक्षणोऽप्येवं दानादिभिश्चान्यथा सम्पद्यते। ततश्चानिश्चितफलत्वान्मरणं प्रति नासौ निश्चितो हेतुः। एवमन्येऽपि ये स्वप्नाः प्रतिनियता रक्तपित्तादीनां व्याधीनां हेतवो निर्दिष्टाः, तेऽपि तथैव बोद्धव्याः। अत्राचक्ष्महे। निश्चितानिश्चितफलस्वभावत्वात् स्वप्नानामदोषः। तथा हि-केचित्स्वप्ना निश्चितफलस्वभावा निर्दिष्टाः। यथा-"स्वप्ने मद्यं सह प्रेतैः" इत्यादयः। केचिदनिश्चितफलस्वभावाः। यथा-"मूर्ध्नि वंशलतादीनां" (श्लो-४ ९) इत्यारभ्य यावत् "रक्ताक्षाणां च कृष्णानां दर्शनं जातु नेष्यते" इत्येवमन्तेन ग्रन्थेन ये निर्दिष्टाः। तत्र ये निश्चितफलस्वभावास्तेषां न कथञ्चिदप्यन्यथा कर्तुं पार्यते। प्राक्तनस्य कर्मणस्तथारूपस्य बलबत्त्वात्। ये त्वनिश्चितफलस्वभावाः "मूर्ध्नि वंशलतादीनां" इत्यादयः। तेषां स्पप्नान्तरदर्शनादिभिरन्यथा सद्भावः सम्भाव्यत इति।

"पश्येत्सौम्यं" इत्युक्तम्। अत्स्तानेव सौम्यान् स्वप्नान् दर्शयितुमाह-

देवान् द्विजान् गोवृषभान् जीवतः सुहृदो नृपान्॥६५॥
साधून् यशस्विनो वह्निमिद्धं स्वच्छान् जलाशयान्।
कन्याः कुमारकान् गौरान् शुक्लवस्त्रान्सुतेजसः॥६६॥

नराशनं दीप्ततनुं समन्ताद्रुधिरोक्षितम्।

यः पश्येल्लभते यो वा छत्रादर्शविषामिषम्॥६७॥

शुक्लाः सुमनसो वस्त्रममेध्यालेपनं फलम्।

शैलप्रासादसफलवृक्षसिंहनरद्विपान्॥६८॥

आरोहेद्वोश्वयानं च, तरेन्नदहदोदधीन्।

पूर्वोत्तरेण गमनमगम्यागमनं मृतम्॥६९॥

सम्बाधान्निःसृतिर्दैवैः पितृभिश्चाभिनन्दनम्।

रोदनं पतितोत्थानं द्विषतां चावमर्दनम्॥७०॥

यस्य स्यादायुरारोग्यं वित्तं बहु च सोऽश्नुते।

कुमारका-बालकाः। विषं-वत्सनाभादि। आमिषं-मांसम्। सुमनसः-पुष्पाणि। शुक्लशब्दो वस्त्रमित्यत्रापि सम्बध्यते, अर्थवशाच्चास्य नपुंसकत्वमेकत्वं च बोध्यम्। देवादीन् यः पश्येत्, यो वा छत्रादीन् लभते, यश्च शैलादीन् समारोहेत्, यश्च नदादींस्तरेत्, यस्य वा पूर्वोत्तरगमनादिकं स्यात्, स पुरुष आयुरादीनश्नुते-प्राप्नोति।

आरोग्यमश्नुते" इत्युक्तम्। अतस्तदेवारोग्यं लक्षयितुमाह-

मङ्गलाचारसम्पन्नः परिवारस्तथाऽऽतुरः॥७१॥

श्रद्धधानोऽनुकूलश्च प्रभूतद्रव्यसङ्ग्रहः।

सत्त्वलक्षणसंयोगो भक्तिर्वैद्यद्विजातिषु॥७२॥

चिकित्सायामनिर्वेदस्तदारोग्यस्य लक्षणम्।

"प्रशस्ताचरणं नित्यमप्रशस्तविसर्जनम्। एतद्धि मङ्गलं प्रोक्तमृषिभिस्तत्त्वदर्शिभिः॥". आचरणं-आचारः सद्दृत्तानुष्ठानम्। मङ्गलाचाराभ्यां सम्पन्नो-युक्तः। कः ? परिवारः। तथा, आतुरः। श्रद्धधानः-अवश्यं मे व्याधिरयमनेन भेषजेन नश्यतीत्येवं मन्यमानः। तथा च, परिवारोऽनुकूलः-दक्षिणः। तथा, प्रभूतस्य द्रव्यस्य सङ्ग्रहः-सङ्ग्रहणम्।

तथा, सत्त्वलक्षणयोः संयोगो, वैद्यादिषु भक्तिः, चिकित्सायां-उपक्रमे, अनिर्वेदः-सोत्साहता, तत्-एतत्, आरोग्यलक्षणम्।

कस्मादिदं स्थानं शारीरमुच्यते ? इत्यस्य निरुक्तिमाह-

इत्यत्र जन्ममरणं यतः सम्यगुदाहृतम्॥७३॥

शरीरस्य ततः स्थानं शारीरमिदमुच्यते॥७३ १/२॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचिता-यामष्टाङ्गहृदयसंहितायां द्वितीये शारीरस्थाने

दूतादिविज्ञानीयो नाम षष्ठोऽध्यायः॥६॥

इति-परिसमाप्तौ। अत्र-अस्मिन्स्थाने, यतो-यस्मात्, शरीरस्य जन्म सम्यक्-अविपरीतं गर्भावक्रान्त्यादिभिश्चतुर्भिरध्यायैः प्रसक्तानुप्रसक्तिकया, उदहृतम्। मरणं-विकृतिविज्ञानीयाख्येन तथा दूतादिविज्ञानीयाख्येन च। ततः-शरीरस्य जन्ममरणोदाहरणात् कारणात्, इदं स्थानं शारीरमुच्यते। यद्यपि सर्व आयुर्वेदाख्यो ग्रन्थः शरीरमधिकृत्य प्रवृत्तः, तथाऽपीदं स्थानं साक्षाज्जन्ममरणचिन्तनाच्छरीरस्य प्राधान्येन शारीरं स्थानमुच्यत इति।

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचित्तायामष्टाङ्गहृदय-टीकायं सर्वाङ्गसुन्दरा-ख्यायां द्वितीये शारीरस्थाने दूता-दिविज्ञानीयो नाम षष्ठोऽध्यायः समाप्तः॥६॥

****

अष्टाङ्गहृदये निदानस्थानम्।

प्रथमोऽध्यायः।

स०-श्रीगणेशाय नमः। अथ शरीरस्थानादनन्तरं निदानस्थानारम्भः। अस्य चायं सम्बन्धः। हेतुलिङ्गौषधस्कन्धलक्षणोऽयमायुर्वेदः प्रणीतः। तानि च हेतुलिङ्गौषधानि सूत्रस्थाने सूचितानि। शरीरलक्षणं चाधारं समुत्पाद्य तानि विस्तारेणोपदेष्टुं शक्यन्ते। तस्माच्छारीरस्थानं

पूर्वमारब्धवान्। ननु, एवं सत्यौषधस्कन्ध एव प्राक् प्राधान्यादुपदेष्टुं न्याय्यः। नैवम्। हेतुलिङ्गाभ्याः ह्यामयं परीक्ष्यानन्तरं यथायोगमामयप्रशमनार्थमौषधं दातुमुचितम्। तस्माद्धेतुलिङ्गयोरेवोपादानं प्राग्युक्तम्, न त्वौषधस्य, इति चिकित्सितस्थानात् प्रागिदमेव स्थानमुपदेष्टुं युक्तम्। तथा चोक्तं मुनिना (च. सू. अ. २०।२४)-"रोगमादौ परीक्षेत ततोऽनन्तरमौषधम्।" इति। तस्मादौषधाद्धेतुलिङ्गयोरेवामयं प्रति प्राधान्यम्। अतो निदानस्थानारम्भः। तत्र च पूर्वं सर्वरोगनिदानमेवारब्धुं युक्तम्, प्राधान्यात्। प्राधान्यं च सर्वरोगकारणनिर्देशात्। तथा हि वातादय एव प्रकुपिताः सर्वरोगकारणम्। वक्ष्यति हि (श्लो. १२)-"सर्वेषामेव रोगाणां निदानं कुपिता मलाः।" इति। तेषां च प्रकोपकारणमस्मिन्निर्दिश्यत इत्याह-

अथातः सर्वरोगनिदानं व्याख्यास्यामः।

इति ह स्माहुरात्रेयादयो महर्षयः।

(गद्यसूत्रे॥२॥)

स०-अथात इत्यादि। सर्वे च ते रोगाश्च सर्वरोगाः, तेषां निदानं सर्वरोगनिदानम्। शेषमायुष्कामीयाध्यायवद्व्याख्येयम्। इतीत्यादिशब्दानामपि पूर्ववद्व्याख्या।

आ० र०- श्रीः। शुभमस्तु। ओं नमो गणेशाय। श्रीवैद्यनाथाय नमः॥

अथ हेमाद्रिटीकायामायुर्वेदरसायने।

अङ्गं कायचि[कित्सा)ख्यं सामस्त्येन निरूप्यते॥१॥

तत्रादौ ज्वरप्रकरणम्। तत्र ज्वरोत्पत्तिः। सा चेतिहासरूपेण निरूपिता सङ्ग्रहे (नि.अ. १)-"[पुरा] कृतयुगे विगतरागद्वेषादिद्वन्द्वा जितलोभश्रमक्लमालस्यभया निष्परिग्रहाः पुरुषा बभूवुः। तेषां पुण्यबलेन पृथिव्यादीनां सर्वगुणसमुदायादचिन्त्यरसवीर्यादिसमुदितानि सस्यान्यौषधयश्चासन्। ते तानि जितेन्द्रियत्वात् काले मात्रया चोपयुञ्जाना सत्यार्जवानृशंस्यादिगुणयोगाच्च सुरसदृशतेजोरूपाकृतिप्रमाणप्रसादोपचयसंहननाः सत्त्वसारसम्पन्ना दीर्घायुषो नीरुजश्च बभूवुः। भ्रश्यति तु कृतयुगे युगस्वभावक्रमेण परिहीयमानसर्वगुणेषु पृथिव्यादिषु शरीरेषु च धर्मातिक्रमात् पुरुषेश्ववश्यंभाविनो निरपेक्षरूक्षाभिरुपेक्षिता देवताभिर्ज्वरादयः प्रादुरभूवन्निति सर्वरोगाणां सामान्यतः सम्भवः। निरपेक्षाः-निराशाः, रूक्षाः-निःस्नेहाः। ज्वरस्तु स्थाणुशापात् प्राचेतसतामुपगतस्य प्रजापतेः क्रतौ भागमपरिकल्पयतस्तद्विनाशार्थं पूर्वजन्मावमानितया रुद्राण्या प्रेरितस्य

पशुपतेर्दिव्यमब्दसहस्रं परिरक्षितवतः कोपमतिचिरकालसम्भृतो व्रतान्ते रोषाग्निः किङ्कररूपेण किल पिण्डितमुर्तिर्वीरभद्रनामा भस्मप्रहरणस्त्रिशिरोक्षिबाहुपादः पिङ्गललोचनो दंष्ट्री शङ्कर्णो कृष्णतनुरुत्तमाङ्गन्निश्चचार। स देवीविनिर्मितया सह भद्रकाल्या प्रतिरोमकूपमभिनिःसृतैर्विविधविकृताकृतिभिरन्तैर्भयानकवाक्यक्रियावपुर्भिरनुचरैः परिवृत-श्चतुर्युगान्तकराम्भोदसहस्रनिनदोऽनुनादयन् रोदसी ज्वालागर्भेण परिवृतः कल कलारवेण महाभूतसम्प्लवकारिणा विधाय दानववधमश्वमेधाध्वरविध्वंसं च प्राञ्जलिर्विज्ञापयामास शिवम्। शिवी भूतोऽसि देवदेव देवैः पितामहप्रभृतिभिः जगतः पित्रा च धात्राऽभिष्टूयमानः सम्प्रत्यहं किं करवाणीति। तं शूली सक्रोधमादिदेश। यस्मान्त्रिदशैरप्यजय्य मत्क्रोध व्रतविघ्नं चिकीर्षु दैत्यसैन्यं दक्षो दक्षहव्यं च त्वया जीर्णमतो जगतोऽस्य सस्थावरस्य ज्वरयिता ज्वरो भवान् भवतु। त्वं हि सर्वरोगाणां प्रथमः प्रवरो जन्ममरणेषु तमोमयतया महामोहः प्राग्जन्ममरणमतो विस्मारयिताऽपचारान्ततेषु चोष्मायमाणत्वात् सन्तापात्मा द्वयेष्वपि ध्रुवो ज्वरो भवेति। सोऽयमेवमुमापतिनाऽनुगृहीतो नानानामभिः सर्वतोऽनुभुवि विचरति। तद्यथा, -पाकलो गजेषु, अभितापो वाजिषु, अलर्कः कुक्कुरेषु, इन्द्रमदो जलजेषु, ज्योतिरोषधीषु, चूर्णको धान्येशु, अप्सु नीलिका, भूमावूषरः, मानुषेषु ज्वरः इति। तत्सहजाश्चारोचकाङ्गमर्दशिरोव्यथाभ्रमक्लमग्लानितृष्णासन्तापादयः। तत्सन्तापाच्च रक्तपित्तम्। तत्रैव च यज्ञे क्रोधभयाभिभूतानां परितो विद्रवतां लङ्घनप्लवनाद्यैर्दहविक्षोभणैर्गुल्मविद्रधिवृद्धिजठरादयो हविःप्राशान्मेहकुष्ठार्शःशोफातिसारादयो भयत्रासशोकाशुचिसंस्पर्शैरुन्मादापस्मारग्रहादयो रोहिण्यतिसङ्गाच्छेषदुहित्रसम्भोगकृताच्च प्रजापतिक्रोधात् नक्षत्रराजस्य राजयक्ष्मा तत्सहोद्भवाश्च कासश्वासादयः। सोऽपि हि नक् विना ज्वरेणानुबध्नातीति सकलोऽपि रोगग्रामो ज्वरपूर्वको ज्वरशब्दवाच्यश्च।" इति। रोगलक्षणं व्याख्यातुं प्रतिजानीते-अथात इति।

तत्र रोगाणां सामान्यं निदानं बिभणिषुस्तावद्रोगाणामेव पर्यायान् वदति। रोगपर्यायश्रवणेन हि शिष्याणां तत्र तत्र शास्त्रप्रदेशेषु सम्मोहो न भवति-

रोगः पाप्मा ज्वरो व्याधिर्विकारो दुःखमामयः।
यक्ष्मातङ्कगदाबाधाः शब्दाः पर्यायवचिनः॥१॥

स०-रोगादयः शब्दाः पर्यायवचिनः-एकार्था इत्यर्थः। ननु च, एषां रोगादिशब्दानां प्रवृत्तिनिमित्तं प्रत्यर्थमेदोऽपि दृश्यते। यथा,-रुजतीति रोगः, दुःखस्य कर्तृत्वाद्दुःखस्याभिधायकः। पाप्मेति किल सर्वे रोगाः पापस्य कर्मणः फलमिति कृत्वा पाप्मेत्युच्यते। "ज्वरः प्रधानो रोगाणामुक्तः" (च. चि. अ. ३।४)। प्राधान्यं चास्य दुरुपक्रमत्वादतिदुःसहत्वाच्च। अत एव सर्वकायमनःसन्तापकत्वं ज्वरस्याहुः। तथा, "ज्यावयोहानौ" इत्यस्य धातोरौणादिके वरप्रत्यये सति ज्वरशब्दस्यार्थान्तरत्वमप्यापतति। विविधमाधिं-दुःखं, आदधाति शरीरे मनसि चेति-व्याधिः। विकारो बुद्धीन्द्रियमनःशरीराणां विकृतिं-अन्यथात्वं, जनयतीत्यर्थः। दुःखमित्यनेनोपतापकत्वमनुभवं गमयति। आमय इत्यस्यार्थः-किलाऽऽमसमुत्थाः सर्वे व्याधयः। प्रायेण हि लोकोऽखिल एव लौल्याददेशकालापथ्यातिमात्राशी भवति। तस्य चावश्यमामसम्भवाद्बाहुल्येनामसमुत्था व्याधयः। बाहुल्यं चाङ्गीकृत्य शब्दप्रवृत्तिः। यक्ष्मेव यक्ष्मा, यथा-"यक्ष्मा रोगसमूहानाम्" (च. सू. अ. २५।३९, सं. सू. अ. १३) इत्युक्तः। एवं सर्वोऽपि रोगो रोगसमूह इत्यनेन द्योतयति। तथा च, सर्वो विकार उत्पद्यमानोऽनेकैर्व्याधिलक्षणभूतैश्च युक्त उत्पद्यते। यथा,-ज्वरस्यालस्यारोचकादयः। आतङ्क इति "तकि कृच्छ्रजीवने" इत्यस्य धातोराङ्पूर्वस्य रूपम्। रोगोपतप्तत्वाद्धि स्त्रीपानभोजनादिभ्यो निवृत्ताः कृच्छ्रेण जीवन्ति। गद इव गदोऽनेककारणजन्यत्वात्। यथा हि गदोऽनेककारणजन्यस्तथा गदोऽपीति गदशब्दस्यार्थः। आबाध इति आसमन्तात् कायमनसोर्बाधनं-पीडेत्यर्थः। एवं प्रवृत्तिनिमित्तं प्रत्यर्थभेददर्शनात् कथमुक्तं पर्यायवाचिनः इति। अत्राचक्ष्महे। एवमेवैतत्। किन्तु पीडाकारित्वसामान्यं प्रवृत्तिनिमित्तमुररीकृत्य पर्यायवाचिनः? इति। अत्राचक्ष्महे। एवमेवैतत्। किन्तु पीडाकारित्वसामान्यं प्रवृत्तिनिमित्तमुररीकृत्य पर्यायवाचिन इत्युक्तम्।

आ० र०- पर्यायकथनद्वारेण रोगलक्षणमाह-रोग इति। रुजतीति रोग इत्यादिव्युत्पत्त्या रोगादिशब्दैर्योऽर्थोऽभिधीयते स रोगः।

निदानं पूर्वरूपाणि रूपाण्युपशयस्तथा।
सम्प्राप्तिश्चेति विज्ञानं रोगाणां पञ्चधा स्मृतम्॥२॥

स०-निदानादयः सम्प्राप्त्यन्ता रोगाणां विज्ञानं पञ्चधा स्मृतम्, मुनीन्द्रैरिति शेषः। निदानादिविज्ञानेन सर्वे रोगा विशेषेण बुध्यन्त इत्यर्थः। उपशयस्तथेति यथा निदानादयो

रोगाणां विज्ञानं तथोपशयोऽपीति तत्तुल्यकक्षतां द्योतयितुं तथाशब्दं तन्त्रकृत् प्रत्युक्तवान्। एवं सम्प्राप्तिश्चेत्यत्र चकारमपि। इति-परिसमाप्तौ, एतावदेव रोगाणां विज्ञानम्। निदानं द्विधा,-रोगाणामासन्नं विप्रकृष्टं च। तत्रासन्नं यथा-वातादयः प्रकुपिताः। विप्रकृष्टं कारणं यथा-वातादिचयप्रकोपकरमाहारविहारादि। तत्र निदानं-कटुकाम्लदध्यादिकं ज्वरस्य। पूर्वरूपं यथा-ज्वरस्यैवालस्यादयः। रूपं यथा-"आगमापगमक्षोभमृदुतावेदनोष्मणाम्। वैषम्यं तत्रतत्राङ्गे तास्ताः स्युर्वेदनाश्चलाः॥" (हृ. नि. अ. २।१०) इत्यादि। उपशयो यथा ज्वरं स्नेहमर्दनादिनोपशाम्यन्तमुपलभ्य स तस्योपशय इत्युच्यते। सम्प्राप्तिस्तु-"यथादुष्टेन" (श्लो. ८) इत्यादिलक्षणा। विनिश्चितज्ञानकारणत्वाद्विज्ञानम्, कारणे कार्योपचारात्। निदानादीनामसमासनिर्देश एकैकस्यापि प्राधान्यमिति द्योतनाय। एवमेकैकस्योपलब्धिकारणत्वं भवति। उपचारादेव सङ्ग्रायां लब्धायां पञ्चधेत्युक्तं नियमार्थम्। पञ्चधैवैतानि तत्त्वतो नान्ये रोगावबोधहेतवः सन्तीत्यर्थः।

आ० र०- रोगलक्षणस्य भेदानाह-निदानमिति। विज्ञानं-लक्षणम्।

निमित्तहेत्वायतनप्रत्ययोत्थानकारणैः।

निदानमाहुः पर्यायैः

स०-निमित्तादिभिः षड्भिः पर्यायैर्निदानमाहुः-वदन्ति, मुनय इति शेषः। तत्र तत्र शास्त्रप्रदेशे निदानमेतैः पर्यायैर्वेद्यमित्यर्थः।

आ० र०- पर्यायकथनद्वारेण निदानलक्षणमाह-निमित्तेति। सङ्ग्रहे तु (नि.अ.१)-"तत्र निदानं वाय्वादिप्रकोपः। तस्य पुनरहिताहारविहारसेवा॥" इति।

प्राग्रूपं येन लक्ष्यते॥३॥

उत्पित्सुरामयो दोषविशेषेणानधिष्ठितः।

स०-येन-आलस्यारुच्यादिना, उत्पित्सुः-उद्भूषुः, आमयो-ज्वरादिः, लक्ष्यते-ज्ञायते, तत्प्राग्रूपम्। दोषविशेषेण-वातादिना, अनधिष्ठितः-अनासादितो, 'व्यक्तरूपेण' इत्यत्रानुक्तमपि गम्यमानत्वादुक्तं बोध्यम्। तथा हि-वातादिदोषेणानधिष्ठितत्वाद्व्याधेरुत्पित्सुतैव न घटते, व्याधिकारणाभावात्। न हि वातादीन् विमुच्य व्याधेः प्रायेणान्यतः सम्भवः सम्भाव्यते।

वक्ष्यति हि(श्लो. १ २)-"सर्वेषामेव रोगाणां निदानं कुपिता मलाः।" इति। तस्माद्दोषविशेषानधिष्ठितत्वमुत्पित्सोरामयस्य यदुच्यते, तद्व्यक्तरूपदोषापेक्षमवगन्तव्यम्।

आ० र०- अथ पूर्व(रूप]लक्षणमाह-प्राग्रूपमित्यादि। उत्पित्सुरामयो येन लक्ष्यते तत्प्राग्रूपम्। उत्पित्सुः-उत्पतितुकामः। रोगो हि राजेव बहुपरिवारः। तस्य केचिदग्रे केचित्सह केचित्पश्चाद्भजन्ति। ते च पुर्वरूपरूपोपद्रवसंज्ञाः। तत्र पूर्वरूपेण ज्वराद्यन्यतम उत्पत्स्यत इति ज्ञायते, न तु वातज्वराद्यन्यतम इति, अत आह-दोषविशेषेणानधिष्ठित इति। यत्तूक्तं रुग्विनिश्चये (ज्व.नि.श्लो. ६)-"सामान्यतो, विशेषात्तु जृम्भाऽत्यर्थं समीरणात्। पित्तान्नयनयोर्दाहः, कफान्नान्नाभिनन्दनम्॥' इति। तत्सम्भावनाज्ञानं नज् प्रमाज्ञानमित्युपेक्षितं पूर्वैः।

अत एवाह-

लिङ्गमव्यक्तमल्पत्वाद्व्याधीनां तद्यथायथम्॥४॥

स०-तदित्यनेन प्राग्रूपं परामृश्यते। तत्-प्राग्रूपं, उत्पित्सूनां ज्वरादीनामल्पत्वात्-अनासादितबलत्वात्, अव्यक्तं लिङ्गं-अस्पष्टं लक्षणम्। यथायथं-यद्यस्य व्याधेर्ज्वराद्यन्यतमस्यात्मीयमात्मीयम्। तच्च प्राग्रूपं त्रिधा दृष्यते, -किञ्चिच्छारीरं किञ्चिन्मानसं किञ्चिच्छारीरमानसं च। तत्र शरीरं यथा-ज्वरस्यालस्यास्यवैरस्यगात्रगौरवजृम्भासास्राकुलाक्षितेत्येवंप्रायम्। मानसं च-अरति-र्हितोपदेशेष्वक्षान्तिरित्येवंप्रायम्। किञ्चिच्छारीरमानसं यथा-"प्रीतिरम्लपटूषणे। द्वेषः स्वादुषु भक्ष्येषु" (ह. नि. अ. २।८) इत्येवंप्रायम्, शारीरमानसदोषजनितत्वात्।

आ० र०- प्राग्रूपस्य सामान्यरूपत्वमाह-लिङ्गमव्यक्तमिति। अव्यक्तं-विशेषज्ञानहीनम्। अल्पत्वात्-विशेषलक्षणसाधनापरिपूर्णत्वात्। किं व्याधिमात्रस्य ? न। यथायथं व्याधिविशेषस्य ज्वरादेः। यत्तु क्वचित्पूर्वरूपमुक्त्वा सामान्यरूपमुच्यते तद्विशेषरूपमेव। प्रतिविशेषं वक्तव्यम्। एकत्रोच्यते।

इदानीं रूपं लक्षयितुमाह-

तदेव व्यक्ततां यातं रूपमित्यभिधीयते।

संस्थानं व्यञ्जनं लिङ्गं लक्षणं चिह्नमाकृतिः॥५॥

स०-तदेव-प्राग्रूपं, व्यक्ततां यातं-व्यक्तदोषाधिष्ठितं सत्, रूपमित्यभिधीयते। तदेवेत्येवशब्देनैतत् द्योतयति,-यदेव शारीरं प्राग्रूपं पूर्वोपवर्णितं तदेवेह गृहीतव्यम्, स्थायित्वात्। तध्द्यामयानुबन्धि। मानसं शारीरमानसं चास्थायित्वान्न गृहीतव्यम्। तद्धि द्वयमप्युत्पन्नव्याधिसमनन्तरं प्रायेण नश्यतीति तद्व्यक्ततां न याति। अतः शारीरमेवोत्पित्सुव्याधिप्राग्रूपमिह पराम्रष्टुं युक्तम्। संस्थानादयः षट् रूपस्य पर्याया इत्यर्थः। इमे च पर्यायाः प्राग्रूपस्यापि योज्याः। यथा-पूर्वसंस्थानं पूर्वव्यञ्जनं पूर्वलिङ्गमित्यादि।

आ० र०- रूपलक्षणमाह-तदेव व्यक्ततामिति। तत्र पुर्वरूपव्यक्ततादोषविशेषेण निर्धारकत्वम्। रूपादयः सप्त पर्यायाः।

हेतुव्याधिविपर्यस्तविपर्यस्तार्थकारिणाम्।
औषधान्नविहाराणामुपयोगं सुखावहम्॥६॥
विद्यादुपशयं व्याधेः स हि सात्म्यमिति स्मृतः।

स०-उपयुज्यत इत्युपयोगः-सेवनम्। सुखमावहति-उत्पादयतीति सुखावहः,-देहस्य सुखं करोतीत्यर्थः। य उपयोगः सुखावहस्तमुपशयं विद्यात्-जानीयात्, मुनीन्द्र इति शेषः। केषामुपयोगः ? औषधान्नविहाराणाम्। औषधं-हरीतक्यादि। अन्नं-रक्तशाल्यादि। विहारो-वाग्देहमनोनिर्वर्तितश्चेष्टाविशेषो व्यायामव्यवायजागरणाध्ययनगीतभाषणध्यानधारणादिरूपः। औषधं चान्नं च विहारश्चौषधान्नविहाराः, तेषामौषधान्नविहाराणाम्। तेषां किम्भूतानाम्? हेतुव्याधिविपर्यस्तविपर्यस्तार्थकारिणाम्। हेतुव्याधिविपर्यस्तानां विपर्यस्तार्थकारिणां च। विपर्यस्ताः-विपरीताः, हेतुव्याध्योर्विपर्यस्ताः। हेतुश्च व्याधिश्च हेतुव्याधी, तयोर्विपर्यस्ता हेतुव्याधिविपर्यस्ताः,-निदानरोगयोर्विपरीताः। तथा विपर्यस्तानामर्थो विपर्यस्तार्थः, तं कुर्वन्तीति विपर्यस्तार्थकारिणः। हेतुव्याधिविपर्यस्ताश्च विपर्यस्तार्थकारिणश्च हेतुव्याधिविपर्यस्तविपर्यस्तार्थकारिणः, तेषाम्। केषां विपर्यस्तानामर्थं कुर्वन्ति? अत्र प्रकृतत्वाद्धेतुव्याधिविपर्यस्तानाम्। तदयमर्थः-हेतुव्याध्योरविपरीता अपि हेतुरूपा इव भासमाना व्यार्धिरूपा इव भासमाना हेतुव्याधिविपर्यस्तानामर्थं व्याध्युपशमलक्षणं कुर्वन्ति। यथा हेतुविपरीतैर्व्याधिविपरीतैश्चौषधान्नविहारैर्व्याध्युपशमः क्रियते प्रतिपक्षत्वात्, तथा

विपर्यस्तार्थकारिभिरपीत्यर्थः। सङ्ग्रहे तु जगाद (सू. अ. १ २)-"उभयार्थकारि पुनर्दैवव्यपाश्रयम्। तथा छर्द्यां छर्दनमित्यादि। एवंविधं ह्यविपरीतमेव सत् भेषजं विपरीतमर्थं करोति।" इति। तत्र हेतुविपरीता औषधान्नविहारा यथा-गुरुस्निग्धशीतजे व्याधौ लघुरूक्षोष्णमौषधमन्नं वा। तथा, सन्तर्पणोत्थेऽपतर्पणम्, अपतर्पणोत्थे सन्तर्पणम्, जागरणोत्थे व्याधौ स्वापः, स्वापोत्थे जागरणम्, व्यायामोत्थे आसना, इत्यादि। तथा, व्याधिविपर्यस्ता औषधान्निविहारा यथा-वातजे ज्वरे सर्पिःपानमौषधम्। तस्मिन्नेव ज्वरेऽन्नं पेया। विहारश्च तस्मिन्नेव ज्वरे देहमनोव्यापारोपरमः। तथा, पाचनसाध्ये ज्वरे दोषानपेक्षमौषधं मुस्तापर्पटकम्। अन्नं रक्तशाल्यादि। प्रमेहे रजनी यवान्नं च। तथा च वक्ष्यति (हृ. चि. अ. १। ७२)-"रक्ताद्याः शालयो जीर्णाः षष्टिकाश्च ज्वरे हिताः।" इत्यादि। विहारश्च यथा (हृ. चि. अ. १।१७१)-"ज्वरकालस्मृतिं चास्य हारिभिर्विषयैर्हरेत्।" इति। तथा मुनिरप्यवोचत् (च. चि. अ. ३।३१९)-"ज्वरकालं च वेगं च चिन्तयन् ज्वर्यते तु यः। तस्येष्टैश्च विचित्रैश्च विषयैर्नाशयेत्स्मृतिम्॥" इति। विपर्यस्तार्थकारिणश्च द्वेधा भवन्ति,-व्याधिविपर्यस्तार्थकारिणो हेतुविपर्यस्तार्थकारिणश्च। तत्र व्याधिविपर्यस्तार्थकारुणो यथा-छर्दिव्याधौ तदर्थकार्यौषधं मदनादि। अन्नं च तदुपसृष्टं शाल्यादि। अथवा यदहृद्यमसात्म्यमपरिशुष्कं गुरु च। विहारोऽङ्गुल्युत्पलनालादिना तदुद्वमनम्। यथा चातिसारे विरेचनम्। वमनेन विरेचनेन च छर्द्यतीसारयोर्वृद्धिरेव कर्तुं युक्ता, तद्धेतुकत्वात्तस्य। इह च शमनकरणाद्विपर्यस्तार्थकारित्वम्। हेतुविपर्यस्तार्थकारिणश्च यथा-मद्योत्थे व्याधौ मद्यमेवोयुक्तं व्याधिं शमयत्यौषधत्वेन। एवमन्नविहारावप्यूह्यौ। मद्येन मदात्ययस्य वृद्धिरेव कर्तुं युक्ता, तद्धेतुकत्वात्तस्य। इह तु शमनकरणाद्विपर्यस्तार्थकारित्वम्। एतदेव च तदर्थकारीति वदन्ति। तच्च मात्राशितीये (हृ. सू. अ. ८।२४) व्याख्यातमेव। हि-यस्मात्, सः-उपशयो, व्याधेः-आमयस्य, सात्म्यमिति स्मृतः। मुनीन्द्रैरिति वाक्यशेषः। एवं व्याधिगुणविपरीतो य आहारो विहारश्च प्रायेण निदानविपरीतः स व्याधिसात्म्यम्। मुनिस्त्ववोचत् (च. सू. अ. ६।५०)-"देशानामामयानां च विपरीतगुणं गुणैः। सात्म्यमिच्छन्ति सात्म्यज्ञाश्चेष्टितं चाद्यमेव च॥" इति।

आ० र०- उपशयलक्षणमाह-हेतुव्याधीति। हेतुविपर्यस्ताः-शीतादेजे व्याधावुष्णादयः। व्याधिविपर्यस्ताः-स्तम्भादिरूपे व्याधौ स्वेदादयः। विपर्यस्तार्थकारिणः-पित्तेऽन्तर्निगूढे विमार्गगे वा स्वेद इत्यादयः। स्वेदो हि पित्तस्य न विपर्यस्तः, अर्थं तु विपर्यस्तस्य करोति पित्तशमनाख्यम्। एवं त्रिविधस्यौषधस्य अन्नस्य विहारस्य चोपयोगो यः सुखावहः, तमुपशयं विद्यात्। तस्य पर्यायो व्याधिसात्म्यम्।

उपशयलक्षणकथनप्रस्तावादनुपशयोऽपि लक्ष्य इत्याह-

विपरीतोऽनुपशयो व्याध्यसात्म्याभिसंज्ञितः ॥७॥

स०-अतो यथानिर्दिष्टलक्षणादुपशयाख्यात् यो विपरीतलक्षण औषधान्नविहाराणामुपयोगः-सेवनमसुखावहः, सोऽनुपशय उच्यते। स एव व्याधेरसात्म्यमित्यभिसंज्ञितः-आभिमुख्येन सङ्केतितः।

आ० र०- अनुपशयलक्षणमाह-विपरीतोऽनुपशय इति। उपशयलक्षण[त्]विपरीतो-दुःखावहः। तस्य पर्यायो व्याध्यसात्म्यम्। अनुपशयस्य पृथगुद्देशो न कृतः, उपशयान्तर्भावात्। इत्थं सुखमन्यथा दुःखमित्यन्वयव्यतिरेकाभ्यां ह्युपशय एव निर्घार्यते। सङ्ग्रहे तु देशकालोपयोगो ह्यु(ऽप्यु) क्तः (नि.अ.१)-"एतेन देशकालौ व्याख्यातौ।" इति।

निदानप्राग्रूपरूपोपशयानुक्त्वा, सम्प्रति सम्प्राप्तिं लक्षयितुमाह-

यथादुष्टेन दोषेण यथा चानुविसर्पता।

निर्वृत्तिरामयस्यासौ सम्प्राप्तिर्जातिरागतिः ॥८॥

स०-येन प्रकारेण दुष्टः-कुपितो, वाताद्यन्यतमो दोषो-यथादुष्टः, तेन यथादुष्टेन दोषेण यथा चानुविसर्पता-देहमनुधावता सन्निवेशविशेषेण गच्छता, प्रत्यामयं वा निर्वृत्तिः-निष्पत्तिरुद्भव इति यावत्, निर्दिष्टा सा सम्प्राप्तिः। सा च जातिरागतिश्च कथ्यते। यथा ज्वरस्य-"मलास्तत्र (हृ. नि. अ. २।३) इत्यादिलक्षणलक्षिता। तत्र मलानामामाशयप्रवेशनेन, तथाऽऽमानुगमनेन, तथा स्रोतोरोधेन, तथा पक्तिस्थानाज्ज्वलननिरसनेन, तथा तेनैव जाठरेण वह्निना तेषामभिसर्पणेन, तथा सकलदेहतापेन, गात्रं चात्युष्णं कुर्वता, एवंविधया सम्प्राप्त्या ज्वरोऽयमिति निश्चीयते। एवं रक्तपित्तादिष्वपि चिन्त्या सम्प्राप्तिः।

आ० र०- सम्प्राप्तिलक्षणमाह-यथा दुष्टेनेति। यथायेन प्रकारेण निर्वृत्तिः, असौ प्रकारः सम्प्राप्तिः। स च प्रकारो दुष्टत्वेन [सं]चलितत्वेन च। रूपहानिर्वा रूपवृद्धिर्वा रूपान्तरं वेत्यादि दुष्टत्वप्रकारः। सञ्चलितत्वेन वा वेगेन वा मार्गान्तरेण वा गतिरित्यादि सञ्चलितत्वप्रकारः। सम्प्राप्तेः पर्यायौ जातिरागतिश्च।

सङ्ख्याविकल्पप्राधान्यबलकालविशेषतः।

सा भिद्यते, यथाऽत्रैव वक्ष्यन्तेऽष्टौ ज्वरा इति॥९॥

दोषाणां समवेतानां विकल्पोंऽशांशकल्पना।

स्वातन्त्र्यपारतन्त्र्याभ्यां व्याधेः प्राधान्यमादिशेत्॥१०॥

हेत्वादिकात्स्न्र्यावयवैर्बलाबलविशेषणम्।

नक्तंदिनर्तुभुक्तांशैर्व्याधिकालो यथामलम्॥११॥

स०-सा च-सम्प्राप्तिः, सङ्ख्यादिविशेषेण भिद्यते, -सङ्ख्या च विकल्पश्च प्राधान्यं च बलं च कालश्च त एवम्, तेषां विशेषः सङ्ख्याविकल्पप्राधान्यबलकालविशेषः, तस्मात्सा सम्प्राप्तिर्बहुधा सम्पद्यते।

तत्र सङ्ख्याविशेषो यथा-[अत्रैव-]इहैव, वक्ष्यन्तेऽष्टौ ज्वराः, इति। एवमन्यत्र पञ्च कासाः, पञ्च श्वासाः, अष्टौ गुल्माः, इत्येवमादयः सङ्ख्याविशेषाः सम्प्राप्तिभेदाः।

दोषाणां-वातादीनां, समवेतानां-एकस्मिन् व्याधौ सङ्घट्टितानां, या अंशांशकल्पना-भागेन भागेन कार्यानुमेयेन निरूपणा, स विकल्पः। अंशश्चांशश्चांशांशौ, ताभ्यां कल्पना-अनेकविधो विशेषः। यथा-अस्मिन् व्याधौ वातः कुपितः कदाचिदेकेन गुणेनाधिकेन रूक्षेण कदाचिल्लघुना कदाचिच्छीतेन कदाचिद्वाभ्यां त्रिभिर्वाऽधिकैर्दुष्यति। एवं पित्तं कद्वम्लादिना कुपितं कदाचिदेकेन गुणेन तीक्ष्णेन कदाचिदुष्णेन कदाचिद्वाभ्यां बहुभिर्वाऽधिकैर्दुष्यति। एवं कफेऽपि निरूप्यम्। तदेवंरूपो यो निश्चयः स विकल्प इति। यतश्चैवं ततः सर्वेषु रोगेषु तुल्याः कोपनप्रकारा न भवन्ति। तथा हि-रूक्षादयो गुणा वातस्य सदा कोपकाः, किन्तु कदाचित् कस्यचिद्गुणस्य प्रकृष्टत्वं कोपने कस्यचिन्न्यूनत्वमिति। अत एव हेतोर्गदानन्त्यं चिकित्सानन्त्यं च। दोषाणामिति बहुवचनोपादानादेव समवेतानामित्यर्थे लब्धे समवेतग्रहणं पृथग्द्वन्द्वसमस्तानामपि चांशांशकल्पना विकल्प उच्यत इति प्रतिपादनार्थम्।

स्वातन्त्र्यं च पारतन्त्र्यं च, ताभ्यां व्याधेः प्राधान्यमादिशेत्-जानीयात्। तत्र स्वतन्त्रस्य व्याधेः प्राधान्यम्, यथा स्वनिर्दिष्टोपक्रमसाध्यत्वात्। अस्वतन्त्रस्य व्याधेरप्राधान्यम्, प्रधानव्याध्युपक्रमेण प्रायस्तस्याप्युपक्रम्यत्वात्। यद्यपि प्राधान्यविशेषादसौ सम्प्राप्तिर्भिद्यत इत्युक्तम्, तथाऽप्यप्राधान्यविशेषादप्यसौ सम्प्राप्तिर्भिद्यत इत्यर्थादुक्तं भवत्येव।

प्राधान्याप्राधान्ययोः परस्परं सापेक्षत्वात्। तथा हि-अप्राधान्यं प्राधान्यमपेक्ष्य वक्तुं युज्यते, अप्राधान्यं चापेक्ष्य प्राधान्यमिति।

कृत्स्नस्य भावः कात्स्न्र्यम्। कात्स्न्र्य चावयवाश्च कात्स्न्र्यावयवाः। हेत्वादिना कात्स्न्र्यावयवाः। आदिशब्देन प्राग्रूपादयो गृह्यन्ते। बलं चाबलं च बलाबले व्याधेः सम्बन्धिनी, तयोर्विशेषेणं-विशिष्टता, बलाबलविशेषणम्। तद्यथासङ्ख्येन हेत्वादिकात्स्न्र्यावयवैरादिशेत्। तत्र प्रतिरोगं यन्निदानत्वेनोपदिष्टं, तत्किं कात्स्न्र्येनास्य व्याधेरुत्पादकमुतावयवेन ? एवं प्राग्रूपमपि। तथा लक्षणमपि किं समस्तमस्य व्याधेर्लक्ष्यत उतावयवेन ? उपशयोऽप्यस्य व्याधेः सन्तर्पणापतर्पणरूपः, स किं कात्स्न्र्येन सुखानुबन्धं करोत्युतावयवेन ? तत्र कात्स्न्र्येन यथा-रक्तशाल्यादिमांसघृतक्षीरदधिवसामज्जतैलादिना। अवयवेन तु-रक्तशाल्यादिमांसाद्यन्यतमेन चैकैकेन। तथाऽपतर्पणरूपोऽपि यवश्यामाकगवेधुककोरदूषनीवारतक्रारनालादिः, स किं कात्स्न्र्येन सुखानुबन्धं करोत्युतावयवेन यवादिनैकैकेन ? एवमन्यदपि चिन्त्यम्। यथा च ज्वरस्य-आमाशयं प्रविश्य किं कात्स्न्र्येनाथांशेन ? तथाऽऽममनुगम्य किं कात्स्न्र्येनाथांशेन ? इत्यादि। तदेवंभूतैर्मलैरयं ज्वरो निर्वर्तित इत्येवं बलाबलविशेषणमादिशेदिति।

नक्तं च दिनं च ऋतुश्च भुक्तं च, तानि नक्तंदिनर्तुभुक्तानि। तेषामंशाः-अवयवाः, नक्तंदिनर्तुभुक्तांशाः। व्याधेः कालो व्याधिकालः। यथामलं-यथादोषम्। यो यस्य दोषस्यात्मीयः कालस्तं नक्तंदिनर्तुभुक्तांशैर्व्याधिकालमादिशेत्। यथा-श्लेष्मज्वरस्य रात्रिमुखे पूर्वाह्णे वा वसन्ते ऋतावाहारे च भुक्तमात्रे बललाभो भवति। एवं मारुतपित्तयोरपि बललाभो निरूप्यः।

आ० र०- सम्प्राप्तिभेदानाह-सङ्ख्याविकल्पेति। अष्टौ ज्वरा इत्युक्तेर्जा(र्ज्ञा)यते ज्वरस्यायमसाधारण उत्पत्तिप्रकारः, येनाष्टधैवोत्पद्यत इति। तस्य प्रकारस्य शब्दान्तराप्रतिपाद्यत्वात् सङ्ख्याशब्देनोक्तिः। द्वन्द्वजे सन्निपातजे वा व्याधौ व्याधितारतम्यविकल्पः। यत्रैकः प्रकारः स्वतन्त्रं व्याधिमुत्पादयंस्तत्परतन्त्रमप्युत्पादयति तत्प्राधान्यम्। अत्रोत्पत्तिप्रकारे हेत्वादिसामग्र्यनुरूपं व्याधेर्दुःसहत्वं तद्बलम्। अबलग्रहणमनुपशयवत्। यत्रोत्पत्तिप्रकारे स्वदोषकाले व्याधिवृद्धिः स कालः।

इति प्रोक्तो निदानार्थः

स०-इतिशब्दः प्रकारे, अनेन सङ्क्षेपाख्येन प्रकारेण यथानिर्दिष्टेन, निदानार्थो-निदानाभिधेयः, समासतः [प्रोक्तः-] प्रकर्षेणोक्तो, न तु व्यासतः।

आ० र०- निदानार्थमुपसंहरति-इति प्रोक्त इति।

अत एवाह-

तं व्यासेनोपदेक्ष्यति।

स०-य एव निदानार्थः समासेन प्रोक्तः, तमेव व्यासेनोपदेक्ष्यति-तन्त्रकृदभिधास्यति।

आ० र०- नियमार्थं विस्तरं वक्तुं प्रतिजानीते-स व्यासेनोपदेक्ष्यत इति। व्यासेन-विस्तरेण, उपदेक्ष्यते-वक्ष्यति(ते), ग्रन्थकारः(रेण)। प्रतिरोगमिति शेषः।

सर्वेषामेव रोगाणां निदानं कुपिता मलाः॥ १२॥
तत्प्रकोपस्य तु प्रोक्तं विविधाहितसेवनम्।

स०-सर्वेषामपि रोगाणां कुपिता मलाः-क्रुद्धा वातपित्तकफाः, निदानं-हेतुः। तदित्यनेन वातादयः परामृश्यन्ते। तस्य-वातादिप्रकोपस्य, निदानं विविधं-नानाप्रकारं, अहितसेवनं-अहितानुष्ठानं, प्रोक्तम्।

आ० र०- कञ्चिदंशमिहैव वक्ति-सर्वेषामेवेति। मलाः-दोषाः।

किं तत् ? इत्याह-

अहितं त्रिविधो योगस्त्रयाणां प्रागुदाहृतः॥ १३॥

स०-त्रयाणां-कालार्थकर्मणां, त्रिविधो-हीनमिथ्यातिमात्रलक्षणो, योगोऽहितमिति प्राक्-सूत्रस्थाने, उदाहृतः-उक्तः। यथा (ह. सू. अ. १२।३५)-"अर्थैरसात्म्यैः संयोगः कालः कर्म च दुष्कृतम्।" इत्यादि।

आ० र०-[त्रिविधः-]हीनमिथ्यातिमात्रभेदेन। त्रयाणां-कालार्थकर्मणाम्। प्राक्-दोषभेदीयाध्याये।

इदानीं वातादीनामन्नपानविहारसहितं कोपकारणमाह-

तिक्तोषणकषायाल्परूक्षप्रमितभोजनैः।
धारणोदीरणनिशाजागरात्युच्चभाषणैः॥१४॥
क्रियातियोगभीशोकचिन्ताव्यायाममैथुनैः।
ग्रीष्माहोरात्रिभुक्तान्ते प्रकुप्यति समीरणः॥१५॥

स०-तिक्तादिभिः समीरणः कुप्यति। ननु, अल्पप्रमितभोजनशब्दयोः पर्यायशब्दत्वाद्वयोरुपादानमयुक्तम्। नैतदस्ति। भिन्नार्थत्वादनयोः। तथा हि-अल्पभोजनं हीनभोजनमुच्यते। प्रमितभोजनं तु तदुच्यते यदतिक्रान्तवेलं भुक्तम्। तथा चागमः-"धान्यं पुलाकनिष्पन्नं ज्ञेयं तत्प्रमिताशनम्। अतीतकालं यद्भुक्तं" इत्यादि। धारणोदीरणे-वातवेगादीनाम्। क्रियातियोगे-वमनविरेचनास्थापनादिक्रियाणामतिसेवनम्। ननु, आस्थापनेन च वायोः कोपोऽनुपपन्नः। तथा हि-"वाते बस्तिरिष्यते" (ह्. सू. अ. १९।१) इत्युक्तम्। नैवम्। आस्थापनातियोगो हि पित्तश्लेष्मादीनां धातूनामपचयकृत्। तदपचयाच्च वायोः कोपः। तथा चोक्तम्-"वायोर्धातुक्षयात् कोपो मार्गस्यावरणेन च।" इति। तस्माद्युक्तो वायोरास्थापनातियोगेन कोपः। तत्रकृताऽप्युक्तम् (ह्. सू. अ. १९।६५)-"स्नेहबस्तिं निरूहं वा नैकमेवातिशीलयेत्। उत्क्लेशाग्निवधौ स्नेहान्निरूहान्मरुतो भयम्॥" इति। ग्रीष्मान्त इत्यन्तशब्दः समीपवचनो वेद्यः। तेन ग्रीष्मसमीपे वर्षाख्ये काले प्रकोप इति युज्यते। अन्यथा "चयप्रकोपप्रशमा वायोर्ग्रीष्मादिषु त्रिषु।" (ह्. सू. अ. १२।२४) इत्येतद्व्याहन्येत।

आ० र०- तिक्तादिभिः समीरणः कुप्यति। प्रमितं-चिरकालनिहितं, अजीर्णमित्यर्थः। ग्रीष्मादीनामन्ते-वर्षापराह्णापररात्रपरकालविदाहसञ्चितम्। सङ्ग्रहे तु (नि.अ.१)-"विष्टम्भिविरूढकत्तृणधान्यकलायचणककरीरतुम्बकालिङ्गचिर्भिटविसशालूक-जाम्बवतिन्दुकशुष्कतृषिताशनक्षुधिताम्बुपानासृक्क्षयप्रवातबलवद्युद्धनिग्रह् आतिखर-चापकर्षणात्युच्चविषमलङ्घनधावनसरित्प्रतरणाभिघातदम्यगोवाजिगजनिग्रहाश्मशिलालोहका

ष्टोत्क्षेपविक्षेपभ्रमणचालनगाढोच्छादनपराघातनादिसाहसोत्कण्ठा दिभिरतिसेवि तैः।" इत्यधिकम्।

पित्तं कट्वम्लतीक्ष्णोष्णपटुक्रोधविदाहिभिः।
शरन्मध्याह्नरात्र्यर्धविदाहसमयेषु च॥ १६॥

स०-पित्तं कट्वादिभिः कुप्यति। अर्धरात्रे पित्तस्य कालस्वभावात्कोपः।

आ० र०- कट्वादिभिः पित्तं प्रकुप्यति। विदाहसमयः-आहारस्य विदग्धावस्था। सङ्ग्रहे तु(नि.अ.१)- "क्षारशुक्तशाण्डाकीमद्यमूत्रमस्तुदधिधान्याम्लतैलकुलत्थमाषनिष्पावतिलान्नलवण-कुठेरकादिवर्गामाम्रातकाम्लीकापीलुभल्लातकास्थिलाङ्गलिकामरिचातपाग्निरजोधूमक्रोधेर्ष्याजीर्ण मैथुनोपगमादिभिः।" इत्यधिकम्।

स्वाद्वम्ललवणस्निग्धगुर्वभिष्यन्दिशीतलैः।
आस्यास्वप्नसुखाजीर्णदिवास्वप्नातिबृंहणैः॥ १७॥
प्रच्छर्दनाद्ययोगेन भुक्तमात्रवसन्तयोः।
पूर्वाह्णे पूर्वरात्रे च श्लेष्मा

स०-स्वाद्वादिभिः कफः कुप्यति।

आ० र०- स्वाद्वादिभिह् श्लेष्मा प्रकुप्यति। आस्या-आसना। स्वप्नसुखं-शय्यासुखम्। सङ्ग्रहे तु (नि.अ. १)- "मोचखर्जूरभव्यनालिकेरनिशाम्बुपानात्यम्बुपानभुक्तमात्रकालातिस्वप्-नकायवाङ्मनोव्यापारानारम्भानुपधानशयनावश्यायहर्षच्छर्दिविघातादिभिः।" इत्यधिकम्।

द्वन्द्वं तु सङ्करात्॥ १८॥

स०-द्वन्द्वं-द्वयं, वातपित्ते वातकफौ पित्तकफाविति। सङ्करात्-मिश्रीभावात्तिक्तादीनां, कुप्यति। एतदुक्तं भवति,-येन तिक्तादिर्वातहेतुः सेवितः कट्वम्लादिश्च पित्तहेतुः, तस्य वातपित्ते प्रकुप्यतः। एवं शेषयोर्योज्यम्।

आ० र०- वातादिकोपनसङ्करात्-द्वयोर्द्वयोर्योगात्, द्वन्द्वं प्रकुप्यति।

मिश्रीभावात्समस्तानां सन्निपातस्तथा पुनः।
सङ्कीर्णाजीर्णविषमविरुद्धाध्यशनादिभिः॥१९॥
व्यापन्नमद्यपानीयशुष्कशाकाममूलकैः।
पिण्याकमृद्यवसुरापूतिशुष्ककृशामिषैः॥२०॥
दोषत्रयकरैस्तैस्तैस्तैस्तथाऽन्नपरिवर्तनात्।
ऋतोर्दुष्टात्पुरोवाताद्ग्रहावेशाद्विषाद्गरात्॥२१॥
दुष्टान्नात् पर्वताश्लेषाद्ग्रहैर्जन्मर्क्षपीडनात्।
मिथ्यायोगाच्च विविधात्पापानां च निषेवणात्॥२२॥
स्त्रीणां प्रसववैषम्यात्तथा मिथ्योपचारतः।

स०-समस्तानां-तिक्तादीनां, मिश्रीभावात् सन्निपातः कुप्यति। तथेति समुच्चये। सङ्कीर्णाशनादिभिश्च सन्निपातः कुप्यति। आदिशब्देन पर्युषितक्लिन्नादिभोजनादयो गृह्यन्ते। सङ्कीर्णाशनादीनां लक्षणं प्रागुक्तम्। दोषत्रयकरैस्तैस्तैरिति पूर्वोक्तैर्मन्दकदधिफाणितयवकपाटलव्रीहिसर्षपशाकादिभिः। तथेति न केवलमैतेः, अन्नपरिवर्तनादिभिश्चेति तथाशब्दस्यार्थः।

आ० र०- सर्वेषां मिश्रीभावात् सङ्कीर्णाशनादिभिश्च सन्निपातः प्रकुप्यति। सङ्कीर्णाशनं-अपाङ्क्तैयैः सह भोजनम्, समशनं च। अजीर्णभोजनं-अजीर्णहेतुद्विष्टविष्टभ्यादि भोजनम्। अन्नपरिवर्तनात्-क्रीतान्नभोजनादसात्म्यभोजनाच्च। दुष्टामात्-दोषदुष्टापक्वान्नरसात्। पर्वताश्लेषात्-पर्वतासन्नवननिवासात्। मिथ्योपचारतः-प्रसूतानाम्। सङ्ग्रहे तु (नि.अ.१)-"मन्दकदधियावकसर्शपलकुचामफलासात्म्यौषधिगन्धाघ्राणानार्तवदुर्दिनरसायन-स्नेहस्वेदविरेचनादिमित्यायोगेभ्यः पूर्वकृतानां पापानां च कर्मणां परिणामात्।" इत्यधिकम्।

प्रतिरोगमिति क्रुद्धा रोगाधिष्ठानगामिनीः॥२३॥
रसायनीः प्रपद्याशु दोषा देहे विकुर्वते॥२३ १/२॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां तृतीये निदानस्थाने सर्वरोगनिदानं नाम प्रथमोऽध्यायः॥ १॥

****

स०-प्रत्यामयमिति-अनेन प्रकारेण, क्रुद्धाः-कुपिताः, दोषा आशु-द्रागेव, देहे विकुर्वते-शरीरे विकारं जनयन्ति। किं कृत्वा ? रसायनीः-नाडीः, प्रपद्य-प्राप्य। किम्भूताः ? रोगस्याधिष्ठानानि-स्थानानि रसरुधिरादीनि, तानि गन्तुं शीलं यासां ता रोगाधिष्ठानगामिन्यः, तास्तथाविधा नाडीः प्राप्य विकृतिभाजो दोषाः सम्पद्यन्त इत्यर्थः।

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टाङ्गहृदयटीकायां सर्वाङ्गसुन्दराख्यायां तृतीये निदानस्थाने सर्वरोगनिदानं नाम प्रथमोऽध्यायः समाप्तः॥ १॥

आ० र०- सम्प्राप्तिमाह-प्रतिरोगमिति। रोगाधिष्ठानगामिनीः-रोगोत्पत्तिस्थानानि गताः। रसायनीः-नाडीः। सङ्ग्रहे तु (नि.अ.१)-"आधानजन्मनिधनप्रत्यराख्यविपत्करे। नक्षत्रे व्याधिरुत्पन्नः क्लेशाय मरणाय वा॥ जन्मनक्षत्राद्गण्यमानेशु नवकेषु प्रथमतृतीयपञ्चमसप्तमानि-जन्मविपत्करप्रत्ययनिधनसंज्ञानि। जन्मै(न्मनै)व द्वितीयतृतीयमानवकस्थं-आधानम्। ज्वरस्तु जातः षड्रात्रादिश्विनीषु निवर्तते। भरणीषु तु पञ्चाहात्, सप्ताहात् कृत्तिकासु च॥ त्रिसप्तरात्रादथवा, रोहिण्यामष्टरात्रतः। एकादशाद्वा दिवसामृगे षण्णवरात्रयोः॥ पञ्चाहान्मृत्युरार्द्रायां त्रिपक्षे संशयोऽथवा। पुनर्वसौ प्रवृत्तस्तु ज्वरोऽपैति त्रयोदशात्॥ दिवसात्सप्तविंशद्वा व्यहात्सप्ताहतोऽथवा। पुष्ये श्लेषासु मरणं चिरेणापि, मघासु तु॥ अवश्यं स्वास्थ्यमाप्नोति द्वादशाहान्मृतो न चेत्। फल्गुन्योः पु\ऊर्वयोर्मृत्युरन्ययोस्तु दिनेऽष्टमे॥ नवमेऽह्न्येकविंशे वा ज्वरः सौम्यत्वमृच्छति। हस्तेन, सप्तमे शान्तिश्चित्रायामष्टमेऽथवा॥ पुनश्चित्रागमे स्वातौ दशाहादथवा त्रिभिः। पक्षैर्मृत्युं विशाखासु द्वाविंशेऽहनि निर्दिशेत्। नवमेऽह्नि ह चेच्छान्तिर्मैत्रे मृत्युस्ततः परम्। ज्येष्ठायां पञ्चमे मृत्युरूर्ध्वं वा द्वादशात् सुखम्॥ स्यास्थ्यं दशाहान्मूलेन त्रिसप्ताहेऽथवा गते। पूर्वाषाढासु नवमे ततोऽन्यासु तु मासतः॥ अष्टाभिरथवा मासैर्नवभिर्वा भवेच्छिवम्। [ज्वरसु

श्रवणे याति शान्तिमेकादशाहतः॥] एन्द्रेऽष्टाहाद्धनिष्ठासु दशाहाद्वारुणेषु तु। षडहे द्वादशाहे वा मृत्युर्भाद्रप्दासु तु॥ उत्तरासु द्विसप्ताहात्प्रशमो, रेवतीषु तु। चतूरात्रेऽष्टरात्रे वा क्षेममित्याह शौनकः॥' इति।

इति हेमाद्रिटीकायामायुर्वेदरसायने।
सर्वरोगनिदानं च कथितं च समासतः॥१॥

****

द्वितीयोऽध्यायः।

स०-सर्वरोगनिदानादनन्तरं ज्वरनिदानारम्भेऽयं सम्बन्धः। उक्तं सर्वरोगनिदानम्। अतोऽनन्तरमवश्यं कस्यचिद्विशिष्टस्य रोगस्य निदानं वक्तुमुचितम्। रोगेषु च ज्वरः प्रधानः। तथा च मुनिः (च. सू. अ. २५।४०)-"ज्वरो रोगाणां।" इति। स्वयमेव चास्य प्राधान्यं तन्त्रकृत् प्रतिपादयिष्यतीति ज्वरनिदानमेवारब्धुं युक्तम्।

अथातो ज्वरनिदानं व्याख्यास्यामः।

इति ह स्माहुरात्रेयादयो महर्षयः।

(गद्यसूत्रे॥२॥)

स०-अथादिशब्दानां पूर्ववद्व्याख्या।

आ० र०- अथज्वरनिदानं व्याख्यातुं प्रतिजानीते-अथेति।

ज्वरो रोगपतिः पाप्मा मृत्युरोजोशनोऽन्तकः।

क्रोधो दक्षाध्वरध्वंसी रुद्रोर्ध्वनयनोद्भवः॥१॥

जन्मान्तयोर्मोहमयः सन्तापात्माऽपचारजः।

विविधैर्नामभिः क्रूरो नानायोनिषु वर्तते॥२॥

स०-रोगाणां पती रोगपतिः-सर्वरोगप्रधानः। पाप्मा-पापस्वभावः। तथा, मृत्युः-सर्वप्राणिनां हि मरणेनासावेव योजयति यथा, न तथाऽन्ये रोगाः। सर्वधात्वाप्यायकं यदोजस्तदशनं भोजनं यस्येत्योजोशनः। अन्तको-मारणहेतुसामान्यात्। क्रोधो-भगवतो महेश्वरस्य दक्षापमानितस्य लोकान्निदिधक्षोर्ललाटान्निर्गतः। अत एवाह-दक्षाध्वरध्वंसी रुद्रोर्ध्वनयनोद्भव इति। जन्मान्तयोर्मोहमय इति ज्वरस्य सन्तापात्मकत्वं लिङ्गम्, जन्मान्तयोश्च क्वचित्सन्तापानुपलब्धेर्मोहमय इत्युक्तम्, मोहस्वभावादेवान्यजन्मजं कर्म प्राणी न स्मरति। यश्चापचारजः-तथाविधादाहारविहारादुद्भूतः, स सन्तापस्वभावः, स च क्रूरो-दुश्चिकित्स्यः। नानायोनिषु-हस्त्यश्वगोपक्ष्यादिषु च, विविधैर्नामभिर्वर्तते। [यथा-"-पाकलस्तद्यथेभानामभितापो हयेषु च। गवां गोकर्णकश्चैव पक्षिणां मकरस्तथा॥ वान्तादानामलर्कः स्यादब्जेष्विन्द्रमदः स्मृतः। ओषधीषु तथा ज्योतिश्चूर्णको धान्यजातिषु॥ जलेषु नीलिका भूमा वूषो नृणां ज्वरो मतः। 'ऋते देवमनुष्येभ्यो नान्यो विषहते तु तम्॥ शेषाः सर्वे विपद्यन्ते तिर्यग्योन्यो ज्वरार्दिताः। कर्मणा लभते जन्तुर्देवत्वं मानुषादपि॥ पुनश्चैव च्युतः स्वर्गान्मानुष्यमभिपद्यते। तस्मात्स देवभावाच्च सहते मानवो ज्वरम्' (सु. उ. अ. ३९।११)॥" इति।] यथा-दन्तिशरीरे पाकलो नाम ज्वरः, अश्वशरीरेऽभितापकः, गोशरीरे गोकर्णकः, पक्षिशरीरे मकरः, श्वशरीरेऽलर्कः, [मत्स्येष्विन्द्रमदः, ओषधीषु ज्योतिः, धान्येषु चूर्णकः,]

अप्सु नीलिका, [भूमावूषः,] मानुषेषु ज्वरः, इति। ननु, यदि रोद्रोर्ध्वनयनोद्भवः, तर्ह्यपचारज इति कथमुक्तम्? ब्रूमः। पूर्वं कृतयुगे ललाटजलोचनादुत्पन्नो ज्वरः। त्रेतायुगे तु सम्प्राप्ते परिग्रहदोषाद्धर्मस्य पादोऽन्तर्हित इत्यपचारेणासौ प्रथमं प्राणिषूद्भूतोऽपचारज इत्युच्यते। कलियुगेऽप्यन्नपानौषधाद्यपचारेण जात इत्यपचारज उच्यते, इति न किञ्चिदत्रायुक्तम्।

आ० र०- ज्वरप्रभावमाह-ज्वरो रोगपतिरित्यादि। ओजोऽशनं-आहारो, यस्य [इति] ओजोशनः। दुष्कृतस्यान्तं करोति भोगेनेत्यन्तकः। जन्मकाले अन्तकाले[चा]ऽयं मोहमयो-मूर्च्छात्मकः।

स चापचारजो ज्वरः किमेको वाऽनेकविधः ? इत्याह-

स जायतेऽष्टधा दोषैः पृथङ्मिश्रैः समागतैः।
आगन्तुश्च

स०-सः-सन्तापलक्षणो ज्वरः, अष्टधा-अष्टप्रकारः, सम्पद्यते। कथम्? पृथग्दोषैः-वातपित्तकफैः, तथा मिश्रैः-द्वाभ्यां द्वाभ्याम्, तथा समागतैः-सन्निपतितैस्त्रिभिः, तथाऽऽगन्तुकारणजनितो ज्वरः, एवं पृथग्दोषैस्त्रयो मिश्रैस्त्रयः सन्निपतितैरेक आगन्तुश्चैक इत्यष्टौ।

आ० र०- ज्वरभेदानाह-स जायत इति। पृथग्दोषैस्त्रयः, द्विशो मिश्रैस्त्रयः, समागतैरेकः, आगन्तुरेकः, इत्यष्टधा।

सम्प्राप्तिमस्याधुना वक्ति-

मलास्तत्र स्वैः स्वैर्दुष्टाः प्रदूषणैः॥३॥
आमाशयं प्रविश्याममनुगम्य पिधाय च।
स्रोतांसि पक्तिस्थानाच्च निरस्य ज्वलनं बहिः॥४॥
सह तेनाभिसर्पन्तस्तपन्तः सकलं वपुः।
कुर्वन्तो गात्रमत्युष्णं ज्वरं निर्वर्तयन्ति ते॥५॥

स०-तत्रेति निर्धारणे, तेष्वष्टसु ज्वरेषु मध्ये निजानां ज्वराणामुत्पत्तिर्निर्धार्यते। मलाः-वातादयः, स्वैः स्वैः प्रदूषणैः-कोपनैः, दुष्टाः-कुपिताः, ज्वरं निर्वर्तयन्ति-उत्पादयन्ति। तत्र यथा-वातस्तिक्तादिभिः, पित्तं कटुकादिभिः, कफः स्वाद्वादिभिः, एवं संसर्गे सन्निपाते च चिन्त्यम्। आगन्तुना च केनचित् प्रकुपिता दोषा ज्वरं निर्वर्तयन्ति। यद्यपि चागन्तुज्वरस्तद्धेतुकः, तथाऽपि तत्रापि वातादय एव हेतवः। न हि वातादीन् विमुच्य व्याधेः समुद्भवः कथमपि सम्भाव्यते। एतावांस्तु विशेषः,-दोषजे व्याधौ पूर्वं वातादयः कुप्यन्ति पश्चात्कायस्य पीडा भवति। आगन्तुके तु व्याधौ पूर्वं शरीरस्य व्यथा भवति पश्चाद्वातादिकोप इति। कयाऽऽनुपूर्व्या ज्वरं निर्वर्तयन्ति? इत्याह-आमाशयमित्यादि। आमाशयं प्रविश्य-नाभिस्तनान्तरे स्थित्वा, तथाऽऽमं-पूर्वोक्तलक्षणलक्षितं, अनुगम्य तेन चामेनानुगताः स्रोतांसि-रसादिवाहीनि, पिधायछादयित्वा, तथा ज्वलनं पक्तिस्थानाद्बहिर्निरस्य-निष्कास्य। पक्तिग्रहणमत्र जाठराग्नेर्निःसन्देहेन ग्रहणार्थम्, अन्यथा त्रयोदशानामग्नीनां मध्यात् कतमं ज्वलनं स्थानाद्बहिर्निरस्येति सन्दिह्येत। तेन च-निरस्तवह्निना, सह-एकलोलीभूताः, सकलं वपुरभिसर्पन्तस्तपन्तो गात्रमत्युष्णं कुर्वन्तो ज्वरं निर्वर्तयन्ति। अत्युष्णग्रहणेनैवं प्रतिपादयति,-अत्युष्णगात्रत्वेनैव ज्वरसम्भवः, नोष्णगात्रमात्रेण। तथा च निरामयस्यापि हि प्राणिनो जीवतो गात्रमुष्णं भवत्येव। ननु, वायुकृते ज्वरे वायोर्योगवाहित्वात् पित्तकृतेऽपि ज्वरे पित्तस्य वह्निना समानगुणत्वात् सन्तापोपलब्धिर्युक्ता। श्लेष्मज्वरे तु श्लेष्मणो वह्निप्रतिपक्षत्वात् कथमिव सन्तापकत्वं युक्तम्? इति केचित्। अत्रोच्यते। स्वभावादुपपन्नमेतत्। ज्वरस्य ह्ययमचिन्त्यः स्वभावः, येनावश्यं सन्तापमुत्पादयति। एवं वातस्यामूर्तित्वेऽपि गुल्मादिषु श्यावारुणत्वोपलब्धिः। तस्माद्व्याधीनामेवं स्वभावविशेषान्न्याय्यमेवेदम्।

आ० र०- ज्वरसम्प्राप्तिमाह-मलस्तत्रेति। आममनुगम्य-आमेन रसेनैकीभूय, पक्तिस्थानात्-ग्रहण्याः, सह तेनज्वलनेन, तपन्तः-सन्तापयन्तः, ते-मला एवा, प्रारम्भकाः।

स्रोतोविबन्धात्प्रायेण ततः स्वेदो न जायते।

स०-यत एव स्रोतःपिधानं तत एव हेतोः स्वेदो न जायते। प्रायोग्रहणात् क्वचित्पित्तज्वरादौ स्वेदो जायत एवेत्यर्थः। तथा चानन्तरमेव तन्त्रकृदधीते (श्लो. २०)-"स्वेदो निःश्वासवैगन्ध्यं" इत्यादि।

आ० र०- स्वेदाभावे युक्तिमाह-स्त्रोतोविबन्धात्प्रायेणेति। प्रायेणेति पित्तज्वरादौ स्वेददर्शनात्।

पूर्वरूपं लक्षयितुमाह-

तस्य प्राग्रूपमालस्यमरतिर्गात्रगौरवम्॥६॥
आस्यवैरस्यमरुचिजृम्भा सास्राकुलाक्षिता।
अङ्गमर्दोऽविपाकोऽल्पप्राणता बहुनिद्रता॥७॥
रोमहर्षो विनमनं पिण्डिकोद्वेष्टनं क्लमः।
हितोपदेशेष्वक्षान्तिः प्रीतिरम्लपटूषणे॥८॥
द्वेषः स्वादुषु भक्ष्येषु तथा बालेषु तृड् भृशम्।
शब्दाग्निशीतवाताम्बुच्छायोष्णेष्वनिमित्ततः॥९॥
इच्छा द्वेषश्च

स०-तस्य-ज्वरस्य, प्राग्रूपम्। आलस्यं-वाङ्मनःकायकर्मस्वनुद्यमः। सुश्रुते चोक्तम्। यथा (शा. अ. ४।५२)-"सुखस्पर्शप्रसङ्गित्वं दुःखद्वेषणलोलता। शक्तस्य चाप्यनुत्साहः कर्मण्यालस्यमुच्यते॥" इति। अरतिः-एकत्रानवस्थितिश्चेतसः। तथा, अङ्गगुरुत्वम्। आस्यवैरस्यं-वक्त्रविरसता। अरुचिः-अन्नाभिलाषाभावः। जृम्भा-जृम्भणम्। सहास्त्रेण वर्तेत इति सास्रे, आकुले अक्षिणी यस्य स एवम्, तस्य भावः सास्रकुलाक्षिता। अङ्गमर्दः-अङ्गभङ्गः। अविपाकः-अन्नस्याविपक्तिः। अल्पप्राणता-स्तोकबलत्वम्। तथा, बहुनिद्रता। "त्वतलोर्गुणवचनस्य पुंवद्भावो वक्तव्यः" इत्यत्र पुंवद्भावः। रोमहर्षो-रोमाञ्चः। विनमनं-अङ्गानां विनामः। पिण्डिकयोरुद्वेष्टनं-उद्वेष्टः। क्लमो-ग्लानिः। हितस्य-गुरुपित्रादेः, उपदेशास्तेषु, अक्षान्तिः-असहनत्वम्, तदुपदिष्टं न क्षमते। प्रीतिरित्यादि। अम्लादिषु द्रव्येषु प्रीतिः-भक्तिः। स्वादुषु भक्ष्येषु-मधुरेषु द्रव्येषु, द्वेषो भवति। तथा, बालेषु-शिशुषु सकललोकवल्लभेष्वपि, ज्वरस्वभावाद्वेषो भवति। तथा, तृड् भृशं-तृष्णाऽत्यर्थम्। शब्दादिष्वनिमित्ततः-कारणं विना, सज्वरस्य प्रीत्यप्रीती जायेते। कदाचिदप्रियमपि शब्दं न द्वेष्टि, कदाचित् प्रियमपि

वेणुवीणादिजनितं द्वेष्टि। एवं शीतार्तोऽपि कदाचिदग्निं द्वेष्टि, कदाचिदशीतार्तोऽप्यग्निमभिलषति। एवं शीतादिष्वपि योज्यम्। एवं प्राग्रूपं-अव्यक्तलिङ्गम्।

आ० र०- ज्वरप्राग्रूपमाह-तस्य प्राग्रूपमिति। आकुलंस्वव्यापारेष्वस्थिरम्। अविपाकः-आहारस्य। प्राणो-बलम्। विनमनं-गात्रशैथिल्यम्। शब्दादिष्वाकस्मिकाविच्छाद्वेषौ॥

तदनु ज्वरस्य व्यक्तता भवेत्।

स०-एतस्य चानु (तदनु)-प्राग्रूपाणां पश्चात् ज्वरस्य व्यक्तता-स्फुटता भवेत्, स्पष्टलिङ्गोत्पत्तिः। वातज्वरोऽयं पित्तज्वरोऽयं श्लेष्मज्वरोऽयम् संसर्गजोऽयम् सन्निपातजोऽयमिति व्यक्तीभवति।

आ० र०- पूर्वरूपानन्तरं रूपोत्पत्तिरित्याह-तदनु ज्वरस्येति। पुर्वरूपोक्तप्रतीकारे कृते न भवतीत्येवमर्थः।

आगमापगमक्षोभमृदुतावेदनोष्मणाम्॥ १०॥

वैषम्यं तत्रतत्राङ्गे तास्ताः स्युर्वेदनाश्चलाः।

पादयोः सुप्तता स्तम्भः पिण्डिकोद्वेष्टनं श्रमः॥ ११॥

विश्लेष इव सन्धीनां साद ऊर्वोः कटीग्रहः।

पृष्ठं क्षोदमिवाप्नोति निष्पीड्यत इवोदरम्॥ १२॥

छिद्यन्त इव चास्थीनि पार्श्वगानि विशेषतः।

हृदयस्य ग्रहस्तोदः प्राजननेव वक्षसः॥ १३॥

स्कन्धयोर्मथनं बाह्वोर्भेदः पीडनमंसयोः।

अशक्तिर्भक्षणे हन्वोर्जृम्भणं कर्णयोः स्वनः॥ १४॥

निस्तोदः शङ्खयोर्मूर्ध्नि वेदना विरसास्यता।

कषायास्यत्वमथवा मलानामप्रवर्तनम्॥ १५॥

रूक्षारुणत्वगास्याक्षिनखमूत्रपुरीषता।

प्रसेकरोचकाश्रद्धाविपाकास्वेदजागराः॥ १६॥

कण्ठौष्ठशोषस्तृट् शुष्कौ छर्दिकासौ विषादिता।

हर्षो रोमाङ्गदन्तेषु वेपथुः क्षवथोर्ग्रहः॥ १७॥

भ्रमः प्रलापो घर्मेच्छा विनामश्चानिलज्वरे।

स०-आगमादीनां वैषम्यमनिलज्वरे लिङ्गमिति योज्यम्। ज्वरस्यागमः-सन्तापारम्भः-तस्य वैषम्यं शिरःप्रभृतीनामङ्गानां न युगपत्सन्तापः, अपि तु कदाचिदस्य शिरसि पूर्वमागच्छति कदाचिदंसयोः पादयोर्वेति। अपगमो-ज्वरस्य मोक्षः, तस्य वैषम्यं-कदाचिदस्य पूर्वं पादयोः सन्तापमोक्षः कदाचित्त्रिके कदाचिच्छिरसि सन्तापस्य मुक्तिरिति। तथा, क्षोभमृदुतयोर्वैषम्यं-कदाचित्तीव्रः सन्तापः कदाचिन्मृदुरिति। वेदना ज्वरस्य तास्ताः, तासां वैषम्यं-न युगपत्सर्वाङ्गीणो वेदनोपलम्भः, अपि तु क्वचित् कदाचित् कस्मिंश्चिदङ्ग इति। तथा, ज्वरस्य य ऊष्मा-सन्तापः, तस्यापि वैषम्यात् कदाचिच्छिरस्यस्य सन्ताप उपलभ्यते कदाचित् पादाद्यन्यतमेऽङ्गे। तत्रतत्राङ्गे-बाहुशिरःप्रभृतौ, तास्ता वेदनाः-पादयोः सुप्तताद्या वक्ष्यमाणाः, चलाः-अनवस्थिताः स्युः, वायोश्चलरूपत्वात्। ता एवाह-पादयोरित्यादि। पादयोः सुप्तिः-निश्चेतनत्वम्, नखक्षतादिकमपि न चेतयेतां तावित्यर्थः। स्तम्भः-स्तब्धता, तयोरेव। पिण्डिकयोरुद्वेष्टनं-उद्वेष्टः। श्रमः-खेदः। सन्धीनां विच्छेदनमिव। ऊर्वोः सादः-स्वक्रियायामसमर्थत्वम्। कट्या ग्रहः-स्तम्भ इव। पृष्ठं क्षोदमिव-संक्षुण्णतामिव, आप्नोति, संक्षुण्णसस्यादिवत्। निष्पीड्यत इवोदरं-पिण्याकादिवत्। छिद्यन्त इवास्थीनि-करपत्रादिना काष्ठादिवत्। अतिशयेन पार्श्वगान्यस्थीनि छिद्यन्त इव। तथा, हृदयस्य ग्रहणम्। वक्षसः-उरसः, प्राजनेनेव-प्रतोदेनेव, तोदो-व्यथनम्। स्कन्धयोर्मन्थनं-अरणेरिव। बाह्वोर्भेदो-विदारणमिव। अंसयोः पीडनं-तैलादिपीडनकाष्ठैरिव। हन्वोर्भक्षणेऽसामर्थ्यम्। तथा, जृम्भणादीनि स्युः। विरसास्यता-अव्यक्तरसत्वं, मुखस्य भवति, येन मधुराद्यन्यतमं रसं न निश्चिनोति। अथवा कषायरसत्वं वक्त्रस्य। मलानां-मूत्रपुरीषादीनां, अप्रवर्तनं-अविसर्गः। रूक्षत्वमरुणत्वं च त्वगादीनां भवति, रोगस्वभावात्। तथा, प्रसेकादयः स्युः। अथ, अरोचकाश्रद्धयोः को विशेषः। ब्रूमः। अरोचकेन वक्त्रस्थमपि न भुङ्क्ते। अश्रद्धया तु केवलं नाभिलषति मुखस्थं तु भक्षयत्येवेति विशेषः। विषादिता-विषण्णत्वं दुःखितत्वम्। रोमादीनां हर्षो, वेपथ्वादयश्च वातज्वरे स्युः।

आ० र०- वातज्वरलक्षणमाह-आगमापगमेति। आगमः-उत्पत्तिः, अपगमो-विनाशः, क्षोभः-आधिक्यम्, मृदुता-न्यनत्वम्, वेदना-बुद्धिः, ऊष्मा-वह्निः, एषां वैषम्यम्। तत्रागमादिचतुष्टयस्य देशकालयोरनियमः। बुद्धेर्भान्त्या। ऊश्मणो बुभुक्षा (क्षया)। वेदनाः-व्यथाः। चलाः-भूत्वा भूत्वा विनस्यन्ति। यत्र यत्र यासां यासां सम्भावनाः, तत्र तत्र तास्ताः। तदेव प्रपञ्चयत्युत्तरग्रन्थेन। सुप्तता-स्पर्शाज्ञानम्। स्तम्भः-सर्वाङ्गेषु। सादः-स्वकार्याक्षमत्वम्। क्षोदो-विशीर्णावयवत्वम्। ग्रहः-अवरोधः। तोदो=निखननव्यथा। प्राजनेन-तोत्रेण। अंसयोः-स्कन्धबाहुसन्ध्योः। अरोचको-जिह्वेन्द्रियाप्रवृत्तिः। श्रद्धा-मनःप्रवृत्तिः। शुष्कौ-श्लेष्मरहितौ। विषादिता\ग्लानिः। रोमहर्षः-ऊर्ध्वरोमता। अङ्गहर्षः -त्वचः कण्टकितत्वम्। दन्तहर्षो-दन्तरोगेषूक्तः। भ्रमो-भ्रमणमिवाङ्गस्य।

अथ पित्तज्वरलक्षणार्थमाह-

युगपद्व्याप्तिरङ्गानां प्रलापः कटुवक्त्रता॥ १८॥

नासास्यपाकः शीतेच्छा भ्रमो मूर्च्छा मदोऽरतिः।

विट्स्रंसः पित्तवमनं रक्तष्ठीवनमम्लकः॥ १९॥

रक्तकोठोद्गमः पीतहरितत्वं त्वगादिषु।

स्वेदो निःश्वासवैगन्ध्यमतितृष्णा च पित्तजे॥ २०॥

स०-पित्तज्वरे युगपत्-तुल्यकालं, अङ्गानां व्याप्तिः-शिरः-प्रभृतीन्यङ्गानि सन्तापेनैककालं व्याप्यन्ते। न तु वातज्वर इवागमादीनां वैषम्यमिति व्याप्तिग्रहणेन द्योतयति। प्रलापः-असम्बद्धवचनस्योक्तिः। कटुवक्त्रता-कटुकरसत्वमास्ये। तथा, नासायामास्ये च पाकः। तथा, शीतेच्छादयोऽत्र भवन्ति। मण्डलाकारा निर्मुखाः पिटिकाः कोठा इत्युच्यन्ते। ननु, दोषास्रयोऽपि ज्वरं निवर्तयन्तीत्युक्तम्। पित्तज्वरे च पित्तेन युक्तस्य कायाग्नेर्भूयो वृद्ध्या भाव्यम्, नाग्निमान्द्येन, "वृद्धिः समानैः सर्वेषां" (ह. सू. अ. १।१४) इति वचनात्। एवं चाग्निमान्द्याभावात् ज्वरस्य सम्भवेऽप्युपपत्तिरयुक्ता। नैवम्। स्वस्थानाच्चालनेनाग्नेर्मान्द्यापत्तेः। स्थानवशाद्वाऽन्यथात्वस्यापि क्रियासामर्थ्यं दृष्टम्। तथा चाष्टाङ्गसङ्ग्रहे (?) (चरके) शोषनिदाने वक्ष्यति (च. नि. अ. ६।५)-"योंऽशः [तस्य] शरीरसन्धीनाविशति तेन [अस्य] जृम्भा

ज्वरश्चोपजायते।" इत्यादि। तस्मात्स एवाग्निः क्वचिदेव देशे पुक्तं शक्तो भवति, न सर्वत्र। उष्णगुणेन तु पित्तेन युक्तः पक्ता भवत्येवोष्णतरः। अत एव सन्तापादीनधिकतरान् करोतीति न किञ्चिदत्रानुपपन्नम्।

आ० र०- पित्तज्वरलक्षणमाह-युगपव्द्यात्पिरिति। नासापाको-नासारोगेषु। आस्यपाको-मुखरोगेषु। मूर्च्छामदौमदात्यानिदानोक्तौ। अक्तकोठो-रक्तवर्णानि मण्डलानि।

कफज्वरलक्षणमाह-

विशेषादरुचिर्जाड्यं स्रोतोरोधोऽल्पवेगता।
प्रसेको मुखमाधुर्यं हृल्लेपश्वासपीनसाः॥२१॥
हृल्लासश्छर्दनं कासः स्तम्भः श्वैत्यं त्वगादिषु।
अङ्गेषु शीतपिटिकास्तन्द्रोदर्दः कफोद्भवे॥२२॥

स०-सर्वज्वरेऽरुचिर्भवत्येव, अतिशयेन तु कफजे। तथा, जाड्यादयः स्युः। त्वगादिष्वित्यादिशब्द आस्याक्षिनखादीनां ग्रहणाय। [त्वगादिषु श्वैत्यं-श्वेतता। अङ्गेषु-शिरःपाण्यादिषु, शीतपिटिकाः-श्लेष्मपिटिकाः। निद्रार्तस्येव विषयाग्रहणं-तन्द्रा।] उदर्दस्य लक्षणं तत्रान्तरं उक्तम्-"शीतपानीयसंस्पर्शाच्छीतकाले विशेषतः। श्वयथुः शिशिरार्तानामुदर्दः कफसम्भवः॥" इति।

आ० र०- कफज्वरलक्षणमाह-विशेषादरुचिरिति। विशेषादरुचिः-अत्यरुचिः। जाड्यं-आलस्यम्। अल्पवेगतासौम्यत्वं ज्वरस्य। हृल्लेपः-श्लेष्मलिप्तहृदयत्वम्। हृल्लासोहृदयात्सलवणश्लेष्मनिर्गमः। शीतपिटिकाः-शीतसहिताः पिटिकाः। उदर्दः-उरोभिस्पन्दनम्।

एवं त्रयाणां दोषाणां पृथक् लिङ्गान्यभिधाय सामान्यलिङ्गान्यधुना कथयति-

काले यथास्वं सर्वेषां प्रवृत्तिर्वृद्धिरेव वा।

स०-कालः-पूर्वाह्णादिको वर्षादिको वा यो वातादेः, तस्मिन् काले, यथास्वं-यथायथं वातादिज्वराणामप्रवृत्तानां, प्रवृत्तिः-उत्पत्तिः, उत्पन्नानामाधिक्यं वा स्यात्, तदा वातादिज्वरोऽयमित्यवबुध्येत।

आ० र०- उक्तानां ज्वराणां कालसम्प्राप्तिमाह-काले यथास्वमिति। प्रवृतिः-उत्पत्तिः।

इदानीं सामान्येनान्यदपि लिङ्गद्वयमाह-

निदानोक्तानुपशयो विपरीतोपशायिता।

स०-निदानानि च तान्युक्तानि च, -तिक्तोषणादीनि वातादिज्वरकारणानि, तैरनुपशयो यस्मिन् ज्वरे स एवम्। रोगवृद्ध्या हि रोगिणो दुःखावहत्वम्। ननु, निदानानुपशय इत्येतावदस्तु। किमुक्तग्रहणेन? उच्यते। उक्तग्रहणं स्वनिदानग्रहणार्थम्। उक्तग्रहणमन्तरेण यानिकानिचिन्निदानानि रक्तपित्तश्वासादीनां, तेषामनुपशय इत्येवं प्राप्नुयात्। उक्तशब्दोच्चारणसामर्थ्यात्तु यान्येव वातज्वर उक्तानि तान्येव तत्र ज्वरे गृह्यन्ते, नेतराणि। एवं पित्तकफादिज्वरादिषु। तस्मादुक्तग्रहणं कर्तव्यम्। विपरीतोपशायितेति। उपशेतेऽवश्यमित्युपशायि, विपरीतैरुपशायि-विपरीतोपशायि, तस्य भावो विपरीतोपशायिता,-सुखानुबन्धि आरोग्यलक्षणा। कस्माद्विपरीतैः? प्रकृतत्वान्निदानस्यैव। एवं ज्वरनिदानप्रतिपक्षभूतैः सर्वेषां ज्वराणामुपशयः सुखानुबन्धो विपरीतोपशायितेति बोध्यम्। ननु, "निदानोक्तानुपशयः" इतीदमेवास्तु, किं "विपरीतोपशायिता" इत्यनेन? यस्य हि निदानोक्तानुपशयः, तस्यावश्यं विपरीतोपशायितया भाव्यम्। नैवम्। अनैकान्तिकत्वात्। तथा हि, - अतीसारादिषु निदानोक्तानुपशय उपलभ्यते। न च सामावस्थायां विपरीतं सङ्ग्राह्युपशेते। अपि च मद्योत्थानां विकाराणां मद्यमेव प्रसाधकमित्युक्तम्। न चैवं "विपरीतोपशायिता" इति घटते। तस्मान्न्याय्यमुभयोरुपादानम्। एवं हि लक्षणं सम्यगुक्तं भवति।

आ० र०- उक्तानां ज्वराणां उपशममाह-निदानोक्तानुओअशय इति। निदानोक्तनि-दोषकोपनानि। विपरीतानि दोषशमनानि। उपशायिता-उपशयः।

यथास्वं लिङ्गसंसर्गे ज्वरः संसर्गजः

स०-यद्यत्स्वं यथास्वं, यानि यस्य ज्वरस्य स्वानि लिङ्गानि वातज्वरस्य पित्तज्वरस्य श्लेष्मज्वरस्य वा, तेषां संसर्गो लिङ्गसंसर्गः,-संसृष्टलिङ्गत्वं, तस्मिन्सति संसर्गजो ज्वरो वेद्यः। अत्रापि "काले यथास्वं" इत्यादि सर्वं लक्षणं बोध्यम्।

आ० र०- संसर्गजानां ज्वराणां लक्षणमाह-यथास्वमिति। अपि चेति वक्ष्यमाणविशेषणेना (षैर) पि लक्षणैः संसर्गजाः ज्ञेयाः।

न चैतावदेव संसर्गलक्षणमित्याह-

अपि च॥ २३॥

शिरोर्तिमूर्च्छावमिदाहमोह-
कण्ठास्यशोषारतिपर्वभेदाः।
उन्निद्रतातृङ्भ्रमरोमहर्षा
जृम्भातिवात्तत्वं च चलात्सपित्तात्॥ २४॥

स०-चलात्सपित्तात्-वातपित्तसंसर्गजे, शिरोर्त्यादयः स्युः। कण्ठास्ययोः शोषेण सम्बन्धः। वातज्वरे शिरोर्त्यादीनि प्रायो दृष्टानि, कानिचित्तु पित्तज्वरे दृष्टानि, तानि च वातपित्तज्वरे दृश्यन्ते। तथा, अन्यान्यप्यधिकान्यत्र वातपित्तज्वरे दृश्यन्ते, यानि न केवले वातज्वरे नापि पित्तज्वरे दृष्टानि। एवमन्ययोः संसर्गज्वरयोर्ज्ञेयम्। उपजातिवृत्तम्।

आ० र०- वातपित्तज्वरलक्षणमाह-शिरोर्तीति। पार्वाणि-सन्धयः। अतिवात्तत्वं-प्रलापः। यद्यापि मूर्छया मोहस्य गतार्थत्वम्, तथाऽपि कदाचिन्मूर्च्छा कदाचिन्मोह इत्यपौनरूक्त्यम्। मोहो हि वैचित्यमात्रम्। विकृतिविषमसमवेतवातपित्तज्वरज्ञानार्थम्। तल्लिङ्गसंसर्गविशेषस्यापि शिरोर्तिधर्मस्य पृथगुक्तिः। प्रकृतिसमसमवेतवातपित्तज्वरज्ञाने तल्लिङ्गसंसर्गस्योपयोगः। वक्ष्यमाणेष्वप्येवम्।

इदानीं कफानिलसंसर्गलक्षणमाह-

तापहान्यरुचिपर्वशिरोरुक्
पीनसश्वसनकासविबन्धाः।
शीतजाड्यतिमिरभ्रमतन्द्राः
श्लेष्मवातजनितज्वरलिङ्गम्॥२५॥

स०-तापहान्यादि श्लेष्मवातकृतस्य ज्वरस्य लिङ्गम्। तापहानिः-तापभावः। विबन्धो-मूत्रपुरीषादीनामप्रवृत्तिः। स्वागतावृत्तम्।

आ० र०- वातश्लेष्मज्वर्लक्षणम्ह-तापहान्यरुचीति। हानिः-अल्पत्वं ज्वरस्य। विबन्धो-मलरोधः।

अधुना कफपित्तसंसर्गज्वरं लक्षयति-

शीतस्तम्भस्वेददाहाव्यवस्था
तृष्णाकासश्लेष्मपित्तप्रवृत्तिः।
मोहस्तन्द्रालिप्ततिक्तास्यता च
ज्ञेयं रूपं श्लेष्मपित्तज्वरस्य॥२६॥

स०-शीतादीनामव्यवस्था-अनियमः। तथा, तृष्णाप्रवृत्त्यादिकं च श्लेष्मपित्तज्वरस्य रूपं ज्ञेयं-वेद्यम्। शालिनीवृत्तम्। अथ, द्विदोषजानां ज्वराणां किमागमापगमवैषम्यादीनां क्रमेणोत्पत्तिः ? युगपत्सर्वशरीरप्राप्त्या वा ? इत्यत्र संशयः। तत्र संसर्गजत्वादेककालं द्वयोरपि पक्षयोः सम्भवो युक्तः। किन्त्वेतयोः पक्षयोर्विरोधाद्युगपदसम्भव इति। अत्रोच्यते। यदि संसर्गजे ज्वरे बलवान् वायुः स्यात् तदा आगमापगमवैषम्यादिना क्रमेण, अथ पित्तस्य बलीयस्त्वं तदा युगपत्सर्वशरीरव्याप्तिक्रमेण ज्वरो भवति। समौ यदा द्वावपि भवतः, तदाऽपि यस्य देशकालादिना बललाभस्तदा तस्यैवोत्पत्तिक्रमेण ज्वरो भवति। सन्निपाते तु युगपदेव शरीरव्याप्ति ।

आ० र०- पित्तश्लेष्मज्वरलक्षणमाह-शीतस्तम्भेति। शीतदाहयोः स्तम्भस्वेदयोश्चाप्यव्यवस्था, शीतेन दाहोऽपनीयते दाहेन शीतमित्यादि।

अथ सन्निपातज्वरस्य लक्षणमाह-

सर्वजो लक्षणैः सर्वैर्दाहोऽत्र च मुहुर्मुहुः।
तद्वच्छीतं महानिद्रा दिवा जागरणं निशि॥२७॥
सदा वा नैव वा निद्रा महास्वेदोऽति नैव वा।
गीतनर्तनहास्यादिविकृतेहाप्रवर्तनम्॥२८॥
साश्रुणी कलुषे रक्ते भुग्ने लुलितपक्ष्मणी।
अक्षिणी पिण्डिकापार्श्वमूर्द्धपर्वास्थिरुग्भ्रमः॥२९॥
सस्वनौ सरुजौ कर्णौ कण्ठः शूकैरिवाचितः।
परिदग्धा खरा जिह्वा गुरुः स्रस्ताङ्गसन्धिता॥३०॥
रक्तपित्तकफष्ठीवो लोलनं शिरसोऽतिरुक्।
कोठानां श्यावरक्तानां मण्डलानां च दर्शनम्॥३१॥
हृद्व्यथा मलसंसङ्गः प्रवृत्तिर्वाऽल्पशोऽति वा।
स्निग्धास्यता बलभ्रंशः स्वरसादः प्रलापिता॥३२॥
दोषपाकश्चिरात्तन्द्रा प्रततं कण्ठकूजनम्।

स०-सर्वेभ्यो जातो वातपित्तकफसमुत्थः-सर्वजः, सर्वैर्लक्षणैर्युतो भवति। यथा,-अत्र च-सन्निपातज्वरे, दाहो मुहुर्मुहुः, तद्वत्-दाहवत् पुनः पुनः, शीतं भवति। अहनि महती निद्रा। रात्रौ तु जागरणम्। सदा वा-दिवसे निशि च, नैव वेति द्वयोरपि नक्तंदिवसयोर्निद्रा न भवति। तथा, बहुस्वेदोऽतिशयेन नैव वा स्वेदः। तथा,गीतादिकाया विकृताया ईहायाः- चेष्टायाः, प्रवर्तनम्। तथा, नयने साश्रे भवतः। तथा, कलुषे रक्ते तथा कुटिले। तथा, लुलिते पक्ष्मणी ययोस्त एवम्। तथा, पिण्डिकादिरुक्। भ्रमो-मोहः। कर्णौ सशब्दो सरुजौ-सपीडौ, च। कण्ठः शूकैः-किंशारुभिरिव, व्याप्तः। जिह्वा परिदग्धा, तथा खरा-अमृदुः, तथा गुरुः। तथा, स्रस्ताङ्गसन्धित्वम्। रक्तादिष्ठीवनम्। मूर्ध्नो लोलनं-चलनम्। तथा, अतिरुक्। कोठानां

श्यावरक्तानां मण्डलानां च दर्शनम्। नैव वेत्यत्रापि योज्यम्। तथा, हृदि पीडा। मलानां-मूत्रपुरीषादीनां, [संसङ्गः-] अप्रवृत्तिः। अल्पशो वा प्रवृत्तिरतिशयेनाथवा। तथा, स्निग्धास्यतादि भवति।

आ० र०- सन्निपातज्वरलक्षणमाह-सर्वजो लक्षणैः सर्वैरिति। सर्वैः-वातपित्तकफज्वरोक्तैः।

तल्लिङ्गसंसर्गविशेषणं पूतगाह-दाहोऽत्र चेति। अतिमहान् स्वेदः, नैव वा स्वेदः। भुग्ने-कुटिले। पिण्डिकादिपञ्चकेरुक्। सन्धीनामङ्गत्वेऽपि पृथग्ग्रहणमतिशयार्थम्। शिरसो लोलनं-सव्यापसव्यगमनम्। मण्डलानां-कफकुष्ठानां दर्शनम्। हृदये व्यथा। मलानामल्पप्रवृत्तिह्, अतिप्रवृत्तिर्वा।

अथास्य सन्निपातस्य नामद्वयमाह-

सन्निपातमभिन्यासं तं ब्रूयाच्च हृतौजसम्॥३३॥

स०-तं सन्निपातमभिन्यासं हृतौजसं च ब्रूयात्। तत्र "ओजस्तु तेजो धातूनां" (ह्. सू. अ. ११।३७) इत्याद्योजोलक्षणम्। हृतमोजो येन स हृतौजाः, तं हृतौजसम्।

आ० र०- सन्निपातज्वरस्य नामान्याह-सन्निपातम्भिन्यासमिति। तानि च त्रीणि। वाताधिकः सन्निपातः, कफाधिकोऽभिन्यासः, पित्ताधिको हतौजाः, इति केचित्। तव्युदासार्थमिदमुक्तम्। वङ्गसेने (ज्वराधिकारे श्लो ४८४-५०४)-" निदोपेतमभिन्यासं क्षिप्रं विद्याद्धताउजसम्। आचितामाशयकफे सन्निपातज्वरे दृढे॥शान्तेऽप्यवश्यं तस्याशु तन्द्रा समुपजायते। अतिद्रवरसक्षीरदिवास्वप्नन्पनिषेवणात्॥दुर्बलस्याल्पवातस्य जन्तोः श्लेष्मा प्रकुप्यति। वायुमार्गं समावृत्य धमनीरनुसृत्य सः॥तन्द्रां सुघोरां जनयेत्तस्या वक्ष्यामि लक्षणम्। उन्मीलितविनिर्भुग्ने परिवर्तिततारके॥भवतस्तद्य नयने लुलिते चलपक्ष्मणी। विवृत्ताननदन्ताउष्ठं मुहुरुत्तानशायिनः॥पिच्छिलोच्छिन्नतन्तुश्च कण्ठाच्छ्लेष्माऽस्य गच्छति। कण्ठमार्गोपरोधश्च वैकृतं चोपजायते॥सोऽर्वाक् त्रिरात्रात्साध्यःस्यादसाध्यस्तु ततः परम्। त्रयः प्रकुपिता दोषा उअरःस्त्रोतोनुगा भृशम्॥आमा विबद्धा ग्रथिता बुद्धीन्द्रियमनोगताः। जनयन्ति महाघोरमभिन्यासं महाद्दढम्॥प्रध्वस्तगात्रः श्वसिति न चेष्टां काञ्चिदीहते। न च

दृष्टिर्भवेतस्य समर्था रूपदर्शने॥न च गन्धरसस्पर्शशब्दांश्चाप्यवबुध्यते। शिरो लोलयतेऽभीक्ष्णमाहारं नाभिनन्दति॥कूजते तुद्यते प्रतिपतिश्च हीयते। कलं प्रभाषतेऽत्रापि किञ्चित्सन्दिग्धवाक् चिरात्॥न वा प्रभाषते किञ्चिदभिन्यासः स उच्यते। प्रत्याख्येयः स भूयिष्ठं कश्चिदेवात्र सिध्यति॥" प्रज्ञा-बुद्धिः।

दोषे विबद्धे नष्टेऽग्नौ सर्वसम्पूर्णलक्षणः।

असाध्यः

स०- [ननु,] दोषे विबद्ध इत्येकवचनमयुक्तम्। दोषाणां ह्यत्र च बहुत्वाद्बहुवचनं न्याय्यं स्यात्। अत्रोच्यते। जात्यभिप्रायाददोषः। जात्याख्यायामेकस्य बहुत्वसिद्धेर्दोष इत्युक्ते बहुत्वं गम्यते। यथा-निष्पन्नो यव इति। तस्माद्दोषे विबद्ध इति युक्तम्। नष्टेऽग्नावित्यसत्। सर्वज्वरेष्वेव ह्यग्निनाशस्य प्रागभिधानात्। तस्मादयुक्तमेतदुच्यते। न। विशेषाभिप्रायात्। कामं सर्वज्वरेष्वग्निनाश उक्तः। अस्मिंस्तु सान्निपातिके विशेषेणाग्निनाश इत्यभिप्रायः। दोषे-वातपित्तकफमूत्रपुरीषादिके, विबद्धे-अप्रवृत्तिशीले, अग्नौ नष्टे सति, सर्वसम्पूर्णलक्षणः सन्निपातोऽसाध्यः-साधयितुमशक्यः।

आ० र०- असाध्यसन्निपातज्वरलक्षणमाह-दोषे विबद्धे इति। विबद्धे-पच्यामानाद्यवस्थामगच्छति। नष्टे-उष्णोदकमप्यपचति।

सोऽन्यथा कृच्छ्रो भवेद्वैकल्यदोऽपि वा॥

स०-अन्यथा-असम्पूर्णलक्षणत्वेन, सः-ज्वरः, कृच्छ्रो भवेत् वैकल्यदो वा भवेत्।

आ० र०- कृच्छ्रसाध्यन्निपातज्वरलक्षणमह-अन्यथा कृच्छ्र इति। अन्यथा-साध्यलक्षणविपर्यये। वाशब्दात् कश्चिद्वैकल्यमदत्वाऽपि विवर्तते। अत एव यस्य रोगस्य

यावन्ति लक्षणान्युच्यन्ते तावद्भिः समुदितैर्निश्चीयत इति न ज्ञातव्यम्। किन्तु यावद्भिरसाधारण्यं तावद्भिरेवेति। लक्षणन्तरोक्तोस्तु सुखासाध्यादिभेदज्ञानार्थम्।

किमेष एव सन्निपातज्वरप्रकारः सम्भवति ? उतान्योऽपि सम्भवति ? इत्याह-

अन्यच्च सन्निपातोत्थो यत्र पित्तं पृथक् स्थितम्।
त्वचि कोष्ठेऽथवा दाहं विदधाति पुरोऽनु वा॥ ३५॥
तद्वद्वातकफौ शीतं, दाहादिर्दुस्तरस्तयोः।

स०-अन्यशब्दार्थोऽन्यदित्ययं निपातः। अपरोऽयं सन्निपातोत्थो ज्वरः। यत्र सन्निपाते पित्तं वातकफाभ्यां पृथक्-भिन्नं, स्थितं सत् त्वच्यथवा कदाचित् कोष्ठे दाहं करोति। कथम् ? पुरोऽनु वा,-पूर्वं पश्चाद्वा। अथवेति स्थानविशेषाभिधायिपदसमीपे श्रूयमाणं स्थानविशेषे विकल्पं करोति। पुरोऽनुवेत्यत्र कालविशेषाभिधायिपदसमीपे श्रूयमाणं कालं विकल्पयति। तत्र चायं विशेषः-त्वचि स्थितं बहिरधिकं दाहं करोति, अन्तरल्पम्। कोष्ठे तु स्थितमन्तरधिकम्, बहिः स्वल्पमिति। तदित्यनेन पित्तं परामृश्यते। [तद्वत्-] पित्तेन तुल्यम्। यथा,-पित्तं पृथक् स्थितं त्वचि कोष्ठेऽथवा दाहं करोति पुरोऽनु वा, तथैव वातकफौ त्वचि कोष्ठेऽथवा पुरोऽनु वा शीतं विदधतः, इति द्विविधोऽयं सन्निपातः। तयोः-शीतादिदाहाद्योः सन्निपातयोर्मध्ये, यो दाहादिः सन्निपातः स दुस्तरः-कृच्छ्रसाध्य इत्यर्थः। केचित्तु शीतादिः शीतार्तो दाहादिर्दाहार्त इति द्विधा (चतुर्धा) सन्निपातं समगिरन्।

आ० र०- अमिश्रीभूतदोषजसन्निपातज्वरमाह-अन्यच्चेति। स चतुर्धा,-त्वग्गतपित्तकोष्ठगतवातकफजः, स्वग्गतवातकफकोष्ठगतपित्तजश्चेति द्वौ, पित्तकार्यपूर्वकश्चेति। तु पृथक्त्वद्वयेति। तयोर्मध्ये दाहादिः पित्ताकार्यपूर्वकोदुस्तरः। तत्रापि कोष्ठगतपित्तकार्यपूर्वक इति ज्ञेयम्।

ननु, अस्मिन् शीतादौ दाहादौ च ज्वरे को विशेषः ? इत्याह-

शीतादौ तत्र पित्तेन कफे स्यन्दितशोषिते॥ ३६॥

शीते शान्तेऽम्लको मूर्च्छा मदस्तृष्णा च जायते।

स०-शीतादौ तत्र-तस्मिन् सन्निपाते, पित्तेन कर्त्रा कफे स्यन्दिते-स्राविते, शोषिते च ग्रीष्म इव खरदिनकरकरतापेन हिम इव, तथा शीते शान्ते चार्थाद्दाह उपजायते। अम्लकादयश्च चत्वारः स्युः। पित्तेनेति कर्तरि तृतीया। अत एव च बलवत्त्वेन प्राधान्यात् कफं स्रावयति शोषयति चेति। अम्लोद्विरणं-अम्लकः।

आ० र०- शीतादिसन्निपातज्वरलक्षणमाह-शीतादौ तत्रे ति। स्यन्दितो-घनीभावं त्याजितः। पश्चाच्छोषितः।

दाहादौ पुनरन्ते स्युस्तन्द्राष्ठीववमिक्लमाः॥३७॥

स०-दाह आदिर्यस्मिन् स दाहादिः। शीतावसान इत्यर्थाद्गम्यते। दाहादौ च सन्निपातेऽस्य दाहस्यान्ते-अवसाने, तन्द्रादयो भवन्ति। दाहकारिपित्तस्यन्दितेनैव कफेन शमिते पित्ते कफोद्रेकादेव कफजास्तन्द्रादयो भवन्ति।

आ० र०- दाहादिसन्निपातज्वरलक्षणमाह-दाहादौ पुनरिति। अत्र कफेन पित्ते प्रशमिते इति ज्ञेयम्।

आगन्तुरभिघाताभिषङ्गशापाभिचारतः।

चतुर्धा

स०-आगन्तुज्वरश्चतुर्धा भवति, अभिघातजोऽभिषङ्गजोऽभिशापजोऽभिचारजश्च।

आ० र०- आगन्तुज्वरभेदानाह-आगन्तुरिति। ते च चत्वारः, अभिघातादिहेतुभेदात्।

अत्र क्षतच्छेददाहाद्यैरभिघातजः॥३८॥

श्रमाच्च

स०-अत्र-अस्मिन्नागन्तौ ज्वरे, अभिघातजो यो ज्वरः स क्षतच्छेदाद्यैः-शस्त्रप्रहाराद्यैः, जायते। तथा, श्रमाच्च-अध्वादिकृतादायासाच्च।

आ० र०- अभिघातजागन्तुज्वरभेदाना(वा)ह-अत्रेति। तत्र क्षतादिजोऽनन्तभेदत्वादेको गण्यते, श्रमजश्चैक इति द्वौ।

तस्मिन्पवनः प्रायो रक्तं प्रदूषयन्।
सव्यथाशोफवैवर्ण्यं, सरुजं कुरुते ज्वरम्॥३९॥

स०-तस्मिन्-अभिघातजे ज्वरे, प्रायो-बाहुल्येन, पवनो-वायुः, ज्वरं कुरुते। किं कुर्वन्? रक्तं प्रदूषयन्। कीदृशं ज्वरम्? सव्यथेत्यादि। व्यथादियुक्तं तथा सरुजम्। प्रायोग्रहणं क्वचिदभिघातजेऽन्योऽपि दोषः कुप्यति, बाहुल्येन तु वायुरिति द्योतयति।

आ० र०- तस्य द्विधस्य लक्षणमाह-तस्मिन् पवन इति। तत्र सव्यथाशोफवैवर्ण्यमिति क्षतादिजस्य लक्षणम्। सरुजमिति श्रमजस्य। एकलक्षणत्वे व्यथारुजयोः पौनरुक्त्यात्।

ग्रहावेशौषधिविषक्रोधभीशोककामजः।
अभिषङ्गात्

स०-ग्रहादिजो ज्वरोऽभिषङ्गाद्भवति।

आ० र०- अभिषङ्गजागन्तुज्वरभेदानाह= ग्रहावेशेति। ते च् सत्प, ग्रहावेशादिहेतुत्वात्। अभिषङ्गो-मनोभिघातः।

इदानीं ग्रहोत्पन्नस्य लिङ्गमाह

ग्रहेणास्मिन्नकस्माद्धासरोदने॥४०॥

स०-ग्रहेण-देवदानवादिनाऽष्टादशभेदभिन्नेन, यो ज्वरो भवति, अस्मिन्-ज्वरे, अकस्मात्-निर्निमित्तिमेव, हासरोदने भवतः।

आ० र०- ग्रहावेशजलक्षणमाह-ग्रहेणेति। अस्मिन्-अभिषङ्गजज्वरे।

ओषधीगन्धजे मूर्च्छा शिरोरुग्वमथुः क्षवः।

स०-विषौषधीपुष्पगन्धेन वायुनोपनीतेन यो ज्वरस्तस्मिन् मूर्च्छादयो जायन्ते।

आ० र०- ओषधि[ज] लक्षणमाह-ओषधीगन्धज इति।

विषान्मूर्च्छातिसारास्यश्यावतादाहहृद्रदाः॥४१॥

स०-विषाज्जाते तस्मिन् ज्वरे मूर्च्छादयो जायन्ते। आस्यश्यावता-कृष्णमुखत्वम्। हृद्रदो-हृदये पीडा।

आ० र०- विषजलक्षणमाह-विषादिति। आस्यं-मुखम्।

क्रोधात्कम्पः शिरोरुक् च

स०-क्रोधात्-कोपात्, सञ्जाते ज्वरे कम्पो-वेपथुर्जायते। तथा, शिरोरुक्-शिरोर्तिश्च।

आ० र०- क्रोधजलक्षणमाह-क्रोधादिति।

प्रलापो भयशोकजे।

स०-भयशोकजे ज्वरे प्रलापः।

आ० र०- भयशोकजयोर्लक्षणमाह-प्रलाप इति।

कामाद्भ्रमोऽरुचिर्दाहो ह्रीनिद्राधीधृतिक्षयः॥४२॥

स०-कामादुद्भूते ज्वरे भ्रमादयो भवन्ति। ह्रीः-लज्जा, निद्रा-स्वप्नः, धीः-बुद्धिः, धृतिः-धैर्यम्, तेषां [क्षयो]-विघातः।

आ० र०- कामजलक्षणमाह-कामादिति। भीप्रभृतीनां क्षयः।

ग्रहादौ सन्निपातस्य भयादौ मरुतस्त्रये।

कोपः कोपेऽपि पित्तस्य

स०-ग्रहादौ त्रये-ज्वरे ग्रहावेशौषधिविषजे, सन्निपातस्य कोपः। भयादौ त्रये-भीशोककामजे ज्वरे, मारुतस्य कोपः। कोपे पित्तस्य [कोपः]। अपिशब्दाद्वातस्यापि कोप इति।

आ० र०- अभिषङ्गजानां दोषानुबन्धमाह-ग्रहादाविति। तत्र प्रथमे त्रये त्रयाणां दोषाणां कोपः। चरमे त्रये मरुतः। कोपः पित्तस्येति वचनात्पित्तस्य च। कोपजे तु पित्तस्यैव।

यौ तु शापाभिचारजौ॥४३॥

सन्निपातज्वरौ घोरौ तावसह्यतमौ मतौ।

स०-तमशब्देनैतद्दर्शयति,-अन्येऽपि ये सन्निपातज्वरास्तेऽप्यसह्याः-सोढुमशक्याः, एतौ पुनः शापाभिचारजावतिशयेन सोढुमशक्याविति।

आ० र०- शापजाभिचारजयोरागन्तुज्वरयोर्लक्षणमाहयौ त्विति।

तत्राभिचारिकैर्मन्त्रैर्हूयमानस्य तप्यते॥४४॥

पूर्वं चेतस्ततो देहस्ततो विस्फोटतृड्भ्रमैः।

सदाहमूर्च्छैर्ग्रस्तस्य प्रत्यहं वर्द्धते ज्वरः॥४५॥

स०-अभिचारिकैर्मन्त्रैः-अथर्ववेदाद्युपदिष्टैः, हूयमानस्य पुंसः, यन्नामोद्देशेन हविःप्रक्षेपः स हूयमान उच्यते, अभिचारमधिकृत्य प्रणीत इति "प्राग्वहतेष्ठक्" इति ठक्। हूयमानस्य पुंसः प्रथमं चेतस्तप्यते-सदुःखं जायते। ततः-अनन्तरं, देहः-शरीरम्, तप्यते-सज्वरं सम्पद्यते। ततः-अनन्तरं, विस्फोटतृड्भ्रमैर्दाहमूर्च्छायुतैर्ग्रस्तस्य-आक्रान्तस्य, प्रत्यहं ज्वरो वर्द्धते-ज्वरस्याधिक्यं भवति। तनवः स्फोटा एव विस्फोटा भण्यन्ते।

आ० र०- अभिचारजस्य विशेषमाह-तत्राभिचारिकैरिति।

इति ज्वरोऽष्टधा दृष्टः

स०-इति-पूर्वोक्तेन प्रकारेण निजः सप्तप्रकार आगन्तुश्चेति, अष्टप्रकारो ज्वरो दृष्टः, मुनीन्द्रैरिति शेषः।

आ० र०- अष्टविधज्वरलक्षणमुपसंहरति-इति ज्वर इति।

समासाद्विविधस्तु सः।
शारीरो मानसः सौम्यस्तीक्ष्णोऽन्तर्बहिराश्रयः॥४६॥
प्राकृतो वैकृतः साध्योऽसाध्यः सामो निरामकः।

स०-तुर्विशेषे। समासात्-सङ्क्षेपात्, तु-पुनः, सः-ज्वरो, द्विविधः। तदेव द्वैविध्यमाह-शारीरो मानस इत्येकं द्विकम्। सौम्यस्तीक्ष्ण इति द्वितीयम्। अन्तराश्रयो बहिराश्रय इति तृतीयम्। प्राकृतो वैकृत इति चतुर्थम्। साध्योऽसाध्य इति पञ्चमम्। सामो निराम इति षष्ठम्। इति द्वैविध्यमेषां द्विकानाम्।

आ० र०- आष्टानां ज्वराणां प्रत्येकं द्वैविध्यषट्कमाह-समासादिति। समासात्-सङ्क्षेपात्। विस्तरादनन्तभेदात्वम्।

सम्प्रत्येतानेव ज्वरान् व्याचष्टे-

पूर्वं शरीरे शारीरे तापो, मनसि मानसे॥४७॥

स०-शारीरे ज्वरे प्रथमं शरीरे तापो भवति, पश्चान्मनसीति पूर्वशब्दस्य सम्बन्धिशब्दत्वाद्गम्यते। एवं मानसे ज्वरे पूर्वं मनसि तापो-दुःखम्, पश्चाद्देहे तापः-पीडाविशेषो जायते।

आ० र०- शारीरस्य लक्षणमाह-पूर्वं शरीरे इति। पूर्वग्रहणात् पश्चान्मनसि तापः।

मानसलक्षणमाह-मनस इति। पूर्वं मनसि पश्छाच्छरीरे तापः।

इदानीं सौम्यतीक्ष्णौ व्याचष्टे-

पवने योगवाहित्वाच्छीतं श्लेष्मयुते भवेत्।

स०-पवने श्लेष्मयुते योगवाहित्वाद्धेतोः शीतं भवेत्। तस्माद्वात श्लेष्मज्वरः सौम्य इति बोध्यम्। श्लेष्मा हि "सोमः" इति प्रागुक्तम् (हृ. शा. अ. ३।९६)।

आ० र०- सौम्यस्य लक्षणमाह-पवने योगवाहित्वादिति। योगवाही-सम्बन्धनिर्वहकः, येन युज्यते तद्गुणमेव पुष्णाति।

तीक्ष्णमिदानीं वक्ति-

दाहः पित्तयुते, मिश्रं मिश्रे

स०-दाहः पित्तसम्बन्धे पवने योगवाहित्वाद्भवेत्। इत्येवं मिश्रे-पित्तश्लेष्मयुते पवने, योगवाहित्वाच्च पवनस्य मिश्रं-दाहशीतं भवेत्, मुहुर्दाहो मुहुः शीतमिति। तदयं सौम्यतीक्ष्णव्यामिश्रस्तृतीयो ज्वर इति वेद्यम्। सौम्यस्तीक्ष्ण इति द्वैविध्यकथनं तु समासादिति मन्तव्यम्। योगं वहति तच्छीलो योगवाहि, येन येन युक्तो भवति तस्य तस्य स्वभावं भजत इत्यर्थः। एवं च सति स्वयं नोष्णो न च शीतो वायुरित्यभ्युपगतम्। तदेवमिह योगवाहित्वात् कफेन युक्ते वायौ शीतं भवेदित्युक्तम्, असौ वायुः शीतं करोतीत्यर्थः। पित्तयुक्तेऽस्मिन् दाहो भवेत्, असौ दाहं करोतीति। एवं स्वयं नोष्णो न शीत इत्यवतिष्ठते। "तत्र रूक्षो लघुः शीतः " इत्यत्र च शीत इत्युच्यते। अदिमे वचसी परस्परं व्याजघ्नाते। नैवम्। "तत्र रूक्षो लघु शीतः खरः सूक्ष्मश्चलोऽनिलः।" (ह्. सू. अ. १।११) इत्यत्रैवायमर्थस्तथा व्याख्यातो यथा न पूर्वापरव्याहतत्वं भवेत्। तेनेह पुनर्न प्रतन्यते।

आ० र०- तीक्ष्णलक्षणमाह-दाहः पित्तयुत इति। पवने योगवाहित्वादित्यनुवर्तते। मिश्रे-श्लेष्मयुते पितयुते च। मिश्रं-शीतं दाहश्च। तीक्ष्णस्यैवायं भेदः, पृथक्त्वे द्वित्वहानेः। दाहस्य दुःसहत्वात् न सौम्यभेदः।

इदानीमन्तराश्रयस्य लक्षणमाह-

अन्तःसंश्रये पुनः॥४८॥

ज्वरेऽधिकं विकाराः स्युरन्तः क्षोभो मलग्रहः।

स०-अन्तराश्रये तु ज्वरेऽधिकं कृत्वाऽन्तर्विकाराः स्युः, न बहिरेव। तथा, क्षोभः-तीव्रदाहत्वम्। मलानां-मूत्रपुरीषादीनां, ग्रहो-विबन्धः।

आ० र०- अन्तराश्रयलक्षणमाह-अन्तःसंश्रय इति। विकाराः-यथास्वमुक्तानि लक्षणानि। क्षोभः-तीव्रत्वम्।

बहिरेव बहिर्वर्गे तापोऽपि च सुसाध्यता॥४९॥

स०-बहिर्वर्गे तु बहिरेव तापः, न त्वन्तरे। अपिचेत्यन्तः-क्षोभमलग्रहावप्यत्र न स्त इति समुच्चिनोति। तत्र च बहिर्वेगेऽत एव सुसाध्यता-सुखसाध्यत्वं, भवति। अन्तराश्रये तु दुःसाध्यतेत्यर्थादुक्तं भवति।

आ० र०- बहिराश्रयलक्षणमाह-बहिरेवेति। बहिरेव तापो=नान्तः। सुसाध्यता-सुखसाध्यत्वम्।

सम्प्रति प्राकृतवैकृतौ लक्षयति-

वर्षाशरद्वसन्तेषु वाताद्यैः प्राकृतः क्रमात्।
वैकृतोऽन्यः स दुःसाध्यः प्रायश्च प्राकृतोऽनिलात्॥

स०- वर्षादिषु त्रिषु ऋतुषु यथाक्रमं वाताद्यैस्त्रिभिर्दोषैर्यो ज्वरो जायते स प्राकृतः। वर्षासु वातज्वरः प्राकृतः, शरदि पित्तज्वरो, वसन्ते कफज्वरः, इति परिभाष्यते। अत एव वातप्रकृतेन यो ज्वरः, पित्तप्रकृतेः पित्तेन, श्लेष्मप्रकृतेः श्लेष्मणेति, स प्रकृतिभवत्वेन प्राकृत इत्युच्यते। वैकृतोऽन्य इति। यो ज्वरो वर्षादिभ्य ऋतुभ्योऽन्यत्र काले जातो वर्षादिष्वपि वा न यथाक्रमं वाताद्यैर्जनितः, स यथोक्तप्राकृतलक्षणादन्यः, स वैकृत उच्यते। स च दुःसाध्यः-कृच्छ्रसाध्यः। प्राकृतस्तु सुसाध्य इत्यर्थाद्गम्यते। प्राय इत्यादि। प्रायो-बाहुल्येन, प्राकृतोऽपि यो ज्वरोऽनिलाज्जायते सोऽपि दुःसाध्यः। प्रायोग्रहणेनैतद् द्योतयति। कदाचिद्दैवानुकूल-त्वात्सुसाध्य एव भवति। ननु, वर्षास्व(शरद्य)पि प्राकृतोऽपि ज्वरो यथा विकृतिविज्ञानीये कथितस्तथाऽसाध्य एव। "ज्वरो निहन्ति बलवान्" (हृ. शा. अ. ५।७१) इत्यादि। तदेतत्पूर्वापरव्याहतमिव दृश्यते। नैवम्। अनयोर्वचसोः सामान्यविशेषरूपत्वात्। तथा चेह सामान्येनोक्तम्, विकृतिविज्ञानीये तु विशेषेणेति। एतदेव च स्फुटीकर्तुं वक्ष्यति (श्लो. ५३) -"विकृतिज्ञाने प्रागसाध्य उदाहृतः।" इति।

आ० र०- प्राकृतलक्षणमाह-वर्षाशरद्वसन्तेष्विति। वर्षासु वातजः, शरदि पित्तजः, वसन्ते कफजः, प्राकृतो ज्ञेयः। वैकृतलक्षणमाह-वैकृतोऽन्य इति। अथ क्रतुना दोषेण वा शरदि वातजः, वर्षासु कफजः, इत्यादि वैकृतो दुःसाध्यो ज्ञेयः। प्रकृतश्चानिलाज्जातः। प्रायोग्रहणात् क्वचित् सुसाध्योऽपि। " एकमार्गक्रियारम्भव्यतिवृत्तेर्महात्ययात्।" इत्यधिकं सङ्ग्रहे (नि० अ० २)। एकमार्ग एकक्रियाकारम्भश्च रोगः सुखसाध्यः। वातजे त्वेषां व्यतिवृत्तिः-विपर्ययः।

बहिर्मार्गोऽयं लङ्घनसाध्योयं सौम्योऽयमित्युपचर्यमाणोऽपि वातजोऽन्तर्मार्गत्वं बृंहणसाध्यत्वं तीक्ष्णत्वं चोपैति। वातस्यानवस्थितत्वात्। महांश्चात्ययः-अतिक्रमः, यदौषधकालमपि न प्रतीक्षते। वातस्याशुकारित्वात्।

सम्प्रति वर्षासु प्राकृतस्य ज्वरस्य स्वरूपं निरूपयति-

वर्षासु मारुतो दुष्टः पित्तश्लेष्मान्वितो ज्वरम्।
कुर्यात् पित्तं च शरदि तस्य चानुबलं कफः॥५१॥
तत्प्रकृत्या विसर्गाच्च तत्र नानशनाद्भयम्।
कफो वसन्ते तमपि वातपित्तं भवेदनु॥५२॥

स०-प्रावृषि पवनः [दुष्टः-] कुपितः, पित्तश्लेष्मयुतो ज्वरं कुर्यात्। प्रावृषि प्राकृतो ज्वरो वातप्रधानः पित्तश्लेष्माणौ त्वनुबलत्वेन वातस्य स्थितौ, न तु सन्निपात इव स्वयं ज्वरकारकावित्यर्थः।

साम्प्रतं शरदि प्राकृतस्य ज्वरस्य दोषबलाबलं लक्षयति-पित्तं चेत्यादि। पित्तं शरदि [दुष्टं] प्राकृतं ज्वरं कुर्यादित्यनुवर्तते। प्रावृड्ग्रिवतस्य पित्तस्य तदा कोपसद्भावात्। तस्य च पित्तस्यानुबलं-अनुबन्धि बलं, कफः। अनुबलमिवानुबलम्। यथा,-कस्यचित् स्वतन्त्रस्य राज्ञो गजतुरगरथपुरुषादिबलवतो वैरिभिः सह युध्यमानस्य पश्चादन्यद्बलं तच्छक्तेरनुबृंहणार्थमागच्छति, एवं स्वतन्त्रस्य पित्तस्य ज्वरं कुर्वतो बलोपबृंहणं शरदि कफः करोति। तत्प्रकृत्येति तच्छब्देन वर्षाशरदुद्भवौ मारुतज्वरपित्तज्वरौ परामृश्येते। तयोः प्रकृतिस्तत्प्रकृतिः, तया तत्प्रकृत्या, -तत्स्वभावेन, तत्र-प्राकृते ज्वरे, अनशनात्-लङ्घनात्, भयं न 'भवति' इति शेषः। विसर्गाच्च वर्षाशरदुपलक्षितो हि कालो विसर्गः सौम्यस्वभावः, अस्माच्च कारणात्तस्मिन्काले ज्वर उत्पन्ने लङ्घनात् प्रत्यवायशङ्का तथा न भवति, यथाऽन्यस्मिन् काले ज्वर आदानकालस्वभावाद्वतपित्तानुबलत्वाच्चानशनाद्भयं भवतीत्यर्थः।

वसन्तकाले कफो दुष्टो ज्वरं कुर्यादिति वर्तते। तं च कफमनु वातपित्तं भवेत्, वातपित्ते तस्यानुबले भवत इत्यर्थः। ननु, अत्र साक्षात्कफस्य कर्तृत्वमुच्यते। कफश्च सौम्यस्वभावः। तस्मादत्र नानशनाद्भयमिति। तच्चायुक्तम्। तथाहि-वर्षाशरदोः श्लेष्मानुबलत्वं कालश्च विसर्गाख्य इति कारणद्वयसद्भावाद्धात्वपचयो न सम्भाव्यत एव। वसन्ते तु कालस्याग्नेयत्वाद्वातपित्तानुबलत्वाच्चावश्यंभावी धात्वपचय एव। तस्माद्वसन्तेऽनशनाद्भयं शङ्क्यते। केचितु ज्वरस्यामाशयसमुत्थत्वात् कफोत्थत्वाच्चात्रापि किञ्चिन्मात्रमनशनाद्भयं नाशङ्क्यत एवेत्याहुः।

आ० र०- विरुद्धाविरुद्धोपक्रमज्ञानार्थं प्राकृतानां सम्प्राप्तिरुच्यते। तत्र वातजस्य-वर्षासु मारुत इति। पित्तजस्यपितं च शरदीति। कफदीति। कफजस्य-कफो वसन्त इति। "रत्प्रकृत्याविसर्गाच्च तत्र नानशनाद्भयम्।" इति पित्ताजस्याविरुद्धोपक्रमत्वमुक्तम्। तयोः-पित्तकफयोः, प्रकृतिः-लङ्घनसाध्यत्वम्। विसर्गः-कालबलवर्धनत्वम्। च लङ्घनसाध्याविति विरुद्धोपक्रमत्वम्। वसन्तेऽनुक्षीयमाणेऽपि मध्यमं बलं, वातस्य चाप्राधान्यं, प्रधानयोः कफज्वरयोः पित्तस्य च लङ्घनसाध्यत्वमित्यविरुद्धोप्क्रमत्वमेव।

अथ साध्यासाध्यज्वरलक्षणार्थमाह-

बलवत्स्वल्पदोषेषु ज्वरः साध्योऽनुपद्रवः।

स०-बलवस्तु नरेषु यौवनादिसम्पत्त्या तथाऽल्पदोषेषु यो ज्वरो जायते, उपद्रवेण-कासादिना रहितः, स साध्यः-साधयितुं शक्यः।

आ० र०- साध्यलक्षणमाह-बलवत्स्वल्पदोषेष्विति। दोषोदुष्टनाम (?)। उपद्रवा रुग्विनिश्चये दर्शिताः (मा. नि. ज्व. श्लो ६६ टी.)- "शासो मूर्च्छाऽरुचिश्च्छर्दिस्तृष्णातीसारविड्ग्रहाः। हिक्का कासोऽङ्गभेदश्च जवरस्योपद्रवा दश॥" इति।

सर्वथा विकृतिज्ञाने प्रागसाध्य उदाहृतः॥५३॥

स०-सर्वथेति यादृशस्यातुरस्य यादृशो ज्वरोऽसाध्यो भवति तादृशो, विकृतिविज्ञानीये शारीरे (अ. ५।७१)-"ज्वरो निहन्ति बलवान्" इत्यादिना ग्रन्थेन प्राक्-पूर्वमुक्तः।

आ० र०- असाध्यलक्षणमाह-सर्वथेति। विकृतिज्ञानेऽध्याये। प्राक्-शरीरे स्थाने। सर्वथेत्यसाध्यविशेषणम्, अनुपक्रम इत्यर्थः। याप्युदुःसाध्ययोस्तु लक्षणं स्वयमप्यूह्यम्। उदाहृतो यथा (हृ. शा. अ. ५१७१)-"जरो निहन्ति बलवान् गम्भीरो दैर्घरात्रिकः॥ सप्रलापभ्रमशासः क्षीणं शूनं हतानलम्। अक्षामं सक्तवचनं रक्ताक्षं हृदि शूलिनम्॥ सुशुष्ककासः पूर्वह्नेऽपि वा भवेत्। बलमांसविहीनस्य श्लेष्मकाससमन्वितः॥" इति। वृन्दे तु (ज्वराधिकारे श्लो. १८७)-" ललाटे हिमवान्नरस्या शीतार्दितस्यैति सुपिच्छिलश्च। कण्ठस्थितो यस्य न याति वक्षो नूनं यमस्यैति गृहं स मर्त्यः॥ मृत्युश्च तस्मिन्बहुपिच्छलत्वाच्छीतस्य जन्तोः परितः सरत्वात्।" इति।

अधुना सामनिरामौ ज्वरो लक्षयति-

ज्वरोपद्रवतीक्ष्णत्वमग्लानिर्बहुमूत्रता।
न प्रवृत्तिर्न विड्जीर्णा न क्षुत्सामज्वराकृतिः॥५४॥

स०-ज्वरस्योपद्रवाः-प्रलापभ्रमादयः, तेषां तीक्ष्णत्वं-तीव्रता। तथा, बहुमूत्रत्वम्। तथा, न प्रवृत्तिः-न पुरीषस्य प्रवर्तनम्। विड्वृत्तावपि हि प्रवृत्तिशब्दः प्रसिद्धः। यथाऽनन्तरमधुनैवाधीतम् (श्लो. ३२)-"प्रवृत्तिर्वाऽल्पशोऽति वा।" इति। अथ चेद्विट् प्रवर्तते सा न जीर्णा-पक्का न भवति। तथा, न क्षुत्-न बुभुक्षा। इयमशेषा लिङ्गसंहतिः सामज्वराकृतिः-सामज्वरस्य लक्षणम्। सहामेन वर्तते यो ज्वरः स सामज्वरः, तस्याकृतिः। "ऊष्मणोऽल्पबलत्वेन" (हृ. सू. अ. १३।२५) इत्याद्यामलक्षणम्।

आ० र०- सामज्वर्लक्षणमाह-ज्वरोपद्रवतीक्ष्णत्वमिति। न प्रवृत्तिर्विशः। प्रवर्तमानाऽपि विट् न जीर्णा-न पक्का।

सम्प्रति पच्यमानज्वरस्य लक्षणमाह-

ज्वरवेगोऽधिकं तृष्णा प्रलापः श्वसनं भ्रमः।

मलप्रवृत्तिरुत्क्लेशः पच्यमानस्य लक्षणम्॥५५॥

स०-अतिशयेन ज्वरवेगस्तृष्णादयश्चेति पच्यमानज्वरस्य लक्षणम्। पच्यमानज्वरस्य च द्विकेष्वनिर्दिष्टस्यापीह कथनमता(मामा)न्तरीयकत्वात्। तथा हि-यावत्पच्यमानावस्था न भवति तावत्कथं निरामावस्था स्यात्? तस्माद्युक्तः पच्यमानज्वरस्य निर्देशः।

आ० र०- अथ पच्यमानज्वरलक्षणमाह-ज्वरवेगोऽधिक इति। पच्यमानस्य पक्वान्तर्भावन्न द्वैविध्यहानिः।

इदानीं निरामज्वरलक्षणमाह-

जीर्णताऽऽमविपर्यासात्सप्तरात्रं च लङ्घनात्।

स०-आमशब्देनात्र सामज्वरलक्षणमुपलक्ष्यते। तेन सामज्वरोक्तलक्षणविपर्यासात् ज्वरस्य जीर्णता वेद्येति बोध्यम्। यथा-ज्वरोपद्रवमृदुत्वं ग्लानिरल्पमूत्रता पक्वविड्वृत्तिः क्षुदुपगमनमिति, एवंरूपो विपर्यासः। तथा, "ज्वरवेगोऽधिकं" इत्यादिपच्यमानज्वराकृतेश्च विपर्यासात् जीर्णता-पक्वता, लक्षयितव्या। तथा हि-पच्यमानतायामपि सामता सम्भाव्यत एव। तथा, सप्तरात्रं च लङ्घनात्। सप्तरात्रमिति सप्तानां रात्रीणां समाहार इत्यच् समासान्तः, अत्यन्तसंयोगे द्वितीया। तेनायमर्थः,-सप्तरात्रीर्लङ्घयित्वा-अतिवाह्य, ततोऽनन्तरं यः कालोऽष्टमदिनादिस्तदा ज्वरस्य जीर्णता-निरामतेति। तथा च मुनिः (च. चि. अ. ३।२७२)-"सप्ताहेन तु पच्यन्ते सप्तधातुगता मलाः। निरामश्चाप्यतः प्रोक्तो ज्वरः प्रायोऽष्टमेऽहनि॥" इति। ननु, एवंसति सप्तरात्रातिप्रवृत्तिरेव निरामज्वरलिङ्गमस्तु, "जीर्णताऽऽमविपर्यासात्" इत्यनेन नार्थः। अस्त्येवैतत्। किन्तु सन्निपातज्वरे बहुना कालेन मलपाको भवति। तस्मात्तल्लक्षणार्थं "जीर्णताऽऽमविपर्यासात्" इत्यप्युक्तम्। यद्येवं "जीर्णताऽऽमविपर्यासात्" इत्यस्तु, किं "सप्तरात्रं च लङ्घनात्" इत्यनेन? अपि च त्रिदोषजे ज्वरे सप्तरात्रातिक्रमलक्षणं लिङ्गं नोपयुज्यते। तत्र ह्येवं पठ्यते (श्लो. ६१)-"वातपित्तकफैः सप्त दश द्वादश" इत्यारभ्य यावत् "शुध्यशुध्यौ ज्वरः कालं दीर्घमप्यनुवर्तते॥" इति। तस्मात् "सप्तरात्रं च लङ्घनात्"

इत्यवाच्यम्। अत्रोच्यते। अल्पदोषो यो ज्वरस्तस्यामविपर्यासात् सप्ताहादर्वागपि जीर्णतोच्यते। यस्तु बहुदोषो ज्वरस्तस्य तु कृतसप्तलङ्घनस्य जीर्णतोच्यते। इति लक्षणद्वयेन प्रत्यपादि। अत एव च तत्र पथ्यमनुजज्ञे। वक्ष्यति हि (हृ. चि. अ. १।३८)-"इत्ययं षडहो नेयो बलं दोषं च रक्षता। ततः पक्वेषु दोषेषु लङ्घनाद्यैः प्रशस्यते॥ कषायो दोषशेषस्य" इत्यादि। तस्मादेतयोर्लक्षणयोर्द्वयोरप्युपादानं न्याय्यमिति स्थितम्। खरनादेनाप्येवमवादि-"न च निःसप्ततैवेह निरामज्वरकारणम्। चिरादपि हि पच्यन्ते सन्निपातज्वरे मलाः॥ सप्तरात्रातिवृत्तिश्च क्षामतादि च लक्षणम्। तस्मात्तदुभयं दृष्ट्वा निरामं ज्वरमादिशेत्॥" इति। जीर्णः पक्वः पुराण इति पर्यायाः।

आ० र०- निरामज्वरलक्षणमाह-जीर्णतेति। आमविपर्यासात्-ज्वरोपद्रवमृदुत्वादेः। सत्परात्रं लङ्घनादिति मध्यदोशविषयम्। बहुदोषाल्पदोषयिस्ततः परं च दर्शनात्।

ज्वरः पञ्चविधः प्रोक्तो मलकालबलाबलात्॥५६॥

प्रायशः सन्निपातेन भूयसा तूपदिश्यते।

सन्ततः सततोऽन्येद्युस्तृतीयकचतुर्थकौ॥५७॥

स०-पञ्चप्रकारो ज्वरो वक्ष्यमाणः सन्ततादिभिर्भेदैः प्रोक्तो, 'मुनीन्द्रैः' इति शेषः। कुतः ? मलेत्यादि। मलो-वातादिः। कालः-पूर्वाह्णादिः। बलं च बलं च बलमित्येकशेषः, बलं चाबलं च बलाबलम्, काले बलाबलं कालबलाबलम्, सप्तमीति योगविभागात् समासः, मलानां कालबलाबलं मलकालबलाबलम्, तस्मात्। द्विबलशब्दोऽत्र निर्दिष्टो द्विविधसम्बन्धार्थः। कोऽसौ द्विविधः सम्बन्धः ? इति चेत् ब्रूमः। ज्वरः पञ्चविधः कथितो मलकालबलात् तथा मलकालबलाबलात्। तदयमत्रार्थः,-सन्ततो ज्वरो मलकालबलादुक्तः। तथा चानन्तरमेव सन्ततलक्षणं वक्ष्यति (श्लो. ५८-५९)-"मलाबलिनो गुरवः स्तब्धाः सन्ततं निष्प्रतिद्वन्द्वा ज्वरं कुर्युः।" इति। तस्माद्बलवन्त एव दोषाः सन्ततं ज्वरं कुर्वन्ति। विषमज्वराश्चत्वारो मलकालबलाबलाद्भवन्ति। तथा च विषमज्वरलक्षणेऽधुनैवाध्येष्यते (श्लो. ६४)-"अल्पोऽपि दोषो दूष्यादेर्लब्ध्वाऽन्यतमतो बलम्। सविपक्षो ज्वरं कुर्याद्विषमं क्षयवृद्धिभाक्॥" इति। तस्माच्चतुष्प्रकारोऽपि विषमज्वरो मलकालबलाबलाद्भवति। खरनादेनाप्युक्तम्-"बलिभिः सर्वगैः सामै रसस्रोतोविसारिभिः। निष्प्रत्यनीकैर्दोषैर्यः सन्ततो जायते ज्वरः॥" इत्यादि। तथा तत्रैव विषमज्वरे गदितम्-"व्याधिक्लिष्टस्य' इत्यारभ्य यावत् "बलाबलविशेषस्तु दोषाणां

सम्प्रवर्तते।" इति। तथा तत्रैव चोक्तम्-"भुव्युत्कम्य यथाकालं बीजं काले प्रसूयते। तथा कालक्रमाद्दोषः काले ज्वरकारो भवेत्॥" इति। प्रायश इत्यादि। बाहुल्येनायं सन्ततादिज्वरः सन्निपाताद्भवति। [ननु,] अत्र सन्निपातेनेत्यसाधु। न ह्यन्यः कश्चित्सन्ततादिव्यतिरिक्तो ज्वरोऽस्ति यमेकदोषजं द्विदोषजं वा परिकल्पयेदिति, तस्मादसदेतत्। उच्यते। समर्यादया दोषगत्या ये सन्ततादयो ज्वरा उत्पद्यन्ते, त एकदोषजादय उपपद्यन्ते। ये पुनर्विषमसम्प्राप्तिसमुत्पन्नाः सन्ततादयस्ते सन्निपातेन। इति प्रायशः सन्निपातेनेति न्याय्यमेतत्। ननु, एवं सति वातिकोऽयं पैत्तिकोऽयं श्लैष्मिकोऽयमयं द्वान्द्विक इति कथं व्यपदेशः ? इत्याह-भुयसेति। सन्निपातोद्भवेऽप्यस्मिन् सन्ततादौ भूयान्-अधिको दोषः, तद्दोषोपलक्षितां संज्ञामासादयतीत्यर्थः, वातज्वरोऽयं पित्तज्वरोऽयमित्यादि। तुरवधारणे, भूयसैव दोषेण व्यपदेशो नान्येनापि। ततश्चैवं सन्निपातोत्थः सन्ततादिज्वर इति स्थितम्। अत एव तन्त्रान्तर एवं जगाद-"सन्ततो मारुतात्प्रायः पित्तात् प्रायस्तृतीयकः। अन्येद्युश्च कफात्प्रायः सन्निपाताच्चतुर्थकः॥सन्निपातकृतत्वात्तु दुश्चिकित्स्यश्चतुर्थकः।" इति। तथा च-"पृष्ठेऽनिलकफोद्भूतः श्लेष्मपित्तोद्भवस्त्रिके। शिरस्यनिलसम्भूतो गृह्णातीह तृतीयकः॥ चतुर्थकस्तु श्लेष्मोत्थः प्रतिगृह्णाति जङ्घयोः। वातिकः शिरसोऽभ्येति द्विधैवायं स्वभावतः॥ प्रस्कन्धतस्तु विज्ञेयो विपरीतश्चतुर्थकः।" इति।

अथ तदेव पञ्चविधत्वमाह-सन्ततः सततोऽन्येद्युस्तृतीयकचतुर्थकाविति। ननु, पञ्चविधो ज्वर इत्यनुपपन्नम्, षष्ठस्य चतुर्थविपर्ययस्य च वक्ष्यमाणत्वात्। अत्र ब्रूमः। चतुर्थकान्तर्गतत्वाददोषः। प्लीहोदरे यकृदुदरवत्। तथा हि-अष्टावुदराणीति, प्लीहोदरे च यथा यकृदुदरस्यान्तर्भावादष्टधात्वम्, एवं ज्वरे चतुर्थक एव चतुर्थकविपर्ययस्यान्तर्भावात् पञ्चधात्वमेव ज्वरस्य साधु।

आ० र०- उक्तानां ज्वराणां पृथक् पञ्चविधत्वमाह-ज्वरः पञ्चविध इति। मलकालबलात् सन्ततः, सततादयस्त्वबलात्। अबलं-हीनबलम्। तत्र यथोत्तरंज्ञेयम्। प्रायशो ग्रहणादनियमोऽपि तेन च सन्निपातेन। वातज्वरादिव्यपदेशस्तु वातादिभूयस्त्वा।

अथ महारम्भत्वेन प्राधान्यात् सन्ततसम्प्राप्तिमेव लक्षयति-

धातुमूत्रशकृद्वाहिस्रोतसां व्यापिनो मलाः।

तापयन्तस्तनुं सर्वां तुल्यदूष्यादिवर्द्धिताः॥५८॥

बलिनो गुरवः स्तब्धा विशेषेण रसाश्रिताः।

सन्ततं निष्प्रतिद्वन्द्वा ज्वरं कुर्युः सुदुःसहम्॥५९॥

स०-मला ज्वरं कुर्युः-उत्पादयेयुः। कीदृशाः ? धात्वादिस्रोतसां व्यापिनः। धातवश्च मूत्रं च शकृच्च तानि वहन्ति नित्यं यानि स्रोतांसि तेषां। मला इत्यनेनैतद्योतयति। यदैव वातादयो मलिनीकरणस्वभावाः स्युस्तदा सन्ततं ज्वरं कुर्युः, न तु दोषरूपा धातुरूपा वा। तथा, सर्वां-अशेषां, तनुं तापयन्तः-सन्तापादिना पीडयन्तः, न पुनः सन्तापमात्रमुत्पादयन्तः। तथा, तुल्यैः-समानैः, दूष्यादिभिर्वर्द्धिताः-वृद्धिं नीताः। आदिशब्देन देशर्तुप्रकृतयो गृह्यन्ते। दूष्याः-रसादिधातवः। ते च त्रयाणामपि दोषाणां यथायथं तुल्यत्वाद्वर्द्धनहेतवः। देशर्तुप्रकृतयस्तु तुल्यकालं मलैः सर्वैरतुल्या अपि भवन्ति। प्रायेणैकैकस्य मलस्य चैकैको देशो वा ऋतुर्वा प्रकृतिर्वा तुल्या भवति। अतः "तुल्यदूष्यादिवर्द्धिताः" इत्युक्तम्। तथा च, धन्वदेशो वातस्यैव वृद्धिहेतुः, तुल्यत्वात्; कफस्य त्वतुल्यत्वात्क्षपणहेतुः। आनुपस्तुल्यत्वात् कफस्य वृद्धिहेतुः, वातस्य त्वसमानत्वात्क्षपणहेतुः। ऋतावप्येवं चिन्त्यम्। प्रकृतिस्त्रयाणां दोषाणां तुल्यकालं वृद्धिहेतुर्न सम्भवति, विषमदोषजनितत्वात्। ये त्वेवमवोचन्,-समाख्या प्रकृतिस्तुल्यत्वादेषां मलानामत्र ज्वरे वर्द्धनहेतुरिति। तेऽपि मैवं वोचन्ते(वचन्त्वि)ति वचनीयाः। यतो रोगजननोन्मुखानां दोषाणां नासौ वृद्धिहेतुः, आरोग्यलक्षणत्वात्। किम्भूता दोषाः ? बलिनः, प्रतिपक्षैरखण्डितशक्तित्वात्। तथा गुरवः, सामत्वात्। स्तब्धाः-निश्चलाः, ऊर्ध्वमधश्चा-निःसरणात्। विशेषेण रसाश्रिताः। विशेषग्रहणं मलानां सर्वधात्वाश्रितत्वं द्योतयति। सकलधातुसमाश्रिता अपि भवन्ति। अतिशयेन रसाख्यं धातुमाश्रित्यैते सन्ततं कुर्युः। तथा, निष्प्रतिद्वन्द्वाः-प्रत्यनीकरहिताः। कीदृशं ज्वरम् ? सुष्ठु दुःखेन-कृच्छ्रेण, सोढुं शक्यत इति सुदुःसहम्।

आ० र०- सन्ततज्वरलक्षणमाह-धाउमूत्रशकृद्वाहिस्रोतसामिति। दूष्यादयो-दूश्यदेशकालप्रकृत्यादयः। " ज्वरे तुल्यर्तुदोशत्वं प्रमेहे तुल्यदूष्यता। रक्तागुमे पुराणत्वं सुखसाध्यत्वहेतवः॥" (सं. सू. अ.७) इति तत् ऋतुविषयम्, न पूर्वाह्णादिविषयम्। गुरवो-निबिडावयवाः। स्तब्धाः -स्थिराः। रसाश्रिताः- रसस्रोतसो व्यापिनः। सन्ततं नाम ज्वरम्। सन्ततं-अविच्छेदेन, कुर्यारित्यावृत्या व्याख्येयम्। निष्प्रतिद्वन्द्वाः-प्रतिपक्षैर्देशकालादिभिरन-भिभूताः।

मलं ज्वरोष्मा धातून्वा स शीघ्रं क्षपयेत्ततः।
सर्वाकारं रसादीनां शुद्ध्याऽशुद्ध्याऽपि वा क्रमात्॥६०॥
वातपित्तकफैः सप्त दश द्वादश वासरान्।
प्रायोऽनुयाति मर्यादां मोक्षाय च वधाय च॥६१॥
इत्यग्निवेशस्य मतं, हारीतस्य पुनः स्मृतिः।
द्विगुणा सप्तमी यावन्नवम्येकादशी तथा॥६२॥
एषा त्रिदोषमर्यादा मोक्षाय च वधाय च।
शुद्ध्यशुद्धौ ज्वरः कालं दीर्घमप्यनुवर्तते॥६३॥

स०-ज्वरस्योष्मा-अनलधर्मः सकलवस्तुक्षपणस्वभावः, स कदाचित्तथाभूतादृष्टवशादस्मिन् ज्वरे धातुमलयोरेकलोलीभूतयोर्मलं-वातविडादिकं, क्षपयेत्। तथाभूतादृष्टसामर्थ्याद्धातून्वा-रसादीन्, क्षपयेत्। शीघ्रं-आश्वेव, न तु चिरेण कालेन अत्र च मलक्षपणोद्यतोऽयं ज्वरोष्मा न धातुक्षपणोद्यत इति निरामलक्षणेन विज्ञायते। तत्र चैतन्निरामलक्षणम्-'असंरोधस्रोतस्त्वं सप्राणत्वमङ्गलाघवं वातानुलोमनत्वं वाग्देहमनश्चेष्टास्वनालस्यमग्निदीप्तत्वं विशदास्यत्वं मूत्रपुरीषादिमलप्रवर्तनत्वं क्षुदुपगमो निर्ग्लानिता' इत्येवं किञ्चिदुत्पद्यमानमुपलभ्य निश्चीयते ज्वरोष्मणो मलक्षपणोद्यतत्वम्। एतल्लक्षणविपर्ययेण दोषोपक्रमणीयोक्तेन (हृ. सू. अ. १३।२३) -"स्रोतोरोध" इत्यादिना सामलक्षणमवगम्य निश्चीयते, यथाऽयं ज्वरोष्मा धातुक्षपणोद्यत इति।

स इत्यनुवर्तते। ततः-तस्मान्मलधातुक्षपणात् कारणात्, रसादीनां-धातुमूत्रशकृद्दोषाणां द्वादशानाम्येकलोलीभूतानां, सर्वाकारं-निःशेषं कृत्वा, शुद्ध्या-ज्वरोष्मणा निष्पादितया निर्मलतया, वातपित्तकफैर्भूयिष्ठैरेकैकश उत्पन्नः स सन्ततो ज्वरः प्रायो मोक्षाय-ज्वरमुक्तये, मर्यादां-अवधिं, सप्त दश द्वादश वासराननुयाति-अनुवर्तते। वासरानिति "अत्यन्तसंयोगे" द्वितीया। सर्व आकारो यस्मिन् शोधने तत्सर्वाकारं-निःशेषरूपम्। "क्रियाविशेषणानां नपुंसकत्वं द्वितीया च" इति द्वितीया। क्रमात्-यथाक्रमम्, तेन वातभूयिष्ठः सन्ततो ज्वरः सप्त वासरान्, पित्तभूयिष्ठो दशवासरान्, कफभूयिष्ठो द्वादशवासरान्, इत्यवतिष्ठते। तथा, रसादीनां-एकलोलीभूतानां केवलं ज्वरोष्मक्षपणमात्रमनुभवतां, अशुध्द्या-समलतया, एषामेष

ज्वरोष्मा वातपित्तकफैरेकैकश उत्पन्नः प्रायो वधाय मर्यादां सप्त दश द्वादश वासरानन्नुयाति। प्रायो-बाहुल्येन, एषा मर्यादा। कदाचिच्च वातज्वरादिरुक्तेभ्यः सप्तादि वासरेभ्योऽधिकानि दिनान्यनुवृत्त्य मोक्षाय वधाय वा भवति, कदाचित् न्यूनान्यपीति। तत्रान्तरे चोक्तम्-"पित्तकफानिलवृध्द्या दशदिवसद्वादशाहसप्ताहात्। हन्ति विमुञ्चति वाऽऽशु ज्वरोष्मणा धातुमलपाकात्॥" इति। इत्यग्निवेशस्य मतं-ज्ञानम्। हारीतस्य पुनरेवं स्मृतिः-स्मरणम्, नित्यत्वादायुर्वेदस्य। द्विगुणा सप्तमी-चतुर्दशदिनानि यावद्वातज्वरः सन्ततः, पित्तज्वरो द्विगुणा नवमी-अष्टादशदिनानि, कफज्वरो द्विगुणैकादशी-द्वाविंशतिर्दिवसाः। "एषा त्रिदोषमर्यादा मोक्षाय च वधाय च।" इति "सर्वाकारं रसादीनां शुच्याऽशुच्याऽपि वा क्रमात्।" इत्यत्राप्यनुवर्तनीयम्। त्रयश्च ते दोषाश्च त्रिदोषाः, तेषां मर्यादा-अवधिः, त्रिदोषमर्यादा। द्वयमपि चैतत् तन्त्रकृद्वचः प्रमाणम्, तथादृष्टत्वात्।

इदानीं यथापरिभाषितात् द्विविधादपि मर्यादाप्रकारादधिकतरं कालं यथाऽस्य ज्वरस्यानुवृत्तिर्भवति तथा दर्शयितुमाह-शुध्यशुद्धाविति। शुद्धिसहिता अशुद्धिः शुच्यशुद्धिः। शाकपार्थिवादित्वात्समासः। तस्यां सत्यां ज्वरः सन्ताताख्यो दीर्घमपि कालमनुवर्तते-अनुबध्नाति। कदाचिद्रसाख्यो धातुर्मलरहितो ज्वरोष्मणा क्षपितमलो भवति, कदाचिद्रक्ताद्यन्यतमः, कदाचिद्रक्तादयः सर्वे न रसः, कदाचिद्रक्तादयः सर्वे किञ्चिन्मलरहिता न रसस्तथाभूतः, कदाचित्किञ्चिन्मलरहितो रक्ताद्यन्यतम्ः, एवंप्रकारा शुद्धिसहिता अशुद्धिरुच्यते। तस्यां सत्यां सन्ताताख्यो ज्वरो दीर्घकालमनुवर्तते।

आ० र०- सन्ततस्यावधिमाह-मलं ज्वरोष्मेति। स च द्विविधः,-मोक्षावधिर्वधाश्चेति। तत्र यदा ज्वरोष्मा रसादीनां-दूष्याणां, सर्वकारं-सर्वथा, शुध्या-हेतुभूतया, मलं क्षपयेत्, तदा वधः। यदा तु न सर्वाकारंशुद्धुरशुद्धिर्वा तदा शुध्यशुध्योर्ज्वरः कालं दीर्घमप्यनुवर्ततेति। ततो-ज्वरोत्पत्तेरनन्तरम्। सत्पम्यादिदैगुण्यं पूर्वतिथिद्वैगुण्यमाक्षिपति, चतुर्दशाष्टादशद्वा-विंशतिवासरानित्यर्थः। क्षपणीयाल्पत्वबहुत्वकोतोऽयमवधिभेदः रोगस्वभावकृतो वा, अग्निवेशहारीतयोर्मतभेदस्थित्या कृतः।

एवं सन्ततस्य लक्षणमाख्याय सततकादीनां विषमज्वरसंज्ञानिमित्तं सामान्येन लक्षणमाह-

कृशानां व्याधिमुक्तानां मिथ्याहारादिसेविनाम्।

अल्पोऽपि दोषो दूष्यादेर्लब्ध्वाऽन्यतमतो बलम्॥ ६४॥

सविपक्षो ज्वरं कुर्याद्विषमं क्षयवृद्धिभाक्।

स०-ईदृशानां पुंसामल्पोऽपि-हीनबलोऽपि, अपिशब्दान्महाबलोऽपि, दोषो-वाताद्यन्यतमो, ज्वरं विषमसंज्ञं कुर्यात्। किं कृत्वा? दूष्यादेरन्यतमतो बलं लब्ध्वा। आदिशब्दो देशर्त्वोर्ग्रहणाय। अन्यतमग्रहणं चोपलक्षणार्थम्। तेन कदाचिद्दूष्यादेरेकस्माद्रसादेः कदाचिद्वाभ्यां रसरक्ताद्यन्यतमाभ्यां कदाचिद्दूष्यदेशाभ्यां कदाचिद्दूष्यदेशर्तुभ्यो बलं लब्ध्वेति योज्यम्। किम्भूतो दोषः? सविपक्षः,-सह विपक्षेण-प्रत्यनीकेन दूष्याद्यन्यतमेन, वर्तते सविपक्षः। तथा च किम्भूतः? क्षयश्च वृद्धिश्च, ते भजते-सेवते, क्षयवृद्धिभाक्। सन्ततो हि ज्वरो निष्प्रत्यनीक इति सन्ततादस्य भेदः। मिथ्याहारादिसेविनामित्यत्रादिशब्देन विहारौषधादिपरिग्रहः।

आ० र०- विषमाख्यस्य सन्ततादिचतुष्टयस्य सामान्यलक्षणमाह-कृशानामिति। कृशत्वादित्रयस्याष्टधाऽपि हेतुत्वम्। अन्यतमतः-न तु सन्ततवत्सवैभ्यो दूष्यादिभ्यः। दोष इति क्षयवृद्धिभाक्।

दोषः प्रवर्तते तेषां स्वे काले ज्वरयन् बली॥ ६५॥

निवर्तते पुनश्चैष प्रत्यनीकबलाबलः।

स०-तेषां-कृशादीनां, दोषो-वाताद्यन्यतमः, स्वे काले-यो यस्यात्मीयः कालो वृद्धिहेतुर्वयोहोरात्रिभुक्तलक्षणस्तस्मिन् स्वे काले, दोषः प्रवर्तते,- स्वीयं कर्म दर्शयतीत्यर्थः। किं कुर्वन्? ज्वरयन्-सन्तापमुत्पादयन्। कीदृशो दोषः? बली-बलवान् सन् प्रवर्तते। पुनश्चैषः-विषमज्वरारम्भी दोषः सततकादेरुत्पादको, निवर्तते-स्वव्यापाराद्विरमति। किम्भूतः? प्रत्यनीकस्य बलं प्रत्यनीकबलं, तेनाबलः। एतदुक्तं भवति,-यद्यसौ दोषो दूष्यादीनां सपक्षाणामन्यतमस्माद्बलं लभते तदाऽसौ स्वव्यापारे प्रवर्तते। यदा तु तस्य विपक्षा भवन्ति तदातेषां विपक्षाणामन्यतमस्य बलेनास्य दोषस्य बलं हीयते। तदानीं च प्रत्यनीकबलाबलत्वादसौ दोषो निवर्तते, वटादिबीजवत्। यथा,-वटादिबीजं जलादिसामग्रीतो

बलमासाद्य विशिष्टे काले रोहति-अङ्कुरादिकमुद्भावयति ततो जलादिविरहाद्धूमावेवावतिष्ठते, न तु स्वकार्यमुद्भावयति, तथैवैषोऽपि विषमज्वरस्य कर्ता दोषः स्वपक्षतो दूष्यादेर्बलं लब्ध्वा स्वव्यापारं कुरुते। यदा तु विपक्षबलेनासौ प्रतिहतशक्तिस्तदा स्वव्यापारं न कुरुते, देह एव निलीय तिष्ठति।

आ० र०- यथोक्तमर्थं विवृणोति-दोश इति। तेषां-विषंआणां, प्रत्यनीकस्य-प्रतिपक्षस्य, बलेन अबलः-अपगतालः।

क्षीणे दोषे ज्वरः सूक्ष्मो रसादिष्वेव लीयते॥ ६६॥

लीनत्वात्काश्र्यवैवर्ण्यजाड्यादीनादधाति सः।

स०-दोषे-विषमज्वरकारिणि, क्षीणे सति, सततकादिज्वरः सूक्ष्मो भूत्वा रसादिष्वेव धातुषु लीयते-लयं याति। कथं पुनरेतदवगम्यते ? यदसौ लीनो न पुनर्विनष्ट एव, इत्यत्र हेतुमाह-लीनत्वादित्यादि। स तु लीनो ज्वरो लीनत्वात् काश्र्यादीन् करोति। अत एवासौ न विनष्ट एवेत्युच्यते। यतः काश्र्याद्युद्गम उपलभ्यते। निरन्वयविनष्टाद्धि तद्धेतुकाश्र्याद्यनुपलब्धिरेव। तस्माल्लीनो दोषो विषमज्वरेषु भवतीति स्थितम्।

आ० र०- विषमज्वरस्य सन्ततनिवृत्तिर्नात्याह-क्षीणे दोष इति। रसाग्रहणं सन्ततस्यापि मध्यमे लीनत्वमस्तीति ज्ञापनार्थम्। अनेनैवाभिप्रायेण रुग्विनिश्चये (मा. नि. ज्व. श्लो. ३२)-" धातुमन्यतमं प्राप्य करोति विषमज्वरम्।" इत्युपक्रम्य "सन्ततं रसरक्तस्थः" इत्युक्तम्। आदधाति-करोति। चतुर्थकात्परं विषमसम्भवे स्ङ्गहे युक्तिरुक्ता (नि. अ. २) -"अतिलीनोऽतिमन्दत्वाद्भवत्यह्नि न पञ्चमे।" इति।

ननु, तुल्येऽपि वातादिदोषप्रकोपे सन्ततज्वर एवाशुसकलकायव्याप्तिः, सततकादिषु तु चिरेण विच्छिद्य भवतीत्यत्र युक्तिः का ? इत्याह-

आसन्नविवृतास्यत्वात्स्रोतसां रसवाहिनाम्॥ ६७॥

आशु सर्वस्य वपुषो व्याप्तिर्दोषेण जायते।

सन्ततः सततस्तेन, विपरीतो विपर्ययात्॥ ६८॥

विषमो विषमारम्भक्रियाकालोऽनुषङ्गवान्।

स०-आसन्नं विवृतं चास्यं-मुखं, येषां रसवाहिनां स्रोतसां तान्येवम्। तेषां भाव आसन्नविवृतास्यत्वम्। तस्माद्धेतोस्तत्र प्रविष्टेन दोषेण शीघ्रं सर्वस्य वपुषः-शरीरस्य, व्याप्तिर्जायते। तेन-कारणेन दोषेणाशु सर्वशरीरव्याप्तिलक्षणेन, सन्ततारव्यो ज्वरः सततो-निरन्तरो, भवति। विपरीतः प्रकृतत्वात्सन्ततेन विषमो-विषमसंज्ञः, सततादिज्वरो विपरीतो भवति-न निरन्तरं ज्वरयति। कस्माद्विपरीतः ? विपर्ययात्। एतदुक्तं भवति,-स्थूलान्यासन्नानि विवृतास्यानि च रसवाहीनि स्रोतांसि। दूरतराणि संवृतास्यानि सूक्ष्मतराणि च रक्तवाहीनि। तैर्दोषश्चिरेण तथा असाकल्येन कायं व्याप्नुवन् विच्छिन्नकालं ज्वरं करोति। अत एवाह (श्लो. ७०)-"अहोरात्रस्य स द्विः स्यात्" इत्यादि। ततो दूरतराणि संवृततरास्यानि च मांसवाहीनि स्रोतांसि। तानि चिरतरेण प्राप्नोति दोषः। न चैतैः स्रोतोभिः साकल्येन युगपद्देहमनुव्याप्नोति। अतोऽनेन कारणेनासावन्यस्मिन् दिने ज्वरं निर्वर्तयत्यन्येद्युःसंज्ञम्। तेनासौ सततादपि विप्रकृष्टो भवति। ततोऽपि सूक्ष्मतराणि संवृततरमुखानि च मेदोवहानि। तानि चिरतरेण दोषः प्राप्नोति। न च तैरशेषदेहं व्याप्नोति। अतोऽसावनेन कारणेन यथाक्रममन्यदिनमेकं हित्वा तृतीयेऽह्नि तृतीयको भवति। ततोऽप्यनेनैव विप्रकृष्टतमेन क्रमेण दिनद्वयं हित्वा चतुर्थको भवति। एवं चतुर्थकविपर्ययश्च। सङ्ग्रहेऽप्याख्यत् (नि. अ. २)-"सूक्ष्मसूक्ष्मतरास्येषु दूरदूरतरेषु च। दोषो रक्तादिमार्गेषु शनैरल्पश्चिरेण यत्॥याति देहं च नाशेषं भूयिष्ठं भेषजेऽपि च। क्रमोऽयं तेन विच्छिन्नसन्तापो लक्ष्यते ज्वरः॥" इति।

अधुना विषमज्वरस्य स्वरूपं प्रतिपादयन्नाह-विषम इति। विषमो-विषमसंज्ञो ज्वरो, विषमारम्भक्रियाकालो भवति। आरम्भश्च क्रिया च कालश्च आरम्भक्रियाकालाः। विषमा आरम्भक्रियाकाला यस्य स एवम्। तत्र विषम आरम्भो यथा,-कश्चित्पूर्वं मूर्धानमारभ्यागच्छति, कश्चित्पृष्ठम्, कश्चिज्जङ्घाभ्यामिति। विषमक्रियो यथा,-कश्चिच्छीतकृत्, कश्चिद्दाहकृदिति। विषमकालश्च यथा, -कश्चित्पूर्वाह्णे समागच्छति, कश्चिन्मध्याह्ने, कश्चिदपराह्णे, कश्चिन्निशीथे, इति। तथा, अनुषङ्गवान्-दीर्घकालानुबन्धी।

आ० र०- सन्ततादीनां सन्ततत्वादौ युक्तिमाह-आसन्नविवृतास्यत्वादिति। आसन्नमामाशयम्। आमाशयस्थो हि दोषो ज्वरं करोति। आसन्नत्वादाशुप्राप्तिः। विवृतास्यत्वादसंवलितप्रवेशः। आस्रोतस्यादामाशयं यातीत्यखण्डितत्वं सन्ततस्य। सतते त्वामाशयरज्तस्रोतसो यातायाते रसस्रोतसा खण्डितत्वम्। एवमुत्तरेषूत्तरोत्तरं खण्दितत्वम्। विपरीतः-खण्डितः। विपर्ययात्-दूरसंवृतास्यत्वात्। विषमारम्भः-कदाचिच्छीतपूर्वः

कदाचिद्दाहपूर्वः, कदाचिच्छिरसः कदाचित्पादतः। विषक्रियः-कदाचिल्लङ्घनसाध्यः कदाचिद्बृंहणसाध्यः। विशमकालः-कदाचित्पूर्वाह्णे कदाचिदपराह्णे। अनुषङ्गवान्-उपचर्यमाणोऽपि बह्वनि दिनान्यवतिष्ठते। सङ्ग्रहे तु विस्तरेण युक्तिरुक्ता (नि. अ. २) -" सूक्ष्मसूक्ष्मतरास्येषु दूरतरेषु च। दोषो रक्तादिमार्गेषु शनैरल्पश्चिरेण यत्॥ याति देहं च नाशेषं भूयिष्ठं भेषजेऽपि च। क्रमोऽयं तेन विच्छिन्नसन्तापो लक्ष्यते ज्वरः॥ विषमो विषमारम्भक्रियाकालोऽनुषङ्गवान्। यथोत्तरं मन्दगतिर्मन्दशक्तिर्यथायथा॥ कालेनान्पोति सदृशान् स रसार्दीस्तथा तथा। दोषोज्वरयति कुद्धश्चिराच्चिरतरेण च॥ भुमौ स्थितं जलैः सिक्तं कालमेव प्रतीक्षते। अङ्कुराय् यथा बीजदोषबीजं रुजे तथा॥ वेगं कृत्वा विषं यद्वदाशये लीयतेऽबलम्। कुप्यत्यात्पबलं भूयः काले दोशविषं तथा॥ एवं ज्वराः प्रवर्तन्ते विषमाः सन्ततादयः।" इति।

दोषो रक्ताश्रयः प्रायः करोति सततं ज्वरम्॥ ६९॥

अहोरात्रस्य स द्विः स्यात्

स०-प्रायो-बाहुल्येन, रक्ताश्रयो दोषः सततं ज्वरं विदधाति। प्रायोग्रहणात् रसाद्याश्रयत्वमस्य सूचयति। तस्मात्सर्वो ज्वरः सर्वधातुव्यापी। भूयांस्तु धातुर्व्यपदिश्यते। अत एव सन्तते पपाठ (श्लो. ५९)-"विशेषेण रसाश्रिताः।" इति। तस्माद्विशेषेण रक्ताश्रयः सतत इत्यवेहि। सः-सततः, अहोरात्रस्य मध्ये द्विः स्यात्-द्वौ कालावनुवर्तते। अहर्युक्ता रात्रिरहोरात्रः। "अहःसर्वैकदेश" इत्यादिना अच् समासान्तः। "रात्राह्नाहाः पुंसि" इति पुंस्त्वम्। द्वौ वारौ द्विः। "द्वित्रिचतुर्भ्यः सुच्" इति सुच्। अत्र च नायं नियमः, यदह्न्येकवारं रात्रावेकवारमिति, किं तर्हि ? कदाचिदह्न्येव वारद्वयं, कदाचिद्रात्रावेव वारद्वयं, कदाचिद्द्वयोरपि वारद्वयमिति प्रतीहि।

आ० र०- सततलक्षणमाह-दोशो रक्ताश्रय इति।

सकृदन्येद्युराश्रितः।

तस्मिन्मांसवहा नाडीः

स०-सकृदन्येद्युः 'अहोरात्रस्य इत्यनुवर्तते। अहोरात्रस्य मध्येऽयमन्येद्युर्नाम विषमज्वरः सकृत्-एकवारं भवेत्। कदाचिदह्न्येकवारमुत्पद्यते, कदाचिद्रात्राविति। तस्मिन्-अन्येद्युर्ज्वरे, सर्वधात्वाश्रयोऽपि दोषो विशेषेण मांसवहा नाडीराश्रितः।

आ० र०- अन्येद्युर्लक्षणमाह-सकृदिति। सकृत्-एकवारम्। आश्रितो दोषः। अस्मिन्-अन्येद्यौ॥

मेदोनाडीस्तृतीयके॥७०॥

ग्राही पित्तानिलान्मूर्ध्नस्त्रिकस्य कफपित्ततः।

सपृष्ठस्यानिलकफात्स चैकाहान्तरः स्मृतः॥७१॥

स०-तृतीयके मेदोवहा नाडीर्विशेषेण दोष आश्रित इति योज्यम्। मेदोवहा नाडीराश्रित्य दोषस्तृतीयकं कुरुत इत्यर्थः। स च त्रिविधः,-पित्तवातादधिकात् कफपित्तात् वातकफाच्च। तत्र ग्राही मूर्ध्नः-शिरसः, पित्तानिलात्तृतीयको भवति, मूर्ध्नि वेदनास्तास्ता जनयतीत्यर्थः। यश्च कफपित्तादुत्पद्यते स त्रिकस्य ग्राही-त्रिके पीडामुत्पादयति। यश्चानिलकफाज्जायते स पृष्ठसहितस्य त्रिकस्य ग्राही-पृष्ठे त्रिके च पीडां जनयति। एवमयं त्रिप्रकारस्वभावः। स च तृतीयक एकाहान्तर इति स्मृतो, 'मुनिभिः' इति शेषः। एकेनाह्नाऽन्तरं-व्यवधानं, यस्य स एवम्। एकस्मिन्नहनि तिरोभूय पुनरुदेतीत्यर्थः।

आ० र०- तृतीयकलक्षणमाह-मेदोनाडीरिति। स चत्रिविधः,-पित्तानिलजो मूर्ध्नः प्रवर्तते, कफपित्तजस्त्रिकात्, वातकफजः पृष्ठात्। त्रिविधोऽप्येकाहान्तरः।

चतुर्थको मले मेदोमज्जास्थ्यन्यतमस्थिते।

मज्जस्थ एवेत्यपरे प्रभावं स तु दर्शयेत्॥७२॥

द्विधा कफेन जंघाभ्यां स पूर्वं शिरसोऽनिलात्।

स०-मेदश्च मज्जा चास्थि च मेदोमज्जास्थीनि, तेषामन्यतमस्मिन् स्थिते दोषे कदाचिन्मेदसि स्थिते दोषे कदाचिन्मज्जनि कदाचिदस्थनि स्थिते दोषे चतुर्थको ज्वरो जायते। एकं दिनं

ज्वरयित्वा ह्यहं विमुच्य पुनर्ज्वरयति स चतुर्थको वेद्यः। मज्जस्थ एवेत्यपरे-अन्ये पुनराचार्या एवं स्मरन्ति, चतुर्थको ज्वरो मज्जस्थ एव दोषे जायते। स पुनश्चतुर्थकः प्रभावं द्विधा-द्विप्रकारं, दर्शयेत्। कफेनाधिकेन यो जायते स पूर्वं-प्रथमं, जङ्घाभ्यं ततोऽन्येभ्योऽङ्गेभ्यः। अनिलाद्यो भवति स पूर्वं शिरसो जायतेऽनन्तरमङ्गान्तरेभ्यः।

आ० र०- चतुर्थकलक्षणमाह-चतुर्थक इति। स च द्विविधः,-कफजो सङ्घाभ्यां पुर्वं प्रभावं दर्शयेत्, वातजः शिरसः।

अस्थिमज्जोभयगते चतुर्थकविपर्ययः॥७३॥

त्रिधा, ह्यहं ज्वरयति दिनमेकं तु मुञ्चति।

स०-अस्थि च मज्जा चास्थिमज्जानौ, अस्थिमज्जोरुभयं-द्वयं, तत्र गतो यो मलो वाताद्यन्यतमस्तस्मिन्, चतुर्थकविपर्ययः-तद्विपरीतलक्षणो विषमज्वरो, भवति। स च त्रिधा-त्रिप्रकारः, सन्निपातोद्भवत्वेऽपि कदाचिद्वातेनाधिकेनाऽथवा पित्तेन श्लेष्मणा वा। तमेव च लक्षयितुमाह-ह्यहमिति। द्विधातुस्थितदोषोत्पन्नत्वात् द्वे दिने ज्वरयित्वा दिनमेकं विमुच्य पुनर्ह्यहं ज्वरयति स चतुर्थकविपर्ययः। अनेनैव लक्षणेन चतुर्थकस्यापि लक्षणमुक्तं भवति। स एकमहो ज्वरयित्वा ह्यहं विमुच्य पुनर्ज्वरयति। द्वे अह्नी समाहृते द्यहः। "राजाहःसखिभ्यष्टच्" इति टच्। "अह्नष्टखोरेव" इति टिलोपः।

आ० र०- चतुर्थकविपर्ययलक्षणमाह-अस्थिमज्जोभयगते इति। उभयग्रहणमन्यतरव्यावृत्यार्थम्। विपर्ययलक्षणेन चतुर्थकलक्षणमप्युक्तम्,-एकं दिनं ज्वरयति व्यहं मुञ्चतीति। त्र्यहादिति चतुर्थकत्वनिर्वाहार्थम्। चतुर्थेऽह्नि भवश्चतुर्थकः। अयं च त्र्यहेण स्वरूपं निष्पाद्य पुनरारभते। एवं जन्मदिनाच्चतुर्थेऽह्नि पुनर्जन्म भवति। अस्य चौर्थकेऽन्तर्भावात् न पञ्चत्वहानिः। विपर्यये मेदसोऽकथनात् चतुर्थके कथनं पूर्वपक्षमात्रम्। तृतीयकेन हि तदवरुद्धम्। चतुर्थकश्च तृतीयकाद्गम्भीरधातुचारी। उक्तं च सङ्ग्रहे (नि. अ. २)-"गम्भीरधातुचारित्वात्सन्निपातेन सम्भावात्। तुल्योच्छ्रायाच्च दोषाणांदुश्चिकित्स्यश्चतुर्थकः॥" इति। तुल्योच्छ्रायत्वेऽपि कफानिलाभ्यां द्वैविध्यं कार्यक्रमाभिप्रयम्। अत एव तत्रपूर्वमित्युक्तम्।

इदानीमेषां विषमज्वराणामिमं शेषभूतं ग्रन्थमाह-

बलाबलेन दोषाणामन्नचेष्टादिजन्मना॥ ७४॥
ज्वरः स्यान्मनसस्तद्वत्कर्मणश्च तदा तदा।
दोषदूष्यर्त्वहोरात्रप्रभृतीनां बलाज्ज्वरः॥ ७५॥
मनसो विषयाणां च कालं तं तं प्रपद्यते।

स०-बलं चाबलं च बलाबलं,-सामर्थ्यासामर्थ्यम्, आसन्नव्याधिकारणानां दोषाणां-वातादीनां, तदा तदा बलाबलेन ज्वरः स्यात्। किम्भूतेन ? अन्नचेष्टादिजन्मना। अद्यत इत्यन्नं,-रक्तशाल्यादि। अन्नग्रहणमुपलक्षणार्थम्, मांसरसाद्यपि हि पानं गृह्यते। चेष्यत इति चेष्टा,-कायवाङ्मनोव्यापारो, विहार इत्यर्थः। अन्नं च चेष्टा चान्नचेष्टे, ते आदि येषां कालदूष्यादीनां त एवम्, तेभ्यो जन्म यस्य बलाबलस्य, तेनान्नचेष्टाद्युत्पन्नेन सततकादिर्ज्वरो भवेत्। मनसस्तद्वत्। तद्वदित्यनेन दोषाणां बलाबलमतिदिश्यते। यथा दोषाणां शारीराणां बलाबलेन सततकादिज्वरः स्यात्, तथा मनसोऽपि दोषाणां बलाबलेन ज्वरः स्यात्। चशब्दात् कर्मणोऽपि पूर्वोक्तस्य बलाबलेन सततकादिज्वरः स्यादिति। कस्य सम्बन्धिनः कर्मणः ? प्रकृतत्वान्मनस एव। तदेवं कर्मणो व्यापारस्य चित्तस्यार्थस्य बलाबलेन तद्वशाज्ज्वरोऽसौ भवेत्। अन्ये त्वाचक्षते,-कर्मणः-पुराकृतस्य बलाबलेन, पुराकृतकर्मवशादिति। यत्तदोनित्याभिसम्बन्धाद्यदत्रानुक्तमपि लभ्यते। तेनायं सम्बन्धः,-यदा यदाऽन्नचेष्टादिजन्म दोषाणां बलाबलं स्यात्, तथा मनसो दोषाणां बलाबलं स्यात्, तथा कर्मणः पूर्वकृतस्य बलाबलं स्यात्, तदा तदा सततकादिर्ज्वरः स्यादिति। अपिच दोषाणां वातादीनां बलेन, तथा दूष्याणां रसादीनां तथा ऋतूनां शिशिरादीनां तथाऽहोरात्रस्य तथा प्रकृतीनां बलेन, मनसो बलेन, तथा विषयाणां शब्दस्पर्शरूपरसगन्धानां बलेन, ज्वरस्तं तं-विशिष्टं, कालं प्रपद्यते। तेन कदाचित् सततकोऽन्येद्युस्तृतीयकश्चतुर्थको वा भवति। तथा कदाचित् चतुर्थको भूत्वा तृतीयकोऽन्येद्युः सततको वा भवेत्। सङ्ग्रहे च रसादिधातुस्थज्वरलक्षणमुक्तम्। यथा (नि. अ. २)-"उत्क्लेशो गौरवं दैन्यं भङ्गोऽङ्गानां विजृम्भणम्। अरोचको वमिः सादः सर्वस्मिन् रसगे ज्वरे॥ १॥ रक्तनिष्ठीवनं तृष्णा रक्तोष्णपिटिकोद्गमः। दाहरागभ्रममदप्रलापा रक्तसंस्थिते॥ २॥ तृड् ग्लानिः सृष्टवर्चस्त्वमन्तर्दाहो भ्रमस्तमः। दौर्गन्ध्यं गात्रविक्षेपो मांसस्थे, मेदसि स्थिते॥ ३॥ स्वेदोऽतितृष्णा वमनं स्वगन्धस्यासहिष्णुता। प्रलापो ग्लानिररुचिरस्थिस्थे त्वस्थिभेदनम्॥ ४॥ दोषप्रवृत्तिरूर्ध्वाधः श्वासाङ्गाक्षेपकूजनम्। अन्तर्दाहो बहिः शैत्यं श्वासो हिध्मा च मज्जगे॥ ५॥

तमसो दर्शनं मर्मच्छेदनं स्तब्धमेढ्रता। शुक्रप्रवृत्तिर्मृत्युश्च जायते शुक्रसंश्रये॥६॥ उत्तरोत्तरदुःसाध्याः पञ्चात्रान्त्यौ तु वर्जयेत्। प्रलिम्पन्निव गात्राणि श्लेष्मणा गौरवेण च॥७॥ मन्दज्वरप्रलेपस्तु सशीतः स्यात्प्रलेपकः। नित्यं मन्दज्वरो रूक्षः शूनः कृच्छ्रेण सिध्यति॥८॥ स्तब्धाङ्गः श्लेष्मभूयिष्ठो भवेद्वातबलासकः। हरिद्राभेकवर्णाभस्तद्वर्णं यः प्रमेहति॥९॥स वै हारिद्रको नाम ज्वरभेदोऽन्तकः स्मृतः। कफवातौ समौ यस्य हीनपित्तस्य देहिनः॥१०॥ तीक्ष्णो वा यदि वा मन्दो जायते रात्रिको ज्वरः। दिवाकरापीतबले व्यायामाच्च विशोषिते॥११॥ शरीरे नियतं वाताज्ज्वरः स्यात्पूर्वरात्रिकः। आमाशये यदा दुष्टे श्लेष्मपित्ते व्यवस्थिते॥१२॥तदाऽर्द्धं शीतलं देहे त्वर्द्धं चोष्णं प्रजायते। काये पित्तं यदा दुष्टं श्लेष्मा चान्ते व्यवस्थितः॥१३॥उष्णत्वं तेन देहस्य शीतत्वं करपादयोः।" इति। खारणादिना तु शुक्रस्थ एव दोषे वर्ज्यता प्रत्यपादि। तथा च तद्ग्रन्थः-"शुक्रस्थे शुक्रविण्मोक्षः श्वसन् प्राणान् विमोक्ष्यति।" इति।

आ० र०- अनुक्तज्वरभेदसङ्गहमाह-बलाबलेनेति। आदिषब्दादेशकालौ। कर्मणः-पापस्य। तदा तदा-तद्वत्। यदा यदा-यद्वद्दोषवत्, मनः कर्मणां बलमबलं वा। कारणव्यौ (?) च आनन्त्यात् कार्यवैचित्र्यानन्त्यमित्यर्थः। तच्च दर्शितया दिशा बुद्धिमद्भिर्गम्यम्। सङ्ग्रहे तु (नि. अ. २)-"उत्क्लेशो गौरवं दैन्यं भङ्गोऽङ्गानां विजृम्भणम्। अरोचको वमिःसादः सर्वस्मिन् रसगे ज्वरे॥रक्तनिष्ठीवनं तृष्णा रक्तोष्णपिटिकोद्गमः। दाहरागभ्रममदप्रलापा रक्तसंश्रिते॥तृट् ग्लानिः सृष्टवर्चस्त्वमन्तर्दाहो भ्रमस्तमः। दौर्गन्ध्यं गात्रविक्षेपो मांसस्थे, मेदसि शिते॥ स्वेदोऽतितृष्णा वमनं स्वगन्धस्यासहिष्णुता। प्रलापो ग्लानिररुचिरस्थिस्थे त्वस्थिभेदनम्॥ दोषप्रवृत्तिरूर्ध्वाधः श्वासो विक्षेपकूजनम्। अन्तर्दाहो बहिः शैत्यं श्वासो हिध्मा च मज्जगे॥ तमसो दर्शनं मर्मच्छेदनं स्तब्धमेढ्रता। शुक्रप्रवृत्तिर्मृत्युश्च जाअते शुक्रसंश्रये॥ उत्तरोत्तरदुःसाध्याः पञ्चान्यौ तु विवर्जयेत्॥" इति। एते रसगादिभेदाः सर्वेषां ज्वराणाम्, सर्वस्मिन्निति वचनात्। सन्ततादीनां रसगादिनियमस्त्वारम्भाभिप्रायः। रुग्विनिश्चये तु (मा. नि. ज्व. श्लो. ४०)-" नित्यं मन्दज्वरो रूक्षः शूनःकष्टेन सिध्यति। स्तब्धाङ्गः श्लेष्मभूयिष्टो भवेद्वातबलासकः॥ प्रलिम्पन्निव गात्राणि घर्मेण गौरवेण च। मन्दज्वरविलेपी च सशीतः स्यात्प्रलेपकः॥विदग्धेऽन्नरसे देहे श्लेष्मपित्ते व्यवस्थिते। तेनार्धं शीतलं देहमर्धमुष्णं च जायते॥काये दुष्टं यदा पित्तं श्लेष्मा चान्ते व्यवस्थितः। तेनोष्णत्वं शरीरस्य शीतत्वं हस्तपादयोः॥काये श्लेष्मा यदा दुष्टः पित्तं चान्ते व्यवस्थितम्। हीतत्वं तेन गात्रस्य उष्णत्वं हस्तपादयोः॥आमाशयस्थं पित्तं च मध्यं वाऽय प्रवर्तते। त्वक्स्थौ पितसश्रौ द्वौ बाह्यसंस्थानमाश्रितौ॥तेनान्तर्दाहसम्प्राप्तिर्बाह्ये भवति शीतता। त्वक्स्थौ श्लेष्मानिलौ शीतमादौ

जनयतो ज्वरे॥तयोः प्रसन्तयोः पित्तमन्ते दाःअं करोति च। करोत्यादौ तथा पित्तं त्वज्स्यं दाहमतीव च॥तस्मिन् प्रशान्ते तितरौ कुरुतः शीतमन्ततः।" इति। (मधुकोषे ज्व. श्लो. ४७)- कफवातौ समौ हीनपित्तस्य देहिनः। प्रायो रात्रौ ज्वरस्तस्य दिवा हीनकफस्य च॥" इति।

धातून् प्रक्षोभयन् दोषो मोक्षकाले विलीयते॥७६॥
ततो नरः श्वसन् स्विद्यन् कूजन् वमति चेष्टते।
वेपते प्रलपत्युष्णैः शीतैश्चाङ्गैर्हतप्रभः॥७७॥
विसंज्ञो ज्वरवेगार्तः सक्रोध इव वीक्षते।
सदोषशब्दं च शकृद्द्रवं सृजति वेगवत्॥७८॥

स०-दोषो-वाताद्यन्यतमो, धातून्-रसादीन्, प्रक्षोभयन्-चण्डपवनोद्धूतमहाजलाशयानिव कुर्वन्, ज्वरमोक्षकाले विलीयते। विलीयमानदोषवशात् नरः श्वसन्, तथा स्विद्यन्-रोमकूपेभ्यो जलं स्रवन्, तथा कूजन्-अव्यक्तं शब्दं कुर्वन्, वमति-छर्दयति, तथा चेष्टते-भूमिशय्यादौ परिलुण्ठति, वेपते-कम्पते लतेव चलति, प्रलपति-असम्बद्धं ब्रूते, तथा हतप्रभो-नष्टकान्तिः, उष्णैः शीतैश्चाङ्गैस्तुल्यकालमुपलक्षितो भवति। चशब्दोऽत्र तुल्यकालार्थः। तुल्यकालं तस्य कानिचिदुष्णान्यङ्गानि कानिचिच्छीतानि। विगता संज्ञा यस्यासौ विसंज्ञः, तथा ज्वरवेगार्तः सक्रोध इव वीक्षते-सरोष इवालोकनं करोति, तथा शकृत्-पुरीषं, विमुञ्चति। किम्भूतं शकृत्? दोषश्च शब्दश्च दोषशब्दौ, सह ताभ्यां वर्तते सदोषशब्दम्। दोषशब्देनेहामो विवक्षितः, सामं सस्वनं चेत्यर्थः। तथा, द्रवं-अकठिनम्। तथा वेगोऽस्यास्तीति वेगवत्, इति सवेगं कृत्वा शकृत्सृजति।

आ० र०- ज्वरमोक्षलक्षणमह-धातूनिति। प्रक्षोभयन्चालयन्। चेष्तते-सव्यापसव्येन। उष्णैः शीतैश्च-कानिचिदुष्णानि कानिचिच्छीतानि। सदोषं सशब्दं च। दोषः-आमः पित्तं श्लेष्मा वा \ वेगवत्-वेगैर्युक्तं, पुनरित्यर्थः।

इति ज्वरमोक्षकाललक्षणमुक्त्वा विगतज्वरलक्षणमभिधित्सुराह-

देहो लघुर्व्यपगतक्लममोहतापः
पाको मुखे करणसौष्ठवमव्यथत्वम्।
स्वेदः क्षवः प्रकृतियोगि मनोऽन्नलिप्सा
कण्डूश्च मूर्ध्नि विगतज्वरलक्षणानि॥७९॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां तृतीये निदानस्थाने ज्वरनिदानं नाम द्वितीयोऽध्यायः॥२॥

****

स०-तस्य विगतज्वरस्य नरस्यैतानि लक्षणानि। यथा-देहो लघुर्भवति-न तु गात्रे गौरवम्। तथा, व्यपगताः-नष्टाः, क्लममोहतापा यस्यासौ व्यपगतक्लममोहतापस्तदा स सम्पद्यते। तथा, अस्य मुखे-वदने, पाकः। करणानां-चक्षुरादीनां, सौष्ठवं-पाटवं, जायते। तथा, अव्यथत्वादयोऽस्य भवन्ति। प्रकृत्या योगः प्रकृतियोगः,-स्वभावेन सम्बन्धः। प्रकृतियोगो यस्यास्ति मनसस्तत् प्रकृतियोगि। यादृग्यस्य चित्तं पूर्वं रजोबहुलं तमोबहुलं वा आसीत् तादृक् तस्य सम्पद्यत इत्यर्थः। तथा, अन्नलिप्सा-अन्नाभिलाषः। सङ्ग्रहे च नक्षत्रसमाश्रयणेन च साध्यासाध्यज्वरलक्षणमुक्तम्। यथा (नि. अ. १)-"आधानजन्मनिधनप्रत्यराख्यविपत्करे। नक्षत्रे व्याधिरुत्पन्नः क्लेशाय मरणाय वा॥ज्वरास्तु जातः षड्रात्रादश्विनीषु निवर्तते। भरणीषु तु पञ्चाहात्सप्ताहात्कृत्तिकासु च॥त्रिसप्तरात्रादथवा रोहिण्यामष्टरात्रतः। एकादशाद्वा दिवसान्मृगे षण्णवरात्रयः॥पञ्चाहान्मृत्युरार्द्रायां त्रिपक्षे संशयोऽथवा। पुनर्वसौ प्रवृत्तस्तु ज्वरोऽपैति त्रयोदशात्॥दिवसात्सप्तविंशाद्वा ह्यहात्सप्ताहतोऽथवा॥पुष्ये श्लेषासु मरणं चिरेणाऽपि मघासु च॥अवश्यं स्वास्थ्यमाप्नोति द्वादशाहान्मृतो न चेत्। फल्गुन्योः पूर्वयोर्मृत्युरन्ययोस्तु दिनेऽष्टमे॥नवमेऽह्न्येकविंशे वा ज्वरः सौम्यत्वमृच्छति। हस्तेन सप्तमे शान्तिश्चित्रायामष्टमेऽथवा॥पुनश्चित्रागमे स्वातौ दशाहादथवा त्रिभिः। पक्षैर्मृत्युं विशाखासु द्वाविंशेऽहनि निर्दिशेत्॥नवमेऽह्नि न चेच्छान्तिर्मैत्रे मृत्युस्ततः परम्। ज्येष्ठायां पञ्चमे मृत्युरूर्ध्वं वा द्वादशात्सुखम्॥स्वास्थ्यं दशाहान्मूलेन त्रिसप्ताहेऽथवा गते। पूर्वाषाढासु नवमे ततोऽन्यासु तु मासतः॥अष्टाभिरथवा मासैर्नवभिर्वा भवेच्छिवम्। [ज्वरस्तु श्रवेणे याति शान्तिमेकादशाहतः॥] आज्येष्ठाहाद्धनिष्ठासु दशाहाद्वारुणेषु तु। षडहे द्वादशाहे वा

मृत्युर्भाद्रपदासु च॥उत्तरासु द्विसप्ताहात् प्रशमो, रेवतीषु च। चतूरात्रेऽष्टरात्रे वा क्षेममित्याह हारितः॥" इति। ज्वर इत्युपलक्षणम्। प्रायः सर्वो व्याधिरनया दिशाऽनुसृतो बोध्यः क्षिप्रचिरमोक्षाय जीवितान्ताय वा। आधानं-जन्मर्क्षाद्दशमं नक्षत्रम्। विपत्करं-तृतीया तारा। प्रत्यरं-पञ्चमी। निधानसंज्ञा-सप्तमी तारा स्मृतेति। अथ, किं नक्षत्रसमाश्रयेणेन ज्वरस्य साध्यासाध्यविभागोऽङ्गीक्रियतामुत यथानिदानं कुपितदोषलक्षणेन ? ब्रूमः। उभयथाऽपि। यतो नक्षत्रं त्रिविधमपि प्राक्तनस्य कर्मणो दैवाख्यस्य शुभरूपस्याशुभरूपस्य शुभाशुभरूपस्य च सौम्यक्रूरमध्यस्वभावसूचकम्। तत्र सौम्येन नक्षत्रेण शुभं, क्रूरेणशुभं, मध्यस्वभावेन च शुभाशुभम्। एतद्युक्तं भवति,-पुरातनकर्मवशान्नक्षत्रेण ज्वर उत्पद्यते, ऐहिककर्मवशान्मिथ्याहारसेवनाख्याद्यथानिदानं वातादिकुपितलक्षणेन च। तदनयोर्बलाबलेन ज्वरस्य साध्यासाध्यविभागो व्यवस्थाप्यः। प्रत्यपादि च मुनिभिः। यथा (च. वि. अ. ३) -"कदाचित्कर्मणो बलवत्त्वं कदाचित्पुरुषकारस्य" इत्युभयथा ज्वरस्य साध्यासाध्यविभागो न्याय्यः।

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टाङ्गहृदयटीकायां सर्वाङ्गसुन्दराख्यायां तृतीये निदानस्थाने ज्वरनिदानं नाम द्वितीयोऽध्यायः समाप्तः॥२॥

आ० र०- ज्वरमुक्तलक्षणमाह-देह इति। करणानि-इन्द्रियाणि। मनः प्रकृतियोगि-प्रकृतिस्थम्।

इति हेमाद्रिटीकायामायुर्वेदरसायने।

ज्वरनिदानं द्वितीयं समासे(सामस्त्ये) न निरूपितम्॥

****

तृतीयोऽध्यायः।

ज्वरनिदानादनन्तरं रक्तपित्तनिदानमारभ्यते। यतो ज्वर ऊष्मणा विना न सम्भवति, पित्तं च विना न कदाचिदूष्मा। तस्माज्ज्वरनिदानादूर्ध्वं रक्तपित्तनिदानमिदानीमारब्धुं युक्तमित्याह-

अथातो रक्तपित्तकासनिदानं व्याख्यास्यामः।

इति ह स्माहुरात्रेयादयो महर्षयः।

(गद्यसूत्रे॥२॥)

स०-व्याख्याऽस्य पूर्ववत्।

भृशोष्णतीक्ष्णकट्वम्ललवणादिविदाहिभिः।

कोद्रवोद्दालकैश्चान्नैर्युक्तैरतिसेवितैः॥१॥

कुपितं पित्तलैः पित्तं द्रवं रक्तं च मूर्च्छिते।

ते मिथस्तुल्यरूपत्वमागम्य व्याप्नुतस्तनुम्॥२॥

स०-भृशशब्दस्योष्णादिभिर्विदाह्यन्तैः सम्बन्धः। आदिशब्देनात्र क्षारादयो गृह्यन्ते। भृशोष्णादिभिरन्नैः पित्तलैरतिसेवितैर्द्रवं-द्रवस्वभावं, यत् पित्तं तत् कुपितं-दुष्टं, तथा रक्तं कुपितं, तैरेवातिसेवितैः। अतिसेवनं चोभयता भवति,-चिरकालमभ्यवहृतैस्तथाऽतिमात्राभ्यवहृतैः। न केवलमेतैर्यावत् कोद्रवोद्दालकैश्चान्नैः। तदित्यनेन भृशोष्णादीनि परामृश्यन्ते। तैर्युक्तैः-मिश्रितैः कोद्रवोद्दालकैश्चान्नैरतिसेवितैः कुपितं पित्तं तथा रक्तं च भवति। ते-द्वे अपि रक्तपित्ते, मूर्च्छिते-मिश्रतां गते, मिथः-परस्परं, तुल्यरूपत्वं-समवर्णत्वं, आगम्य-प्राप्य, सर्वां तनुं-देहं, व्याप्नुतो-व्यश्नुवाते। ननु, भृशोष्णादीनां पित्तलत्वाव्यभिचारात् किमर्थं पित्तलैरित्युक्तम्? ब्रूमः। दाडिमामलकसैन्धवेष्वम्लवणादिषु व्यभिचारात्। तथाहि-दाडिमामलक-सैन्धवान्यम्लवणान्यपि पित्तं न कुरुते। अपि च न केवलं भृशोष्णादियुक्तैः कुपितं पित्तं रक्तं च। यावदन्यैरपि पित्तलैरभृशोष्णादिस्वभावैर्व्रीहिप्रभृतिभिरतिसेवितैः कुपितं पित्तं चेति प्रतिपादनार्थं पित्तलैरित्युक्तम्। ननु, एवं सति पित्तलैरित्येव निर्देशः कर्तुं युक्त उभयानुग्रहार्थः। तथा च भृशोष्णादीनि तथाऽन्यान्यप्यभृशोष्णादीनि व्रीहिप्रभृतीन्येवं गृहीतानि भवन्ति। अस्त्येवैतत्। किन्तु पित्तलत्वसामान्याद्गृहीतानामपि भृशोष्णादीनामुपादानं

कृतमतिशयद्योतनार्थम्। यथा भृशोष्णादीन्यतिशयेन पित्तं रक्तं च कोपयन्ति, न तथाऽन्यानि व्रीहिप्रभृतीनि। अत एव कोद्रवोद्दालकौ शीतवीर्यावपि भृशोष्णादिद्रव्ययुतौ पित्तस्य कर्तारौ भवतः। भृशोष्णादीनामतिपित्तलत्वात्। ननु, पित्तस्य द्रवमिति विशेषणमयुक्तम्, व्यभिचाराभावात्। तथा च तन्त्रकृज्जगौ (हृ. सू. अ. १।११)-"पित्तं सस्नेहस्तीक्ष्णोष्णं लघु विस्रं सरं द्रवम्।" इति। अत्रोच्यते। पित्तमद्रवमप्यस्ति। कथं ज्ञायते ? ग्रन्थकारवचनात्। तथा चोवाच तन्त्रकृत् (हृ. सू. अ. १२।९०)-"पित्तं पञ्चात्मकं तत्र पक्वामाशयमध्यगम्। पञ्चभूतात्मकत्वेऽपि यत्तैजसगुणोदयात्॥त्यक्तद्रवत्वं" इत्यादि। तस्मात् यद्द्रवरूपं पित्तं तद्भृशोष्णादिभिः कुपितं रक्तपित्ते कारणम्, न पुनर्यत् त्यक्तद्रवत्वं-कठिनतां प्राप्तं, इति प्रतिपादयितुं द्रवग्रहणम्।

आ० र०- अथ रक्तपित्तप्रकरणम्। तत्र निदानमाह-भृशोष्णेत्यादि। भृशोष्णाद(द्य)न्यविदाहित्वं च मिलितं कारणम्। कोद्रवाः-कोरदूषाः, उद्दालकाः-वन्याः, तेषां तद्युक्तानाम्विदाहियुक्तानां, कारणत्वम्। "कोद्रवं हन्त्यसृक्पित्तं करोत्येव विदाहिभिः।" इति वचनात्। अन्नैरित्यदनेन हेतुत्वम्, न बहिर्लेपादिना। पूर्वं पित्तलैः कुपितं पश्चाद्भृशोष्णाभिर्वेदितम्। द्रवग्रहणं पाचकपित्तनिवृत्त्यर्थम्।

सम्प्राप्तिमाह-ते मिथ इति। ते-पित्तरक्ते। तुल्यरूपत्वं-रक्तवर्णत्वं तुल्यगुणात् कदाचिद्धरितादिवर्णत्वमपि।

ननु, यदि तुल्यरूपत्वं पित्तरक्ते प्राप्ते, तत्कथमीदृशो निर्देश उपपद्यते ? " अधोगं यापयेद्रक्तं" (हृ. चि. अ. २।२) इति। एवमादौ हि रक्तस्य पित्तसहितस्यैव निर्देशो युक्तो "रक्तपित्तमधोगं यापयेत्" इति। एवमाशङ्क्याह-

पित्तं रक्तस्य विकृतेः संसर्गाद्दूषणादपि।
गन्धवर्णानुवृत्तेश्च रक्तेन व्यपदिश्यते॥३॥

स०-पित्तं रक्तेन व्यपदिश्यते। यस्मात् पित्तं रक्तस्य विकृतिः-विकारो, रक्तादुत्पन्नमित्यर्थः। तथा चोक्तम् (हृ. शा. अ. ३।६३)-"कफः पित्तं मलाः स्वेषु प्रस्वेदो नखरोम च। स्नेहोऽक्षित्वग्विशामोजो धातूनां क्रमशो मलाः॥" इति। तथा, संसर्गात्-अन्योन्यमिश्रीभावात्। तथा, दूषणादपि-यस्माद्रक्तं पित्तेनाश्वेछ दूष्यते, तथा रक्तदूषणैः

पित्तमपि दूष्यते, तात्स्थ्यात्। तथा च ग्रन्थः (ह्र. सू. अ. ११।२७)-"यदेकस्य तदन्यस्य वर्द्धनक्षपणौषधम्।" इति। अन्ये तु धातवो न तथा दूष्यन्ते यथा पित्तम्। तथा चोक्तम् (ह्र. सू. अ. ११।२६)-"तत्रास्थिनि स्थितो वायुः पित्तं तु स्वेदरक्तयोः।" इति। तथा, गन्धवर्णानुवृत्तेश्च। गन्धश्च वर्णश्च गन्धवर्णौ, तयोरनुवृत्तिः-अनुकरणं गन्धवर्णानुवृत्तिः। कस्य गन्धवर्णौ ? प्रकृतत्वाद्रक्तस्य यादृशौ गन्धवर्णौ तादृशावपि पित्तस्य। एवं च रक्तेन तत् व्यपदिश्यते। तस्मात् " अधोगं यापयेद्रक्तं" इत्यादिनिर्देशो युक्त एव।

आ० र०- रक्तपित्तस्य रक्तत्वे वाच्ये हेतुमाह-पित्तं रक्तस्येति। रक्तस्य कार्यं दूषणं च रक्तेन संस्पृष्टं सदृशं चेति चतुष्टयं हेतुः। "कफः पित्तं *मलाः खेशु" (ह्र.शा.अ. ३१६३) इति रक्तमलत्वात्कार्यत्वम्। योगरूढिरियम्। योगस्य पित्तेऽपि तुल्यत्वात्।

ननु, रक्तस्य शरीरे स्वाभाविकं प्रमाणमुक्तमष्टावेवाञ्जलयः। प्रकोपमापन्नं त्वाढकादिसङ्ख्यातमपि दृश्यते। तत्कथमेतत् ? इत्याह-

प्रभवत्यसृजः स्थानात्प्लीहतो यकृतश्च तत्।

स०-असृजः स्थानात् तत्-पित्तमूर्च्छितं रक्तं, प्रभवति-प्रकर्षेण भवति वर्धते। तस्माद्बहुत्वमस्य युक्तमेव। किं तदसृजः स्थानम् ? यतस्तत्प्रभवतीत्याह-प्लीहतो यकृतश्चेति।

आ० र०- रक्तोद्गमस्थानमाह-प्रभवतीति। रक्तस्थाने प्लीहयकृती।

अथास्य पूर्वरूपाण्याह-

शिरोगुरुत्वमरुचिः शीतेच्छा धूमकोऽम्लकः॥४॥

छर्दिश्छर्दितवैभत्स्यं कासः श्वासो भ्रमः क्लमः।

लोहलोहितमत्स्यामगन्धास्यत्वं स्वरक्षयः॥५॥

रक्तहारिद्रहरितवर्णता नयनादिषु।

नीलल्लोहितपीतानां वर्णानामविवेचनम्॥६॥

स्वप्ने तद्वर्णदर्शित्वं भवत्यस्मिन् भविष्यति।

स०-शिरोगुरुत्वादिकमस्मिन्-रक्तपित्ते, भविष्यति सति भवति। छर्दिते-वमिते, बैभत्स्यं-जुगुप्सा। स्वप्ने-स्वप्नावस्थायां, तद्वर्णदर्शित्वं-रक्तवर्णाकारं पश्यति।

आ० र०- प्रागूपमाह-शिरोगुरुत्वमिति। छर्दितबैभात्स्यं-जुगुप्सा। आस्ये लोहादीनां गन्धः। तद्वर्णो-रक्तहारिद्रादिः।

तच्च रक्तपित्तं त्रिविधमूर्ध्वगमधोगमुभयमार्गगं च। तत्रोर्ध्वगमाह-

ऊर्ध्वं नासाक्षिकर्णास्यैर्मेढ्रयोनिगुदैरधः॥७॥
कुपितं रोमकूपैश्च समस्तैस्तत्प्रवर्तते।

स०-ऊर्ध्वगं रक्तपित्तं कुपितं नासादिभिः सप्तभिर्द्वारैः प्रवर्तते। अधोगं रक्तपित्तं कुपितं मेढ्रयोनिगुदैस्त्रिभिर्द्वारैः प्रवर्तते। प्राण्यङ्गानां द्वन्द्व एकवदित्यस्य प्रायिकत्वाद्बहुवचनमत्र न दुष्टम्। तथा रोमकूपैः समस्तैः। चशब्दान्नासाक्षिकर्णास्यमेढ्रयोनिगुदैरुभयमार्गमुभयमार्गाभ्यां तत्-रक्तपित्तं, प्रवर्तते।

आ० र०- रूपमाह-ऊर्ध्वमिति। कस्यचिदूर्ध्वं, कस्यचिदधः, कस्यचिद्रोमकूपैः, कस्यचित्समस्तैर्मार्गैः, प्रवर्तते।

ऊर्ध्वं साध्यं कफाद्यस्मात्तद्विरेचनसाधनम्॥८॥
बह्वौषधं च, पित्तस्य विरेको हि वरौषधम्।
अनुबन्धी कफो यश्च तत्र तस्यापि शुद्धिकृत्॥९॥
कषायाः स्वादवोऽप्यस्य विशुद्धश्लेष्मणो हिताः।
किमु तिक्ताः कषाया वा ये निसर्गात्कफापहाः॥१०॥

स०-ऊर्ध्व-ऊर्ध्वगं रक्तपित्तं, साध्यम्। यस्मात्कारणात् कफादधिकाजायते। तच्च विरेचनसाधनम्। साध्यतेऽनेनेति साधनं,-चिकित्सितम्। तच्च-ऊर्ध्वगं रक्तपित्तं, बह्वौषधम्। बहु औषधं यस्य तद्बह्वौषधं,-अनेकसाधनम्, मधुरकषायतिक्तद्रव्यसाध्यत्वात्। अपिच, यस्माद्विरेकः पित्तस्य वरौषधम्। तथा चोक्तम्(च. सू. अ. २५।४०)-"विरेचनं पित्तहराणाम्।" इति। यश्च [तत्र-] तस्मिन्नूर्ध्वगे रक्तपित्ताख्ये व्याधौ, कफोऽनुबन्धी। तस्य-अनुबन्धिनः कफस्य, विरेचनं शुद्धिकृत्-शोधनं करोति। अतो हेतोरूर्ध्वगं रक्तपित्तं साध्यम्। कषायाः-स्वरसकल्कश्रृतशीतफाण्टाख्याः, ते स्वादवोऽपि हिताः, व्याधिप्रतिपक्षत्वात्। न तु दोषप्रतिपक्षताद्वारेण, दोषसमानत्वात्तेषाम्। अथवा केचन मकुष्ठतण्डुलीयादिसम्बन्धिनो व्याधिप्रतिपक्षास्तथा रूक्षत्वाद्दोषप्रतिपक्षा इति श्लेष्मणोऽपि हिताः। अपिशब्दात्तिक्तादयोऽपि। विशुद्धो-वाताद्यदूषितः, श्लेष्मा यस्य स तस्य। किमु-किंपुनः, तिक्ताः कषायाश्च ये स्वरसादयस्तेऽप्यस्य-ऊर्ध्वगस्य रक्तपित्ताख्यस्य व्याधेरथवा तद्वतो नरस्य विशुद्धश्लेष्मणो, हिताः। व्याधिप्रतिपक्षत्वाद्दोषप्रतिपक्षत्वाच्च ये निसर्गात्-स्वभावात्, कफघ्नाः।

आ० र०- ऊर्ध्वगस्य साध्यत्वमाह-उर्ध्वं साध्यमिति। कफजत्वं विरेच्यत्वं शमनबाहुल्यं च साध्यत्वे हेतुः।

विरेच्यत्वस्य हेतुत्वे युक्तिमाह-पित्तस्येति। पित्तमुत्पादकं, कफोनुबन्धी-निर्वाहकः। हह्वौषधत्वं दर्शयति-कषाया इति।

अधो याप्यं चलाद्यस्मात्तत्प्रच्छर्दनसाधनम्।
अल्पौषधं च पित्तस्य वमनं न वरौषधम्॥ ११॥
अनुबन्धी चलो यश्च शान्तयेऽपि न तस्य तत्।
कषायाश्च हितास्तस्य मधुरा एव केवलम्॥ १२॥

स०-अधो याप्यं-अधोगं रक्तपित्तं याप्यम्। कस्मात्? यस्माच्चलात्-वातादधिकात्, 'उत्पद्यते' इत्यध्याहार्यम्। तच्च-अधोगं रक्तपित्तं, प्रच्छर्दनसाधनम्। प्रच्छर्दनं-वमनं, साधनं-चिकित्सितं, यस्य तदेवम्। तथा, अल्पमौषधं-चिकित्सितं, यस्य तदल्पौषधम्,

नोर्ध्वगरक्तपित्तवद्बह्वौषधम्। कथम्? इत्याह-यस्मादयं रोगः पित्तप्रधानः। पित्ते च वमनं न वरौषधं-श्रेष्ठमौषधं न भवति। कफे हि वमनं प्रधानमुक्तम्। अल्पौषधत्वे द्वितीयं हेतुमाह-कषायाश्चेत्यादि। तस्य-अधोगस्य रक्तपित्तस्य, मधुरा एव केवलं कषाया हिताः-पथ्याः, न तिक्ताः कषायाश्च, तेषां वातकोपकारणत्वात्। तथा, अस्य चलो-वायुः, योऽनुबन्धी-अनुबलत्वेन स्थितः, तस्यापि वायोर्न तत्-वमनं, शान्तये-शान्त्यर्थम्।

आ० र०- अधोगस्य याप्यत्वमाह-अधो याप्यमिति।

कफमारुतसंसृष्टमसाध्यमुभयायनम्।
अशक्यप्रातिलोम्यत्वादभावादौषधस्य च॥ १३॥
न हि संशोधनं किञ्चिदस्त्यस्य प्रतिलोमगम्।
शोधनं प्रतिलोमं च रक्तपित्ते भिषग्जितम्॥ १४॥
एवमेवोपशमनं सर्वशो विद्यते।
संसृष्टेषु हि दोषेषु सर्वजिच्छमनं हितम्॥ १५॥

स०-उभयायनं-मार्गद्वयप्रपन्नं, कफमारुतसंसृष्टमसाध्यं-साधयितुमशक्यम्।

असाध्यत्वे हेतुद्वयमाह-अशक्यप्रातिलोम्यत्वादित्यादि। अनुलोमविपरीतः-प्रतिलोमः, तस्य भावः प्रातिलोम्यम्। अशक्यं-कर्तुमशक्यं प्रातिलोम्यं यस्य रक्तस्य तदशक्यप्रातिलोम्यम्। तस्य भावोऽशक्यप्रातिलोम्यत्वम्। तस्मादुभयायनं रक्तपित्तमसाध्यम्। अभावादौषधस्य च,-एतद्योग्यौषधासम्पत्तेश्चैतदसाध्यम्।

ननु, कथमेवमुच्यते? इत्याह-न हीत्यादि। हि-यस्मात्, तदस्य संशोधनं प्रतिलोमगं न किञ्चिदस्ति। यच्च प्रतिलोमगं संशोधनं तद्रक्तपित्ते भिषग्जितं-औषधम्। तच्च तथाभूतमौशधं न सम्भवति यत्तत्र संशमनार्थं दीयते। यद्यधोमार्गापेक्षया दीयते तदानीमूर्ध्वभागप्रवृत्तं रक्तं प्रवृद्धं सम्पद्यते। अथोर्ध्वमार्गापेक्षया विरेचनमुपयुज्यते तदाऽधोगं रक्तपित्तं वर्द्धते। एवमस्य

प्रतिलोमगमौषधं शोधनं न सम्भवति। तस्मादौषधस्याभावः। भिषग्जितमिति भिषक्शब्दात् कण्ड्वादियगन्तान्निष्ठा इट्व। स्वभावाच्चायं भेषजवाची।

ननु, उभयायनस्य रक्तपित्तस्य संशोधनरूपमौषधं मा भवतु। शमनरूपं त्वौषधमस्य शमाय भविष्यतीति "अभावादौषधस्य च" इत्ययुक्तमुदितम्, इत्याशङ्क्याह-एवमेवेत्यादि। यथा शोधनमस्य-उभयायनस्य, शमनाय न सम्भवति तथा शमनमपि यदौषधं तदप्येतस्य शमनं न सम्भवति।

कुतो हेतोः ? इत्याह-संसृष्टेष्वित्यादि। हि-यस्मात्, संसृष्टेषु त्रिषु दोषेषु यत्सर्वजिच्छमनं तद्धितम्। तच्च सन्तर्पणापतर्पणरूपत्वाद्विविधम्। तत्र यदि सन्तर्पणं बृंहणं शमनमधोमार्ग-प्रवृत्तरक्तपित्तदोषापेक्षया मारुतशान्त्यर्थमुपयुज्यते तदा तच्छान्तिं कुर्वतो रक्तपित्तविकार-करणस्य श्लेष्मणो वृद्धये सम्पद्यते। अथापतर्पणमूर्ध्वभागप्रवृत्तदोषापेक्षया कफशान्त्यर्थमुपयुज्यते तदानीं तस्य शान्तिं कुर्वतोऽधोगरक्तपित्तस्य कारणं वायुं प्रकोपयेत्। न चोभयात्मकमेकं नृसिंहरूपवत् शमनमस्ति यत्प्रयोजितमुभयायनस्य शमनाय स्यात्। तस्मादुभयायनमसाध्यम्।

आ० र०- ऊर्ध्वाधोगस्य असाध्यत्वमाह-कफमारुतसंसृष्टमिति।

तत्र दोषानुगमनं सिरास्त्र इव लक्षयेत्।

स०-तत्र-तस्मिन् रक्तपित्ते, दोषानुगमनं-वातपित्तश्लेष्मणामनुबन्धं, सिरास्त्र इव-सिराव्यधविध्युक्तम् (हृ. सू. अ. २७।४०)-"वाताच्छ्यावारुणं रूक्षं" इत्यादिग्रन्थनिर्दिष्टेन लक्षणेन लक्षितं, लक्षयेत्।

आ० र०- अनुबोधिदोषज्ञानोपायमाह-तत्रेति। सिरास्त्र इव-सिराव्यधदर्शितेन लक्षणेन।

उपद्रवाश्चं विकृतिज्ञानतस्तेषु चाधिकम्॥१६॥

आशुकारी यतः कासस्तमेवातः प्रवक्ष्यति।

स०-उपद्रवांश्च विकृतिज्ञानतो लक्षयेदिति योज्यम्। विकृतिज्ञानशब्देन विकृतिविज्ञानीयः (हृ. शा. अ. ५) उपलक्ष्यते।

तेषु च-उपद्रवेषु मध्ये, यः कासाख्य उपद्रवः स आशुकारी-क्षिप्रं मारयति, यतोऽतस्तमेव रक्तपित्तनिदानानन्तरं प्रकर्षेण निदानप्राग्रूपादिभिर्वक्ष्यति-भणिष्यति, तन्त्रकृत्।

आ० र०- विकृतिविज्ञानीयोक्तमसाध्यलक्षणं स्मारयति-उपद्रवांश्चेति। (हृ.शा.अ. ५१७४)-"रक्तपित्तं भृशं रक्तं कृष्णमिन्द्रधनुष्प्रभम्। ताम्रहारिद्रहरितं रूपं रक्तं प्रदर्शयेत्॥ रोमकूपप्रविसृतं कण्ठास्यहृदये सजत्। वाससोऽरञ्जनं पूति वेगवच्चाति भूरि च॥ वृद्धं पाण्डुज्वरच्छर्दिकासशोफातिसारिणम्।" इति। रुग्विनिश्चये तु (मा. नि. रक्त.श्लो. ११)-"दौर्बल्यश्वासकासज्वरवमथुमदाः पाण्डुतादाहमूर्च्छा भुक्ते घोरो विदाहस्त्वधृतिरपि सदा हृद्यतुल्या च पीडा। तृष्णा कण्ठप्रभेदः शिरसि च तपनं पूतिनिष्ठीवनत्वं भक्तद्वेषाविपाकौ विकृतिरपि भवेद्रक्तपित्तोसर्गात्॥ मांसप्रक्षालनाभं क्वथितमिव च यत् कर्दमाम्भोनिभं वा मेदःपूयास्रकल्पं यकृदिव यदि वा पक्वजम्बूफलाभम्। यत्कृष्णं यच्च नीलं भृशमतिकुणपं यत्र चोक्ता विकारास्तद्वर्ज्यं रक्तपित्तं सुरपतिधनुषा यच्च तुल्यं विभाति॥' इति। कूणपं-शवगन्धि यत्। इति रक्तपित्तनिदानम्।

पञ्च कासाः स्मृता वातपित्तश्लेष्मक्षतक्षयैः॥ १७॥

स०-पृथग्दोषैस्त्रयः क्षयेणैक इति कासाः पञ्चैव स्मृताः। ननु, यदि पञ्चैव कासास्तत्कथं भणिष्यति? (हृ. चि. अ. ३। १)-"केवलानिलजं कासं स्नेहैरादावुपाचरेत्।" इति। न ह्यन्यदोषयुक्तो वातिकः कासोऽभिहितः। अपि तु त्रिभिरपि दोषैः पृथगेवोक्ताः कासाः। तथा, (हृ. चि. अ. ३।२५)-"पित्तकासे तु सकफे वमनं सर्पिषा हितम्।" तथा, (हृ. चि. अ. ३।२७)-"पित्तकासे तनुकफे त्रिवृतां मधुरैर्युताम्। युञ्ज्याद्विरेकाय युतां घनश्लेष्मणि तिक्तकैः॥" इत्यादि। तथा, अस्मिन्नेवाध्यायेऽध्येष्यते (श्लो. ३७)-"साध्या दोषैः पृथक् त्रयः। मिश्रा याप्या द्वयात्" इति। तदेतत्पूर्वापरव्याहतमिव। अत्रोच्यते। कासाः पञ्चैव वक्ष्यमाणया सम्प्राप्त्या जायन्ते, वस्तुस्वाभाव्यात्। अनन्तरं वातिककासे कदाचिदाहारविहारवशात् पित्तेनानुबन्धः कदाचित् श्लेष्मणा जायते। पित्तकासे तथैवाहारविहारवशात् कदाचिद्वातेनानुबन्धः

कदाचिच्छ्लेष्मणेति। कफकासेऽपि तद्वदाहारविहारवशात् वातेनानुबन्धः कदाचित्पित्तेन। इति किञ्चिदत्र पूर्वापरव्याहतत्वम्।

आ० र०- अथ कासप्रकरणम्। तत्र कासभेदानाह-पञ्च कासा इति।

क्षयायोपेक्षिताः सर्वे

स०-सर्व एव कासा उपेक्षिताः-चिकित्सां विना, क्षयाय सम्पद्यन्ते, उत्तरोत्तरक्रियावस्थाकर्षणात्। क्षयजोऽप्युपेक्षितः क्षयायैवेति बोध्यम्।

आ० र०- पञ्चानां क्षयहेतुत्वमाह-क्षयायेति।

बलिनश्चोत्तरोत्तरम्।

स०-उत्तरोत्तरं चैते कासा बलिनः।

आ० र०- पञ्चानामुत्तरोत्तरं दुःसाध्यत्वमाह-बलिनश्चेति।

तेषां कासानां पूर्वरूपमाह-

तेषां भविष्यतां रूपं कण्ठे कण्डूररोचकः॥ १८॥

शूकपूर्णाभकण्ठत्वम्

स०-तेषां-कासानां, भविष्यतां उत्पित्सूनां, गले कण्डूः-खर्जूः, तथाऽरोचकः, तथा शूकपूर्णसदृशकण्ठत्वं च भवति।

आ० र०- पूर्वरूपमाह-तेषामिति। सङ्ग्रहे तु (नि.अ.३)-"अस्वास्थ्यं हृदयस्य च।" इत्यधिकम्।

अधुना सर्वकासानां सम्प्राप्तिं दर्शयति-

तत्राधो विहतोऽनिलः।
ऊर्ध्वं प्रवृत्तः प्राप्योरस्तस्मिन् कण्ठे च संसजन्॥ १९॥
शिरःस्रोतांसि सम्पूर्य ततोऽङ्गान्युत्क्षिपन्निव।
क्षिपन्निवाक्षिणी पृष्ठमुरः पार्श्वे च पीडयन्॥ २०॥
प्रवर्तते स वक्त्रेण भिन्नकांस्योपमध्वनिः।

स०-तत्र-तेषु कासेषु, अनिलोऽधः-अधस्तात्, विहतो-विशेषेणात्यर्थं हतः, ऊर्ध्वं प्रवृत्तोऽनन्तरं क्रमेणोरो-हृदयं, प्राप्य तस्मिन्-उरसि, संसजन्-अभिष्वजमानः, तथा कण्ठेऽपि संसजन्, अनन्तरं शिरस्रोतांसि सम्पूर्य-मस्तकशिरा आद्माप्य, ततः-अनन्तरम्, अङ्गानि-सर्वानवयवान्, उत्क्षिपन्निव-ऊर्ध्वं प्रेरयन्निव, तथाऽक्षिणी क्षिपन्निव-बहिरिव शरीरात्प्रेरयन्, तथा पृष्ठमुरश्च पार्श्वे च पीडयन्, सः-वायुः, वक्त्रेण प्रवर्तते। किम्भूतः ? भिन्नकांस्योपमध्वनिः, भिन्नं-भग्नं, यत् कास्यं तत्तुल्यशब्दः।

आ० र०- सम्प्राप्तिमाह-तत्राध इति। सङ्ग्रहे तु (नि.अ.३) -"कषायविज्वलासात्म्यकट्वम्लमधुरोषणैः। रूक्षशीतगुरुस्निग्धक्लेदपिर्युषिताशनैः॥ धारणोदीरणायासरात्र्यहःस्वप्नजागरैः। अन्यैश्च तद्विधैर्धातुक्षयावरणकारिभिः॥ क्रुद्धः प्रतिहतोऽपाने यदाऽपानः प्रवर्तते। ऊर्ध्वं रसस्य स स्थाने तिष्ठन्नुरसि पीड्यते॥ उदानेन सजंस्तत्र कण्ठे चानुप्रपूर्य च। वाहिनीर्गलर्मूर्धस्थास्ततोङ्गान्युत्क्षिपन्निव॥ क्षिपन्निवाक्षिणी पृष्टमुरः पार्श्वे च पीडयन्। विवृतत्वान्मुखेनैति भिन्नकांस्योपमध्वनिः॥ यस्मात्तस्मात्स वर्णौजोबलमांसक्षयावहः।' इति।

ननु, कथमेकरूपायां काससम्प्राप्तौ सत्यामनेकरूपता कासरुग्ध्वनीनां जायते ? इत्याह-

हेतुभेदात्प्रतीघातभेदो वायोः सरंहसः॥२१॥

यद्रुजाशब्दवैषम्यं कासानां जायते ततः।

स०-हेतुभेदात्-निदानविशेषात्, काससम्प्राप्तौ वर्तमानस्य वायोः प्रतीघातभेदः-प्रत्याहारविशेषः। किम्भूतस्य वायोः ? सरंहसो-वेगवतः। यत्-यस्मात्, ततः-तस्मात्, रुजाशब्दयोः-शूलध्वन्योः, वैषम्यं-न समता, कासानां जायते। अन्यादृशौ रुक्शब्दौ वातकासे, अन्यादृशावन्येषु कासेषु।

आ० र०- सम्प्राप्त्यैक्येऽपि कासभेदे युक्तिमाह-हेतुभेदादिति। यद्यपि पञ्चानां कासानां वायुरेव समवायिकारणम्, तथाऽपि निमित्तकारणानां पित्तादीनां भेदाद्वायोः प्रतीयते भेदः। पित्तेन कफेन उरःक्षतेन धातुजक्षयसङ्कुचितैः स्रोतोभिर्योऽन्यथा प्रतिहन्यते प्रतिघातभेदात्। शूलभेदः शब्दभेदश्च कासानां भेदकः। यत्-यस्मात्।

अधुना वातकासस्य निदानादिनिर्देशार्थमाह-

कुपितो वातलैर्वातः शुष्कोरःकण्ठवक्कताम्॥२२॥

हृत्पार्श्वोरःशिरःशूलं मोहक्षोभस्वरक्षयान्।

करोति शुष्कं कासं च महावेगरुजास्वनम्॥२३॥

सोऽङ्गहर्षी कफं शुष्कं कृच्छ्रान्मुक्त्वाऽल्पतां व्रजेत्।

स०-वातलैर्वातः कुपितः शुष्कोरःकण्ठवक्कतां हृत्पार्श्वोरःशिरःशूलं मोहक्षोभस्वरक्षयान् करोति। तथा, अतिवेगपीडाशब्दयुतं शुष्कं च कासं करोति। वातलैरिति निर्देशेऽत्यर्थवातलैः कुपितो वायुरिति बोध्यम्। वातिके कासेऽन्येष्वपि हि कासेष्वीषद्वातलैः कुपितस्य वातस्यानुज्ञाऽस्त्येव। कुपितं वातमन्तरेण हि कासानां जन्मासम्भवः। कोपस्तु कोपकारणैर्विना यथायथं दोषाणां न जायते। तस्मादत्रातिवातलैः कुपित इति बोध्यम्। तथा, सः-वायुः, अङ्गं हर्षयति। तथा, कफं शुष्कं कृच्छ्रान्मुक्त्वाऽल्पतां व्रजेत्।

आ० र०- वातकासलक्षणमाह-कुपित इति। कषायविज्जलादिषु यानि वातलानि, तैः कुपितैः। अनयेव पित्तकासे पित्तलैः, श्लेष्मकासे श्लेष्मलैरिति ज्ञेयम्। क्षोभः-शरीरसञ्चलनम्। सः-शुष्ककासः। अङ्गहर्षौ-अङ्गानि कण्टकितानि कुर्वन्।

पित्तात्पीताक्षिकफता तिक्तास्यत्वं ज्वरो भ्रमः॥ २४॥
पित्तासृग्वमनं तृष्णा वैस्वर्यं धूमकोऽम्लकः।
प्रततं कासवेगेन ज्योतिषामिव दर्शनम्॥ २५॥

स०-पित्तात्-पित्तकासात्, पीताक्षिकफतादिकं जायते। ज्योतींषि-तारकाः, तेषां दर्शनमिव।

आ० र०- पित्तकासलक्षणमाह-पित्तादिति।

कफादुरोऽल्परुङ्मूर्द्धहृदयं स्तिमितं गुरु।
कण्ठोपलेपः सदनं पीनसच्छर्द्यरोचकाः॥ २६॥
रोमहर्षो घनस्निग्धश्वेतश्लेष्मप्रवर्तनम्।

स०-कफात्-कफकासात्, उरोऽल्परुगित्यादि जायते। पित्तलैः कुपितात् पित्तात्, तथा श्लेष्मलैः कुपितात् कफात्, इत्यनिर्दिष्टमपि पित्तकफकासयोर्निर्दिष्टं बोध्यम्।

आ० र०- कफकासलक्षणमाह-कफादिति।

इदानीं क्षतकासस्य निदानादि निरूपयति-

युद्धाद्यैः साहसैस्तैस्तैः सेवितैरयथाबलम्॥ २७॥

उरस्यन्तःक्षते वायुः पित्तेनानुगतो बली।

कुपितः कुरुते कासं कफं तेन सशोणितम्॥२८॥

पीतं श्यावं च शुष्कं च ग्रथितं कुथितं बहु।

ष्ठीवेत्कण्ठेन रुजता विभिन्नेनेव चोरसा॥२९॥

सूचीभिरिव तीक्ष्णाभिस्तुद्यमानेन शूलिना।

पर्वभेदज्वरश्वासतृष्णावैस्वर्यकम्पवान्॥३०॥

पारावत इवाकूजन् पार्श्वशूली ततोऽस्य च।

क्रमाद्वीर्यं रुचिः पक्ता बलं वर्णश्च हीयते॥३१॥

क्षीणस्य सासृङ्मूत्रत्वं स्याच्च पृष्ठकटीग्रहः।

स०-युद्धं-बाहुयुद्धं, आद्यं येषां-साहसानां कठिनधनुराकर्षणादीनां, तैः साहसैरयथाबलं-शक्त्यतिक्रमेण, सेवितैः-आचरितैः, उरस्यन्तः-मध्ये, क्षते सति वायुः पित्तेनानुगतः कासं करोति। तैस्तैरिति सर्वनाम्ना दुःशकं हस्त्यश्वादिसाधनं तथोच्चभाषणं गुरुभारोद्यमनं वेगवन्नदीषु प्रतिस्रोतस्तरणादिकमुरःक्षतोत्पादनं गृह्यते। पित्तानुगतमात्रेण च वायोरतिकोपं प्रतिपादयति। अत एवाह-बलीति। पित्तानुगतत्वेनैव स रक्तदूषणं कासं कुर्वन् वायुः, तेन-कासेन, कफं सशोणितं-रक्तयुतं, तथा पीतं कुथितं-पूतिगन्धिं, बहु च ष्ठीवेत्। तथा, कुपितवायुवशात् कफं बहु श्यावं शुष्कं ग्रथितं-पिण्डितं, चष्ठीवेत्। तथा, कण्ठेन रुजता-शूलवता, तथोरसा विभिन्नेनेव-द्विधेव विदीर्णेन, तथा सूचीभिरिव तीक्ष्णाभिस्तुद्यमानेन शूलिना-रुजायुक्तेन, च वक्षसोपलक्षितः पर्वभेदादिमान् पुरुषः, तथा पारावत इवाकूजन्-अव्यक्तं शब्दं कुर्वन्। तथाऽस्य-कासिनः, क्रमेण वीर्यादि हीयते। क्षीणस्य चास्य सासृङ्मूत्रता स्यात् पृष्ठकटीग्रहश्चेति।

आ० र०- क्षतकासलक्षणमाह-युद्धाद्यैरिति। तेन-कासेन, हेतौ तृतीया, कण्ठेनोरसेति करणे। भेदतोदशूलान्युरसः। ततः-सोपद्रवात्कासात्। क्षीणस्य-वीर्यादिहीनस्य।

इदानीं क्षयकासलक्षणं निरूपयति-

वायुप्रधानाः कुपिता धातवो राजयक्ष्मिणः॥३२॥

कुर्वन्तिः यक्ष्मायतनैः कासं ष्ठीवेत्कफं ततः।

पूतिपूयोपमं पीतं विस्रं हरितलोहितम्॥३३॥

लुच्येत इव पार्श्वे च हृदयं पततीव च॥

अकस्मादुष्णशीतेच्छा बह्वाशित्वं बलक्षयः॥३४॥

स्निग्धप्रसन्नवक्त्रत्वं श्रीमद्दशननेत्रता।

ततोऽस्य क्षयरूपाणि सर्वाण्याविर्भवन्ति च॥३५॥

स०-राजायक्ष्मिणो-राजयक्ष्मवतो नरस्य, वायुः प्रधानो-बली, येषां ते वायुप्रधानाः। तथा, कुपिताः-क्रुद्धाः। के ते? धातवो-वातादयः, कासं कुर्वन्ति। कैः कुपिताः? यक्ष्मायनैः-यक्ष्मनिदानोक्तैः साहसादिभिः। ततः-अनन्तरं, पूतिपूयोपमं पीतं विस्रं तथा हरितलोहितं ष्ठीवेत्। तथा, पार्श्वेलुच्येते इव-स्थानात्प्रच्याव्येते इव। हृदयं च पततीव-भ्रश्यतीव। तथा, अस्य-क्षयजकासिनः, अकस्मात्-निमित्तमन्तरेणापि, उष्णशीतेच्छा भवति। कदाचिच्छीतार्तोऽपि नोष्णमभिलषति, कदाचिदत्युष्णक्लान्तोऽपि न शीतमभिलषति। तथा, बह्वाशित्वादयः स्युः। ततः-अनन्तरं, सर्वाणि क्षयरूपाणि-पीनसश्वासादीनि, अस्याविर्भवन्ति।

आ० र०- क्षयकासलक्षणमाह-वायुप्रधाना इति। यक्ष्मायतनैः-राजयक्ष्मनिदानैः कुपिताः। लुच्येते-निष्पीड्यापनीयेते।

इत्येष क्षयजः कासः क्षीणानां देहनाशनः।

याप्यो वा बलिनां, तद्वत् क्षतजोऽभिनवौ तु तौ॥३६॥

सिध्येतामपि सानाथ्यात्

स०-इत्येषः-एवमादिरूपः, क्षयजः कासः क्षीणानां देहनाशनः। बलिनां-अक्षीणानां, याप्यो वा देहनाशनो वेति वाशब्दस्यार्थः। तद्वत्-क्षयजकासवत्। क्षतजः कासः क्षीणानां देहनाशनो बलवतां याप्यो वा देहनाशनो वा भवति। अभिनवौ तु तौ-नवोत्थितौ पुनः क्षयक्षतजकासौ,

बलिनां सिध्येतामपि; न केवलमसाध्ययाप्यावित्यपिशब्देन द्योत्यते। कुतः सिध्येताम्? सानाथ्यात्-चतुष्पात्सम्पत्तेरित्यर्थः।

आ० र०- अथ कासानां साध्यादिभेदाः। तत्र क्षयकासस्य-क्षीणानामिति। क्षीणानामसाध्यः। बलिनां याप्योऽसाध्यो व।

क्षयक्षतकासयोः-अभिनवाविति। सानाथ्यात्-भिषगादिगुणसम्पत्तेः। अपिशब्दात् कदाचित् न सिध्येताम्।

इदानीं शेषाणामपि कासानां साध्ययाप्यविभागं निरूपयति-

साध्या दोषैः पृथक् त्रयः।
मिश्रा याप्या द्वयात्सर्वे जरसा स्थविरस्य च॥ ३८॥

स०-पृथग्दोषैः-वातपित्तश्लेष्मभिः, ये जातास्त्रयः कासास्ते साध्याः। ये पुनरुत्तरकालमाहारविहारादिना मिश्राः-मिश्रलक्षणाः सम्पन्नाः, ते याप्याः। किं सर्व एव मिश्रदोषोत्पन्ना याप्याः? नेत्याह-द्वयात्, -दोषद्वयात्, ये मिश्राः सम्पन्नास्ते याप्याः। न पुनर्दोषत्रयाद्ये मिश्रलक्षणास्तेऽपि याप्या इति द्वयग्रहणात् प्रतिपादयति। सर्वे-कासा ये साध्या उक्ताः पृथग्दोषजास्तेऽपि, जरसा-जरया हेतुभूतया, स्थविरस्योत्पन्ना याप्याः। वृद्धो हि निष्कास एव याप्यानाम्। तथा चोवाच सङ्ग्रहे (सू. अ. १३)-"वृद्धो याप्यानाम्।" इति।

आ० र०- वातकासादित्रयस्य साध्यतामाह-साध्या इति।

द्विदोषाणाम्-मिश्रा याप्या द्वयादिति। द्विदोषत्वं च पश्चादनुबन्धिना दोषेण, द्विदोषजकासानुक्तेः।

सर्वेषां कासानाम्-सर्वे इति। याप्यत्वं स्थविरस्य पुरुषस्य, जरसा जनिता ये कासास्ते याप्याः। आहारविहारजनितास्तु साध्याः। "कासश्वासौ ज्वरच्छर्दितृष्णातीसारशोफिनम्।" इति विकृतौ (ह्.शा.अ. ५१७६)।

कासाच्छासक्षयच्छर्दिस्वरसादादयो गदाः।

भवन्त्युपेक्षया यस्मात्तस्मात्तं त्वरया जयेत्॥ ३८॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां तृतीये निदानस्थाने रक्तपित्तकासनिदानं नाम तृतीयोऽध्यायः॥ ३॥

****

स०-[यस्मात्-] यतः कारणात्, कासादुपेक्षया सहकारिकारणभूतया श्वासादयो रोगा भवन्ति, तस्मात् तं-कासं, त्वरया-शीघ्रमेव, जयेत्। आदिशब्देनात्र पीनसादयो यक्ष्मनिदानोक्ता गृह्यन्त इति।

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टाङ्गहृदयटीकायां सर्वाङ्गसुन्दराख्यायां तृतीये निदानस्थाने रक्तपित्तकासनिदानं नाम तृतीयोऽध्यायः समाप्तः॥ ३ ॥

आ० र०- कासस्यानुपेक्षणीयत्वमाह-कासादिति। इति कासनिदानम्।

[इति हेमाद्रिटीकायामायुर्वेदरसायने।

निदानं रक्तपित्तादि सामस्त्येन निरूपितम्॥ ३॥]

****

चतुर्थोऽध्यायः।

स०-कासनिदानादनन्तरं श्वासनिदानारम्भोऽयं सम्बन्धः। कासादुपेक्षया श्वासो भवति। तथाऽनन्तरमुक्तम्(हृ. नि. अ. ३। ३८)-"कासाच्छ्वासक्षयच्छर्दि" इत्यादि।

तस्माच्छ्वासनिदानारम्भो युक्तः। श्वासेन तु सहैकीकृत्य हिध्मायाः कथने युक्त्या तन्त्रकृत् कारणं वक्ष्यति (श्लो. १८)-"श्वासैकहेतुप्राग्रूप" इत्यादिना।

अथातः श्वासहिध्मानिदानं व्याख्यास्यामः।

इति ह स्माहुरात्रेयादयो महर्षयः।

(गद्यसूत्रे॥२॥)

स०-पूर्ववदेतद्व्याख्येयम्।

अथ श्वासस्य निदानानि लक्षयति-

कासवृद्ध्या भवेच्छ्वासः पूर्वैर्वा दोषकोपनैः।

आमातिसारवमथुविषपाण्डुज्वरैरपि॥१॥

रजोधूमानिलैर्मर्मघातादतिहिमाम्बुना।

स०-कासाधिक्येन श्वासो जायते, इत्येतदस्य प्रधानं निदानम्। तथा, पूर्वैर्वा-सर्वरोगनिदानोक्तैः, वातादिदोषकोपनैः-तिक्तोषणादिभिः। न केवलमेतैर्यावदामातिसारादिभिः। आमातिसारेण वमथुना विषेण पाण्डुरोगेण ज्वरेण च।

आ० र०- अथ श्वासप्रकरणम्। तत्र हेतूनाह-कासवृद्ध्येति। पूर्वैः-सर्वरोगनिदानोक्तैः। रजो-धूलिः।

क्षुद्रकस्तमकश्छिन्नो महानूर्ध्वश्च पञ्चमः॥२॥

स०-श्वासः क्षुद्रकादित्वेन पञ्चविधो भवेत्।

आ० र०- श्वासभेदानाह-क्षुद्रक इति।

अधुना श्वासस्य पञ्चविधास्यापि सम्प्राप्तिमाह-

कफोपरुद्धगमनः पवनो विष्वगास्थितः।
प्राणोदकान्नवाहीनि दुष्टः स्रोतांसि दूषयन्॥ ३॥
उरःस्थः कुरुते श्वासमामाशयसमुद्भवम्।

स०-कफेनोपरुद्धं-स्थगितं, गमनं-मार्गो, यस्य स एवम्। तथा, विष्वगास्थितः-समन्ताद्देहं व्याप्य स्थितः, श्वासं कुरुते। किं कुर्वन्? प्राणाश्चोदकं चान्नं च, तानि वोढुं शीलं येषां तानि स्रोतांसि दूषयन्-दुष्टानि विदधत्। यतो दुष्टः-कुपितः। तथा, उरसि तिष्ठतीत्युरःस्थः। किम्भूतं श्वासम्? आमाशयसमुद्भवम्। आमाशयात् समुद्भवो-जन्म, यस्य तमाशयसमुद्भवम्। शास्त्रकारश्चैवंविधां सम्प्राप्तिं दर्शयन् यदौषधं वातजित् पाचनदीपनं तदत्र शस्तमिति द्योतयति। एवं सर्वरोगाणामपि सम्प्राप्त्यनुरूपमौषधं रोगोपशान्त्यै इति वेद्यम्। पवनो विष्वगास्थित इत्यनेनैवोरःस्थत्वे लब्धे उरःस्थग्रहणं प्रकर्षार्थम्; अतिशयेनोरःस्थितः श्वासं करोतीत्यर्थः।

आ० र०- श्वाससम्प्राप्तिमाह-कफोपरुद्धगमन इति। विष्वक्-सर्वतः, स्वमार्गं हित्वाऽपि।

प्राग्रूपं तस्य हृत्पार्श्वशूलं प्राणविलोमता॥ ४॥
आनाहः शङ्खभेदश्च

स०-तस्य पञ्चविधस्यापि श्वासस्य पूर्वरूपं हृच्छूलादिकं शङ्खभेदावसानम्।

आ० र०- श्वासपूर्वरूपमाह-प्रागूपमिति। विलोमता-विपरीतता।

तत्रायासातिभोजनैः।

प्रेरितः प्रेरयेत् क्षुद्रं स्वयं संशमनं मरुत्॥५॥

स०-तत्र-पञ्चसु श्वासेषु मध्ये, मरुत्-पवनः, आयासातिभोजनैः क्षुद्राख्यं श्वासं करोति। आयासो-व्यायामादिरूपः, तेन तथाऽतिभोजनेन प्रेरितः-प्रकर्षेणेरित उन्मार्गगामीकृतः, कोपित इत्यर्थः। किम्भूतं श्वासम्? स्वयं संशमनं,-चिकित्सां विना किञ्चित्कालातिवाहनेन शाम्यतीत्यर्थः, अचिरकालावस्थायित्वात्। स्वयं संशमनादल्पबलत्वाच्च क्षुद्रसंज्ञोऽयम्।

आ० र०- क्षुद्रकलक्षणमाह-तत्रेति। क्षुद्रं-क्षुद्रकश्वासम्। स्वयं-औषधं विनैव।

अथ तमकं लक्षयति-

प्रतिलोमं सिरा गच्छन्नुदीर्य पवनः कफम्।
परिगृह्य शिरोग्रीवमुरः पार्श्वे च पीडयन्॥६॥
कासं घुर्घुरकं मोहमरुचिं पीनसं तृषम्।
करोति तीव्रवेगं च श्वासं प्राणोपतापिनम्॥७॥
प्रताम्येत्तस्य वेगेन निष्ठ्यूतान्ते क्षणं सुखी।
कृच्छ्राच्छयानः श्वसिति निषण्णः स्वास्थ्यमृच्छति॥८॥
उच्छ्रिताक्षो ललाटेन स्विद्यता भृशमर्तिमान्।
विशुष्कास्यो मुहुःश्वासी काङ्क्षत्युष्णं सवेपथुः॥९॥
मेघाम्बुशीतप्राग्वातैः, श्लेष्मलैश्च विवर्द्धते।
स याप्यस्तमकः, साध्यो नवो वा बलिनो भवेत्॥१०॥

स०- पवनः प्रतिलोमं-विपर्ययं कृत्वा, शिराः-स्रोतांसि, गच्छन् श्वासं करोति। तथा कफमुदीर्य-ऊर्ध्वं प्रेर्य, तथा शिरो ग्रीवां च परिगृह्य-समन्ताद्गृहीत्वा, तथोरः पार्श्वे च पीडयन्-निर्मन्थयन्, कासादीन् श्वासं च तीव्रवेगं तथा प्राणोपतापिनं करोति। प्राणाख्यो वायुरुपतप्यते येन तच्छीलत्वादसौ प्राणोपतापी श्वासः। तस्य-तमकस्य, वेगेन-बलेन, पुरुषः प्रताम्येत्-दुःखी सम्पद्यते, श्लेष्मणा रुद्धमार्गत्वात्। अत एवाह-निष्ठ्यूतान्ते क्षणं सुखीति। स च तमकश्वासी शयानः-शय्यामासीनः, कृच्छ्रात्-दुःखेन, श्वासिति-श्वासं मुञ्चति। निषण्णः-उपविष्टः सन्,

स्वास्थ्यमृच्छति-नीरुक्त्वं प्राप्नोति। उच्छ्रितेऽक्षिणी यस्य स उच्छ्रिताक्षः, "बहुव्रीहौ सक्थ्यक्ष्णोः" इति षच्। उच्छ्रिताक्षः-ऊर्ध्वदृक्। ललाटेन स्विद्यता-स्वेदयुक्तेनोपलक्षितः भृशं-अतिशयेन, अर्तिमान्-पीडावान्। तथा विशुष्कमास्यं यस्य स एवम्। मुहुः-पुनःपुनः, श्वासो यस्य स मुहुःश्वासी। उष्णं काङ्क्षति-अभिलषति। तथा, सवेपथुः-कम्पवान्। स च तमको मेघादिभिः पृथक् तथा श्लेष्मलैः-गुडादिभिः, वर्द्धते-वृद्धिं याति। मेघशब्देनात्रोभयं गृह्यते, मेघोन्नमनं वर्षणं च। तेन मेघोन्नमनेन वर्द्धते तदुपलक्षितेन कालेन वर्षाख्येन च वर्द्धते। एवं शीतशब्देनापि द्वयं गृह्यते,-शीतलक्षणः कालो हेमन्तशिशिराख्यः, शीतगुणयुक्त औषधाहारविहारादिः, तेनोभयेनापि विवर्द्धते। स तमकः श्वासो याप्यो-नासौ सुखसाध्यः, कृच्छ्रसाध्यो वा दुर्बलस्य पुंसः। स एवाभिनवोत्पन्नो बलवतः पुंसः साध्यो वा भवेत्। सम्भावनायां लिङ्, साध्यत्वेन सम्भाव्यत इत्यर्थः।

आ० र०- तमकलक्षणमाह-प्रतिलोममिति। शोरोग्रीवं परिगृह्य-स्तम्भयित्वा। प्राणाः-इन्द्रियाणि श्वासस्य। उच्छ्रिताक्षः-ऊर्ध्वनेत्रः। ललाटेनार्तिमान्, अक्ष्णा काणवत्तृतीया। मेघादिभिश्चतुर्भिः, श्लेष्मलत्वेऽपि पृथक् ग्रहणमतिशयार्थम्। नवत्वे बलित्वेऽपि साध्यः। वाशब्दात्सोऽपि कदाचिद्याप्यः। ज्वरमूर्च्छायुतः शीतैः शाम्येत्प्रतमकस्तु सः।

ज्वरमूर्छायुतः शीतैः शाम्येत्प्रतमकस्तु सः।

स०-स एव-तमकाख्यो ज्वरमूर्च्छायुतो यदा भवति, शीतैश्चौषधाहारविहारैः शाम्येत्-शमं याति न तमकवत् वर्द्धते, तदा स च प्रतमक उच्यते। अयं च तमकस्यैव भेद इति षड्वं श्वासानां नाशङ्क्यम्।

आ० र०- तमकविशेषप्रतमकलक्षनमाह-ज्वरमूर्च्छयुत इति।

अथ छिन्नं लक्षयति-

छिन्नाच्छ्वसिति विच्छिन्नं मर्मच्छेदरुजार्दितः॥ ११॥

सस्वेदमूर्च्छः सानाहो बस्तिदाहनिरोधवान्।

अधोदृग्विप्लुताक्षश्च मुह्यन् रक्तैकलोचनः॥ १२॥

शुष्कास्यः प्रलपन् दीनो नष्टच्छायो विचेतनः।

स०-छिन्नाख्याच्छ्वासात् विच्छिन्नं कृत्वा नरः श्वसिति-न निरन्तरम्। मर्मच्छेदतुल्यया रुजयाऽर्दितः। तथा, सह स्वेदमूर्च्छाभ्यां वर्तते सस्वेदमूर्च्छः। तथा, आध्मान्वान्। दाहश्च निरोधश्च दाहनिरोधौ, बस्तौ दाहनिरधौ बस्तिदाहनिरोधौ, तौ विद्येते यस्य स एवम्। अधः-अधस्तात्, दृक्-दृष्टिः, यस्य स एवम्। तथा, विप्लुते-एकत्रानवस्थिते, अक्षिणी यस्य स एवम्। तथा, मुह्यन्-मोहं गच्छन्। तथा, रक्तमेकं लोचनं यस्य स एवम्। तथा, शुष्कास्यः सन् दीनं प्रलपन्। तथा, नष्टकान्तिर्विचेताश्च।

आ० र०- छिन्नश्वासलक्षनमाह-छिनाच्छ्वसितीति। मर्मच्छेदतुल्या रुजा। निरोधो-मूत्राप्रवृत्तिः। विप्लुताक्षः-साश्रुनेत्रः।

अधुना महदाख्यं श्वासं लक्षयति-

महता महता दीनो नादेन श्वसिति क्रथन्॥ १३॥

उद्धूयमानः संरब्धो मत्तर्षभ इवानिशम्।

प्रणष्टज्ञानविज्ञानो विभ्रान्तनयनाननः॥ १४॥

वक्षः समाक्षिपन् बद्धमूत्रवर्चा विशीर्णवाक्।

शुष्ककण्ठो मुहुर्मुह्यन् कर्णशङ्खशिरोतिरुक्॥ १५॥

स०-महता श्वासेनार्तः पुरुषो महता नादेन-शब्देन, श्वसिति यावत्कर्णशङ्खशिरोतिरुगिति। क्रथन्-क्वणन्। उद्धूयमानः-उत्कम्प्यमानः। संरब्धः-सङ्क्षुभितः। ज्ञानं-तत्त्वावबोधः। विज्ञानं-कर्मसु कौशलम्।

आ० र०- महाश्वासलक्षणमाह-महतो महतेति। महतः-श्वासात्। महता-नादेन। क्वथन्-कूजन्। उद्दूयमानः-आन्दोल्यमानः। संरब्धः-कृत्वै(क्षुब्ध्वै)व। विभ्रान्तं-अस्थिरम्। विशीर्णा-विशकलिता।

अथोर्ध्वलक्षणार्थमाह-

दीर्घमूर्ध्वं श्वसित्यूर्ध्वान्न च प्रत्याहरत्यधः।
श्लेष्मावृतमुखस्रोताः क्रुद्धगन्धवहार्दितः॥ १६॥
ऊर्ध्वदृग्वीक्षते भ्रान्तमक्षिणी परितः क्षिपन्।
मर्मसु च्छिद्यमानेषु परिदेवी निरुद्धवाक्॥ १७॥

स०-ऊर्ध्वाख्याच्छ्वासात् दीर्घमूर्ध्वं श्वसिति। ऊर्ध्वं श्वासं मुक्त्वा पुनरधो निश्वासवन्न तं श्वासं प्रत्याहरति। यथा,-अन्येषु श्वासेषु नर ऊर्ध्वं दीर्घं श्वासं मुक्त्वा पुनरधः प्रत्याहरति-पुनरन्तः प्रवेशयितुं शक्नोति, नैवमस्मिन्नूर्ध्वश्वास इत्यर्थः। किम्भूतो नरोऽत्र स्यात्? इत्याह-श्लेष्मेत्यादि। श्लेष्मणाऽऽवृतानि मुखानि येषां तान्येवम्, श्लेष्मावृतमुखानि स्रोतांसि यस्य स एवम्। तथा, कृद्धगन्धवहेन-कुपितमरुता, अर्दितः-पीडितः। तथा, ऊर्ध्वं दृग्-दृष्टिः, यस्य स ऊर्ध्वदृक्। तथा, अक्षिणी परितः-समन्तात्, क्षिपन् भ्रान्तं कृत्वा वीक्षते। तथा, मर्मसु छिद्यमानेष्विव परिदेवी-दुःखार्तः, सम्पद्यते। तथा, निरुद्धवाक्-अन्तःप्रविष्टवागित्यर्थः।

आ० र०- ऊर्ध्वश्वासललक्षणमाह-दीर्घमूर्ध्वमिति। ऊर्ध्वात्-ऊर्ध्वश्वासात्। गन्धवहो-वायुः। परिदेवी-रोदनवान्।

एते सिध्येयुरव्यक्ता व्यक्ताः प्राणहरा ध्रुवम्।

इति श्वासनिदानम्।

स०-एते-तमकादयः श्वासाः, अव्यक्ताः-अस्फुटरूपाः, सिध्येयुश्चिकित्स्यमानाः। व्यक्ताः-स्फुटलक्षणाः, पुनर्ध्रुवं-निश्चितं, प्राणहराः स्युः।

आ० र०- छिन्नादीनां श्वासानां साध्यत्वमसाध्यत्वं चाह-एते सिध्येयुरिति। अव्यक्ताः-तमकाद्भिन्नत्वेन अनिर्धारिताः। "कासश्वासौ ज्वरच्छर्दितृष्णातीसारशोफिनम्।" इति विकृतौ (ह्.शा.अ. ५१७६)। इति श्वासनिदानम्।

अथ हिध्मास्वरूपं लक्षयति-

अथ हिध्मानिदानम्।

श्वासैकहेतुप्राग्रूपसङ्घाप्रकृतिसंश्रयाः॥ १८॥

हिध्माः

स०-एकशब्दस्तुल्यार्थः। श्वासानां तुल्या हेत्वादयो यासां-हिध्मानां, ताः श्वासैकहेतुप्राग्रूपसङ्घाप्रकृतिसंश्रयाः। श्वासानां हेतुः-"कासवृद्ध्या भवेच्छ्वासः" (श्लो. १) इत्यादिग्रन्थेन प्रतिपादितः, स एव हिध्मानां हेतुः। श्वासानां प्राग्रूपं-"हृत्पार्श्वशूलं" (श्लो. ४) इत्यादि, तदेव हिध्मानाम्। तथा, श्वासाः पञ्च, हिध्मा अपि पञ्च। श्वासानां प्रकृतिः-आसन्नं कारणम्,-"कफोपरुद्धगमनः" (श्लो. ३) इत्यादिविशेषणविशिष्टः पवनः, तादृश एव वातो हिध्मानां प्रकृतिः। श्वासानां संश्रयः-आश्रयः, यमधिष्ठाय सम्भवन्ति श्वासाः। यथा,-"आमाशयसमुद्भवम्" (श्लो. ४) इति, स एव हिध्मानाम्। प्रायिकत्वं वाऽस्य बोध्यम्। जत्रुमूलादप्युत्पतेः क्षुद्रायाः। तदेवं श्वासानां तुल्या हेत्वादयो हिध्मानाम्।

आ० र०- अथ हिध्माप्रकरणम्। तत्र हिध्मायाः श्वासतुल्यत्वमाह-श्वासैकहेत्विति। एका-तुल्या। प्रकृतिः-सम्प्राप्तिः। संश्रयः-स्थानम्।

भक्तोद्भवा क्षुद्रा यमला महतीति च।

गम्भीरा च

स०-भक्तोद्भवाद्याः पञ्च हिध्माः। इतिशब्दो व्यवच्छेदे, चः समुच्चये। एवं गम्भीरा चेत्यत्रापि।

आ० र०- पञ्चानां हिध्मानां नामान्याह-भक्तोद्भवेति।

भक्तोद्भवां लक्षयितुमाह-

मरुत्तत्र त्वरयाऽयुक्तिसेवितैः॥१९॥

रूक्षतीक्ष्णखरासात्म्यैरन्नपानैः प्रपीडितः।

करोति हिध्मामरुजां मन्दशब्दां क्षवानुगां॥२०॥

शमं सात्म्यान्नपानेन या प्रयाति च साऽन्नजा।

स०-तत्र-तासु हिध्मासु मध्ये, अन्नजां हिध्मामेवंप्रकारां मरुत् करोति। किम्भूतो मरुत्? अन्नपानैः प्रपीडितो-बाधितः। किम्भूतैः? रूक्षतीक्ष्णखरासात्म्यैः, सामर्थ्यादभ्यवहृतैः। तथा, त्वरया-क्रममनपेक्ष्य, अयुक्त्या-यथेच्छया, वा सेवितैः। किम्भूतां हिध्माम्? अरुजां-पीडया रहितां। तथा, मन्दशब्दां-मन्दवेगां। तथा, क्षवेन-क्षुत्या, अनुगतां-अनुबद्धाम्। न केवलमेवंलक्षणोपेता या साऽन्नजा, या च सात्म्येनान्नपानेन शमं याति साऽप्यन्नजैव। अत्र चान्नपानैरिति हेतुनिर्देशः। अरुजं मन्दशब्दां क्षवानुगामिति लक्षणनिर्देशः। शमं सात्म्यान्नपाननेत्युपशयनिर्देशः।

आ० र०- भक्तोद्भवालक्षणमाह-मरुत्तत्रेति। त्वरया-वेगेन सेवितैः। [अयुक्तिसेवितैः-] अयुक्तिर्यथा भवत्येवं सेवितैः, अनेन सहेदं सेव्यमस्मादनन्तरमिदं सेव्यमित्यादिकायुक्तिः। रूक्षादिभिश्च सेवितैः-युक्त्याऽपि त्वरां विनाऽपि।

अथ क्षुद्राख्यां लक्षयितुमाह-

आयासात्पवनः क्षुद्रः क्षुद्रां हिध्मां प्रवर्तयेत्॥२१॥

जत्रुमूलप्रविसृतामल्पवेगां मृदुं च सा।

वृद्धिमायास्यतो याति भुक्तमात्रे च मार्दवम्॥२२॥

स०-आयासात्-व्यायामात्, पवनः स्वल्पात् प्रकोपात् क्षुद्रः-अल्पः, क्षुद्रं हिध्मां प्रवर्तयेत्-विदध्यात्। किम्भूताम्? जत्रुमूलात् प्रकर्षेण विसृतां-जाताम्। अत एव क्षुद्रत्वादल्पवेगाम्, तथा मृदुं-नातिरुजाकरीम्। सा चायास्यतः-आयासं कुर्वतो, वृद्धिं याति। भुक्तमात्रे च-सद्यो भुक्ते, मार्दवं-मृदुत्वं, याति।

आ० र०- क्षुद्रालक्षनमाह-आयासादिति। जत्रुमूलं-कण्ठोरसोः सन्धिः।

अधुना यमलां व्याचष्टे-

चिरेण यमलैर्वेगैराहारे या प्रवर्तते।

परिणामोन्मुखे वृद्धिं परिणामे च गच्छति॥२३॥

कम्पयन्ती शिरोग्रीवमाध्मातस्यातितृष्यतः।

प्रलापच्छर्घतीसारनेत्रविप्लुतिजृम्भिणः॥२४॥

यमला वेगिनी हिध्मा परिणामवती च सा।

स०-चिरेण कालेन, आहारे परिणामोन्मुखे-प्रत्यासन्नपरिणामे, तथा परिणामे चाहारस्य, या वृद्धिं गच्छति, यमलैश्च वेगैः-न केवलैः, या प्रवर्तते सा यमलवेगप्रवर्तनात्-यमलाख्या हिध्मा। किं कुर्वती सा प्रवर्तते? शिरश्च ग्रीवां च कम्पयन्ती। किम्भूतस्य नरस्य? आध्मातस्य तथाऽतितृष्यतः-तृडार्तस्य, तथा प्रलापादिमतः। सैव च यमला वेगिनी, सैव परिणामवती, इत्येवं संज्ञात्रयमस्या बोध्यम्।

आ० र०-यमलालक्षणमाह-चिरेणेति। यमलैर्वेगैः-द्वौ वेगौ निरन्तरौ कृत्व पुनश्चिरेण द्वौ पुनश्चिरेण द्वाविति, प्रवर्तते। पच्यमाने आहारे वर्द्धते। यमलादीनि त्रीणि नामानि।

महाहिध्मां व्याचिख्यासुराह-

स्तब्धभ्रूशङ्खयुग्मस्य सास्रविप्लुतचक्षुषः॥२५॥

स्तम्भयन्ती तनुं वाचं स्मृतिं संज्ञां च मुष्णती।

रुन्धती मार्गमन्नस्य कुर्वती मर्मघट्टनम्॥२६॥

पृष्ठतो नमनं शोषं महाहिध्मा प्रवर्तते।

महामूला महाशब्दा महावेगा महाबला॥२७॥

स०-स्तब्धं भ्रूयुग्मं शङ्खयुग्मं च यस्य तस्य तथाविधस्य पुरुषस्य महाहिध्मा प्रवर्तते। तथा, सास्रे विप्लुते-चले, चक्षुषी यस्य तस्य, तथेदमिदं कुर्वाणा प्रवर्तते। तनुं-देहं, स्तम्भयन्ती-निश्चलं कुर्वती, तथा वाचं स्तम्भयन्ती-मूकत्वं च कुर्वाणा, स्मृतिं संज्ञा च मुष्णती-स्मृतिसंज्ञयोरपहरणं विदधती, तथाऽन्नस्य-चतुर्विधस्यापि, मार्गं गन्धती, तथा मर्मणां-हृदयादीनां, घट्टनं-चालनं, कुर्वती, तथा पृष्ठतो नमनं तथा शोषं शरीरस्य कुर्वती, महाहिध्मा प्रवर्तत इति योज्यम्। तथा, महत् मूलं-उत्पत्तौ कारणं, यस्याः सा महामूला। तथा, महाशब्दा महावेगा महाबला चेयं भवति। एतैश्च विशेषणैरस्याः शिघ्रप्राणहारित्वं द्योत्यते।

आ० र०- महतीलक्षणमाह-ध्वस्तभ्रूशङ्खयुग्मस्येति।

अथ गम्भीरां लक्षयति-

पक्वाशयाद्वा नाभेर्वा पूर्ववद्या प्रवर्तते।

तद्रूपा सा मुहुः कुर्याज्जृम्भामङ्गप्रसारणम्॥२८॥

गम्भीरेणानुनादेन गम्भीरा

स०-पक्वाशयात्-नाभेरधस्तात्, अथवा नाभेः-नाभिदेशात्, या प्रवर्तते, सा पूर्ववदिति महाहिध्मावत्। यथा,-महाहिध्मा "स्तब्धभ्रूशङ्खयुग्मस्य" (श्लो. २५) इत्यादिविशेषणविसिष्टा प्रवर्तते तथैवेयं तथाभूतस्य पुरुषस्येत्यर्थः। तथा, तद्रूपा-तस्या महाहिध्मायाः सदृशं रूपं-लक्षणं, यस्याः सा तद्रूपा। महाहिध्मातोऽस्या इदमधिकं लक्षणम्,-मुहुर्मुहुर्जृम्भां तथा मुहुर्मुहुरङ्गप्रसारणं कुर्यात्। गम्भीरेणानुनादेनेति। अनुनादः-अनुरणनम्, घण्टादीनामिव। गम्भीरेणानुनादेन हेतुना गम्भीराख्येयम्।

तासु साधयेत्।

आद्ये द्वे, वर्जयेदन्त्ये सर्वलिङ्गां च वेगिनीम्॥२९॥

सर्वाश्च सञ्चितामस्य स्थविरस्य व्यवायिनः।

व्याधिभिः क्षीणदेहस्य भक्तच्छेदक्षतस्य वा॥३०॥

इति हिध्मानिदानम्।

स०-तासु-पञ्चसु हिध्मासु मध्ये, आद्ये द्वे ये हिध्मे-भक्तोद्भवाक्षुद्राख्ये, ते साधयेत्-चिकित्सेत्, साध्यत्वात्। अन्त्ये ये द्वे-महाहिध्मागम्भीराख्ये, ते वर्जयेत्-नोपक्रमेत्, असाध्यत्वात्। आदौ भवे आद्ये, एवमन्त्ये, "दिगादित्वात् (दिभ्यो यत्" इति) यत्। तथा वेगिनीं च-यमलाख्यां, सर्वलिङ्गां यथोक्तलक्षणां वर्जयेत्। न केवलमेता एव वर्जयेत्, यावत्सर्वा अपि हिध्मा एवंभूतस्य पुरुषस्य जाता वर्जयेत्। किम्भूतस्य? [सञ्चितामस्य-] चिरकालसम्भृतामस्य, तथा स्थविरस्य-वृद्धस्य, तथा व्यवायिनः-स्त्रीगमनशीलस्य. [तथा व्याधिभिः क्षीणदेहस्य,] तथा भक्तस्य छेदो भक्तच्छेदो,-भोजननिवृत्तिः, तेन क्षतः-क्षीणो दुर्बलो, भक्तच्छेदक्षतः, तस्य च वर्जयेत्।

अधुना हिध्माश्वासयोः शीघ्रकारित्वमाह-

सर्वेऽपि रोगा नाशाय न त्वेवं शीघ्रकारिणः।

हिध्माश्वासौ यथा तौ हि मृत्युकाले कृतालयौ॥३१॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां तृतीये निदानस्थाने श्वासहिध्मानिदानं नाम चतुर्थोऽध्यायः॥४॥

स०-सर्वे रोगा नाशाय-अभावाय, स्युः। न केवलं हिध्माश्वासावित्युपदर्शनार्थोऽपिशब्दः। न पुनरेवं शीघ्रविनाशकारिणः सर्वे, यथा हिध्माश्वासौ शीघ्रविनाशकारिणौ। यस्मात्तौ मृत्युकाले-मरणावसरे, कृतालयौ-विहितवसती, तस्मिन् काले तयोरवश्यंभावित्वात्। शीघ्रमारणस्वभावत्वादनयोस्तु चिकित्सायां सत्वरं यतितव्यमिति।

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टाङ्गहृदयटीकायां सर्वाङ्गसुन्दराख्यायां तृतीये निदानस्थाने श्वासहिध्मानिदानं नाम चतुर्थोऽध्यायः समाप्तः ॥ ४ ॥

[इति हेमाद्रिटीकायामायुर्वेदरसायने।
श्वासहिध्मानिदानं च सामस्त्येन निरूपितम्॥४॥]

****

पञ्चमोऽध्यायः।

श्वासहिध्मनिदानादनन्तरं राजयक्ष्मादिनिदानारम्भेऽयं सम्बन्धः। कासादुपेक्षया "श्वासक्षयच्छर्दि" (ह. नि. अ. ३।३८) इत्युक्तम्। हिध्माश्वासयोश्चैकयोगक्षेमत्वात् श्वासहिध्मानिदानानन्तरं राजयक्ष्मनिदानमारभ्यते-

अथातो राजयक्ष्मादिनिदानं व्याख्यास्यामः।

इति ह स्माहुरात्रेयादयो महर्षयः।

(गद्यसूत्रे॥२॥)

स०-पूर्ववदत्र व्याख्या। आदिशब्देन स्वरभेदादीनां ग्रहणम्।

राजयक्ष्मा क उच्यते ? यस्येदं निदानम्, इत्याह-

अथ राजयक्ष्मनिदानम्।

अनेकरोगानुगतो बहुरोगपुरोगमः।

राजयक्ष्मा क्षयः शोषो रोगराडिति च स्मृतः॥१॥

स०-अनेकैःज्वरातीसारादिभिः, परिवृतः। तथा, बहूनां रोगाणां-गुल्मातीसारादीनां, पुरोगमः-प्रधानश्च। यथा हि राजा प्राक् पश्चात् रथेभाश्वजनैरनुगम्यते, तथाऽयं रोगो रोगैः। राजयक्ष्मेत्यादयश्चतस्रः संज्ञाः।

आ० र०- अथ राजयक्ष्मप्रकरणम्। तस्य नामचतुष्टयमाह-अनेकरोगानुगत इति।

तत्राद्यां संज्ञां व्युत्पादयन्नाह-

नक्षत्राणां द्विजानां च राज्ञोऽभूद्यदयं पुरा।

यच्च राजा च यक्ष्मा च राजयक्ष्मा ततो मतः॥२॥

देहौषधक्षयकृतेः क्षयस्तत्सम्भवाच्च सः।

रसादिशोषणाच्छोषो रोगराट् तेषु राजनात्॥३॥

स०-नक्षत्राणां-अश्विन्यादीनां, तथा द्विजानां-ब्राह्मणानां च, यो राजा-चन्द्रः, तस्य पुरा-पूर्वं, अभवत्। पूर्वकल्पे हि रोहिण्यामतिसक्तस्य चन्द्रस्य श्वशुरं दक्षमनृतवादेन वञ्चयतोऽपमानितदुहितृस्नेहवशादुद्भूतक्रोधात् प्रजापतेर्दक्षतः राजयक्ष्माऽभवदिति श्रूयते। तस्माद्राज्ञो यक्ष्मा राजयक्ष्मेत्युच्यते षष्ठीसमासव्युत्पत्त्या। यच्च-यस्माच्च, राजा च यक्ष्मा च-राजाच रोगाणां मध्ये अनेकरोगानीकपरिवृतत्वेन यक्ष्मा च, ततो राजा चासौ यक्ष्मा च राजयक्ष्माऽभिमतो मुनीनामिति शेषः। तथा देहश्चौषधं च, तयोः क्षयः, तस्य कृतिः-कारणं, ततो देहौषधक्षयकृतेः क्षय इत्युच्यते। अनेन चास्य व्याधेर्बहुकालस्थायित्वं द्योतयति। किलायं व्याधिर्बहुतरं कालमवतिष्ठते न च शान्तिं गच्छति। यावद्देहः क्षीयते, औषधान्यपि क्षीयन्ते, न पुनरयं व्याधिः, इति देहौषधक्षयकृतेः क्षय इत्युच्यते। तत्सम्भावाच्च सः। तदित्यनेन देहौषधक्षयः प्रत्यवमृश्यते। स सम्भवो-जन्म, यस्यासौ तत्सम्भवः, तस्मादपि क्षय इत्युच्यते। एवमन्योऽपि यो व्याधिर्देहौषधक्षयकारी, सोऽपि क्षयाख्यस्य व्याधेः सम्भवः-कारणम्, तस्माज्जायत इत्यर्थः। रसादीनां शोषणात् शोष इति भण्यते। रोगेत्यादि। बहुषु रोगेषु मध्ये रोगत्वेनैष एव भ्राजते, तस्माद्रोगराडित्युच्यते।

आ० र०- नामनिर्वचनमाह-नक्षत्राणामिति। राज्ञः-चन्द्रस्य, यक्ष्मा-रोगो, राजयक्ष्मा। अथवा, रोगाणां राजा यक्ष्मा चेति राजयक्ष्मा। देहमौषधं च क्षिणोतीति क्षयः। अथवा, शुक्रादिक्षयात् सम्भवतीति क्षयः, कार्यकारणयोरभेदोपचारात्। रसादयो धातवः शुष्यन्त्यनेनेति शोषः। [राज] वद्रोगेषु राजत इति रोगराट्।

साहसं वेगसंरोधः शुक्रौजःस्नेहसङ्क्षयः।

अन्नपानविधित्यागश्चत्वारस्तस्य हेतवः॥४॥

स०-साहसं-कायेन वाचा वाऽयथाबलमारम्भः। वेगसंरोधो-वातविण्मूत्रादीनामुन्मुखीभूतानां धारणम्। शुक्रं च ओजश्च स्नेहश्च तेषां सङ्घयो-विनाशः। अत्र स्नेहशब्देन देहस्नेहो ग्राह्यः, देहशब्दलोपं कृत्वाऽयं निर्दिष्टः। तथा च मुनिः (च. चि. अ. ८।२)-"देहस्नेहपरीक्षयात्" इति। तथा, अन्नपानयोर्यथाशास्त्रं यो विधिस्तस्य त्यागो-अन्यथासेवनमन्यथाऽभ्यवहारः। तस्य-राजयक्ष्मणः, चत्वारः साहसादयो हेतवः। पाठादेव चतुःसङ्घात्वे लब्धे चतुर्ग्रहणं नियमार्थम्। यद्यपि साहसादय एते प्रत्येकमनेकप्रकारतया भिन्नाः, तथाऽपि साहसादिचतुष्टयं नातिक्रामन्तीत्यर्थः।

आ० र०- हेतुचतुष्टयमाह-साहसमिति। ओजः-शुक्रमलः। स्नेहो-मज्जमलः।

तथाऽस्मिन् राजयक्ष्माख्ये साहसजे वेगसंरोधजे शुक्रौजःस्नेहसङ्क्षयजेऽन्नपानविधित्यागजे वा चतुर्विधे विशेषेण पवनो हेतुः। अत एवाह-

तैरुदीर्णोऽनिलः पित्तं कफं चोदीर्य सर्वतः।
शरीरसन्धीनाविश्य तान् सिराश्च प्रपीडयन्॥५॥
मुखानि स्रोतसां रुद्ध्वा तथैवातिविवृत्य वा।
सर्पन्नूर्ध्वमधस्तिर्यग्यथास्वं जनयेद्गदान्॥६॥

स०-तैः-साहसादिभिः, उदीर्णोऽनिल इदमिदं कुर्वन् यथास्वं गदान् जनयेत्। उदीर्णः-उल्बणः पित्तश्लेष्मभ्यामधिकः। अत एव पित्तमुदीर्य-स्वस्थानाच्च्यावयित्वा, तथा कफं सर्वतः-सर्वस्मात् उदीर्य, तथा शरीरसन्धीन्-दशाधिकशतद्वयसङ्घातान् आत्रेयमतेन तु द्विसहस्रसङ्घातान्, आविश्य-तेषामन्तः-प्रवेशं कृत्वा, ताश्च-सन्धीन्, प्रपीडयन्-प्रकर्षेण मर्दयन्निव, तथा सिरा अपि सकलशरीरगाः प्रपीडयन्, तथाऽन्येषां स्रोतसां मुखानि-द्वाराणि रुद्ध्वा, तथैव तानि वा अतिविवृत्य-प्रसार्य स्रोतोमुखानि। सर्पन्नित्यादि। ऊर्ध्वं सर्पन् वायुः पीनसादीन् व्याधीन् जनयेत्, अधः सर्पन् विड्भेदं विड्रोधं वा कुर्यात्, तिर्यक् सर्पन् पार्श्वरुजं वा कुर्यात्, इति यथास्वंशब्दस्यार्थः।

आ० र०- सम्प्राप्तिमाह-तैरिति। तैः-हेतुभिः। सर्वत आविश्य-सूक्ष्मेष्ववयवेषु प्रविश्य। तान्-सन्धीन्। प्रपीडयन्-सङ्कोचयन्। स्रोतसां-प्राणादिवाहिनां त्रयोदशानां, मुखानि-द्वाराणि, रुध्वाऽतिविवृत्य वा। तथैव-येनैव प्रकारेणातिसंवृतत्वं तेनैवातिविवृतत्वम्। प्रकारश्च-कफपित्ताभ्यां सह सञ्चारः। तौ हि कदाचिद्वातं रुन्धाते, कदाचित्तेन निःसार्येते। यथास्वं-ऊर्ध्वं सप्त पीनसादीन्, अधो द्वौ विड्रोधातिसारौ, तिर्यक् त्रीन् छर्दिपार्श्वशूलज्वरान्। यद्यपि छर्दिः कोष्ठगे, सन्धिगे ज्वरः, तथाऽपि तिर्यग्गतिविशेषत्वादविरोधः।

रूपं भविष्यतस्तस्य प्रतिश्यायो भृशं क्षवः।
प्रसेको मुखमाधुर्यं सदनं वह्निदेहयोः॥७॥
स्थाल्यमत्रान्नपानादौ शुचावप्यशुचीक्षणम्।
मक्षिकातृणकेशादिपातः प्रायोऽन्नपानयोः॥८॥
हृल्लासश्छर्दिररुचिरश्नतोऽपि बलक्षयः।
पाण्योरवेक्षा पादास्यशोफोऽक्ष्णोरतिशुक्लता॥९॥
बाह्वोः प्रमाणजिज्ञासा काये बैभत्स्यदर्शनम्।
स्त्रीमद्यमांसप्रियता घृणित्वं मूर्द्धगुण्ठनम्॥१०॥
नखकेशातिवृद्धिश्च, स्वप्ने चाभिभवो भवेत्।
पतङ्गकृकलासाहिकपिश्वापदपक्षिभिः॥११॥
केशास्थितुषभस्मादिराशौ समधिरोहणम्।
शून्यानां ग्रामदेशानां दर्शनं शुष्यतोऽम्भसः॥१२॥
ज्योतिर्गिरीणां पततां ज्वलतां च महीरुहाम्।

स०-तस्य-राजयक्ष्मणः, भविष्यतः उत्पित्सोः, रूपं-अग्ररूपं, प्रतिश्यायादि। वह्नेः सदनं-पाकासामर्थ्यम्। देहस्य सादो-निर्बलता। स्थाल्यमत्रान्नपानादीनां शुद्धानामप्यशुचिदर्शनमिति तदानीं पुरुषस्य मिथ्याज्ञानं जायत इत्यर्थः। पाण्योरवेक्षा-भूयसा स्वपाणी पश्यति। बाह्वोः प्रमाणजिज्ञासा-कियत्प्रमाणौ मे बाहू इति ज्ञातुमिच्छति। काये-शरीरे शोभनेऽपि, बैभत्स्यदर्शनमिति मिथ्याज्ञानं तदानीं रोगस्वभावादस्योत्पद्यते। मूर्ध्नः-मस्तकस्य, गुण्ठनं-

वस्त्रादिना सञ्छादनम्। स्वप्ने च तस्य यक्ष्मिणः पतङ्गादिभिरभिभवो भवेत्-पतङ्गाद्यैः पराभूयते। पतङ्गः-कीटभेदः। तथा, केशादिराशिष्वधिरोहणं तथा शून्यग्रामदेशादीनां दर्शनं स्वप्ने भवेत्।

आ० र०- पूर्वरूपमाह-रूपं भविष्यत इति। भृशं क्षवः-नासारोगेषु। सदनं-स्वकार्यासक्षमत्वम्। स्थाली-यत्रान्नं पच्यते। अमत्रं-यत्रान्नं भुज्यते। पाण्योरवेक्षा-कीदृशौ मे पाणी इति जिज्ञासा। बैभत्स्यदर्शनं-सुन्दरेष्वसुन्दरत्वबुद्धिः। घृणित्वं-सकृपत्वम्। पतङ्गाभिभवादयो ज्वरदृक्षदर्शनान्ताः [स्वप्ने भवन्ति]।

प्राग्रूपमुक्त्वा सम्प्रत्येकादशरूपमधिकृत्याह-

पीनसश्वासकासां समूर्द्धस्वररुजोऽरुचिः॥ १३॥
ऊर्ध्वं, विड्भ्रंशसंशोषावधः, च्छर्दिश्च कोष्ठगे।
तिर्यक्स्थे पार्श्वरुद्दोषे, सन्धिगे भवति ज्वरः॥ १४॥
रूपाण्येकादशैतानि जायन्ते राजयक्ष्मिणः।

स०-अंसौ च मूर्द्धा च स्वरश्च तेषां रुजोंऽसमूर्द्धस्वररुजः। पीनसश्च श्वासश्चांसमूर्द्धस्वररुजश्च ताः, तथा अरुचिः, इत्यूर्ध्वं-ऊर्ध्वस्थिते दोषे, भवति। अरुचेरेषः पृथगुपन्यासः प्राधान्यख्यापनार्थः। यथा,-अस्मिन् व्याधावतिभयावहोऽरुच्याख्य उपद्रवो न तथा पीनसादय इति। अधःस्थिते दोषे विशः-पुरीषस्य, भ्रंशसंशोषौ विड्भ्रंशसंशोषौ भवतः। "विड्भ्रंशो-भिन्नवर्चस्त्वं, विड्रोषो-बद्धविड्कता।" एतयोश्च परस्परं विरुद्धत्वान्न तुल्यकालं सम्भवः। तस्मात्कदाचिद्विड्भ्रंशः कदाचिद्विड्रोषो भवति। छर्दिस्तु कोष्ठस्थिते दोषे स्यात्। तिर्यक्स्थे दोषे पार्श्वरुक् भवति। सन्धिगे ज्वरो भवति। एतानि पीनसादीन्येकादश रूपाणि शोषिण उत्पद्यन्ते। मुनिस्त्वेवमवोचत् (च. चि. अ. ८।२३)-"प्रतिश्यायं ज्वरं कासमङ्गमर्दं शिरोरुजम्। श्वासं विड्भेदमरुचिं पार्श्वशूलं स्वरक्षयम्॥ कुरुते चांससन्तापमेकादशं" इत्यादि।

आ० र०- रूपमाह-पीनसेति। स्कन्धरूक् मूर्द्धरुक् स्वररुक् चेति त्रीणि। विड्वंशसंशोषयोर्वैकल्पिकत्वादेकादशत्वम्। वङ्गसेने तु (राजयक्ष्माधिकारे श्लो.९) "भक्तद्वेषो ज्वरः श्वासः कासः शोणितदर्शनम्। स्वरभेदश्च जायन्ते षड्रूपे राजयक्ष्मणि॥' इति।

तेषामुपद्रवान् विद्यात्कण्ठोद्धंसमुरोरुजम्॥ १५॥
जृम्भाङ्गमर्दनिष्ठीववह्निसादास्यपूतिताः।

स०-तेषां-एकादशसङ्ख्यानां पीनसादीनां पूर्वोत्पन्नानां, कण्ठोद्धंसादीन् पश्चादुत्थितान् सप्तोपद्रवान् जानीयात्। "व्याधेरुपरि यो व्याधिर्भवत्युत्तरकालजः। उपक्रमविघाती च स ह्युपद्रव उच्यते॥" इत्युपद्रवलक्षणम्।

आ० र०- उपद्रवानाह-तेषामिति। उद्धंसो-वैकल्यम्। तेषामिति रूपप्राधान्यार्थम्, न स्वतन्त्रे पीनसादावमी उपद्रवाः।

तत्र वाताच्छिरःपार्श्वशूलमंसाङ्गमर्दनम्॥ १६॥
कण्ठोद्धंसः स्वरभ्रंशः

स०-तत्र-तस्मिन् राजयक्ष्माख्ये व्याधौ, वातादधिकात् शिरःशूलादयः स्युः।

आ० र०- वातजस्य रूपमाह-तत्र वातादिति। असस्य पृथग्वचनमतिशयार्थम्।

पित्तात्पादांसपाणिषु।
दाहोऽतिसारोसृक्छर्दिर्मुखगन्धो ज्वरो मदः॥ १७॥

स०-पित्तादधिकात् पादादिषु दाहः स्यात्। तथा, अतीसारादयश्च स्युः।

आ० र०- पित्तजस्य रूपमाह-पित्तादिति।

कफादरोचकश्छर्दिः कासो मूर्द्धाङ्गगौरवम्।
प्रसेकः पीनसः श्वासः स्वरसादोऽल्पवह्निता॥ १८॥

स०-कफादधिकादरोचकादयो दश स्युः।

आ० र०- कफजस्य रूपमाह-कफादिति।

यक्ष्मिणो मांसा(अन्ना)द्यभ्यवहारतोऽपि धातुक्षयो जायते, न धातुपुष्टिः, इत्यत्र युक्तिमाह-

दोषैर्मन्दानलत्वेन सोपलेपैः कफोल्बणैः।
स्रोतोमुखेषु रुद्धेषु धातूष्मस्वल्पकेषु च॥ १९॥
विदह्यमानः स्वस्थाने रसस्तांस्तानुपद्रवान्।
कुर्यादगच्छन्मांसादीनसृक् चोर्ध्वं प्रधावति॥ २०॥
पच्यते कोष्ठ एवान्नमन्नपक्त्रैव चास्य यत्।
प्रायोऽस्मान्मलतां यातं नैवालं धातुपुष्टये॥ २१॥
रसोऽप्यस्य न रक्ताय मांसाय कुत एव तु।
उपस्तब्धः स शकृता केवलं वर्तते क्षयी॥ २२॥

स०-दोषैः-वातपित्तकफैः, कफोल्बणत्वात् स्रोतोद्वारेषु रुद्धेषु-पिहितेषु सत्सु, रसः स्वस्थान एव विदह्यमानो-न सम्यग्रक्ततां प्राप्नुवन्, तांस्तान्-अनेकान् कण्ठोद्धंसादीन्, उपद्रवान् कुर्यात्। किम्भूतैर्दोषैः ? कफोल्बणैः-श्लेष्माधिकैः। अत एव कफाधिकत्वात् सहोपलेपेन श्लेष्मलेपेन सह वर्तन्ते सोपलेपाः, तैस्तथाविधैर्दोषैस्तदानीं मन्दानलत्वं क्रियते। तेनैव च मन्दानलत्वेन हेतुना

धातूष्मसु-रसाद्यग्निषु, अल्पकेषु-अतिशयेनाल्पेषु। एवमनेककारणसद्भावाद्रसः स्वस्थान एव विदह्यमानः-पित्तकारिणीं मध्यमां पाकावस्थामनुभवन् सम्यक् पाकमगच्छन्, यथोचितान् विकारांस्तांस्तान् कुर्वन्, मांसादीन्-मांसप्रभृतिकान् धातून्, अगच्छन्-अप्राप्नुवन्, विदह्यमानतया रक्ततामापन्नः, तदसृक् चोर्ध्वं प्रधावति-ऊर्ध्वं प्रसर्पति, केवलं निष्ठीवनसहितं वा। तस्मात् क्षयिणो न तन्मांसादिधातुपुष्टये।

किञ्चास्मादपि हेतोः स रसो न धातुपुष्टये। [यत्-] यस्मात्, [अन्नं] पच्यते-अन्नं सारकिट्टत्वं नीयते, अन्नपक्त्रैव-जाठराग्निना, कोष्ठ एव-आमपक्वाशयाख्ये। उभयत्रेवकारोऽवधारणे। कोष्ठ एव-न धातुषु, जाठराग्निनैव-न धात्वग्निभिः, इति। यत एवं ततोऽस्मात्-प्राङ्निरूपिताद्धेतुकदम्बकात्, प्रायो मलतां-आधिक्येन मूत्रपुरीषतां, प्राप्तमन्नं नैव धातुपुष्टयेऽलं-समर्थम्। धातुपुष्टिग्रहणे नैतत्सूचयति,-अभिनवमृत्कुम्भजललवस्यन्दनन्यायेन सूक्ष्मस्रोतोनुप्रवेशितया सोऽन्नरसो धात्वाप्यायनमात्रं करोत्येव, अन्यथा वर्षगणानुबन्धि जीवितं क्षयिणो न सम्भाव्येत। तस्माद्धातुस्थितिमात्रं भवति न तु धातुपोषणमिति स्थितम्।

रसः-उभयरूपोऽन्नरसो धातुरसो वा, अस्य-क्षयिणः, निकटस्य रक्तधातोर्न पुष्टये, मांसधातोर्विप्रकृष्टस्य तु कुत एव स्यात् ? एवं न सम्भाव्यत इत्यपिशब्दार्थः।

ननु, यद्येवं तत्कथमन्येभ्यो धातुभ्यो विशेषेण धारणस्वभावेभ्यो विना क्षयी जीवेत्? इत्याशङ्क्याह-उपस्तब्ध इति। सः-क्षयी, शकृता-पुरीषेण, केवलमुपस्तब्धः-कृतावष्टम्भो, वर्तते-प्राणिति, पूर्वोक्तन्यायेन किञ्चिदाहाररसाप्यायितैर्धातुभिर्धारणस्वभावैर्धृतमात्रः। ननु, "विदह्यमानः स्वस्थाने रसस्तांस्तानुपद्रवान्। कुर्यादगच्छन्मांसादीनसृक् चोर्ध्वं प्रधावति॥" इत्यनेन रक्तस्य सत्ता प्रदिपादिता। "रसोऽप्यस्य न रक्ताय" इत्यनेन क्षयिणो रक्तस्याभावः प्रत्यपादि। तदिमे वाक्ये परस्परं व्याघ्नाते। अत्रोच्यते। नानयोर्वाक्ययोः परस्परं विरोधः। यतः " असृक् चोर्ध्वं प्रधावति" इत्यनेन न तद्धातुरूपतां प्राप्तमुक्तम्। किन्तर्हि ? रसस्य विदह्यमानतया स्वस्थानस्थितस्य रक्तधात्वाशयमगच्छतो रक्तोद्भूतिरुक्ता। अनेनैवाभिप्रायेणोत्तरत्र वाक्ये "रसोऽप्यस्य न रक्ताय" इत्युवाच। अनेन हि रसो धातुरूपाय रक्ताय शोषिणो न सम्पद्यते इति प्रत्यपादि।

आ० र०- त्रयाणां सामान्यं रूपमाह-दोषैरिति। उपलेपो-मलावगुण्ठनम्। विदह्यमानः-पवनपक्तः, धातूष्मणामल्पत्वात्। स्वस्थान एव-न रक्तादिस्थानेषु, स्रोतोमुखरोधात्। तांस्तान्-रसवृद्ध्युक्तान् सामदोषोक्तंश्च। कोष्ठ एव-नस्रोतोन्तरेषु। अन्नपक्त्रैव-न् भूतधात्त्वग्निभिः।

अथास्य क्षयिणः साध्यासाध्यताम् निरूपयति-

लिङ्गेष्वल्पेष्वपि क्षीणं व्याध्यौषधबलाक्षमम्।
वर्जयेत्

स०-क्षयिणं बलमांसाभ्यां क्षीणं लिङ्गेषु-पीनसादिषु, अल्पेष्वपि सत्सु-न सर्वेषूत्पन्नेषु, वर्जयेत्-नोपक्रमेत्। कि तम्? व्याध्यौषधबलाक्षमम्। व्याध्यौषधयोर्बलं व्याध्यौषधबलम्, तस्याक्षमम्। क्षयाख्यस्य व्याधेर्यद्बलं तथाऽस्य शमनोपायस्यौषधस्य यद्बलं तत्राक्षमं-असहं, यतस्ततो वर्जयेदित्यर्थः।

आ० र०- असाध्यलक्षणमाह-लिङ्गेष्विति। क्षीणं-क्षयरोगिणम्। व्याधिबलं-दाहादिवेगम्। औषधबलं-वमनादिवेगम्। न क्षमते-न सहते। "यक्ष्मा पार्श्वरुजानाहरक्तछर्द्यंसतापिनम्।" इति विकृतौ (ह्.शा.अ. ५१७७)।

साधयेदेव लिङ्गेषु सर्वेष्वपि ततोऽन्यथा॥ २३॥
इति राजयक्ष्मनिदानम्।

स०-अ(त)तोऽन्यथा-विपरीतलक्षणं राजयक्ष्मिणं बलमांसाभ्यामक्षीणमत एव व्याध्यौषधबलक्षमं, सर्वेष्वपि-पीनसादिषु लिङ्गेष्वपि सत्सु, साधयेदेव। किंपुनर्द्वित्रादिष्वेषु साधयेदित्यपिशब्दार्थः।

आ० र०- साध्यलक्षणमाह-साधयेदेवेति। ततोऽन्यथाव्याध्यौषधबलं क्षमते चेत्। इति राजयक्ष्मनिदानम्।

अथास्य व्याधेरुपद्रवभूतानामादिशब्दगृहीतानां पञ्चानां स्वरभेदादीनां रोगाणां निदानान्याह-

अथ स्वरभेदनिदानम्।

दोषैर्व्यस्तैः समस्तैश्च क्षयात् षष्ठश्च मेदसा।

स्वरभेदो भवेत्

स०-दोषैः-पृथग्वातपित्तकफैः, समस्तैः-सन्निपतितैः, तथा क्षयात्, तथा षष्ठः स्वरभेदो मेदसा, स्यात्।

तत्र क्षामो रूक्षश्चलः स्वरः॥२४॥

शूकपर्णाभकण्ठत्वं स्निग्धोष्णोपशयोऽनिलात्।

स०-तत्र-तेषु षट्सु स्वरभेदेषु मध्ये, वातात्स्वरभेदे सति क्षामादिमान् स्वरः स्यात्। तथा, शूकपूर्णसदृशगलत्वं स्निग्धोष्णोपशयश्च भवति।

पित्तात्तालुगले दाहः शोष उक्तावसूयनम्॥२५॥

स०-पित्तात् स्वरभेदे सति तालुनि गले च दाहः, तथा शोषः, प्र

कृतत्वात्तालुगलयोरेव। तथा, उक्तावसूयनं-वाक्यविषयेऽसहनम्, पित्तस्वरभेदी वाक्यं वक्तुमसमर्थ इत्यर्थः।

लिम्पन्निव कफात्कण्ठं मन्दः खुरखुरायते।

स्वरो विबद्धः

स०-कफात्स्वरभेदे कण्ठं लिम्पन्निव-उपलेपमिव गलस्य कुर्वन्, खुरखुरायते-प्रकृतत्वात् कण्ठस्यैव खुरखुरमित्यव्यक्तं शब्दं करोति। तथा, सर्वेभ्यः स्वरभेदेभ्योऽयं मन्दः स्वरो-नोच्चैः श्रूयते। तथा, विबद्धो-वदतो मध्ये स्खलनरूपः।

सर्वैस्तु सर्वलिङ्गः

स०-सर्वैः-त्रिभिर्दोषैः समुदितैः, सर्वलिङ्गः-त्रिदोषलक्षणः, सर्वभेदो भवति।

क्षयात्कषेत्॥ २६॥

धूमायतीव चात्यर्थम्

स०-क्षयात् स्वरभेदः कषेत्-हिंस्यात्, कण्ठमर्मघटनादित्यर्थः। अनुक्तमपि प्रकृतत्वात् कण्ठमिति लभ्यते। तथा, क्षयस्वरभेदी धूमायतीवातिशयेन। अत्यर्थशब्देन पित्तस्वरभेदेऽपि धूमायनं भवतीति गमयति। धूमायतीति धूमनिःसरणमिव नासिकादिदेशेष्वनुभवति।

मेदसा श्लेष्मलक्षणः।

कृच्छ्रलक्ष्याक्षरश्च

स०-मेदसा स्वरभेदः श्लेष्मस्वरभेदलक्षणः। तथा, कृच्छ्रेण-कथञ्चित्, लक्ष्याणि-ज्ञेयानि, अक्षराणि यत्र स एवम्। एतदेव कृच्छ्रलक्ष्याक्षरत्वं कफस्वरभेदादधिकम्।

अत्र सर्वैरन्त्यं च वर्जयेत्॥ २७॥

इति स्वरभेदनिदानम्।

स०-सर्वैर्दोषैर्यः स्वरभेदः, तथाऽन्ते पठितत्वान्मेदःस्वरभेदः-अन्त्यः, तं च वर्जयेत्। चतुरस्त्वन्यान् साधयेदित्यर्थादवगम्यते।

अथारोचकनिदानम्।

अरोचको भवेद्दोषैर्जिह्वाहृदयसंश्रयैः।
सन्निपातेन मनसः सन्तापेन च पञ्चमः॥२८॥

स०-जिह्वा च हृदयं च जिह्वाहृदयम्, तत्संश्रयः-आश्रयो, येषां तैस्तत्रस्थैः पृथग्वातपित्तकफैररोचकः स्यात्। तथा, सन्निपातेनार्थाज्जिह्वाहृदयसंश्रितेनारोचकः स्यादिति योज्यम्। तथा, मनसः सन्तापेन-अनेकविधेन क्रोधशोकादिनोपतप्तेन, पञ्चमोऽरोचक आगन्तुर्भवेत्। अत्रापि यथास्वं दोषाणां जिह्वाहृदयसंश्रितत्वमवश्यमाश्रयणीयम्। उपादानादेव पञ्चत्वे लब्धे मनःसन्तापजः पञ्चम एवेति नियमार्थं पञ्चमग्रहणम्। मन्युशोकाद्यनेकप्रकारमनःसन्तापत्वेऽप्येक एव मनःसन्तापजोऽरोचक इत्यर्थः।

कषायतिक्तमधुरं वातादिषु मुखं क्रमात्।
सर्वोत्थे विरसं शोकक्रोधादिषु यथामलम्॥२९॥

इत्यरोचकनिदानम्।

स०-वाताद्युद्भवेष्वरोचकेषु मुखं-आस्यं, क्रमेण कषायतिक्तमधुरं भवति। व्याधिस्वभावात् पित्तारोचकेऽपि तिक्तवक्त्रता भवति, न कटुकास्यत्वम्। सर्वोत्थे-सन्निपातजेऽरोचके, विरसमास्यं भवति-निश्चितरसाज्ञानम्। शोकक्रोधादिसमुत्थेष्वरोचकेषु यथामलं-यथादोषं, मुखं भवेत्। तत्र शोकभयकामलोभेर्ष्यादिसन्तप्तमनःसमुत्थे वातप्रकोपात् कषायम्, क्रोधसन्तप्तमनःसमुत्थे वातप्रकोपात् तिक्तम्, ग्रहोपतप्तमनःसमुत्थे सन्निपातप्रकोपात् विरसास्यत्वम्, इति यथामलशब्दस्यार्थः।

आ० र०- पञ्चानामरोचकानां लक्षणान्याह-कषायतिक्तमधुरमिति। "ग्रहादा सन्निपातस्य भयादौ मरुतस्त्रये। कोपः कोपेऽपि पित्तस्य" (ह.नि.अ. २१४३) इति शोकादौ दोषविशेषो ज्ञेयः। इत्यरोचकनिदानम्।

अथ छर्दिनिदानम्।

छर्दिर्दोषैः पृथक्सर्वैर्द्विष्टैरर्थैश्च पञ्चमी।

स०-पृथक्-प्रत्येकं, दोषैः-वातपित्तकफैः, छर्दिर्भवेत्। सन्निपतितैस्त्रिभिरपि छर्दिः स्यात्। तथा, द्विष्टैः-अनभिप्रेतैः शब्दादिभिश्च, पञ्चमी छर्दिर्भवेत्। पूर्ववत् पञ्चमीत्येतन्नियमार्थम्। द्विष्टानां ह्यर्थानां बहुत्वात् बह्वयश्छर्दयो भवन्तीत्याशङ्क्यते तथा शङ्कानिवृत्तये द्विष्टार्थयोगजा एकैव छर्दिरित्युक्तम्।

उदानो विकृतो दोषान् सर्वास्वप्यूर्ध्वमस्यति॥३०॥

स०-उदानाख्यो वायुर्विकृतः सर्वानपि दोषान्-वातपित्तकफान्, ऊर्ध्वमस्यति-क्षिपति। अपिशब्द एवार्थे, सर्वास्वेव छर्दिष्वत्यर्थः।

तासूत्क्लेशास्यलावण्यप्रसेकारुचयोऽग्रगाः।

स०-तासु-छर्दिषु, उत्क्लेशादयोऽग्रगाः-अग्रे गच्छन्ति प्राग्रूपतयोद्भवन्ति। उत्क्लेशः-स्वस्थान एव मूर्तस्य दोषस्योदयो बुद्बुदवदुत्थानम्।

नाभिपृष्ठं रुजन् वायुः पार्श्वे चाहारमुत्क्षिपेत्॥३१॥

ततो विच्छिन्नमल्पाल्पं कषायं फेनिलं वमेत्।

शब्दोद्गारयुतं कृष्णमच्छं कृच्छ्रेण वेगवत्॥३२॥

कासस्याशोषहृन्मूर्द्धस्वरपीडाक्लमान्वितः।

स०-वायुः कासादिमान् इदमिदं कुर्वन् वमेत्-छर्दिं करोति। नाभिं पृष्ठं च रुजन्-पीडयन्, पार्श्वे च रुजन्, आहारमुत्क्षिपेत्-ऊर्ध्वं प्रेरयेत्। ततः-तस्मादाहारस्योर्ध्वगमनादनन्तरं, विच्छिन्नं कृत्वा-न निरन्तरं, अल्पाल्पं-अल्पं कृत्वा, कषायं वमेत्-न मधुराद्यन्यतमम्। तथा, फेनिलं-फेनयुक्तम्। फेनिलमिति "फेनादिलच्च" इतीलच्। तथा, शब्दयुतमुद्गारयुतम्। तथा,

कृष्णं-कृष्णवर्णम्। तथा, अच्छं-तनु। तथा, कृच्छ्रेण-कथंकथञ्चित् न यथासुखम्। तथा, वेगवत्-वेगयुतम्।

पित्तात्क्षारोदकनिभं धूम्रं हरितपीतकम्॥३३॥
सासृगम्लं कटूष्णं च तृण्मूर्च्छातापदाहवत्।

स०-पित्तात् क्षारोदकसदृशादिकं वमेत्। तथा, तृण्मूर्छातापदाहा विद्यन्ते यस्मिंस्तदेवं तृष्णादियुक्तं यथा भवति तथा वमेत्।

कफात् स्निग्धं घनं शीतं श्लेष्मतन्तुगवाक्षितम्॥३४॥
मधुरं लवणं भूरि प्रसक्तं लोमहर्षणम्।
मुखश्चयथुमाधुर्यतन्द्राहृल्लासकासवान्॥३५॥

स०-कफात्स्निग्धादिकं वमेत्। तथा, श्लेष्मणः सम्बन्धिना तन्तुजालेन गवाक्षितम्। तथा, मुखश्चयथ्वादिमान्। तथा, मधुरादिकं वमेत्।

सर्वलिङ्गा मलैः सर्वै रिष्टोक्ता या च तां त्यजेत्।

स०-सर्वलिङ्गा छर्दिः सर्वैर्मलैः-वातपित्तकफैः सन्निपतितैः, भवेत्। न केवलं त्रिभिर्दोषैः सर्वलिङ्गा, या च रिष्टोक्ता-विकृतिविज्ञानीयाध्याये (हृ.शा.अ.५।७७) -"छर्दिर्वेगवती" इत्यादिना ग्रन्थेनोक्ता, साऽपि सर्वलिङ्गा-दोषत्रयलक्षणोपेता, तां त्यजेत्-न चिकित्सेत्। न तु रिष्टोक्ता या छर्दिस्तां त्यजेदिति व्याख्येयम्, तस्या रिष्टत्वेनैवासाध्यत्वस्य प्रतिपादितत्वात्।

पूत्यमेध्याशुचिद्विष्टदर्शनश्रवणादिभिः॥३६॥
तप्ते चित्ते हृदि क्लिष्टे छर्दिर्द्विष्टार्थयोगजा।

स०-पूत्यादिभिस्तप्ते चित्ते-उपतप्ते मनसि, तथा तैरेव पूत्यादिभिः क्लिष्टे-पीडिते, हृदि या जायते छर्दिः सा द्विष्टार्थयोगजा छर्दिरुच्यते। आदिः-प्रकारे, यथा-आकृतिगणेषु।

ननु, कृम्यादिजान्यन्यानि छर्दींषि सम्भवन्त्येव। तेषां लक्षणं कस्मान्नोक्तम् ? इत्याह-

वातादीनेव विमृशेत्कृमितृष्णामदौहृदे॥ ३७॥
शूलवेपथुहृल्लासैर्विशेषात् कृमिजां वदेत्।
कृमिहृद्रोगलिङ्गैश्च

इति छर्दिनिदानम्।

स०-कारणे कार्योपचारात् कृम्यादिशब्दैरेव छर्दय उच्यन्ते। कृमितृष्णामगर्भिणीदौहृदजे छर्दिषि वातादीनेव यथा यथं स्वलक्षणैर्विमृशेत्-विचारयेल्लक्षयेत्। न हि वातादीनन्तरेणैताः छर्दयः कथञ्चिदपि सम्भवन्ति। अत एवैवकारोऽवधारणार्थोऽत्र व्यधायि। एवं कृमिजां कदाचिद्वायुच्छर्दिलक्षणोपेतामथवा पित्तच्छर्दिलक्षणोपेतां कफच्छर्दिलक्षणोपेतां वा यथायथं लक्षयेत्। एवं तृष्णामदौहृदच्छर्दिषि वातादीन् विमृशेत्।

विशेषेण शूलवेपथुहृल्लासैः कृमिजां वदेत्। कृमिहृद्रोगलक्षणैश्च-अनन्तरमेव वक्ष्यमाणैः, कृमिजां वदेत्।

अधुना हृद्रोगं लिलक्षयिषुराह-

अथ हृद्रोगनिदानम्।
स्मृताः पञ्च तु हृद्रदाः॥ ३८॥

तेषां गुल्मनिदानोक्तैः समुत्थानैश्च सम्भवः।

स०-हृद्रदाः पञ्च स्मृताः, तन्त्रकृद्भिरिति शेषः। [तेषां-हृद्रोगाणां, गुल्मनिदानोक्तैः-वक्ष्यमाणैः, समुत्थानैः-कारणैः, सम्भवः-उत्पत्तिः।]

आ० र०- अथ हृद्रोगप्रकरणम्। तत्र हृद्रोगभेदानाह-स्मृता इति। वातपित्तकफसन्निपात-क्रिमिभिः। सङ्ग्रहे तु (नि.अ. ५)-"तेषां गुल्मनिदानोक्तैः समुत्थानैश्च सम्भवः।" इति। समुत्थानैः-हेतुभिः।

वातेन शूल्यतेऽत्यर्थं युद्यते स्फुटतीव च॥ ३९॥
भिद्यते शुष्यति स्तब्धं हृदयं शून्यता द्रवः।
अकस्माद्दीनता शोको भयं शब्दासहिष्णुता॥ ४०॥
वेपथुर्वेष्टनं मोहः श्वासरोधोऽल्पनिद्रता।

स०-वातेन हृद्रोगेऽत्यर्थं हृदयं शूल्यते। अत्यर्थशब्देनेदं गमयति,-अन्येष्वपि हृद्रोगेषु हृदयं शूल्यतेऽतिशयेन तु वातजे हृद्रोगे इति। तथा, तुद्यते-प्राजननेनेव। शूलं-सन्तता पीडा। तोदो-विच्छिन्नोऽतिशयेन रुगुद्भवः। तथा, हृदयं स्फुटतीत्यादिक्रियादियुतं भवति। तथा, शून्यता द्रवत्वं च, प्रकृतत्वाद्धृदयस्यैव स्यादिति बोध्यम्।

आ० र०- वातजलक्षणमाह-वातेनेति। शूल्यते-पीडननेनेव। तुद्यते-निस्वननेनव। स्फुटति-विशीर्यतेति। भिद्यतेविदारणेनेव। शून्यता द्रवः, अकस्माद्दीनताशोकादीनि [च] नव हृदयस्य।

पित्तात्तृष्णा भ्रमो मूर्च्छा दाहः स्वेदोऽम्लकः क्लमः॥ ४१॥
छर्दनं चाम्लपित्तस्य धूमकः पीतता ज्वरः।

स०-पित्तात्-पित्तेन, तृष्णादय स्युः।

आ० र०- पित्तजलक्षणमाह-पित्तादिति।

श्लेष्मणा हृदयं स्तब्धं भारिकं साश्मगर्भवत्॥४२॥

कासाग्निसादनिष्ठीवनिद्रालस्यारुचिज्वराः।

स०-श्लेष्मणा हृद्रोगे हृदयं स्तब्धं, तथा भारिकं-गुरु, भवति। कथम्? साश्मगर्भवत्-विद्यमानाश्मगर्भसदृशम्। तथा, कासादयः स्युः।

आ० र०- कफजलक्षणमाह-श्लेष्मणेति।

सर्वलिङ्गस्त्रिभिर्दोषैः

स०-सर्वलिङ्गो हृद्रोगस्त्रिभिर्दोषैः स्यात्।

आ० र०- त्रिदोषजलक्षणमाह-सर्वलिङ्गमिति।

कृमिभिः श्यावनेत्रता॥४३॥

तमःप्रवेशो हृल्लासः शोषः कण्डूः कफस्रुतिः।

हृदयं प्रततं चात्र क्रकचेनेव दार्यते॥४४॥

चिकित्सेदामयं घोरं तं शीघ्रं शीघ्रकारिणम्।

इति हृद्रोगनिदानम्।

स०-कृमिभिश्च हृद्रोगे श्यावाक्षिताद्याः स्युः। अत्र-कृमिहृद्रोगे, हृदयं क्रकचेनेव-करपत्रेणेव, [प्रततं-] सन्ततं, दार्यते। तं-कृमिहृद्रोगाख्यमामयं, घोरं-अतिदुःसहं, शीघ्रकारिणं-आशुविघातकारिणं, शीघ्रं-आश्वेव, चिकित्सेत्। महामर्मणो हृदयस्य कृमिभिर्भक्षणात्।

आ० र०- कृमिजलक्षणमाह-कृमिभिरिति। वङ्गसेने (हृदयरोगाधिकारे श्लो.१-४)-"अत्युष्णगुर्वम्लकषायतिक्तश्रमाभिघाताध्यशनप्रसङ्गैः। सञ्चिन्तनैर्वेगविधारणैश्च हृदामयः पञ्चविधः प्रदिष्टः॥दूषियित्व रसं दोषा विगुणा हृदयं गताः। हृदि बाधां प्रकुर्वन्ति हृद्रोगं तं प्रचक्षते॥' इति हृद्रोगनिदानम्।

उक्ता हृद्रोगाः। शीघ्रकारित्वसामान्यात् तृष्णाऽन्तरं व्याख्यायते-

अथ तृष्णानिदानम्।

वातात्पित्तात्कफात्तृष्णा सन्निपाताद्रसक्षयात्॥४५॥

षष्ठी स्यादुपसर्गाच्च

स०-वातादिभिः पञ्च तृष्णाः स्युः। षष्ठी स्यादुपसर्गाच्च। उपादानादेव षड्वृष्णाया लब्धत्वात् षष्ठीत्येतद्वचनं नियमार्थम्। आमोद्भवाद्या या वक्ष्यमाणास्तृष्णास्ताः सर्वास्तृष्णानां षट्वं नातिक्रामन्ति, वातपित्तजत्वात्। प्रायेण तासामास्वेवान्तर्भावः।

आ० र०- अथ तृष्णानिदानम्। तत्र तृष्णाबेदानाहवातादिति।

वातपित्ते तु कारणम्।

सर्वासु

स०-सर्वासु-पूर्वोक्तासु वक्ष्यमाणासु च तृष्णासु, वातपित्ते कारणम्।

आ० र०- वातपित्तहेतुकत्वमाह-वातपित्ते त्विति।

ते एव वातपित्ते हेतुः। कुत एवम्? इत्याह-

तत्प्रकोपो हि सौम्यधातुप्रशोषणात्॥४६॥

सर्वदेहभ्रमोत्कम्पतापतृड्वाहमोहकृत्।

स०-हि-यस्मात्, सौम्यस्य शरीरगतस्य धातोः-श्लेष्मणो रसादेर्धातोः, आहारविहारादिना यत्प्रशोषणं तस्मात्, तयोः-वातपित्तयोः, प्रकोपो 'जायते' इत्यध्याहार्यम्। किम्भूतः प्रकोपः ? सर्वदेहभ्रमोत्कम्पतापतृड्दाहमोहकृत्।

आ० र०- उक्ते युक्तिमाह-तत्प्रकोपो हीति। हि-यस्मात्, तयोः-वातपित्तयोः प्रकोपः, सर्वस्मिन् देहे भ्रमादीन् करोति। सौम्यान् धातून् प्रशोष्य तस्मात्। ताभ्यां विना न तृष्णोत्पत्तिः। भ्रमादीनां ग्रहणं तृष्णोपद्रवत्वज्ञापनार्थम्।

सौम्यधातुप्रशोषणपूर्वकं तृष्णानां यतो जन्म, तस्मादिदमाह-

जिह्वामूलगलक्लोमतालुतोयवहाः सिराः॥४७॥
संशोष्य तृष्णा जायन्ते

स०-जिह्वादिसिराः संशोष्य तृष्णाः समुत्पद्यन्ते।

आ० र०- तृष्णासम्प्राप्तिमाह-जिह्वामूलगलेति।

तासां सामान्यलक्षणम्।

मुखशोषो जलातृप्तिरन्नद्वेषः स्वरक्षयः॥४८॥
कण्ठौष्ठजिह्वाकार्कश्यं जिह्वानिष्क्रमणं क्लमः।
प्रलापश्चित्तविभ्रंशस्तृड्ग्रहोक्तास्तथाऽऽमयाः॥४९॥

स०-मुखशोषादिकं तृड्ग्रहोक्तामयपर्यन्तं निर्दिष्टं तासां-तृष्णानां, सामान्यलक्षणम्। तृड्ग्रहोक्ताः-रोगानुत्पादनीयोक्ताः (ह. सू. अ. ४।१०) शोषाङ्गसादबाधिर्यादयः।

आ० र०- सामान्यरूपमाह-तासामिति। तृट्ग्रहोक्ताः-"शोषाङ्गसादबाधिर्यसम्मोहभ्रमहृद्ग्रदाः। तृष्णाया निग्रहात्" (ह्.सू.अ. ४/१०) इत्युक्ताः।

मारुतात् क्षामता दैन्यं शङ्खतोदः शिरोभ्रमः।
गन्धाज्ञानास्यवैरस्यश्रुतिनिद्राबलक्षयाः॥५०॥
शीताम्बुपानाद्दृद्धिश्च

स०-वातात्तृष्णायां क्षामताद्याः स्युः।

आ० र०- वातजालक्षणमाह-मारुतादिति।

पित्तान्मूर्च्छास्यतिक्तता।
रक्तेक्षणत्वं प्रततं शोषो दाहोऽतिधूमकः॥५१॥

स०-पित्तात्तृष्णायां मूर्च्छादयो भवन्ति।

आ० र०- पित्तजालक्षणमाह-पित्तादिति। प्रततं शोषः मुखे, पित्तर्यं(?)।

कफतृष्णामाह-

कफो रुणद्धि कुपितस्तोयवाहिषु मारुतम्।
स्रोतःसु स कफस्तेन पङ्कवच्छोष्यते ततः॥५२॥
शुकैरिवाचितः कण्ठो निद्रा मधुरवक्कता।
आध्मानं शिरसो जाड्यं स्तैमित्यच्छर्द्यरोचकाः॥५३॥

आलस्यमविपाकश्च

स०-कफः कुपितो जलवाहिषु स्रोतःसु यदा मारुतं रुणद्धि तदा स च कफस्तेन-मरुता, पङ्क इव शोष्यते। ततः-तस्मिन् कफे शुष्के सति, कण्ठः शूकैरिवाचितो-व्याप्तः, स्यात्। तथा, निद्रादयश्च स्युः।

आ० र०- कफजालक्षणमाह-कफो रुणद्धीति। कफस्य साक्षाद्धेतुत्वाभावात् तद्वरोधकःपितेन वातेन शुष्कत्वमुक्तम्। ततः-शुष्ककफात्।

सर्वैः स्यात्सर्वलक्षणा।

स०-सर्वैः-सन्निपतितैः, सर्वलिङ्गा तृष्णा स्यात्।

आ० र०- सन्निपातजालक्षणमाह-सर्वैः स्यादिति।

आमोद्भवा च, भक्तस्य संरोधाद्वातपित्तजा॥५४॥
उष्णाक्रान्तस्य सहसा शीताम्भो भजतस्तृषम्।
ऊष्मा रुद्धो गतः कोष्ठं यां कुर्यात्पित्तजैव सा॥५५॥
या च पानातिपानोत्था, तीक्ष्णाग्नेः स्नेहजा च या।
स्निग्धगुर्वम्लवणभोजनेन कफोद्भवा॥५६॥

स०-आमोद्भवा च तृष्णा भक्तस्याहारस्य संरोधात् स्यात्। सा च वातपित्तजा।

उष्णेन म्लानस्य नरस्य सहसा-झटित्येव, शीतं जलं सेवमानस्योष्मा रुद्धः कोष्ठं गतो यां तृषं-तृष्णां, कुर्यात् सा पित्तजैव तृष्णा, न त्वन्या बोध्या।

या च तृट् पानस्य-मद्यपानस्य, अतिपानोद्भवा साऽपि पित्तजैव।

या च तीक्ष्णाग्नेः पुरुषस्य स्नेहजा तृट् साऽपि पित्तजैव।

स्निग्धादिगुणयुक्तेन भोजनेन या तृट् स्यात् सा कफसम्भवा वेद्या।

आ० र०- तृष्णान्तराणामन्तर्भावमाह-आमोद्भवा चेति, आमजायाः सन्निपातजायामन्तर्भावः। भक्तस्य संरोधाद्वातपित्तजेति, उपवासजायाः वातपित्तजायाम्। उष्णाक्रान्तस्यसहसा शीताम्भो भजतस्तृषम्। ऊष्मा रुद्धो गतः कोष्ठं यां कुर्यात्पित्तजैव सेति, उष्णपीडितस्य सहसा बहिः शीताम्बुसेचनाज्जातायाः पित्तजायाः पित्तजायाम्। या च पानातिपानोत्थेति, मद्यातिपानजायाश्च। तीक्ष्णा ग्निस्नेहजा च येति, तीक्ष्णाग्निपीतस्नेहजायाश्च। स्निग्धगुर्वम्लवणभोजनेन कफोद्भवेति, स्निग्धादिभोज्ञनजायाः कफजायाम्।

तृष्णा रसक्षयोक्तेन लक्षणेन क्षयात्मिका।

स०-रसक्षयोक्तेन लक्षणेन-"रसे रौक्ष्यं श्रमः" (ह्. सू. अ. ११।१७) इत्यादिग्रन्थनिर्दिष्टेन लक्षणेन, क्षयात्मिका तृष्णा बोध्या।

आ० र०- रसक्षयजालक्षणमाह-तृष्णेति। रसक्षयोक्तेन-"रसेरौक्ष्यं श्रमः शोषो ग्लानिः शब्दासहिष्णुता (ह्.सू.अ. ११)।" "वेपथुर्वेष्टनं मोहः श्वासरोधोऽल्पनिद्रता।" (?) इत्युक्तेन।

शोषमेहज्वराद्यन्यदीर्घरोगोपसर्गतः॥५७॥

या तृष्णा जायते तीव्रा सोपसर्गात्मिका स्मृता॥५७ १/२॥

इति तृष्णानिदानम्।

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां तृतीये शरीरस्थाने राजयक्ष्मादिनिदानं नाम पञ्चमोऽध्यायः॥५॥

****

स०-शोषमेहज्वराद्यन्यतमदीर्घरोगोपसर्गात्-दीर्घकालानुबन्धात्, या तृष्णा स्यात् सोपसर्गात्मिका स्मृता, मुनीन्द्रैरिति शेषः।

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टाङ्गहृदयटीकायां सर्वाङ्गसुन्दराख्यायां तृतीये निदानस्थाने राजयक्ष्मादिनिदानं नाम पञ्चमोऽध्यायः समाप्तः॥५॥

आ० र०- उपसर्गजालक्षणमाह-शोषमेहेति। शोषो-राजयक्ष्मा। मेहः-प्रमेहः। आदिशब्दात् कासश्वासोरःक्षतोदरादयः। अन्यः-एषामन्यतमो यो दीर्घो रोगः, तेनोपसर्गः-अभिभूतत्वं, तस्मात्। असाध्यलक्षणं विकृतिविज्ञाने (हृ.शा.अ. ५१७८)-"तृष्णाऽन्यरोगक्षपितं बहिर्जिह्वं विचेतनम्।" इति। वङ्गसेने (तृषाधिकारे श्लो.१)-"भयश्रमाभ्यां बलसङ्क्षयाद्वा ऊर्ध्वं चितं पित्तविवर्द्धनैश्च। पित्तं सवातं कुपितं नराणां तालुप्रपन्नं जनयेत्पिपासाम्। बाष्पावरोधात्कफसंवृतेऽग्नौ तृष्णा बलासेन भवेत्तथा तु। सर्वास्वतिप्रसक्ता रोगकृशानां वमिप्रसक्तानम्। घोरोपद्रव्युक्ता तृष्णामरणाय विज्ञेया॥" इति। इति तृष्णानिदानम्।

[इति हेमाद्रिटीकायामायुर्वेदरसायने।
निदानं राजयक्ष्मादि सामस्त्येन निरूपितम्॥५॥]

****

षष्ठोऽध्यायः।

राजयक्ष्मनिदानादनन्तरं मदात्ययनिदानारम्भः। यतो यथा राजयक्ष्मा दोषत्रयजस्तथा मदात्ययोऽपि। वक्ष्यति हि तत्र (श्लो. १४)-"सर्वेऽपि सर्वैर्जायन्ते व्यपदेशस्तु भूयसा।" इति।

तस्मान्मदात्ययनिदानमुच्यत इत्याह-

अथातो मदात्ययादिनिदानं व्याख्यास्यामः।
इति ह स्माहुरात्रेयादयो महर्षयः।

(गद्यसूत्रे॥२॥)

स०-पूर्ववद्व्याख्या।

तीक्ष्णोष्णरूक्षसूक्ष्माम्लं व्यवाय्याशुकरं लघु।
विकाषि विशदं मद्यमोजसोऽस्माद्विपर्ययः॥१॥

स०-तीक्ष्णोष्णादिगुणं मद्यम्। अस्मात्-मद्यात्, ओजसो विपर्ययो-वैपरीत्यम्, यथा-मन्दशीतस्निग्धसान्द्रमधुरस्थिरचिरकृद्गुरुश्लक्ष्णपिच्छिलत्वम्।

तीक्ष्णादयो विषेऽप्युक्ताश्चित्तोपप्लाविनो गुणाः।
जीवितान्ताय जायन्ते विषे तूत्कर्षवृत्तितः॥२॥

स०-एत एव तीक्ष्णादयो दश गुणा विषेऽप्युक्ताः। चित्तमुपप्लावितुं शीलं येषां ते चित्तोपप्लाविनः,-चित्तविभ्रमकारिणः। न केवलं मद्य इत्यपिशब्दार्थः। ननु, यदि त एव तीक्ष्णादयो गुणा विषे, त एव मद्ये, तत्कथं विषस्था एव तीक्ष्णादयो मारयन्ति न मद्यस्थाः ? इत्यत्र युक्तिमाह-जीवितान्तायेत्यादि। विषस्थास्तीक्ष्णादयो ये गुणास्ते मारणाय सम्पद्यते, उत्कर्षवृत्तितः-उत्कर्षवर्तनात्।

कथं कृत्वा मद्यं चेतो विकारं नयति ? इत्याह-

तीक्ष्णादिभिर्गुणैर्मद्यं मन्दादीनोजसो गुणान्।
दशभिर्दश सङ्क्षोभ्य चेतो नयति विक्रियाम्॥३॥
आद्ये मदे

स०-तीक्ष्णादिभिर्दशभिर्गुणैर्मन्दादीनोजसः सम्बन्धिनो गुणान् सङ्क्षोभ्य-समन्ताद्दुष्टतामापाद्य, चेतो विक्रियां-विकारं नयति, आद्ये मदे। ननु, तीक्ष्णादिभिर्मन्दादीनित्येतावदेवास्तु, किं दशभिर्दशेत्यनेन? पाठादेव हि दशसङ्ख्याऽवगमिष्यते। अस्त्येतत्। किन्तु सर्वैरेव तीक्ष्णादिभिः सर्वानपि मन्दादीन् सङ्क्षोभ्य चेतो विक्रियां मद्यं नयति, न तु कियद्भिरपि तीक्ष्णादिभिः कियत एव मन्दादीन्, इति प्रतिपादनाय सङ्ख्याग्रहणम्। उत्कर्षतारतम्यतस्त्वस्त्येव विशेषः, तेन सर्वत्र मदेनैव तुल्यः क्षोभ इति वेद्यम्। आद्ये च मदे यथास्वं प्रबोधजनके पुमान् स्थितो मद्यपानात्तादात्विकं सुखं समधिगच्छतीत्यनुक्तमपि सम्भाव्यते। तथा च मुनिः (च. चि. अ. २४।६४)-"पञ्चस्वर्थेषु कान्तेषु या रतिः प्रथमे मदे। यूनां वा स्थविराणां वा तस्या नास्त्युपमा भुवि॥" इति।

द्वितीये तु प्रमादायतने स्थितः।
दुर्विकल्पहतो मूढः सुखमित्यधिमुच्यते॥४॥

स०-अनन्तरं द्वितीये तु मदे स्थितः-प्राप्तः, स्वार्थैर्दुष्टैस्तैस्तैर्विकल्पैर्हतः-पुरुषार्थाद्विनष्टः, अत एव मूढः-कार्याकार्यानभिज्ञः, सुखमित्यधिमुच्यते-सुखमिति ज्ञानेन प्रथममदोत्पन्नेन तदानीमधिमुच्यते-अधिकं कृत्वा तेन सुखेन परित्यज्यते। तादात्विकमाद्यं सुखं नानुभवति, ओजसो विहतत्वात्। अन्ये त्वाहुः,-अवमुच्यते-निश्चिनोति सुखमेतदित्यभिनिविशते। किम्भूते मदे स्थितः ? प्रमादायतने, प्रमादानां-साहसानामिहामुत्र चाशुभहेतूनां, [आयतने-] स्थाने।

मध्यमोत्तमयोः सन्धिं प्राप्य राजसतामसः।

निरङ्कुश इव व्यालो न किञ्चिन्नाचरेज्जडः॥५॥

स०-मध्यमोत्तमयोः-द्वितीयतृतीययोः, सन्धिं प्राप्य-अन्तरं लब्ध्वा, पुरुषो राजसतामसो न किञ्चिदशुभं नाचरेत्-अपि तु सर्वमशुभमाचरेत्। राजससहितस्तामसो राजसतामसः। शाकपार्थिवादित्वात् मध्यम (उत्तर) पदलोपी समासः, राजसो वा तामसो वेत्यर्थः। राजसतामसग्रहणात् सात्विकः पुरुषो नेदृशीमवस्थां प्राप्नोतीति गमयति। निरङ्कुश इव व्यालः। यथा,-व्यालो-दुष्टहस्ती, जडो-बधिरः, तथा निरङ्कुशो, न किञ्चिदशुभं नाचरेत्, उन्मार्गप्रवृत्तत्वात्। तन्त्रान्तरे चैवमुक्तम्-"सात्विके शौचदाक्षिण्यहर्षमण्डनलालसः। गीताध्ययनसौभाग्यसुरतोत्साहकृन्मदः॥राजसे दुःखशीलत्वमात्मत्यागं ससाहसम्। कलहं सानुबन्धं च करोति पुरुषे मदः॥अशौचनिद्रामात्सर्यागम्यागमनलोलताः। असत्यभाषणं चापि कुर्याद्वै तामसे मदः॥" इति। व्यालग्रहणाद्यः शुद्धस्वभावो हस्ती स सृणिरहितोऽपि कदाचिद्धस्त्यारोहशब्दश्रवणात् कालोचितं सङ्केतमुपलभ्य युक्तमाचरत्येवेति, अतो व्यालो निरङ्कुश इति द्वितयमुपन्यस्तम्। तेजसः किञ्चिच्छेषत्वात् निन्द्यामिमामवस्थां प्राप्तः।

अत एवाह-

इयं भूमिरवद्यानां दौःशील्यस्येदमास्पदम्।

एकोऽयं बहुमार्गाया दुर्गतेर्देशिकः परम्॥६॥

स०-अवद्यानां-निन्द्यानां, इयं-मदावस्था, भूमिः-आकरः। तथा, दौःशील्यस्य-असमाहितत्वस्य, इदं-मदावस्थान्तरं, आस्पदं-आवसथः। एकोऽयं-मदविशेषो, बहुमार्गायाः-अनेकमुखाया दुर्गतेः, परं कृत्वा देशिकः-आचार्यः।

निश्चेष्टः शववच्छेते तृतीये तु मदे स्थितः।

मरणादपि पापात्मा गतः पापतरां दशाम्॥७॥

स०-तृतीये-उत्तमे मदे, स्थितो नरस्तेजसो विहतत्वात् निश्चेष्टः-चेष्टया कायवाङ्मनोलक्षणया रहितः, अत एव शववच्छेते-मृतानुकल्पः स्वपिति। एवं च सत्यसौ पापात्मा मरणादपि पापतरामवस्थां प्राप्तः। यतो मृतो मरणात्समनन्तरमेव शरीरान्तरं प्राप्य सुखादीन् विन्दते। तृतीयां मदावस्थां प्राप्तस्तु पुरुषोऽपरशरीराप्राप्तेर्न कथाञ्चित् सुखाद्यनुभवतीति मरणादप्यस्य निकृष्टत्वम्।

धर्माधर्मं सुखं दुःखमर्थानर्थं हिताहितम्।
यदासक्तो न जानाति कथं तच्छीलयेद्बुधः॥८॥

स०-यस्मिन्नासक्तो-यदासक्तो, धर्मादीन् न जानाति। तत्-तथाविधं मद्यं, बुधो-मतिमान्, कथं शीलयेत्-अभ्यसेत्। तत्र धर्मो-दानाध्ययनदेवगुरुपूजादिकः। अधर्मो-हिंसादिः। सुखं-आह्लादकोऽनुभवः। दुःखं-उपतापः। अर्थः-उभयलोकहितम्। अनर्थः-अहितम्। शीलयेदित्यनेन तत्रासक्तिं निषेधति, न तु मद्यपानमपि।

मद्ये मोहो भयं शोकः क्रोधो मृत्युश्च संश्रिताः।
सोन्मादमदमूर्च्छायाः सापस्मारापतानकाः॥९॥
यत्रैकः स्मृतिविभ्रंशस्तत्र सर्वमसाधु यत्।

स०-मद्येऽतिपीते मोहादयः संश्रिताः-आश्रिताः, मद्यातिपानादनन्तरं मोहादीनां सद्भावात्। अथवा किमत्र बहुनाऽभिहितेन। यत्र-यस्मिन् मद्ये, स्मृतेर्विभ्रंशो-लोपः, तत्र यत्किञ्चिद्विद्यते तत्सर्वमसाधु-अशोभनम्। यत्रौजसौ न विहतिर्हृत्प्रबोधश्च स प्रथमो मदः। यत्राल्पा विहतिरोजसः स मध्यमः। यत्र सर्वस्यौजसौ विहतिः स उत्तमः। तथा च मुनिः (च. चि. अ. २४।३५)-"ओजस्यविहते पूर्वो हृदि च प्रतिबोधिते। मध्यमो विहतेऽल्पे तु विहते तूत्तमो मदः॥" इति।

अयुक्तियुक्तमन्नं हि व्याधये मरणाय वा॥ १०॥

मद्यं त्रिवर्गधीधैर्यलज्जादेरपि नाशनम्।

स०-यस्मादयुक्त्या योजितमन्नमपि-यत्प्राणकरं तदपि, कर्मवशाद्व्याधये मरणाय वा सम्पद्यते। मद्यं त्वयुक्तियोजितं त्रिवर्गादेरपि नाशनम्। युक्तिपीतं पुनस्तदेव त्रिवर्गादीनां साधनमित्यपिशब्देन द्योतयति।

तामेव युक्तिं वक्ष्यमाणेन ग्रन्थेन प्रतिपादयन्नाह-

नातिमाद्यन्ति बलिनः कृताहारा महाशनाः॥ ११॥

स्निग्धाः सत्त्ववयोयुक्ता मद्यनित्यास्तदन्वयाः।

मेदःकफाधिका मन्दवातपित्ता दृढाग्नयः॥ १२॥

स०-यत एवंविधा नरा नातिमाद्यन्ति, ततो बलवद्भिः पुरुषैः कृताहारैर्महाशनैः स्निग्धैः सत्वयुक्तैर्वयोयुक्तर्मद्योचितैस्तदन्वयैः-मद्यपकुलप्रसूतैः, मेदोधिकैः कफाधिकैः स्वल्पवातपित्तैर्दृढाग्निभिः-अपकारसहिष्णवग्निभिः, मद्यं पेयम्, नातो विपर्यस्तैः, इत्यन्यतन्त्रकारकथिताया युक्तेरत्रैवान्तर्भावोऽनेन तन्त्रकृता कृतः।

विपर्ययेऽतिमाद्यन्ति विश्रब्धाः कुपिताश्च ये।

मद्येन चाम्लरूक्षेण साजीर्णे बहुनाऽति च॥ १३॥

स०-यथानिर्दिष्टाद्वैपरित्येन, यथा-अबलिनो यावदृढाग्नय इति। तथा, विश्रब्धाः-अमृतमिवेदं स्पृहणीयं सुरेभ्यः पेपीयतेऽस्माभिरिति तद्गतमनसो विश्वस्ताः, तथा कुपिताः-क्रुद्धाः, ये तेऽतिमाद्यन्ति। मद्येनेत्यादि। अम्लरूक्षेण च मद्येन पीतेन सर्व एवातिमाद्यन्ति। अत्र चात्यम्लेनेति वेद्यम्, मद्यस्य सर्वस्यैवाम्लप्रायत्वात्। रूक्षेण-न त्वीषत्स्निग्धेन। तथा, साजीर्णे-

सशब्द ईषदर्थे ईषदजीर्णे, तस्मिन्नेव मद्ये पीतेऽतिमाद्यन्ति। तथा, अतिबहुना पीतेन मद्येनातिमाद्यन्ति।

वातात्पित्तात्कफात्सर्वैश्चत्वारः स्युर्मदात्ययाः।
सर्वैऽपि सर्वैर्जायन्ते व्यपदेशस्तु भूयसा॥ १४॥

स०-वातादिभिः पृथक्स्थितैर्दोषैः सन्निपातेन चेति चत्वारो मदात्यया वस्तुस्वभावाज्जायन्ते, नोनाधिकाः। सर्वेऽपि मदात्ययाः सर्वैरपि दोषैर्जायन्ते। भूयसा-बाहुल्येन तु, व्यपदेशः-संज्ञा भवति, अयं वातमदात्ययो यावत् सन्निपातमदात्ययोऽयमिति।

सामान्यं लक्षणं तेषां प्रमोहो हृदयव्यथा।
विड्भेदः प्रततं तृष्णा सौम्याग्नेयो ज्वरोऽरुचिः॥ १५॥
शिरःपार्श्वास्थिरुक्कम्पो मर्मभेदस्त्रिकग्रहः।
उरोविबन्धस्तिमिरं कासः श्वासः प्रजागरः॥ १६॥
स्वेदोऽतिमात्रं विष्टम्भः श्वयथुश्चित्तविभ्रमः।
प्रलापश्चर्दिरुत्क्लेशो भ्रमो दुःस्वप्नदर्शनम्॥ १७॥

स०-तेषां-मदात्ययानां, सामान्यं लक्षणं-अविभागेन [चिह्नम्], प्रमोहादिदुःस्वप्नदर्शनपर्यन्तम्।

विशेषाज्जागरश्वासकम्पमूर्धरुजोऽनिलात्।
स्वप्ने भ्रमत्युत्पतति प्रेतैश्च सह भाषते॥ १८॥

स०-वातेन मदात्यये जागरादिकं प्रेतैः सह भाषत इति पर्यन्तं स्यात्।

पित्ताद्दाहज्वरस्वेदमोहातीसारतृड्भ्रमाः।
देहो हरितहारिद्रो रक्तनेत्रकपोलता॥ १९॥

स०-पित्तेन मदात्यये दाहादिकं रक्तनेत्रकपोलतापर्यन्तं स्यात्।

श्लेष्मणा छर्दिहृल्लासनिद्रोदर्दाङ्गगौरवम्।

स०-श्लेष्मणा मदात्यये छर्द्यादिकमङ्गगौरवपर्यन्तं स्यात्।

सर्वजे सर्वलिङ्गत्वम्

स०-सर्वजे मदात्यये सर्वलिङ्गत्वं भवति।

सम्प्रति ध्वंसकविक्षयौ लक्षयति-

मुक्त्वा मद्यं पिबेत्तु यः॥२०॥
सहसाऽनुचितं वाऽन्यत्तस्य ध्वंसकविक्षयौ।
भवेतां मारुतात्कष्टौ दुर्बलस्य विशेषतः॥२१॥

स०-उचितं मद्यं मुक्त्वा-चिरं कालं परित्यज्य, यः पुरुषस्तदेव सहसा-अतिमात्रया पिबेत्, अथवाऽन्यद्यन्मद्यं यदनुचितं-असात्म्यं मद्यं, तत्सहसा-अतिमात्रं पिबेत्, तस्य-पुरुषस्य, ध्वंसकविक्षयौ व्याधी मारुताद्भवेतां-जायेयाताम्। किम्भूतौ ? कष्टौ,-कृच्छ्रसाध्यौ। दुर्बलस्य पुनः पुंसस्तौ विशेषेण भवेताम्।

ध्वंसके श्लेष्मनिष्ठीवः कण्ठशोषोऽतिनिद्रता।
शब्दासहत्वं तन्द्रा च

स०-ध्वंसके श्लेष्मनिष्ठीवादयः स्युः।

विक्षयेऽङ्गशिरोतिरुक्॥२२॥

हृत्कण्ठरोगः सम्मोहः कासस्तृष्णा वमिर्ज्वरः।

स०-विक्षये अङ्गशिरोतिरुगाद्याः स्युः।

निवृत्तो यस्तु मद्येभ्यो जितात्मा बुद्धिपूर्वकृत्॥२३॥

विकारैः स्पृश्यते जातु न स शारीरमानसैः।

इति मदात्ययनिदानम्।

स०-शारीरमानसानां रोगाणां मद्यं कारणमिति कृत्वा यः पुमान् जितात्मा मद्येभ्यो निवृत्तो बुद्धिपूर्वकृत्-विमृश्यकारी, स कदाचिच्छारीरैर्मानसैर्वा विकारैर्न स्पृश्यते-नाक्रम्यते। इति मदात्ययः।

अथ मद्यवच्चेतोविहतिकारणसामान्यान्मदादीन् लक्षयति-

रजोमोहाहिताहारपरस्य स्युस्त्रयो गदाः॥२४॥

रसासृक्चेतनावाहिस्रोतोरोधसमुद्भवाः।

मदमूर्च्छायसन्न्यासा यथोत्तरबलोत्तराः॥२५॥

स०-रजःप्रधानस्य मोहप्रधानस्य तथाऽपथ्याहारपरस्य त्रयो गदाः स्युः-जायेरन्। किम्भूताः ? रसश्चासृक् च चेतना च, ता वहन्ति यानि स्रोतांसि, तेषां रोधः समुद्भवो-हेतुः, येषां ते रसासृक्चेतनावाहिस्रोतोरोधसमुद्भवाः। मदमूर्छायसन्न्यासाः-एत त्संज्ञाः। ते च

यथोत्तरबलोत्तराः। यो य उत्तरो यथोत्तरम्, बलस्योत्तरं-उत्कर्षः, यथोत्तरं बलोत्तरं येषां त एवम्। मदान्मूर्छायो बलवान् तस्मादपि सन्न्यास इत्यर्थः।

आ० र०- रजःपरः-दुर्लभं लिप्सुः। मोहपरोदुर्बोधबुभुत्सु। रसरक्तप्राणवाहिनां त्रयाणामन्तःस्रोतसां रोधः-असम्यग्वहनम्। हेतुत्रयेऽधिष्ठानत्रयेऽपि यथोत्तराधिक्यं ज्ञेयम्, बलाद्विजक्यान्यथाऽनुपपत्तेः।

अथ मदं लक्षयति-

अथ मदनिदानम्।

मदोऽत्र दोषैः सर्वैश्च रक्तमद्यविषैरपि।

स०-अत्र-एषु मदादिषु मध्ये, मदः सप्तधा,-पृथग्दोषैः सन्निपातेन रक्तेन मद्येन विषेण च।

आ० र०- मदस्य भेदानाह-मदोऽत्रेति। दोषैस्त्रयो भेदाः।

सक्तानल्पद्रुताभाषश्चलः स्खलितचेष्टितः॥२६॥
रूक्षश्यावारुणतनुर्मदे वातोद्भवे भवेत्।

स०-वातोद्भवे मदे सति पुमान् सक्तानल्पद्रुताभाषणादिलक्षणो भवेत्।

आ० र०- वातजलक्षणमाह-सक्तानल्पेति। चलं-सकम्पम्।स्खलितं-सप्रतिबन्धम्।

पित्तेन क्रोधनो रक्तपीताभः कलहप्रियः॥२७॥

स०-पित्तेन क्रोधनादिलक्षणः।

आ० र०- पित्तेन क्रोधनादिलक्षणः।

स्वल्पसम्बद्धवाक्पाण्डुः कफाच्चानपरोऽलसः।

स०-कफात् स्वल्पसम्बद्धवागादिलक्षणः।

आ० र०- कफजलक्षणमाह-स्वल्पसम्बद्धवागिति।

सर्वात्मा सन्निपातेन

स०-सर्वात्मा-सर्वदोषलक्षणः, सन्निपातेन।

आ० र०- सर्वजलक्षणमाह-सर्वात्मेति।

रक्तात्स्तब्धाङ्गदृष्टिता॥२८॥

पित्तलिङ्गं च

स०-रक्तात्-रक्तमदात्, स्तब्धदृष्टिता तथा पित्तमदलिङ्गं च स्यात्।

आ० र०- रक्तजलक्षणमाह-रक्तादिति।

मद्येन विकृतेहास्वराङ्गता।

स०-मद्येन मदे विकृता चेष्टा तथा स्वरस्य विकृतत्वमङ्गस्य च।

आ० र०- मद्यजलक्षणमाह-मद्येनेति।

विषे कम्पोऽतिनिद्रा च सर्वेभ्योऽभ्यधिकस्तु सः॥

स०-विषे-विषोत्थे मदे, कम्पोऽतिनिद्रा च स्यात्। स च-विषमदः, सर्वेभ्योऽधिकः।

आ० र०- विषजलक्षणमाह-विषे कम्प इति।

लक्षयेल्लक्षणोत्कर्षाद्वातादीन् शोणितादिषु।

इति मदनिदानम्।

स०-शोणिताद्युत्थेषु मदेषु वातादीन् लक्षयेत्-जानीयात्। कुतः ? लक्षणोत्कर्षात्-स्वस्वलक्षणोत्कर्षेण।

आ० र०- अदोशजेष्वपि दोषानुबन्धमाह-लक्षयेदिति। नात्र यथासङ्ख्यम्। किन्तु यथासम्भवम्।

अथ मूर्च्छायं लक्षयति-

अथ मूर्च्छायनिदानम्।

अरुणं कृष्णनीलं वा खं पश्यन्प्रविशेत्तमः॥३०॥
शीघ्रं च प्रतिबुध्येत हृत्पीडा वेपथुर्भ्रमः।

काश्यं श्यावारुणा छाया मूर्छाये मारुतात्मके॥३१॥

स०-मारुतोद्भवे मूर्छाये अरुणाद्यन्यतमवर्णमाकाशं पश्यन् पुमांस्तमः प्रविशेत्-मूढावस्थां प्राप्नोति। शीघ्रं च प्रतिबुध्येत-संज्ञां लभेत्। हृत्पीडावेपथुभ्रमयुतस्तथा काश्यादि च स्यात्।

आ० र०- मूर्च्छायस्य तु दोषजा एव चत्वारो भेदाः तत्र वातजलक्षणमाह-अरुणमिति। तमः प्रविषेत्-अज्ञानव्यात्पो भवेत्। प्रतिबुध्येत-तमसो निर्गच्छेत्।

पित्तेन रक्तं पीतं वा नभः पश्यन् विशेत्तमः।
विबुध्येत च सस्वेदो दाहतृट्तापपीडितः॥३२॥
भिन्नविण्नीलपीताभो रक्तपीताकुलेक्षणः।

स०-पित्तेन मूर्छाये रक्तं पीतं वा नभः पश्यंस्तमः पुमान् विशेत्-मूढावस्थां प्राप्नुयात्। सह स्वदेन विबुध्येत-संज्ञां लभते। तथा दाहादिपीडितस्तथा भिन्नविडादिकः।

आ० र०- पित्तजलक्षणमाह-पित्तेनेति। दाहः-अग्निनेव दुःखम्। तापः-सुर्येणेव।

कफेन मेघसंकाशं पश्यन्नाकाशमाविशेत्॥३३॥
तमश्चिराच्च बुध्येत सहृल्लासः प्रसेकवान्।
गुरुभिः स्तिमितैरङ्गैरार्द्रचर्मावनद्धवत्॥३४॥

स०-कफेन मूर्च्छाये मेघाभमाकाशं पश्यंस्तम आविशेत्, चिरेण च बुध्येत-संज्ञा लभते। हृल्लासादिमान्, तथाऽऽर्द्रेण चर्मणाऽवनद्धो-वेष्टित इव।

आ० र०- कफजलक्षणमाह-कफ़ेनेति। स्तिमितैः-आर्द्रैः। आर्द्रचर्मावनद्धवत्-[अ]यथाबिद्धिं जनयद्भीः।

सर्वाकृतिस्त्रिभिर्दोषैरपस्मार इवापरः।
पातयत्याशु निश्चेष्टं विना बीभत्सचेष्टितैः॥ ३५॥

इति मूर्च्छायनिदानम्।

स०-त्रिभिर्दोषैर्यो मूर्च्छायः सर्वाकारः सोऽपरोऽपस्मार इवाशु-शीघ्रमेव, पुरुषं निश्चेष्टं पातयति। विना बीभत्सचेष्टितैः-अपस्मारोत्थानि निन्द्यानि चेष्टितानि वर्जयित्वा, अन्यत्सर्वं समानम्।

आ० र०- सर्वजलक्षणमाह-सर्वाकृतिरिति। रुग्विनिश्चये (मा. नि. मूर्च्छा. श्लो. १)-" क्षीणस्य बहुदोषस विरुद्धाहारसेविनः। वेगाघातादभिघाताद्वीनसत्वस्य वा पुनः॥ करणायतनेषूग्रा बाह्येष्वाभ्यान्तरेषु च। निविषन्ते यदा दोषास्तदा मूर्च्छान्तु मानवाः॥ द्रवस्वभाव इत्येके दृष्टा यदाभिमुह्यति। गुणास्तीव्रतरत्वेन स्थितास्तु विषमद्ययोः॥त एव तस्मात्ताभ्यां तु मोहौ स्यातां यथोरितौ। स्तब्धाङ्गदृष्टिस्त्वसृजा गूहोश्वासश्च मूर्च्छितः॥मद्येन विलपंच्छेते नष्टविभ्रान्तमानसः। गात्राणि विक्षिपन्भूमौ जरां यावन्न तत्॥वेपथुस्वन्पतृष्णाः स्युस्तमश्च विषमूर्च्छिते। वेदितव्यं तीव्रतरं यथास्वं विषलक्षणैः॥मूर्च्छा पित्ततमःप्राया रजः पित्तानिलाद्भ्रमः। तमोवातकफ़ातन्द्रा निद्रा श्लेष्मतमोभवा॥योऽनायासः श्रमो देहे प्रभूतश्वासवर्जितः। क्लमः स इति विज्ञेय इन्द्रियार्थप्रबाधकः॥हृत्पीडा जृम्भणं ग्लानिः संज्ञादौर्बल्यमेव च। मूर्च्छानां पुर्वरूपाणि यथास्वं च विभावयेत्॥पृथिव्यापस्तमोरूपं रक्तगन्धस्तदन्वयः। तस्माद्रक्तस्य गन्धेन मूर्च्छन्ति भुत्रिमानवाः॥" इति।

इदानीं सन्न्यासं लक्षयितुमाह-

अथ सन्न्यासनिदानम्।

दोषेषु मदमूर्च्छायाः कृतवेगेषु देहिनाम्।

स्वयमेवोपशाम्यन्ति, सन्न्यासो नौषधैर्विना॥ ३६॥

स०-मदाश्च मूर्च्छायाश्च मदमूर्च्छायाः, कृतवेगेषु दोषेषु सत्सु स्वयमेव-औषधं विनाऽपि, शाम्यन्ति।

आ० र०- मदमूर्च्छयोरऔषधाभेदान्मदभेदा अपि मूर्च्छाभेदत्वेनोक्ताः। मदादीनामौषधं विना निवृत्तिमाह-दोषोष्विति। सन्न्यासस्यौषधैकनिवर्त्यत्वमाह-सन्न्यास इति।

सन्न्यासः पुनरौषधैर्विना न शान्तिमेति।

वाग्देहमनसां चेष्टामाक्षिप्यातिबला मलाः।
सन्न्यासं सन्निपतिताः प्राणायतनसंश्रयाः॥ ३७॥
कुर्वन्ति, तेन पुरुषः काष्ठीभूतो मृतोपमः।
म्रियेत शीघ्रं शीघ्रं चेच्चिकित्सा न प्रयुज्यते॥ ३८॥

स०-वाक् च देहश्च मनश्च, तेषां चेष्टां-यथास्वलक्षणां, आक्षिप्य मलाः-वातपित्तकफाः, सन्निपतिताः सन्तः-त्रय एककार्योद्यताः, सन्न्यासं कुर्वन्ति। किम्भूताः? अतिबलास्तथा प्राणायतनसंश्रयाः,-विशेषेण हृदयाश्रयाः। तेन-सन्न्यासेन, पुरुषः काष्ठीभूतः-स्थाणुकुड्यकल्पः, तथा मृतोपमः-तत्सदृशो भूत्वा, अनन्तरं शीघ्रं म्रियेत। यदि शीघ्रं चिकित्सा न प्रयुज्यते। म्रियेत इति सम्भावनायां लिङ्।

आ० र०- सन्न्यासस्य सम्प्राप्तिमाह-वाग्देहमनसामिति। सन्न्यासलक्षणमाह-तेनेति।

शीघ्रं चिकित्सनाज्जीवेत्, इत्यत्रैवोदाहरणार्थमाह-

अगाधे ग्राहबहुले सलिलौघ इवातटे।

सन्न्यासे विनिमज्जन्तं नरमाशु निवर्तयेत्॥ ३९॥

इति सन्न्यासनिदानम्।

स०-अगाधे-अतलस्पर्शे, सलिलौघे, तथा ग्राहबहुले-मकरादिप्राणहरप्राणिभूयसि, तथाऽतटे-अरोधसि। तथा तस्मिन्निमज्जन्तं नरमाशु-शीघ्रं, निवर्तयेत्-तस्मादुद्धरेत्, एवं सन्न्यासेऽपि निमज्जन्तं नरमाशु निवर्तयेत्। अनेनोदाहरणेन मदा(हा)त्ययत्वमस्य व्याधेः प्रदर्शयन् स्वल्पकालहापनमप्यत्र व्याधौ न कार्यमिति द्योतयति।

आ० र०- सन्न्यासस्त्वरया चिकित्स्य इत्याह-अगाध इति। इति मदादिनिदानम्।

इदानीं मदात्ययनिदानत्वान्मद्यस्य मद्येनैवोपसंहारं कुर्वन्नाह-

मदमानरोषतोषप्रभृतिभिररिभिर्निजैः परिष्वङ्गः।

युक्तायुक्तं च समं युक्तिवियुक्तेन मद्येन॥ ४०॥

स०-युक्तिवियुक्तेन मद्येन मदादिभिर्निजैः-सहजातैः, [अरिभिः-] शत्रुभिर्दृष्टादृष्टविनाशकारिभिः, परिष्वङ्गः-अतिसंश्लेषो, भवति। न केवलं मद्येन मदाद्यतिसङ्गः, यावद्युक्तायुक्तं समं-तुल्यं, सम्पद्यते। युक्तमनुष्ठेयम्, अयुक्तमननुष्ठेयम्, तदुभयं समं जायते, कार्याकार्यं न जानातीत्यर्थः। यतश्चैवं ततो मद्यपाने युक्तेर्गरीयस्त्वम्। युक्तिश्च प्रागेव दर्शिता। "आर्याद्वितीयदलभवलक्ष्म प्रतिनियतमवगम्य। उभयत्राप्युपगीतिं वदन्ति यत्यंशकैर्गादितैः॥"

पुनरपि युक्तिं प्रदर्शयन्नाह-

बलकालदेशसात्म्यप्रकृतिसहायामयवयांसि।

प्रविभज्य तदनुरूपं यदि पिबति ततः पिबत्यमृतम्॥४१॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां तृतीये निदानस्थाने मदात्ययादिनिदानं नाम षष्ठोऽध्यायः॥६॥

****

स०-बलकालादीन् प्रविभज्य-बुद्ध्या विमृश्य, तदनुरूपं-तद्योग्यं, यदि पिबति ततोऽमृतं पिबति। मद्यव्याजेनामृतमास्वादयतीत्यर्थः। आर्या।

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टाङ्गहृदयटीकायां सर्वाङ्गसुन्दराख्यायां तृतीये निदानस्थाने मदात्ययादिनिदानं नाम षष्ठोऽध्यायः समाप्तः॥६॥

[इति हेमाद्रिटीकायामायुर्वेदरसायने।

मदात्ययनिदानं च समस्त्येन निरूपितम्॥]

****

सप्तमोध्यायः।

मदात्ययनिदानादनन्तरमर्शोनिदानारम्भो युक्तः। यतः "अरिभिर्निजैः परिष्वङ्ग" (हृ. नि. अ. ६।४०) इत्युक्तम्, अर्शांसि च रिपुसदृशानीति वक्ष्यति, तस्मादर्शोनिदानं प्रक्रम्यते।

अथातोऽर्शसां निदानं व्याख्यास्यामः।

इति ह स्माहुरात्रेयादयो महर्षयः।

(गद्यसूत्रे॥२॥)

स०-व्याख्या पूर्ववत्।

अरिवत्प्राणिनो मांसकीलका विशसन्ति यत्।

अर्शांसि तस्मादुच्यन्ते गुदमार्गनिरोधतः॥१॥

दोषास्त्वङ्मांसमेदांसि सन्दूष्य विविधाकृतीन्।

मांसाङ्कुरानपानादौ कुर्वन्त्यर्शांसि तान् जगुः॥२॥

स०-अनेन सर्वेषामप्यर्शसां गुदमेढ्रादिजानां सामान्येन सम्प्राप्त्याकृती निरूपयति। दोषाः-वातादयः, त्वङ्मांसमेदांसि दूषयित्वाऽपानादौ यन्मांसाङ्कुरान् कुर्वन्ति तानर्शांसि जगुः, तन्त्रकृत इति शेषः। आदिशब्देन कर्णनासादीनां ग्रहणम्। किम्भूतान् मांसाङ्कुरान्? विविधाकृतीन्-नानासंस्थानान्।

सहजन्मोत्तरोत्थानभेदाद्वेधा समासतः।

शुष्कस्रावविविभेदाच्च

स०-तानि च समासतः-सङ्क्षेपतो, द्वेधा-द्विप्रकाराणि। कथम्? इत्याह-सहेत्यादि। सह जन्मना, सहजन्म चोत्तरं च सहजन्मोत्तरे, तयोरुत्थानं सहजन्मोत्तरोत्थानं, तेन भेदो-विशेषः, तस्मात्। कानिचिच्छरीरेण सह जातानि कानिचिज्जन्मोत्तरभावीनि। तथा, शुष्कस्रावविविभेदाच्च द्वेधा,-कानिचिच्छुष्काणि कानिचित्स्रावीणि।

"अपानादौ" इत्युक्तम्। अथ तदेव गुदापरपर्यायं लक्षयति-

गुदः स्थूलान्त्रसंश्रयः॥३॥

अर्धपञ्चाङ्गुलस्तस्मिंस्तिस्रोऽध्यर्धाङ्गुलाः स्थिताः।

वल्यः, प्रवाहिणी तासामन्तर्मध्ये विसर्जनी॥४॥

बाह्या संवरणी तस्या गुदौष्ठो बहिरङ्गुले।

यवाध्यर्धः प्रमाणेन रोमाण्यत्र ततः परम्॥५॥

स०-स्थूलान्त्रं संश्रयः-आश्रयो, यस्य स एवंविधो गुदः। स्थूलं यदन्त्रं तत्र प्रतिबद्ध इत्यर्थः। किंप्रमाणोऽसौ ? अर्धपञ्चाङ्गुलः। अर्धेनोनानि पञ्च-अर्धपञ्च। शाकपार्थिवादित्वात्समासः। अर्धपञ्च अङ्गुलानि यस्य सोऽर्धपञ्चाङ्गुलः,-सार्धचतुरङ्गुलपरिमाणः। तस्मिन्-गुदे, तिस्रो वल्यः-त्रिसङ्ख्याः स्थिताः। किंपरिमाणाः ? अध्यर्धाङ्गुलाः, अधिकमर्धमङ्गुलं प्रत्येकं परिमाणं यासां ता एवम्। अथ तांसां-तिसृणाम्, अर्थानुगतानि नामान्याह-तत्र-मलप्रवाहणादन्तः-अन्तरे स्थिता वली, प्रवाहिणीति कथ्यते। मध्ये-मध्यस्थिता वली, मलस्य प्रवहतो बहिर्विसर्जनात् विसर्जनीति भण्यते। गुदस्य बाह्ये स्थिता मलस्य संवरणात् संवरणीत्युच्यते। तस्याः-संवरणीसंज्ञाया वलेः, अङ्गुले-तत्परिमाणे, बहिः-बाह्ये, गुदौष्ठः स्थितः। प्रमाणेन-परिमाणतो, गुदौष्ठौ यवाध्यर्धः-सार्धयवप्रमाणः। ततो-गुदौष्ठात्, परं-परतो बहिः, रोमाण्यत्र गुदे, जायन्ते।

तत्र हेतुः सहोत्थानां वलीबीजोपतप्तता।

अर्शसां, बीजतप्तिस्तु मातापित्रपचारतः॥६॥

दैवाच्च, ताभ्यां कोपो हि सन्निपातस्य तान्यतः।

असाध्यान्वेवमाख्याताः सर्वे रोगाः कुलोद्भवाः॥७॥

स०-तत्रेति निर्धारणे, सहजोत्तरकालभाविष्वर्शःसु मध्ये, सहोत्थानामर्शसां हेतुः वलीबीजोपतप्तता। वल्याः-सम्बन्धि बीजं-शुक्रार्तवांशो, यस्मात्सा वली उत्पद्यते। उपतप्तस्य भाव उपतप्तता,-अर्शोविकारकरणसमर्थैर्वातपित्तकफैः पीडनं, बलीबीजस्योपतप्ततोच्यते। सा च बीजोपतप्तिः-बीजोपतापो, मातापित्रपचारतः। माता च पिता च मातापितरौ, तयोरपचारः-

अपराध आहारविहारादिकृतः, तस्मात्। तथा दैवात्-तथाविधात् प्राक्कृतादशुभकर्मणो, बीजोपतप्तिः। ताभ्यां-मातापित्रपचारदैवाभ्यां, यस्मात्सन्निपातस्य कोपः, तस्मात्तानि-अर्शांसि, असाध्यानि। एवं-अनेन प्रकारेण, प्राणिनां सर्वे रोगाः कुलोद्भवा आख्याताः। बीजोपतप्तत्वादसाध्या इत्यर्थः।

सहजानि विशेषेण रूक्षदुर्दर्शनानि च।
अन्तर्मुखानि पाण्डूनि दारुणोपद्रवाणि च॥८॥

स०-सहजान्यर्शांसि विशेषेण रूक्षादिगुणयुतानि भवन्ति। विशेषेणेत्यनेनैतद् द्योतयति,-उत्तरजातान्यप्येवंभूतानि भवन्तीति।

षोढाऽन्यानि पृथग्दोषसंसर्गनिचयास्ततः।

स०-अन्यानि-उत्तरजातान्यर्शांसि, षड्प्रकाराणि। पृथग्दोषैर्वातपित्तकफैस्त्रीणि, तथा संसर्गेणैकं, तथा निचयेन [एकं] तथा रक्तेन [एकं], इति षड्भम्। षोढाशब्दः पृषोदरादिः।

शुष्काणि वातश्लेष्मभ्यामार्द्राणि त्वस्रपित्ततः॥९॥

स०-"शुष्कस्राविविभेदाच्च द्विधा" (श्लो. ३) इत्युक्तम्। तत्र शुष्काणि प्रायेण वातकफाभ्यां व्यस्तसमस्ताभ्याम्। यानि त्वार्द्राणि तान्यस्रपित्ततः, तथैव व्यस्तसमस्ताभ्यां भवन्ति।

दोषप्रकोपहेतुस्तु प्रागुक्तस्तेन सादिते।
अग्नौ, मलेऽतिनिचिते, पुनश्चातिव्यवायतः॥१०॥
यानसङ्क्षोभविषमकठिनोत्कटकासनात्।
बस्तिनेत्राश्मलोष्ठोर्वीतलचैलादिघट्टनात्॥११॥

भृशं शीताम्बुसंस्पर्शात्प्रततातिप्रवाहणात्।

वातमूत्रशकृद्वेगधारणात्तदुदीरणात्॥ १२॥

ज्वरगुल्मातिसारामग्रहणीशोफपाण्डुभिः।

कर्शनाद्विषमाभ्यश्च चेष्टाभ्यो, योषितां पुनः॥ १३॥

आमगर्भप्रपतनाद्गर्भवृद्धिप्रपीडनात्।

ईदृशैश्चापरैर्वायुरपानः कुपितो मलम्॥ १४॥

पायोर्वलीषु तं धत्ते तास्वभिष्यण्णमूर्तिषु।

जायन्तेऽर्शांसि

स०-प्राक्-पूर्वं सर्वरोगविदाने, दोषप्रकोपहेतुः [उक्तो-] दर्शितः। तेन-दोषप्रकोपकारणेन, वह्नौ सादिते-मन्दत्वं गमिते। अग्निमान्द्यादाहारः सम्यक्पाकमगच्छन् भूयसा मलत्वेनैव सम्पद्यते। तत इदमाह-मलेऽतिनिचिते। मले-पुरीषाख्ये, अतिनिचिते-प्रवृद्धे मांसाङ्कुरजननयोग्ये, वायुरपानाख्यः पायोः सम्बन्धिनीषु वलीषु, तं मलं निचितं धत्ते। तद्देशमलव्यतिसम्पर्कात्ता वलयोऽभिष्यण्णमूर्तयः प्रक्लिन्नदेहाः सम्पद्यन्ते। तासु चाभिष्यण्णमूर्तिश्वर्शांसि जायन्ते। इत्युत्तरकालजानामर्शसां सम्प्राप्तिः। तथा च केन वायुः कुपितो मलं धत्ते ? इत्याह-पुनश्चातिव्यवायत इत्यादि। पुनरिति निर्देशात् पूर्वोक्तेन हेतुना वायुः कुपितः, तथाऽतिव्यवायादिभिः कुपित इति गमयति। बस्त्यादीनां घट्टनेन सम्बन्धः। प्रततातिप्रवाहणेन दोषादिवेगानां प्रवर्तनम्। वातमूत्रशकृद्वेगानां तूदीरणमिहोक्तमिति प्रवाहणोदीरणयोर्द्वयोरुपादानम्। ज्वरादिभिः कर्षणादिति योज्यम्। विषमाभ्यश्च चेष्टाभ्य इति साहसादिविषमाचरणादिकाभ्यः। योषितां पुनरीति पुनःशब्देन पूर्वोक्तेभ्यः प्रकारेभ्यः प्रकारान्तरमामगर्भप्रपतनादिकं गृह्यते। ईदृशैरपरैरप्यनिर्दिष्टैरिह तत्प्रकोपहेतुभिर्वायुः कुपित इति योज्यम्।

तत्पूर्वलक्षणं मन्दवह्निता॥ १५॥

विष्टम्भः सक्थिसदनं पिण्डिकोद्वेष्टनं भ्रमः।

सादोऽङ्गे नेत्रयोः शोफः शकृद्भेदोऽथवा ग्रहः॥ १६॥

मारुतः प्रचुरो मूढः प्रायो नाभेरधश्चरन्।

सरुक् सपरिकर्तश्च कृच्छ्रान्निर्गच्छति स्वनन्॥ १७॥

अन्त्रकूजनमाटोपः क्षामतोद्गारभूरिता।

प्रभूतं मूत्रमल्पा विडश्रद्धा धूमकोऽम्लकः॥ १८॥

शिरःपृष्ठोरसां शूलमालस्यं भिन्नवर्णता।

तन्द्रेन्द्रियाणां दौर्बल्यं क्रोधो दुःखोपचारता॥ १९॥

आशङ्का ग्रहणीदोषपाण्डुगुल्मोदरेषु च।

स०-तेषामर्शसां पूर्वलक्षणं तत्पूर्वलक्षणं मन्दवह्नितेत्यादिकं शकृद्ग्रहपर्यन्तम्। अत्र च पूर्वलक्षणमध्ये "शकृद्भेदोऽथवा ग्रहः" इति निर्दिष्टम्, कस्यचित्पुरुषस्योत्पित्सुष्वर्शःसु भिन्नवर्चस्त्वं कस्यचिद्बद्धवर्चस्त्वमित्यथवाशब्दस्यार्थः। मारुत इति सामर्थ्यादपानाख्यः, प्रायो-भूयिष्ठं कृत्वा, नाभेरधश्चरन्-गच्छन्, प्रचुरो भवति। तथा, मूढो-मूढ इव मूढः। क्रियामात्मीयां हित्वेव वर्तमानः। तथा, सरुक्-सशूलः। तथा, सह पारिकर्तेन वर्तते सपरिकर्तः। छिन्दन्निव कृच्छ्रान्निर्गच्छति, स्वनन्-शब्दायमानः। तथा, अन्त्रकूजनादिकं भवति। तथा च ग्रहणीदोषादिष्वाशङ्का भवति।

एतान्येव विवर्द्धन्ते जातेषु हतनामसु॥ २०॥

स०-एतान्येव-ग्रहणीदोषादीनि, हतनामसु-अर्शःसु, जातेषु विवर्द्धन्ते-वृद्धिमाप्नुवन्ति।

निवर्तमानोऽपानो हि तैरधोमार्गरोधतः।

क्षोभयन्ननिलानन्यान् सर्वेन्द्रियशरीरगान्॥ २१॥

तथा मूत्रशकृत्पित्तकफान् धातूंश्च साशयान्।

मूद्गात्यग्निं ततः सर्वो भवति प्रायशोऽर्शसः॥ २२॥

कृशो भृशं हतोत्साहो दीनः क्षामोऽतिनिष्प्रभः।

असारो विगतच्छायो जन्तुजुष्ट इव द्रुमः॥२३॥

कृत्स्नैरुपद्रवैर्गस्तो यथोक्तैर्मर्मपीडनैः।

तथा कासपिपासास्यवैरस्यश्वासपीनसैः॥२४॥

क्लमाङ्गभङ्गवमथुक्षवथुश्वयथुज्वरैः।

क्लैब्यबाधिर्यतैमिर्यशर्कराश्मरिपीडितः॥२५॥

क्षामभिन्नस्वरो ध्यायन्मुहुः ष्ठीवन्नरोचकी।

सर्वपर्वास्थिहृन्नाभिपायुवङ्क्षणशूलवान्॥२६॥

गुदेन स्रवता पिच्छां पुलाकोदकसन्निभाम्।

विबद्धमुक्तं शुष्कार्द्रं पक्वामं चान्तराऽन्तरा॥२७॥

पाण्डु पीतं हरिद्रक्तं पिच्छिलं चोपवेश्यते।

स०-तैः-अर्शोभिः, अधोमार्गरोधादपानो निवर्तमान ऊर्ध्वं प्रवृत्तः सर्वा(अन्या)ननिलान्-समानोदानव्यानप्राणान्, सर्वेन्द्रियशरीरगान् प्रत्याहरणरूपतया क्षोभयन्-संरम्भान् कुर्वन्, तथा मूत्रादीन्, तथा धातून्-रसादींश्च, साशयान्-सहाधारेण वर्तमानान्, क्षोभयन्नग्निं मृद्नाति-मन्दीकरोति। ततः-अग्निमार्दवादिकात् कारणात्, प्रायेणार्शसो-दुर्नामवान्, कृशादिकः स्यात्। अर्शस इत्यत्र "अर्शआदित्वात्" अच्। विगतच्छायो द्रुमो जन्तुजुष्टः पत्रौघविरहाद्यथा छायारहितः, तथैवार्शसः शोभारहित इति श्लेषोपमालङ्कारः। तथेति न केवलं पूर्वोक्तैरुपद्रवैर्ग्रस्तः, अपि तु कासादिभिरपीत्यर्थः। क्लैष्येत्यादि। अश्मरिपीडित इत्यत्र "ड्यापोः" इत्यादिना बहुलवचनाद्ह्रस्वः। अथवा, 'अश्मनि पीडितः' इति पाठः। क्षामो भिन्नश्च स्वरो यस्य स एवम्। तथा, ध्यायन्-चिन्ताव्याप्तः। तथा, निष्ठीवनादिभिर्युतः। तथा, गुदेन पिच्छां पुलाकोदकसन्निभां स्रवता विबद्धादिकमुपवेश्यते। अप्राप्तपाकं धान्यं पुलाकशब्दवाच्यम्। आगमः-"धान्यं पुलाकोऽनिष्पन्नम्" इति। अथवा, पुलाकः-कुत्सितं धान्यम्, तस्योदकेन तुल्याम्। अन्ये तु यवगोधूमादिस्वेदः पुलाकोदकमित्याहुः, तेन तुल्याम्। विबद्धमुक्तमिति कदाचिदुदावृत्तं कदाचिदनुद्वृत्तं भवति।

वातार्शसां लक्षणमाह-

गुदाङ्कुरा बह्वनिलाः शुष्काश्मिचिमान्विताः॥२८॥

म्लानाः श्यावारुणाः स्तब्धा विषमाः परुषाः खराः।

मिथो विसदृशा वक्रास्तीक्ष्णा विस्फुटिताननाः॥२९॥

बिम्बीकर्कन्धुखर्जूरकार्पासीफलसन्निभाः।

केचित्कदम्बपुष्पाभाः केचित्सिद्धार्थकोपमाः॥३०॥

शिरःपार्श्वांसकट्यूरुवङ्क्षणाभ्यधिकव्यथाः।

क्षवथूद्गारविष्टम्भहृद्ग्रहारोचकप्रदाः॥३१॥

कासश्वासाग्निवैषम्यकर्णनादभ्रमावहाः।

तैरार्तो ग्रथितं स्तोकं सशब्दं सप्रवाहिकम्॥३२॥

रुक्फेनपिच्छानुगतं विबद्धमुपवेश्यते।

कृष्णत्वङ्नखविण्मूत्रनेत्रवक्त्रश्च जायते॥३३॥

गुल्मप्लीहोदराष्ठीलासम्भवस्तत एव च।

स०-वाताधिका गुदजाः शुष्कादिगुणयुक्ताः। विषमाः-विषमसंस्थाना ऊर्ध्वाधस्तिर्यगादिदुःसंस्थिताः। परुषाः-शाकपत्रादितुल्यस्पर्शाः। मिथो विसदृशाः-परस्परमतुल्यसन्निवेशाः। वक्राः-धनुष्कोट्यादिवत्। तथा, तीक्ष्णाः-दर्भाङ्कुरवत्। विस्फुटितं-केसरादिवत्, आननं येषां त एवम्। बिम्ब्याद्यनेकोपमानोपादानं तेषां विचित्ररूपदर्शनार्थम्। शिर आदिष्वधिकव्यथाः। तथा, क्षवथ्वादिप्रदाः। तथा, कासादिकृतः। तैरार्तः-पीडितो, ग्रथितादिकमुपवेश्यते। कृष्णत्वगादिश्च स्यात्। तत एव च गुदाङ्कुरेभ्यो गुल्मादिसम्भवः।

पित्तोत्तरा नीलमुखा रक्तप्रासितप्रभाः॥३४॥

तन्वस्रस्राविणो विस्रास्तनवो मृदवः श्लथाह्।

शुकजिह्वायकृत्खण्डजलौकोवक्त्रसन्निभाः॥३५॥

दाहपाकज्वरस्वेदतृण्मूर्च्छारुचितमोहदाः।

सोष्माणो द्रवनीलोष्णपीतरक्तामवर्चसः॥३६॥

यवमध्या हरीत्पीतहारिद्रत्वङ्नखादयः।

स०-पित्तार्शसां नीलमुखा इत्यादि लक्षणं हारिद्रत्वङ्नखादय इतिपर्यन्तम्। तनु-अच्छं, अस्रं-रक्तं, नित्यं स्रवन्ति, इति "आभीक्ष्ण्ये" णिनिः। तथा, तनवो-न घनाः, श्लेष्म-गुदाङ्कुरवत्। मृदवः-शिरीषपुष्पादिवत्। श्लथाः-स्विन्नमांसादिवत्। शुकजिह्वेत्यादि बहूपमात्वं पूर्ववत् संस्थानवर्णवैचित्र्यार्थम्। द्रवादीनां वर्चसा सम्बन्धः। यवमध्याः-यवमध्यसंस्थानाः। हरितो-दूर्वावर्णाः, पीता हारिद्राश्च त्वगादयो येषां त एवम्। आदिशब्देन नयनविण्मूत्रादयो गृह्यन्ते।

श्लेष्मोल्बणा महामूला घना मन्दरुजः सिताः॥३७॥

उच्छ्रूनोपचिताः स्निग्धाः
स्तब्धवृत्तगुरुस्थिराः।
पिच्छिलाः स्तिमिताः श्लक्ष्णाः
कण्ड्वाढ्याः स्पर्शनप्रियाः॥३८॥

करीरपनसास्थ्याभास्तथा गोस्तनसन्निभाः।

वङ्क्षणानाहिनः पायुबस्तिनाभिविकर्तिनः॥३९॥

सकासश्वासहृल्लासप्रसेकारुचिपीनसाः।

मेहकृच्छ्रशिरोजाड्यशिशिरज्वरकारिणः॥४०॥

क्लैब्याग्निमार्दवच्छर्दिरामप्रायविकारदाः।

वसाभसकफप्राज्यपुरीषाः सप्रवाहिकाः॥४१॥

न स्रवन्ति न भिद्यन्ते पाण्डुस्निग्धत्वगादयः।

स०-श्लेष्मार्शसां महामूलादिकं लक्षणं पाण्डुस्निग्धत्वगाद्यन्तम्। बह्वनिला इत्यनेन पित्तो[त्तरा इत्यनेन श्लेष्मो]ल्बणा इत्यनेन च निर्देशेन सर्वेषामेवार्शसां त्रिदोषजत्वं द्योतयति। तेन सर्वाण्यर्शांसि त्रिदोषजानि, भूयसा तु व्यपदेश इति वेद्यम्।

संसृष्टलिङ्गाः संसर्गात्

स०-संसर्गाद्गुदाङ्कुराः संसृष्टलिङ्गाः-संसृष्टरूपाः, स्युः।

निचयात्सर्वलक्षणाः॥४२॥

स०-निचयात्-सन्निपातात्, सर्वलक्षणाः-दोषत्रयलक्षणयुताः।

रक्तोल्बणा गुदेकीलाः पित्ताकृतिसमन्विताः।
वटप्ररोहसदृशा गुञ्जाविद्रुमसन्निभाः॥४३॥
तेऽत्यर्थं दुष्टमुष्णं च गाढविद्वतिपीडिताः।
स्रवन्ति सहसा रक्तं तस्य चातिप्रवृत्तितः॥४४॥
भेकाभः पीड्यते दुःखैः शोणितक्षयसम्भवैः।
हीनवर्णबलोत्साहो हतौजाः कलुषेन्द्रियः॥४५॥

स०-रक्तोल्बणाः-रक्ताधिकाः, गुदेकीलाः पित्तस्याकृत्या-लक्षणेन, समन्विता इत्यादिकं कलुषेन्द्रिय इति यावदेषां लक्षणं बोध्यम्। गुदाङ्कुरा इति प्रकृतेऽपि गुदेकिला इत्युक्तं वैचित्र्यार्थम्। ते च गुदेकीला अतिदुष्टमुष्णं च सहसा-अचिन्तितमेव शूलादिलिङ्गैः, रक्तं स्रवन्ति, गाढविद्वतिपीडिताः सन्तः। तस्य-रक्तस्य, अतिप्रवृत्तितो भेकाभो भवति। चोऽवधारणे, तस्यैव रक्तस्यातिप्रवर्तनान्मण्डूकाभः स्यात्, न कारणान्तरेणेत्यर्थः। शोणितक्षयसम्भवैर्दुःखैः-रोगैः, पीड्यते। "रक्तेऽसृग्शिशिरप्रीतिसिराशैथिल्यरूक्षताः।" (हृ. सू. अ. ११।१७) इति रक्तक्षयजाः उक्ताः। तथा, हीनवर्णबलोत्साहादिः स्यात्।

मुद्गकोद्रवजूर्णाह्वकरीरचणकादिभिः।
रूक्षैः सङ्ग्राहिभिर्वायुः स्वे स्थाने कुपितो बली॥४६॥
अधोवहानि स्रोतांसि संरुध्याधः प्रशोषयन्।
पुरीषं वातविण्मूत्रसङ्गं कुर्वीत दारुणम्॥४७॥
तेन तीव्रा रुजा कोष्ठपृष्ठहृत्पार्श्वगा भवेत्।
आध्मानमुदरावेष्टो हृल्लासः परिकर्तनम्॥४८॥
बस्तौ च सुतरां शूलं गण्डश्वयथुसम्भवः।
पवनस्योर्ध्वगामित्वं ततश्च्छर्द्यरुचिज्वराः॥४९॥
हृद्रोगग्रहणीदोषमूत्रसङ्गप्रवाहिकाः।
बाधिर्यतिमिरश्वासशिरोरुक्कासपीनसाः॥५०॥
मनोविकारस्तृष्णास्रपित्तगुल्मोदरादयः।
ते ते च वातजा रोगा जायन्ते भृशदारुणाः॥५१॥
दुर्नाम्नामित्युदावर्तः परमोऽयमुपद्रवः।
वाताभिभूतकोष्ठानां तैर्विनाऽपि स जायते॥५२॥

स०-आदिशब्देन मसूरादीनां ग्रहणम्। मुद्गादिभी रूक्षैः सङ्ग्राहिभिर्वायुः-अपानाख्यः, स्वे स्थाने-बस्त्यादिलक्षणे, कुपितोऽत एव बलवान्, स्वस्थाने कुपितो बली स्यात्। बली पवनो वातादिसङ्गं [दारुणं] कुर्वीत। किं कृत्वा ? अधोवहानि स्रोतांसि संरुध्य। किं कुर्वन् ? अधः पुरीषं प्रशोषयन्। तेन-वातविण्मूत्रसङ्गेन हेतुना, तेन वा-तथाविधेन वायुकोपेन, तीव्रा-दारुणा, पीडा कोष्ठादिगा भवेत्। तथा, आध्मानादयः स्युः परिकर्तनं च। बस्तौ चेति चशब्दो भिन्नक्रमः, शूलं चेत्यर्थः। गण्डयोः श्वयथुर्गण्डश्वयथुः, तस्य सम्भवः। पवनस्य-प्रकृतत्वादपानाख्यस्य, ऊर्ध्वगामित्वं स्यात्। ततः-ऊर्ध्वगमनात्, छर्द्यादयः स्युः। ते ते च वातजा रोगाः-अनेके नखभेदादयो, भृशदारुणाः-अतिशयेन दुःखावहाः, जायन्ते। दुर्नाम्नामिति-एवं पूर्वोक्तेन प्रकारेण, अयं उदावर्तः परमो-महान्, उपस्रवः स्मृतो मुनीन्द्रैरिति शेषः। वातेत्यादि।

वातेनाभूभितो-व्याप्तः, कोष्ठो येषां त एवं तेषां [तैः-] दुर्नामभिर्विनाऽपि, सः-उदावर्तो जायते, न केवलं तैः, इत्यपिशब्दार्थः।

अधुना साध्यासाध्यविभागमेषामाह-

सहजानि त्रिदोषाणि यानि चाभ्यन्तरे वलौ।
स्थितानि तान्यसाध्यानि, याप्यन्तेऽग्निबलादिभिः॥५३॥

स०-सहजान्यर्शांसि, तथा त्रिदोषजानि यथोत्तरकालजान्यपि, आभ्यन्तरे वलौ यानि स्थितान्येकदोषजानि तान्यप्यसाध्यानि। बलिशब्दः पुंस्त्रीलिङ्गः। अर्शसामसाध्यानां किं कार्यम्? इत्याह-याप्यन्त इत्यादि। अग्निबलमादि येषां त एवम्, तैर्याप्यन्ते। अग्निबलेऽक्षीण आयुषि च पादसम्पदि चेत्यर्थः।

द्वन्द्वजानि द्वितीयायां वलौ यान्याश्रितानि च।
कृच्छ्रसाध्यानि तान्याहुः परिसंवत्सराणि च॥५४॥

स०-द्वन्द्वजानि-सङ्करोत्पन्नानि, यानि च द्वितीयायां वलौ संश्रितानि, तानि कृच्छ्रसाध्यान्याहुः, मुनय इति शेषः। तथा परिसंवत्सराणि च कृच्छ्रसाध्यानि। परिगतानि संवत्सरं परिसंवत्सराणि, प्रादिसमासः, वर्षातिक्रान्तानीत्यर्थः।

बाह्यायां तु वलौ जातान्येकदोषोल्बणानि च।
अर्शांसि सुखसाध्यानि न चिरोत्पतितानि च॥५५॥

स०-बाह्यायां वलौ जातानि यानि तथैकदोषोल्बणानि च तथा न चिरोत्पतितानि-संवत्सरादर्वाग्जातानि, तानि च सुखसाध्यानि।

मेढ्रादिष्वपि वक्ष्यन्ते यथास्वम्

स०-मेढ्रभयनासाकर्णादिषु चार्शांसि वक्ष्यन्ते। यथास्वं-स्वीये स्वीयेऽध्याये गुह्यरोगविज्ञाने नासारोगविज्ञाने कर्णरोगविज्ञानादौ चेति।

नाभिजानि तु।

गण्डूपदास्यरूपाणि पिच्छिलानि मृदूनि च॥५६॥

स०-नाभिजानि तु-नाभौ जातानि पुनर्गण्डूपदास्यरूपाणि, गण्डूपदानां-किञ्चुलुकानामास्यं तदिव रूपं येषां तान्येवम्। तथा पिच्छिलानि-पिच्छावन्ति, तथा मृदूनि च भवन्ति।

चर्मकीलान्याह-

व्यानो गृहीत्वा श्लेष्माणं करोत्यर्शस्त्वचो बहिः।

कीलोपमं स्थिरखरं चर्मकीलं तु तं विदुः॥५७॥

स०-व्यानाख्यो वायुः श्लेष्माणं गृहीत्वाऽर्शः करोति। क्व? त्वचो बहिः-बाह्यप्रदेशे। किम्भूतम्? कीलोपमं तथा स्थिरं खरं च। तं च-गुदाङ्कुरं, चर्मकीलं विदुः, मुनय इति शेषः।

वातेन तोदः पारुष्यं, पित्तादसितरक्तता।

श्लेष्मणा स्निग्धता तस्य ग्रथितत्वं सवर्णता॥५८॥

स०-तत्र वातेनाधिकेन तोदपारुष्ये भवतः। पित्तादसितरक्तता भवति। श्लेष्मणा तस्य-चर्मकीलस्य, स्निग्धतादिकं स्यात्। ग्रथितत्वं-ग्रन्थिसदृशत्वम्। सवर्णता-प्राकृतशरीरतुल्यवर्णता।

अर्शसां प्रशमे यत्नमाशु कुर्वीत बुद्धिमान्।
तान्याशु हि गुदं बद्धा कुर्युर्बद्धगुदोदरम्॥५९॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां तृतीये निदानस्थानेऽर्शसां निदानं नाम सप्तमोऽध्यायः॥७॥

****

स०-अर्शसां प्रशमे-शान्तौ, मतिमान् शीघ्रं यत्नं कुर्वीत। किमिति चेत्? तदाह-तानीत्यादि। यस्मात्तानि-अर्शांसि, गुदं बद्धा-निरूद्ध्य, बद्धगुदोदरं शीघ्रं कुर्युरिति।

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टाङ्गहृदयटीकायां सर्वाङ्गसुन्दराख्यायां तृतीये निदानस्थानेऽर्शसां नाम सप्तमोऽध्यायः समाप्तः॥७॥

****

अष्टमोऽध्यायः।

अर्शोनिदानादनन्तरमतिसारग्रहणीरोगनिदानारम्भः। यतो वक्ष्यति (हृ. चि. अ. ८।१६४) -"अर्शोतिसारग्रहणीविकाराः प्रायेण चान्योन्यनिदानभूताः।" इति। तस्मादतीसारग्रहणीरोगनिदानं प्रक्रम्यत इत्याह-

अथातोऽतीसारग्रहणीदोषनिदानं व्याख्यास्यामः।

इति ह स्माहुरात्रेयादयो महर्षयः।

(गद्यसूत्रे॥२॥)

स०-पूर्ववद्व्याख्या।

दोषैर्व्यस्तैः समस्तैश्च भयाच्छोकाच्च षड्विधः ।

अतीसारः

स०-दोषैर्व्यस्तैः-पृथग्वातपित्तकफैः, समस्तैः-सन्निपातेन, तथा भयात् शोकाच्चेति षड्विधोऽतीसारः।

स सुतरां जायतेऽत्यम्बुपानतः॥१॥

कृशशुष्कामिषासात्म्यतिलपिष्टविरूढकैः।

मद्यरूक्षातिमात्रान्नैरर्शोभिः स्नेहविभ्रमात्॥२॥

कृमिभ्यो वेगरोधाच्च तद्विधैः कुपितोऽनिलः।

विस्रंसयत्यधोऽध्यातुं हत्वा तेनैव चानलम्॥३॥

व्यापद्यानुशकृत्कोष्ठं पुरीषं द्रवतां नयन्।

प्रकल्पतेऽतिसाराय

स०-स च सुतरामत्यम्बुपानात् जायते। कृशशुष्कामिषादिभिस्तथा तद्विधैः-वातप्रकोपहेतुभिरिहानुक्तैरपि, अनिलः कुपितोऽभ्यातुं शरीरगतमधो विस्रंसयति-अधस्तान्नयति। स्नेहविभ्रमः-स्नेहव्यापत्तिः। तेनैव-अभ्यातुना, अनलं-जठराग्निं, हत्वा-मन्दत्वं नीत्वा, तथा कोष्ठं व्यापद्य-शून्यतां कोष्ठस्य कारयित्वा, अनुशकृत्-शकृतः समीपे, न तु सर्वं कोष्ठम्। पुरीषं च तेनैव धातुना द्रवतां नयन्-प्रापयन्।अतिसाराय कल्पते-सम्पद्यते। अनिल इति योज्यम्।

लक्षणं तस्य भाविनः॥४॥

तोदो हृद्गुदकोष्ठेषु गात्रसादो मलग्रहः।

आध्मानमविपाकश्च

स०-तस्य-अतीसारस्य, भाविनो-भविष्यतो लक्षणं, तोदो हृदादिषु गात्रसादादि च।

तत्र वातेन विड्भेदम्॥५॥

अल्पाल्पं शब्दशूलाढ्यं विबद्धमुपवेश्यते।

रूक्षं सफेनमच्छं च ग्रथितं वा मुहुर्मुहुः॥६॥

तथा दग्धगुडाभासं सपिच्छापरिकर्तिकम्।

शुष्कास्यो भ्रष्टपायुश्च हृष्टरोमा विनिष्टनन्॥७॥

स०-[तत्र-] तेषु षडतीसारेषु, वातेनातीसारे विड्भेदादिकं शुष्कमुखादिको नर उपवेश्यते। किं कुर्वन्? विनिष्टनन्। कोऽर्थः? निःकुथन्।

पित्तेन पीतमसितं हारिद्रं शाद्वलप्रभम्।

सरक्तमतिदुर्गन्धं तृण्मूर्च्छास्वेददाहवान्॥८॥

सशूलं पायुसन्तापपाकवान्

स०-पित्तेन तृडादिमान्नरः पीतादिकमुपवेश्यते।

श्लेष्मणा घनम्।

पिच्छिलं तन्तुमच्छ्वेतं स्निग्धमामं कफान्वितम्॥९॥
अभीक्ष्णं गुरु दुर्गन्धं विबद्धमनुबद्धरुक्।
निद्रालुरलसोऽन्नद्विडल्पाल्पं सप्रवाहिकम्॥१०॥
सरोमहर्षः सोत्क्लेशो गुरुबस्तिगुदोदरः।
कृतेऽप्यकृतसंज्ञश्च

स०-श्लेष्मणा घनादिगुणं नर उपवेश्यते। निद्रालुस्तथाऽलसोऽन्नद्वेषी च स्तोकं स्तोकं सह प्रवाहिकया वर्तते सप्रवाहिकं चोपवेश्यते। तथा, कृतेऽप्यकृतसंज्ञश्च-कृतेऽपि पुरीषोत्सर्गेऽकृतसंज्ञः कृतपुरीषोत्सर्ग इति संवेदना न भवति।

सर्वात्मा सर्वलक्षणः॥११॥

स०-सर्वात्मा-सन्निपातेन, सर्वदोषलिङ्गः।

भयेन क्षोभिते चित्ते सपित्तो द्रावयेच्छकृत्।
वायुस्ततोऽतिसार्येत क्षिप्रमुष्णं द्रवं प्लवम्॥१२॥
वातपित्तसमं लिङ्गैराहुः

स०-भयेन चित्ते क्षोभिते सति पित्तसहितो वायुः शकृद्द्रावयेत्। ततोऽनन्तरमतिसार्येत, क्षिप्रादिगुणयुक्तं लिङ्गैर्वातपित्ततुल्यम्।

तद्वच्च शोकतः।

स०-तद्वच्च-भयेन तुल्यलिङ्गं, शोकादतिसार्यते।

अतीसारः समासेन द्विधा सामो निरामकः॥ १३॥

सासृङ्निरस्रः

स०-अतीसारः षोढा भवन् द्विप्रकारः सङ्क्षेपेण। एकः सामो द्वितीयो निरामकः। तथा, एकः सरक्तो द्वितीयो निरस्रः।

तत्राद्ये गौरवादप्सु मज्जति।

शकृद्दुर्गन्धमाटोपविष्टम्भार्तिप्रसेकिनः॥ १४॥

स०-तत्र-तस्मिन्, आद्ये-सामेऽतीसारे, गौरवादप्सु पतितं पुरीषं मज्जति-ब्रुडति, दुर्गन्धं च स्यात्। आटोपादियुतस्य पुंसः।

विपरीतो निरामस्तु

स०-निरामस्त्वतीसारोऽतो विपरीतः-अप्सु प्लवति, आटोपादिरहितस्य पुंसः।

कफात्पक्वोऽपि मज्जति।

स०-कफात्पुनः स्वभावगुरुत्वात् पक्वोऽपि मज्जति।

अथग्रहणीरोगं लक्षयति-

अतीसारेषु यो नातियत्नवान् ग्रहणीगदः॥ १५॥
तस्य स्यादग्निविध्वंसकरैरन्यस्य सेवितैः।

स०-अतीसारेषु योऽतियत्नवान्न भवति तस्य ग्रहणीगदो भवेदिति ग्रहण्या निदानम्। अन्यस्य-अनतिसारिणः, अग्निविध्वंसकरैः-वह्निमान्द्यहेतुभिरन्नपानैः, शीलितैर्ग्रहणीरोगः स्यात्।

अतीसारग्रहणीरोगयोः समानाभासत्वात् को विशेषः ? इत्याह-

सामं शकृन्निरामं वा जीर्णे येनातिसार्यते॥ १६॥
सोऽतिसारोऽतिसरणादाशुकारी स्वभावतः।

स०-सामं पुरीषमथवा निरामं जीर्ण आहारे सति येन-व्याधिना, अतिसार्यते-अत्यर्थं बहिर्निःसार्यते, स व्याधिरतीसारः। अतिसरणाद्धेतोः। अतिसरणशब्दनिर्देशेन चास्यान्वर्थत्वं द्योतितम्। तदेवमतिसरणादतीसार इत्युच्यते। ननु, एवं सति यदा ग्रहणीदोषेऽप्यतिसरणं कथञ्चित्स्यात्तदा तस्याप्यतीसारत्वं स्यादित्याशङ्क्याह-आशुकारीत्यादि। प्रभावप्रधानोऽयं निर्देशः। हेतौ प्रथमा। स्वभावेनाशुकारित्वादतीसारो ग्रहणीदोषादन्य इत्यर्थः। ग्रहणीदोषो हि नाशुकारी, किन्तर्हि ? चिरकृत्। तथा चाह (श्लो. १८)-"चिरकृद्ग्रहणीदोषः" इति।

अथ ग्रहणीदोषस्य स्वरूपं वर्णयन्नतीसाराद्भेयो मेदमाह-

सामं सान्नमजीर्णेऽन्ने जीर्णे पक्वं तु नैव वा॥ १७॥
अकस्माद्वा मुहुर्बद्धमकस्माच्छिथिलं मुहुः।
चिरकृद्ग्रहणीदोषः सञ्चयाच्चोपवेशयेत्॥ १८॥

स०-ग्रहणीदोषोऽजीर्णेऽन्ने सामं कदाचित्सान्नं, कदाचिज्जीर्णेऽन्ने पक्वं तथा नैव वा। अकस्मात्-कदाचिन्निमित्तमन्तरेणापि, मुहुर्मुहुः-पुनःपुनर्बद्धं, कदाचिन्निमित्तं विना मुहुः शिथिलं, सञ्चयादुपवेशयेदिति योज्यम्। अयं तु ग्रहणीदोषश्चिरकृत्।

स चतुर्धा पृथग्दोषैः सन्निपाताच्च जायते।

स०-सः-ग्रहणीदोषः, पृथग्दोषैः-वातपित्तकफैः, सन्निपातेन चेति चतुष्प्रकारो जायते।

प्राग्रूपं तस्य सदनं चिरात्पचनमम्लकः॥ १९॥
प्रसेको वक्त्रवैरस्यमरुचिस्तृट् क्लमो भ्रमः।
आनद्धोदरता छर्दिः कर्णक्ष्वेडोऽन्त्रकूजनम्॥ २०॥

स०-तस्य-ग्रहणीदोषस्य, प्राग्रूपं सदनं चिरात्पचनादि च।

सामान्यं लक्षणं काश्र्यं धूमकस्तमको ज्वरः।
मूर्च्छा शिरोरुग्विष्टम्भः श्वयथुः करपादयोः॥ २१॥

स०-चतुर्विधस्यास्य ग्रहणीगदस्य सामान्यं लक्षणं काश्र्यादिकम्।

तत्रानिलात्तालुशोषस्तिमिरं कर्णयोः स्वनः।
पार्श्वोरुवङ्क्षणग्रीवारुजाऽभीक्ष्णं विषूचिका॥ २२॥
रसेषु गृद्धिः सर्वेषु क्षुत्तृष्णा परिकर्तिका।
जीर्णे जीर्यति चाध्मानं भुक्ते स्वास्थ्यं समश्नुते॥ २३॥

वातहृद्रोगगुल्मार्शःप्लीहपाण्डुत्वशङ्कितः।

चिराद्दुःखं द्रवं शुष्कं तन्वामं शब्दफेनवत्॥२४॥

पुनःपुनः सृजेद्वर्चः पायुरुक्श्वासकासवान्।

स०-तत्र-तेषु चतुर्षु गदेषु मध्ये, वातात्तालुशोषादि स्यात्।

पित्तेन नीलपीताभं पीताभः सृजति द्रवम्॥२५॥

पूत्यस्रोद्गारहृत्कण्ठदाहारुचितृडर्दितः।

स०-पित्तेन पीताभः सन् तथा पूत्यस्रोद्गाराद्यर्दितो नीलवर्णादिकं वर्चः सृजति।

श्लेष्मणा पच्यते दुःखमन्नं छर्दिररोचकः॥२६॥

आस्योपदेहेनिष्ठीवकासहृल्लासपीनसाः।

हृदयं मन्यते स्त्यानमुदरं स्तिमितं गुरु॥२७॥

उद्गारो दुष्टमधुरः सदनं स्त्रीष्वहर्षणम्।

भिन्नामश्लेष्मसंसृष्टगुरुवर्चःप्रवर्तनम्॥२८॥

अकृशस्यापि दौर्बल्यम्

स०-श्लेष्मणा दुःखं-कृच्छ्रेण, अन्नं पच्यते। छर्द्यादि च स्यात्। तथा, हृदयं स्त्यानं-पिण्डितमिव, मन्यते। जठरं निश्चलं गुरु च। उद्गारश्च दुष्टमधुरः स्यात्। सदनं शरीरस्य। स्त्रीष्वहर्षणादि च स्यात्।

सर्वजे सर्वसङ्करः।

स०-सर्वजे-सन्निपातजे, सर्वेषां लक्षणानां सङ्करो-मिश्रत्वं, भवति।

विभागेऽङ्गस्य ये चोक्ता विषमाद्यास्त्रयोऽग्नयः॥२९॥

तेऽपि स्युर्ग्रहणीदोषाः

स०-अङ्गस्य विभागे च ये विषमाद्याः-विषमतीक्ष्णमन्दाः, त्रयोऽग्नय उक्तास्तेऽपि ग्रहणीदोषाः स्युः। ननु, एवं सति सप्त ग्रहणीदोषा इति प्राप्नोति। मैवम्। मुख्याः सप्राप्तिपूर्वरूपरूपनिर्देशादियुक्ताश्चत्वार एव ग्रहणीगदाः। ये तु विषमाद्यास्त्रयस्ते ग्रहणीरोगाभासा इति बोध्यम्।

समस्तु स्वास्थ्यकारणम्।

स०-समः पुनरग्निः स्वास्थ्यस्य-आरोग्यस्य, कारणम्।

वातव्याध्यश्मरीकुश्ठमेहोदरभगन्दराः।

अर्शांसि ग्रहणीत्यष्टौ महारोगाः सुदुस्तराः॥३०॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां तृतीये निदानस्थानेऽतीसारग्रहणीदोषनिदानं नामाष्टमोऽध्यायः॥८॥

****

स०-वातव्याध्यादयोऽष्टौ महारोगाः सुदुस्तराः-विषमाः। तस्मात्तेषु यत्नः कार्य इति।

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टाङ्गहृदयटीकायां सर्वाङ्गसुन्दराख्यायां तृतीये निदानस्थानेऽतिसारग्रहणीदोषनिदानं नामाष्टमोऽध्यायः समाप्तः॥८॥

****

नवमोध्यायः।

अतीसारग्रहणीरोगनिदानादनन्तरं मूत्राघातनिदानमेकसम्बन्धनत्वादुच्यत इत्याह-

अथातो मूत्राघातनिदानं व्याख्यास्यामः।
इति ह स्माहुरात्रेयादयो महर्षयः।

(गद्यसूत्रे॥२॥)

बस्तिबस्तिशिरोमेढ्रकटीवृषणपायवः।
एकसम्बन्धनाः प्रोक्ता गुदास्थिविवराश्रयाः॥१॥

स०-बस्त्यादीनां द्वन्द्वः। बस्त्यादय एकसम्बन्धनाः प्रोक्ताः। एकं सम्बन्धनं-ग्रन्थनं, येषां त एवम्। तदेवैकसम्बन्धनत्वमेषां प्रकटयति-गुदेत्यादि। गुदास्थिविवरमाश्रयो येषां त एवम्, तत्राश्रिता इत्यर्थः।

ननु, अत्र मूत्राश्रिता दोषा अवश्यं बस्तिं प्राप्य विकुर्वते। बस्तेश्चाधोमुखत्वान्मूत्रान्तःप्रवेशो बस्तिमुखेन न सम्भाव्यते, तस्मान्मूत्राघातानुत्पत्तिरेव, इत्याशङ्क्याह-

अधोमुखोऽपि बस्तिर्हि मूत्रवाहिसिरामुखैः।
पार्श्वेभ्यः पूर्यते सूक्ष्मैः स्यन्दमानैरनारतम्॥२॥
यैस्तैरेव प्रविश्यैनं दोषाः कुर्वन्ति विंशतिम्।
मूत्राघातान् प्रमेहांश्च कृच्छ्रान्मर्मसमाश्रयान्॥३॥

स०-हिर्यस्मादर्थे। अपिश्च हेत्वभ्युपगमे। यद्यप्यधोमुखो बस्तिस्तथाऽपि जलमध्यस्थिताधोमुखनवमृत्कुम्भवत्। हि-यस्मात्, पार्श्वेभ्यो मूत्रवाहिसिरामुखैः-स्रोतोद्वारैः, सूक्ष्मैः प्रकृतत्वान्मूत्रं स्यन्दमानैः-स्रवद्भिः, अनारतं-अनवरतं, यैरेव मूत्रस्रोतोद्वारैर्बस्तिः पूर्यते तैरेव मूत्रस्रोतोद्वारैर्दोषा एनं-बस्तिं, प्रविश्य विंशतिं मूत्राघातान् कुर्वन्ति तावतश्च प्रमेहान्। किम्भूतान्? बस्त्याख्यमर्मसमाश्रयान्। हेतौ द्वितीया। मर्मसमाश्रितत्वात् कृच्छ्रान्-कृच्छ्रसाध्यान्।

बस्तिवङ्क्षणमेढ्रार्तियुक्तोऽल्पाल्पं मुहुर्मुहुः।
मूत्रयेद्वातजे कृच्छ्रे

स०-अत्र चत्वारो मूत्राघाता वातपित्तकफसन्निपातात्मकाः। तत्र वातजे कृच्छ्रे-मूत्राघाते, बस्त्याद्यर्तियुक्तः पुमानल्पाल्पं कृत्वा मुहुर्मुहुर्मूत्रयेत्।

पैत्ते पीतं सदाहरुक्॥४॥
रक्तं वा

स०-पैत्ते कृच्छ्रे पुमान् मूत्रं पीतं सदाहरुङ्मूत्रयेत्, अथवा रक्तम्।

कफजे बस्तिमेढ्रगौरवशोफवान्।
सपिच्छं सविबन्धं च

स०-कफजे कृच्छ्रे बस्तिमेढ्रगौरवशोफयुक्तः सन् सपिच्छं सविबन्धः च-रुद्धा रुद्धा, मूत्रं मूत्रयेत्।

सर्वैः सर्वात्मकं मलैः॥५॥

स०-सर्वैः-त्रिभिर्दोषैः सन्निपतितैर्जाते कृच्छ्रे, सर्वात्मकं-दोषत्रयलक्षणलिङ्गितं, मूत्रं मूत्रयेत्।

इदानीमश्मरीं लक्षयति-

यदा वायुर्मुखं बस्तेरावृत्य परिशोषयेत्।
मूत्रं सपित्तं सकफं सशुक्रं वा तदा क्रमात्॥ ६॥
सञ्जायतेऽश्मरी घोरा पित्ताद्गोरिव रोचना।
श्लेष्माश्रया च सर्वा स्यात्

स०-यदा-यस्मिन् काले, वायुः कुपितो बस्तेर्मुखमावृत्य-रुद्ध्वा, परिशोषयेन्मूत्रं केवलं कदाचित्सपित्तं कदाचित्सकफमथवा सशुक्रं मूत्रं तदा सञ्जायतेऽश्मरी। क्रमात्-यथोत्तरम्, घोरा मूत्राश्मरी, घोरतरा पित्ताश्मरी, घोरतमा श्लेष्माश्मरी, ततोऽपि घोरा शुक्राश्मरी, इति क्रमशब्दस्यार्थः। वायुना पित्तं संशोष्य गोर्यथा रोचना सञ्जायते तथाऽश्मरीति। सर्वा चाश्मरी श्लेष्माश्रया। श्लेष्मा आश्रयः-आधारो, यस्याः सैवम्। कफमाश्रित्य सर्वाऽश्मरी स्यादित्यर्थः।

अथास्याः पूर्वलक्षणम् ॥७॥

बस्त्याध्मानं तदासन्नदेशेषु परितोऽतिरुक्।
मूत्रे च बस्तगन्धत्वं मूत्रकृच्छ्रं ज्वरोऽरुचिः॥८॥

स०-अथ-अनन्तरं, अस्याः पूर्वलक्षणं-प्राग्रूपं, बस्त्याध्मानादि।

सामान्यलिङ्गं रुङ्नाभिसेवनीबस्तिमूर्धसु।
विशीर्णधारं मूत्रं स्यात्तया मार्गनिरोधने॥९॥
तद्व्यपायात्सुखं मेहेदच्छं गोमेदकोपमम्।
तत्सङ्क्षोभात्क्षते सास्रमायासाच्चातिरुग्भवेत्॥१०॥

स०-सामान्यं लक्षणं नाभ्यादिषु रुग्भवति। तया-अश्मर्या, मार्गनिरोधे सति मूत्रं विशीर्णधारं-विच्छिन्नधारं, भवेत्। तद्व्यपायात्-अश्मर्यपगमात्, नरः सुखं-अकृच्छ्रेण, मेहेत्-मूत्रं मुञ्चेत्। कीदृशम्? अच्छं-अकलुषम्, गोमेदकोपमम्, गोमेदको-रत्नविशेषः, उपमा यस्य तदेवम्। तस्याः सङ्क्षोभस्तत्सङ्क्षोभाद्यत्क्षतं भवति तस्मिन्क्षते सति सास्रं-सलोहितं, मेहेत्। आयासात्-अध्वादिकृतात् श्रमात्, अतिरुग्भवेत्।

तत्र वाताद्भृशार्त्यार्तो दन्तान् खादति वेपते।
मृद्नाति मेहनं नाभिं पीडयत्यनिशं क्वणन्॥ ११॥
सानिलं मुञ्चति शकृन्मुहुर्मेहति बिन्दुशः।
श्यावा रूक्षाऽश्मरी चास्य स्याच्चिता कण्टकैरिव॥ १२॥

स०-तत्र-तास्वश्मरीषु मध्ये, वाताद्याऽश्मरी तस्यामुत्पन्नायां सत्यां पुमान् भृशार्त्यार्तः-अत्यन्तं पीडया पीडितो, दन्तान् खादति। तथा, वेपते-कम्पते। मेहनं-मेढ्रं, मृद्नाति-मलयति। नाभिं च हस्ताभ्यां पीडयति। किं कुर्वन्? अनिशं-अनवरतं, क्वणन्-नानाविधदुःखोद्भावकं शब्दं विदधत्। तथा, सहानिलेन-वातसहितं, शकृन्मुञ्चति। तथा, मुहुर्मेहति-मूत्रं पुनःपुनः सृजति। बिन्दुशो-बिन्दुं बिन्दुं कृत्वा। अस्य च-नरस्य, अश्मरी श्यावा वर्णतः, तथा रूक्षा कण्टकैश्चितेव-व्याप्ता, भवेत्।

पित्तेन दह्यते बस्तिः पच्यमान इवोष्मवान्।
भल्लातकास्थिसंस्थाना रक्ता पीताऽसिताऽश्मरी॥ १३॥

स०-पित्तेन याऽश्मरी तया बस्तिर्दह्यते। पच्यमान इव ऊष्मवान्-सन्तापयुक्तो भवति। सा चाश्मरी भल्लातकास्थिसंस्थाना-तदाकारा स्यात्। तथा, वर्णतो रक्ता पीता तथाऽसिता-कृष्णच्छाया।

बस्तिर्निस्तुद्यत इव श्लेष्मणा शीतलो गुरुः।

अश्मरी महती श्लक्ष्णा मधुवर्णाऽथवा सिता॥ १४॥

स०-श्लेष्मणा जातायामश्मर्यां बस्तिर्निस्तुद्यत इव शीतलो गुरुश्च स्यात्। अश्मरी च महती-स्थूला वातपित्तोत्थाभ्यां सकाशात्। तथा, श्लक्ष्णा-कोमला। मधुवर्णा-माक्षिकाभा। अथवा, सिता-शुक्ला।

एता भवन्ति बालानां तेषामेव च भूयसा।

आश्रयोपचयाल्पत्वाद्ग्रहणाहरणे सुखाः॥ १५॥

स०-एताः-तिस्रोऽश्मर्यो, बालानामेव भवन्ति। तथा च तन्त्रान्तरे (सुश्रुते नि. अ. ३।११) -"तिस्रोऽश्मर्यो दिवास्वप्नशीलनाध्यशनशीतस्निग्धमधुराहारप्रियत्वाद्बालानामेव भवन्ति।" इति। तेषां च बालानां जातास्ता भूयसा ग्रहणाहरणे सुखाः। ग्रहणं-बडिशादिना, आहरणं-शस्त्रादिना, तस्मिन् सुखाः-सुखोपायाः। अत्रैव हेतुमाह-आश्रयेत्यादि। आश्रयः-आधारः, उपचयो-वृद्धिः, तयोरल्पत्वं, तस्माद्धेतोर्बलानामश्मर्या आश्रयोऽल्पो भवति, यत्रासावश्मरी जायते। अत एव चाश्रयानुसारेणोपचयोऽप्यश्मर्या बालानामल्पो भवति। अतस्ता ग्रहणाहरणे सुखाः। महतां तु यथोक्तहेत्वभावाद्ग्रहणाहरणे ता दुःखावहाः।

शुक्राश्मरी तु महतां जायते शुक्रधारणात्।

स्थानाच्च्युतममुक्तं हि मुष्कयोरन्तरेऽनिलः॥ १६॥

शोषयत्युपसङ्गह्य शुक्रं तच्छुष्कमश्मरी।

बस्तिरुक्कृच्छ्रमूत्रत्वमुष्कश्वयथुकारिणी॥ १७॥

तस्यामुत्पन्नमात्रायां शुक्रमेति विलीयते।

पीडिते त्ववकाशेऽस्मिन्

स०-तुरवधारणे। महतामेव शुक्राश्मरी जायते, न बालानाम्, तथाविधस्य तेषां शुक्रस्याभावात्। कुतो जायते ? शुक्रधारणात्-हर्षाद्युदीरणात्स्थानच्युतस्य शुक्रस्य धारणात्। अत एवाह-स्थानादित्यादि। यस्मात्स्थानाच्युतं-परिभ्रष्टं, बहिरमुक्तं-अत्यक्तं, तदानीं वायुर्मुष्कयोः-वृषणयोः, अन्तरे-मध्ये, शोषयति। किं कृत्वा ? उपसङ्गह्य,-शुक्रं सर्वतो गृहीत्वा। तच्च शुष्कं सदश्मरीति भण्यते। सा च बस्तिरुगादिकारिणी। तस्यामुत्पन्नमात्रायां-न चिरकालोत्पन्नायां, पीडिते-हस्तादिनाऽभिभूते, अस्मिन्नवकाशे-शुक्राश्मरीस्थाने, शुक्रमेति-आगच्छति, तथा विलीयते च, इति चशब्दो लुप्तनिर्दिष्टो बोध्यः। विशेषेण लीयते-तत्रैव सुष्ठु श्लिष्यते, कठिनत्वात्।

अश्मर्येव च शर्करा॥ १८॥

अणुशो वायुना भिन्ना सा त्वस्मिन्ननुलोमगे।
निरेति सह मूत्रेण प्रतिलोमे विबध्यते॥ १९॥

स०-अश्मर्येव च पवनेनाणुशो भिन्ना सती शर्करा स्यात्, न तु तस्या अन्यदुपादानकारणमित्यर्थः। सा-शर्करा, अस्मिन्-पवने, अनुलोमगे-अनुलोमं कृत्वा स्थिते सति, मूत्रेण सह निरेति-बहिर्निष्क्रामति। प्रतिलोमे वायौ सा सर्करा विबध्यते- न तु बहिर्निष्क्रामति। अश्मरी त्वनुलोमगेऽपि मरुति न निरेति-मूत्रेण सह न निष्क्रामति, इत्यनयोर्भेदः। अश्मरीणां भल्लातकादिसंस्थाननिर्देशस्तदनुसारेणाहरणार्थं बस्त्यवयवविपाटनमुपयुज्यते। श्यावादिवर्णनिर्देशश्च बहिर्निष्क्रान्तानां श्यावादिवर्णनिदर्शनेन वातादीननुमाय तत्कृतानां व्रणानां चिकित्सार्थमुपयुज्यते। ननु च, संस्थानेनैव वाताद्यनुमानमश्मरीव्रणस्य भविष्यतीति वर्णनिर्देशोऽनर्थकः। मैवम्। संस्थानं प्रायिकमिति केचिन्मन्यन्ते, तस्माद्वर्णनिर्देशोऽपि वाच्यः। प्रायिकत्वे च तद्वयोरुपादानं लिङ्गम्।

अथ वातबस्त्यादीनाह-

मूत्रसन्धारिणः कुर्याद्रुद्ध्वा बस्तेर्मुखं मरुत्।
मूत्रसङ्गं रुजं कण्डूं कदाचिच्च स्वधामतः॥ २०॥
प्रच्याव्य बस्तिमुद्वृत्तं गर्भाभं स्थूलविप्लुतम्।

करोति तत्र रुग्दाहस्पन्दनोद्वेष्टनानि च॥ २१॥

बिन्दुशश्च प्रवर्तेत मूत्रं बस्तौ तु पीडते।

धारया द्विविधोऽप्येष वातबस्तिरिति स्मृतः॥ २२॥

दुस्तरो दुस्तरतरो द्वितीयः प्रबलानिलः।

स०-मूत्रसन्धारिणः पुरुषस्य बस्तेः-मूत्रधारस्य, मुखं-द्वारं, रुद्ध्वा मारुतो मूत्रसङ्गं कुर्याद्रुजं कण्डूं च। स वातबस्तिर्मूत्राघातविशेषः। कदाचित्-अदृष्टवशात्, वायुस्तं बस्तिं स्वधामतः-स्वस्थानात्, प्रच्याव्य-च्यावयित्वा, उद्वृत्तं-ऊर्ध्वमुखं, गर्भाभं-गर्भसदृशं, स्थूलं-स्वप्रमाणात् प्रवृद्धं, तथा विप्लुतं-चञ्चलं, करोति। चशब्दान्न केवलं बस्तिभ्रंशमेवंविधं करोति, यावत्तत्र रुगादीनपि। मूत्रं च बिन्दुशः-बिन्दुबिन्दुः प्रवर्तते। बस्तौ च पीडिते-हस्तादिना, मूत्रं धारया-अविच्छिन्नं, प्रवर्तते। एष द्विविधो वातबस्तिरिति नाम्ना स्मृतः। स च प्रथमो दुस्तरो-दुःखेन कृच्छ्रेण तरितुं शक्यते। द्वितीयो वातबस्तिर्दुस्तरतरो यतः प्रबलानिलः। अत एव चात्र प्रबलानिलत्वान्मूत्रस्य बिन्दुशः प्रवर्तनम्।

शकृन्मार्गस्य बस्तेश्च वायुरन्तरमाश्रितः॥ २३॥

अष्ठीलाभं घनं ग्रन्थिं करोत्यचलमुन्नतम्।

वाताष्ठीलेति साऽऽध्मानविण्मूत्रानिलसङ्गकृत्॥ २४॥

स०-शकृन्मार्गस्य-गुदस्य, बस्तेश्चान्तरं-मध्यं, वायुराश्रितः सन् ग्रन्थिमष्ठीलाभं घनमचलमुन्नतं करोति। सा वाताष्ठीलेत्युच्यते। सा चाध्मानादिकृत्।

विगुणः कण्डलीभूतो बस्तौ तीव्रव्यथोऽनिलः।

आविध्य मूत्रं भ्रमति सस्तम्भोद्वेष्टगौरवः॥ २५॥

मूत्रमल्पाल्पमथवा विमुञ्चति शकृत्सृजन्।

वातकुण्डलिकेत्येषा

स०-विगुणः-कुपितो न त्वनुलोमगः, तथा दोषदेशादिसहकारिकारणवशात् कुण्डलाकारगतिः, तथा तीव्रव्यथः, कार्ये कारणोपचारादेवमुक्तः, तथा सह स्तम्भेन-स्तब्धतया, तथोद्वेष्टेन गौरवेण च वर्तते। स एवंभूतो वायुर्मूत्रमाविध्य-क्षोभयित्वा बस्तौ भ्रमति। अथवा न मूत्रमाविध्य भ्रमति। किम्भूतस्तर्हि ? शकृत्-पुरीषं, सृजन्-विसर्गं कुर्वन्, मूत्रमल्पाल्पं-स्तोकं स्तोकं कृत्वा, विमुञ्चति। एवंरूपा वातकुण्डलिकोच्यते।

मूत्रं तु विधृतं चिरम्॥२६॥

न निरेति विबद्धं वा मूत्रातीतं तदल्परुक्।

स०-मूत्रं तु चिरं विधृतं न निरेति-न प्रवर्तते। अथवा पवनवशाद्विबद्धं निर्गच्छत्यल्परुक् तन्मूत्रातीतं कथ्यते।

विधारणात्प्रतिहितं वातोदावर्तितं यदा॥२७॥

नाभेरधस्तादुदरं मूत्रमापूरयेत्तदा।

कुर्यात्तीव्ररुगाध्मानमपक्तिं मलसङ्ग्रहम्॥२८॥

तन्मूत्रजठरम्

स०-विधारणात्-मूत्रवेगस्य रोधात्, प्रतिहितं मूत्रं कर्तृभूतं वातेनोदावर्तितं यदा नाभेरधस्तादुदरं कर्मभूतमापूरयेत् तदा तीव्ररुजादिकं कुर्यात्, तन्मूत्रजठरमित्युच्यते।

छिद्रवैगुण्येनानिलेन वा।

आक्षिप्तमल्पं मूत्रं तद्वस्तौ नालेऽथवा मणौ॥२९॥

स्थित्वा स्रवेच्छनैः पश्चात्सरुजं वाऽथ नीरुजम्।

मूत्रोत्सङ्गः स विच्छिन्नतच्छेषगुरुशेफसः॥३०॥

स०-छिद्रवैगुण्येन-मूत्रद्वारदोषेण, अनिलेन वा तथाभूतेन, यदाक्षिप्तं मूत्रमल्पं-किञ्चिच्छेषं मूत्रं, तद्वस्तौ स्थितमथवा नाले मणिकन्दे वा स्थितम्। तत्र स्थित्वा पश्चात्-अनन्तरं, शनैः-मन्दं मन्दं कृत्वा, सरुजमथवा नीरुजं स्रवेत्। पुंसः किम्भूतस्य ? विच्छिन्नतच्छेषगुरुशेफसः। तदति प्रकृतं मूत्रं परामृश्यते, तस्य-मुक्तमूत्रस्य, शेषस्तच्छेषः, विच्छिन्नश्चासौ तच्छेषश्च विच्छिन्नतच्छेषः, तेन गुरुशेफो-गुरु मेढ्रं, यस्य स विच्छिन्नतच्छेषगुरुशेफाः, तस्य विच्छिन्नतच्छेषगुरुशेफसः। स एवंविधः सन् मूत्रोत्सङ्ग उच्यते।

अन्तर्बस्तिमुखे वृत्तः स्थिरोऽल्पः सहसा भवेत्।
अश्मरीतुल्यरुक् ग्रन्थिर्मूत्रग्रन्थिः स उच्यते॥ ३१॥

स०-बस्तेर्मुखस्य मध्ये ग्रन्थिर्वृत्तो-वर्तुलः, तथा स्थिरोऽल्पश्च सहसा-झटित्येव, भवेत्। अश्मरीतुल्यरुग् ग्रन्थिः स मूत्रग्रन्थिरुच्यते।

मूत्रितस्य स्त्रियं यातो वायुना शुक्रमुद्धतम्।
स्थानाच्च्युतं मूत्रयतः प्राक् पश्चाद्वा प्रवर्तते॥ ३२॥
भस्मोदकप्रतीकाशं मूत्रशुक्रं तदुच्यते।

स०-सञ्जातमूत्रस्य पुंसः स्त्रियं गच्छतो मूत्रयतो-मूत्रं कुर्वतः, स्थानाच्च्युतं शुक्रं वायुनोद्धतं-ध्मातं, भस्मोदकेन प्रतीकाशं-तुल्यं, प्राक् मूत्रितात् पश्चाद्वा यत् प्रवर्तते शुक्रं तन्मूत्रशुक्रमुच्यते।

रूक्षदुर्बलयोर्वातादुदावर्तं शकृद्यदा॥ ३३॥
मूत्रस्रोतोऽनुपर्येति संसृष्टं शकृता तदा।
मूत्रं विड्वुल्यगन्धं स्याद्विड्विघातं तमादिशेत्॥ ३४॥

स०-रूक्षदुर्बलयोः पुंसोर्वातादुदावर्त-पीडितं, शकृद्यदा मूत्रस्रोतोऽनुपर्येति-मूत्रस्रोतोऽभित आगच्छति, तदा शकृता संसृष्टं मूत्रं पुरीषसदृशगन्धं स्यात्, तं विड्विघातमित्यादिशेत्।

पित्तं व्यायामतीक्ष्णोष्णभोजनाध्वातपादिभिः।
प्रवृद्धं वायुना क्षिप्तं बस्त्युपस्थार्तिदाहवत्॥ ३५॥
मूत्रं प्रवर्तयेत्पीतं सरक्तं रक्तमेव वा।
उष्णं पुनःपुनः कृच्छ्रादुष्णवातं वदन्ति तम्॥ ३६॥

स०-पित्तं कर्तृ व्यायामादिभिः प्रवृद्धं तथा वातेन क्षिप्तं बस्त्युपस्थार्तिदाहयुक्तं मूत्रं कर्मभूतं प्रवर्तयेत्। किम्भूतम् ? पीतं तथा सह रक्तेन सरक्तं रक्तमेव वा केवलं तथोष्णं मुहुर्मुहुः कृच्छ्रेण मूत्रयेत्, तं उष्णवातं वदन्ति।

रूक्षस्य क्लान्तदेहस्य बस्तिस्थौ पित्तमारुतौ।
मूत्रक्षयं सरुग्दाहं जनयेतां तदाह्वयम्॥ ३७॥

स०-रूक्षस्य पुंसस्तथा क्लान्तदेहस्य-ग्लानशरीरस्य, बस्तिस्थौ पित्तमारुतै सरुग्दाहं मूत्रस्य क्षयं जनयेतां-उत्पादयेताम्। तदाह्वयं-मूत्रक्षयसंज्ञम्, मूत्रक्षयमित्यर्थः।

पित्तं कफो द्वावपि वा संहन्येतेऽनिलेन चेत्।
कृच्छ्रान्मूत्रं तदा पीतं रक्तं श्वेतं घनं सृजेत्॥ ३८॥
सदाहं रोचनाशङ्खचूर्णवर्णं भवेच्च तत्।
शुष्कं समस्तवर्णं वा मूत्रसादं वदन्ति तम्॥ ३९॥

स०-पित्तमथवा कफो व्यस्तोऽनिलेन संहन्यते-समन्तात्पीड्यत आक्रम्यते। अथवा द्वावपि-संसर्गरूपौ, तेन हन्येते यदि, तदा कृच्छ्रेण मूत्रं पीतादिनैकैकेन वर्णेन श्वेतान्तेन युक्तं घनं

सदाहं सृजेत्-मुञ्चेत्। तच्च शुष्कं कालान्तरेण रोचनाशङ्खचूर्णवर्णं भवेत्, कदाचिद्रोचनाचूर्णवर्णं कदाचिच्छङ्खचूर्णवर्णं कदाचित्पीतादिसमस्तवर्णं वा स्यात्, तं मूत्रसादं वदन्ति।

इति विस्तरतः प्रोक्ता रोगा मूत्राप्रवृत्तिजाः।
निदानलक्षणैरूर्ध्वं वक्ष्यन्तेऽतिप्रवृत्तिजाः॥४०॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां तृतीये निदानस्थाने मूत्राघातनिदानं नाम नवमोऽध्यायः॥९॥

****

स०-इति-एवं, विस्तरेण मूत्राप्रवृत्तिः-अप्रवर्तनं, ततो जाता रोगाः, निदानानि च लक्षणानि च, तैः प्रकर्षेणोक्ताः। ऊर्ध्वमित्यतोऽध्यायादनन्तरं तुल्यस्थानसङ्ख्यादित्वात् मूत्रातिप्रवृत्तिजाः-प्रमेहाख्याः, रोगा वक्ष्यन्ते-वदिष्यन्ते। अनेनास्य ग्रन्थकृता युक्त्या सम्बन्धोऽभिहित इति।

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टाङ्गहृदयटीकायां सर्वाङ्गसुन्दराख्यायां तृतीये निदानस्थाने मूत्राघातनिदानं नाम नवमोऽध्यायः समाप्तः॥९॥

****

दशमोऽध्यायः।

अश्मरीनिदानादनन्तरं प्रमेहनिदानमारभ्यते-

अथातः प्रमेहनिदानं व्याख्यास्यामः।

इति ह स्माहुरात्रेयादयो महर्षयः।

(गद्यसूत्रे॥२॥)

प्रमेहा विंशतिस्तत्र श्लेष्मतो दश, पित्ततः।

षट्, चत्वारोऽनिलात्

स०-प्रमेहा विंशतिर्भवन्ति। तत्र-विंशतिप्रमेहेषु, दश श्लेष्मतः प्रमेहाः, षट् पित्ततः, चत्वारो वातात्।

तेषां मेदोमूत्रकफावहम्॥१॥

अन्नपानक्रियाजातं यत्प्रायस्तत्प्रवर्तकम्।

स्वाद्वम्ललवणस्निग्धगुरुपिच्छिलशीतलम्॥२॥

नवधान्यसुरानूपमांसेक्षुगुडगोरसम्।

एकस्थानासनरतिः शयनं विधिवर्जितम्॥३॥

स०-तेषां-प्रमेहाणां, मेदोमूत्रकफकरं यदन्नपानक्रियाजातं प्रायो-बाहुल्येन, तत्प्रवर्तकं-उत्पादकम्। जातशब्दः प्रकारे। क्रिया-चेष्टा शय्यासननिद्रालस्यादिका कफकारी। तदेवान्नादि दर्शयितुमाह-स्वाद्वम्लेत्यादि। एकस्थानासने रतिः-प्रीतिः। शयनं-स्वप्नो, विधिवर्जितं-

अयथोक्तम् (ह्. सू. अ. ७।५४)-"अकालेऽतिप्रसङ्गाच्च न च निद्रा निषेविता। सुखायुषी पराकुर्यात्कालरात्रिरिवापरा॥" इत्यादि।

बस्तिमाश्रित्य कुरुते प्रमेहान् दूषितः कफः।
दूषयित्वा वपुःक्लेदस्वेदमेदोरसामिषम्॥४॥

स०-कफः प्रमेहकारणैर्दूषितो बस्तिमाश्रित्य प्रमेहान् कुरुते। किं कृत्वा ? वपुरादीन् दूषयित्वा।

कफजप्रमेहाणां सम्प्राप्तिमुक्त्वा पित्तप्रमेहसम्प्राप्तिमाह-

पित्तं रक्तमपि क्षीणे कफादौ मूत्रसंश्रयम्।

स०-पित्तं कर्तृ रक्तं मूत्रसंश्रयं दूषयित्वा प्रमेहान् कुरुते। अपिशब्दाद्वपुरादींश्च। कदा ? कफादौ,-सौम्ये धातौ, क्षीणे सति।

धातून् बस्तिमुपानीय तत्क्षयेऽपि च मारुतः॥५॥

स०-मारुतश्च दूषितो धातून्-वातप्रमेहसम्पादनयोग्यान्, बस्तिमुपानीय-समन्तान्मूत्राधारसमीपं नीत्वा, तत्क्षयेऽपि च प्रमेहान् कुरुते। तेषां-धातूनां, क्षयस्तस्मिंश्च सति। न केवलं धातून् बस्तिमुपानीय यावदधःक्षरणत्वादिना तेषामपि स्वयं कृत्वेत्यपि चेत्यस्यार्थः।

अथ साध्यासाध्यविभागमाह-

साध्ययाप्यपरित्याज्या मेहास्तेनैव तद्भवाः।
समासमक्रियतया महात्ययतयाऽपि च॥६॥

स०-सः-श्लेष्मादिः, भवो-जन्म, येषां ते तद्भवाः कफादिसमुत्थाः, तेनैव-विशिष्टेन सम्प्राप्तिविशेषेण, साध्ययाप्यपरित्याज्याः स्युः। तथा च,-कफप्रमेहा वपुरादिदूषणमात्रोत्थितत्वात् साध्याः, पित्तप्रमेहाणां सौम्यधातुक्षये वपुरादे रक्तस्य च दूषणेन समुत्थानाद्याप्यत्वम्, वातप्रमेहास्तु सर्वधातुक्षयोद्भूतत्वादसाध्याः। अन्यदपि हेत्वन्तरं साध्ययाप्यासाध्यत्वे वक्ति-समेत्यादि। समं चासमं च समासमे,-समानासमाने, समासमे क्रिये ययोस्तावेवम्, तयोर्भावः समासमक्रियता, तया। तथा, महात्ययतया। महांश्चासावत्ययो-विनाशः शरीरविघटनरूपो महात्ययः, तस्य भावो महात्ययता, तया। तत्र कफस्य तथा शरीरक्लेदादेः प्रमेहदूष्यस्याप्यतर्पणरूपयैकयैव क्रियया साध्यत्वात् कफप्रमेहाः साध्याः। पित्तस्य शीतमधुरादिरूपा क्रिया प्रमेहाणां रूक्षतीक्ष्णादिका दूष्यप्रतिपक्षत्वादौपयिकीति तस्मात्ते पित्तप्रमेहा याप्याः। वातप्रमेहाणां रूक्षतीक्ष्णादि तु पथ्यम्। वातस्य स्निग्धमधुरादिकं सन्तर्पणरूपं पथ्यम्। तदेवं विरुद्धक्रियत्वाद्वातप्रमेहा असाध्याः। अपिचेति समुच्चये।

सामान्यं लक्षणं तेषां प्रभूताविलमूत्रता।

स०-तेषां-प्रमेहाणां, सामान्यलक्षणं प्रभूतमूत्रताऽऽविलमूत्रता च।

ननु, दोषस्य-कफादेः, दूष्यस्य च-वपुःक्लेदादेः, तुल्यत्वात् कथं प्रतिदोषं प्रमेहानेकत्वं स्यात्? इत्याह-

दोषदूष्याविशेषेऽपि तत्संयोगविशेषतः॥७॥
मूत्रवर्णादिभेदेन भेदो मेहेषु कल्प्यते।

स०-दोषदूष्याविशेषेऽपि-समानत्वेऽपि सति, तत्संयोगविशेषतो मेहेषु भेदः-अनेकत्वं कल्प्यते। तयोः-दोषदूष्ययोः, संयोगः-संश्लेषः, तत्संयोगः, तस्य विशेषः-प्राकृतकर्मवशाद्भेदो, दोषदूष्ययोः संयोगानेकत्वमित्यर्थः। तस्मान्मूत्रस्य यो वर्णादिभेदो-वर्णगन्धरसस्पर्शादिविशेषः, तेन भेदेन भेदो मेहेषु कल्प्यते-निरूप्यते।

अथोदकमेहादीन् लक्षयति-

अच्छं बहु सितं शीतं निर्गन्धमुदकोपमम्॥८॥
मेहत्युदकमेहेन किञ्चिच्चाविलपिच्छिलम्।

स०-उदकमेहेनाच्छादिगुणयुक्तं मेहति। किञ्चिच्चाविलपिच्छिलमिति ईषत्स्वच्छमूत्रादाविलं पिच्छलं च भवति।

इक्षो रसमिवात्यर्थं मधुरं चेक्षुमेहतः॥९॥

स०-इक्षोर्मेहादिक्षुरससदृशं मेहति। अत्यर्थं मधुरं चेतीक्षुरसाद्विशेषमाह।

सान्द्रीभवेत्पर्युषितं सान्द्रमेहेन मेहति।

स०-सान्द्रमेहेन यन्मेहति तत्पर्युषितं-रात्रिस्थितं, घनीभवेत्।

सुरामेही सुरातुल्यमुपर्यच्छमधो घनम्॥१०॥

स०-सुरामेहि सुरातुल्यं मेहति। तच्च मूत्रं पर्युषितमेवोपरिभागेऽच्छमधः-अधस्तात्, घनं भवेत्।

संहृष्टरोमा पिष्टेन पिष्टवद्बहलं सितम्।

स०-पिष्टेन-पिष्टमेहेन, संहृष्टरोमा सन् पिष्टवत्-पिष्टसदृशं, बहलं शुक्लं च मेहति।

शुक्राभं शुक्रमिश्रं वा शुक्रमेहि प्रमेहति॥ ११॥

स०-शुक्रमेही शुक्राभं शुक्रमिश्रं वा प्रमेहति।

मूर्तांणून् सिकतामेही सिकतारूपिणो मलान्।

स०-सिकतामेहि मूर्तांणून्-संहतान्- सूक्ष्मांश्च, मलान् सिकतासदृशान् मेहति। मलानिति बहुवचनं जातौ, कफाख्यो ह्येक एव मलोऽत्र गृह्यते।

शीतमेही सुबहुशो मधुरं भृशशीतलम्॥ १२॥

स०-शीतमेही सुष्ठु बहुशो मधुरमतिशीतलं च मेहति।

शनैःशनैःशनैर्मेही मन्दंमन्दं प्रमेहति।

स०-शनैर्मेही शनैःशनैर्मेहतीत्युद्देशे मन्दंमन्दमिति निर्देश इत्यपि पौनरुक्त्यम्।

लालातन्तुयुतं मूत्रं लालामेहेन पिच्छिलम्॥ १३॥

स०-लालामेहेन लालातन्तुयुतं विच्छिलं च मूत्रं प्रमेहति। इति कफप्रमेहा दश।

पित्तजानाह-

गन्धवर्णरसस्पर्शैः क्षारेण क्षारतोयवत्।

स०-क्षारतोयमिव गन्धवर्णरसस्पर्शैः क्षारमेहेन मेहति।

नीलमेहेन नीलाभं

स०-नीलमेहेन नीलाभं गन्धादिभिर्मेहति।

कालमेही मषीनिभम्॥ १४॥

स०- कालमेही मषीसदृशं मूत्रं मेहति।

हारिद्रमेही कटुकं हरिद्रासन्निभं दहत्।

स०-हारिद्रमेहि हरिद्रासदृशं कटुकं दहत्-दहदिव, मूत्रं मेहति।

विस्रं माञ्जिष्ठमेहेन मञ्जिष्ठासलिलोपमम्॥ १५॥

स०-माञ्जिष्ठमेही मञ्जिष्ठाजलसदृशं विस्रं च मेहति।

विस्रमुष्णं सलवणं रक्ताभं रक्तमेहतः।

स०-रक्तमेहेन विस्रादिकं मेहति।

अधुना वातजान् वक्ति-

वसामेही वसामिश्रं वसां वा मूत्रयेन्मुहुः॥१६॥

स०-वसामेही वसामिश्रं वसां वा पुनःपुनर्मूत्रयेत्।

मज्जानं मज्जमिश्रं वा मज्जमेही मुहुर्मुहुः।

स०-मज्जमेही मज्जानं मज्जमिश्रं वा पुनः पुनर्मेहति।

हस्ती मत्त इवाजस्रं मूत्रं वेगविवर्जितम्॥१७॥
सलसीकं विबद्धं च हस्तिमेही प्रमेहति।

स०-हस्तिमेही मत्तगज इवानवरतं वेगरहितं लसीकया सह विबद्धं च मूत्रं प्रमेहति।

मधुमेही मधुसमम्

स०-मधुमेही मधुसमं प्रमेहति।

जायते स किल द्विधा॥१८॥

क्रुद्धे धातुक्षयाद्वायौ दोषावृतपथेऽथवा।

स०-स तु-मधुमेहो, वायौ धातुक्षयात्कुपिते सति, अथवा दोषावृतपथे मरुति, किल द्विधा जायते। अत्र च केचिदेवाचार्या द्विधा आहुः। बहवस्त्वेकमेव धातुक्षयवातकोपजमाहुः, न तु मार्गावृतवातकोपजमिति सूचनार्थः किलशब्दः। वायोस्तु द्विधा कोपः। तथा चोक्तम्-"वायोर्धातुक्षयात्कोपो मार्गस्यावरणेन च।" इति।

आवृतो दोषलिङ्गानि सोऽनिमित्तं प्रदर्शयेत्॥१९॥
क्षीणः क्षणात्क्षणात् पूर्णो भजते कृच्छ्रसाध्यताम्।

स०-सः-वायुः, आवृतमार्गो लिङ्गानि-वातावरकदोषलक्षणानि वातशोणितनिदानोक्तानि, अनिमित्तं-अकस्मात्, प्रदर्शयेत् चलस्वभावत्वाद्वायोः। अत एव च क्षणात्क्षीणो-बस्तेरपूरणाद्रिक्तः। क्षणाच्च पूर्णो-मूत्राशयपूरणात्पूर्णो, न तु रिक्तः। अत एव दोषावृतमार्गवातकोपजत्वादसौ कृच्छ्रसाध्यतां भजते, न तु धातुक्षयवातकोपजवदत्यन्तासाध्यताम्।

कालेनोपेक्षिताः सर्वे यद्यान्ति मधुमेहताम्॥२०॥
मधुरं यच्च सर्वेषु प्रायो मध्विव मेहति।
सर्वेऽपि मधुमेहाख्या माधुर्याच्च तनोरतः॥२१॥

स०-यत्-यस्मात्, सर्वे मेहाः कालेनोपेक्षिताः सन्तो मधुमेहतां यान्ति। यच्च-यस्माच्च, सर्वेषु मेहेषु मधुरं मध्विव-मधुसदृशं, मेहति। तनोः-शरीरस्य, च स्वभावादेव माधुर्यम् (र्यात्)। अतः-अस्मात्कारणसन्दोहात्, सर्वेऽपि मधुमेहसंज्ञाः।

अविपाकोऽरुचिश्छर्दिर्निद्रा कासः सपीनसः।
उपद्रवाः प्रजायन्ते मेहानां कफजन्मनाम्॥२२॥

स०-कफजानां मेहानामविपाकादय उपद्रवाः प्रजायन्ते।

बस्तिमेहनयोस्तोदो मुष्कावदरणं ज्वरः।
दाहस्तृष्णाऽसृको मूर्च्छा विड्भेदः पित्तजन्मनाम्॥ २३॥

स०-पित्तजन्मनां बस्त्यादितोदादयो जायन्ते।

वातिकानामुदावर्तकम्पहृद्ग्रहलोलताः।
शूलमुन्निद्रता शोषः कासः श्वासश्च जायते॥ २४॥

स०-वातिकानामुदावर्तादयः स्युः।

प्रमेहिणां च पिटिकाः शराविकाद्याः प्रायेण भवन्ति, इति ता एवाह-

शराविका कच्छपिका जालिनी विनताऽलजी।
मसूरिका सर्षपिका पुत्रिणी सविदारिका॥ २५॥
विद्रधिश्चेति पिटिकाः प्रमेहोपेक्षया दश।
सन्धिमर्मसु जायन्ते मांसलेषु च धामसु॥ २६॥

स०-शराविकादयो दश पिटिकाः प्रमेहाणामुपेक्षया जायन्ते। सन्धिमर्मसु मांसलेषु च-बहुमांसेषु स्थानेषु।

अन्तोन्नता मध्यनिम्ना श्यावा क्लेदरुजान्विता।
शरावमानसंस्थाना पिटिका स्याच्छराविका॥ २७॥

स०-शराविकासंज्ञा पिटिकाऽन्तोन्नतत्वादिगुणयुक्ता भवति। तथा शरावस्येव मानं-प्रमाणं, संस्थानं-आकारश्च, यस्याः सैवम्।

अवगाढार्तिनिस्तोदा महावस्तुपरिग्रहा।
श्लक्ष्णा कच्छपपृष्ठाभा पिटिका कच्छपी मता॥२८॥

स०-अर्तिः-पीडा। निस्तेदो-विच्छिन्नं व्यथनम्। अवगाढावर्तिनिस्तोदौ यस्याः सैवम्। तथा, महान् वस्तुपरिग्रहः-शरीरावयवविशेष आश्रयो, यस्याः सैवम्। तथा, श्लक्ष्णा कच्छपपृष्ठतुल्या च कच्छपीसंज्ञा पिटिका मता। तन्त्रकृतामिति शेषः।

स्तब्धा सिराजालवती स्निग्धस्रावा महाशया।
रुजानिस्तोदबहुला सूक्ष्मच्छिद्रा च जालिनी॥२९॥

स०-स्तब्धादिगुणयुक्ता जालिनीसंज्ञा।

अवगाढरुजाक्लेदा पृष्ठे वा जठरेऽपि वा।
महती पिटिका नीला विनता विनता स्मृता॥३०॥

स०-अवगाढरुजादियुक्ता पिटिका महति तथा नीला-नीलवर्णा, विनता च। सा च विनतासंज्ञा पृष्ठे जठरे वा स्यात्।

दहति त्वचमुत्थाने भृशं कष्टा विसर्पिणी।
रक्तकृष्णाऽतितृट्स्फोटदाहमोहज्वराऽलजी॥३१॥

स०-अलजीसंज्ञा उत्थाने सति त्वचं दहति। अतिदुःसहा विसर्पणशीला तथा रक्तकृष्णाऽतितृडादियुक्ता च।

मानसंस्थानयोस्तुल्या मसूरेण मसूरिका।

स०-मसूरिकासंज्ञा मसूरेण प्रमाणाकृतिभ्यां तुल्या।

सर्षपामानसंस्थाना क्षिप्रपाका महारुजा॥ ३२॥
सर्षपी सर्षपातुल्यपिटिकापरिवारिता।

स०-सर्षपीसंज्ञा सर्षपतुल्यप्रमाणाकारा तथा शीघ्रपाका महारुजा च। तथा सर्षपसदृशीभिः पिटिकाभिः परिवारिता च।

पुत्रिणी महती भूरिसुसूक्ष्मपिटिकाचिता॥ ३३॥

स०-पुत्रिणीसंज्ञा प्रमाणेनापरपिटिकापेक्षया महती। तथा भूरिभिः सुसूक्ष्माभिः पिटिकाभिराचिता च।

विदारीकन्दवद्वृत्ता कठिना च विदारिका।

स०-विदारिकासंज्ञा श्रृगालिकाकन्द इव वर्तुला कठिना च स्यात्।

विद्रधिर्वक्ष्यतेऽन्यत्र

स०-विद्रधिरन्यत्रेत्यतोऽध्यायादन्यस्मिन्ननन्तराध्याये वक्ष्यते-भणिष्यते।

तत्राद्यं पिटिकात्रयम्॥ ३४॥

पुत्रिणी च विदारी च दुःसहा बहुमेदसः।

स०-तत्र-तासु पिटिकासु मध्ये, आद्यं-शराविकाकच्छपिकाजालिनीत्येतत, पिटिकात्रयं तथा पुत्रिणी विदारिका चेति पञ्च दुःसहाः, कृच्छ्रसाध्यत्वात्। यतो बहुमेदस एताः सम्भवन्ति।

सह्याः पित्तोल्बणास्त्वन्याः सम्भवन्त्यल्पमेदसः॥ ३५॥

स०-अन्याः-एताभ्योऽपरास्तु, पित्तोल्बणाश्चतस्रः (श्च ताः) सह्याः-सोढुं शक्याः, सुखसाध्यत्वात्। ताश्चाल्पमेदसः सम्भवन्ति।

तासु मेहवशाच्च स्याद्दोषोद्रेको यथायथम्।

स०-तासु-पिटिकासु, मेहानुरोधाद्दोषोद्रेको यथायथं-यथास्वं स्यात्। वातमेहजासु वाताधिक्यं पित्तमेहजासु पित्ताधिक्यं कफमेहजासु कफाधिक्यम्। उद्रेकशब्देनैतद्द्योतयति,-त्रिदोषजाः सर्वा एवैता इति।

प्रमेहेण विनाऽप्येता जायन्ते दुष्टमेदसः।

तावच्च नोपलक्ष्यन्ते यावद्वस्तुपरिग्रहः॥ ३६॥

स०-एताः-पूर्वोक्ताः पिटिकाः, प्रमेहेण विनाऽपि-अप्रमेहिणोऽपि पुंसो, दुष्टमेदसो जायन्ते। जाता अपि तास्तथाविधस्य नरस्य तावन्न लक्ष्यन्ते-यथायथं लक्षणं नोत्पद्यते, यावत्-यथास्वं, पृष्ठोदरादि वस्त्वासामाधारत्वेन तन्त्रकृता यत्परिभाषितं तन्न परिगृहीतम्। एवं चिरेण कालेनोत्पन्ना अपि ज्ञायन्त इत्यर्थः

हारिद्रवर्णं रक्तं वा मेहप्राग्रूपवर्जितम्।

यो मूत्रयेन्न तं मेहं रक्तपित्तं तु तद्विदुः॥३७॥

स०-मेहस्य यत् प्राग्रूपं तेन वर्जितं हारिद्रवर्णं रक्तं वा यो मूत्रयेत् तं मेहं न विदुः, किन्तर्हि ? तत् रक्तपित्तमित्याहुः।

स्वेदोऽङ्गगन्धः शिथिलत्वमङ्गे

शय्यासनस्वप्नसुखाभिषङ्गः।

हृन्नेत्रजिह्वाश्रवणोपदेहो

घनाङ्गता केशनखातिवृद्धिः॥३८॥

शीतप्रियत्वं गलतालुशोषो

माधुर्यमास्ये करपाददाहः।

भविष्यतो मेहगणस्य रूपं

मूत्रेऽभिधावन्ति पिपीलिकाश्च॥३९॥

स०-एतद्भविष्यतो-भाविनो, मेहगणस्य-विंशतिसङ्ख्यस्य, स्वेद इत्यादि रूपम्। न केवलमेतत् प्राग्रूपं यावत्पिपीलिका मूत्रेऽभिधावन्ति। मधुररसप्रियत्वात्तेषां। मुनिस्त्वत्र नखवृद्धिं न जगाद (?)।

दृष्ट्वा प्रमेहं मधुरं सपिच्छं

मधूपमं स्याद्विविधो विचारः।

सम्पूरणाद्वा कफसम्भवः स्यात्

क्षीणेषु दोषेष्वनिलात्मको वा॥४०॥

स०-मधूपमं-माक्षिकतुल्यं, मधुरं तथा सह पिच्छया-शाल्मलीनिर्यासतुल्यया, वर्तत इति सपिच्छम्। एवंविधं प्रमेहं दृष्ट्वा तदानीं द्विविधो विचारः स्यात्। सम्पूरणात्कारणात् किमयं कफसम्भवो मेहोऽपतर्पणसाध्यः? उत क्षीणेषु दोषेषु-कफादिदोषक्षयात्, सन्तर्पणसाध्योऽनिलात्मकः स्यात्? इति सन्देहो मन्दबुद्धेः। तीक्ष्णमतिस्तु कफमेहान् वातमेहांश्च लिङ्गान्तरैः सम्यग्वेत्त्येव।

अधुना यदुक्तं साध्ययाप्यपरित्याज्याः कफादिसम्भवा इत्यस्यापवादमाह-

सपूर्वरूपाः कफपित्तमेहाः
क्रमेण ये वातकृताश्च मेहाः।
साध्या न ते, पित्तकृतास्तु याप्याः
साध्यास्तु मेदो यदि नातिदुष्टम्॥४१॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां तृतीये निदानस्थाने प्रमेहनिदानं नाम दशमोऽध्यायः॥१०॥

****

स०-सह पूर्वरूपैः-"स्वेदोऽङ्गगन्धः" (श्लो.३८) इत्यादिभिर्वर्तन्तेऽनवरतं कृत्वाऽनुबध्यन्ते ये ते सपूर्वरूपा असाध्याः। सर्वेषां पूर्वरूपाव्यभिचारेऽपि विशेषणं साकल्यप्रापणार्थम्। सर्वैः पूर्वरूपैः सह ये वर्तन्ते ते कफमेहाः पित्तमेहाश्चासाध्याः, साधयितुमशक्यत्वात्। उपलक्षणं चेदम्,-अपरेऽपि हि रोगाः सपूर्वरूपाः प्रायेणासाध्या एव। तथा क्रमेण कफानुपूर्व्या ये वातकृता मेहास्तेऽसाध्याः। ननु, वातकृता मेहा असाध्या इति प्रागुक्तमेव, तत्किमनेन ग्रन्थेन ? इति। ब्रूमः। अक्रमेण प्रथममेव ये वातोत्पन्नास्ते त्याज्या इति पूर्वमुक्तम्। इह तु क्रमेण प्रथमं कफप्रमेहास्ततः पित्तप्रमेहास्ततः कालेन त एव ये वातप्रमेहाः सम्पन्नास्ते पूर्वं कफप्रमेहत्वात्साधयितुमपि शक्यन्त इत्याशङ्कायां क्रमेण ये वातकृतास्तेऽसाध्या इत्युक्तम्। पित्तकृतास्त्वसपूर्वरूपा अपि याप्या असमक्रियत्वादिति प्राङ्निर्दिष्टम्। तेषां यदि मेदो नातिदुष्टं भवेत्तदा तेऽपि याप्याः सन्तः साध्या भवन्ति। मेदो नातिदुष्टमित्यनेनैतज्ज्ञापयति,-सर्वमेहेषु मेदोदुष्टिरवश्यंभाविनीति। मेहिनो राजयक्ष्मिणश्च केशनखातिवृद्धिः किट्टबाहुल्याद्भवति, रोगस्वभावादित्यन्ये। वृत्तान्युपजातिसंज्ञानि।

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टाङ्गहृदयटीकायां सर्वाङ्गसुन्दराख्यायां तृतीये निदानस्थाने प्रमेहनिदानं नाम दशमोऽध्यायः समाप्तः॥१०॥

****

एकादशोऽध्यायः।

प्रमेहनिदानादनन्तरं विद्रधिनिदानारम्भः, यतोऽनन्तरेऽध्याये पिटिकालक्षणावसरे "विद्रधिर्वक्ष्यते" (श्लो. ३४) इत्युक्तम्। अतस्तमेव विद्रधिं लक्षयितुमस्याध्यायस्य प्रसङ्ग इत्याह-

अथातो विद्रधिवृद्धिगुल्मनिदानं व्याख्यास्यामः।

इति ह स्माहुरात्रेयादयो महर्षयः।

(गद्यसूत्रे॥२॥)

भुक्तैः पर्युषितात्युष्णरूक्षशुष्कविदाहिभिः।

जिह्मशय्याविचेष्टाभिस्तैस्तैश्चासृक्प्रदूषणैः॥१॥

दुष्टत्वङ्मांसमेदोस्थिस्नाय्वसृक्कण्डराश्रयः।

यः शोफो बहिरन्तर्वा महामूलो महारुजः॥२॥

वृत्तः स्यादायतो यो वा स्मृतः षोढा स विद्रधिः।

स०-पर्युषितादिभिर्भुक्तैः, तथा जिह्मशय्याविचेष्टाभिः, विविधाश्चेष्टा विचेष्टाः, शय्या च विचेष्टाश्च शय्याविचेष्टाः, जिह्माश्च ताः शय्याविचेष्टाश्च, ताभिः। जिह्माः कुटिला वक्रा इति पर्यायाः। तथा तैस्तैः-तत्रतत्रासृक्प्रदूषणैश्च निर्दिष्टैः, यः शोफो जायते दुष्टत्वगाद्याश्रयो बहिः-बहिर्भागे, अन्तः-अन्तर्भागे वा, स शीघ्रविदाहित्वाच्छोफः षोढा-षड्प्रकारो, विद्रधिः स्मृतः-अभिहितः। शोफशब्दः पृषोदरादित्वात्साधुः। त्वक् च मांसं च मेदश्च अस्थि च स्नायुश्चासृक् च कण्डरा च, ता एवम्। "सुमहान् स्नायुसङ्घातः कण्डरेत्यभिधीयते।" दुष्टाः-दोषैर्दूषिताः, त्वङ्मांसादय आधारो यस्य स दुष्टत्वङ्मांसमेदोस्थिस्नाय्वसृक्कण्डराश्रयः। तथा, महमूलस्तथा महारुजः, अनेनास्य दुरुपक्रमत्वमुक्तम्। तथा, वृत्तः स्यात्, अथवा आयतो-न वर्तुलः, इत्यनेनास्य संस्थानमुक्तम्।

षोढेत्युक्तम्। अथ तदेव षोढत्वं प्रतिपादयितुमाह-

दोषैः पृथक्समुदितैः शोणितेन क्षतेन च॥३॥

स०-पृथग्दोषैः-वातपित्तकफैस्त्रयः, समुदितैः-सन्निपातेन चैकः, तथा शोणितेन-दोषाधिष्ठितेन, क्षतेन-शस्त्रादिघातादिना, चेति।

षड्विधस्यापि शोफस्य विद्रध्याख्यस्यान्तर्बहीरूपतया द्विधात्वमित्याह-

बाह्योऽत्र तत्रतत्राङ्गे दारुणो ग्रथितोन्नतः।
आन्तरो दारुणतरो गम्भीरो गुल्मवद्घनः॥४॥
वल्मीकवत्समुच्छ्रायी शीघ्रघात्यग्निशस्त्रवत्।

स०-अत्र-अनयोर्बाह्याभ्यन्तरभेदभिन्नयोर्विद्रध्योर्मध्यात्, बाह्यो विद्रधिस्तत्रतत्र-नाभ्यादावङ्गे, जायते। तथा, दारुणो ग्रथितोन्नतः। ग्रथित इव ग्रथितः। उन्नतः-उत्तुण्डितः। शोफस्य स्वभावोन्नतत्वादुन्नतग्रहणमतिशयार्थम्। आन्तरो दारुणतरः तथा, गम्भीरः-अन्तर्निगूढः। तथा, गुल्मवद्घनो-गुल्मेन तुल्यः। तथा, समुच्छ्रायी-उन्नतो वल्मीकशिखरवत्। तथा, शीघ्रघाती-बाह्यविद्रधितः शीघ्रव्यापादकः। अग्निशस्त्रवत्-अग्निशस्त्राभ्यां तुल्यः।

नाभिबस्तियकृत्प्लीहह्लोमहृत्कुक्षिवङ्क्षणे॥५॥
स्याद्वृक्कयोरपाने च

स०-नाभ्याद्यन्यतमे देशे चायं स्यात्।

वातात्तत्रातितीव्ररुक्।

श्यावारुणश्चिरोत्थानपाको विषमसंस्थितः॥६॥

व्यधच्छेदभ्रमानाहस्पन्दसर्पणशब्दवान्।

स०-तत्र-तेषु विद्रधिषु मध्ये, वातात्तीव्ररुगादिः शब्दवानित्येतदन्तलक्षणः स्यात्।

रक्तताम्रासितः पित्तात्तृण्मोहज्वरदाहवान्॥७॥

क्षिप्रोत्थानप्रपाकश्च

स०-पित्ताद्रक्तताम्रासितादिकः क्षिप्रोत्थानप्रपाकश्चेत्यन्तलक्षणः स्यात्।

पाण्डुः कण्डूयुतः कफात्।

सोत्क्लेशशीतकस्तम्भजृम्भारोचकगौरवः॥८॥

चिरोत्थानविपाकश्च

स०-कफात् पाण्डुः-वर्णेन। तथा, कण्डूयुत इत्यादिचिरोत्थानविपाकश्चेत्यन्तलक्षणः स्यात्।

सङ्कीर्णः सन्निपाततः।

स०-सन्निपातजो विद्रधिः सङ्कीर्णो-वातादिदोषव्यामिश्रलक्षणः।

सामर्थ्याच्चात्र विभजेद्बाह्याभ्यन्तरलक्षणम्॥९॥

स०-अत्र-विद्रधौ, पूर्वोक्ताद्दारुणाद्दा(णदा)रुणतरत्वादिलक्षणात्-सामर्थ्यात्, बाह्याभ्यन्तरलक्षणं विभजेत्-बाह्यस्य विद्रधेस्तथाऽऽभ्यन्तरस्य च लक्षणं वदेत्।

कृष्णस्फोटावृतः श्यावस्तीव्रदाहरुजाज्वरः।
पित्तलिङ्गोऽसृजा बाह्यः स्त्रीणामेव तथाऽऽन्तरः॥ १०॥

स०-रक्तेन विद्रधिः कृष्णस्फोटैरावृतः-चितो, यावत्तीव्रदाहरुजाज्वरः। तथा पित्तलिङ्गो-"रक्तताम्रासितः" (श्लो. ७) इत्यादिलक्षणः \ स च बाह्यो-बाह्य एव नान्तरो नराणाम्, वस्तुस्वाभाव्यात्। आन्तरो यो विद्रधिरसृजा जायते, स स्त्रीणामेव-न नराणाम्, वस्तुस्वाभाव्यात्।

अथ क्षतविद्रधिं लक्षयति-

शस्त्राद्यैरभिघातेन क्षते वाऽपथ्यकारिणः।
क्षतोष्मा वायुविक्षिप्तः सरक्तं पित्तमीरयन्॥ ११॥
पित्तासृग्लक्षणं कुर्याद्विद्रधिं भूर्युपद्रवम्।

स०-शस्त्रलोष्टाद्यैर्योऽभिघातस्तेन हेतुना यः क्षतोष्मा, अथवाऽभिघातमन्तरेणापि व्रणाद्युद्भवात् क्षते जाते सत्यपथ्यकारिणः पुंसो यः क्षतोष्मा-अग्निः, स वायुना विक्षिप्तः पित्तमीरयन्-कोपयन्। किम्भूतं पित्तम्? सरक्तम्। तथा, पित्तासृग्भ्यामुत्पन्नयोर्विद्रध्योर्यल्लक्षणं तत्समानलक्षणं विद्रधिं कुर्यात्। तथा, भूर्युपद्रवम्। इयानेव चास्य विशेषः, पित्तासृग्विद्रध्योः सकाशात्।

तेषूपद्रवभेदश्च स्मृतोऽधिष्ठानभेदतः॥१२॥

स०-तेषु-विद्रधिषु, उपद्रवविशेषोऽधिष्ठानविशेषाद्भवति।

तमेवोपद्रवभेदं दर्शयति-

नाभ्यां हिध्मा, भवेद्बस्तौ मूत्रं कृच्छ्रेण पूति च।
श्वासो यकृति, रोधस्तु प्लीह्न्युच्छ्वासस्य, तृट् पुनः॥१३॥
गलग्रहश्च क्लोम्नि, स्यात्सर्वाङ्गप्रग्रहो हृदि।
प्रमोहस्तमकः कासो हृदये घट्टनं व्यथा॥१४॥
कुक्षिपार्श्वान्तरांसार्तिः कुक्षावाटोपजन्म च।
सक्ष्नोर्ग्रहो वङ्क्षणयोर्वृक्कयोः कटिपृष्ठयोः॥१५॥
पार्श्वयोश्च व्यथा पायौ पवनस्य निरोधनम्।

स०-नाभ्यां जाते विद्रधौ हिध्मा विशेषेण भवेत्। बस्तौ जाते मूत्रं पूति कृच्छ्रेण च भवेत्। यकृति जाते श्वासः स्यात्। प्लीह्नि जात उच्छ्वासस्य रोधः। क्लोम्नि जाते गलग्रह इव गलग्रहो व्याधिविशेषः स्यात्तृष्णा च। हृदि जाते सर्वस्याङ्गस्य प्रकर्षेण ग्रहः स्यात्। तथा, प्रमोहादयः स्युः। तमकः-श्वासविशेषः। हृदये घट्टनं व्यथा च। कुक्षौ जाते सति कुक्षिपार्श्वयोरन्तरेंऽसयोश्च पीडा भवति, तथा कुक्षावाटोपसम्भवः। वङ्क्षणयोर्जाते सक्ष्नोर्ग्रहो निश्चल इव सक्थिनी जायेते। वृक्कयोर्जाते कट्याः पृष्ठस्य च ग्रहः, पीडा च पार्श्वयोः स्यात्। पायौ-गुदे जाते, पवनस्य-अपानाख्यस्य वायोः, निरोधः स्यात्।

आमपक्वविदग्धत्वं तेषां शोफवदादिशेत्॥१६॥

स०-तेषां-विद्रधीनां, आमत्वं पक्वत्वं विदग्धत्वं-पाकातिक्रान्तत्वं, शोफवदादिशेत्। शोफानामिव शोफवत्, षष्ठ्यन्ताद्वतिः। तत्र शोफस्य शस्त्रकर्मविधौ (हृ. सू. अ. २९।२) -"शोफोऽल्पोऽल्पोष्मरुक्" इत्यादिना ग्रन्थेनामादिलक्षणमुक्तम्, तथैव विद्रधिषु बोध्यम्।

नाभेरूर्ध्वं मुखात्पक्वाः प्रस्रवन्त्यधरे गुदात्।

गुदास्यान्नाभिजो

स०-नाभेरूर्ध्वं-ऊर्ध्वप्रदेशेषूत्पन्नाः, पक्वाः सन्तो मुखात्-आस्यात्, स्रावं स्रवन्ति। नाभेरधरे-अधस्तात्, पक्वाः सन्तो गुदात् स्रावं स्रवन्ति। नाभिजः पुनर्विद्रधिरुत्पन्नो गुदास्यात्-उभयतः, स्रावं स्रवति। गुदं चास्यं च गुदास्यम्, तस्मात्।

विद्याद्दोषं क्लेदाच्च विद्रधौ॥ १७॥

यथास्वं व्रणवत्

स०-विद्रधौ व्रण इव यथास्वं वातादिदोषं क्लेदाद्विद्यात्। व्रणप्रतिषेधोक्तया रीत्या (हृ. उ. अ. २५। ६) मस्तुमांसपुलाकाम्बुतुल्यतन्वल्पसंस्रत्यादिकया वातिकं विद्रधिं विद्यात्। मूत्रकिंशुकभस्माम्बुतैलाम्भोष्णबहुस्रुतेत्यादिकया च पैत्तिकं विद्रधिं विद्यात्। बहुश्वेतघनस्रुत्यादिकया च कफजं विद्रधिं विद्यात्। चशब्दान्न केवलं पूर्वोक्तात् "वातात्तत्रातितीव्ररुक्" (श्लो. ६) इत्यादेर्वातादिलक्षणाद्वातादिदोषविद्रधिं जानीयत्, क्लेदाच्चेत्यर्थः। व्रणवदिति सप्तम्यन्ताद्वतिः, विद्रधाविति सप्तम्यन्तनिर्देशात्। तथा चोक्तं भाष्ये-"उपमाने यः संशयः स उपमेयाद्व्यावर्तते।" इति।

अथैषां साध्यासाध्यविभागार्थमाह-

तत्र विवर्ज्यः सन्निपातजः।

पक्वो हृन्नाभिबस्तिस्थो भिन्नोऽन्तर्बहिरेव वा॥ १८॥

पक्वश्चान्तः स्रवन् वक्कात् क्षीणस्योपद्रवान्वितः।

स०-सन्निपातजो यो विद्रधिः स विवर्ज्योऽसाध्यत्वात्। तथा, पक्वोऽन्तर्बहिरेव वा भिन्नोऽन्तः-अन्तर्भिन्नो, बाह्यो-बहिर्भिन्नो, हृन्नाभिवस्तिस्थो वर्ज्य एव। पक्वश्चान्तरो हृदादिभ्योऽन्यत्रापि जातो वङ्क्रेण स्रवन् क्षीणस्योपद्रवैः-हिध्मादिभिः, युक्तो वर्ज्य एव।

इदानीं स्तनविद्रधिर्योषितां यथा स्यात् तथा वक्ति-

एवमेव स्तनसिरा विवृताः प्राप्य योषिताम्॥१९॥
सूतानां गर्भिणीनां वा सम्भवेच्छ्वयथुर्घनः।
स्तने सदुग्धेऽदुग्धे वा बाह्यविद्रधिलक्षणः॥२०॥
नाडीनां सूक्ष्मवक्त्रत्वात्कन्यानां न स जायते।

इति विद्रधिनिदानम्।

स०-[एवमेव-] यथैव विद्रध्याख्यः श्वयथुविशेषो भुक्तैः पर्युषितादिभिस्तैस्तैश्चासृक्प्रदूषणैर्दुष्टत्वङ्मांसमेदोस्थिस्नाय्वसृक्कण्डराश्रयः, तथैव सूतानां गर्भिणीनां वा स्त्रीणां स्तने सदुग्धेऽथवाऽदुग्धे स्तनसिरा विवृताः प्राप्य-आक्रम्य, बाह्यविद्रधिलक्षणः-"बाह्योऽत्र तत्रतत्राङ्गे" (श्लो. ४) इत्यादिलक्षणो घनो-निबिडो, यः श्वयथुः सम्भवेत् स स्तनविद्रधिसंज्ञः। नाडीनां-स्तनसिराणां, सूक्ष्मवक्त्वात् स कन्यानां न जायते।

अथ श्वयथुसामान्यादिदानीं वृद्धिं-वर्ध्मापरनामानं व्याधिं, वक्तुमुपक्रमते-

अथ वृद्धिनिदानम्।

कृद्धो रुद्धगतिर्वायुः शोफशूलकरश्चरन्॥२१॥
मुष्कौ वङ्क्षणतः प्राप्य फलकोशाभिवाहिनीः।
प्रपीड्य धमनीर्वृद्धिं करोति फलकोशयोः॥२२॥

स०-वायुः प्रकुपितो वृद्धिं करोति। किं धातुक्षयात् कुपितः ? नेत्याह-रुद्धगतिः। रुद्धा गतिर्यस्येति रुद्धगतिः, आवृतमार्ग इत्यर्थः। किम्भूतः ? शोफशूलकरः। तथा, चरन्-देशाद्देशान्तरं गच्छन्। वङ्क्षणतः-ततो देशात्, मुष्कौ-वृषणौ, यथा प्राप्य तथा फलकोशाभिवाहिनीः सिराः प्रकर्षेण पीडयित्वा। कस्य वृद्धिं करोति ? इत्याह-फलकोशयोः,-वृषणयोः।

अधुनाऽस्य व्याधेः सङ्ख्यां कुर्वन्नाह-

दोषास्रमेदोमूत्रान्त्रैः स वृद्धिः सप्तधा गदः।
मूत्रान्त्रजावप्यनिलाद्धेतुभेदस्तु केवलम्॥ २३॥

स०-पृथग्वातपित्तकफैर्दोषैस्तथाऽस्रेण मेदसा मूत्रेण च तथाऽऽन्त्रेण च, एवं दोषास्रमेदोमूत्रान्त्रैः स वृद्ध्याख्यो गदः सप्तधा-सप्तप्रकारो, मतः। न केवलं [वात] वृद्धाख्यो यो गदः स एवानिलजो यावन्मूत्रान्त्रजावपि यौ वृद्ध्याख्यौ गदौ तावप्यनिलजौ। ननु, एवं पृथङ्निर्देशो मूत्रान्त्रजयोः कर्तुं न युक्तोऽनिलजत्वात्, इत्याह-हेतुभेदस्तु केवलम्। सत्यम्। मूत्रान्त्रजावप्यनिलाज्जायेते। किन्तु कारणभेदान्मूत्रान्त्रजाविति निर्दिष्टौ। यतो मूत्रान्त्रेऽधिष्ठाय वायुर्मूत्रान्त्रजौ गदौ वृद्ध्याख्यौ करोति। एवं तौ परमार्थतो वातजावपि मूत्रान्त्रजावुच्यते, तथारूपाद्धेतुभूतादुत्पन्नत्वात्। एतच्चोपलक्षणमात्रम्। मेदोरक्तजावपि वृद्धिगदौ दोषजावेव, कफपित्ताभ्यां दूष्यसंज्ञके मेदोरक्तेऽधिष्ठाय कृतत्वात्। तस्मान्मेदोरक्तहेतुवशान्मेदोरक्तजाविति संज्ञया तावुक्तौ। एवमन्येऽप्येवंरूपा व्याधयो बोध्याः।

वातपूर्णदृतिस्पर्शो रूक्षो वातादहेतुरुक्।

स०-तत्र वाताद्वद्धिर्वातेन पूरिता या दृतिः-भस्त्रा, तस्या इव स्पर्शो यस्य स एवंभूतो भवति। तथा, रूक्षः। तथा, अहेतुः-निमित्तं विना, रुक्-पीडा, यस्मिन् स एवम्।

पक्वोदुम्बरसङ्काशः पित्ताद्दाहोष्मपाकवान्॥ २४॥

स०-पित्ताद्वृद्धिः पक्वोदुम्बरफलतुल्यो दाहादिमांश्च स्यात्।

कफाच्छितो गुरुः स्निग्धः कण्डूमान् कठिनोऽल्परुक्

स०-कफाद्वृद्धिः शीतादियुक्तः स्यात्।

कृष्णस्फोटावृतः पित्तवृद्धिलिङ्गश्च रक्ततः॥ २५॥

स०-रक्ताद्वृद्धिः कृष्णस्फोटैश्चितः पित्तवृद्धिलिङ्गश्च। पित्तवृद्धिलिङ्गानीव लिङ्गानि यस्य स एवम्। सप्तम्युपमानपूर्वस्येत्यादिनोत्तरपदलोपी समासः।

कफवन्मेदसा वृद्धिर्मृदुस्तालफलोपमः।

स०-मेदसा वृद्धिः कफवदिति कार्ये कारणोपचारात्कफकार्यो रोगः कफ उक्तः। विशेषमत्राह-मृदुस्तालफलोपम इति।

मूत्रधारणशीलस्य मूत्रजः स तु गच्छतः॥ २६॥
अम्भोभिः पूर्णदृतिवत्क्षोभं याति सरुङ्मृदुः।
मूत्रकृच्छ्रमधस्ताच्च वलयं फलकोशयोः॥ २७॥

स०-मूत्रजो वृद्धिर्मूत्रधारणशीलस्य जलपूर्णभस्त्रेव स्यात्। स तु-मूत्रजो वृद्धिः, गच्छतो-व्रजतः, क्षोभं याति सरुक् मृदुश्च स्यात्। तथा, मूत्रकृच्छ्रं स्यात्। फलकोशयोरधस्ताच्च वलयं-कटकं, स्यात्।

वातकोपिभिराहारैः शीततोयावगाहनैः।
धारणेरणभाराध्वविषमाङ्गप्रवर्तनैः॥२८॥
क्षोभणैः क्षुभितोऽन्यैश्च क्षुद्रान्त्रावयवं यदा।
पवनो विगुणीकृत्य स्वनिवेशादधो नयेत्॥२९॥
कुर्याद्वङ्क्षणसन्धिस्थो ग्रन्थ्याभं श्वयथुं तदा।

उपेक्ष्यमाणस्य च मुष्कवृद्धि-
माध्मानरुक्स्तम्भवतीं स वायुः।
प्रपीडितोऽन्तः स्वनवान् प्रयाति
प्रध्मापयन्नेति पुनश्च मुक्तः॥३०॥
अन्त्रवृद्धिरसाध्योऽयं वातवृद्धिसमाकृतिः॥३१॥

इति वृद्धिनिदानम्।

स०-वातकोप्याहारादिभिरन्यैश्च पूर्वोक्तैः क्षोभणैः-कोपनैः, क्षुभितः-कुपितो, यदाऽल्पस्यान्त्रस्यावयवः-एकदेशः, तं स्वनिवेशात्-स्वस्थानात्, विगुणीकृत्याधो नयेत् तदा पवनो वङ्क्षणसन्धिस्थो ग्रन्थ्याभं श्वयथुं कुर्यात्। उपेक्ष्यमाणस्येत्यादि। उपेक्ष्यमाणस्य-अचिकित्स्यमानस्य वृद्ध्याख्यगदस्य, स पूर्वनिर्दिष्टो वायुर्मुष्कयोर्वृद्धिं-वर्द्धनं, कुर्यात्। किम्भूताम्? आध्मानरुक्स्तम्भवतीम्। तथा, प्रपीडितो बाह्यादन्तः स्वनवान्-सशब्दः, प्रयाति। मुक्तः-अप्रपीडितः, प्रध्मापयन् पुनरेति-आगच्छति। उपजातिवृत्तम्। अयं-एवंलक्षणः, अन्त्रवृद्धिरसाध्यो न पुनः सर्व एवेत्ययंशब्देन द्योतयति। किमस्य लक्षणम्? इत्याह-वातवृद्धिसमाकृतिः,-"वातपूर्णदृतिस्पर्शा" (श्लो. २४) इत्यादिलक्षणलक्षितः।

वृध्याख्यस्य व्याधेरनन्तरं शोफसामान्यात् गुल्मस्यावसरः, इति तं लक्षयितुमाह-

अथ गुल्मनिदानम्।

रूक्षकृष्णारुणसिरातन्तुजालगवाक्षितः।
गुल्मोऽष्टधा पृथग्दोषैः संसृष्टैर्निचयं गतैः॥ ३२॥
आर्तवस्य च दोषेण नारीणां जायतेऽष्टमः।

स०-सर्वगुल्मानां सामान्यलक्षणं रूक्षकृष्णेत्यादिग्रन्थनिर्दिष्टम्। गवाक्षितो-निरन्तरमाक्रान्तः। गुल्मोऽष्टधेति सङ्ख्यारूपा सम्प्राप्तिः। तदेवाष्टधात्वं प्रतिपादयितुमाह-पृथग्दोषैः-वातपित्तकफैः, त्रयः। तथा, संसृष्टैः-संसर्गेण, त्रयः। निचयं गतैः-सन्निपातेन, एकः। तथा, अष्टमो नारीणां चार्तवस्य दोषेण-दुष्टतया, स्यात्।

ज्वरच्छर्द्यतिसाराद्यैर्वमनाद्यैश्च कर्मभिः॥ ३३॥
कर्शितो वातलान्यत्ति शीतं वाऽम्बु बुभुक्षितः।
यः पिबत्यनु चान्नानि लङ्घनप्लवनादिकम्॥ ३४॥
सेवते देहसङ्क्षोभि छर्दिं वा समुदीरयेत्।
अनुदीर्णामुदीर्णान्वा वातादीन्न विमुञ्चति॥ ३५॥
स्नेहस्वेदावनभ्यस्य शोधनं वा निषेवते।
शुद्धो वाऽऽशुविदाहीनि भजते स्यन्दनानि वा॥ ३६॥
वातोल्बणास्तस्य मलाः पृथक् क्रुद्धा द्विशोऽथवा।
सर्वे वा रक्तयुक्ता वा महास्रोतोनुशायिनः॥ ३७॥
ऊर्ध्वाधोमार्गमावृत्य कुर्वते शूलपूर्वकम्।
स्पर्शोपलभ्यं गुल्माख्यमुत्स्रुतं ग्रन्थिरूपिणम्॥ ३८॥

स०-"ज्वरच्छर्दि" इत्यादि यावत् "भजते स्यन्दनानि वा" इति निदानम्। अतिसाराद्यैरित्यादिशब्देन ग्रहण्यादयो गृह्यन्ते, वमनाद्यैरित्यत्र च विरेचनास्थापनादयः। ज्वरादिभिर्व्याधिभिर्वमनादिभिश्च कर्शितो यो वातलान्यन्नानि भुङ्क्ते। अथवा, बुभुक्षितो-भोजनं विनैव, शीतं-अपक्वमम्बु, यः पिबति। तथा चोक्तम् (सङ्ग्रहे सू. अ. ६) -"अनवस्थितदोषाग्नेर्व्याधिक्षीणबलस्य च। नाल्पमप्याममुदकं हितं, तद्धि त्रिदोषकृत्॥" इति। अनु चान्नानि-भोजनादनन्तरं, लङ्घनादिकं यत्कर्म देहसङ्क्षोभि-शरीरसंरम्भोत्पादकं, तत्सेवते। छर्दिं वा योऽनुदीर्णां-अनुत्क्लिष्टां, समुदीरयेत्-समन्तादूर्ध्वं नयेत्। उदीर्णान् वातादीन्-वातमूत्रपुरीषादीनागतान्, न विमुञ्चति। तथा यः कश्चन स्नेहस्वेदावनभ्यस्य-पुनःपुनरकृत्वा, शोधनं-वमनविरेचनादि, निषेवते। अथवा, शुद्धः-कृतवमनविरेचनः, आशु-समनन्तरमेव, विदाहीन्यन्नपानानि भजते-सन्तापनान्यन्नपानानि भुङ्क्ते। पच्यमानान्यन्नपानानि यानि विदाहावस्थां प्राप्तान्यामाशय एव चिरमवतिष्ठन्ते तानि विदाहीन्युच्यन्ते। अथवा, कृतवमनविरेचनोऽनन्तरमेव स्यन्दनानि-स्नुतिरूपश्लेष्मकारीण्यन्नपानानि, भजते। तस्य मलाः-वातादयो, गुल्मसंज्ञं व्याधिं कुर्वते। कीदृशाः? वातोल्बणाः-वातकारणाः। नहि पवनकारणमन्तरेण श्लेष्मपित्तरक्तानां संघट्टना घटते। तस्मात् पित्तादीनामुत्पत्तिकारणानां वातस्य च पित्तादिगुल्मेषु गुल्मनिष्पादनं प्रति तुल्यकक्षतामनेन विशेषणेन प्रतिपादयत्याचार्यः। यदि पुनरुल्बणः-अधिकः, इति व्याख्यायते। तदानीं पित्तगुल्मेऽप्यधिकत्वं वातस्येति वातगुल्मपित्तगुल्मादीनां विषयविभागो न स्यात्। तस्माद्वातकारणत्वं वातोल्बणा इत्यनेन विवक्षितमिति वेद्यम्। किम्भूता दोषाः? कुद्धाः-कुपिताः। कथम्? पृथक्-प्रत्येकं कृत्वा। अथवा, द्विशो-द्वौ द्वौ कृत्वा, संसर्गस्था इत्यर्थः। सर्वे वा-समस्ता रक्तयुक्ता वेति। वाशब्दः समुच्चये, रक्तयुक्ताश्चेत्यर्थः। तथा च खरनादेऽभिहितम्-"वायुः, क्रुद्धः कफं रक्तं पित्तं चादाय पिण्डितम्। गुल्मं कुर्यात्" इत्यादि यावत् "रक्तपित्तकफा वातपिण्डिता गुल्म उच्यते।" इति। तथा महास्रोतोनुशायिनः। महास्रोतः-आमपक्वाशयस्थानं, तदनुशेरते ये ते महास्रोतोनुशायिनः। किंकृत्वा गुल्मं निष्पादयन्ति? इत्याह-ऊर्ध्वाध इत्यादि। ऊर्ध्वाधोमार्गमावृत्य-आपूर्य, अनेनास्य सम्प्राप्तिरुक्ता। शूलं पूर्वं यस्मिन् स एवं तं शूलपूर्वकम्,-पूर्वं शूलं कृत्वा पश्चाद्दोषा गुल्मं कुर्वन्ति, अनेनास्य प्राग्रूपमुक्तम्। तथा स्पर्शोपलभ्यं-अश्मादिसदृशम्, तथा उत्प्लुतं-ऊर्ध्वं गतम्। तथा ग्रन्थिरूपिणं-ग्रन्थ्याकारम्, इत्यनेनास्य संस्थानमुक्तम्।

अधुना वातगुल्मं लक्षयति-

कर्शनात्कफविद्धित्तैर्मार्गस्यावरणेन वा।
वायुः कृताश्रयः कोष्ठे रौक्ष्यात्काठिन्यमागतः॥३९॥
स्वतन्त्रः स्वाश्रये दुष्टः परतन्त्रः पराश्रये।
पिण्डितत्वादमूर्तोऽपि मूर्तत्वमिव संश्रितः॥४०॥
गुल्म इत्युच्यते बस्तिनाभिहृत्पार्श्वसंश्रयः।

स०-कर्शनात्-धातुक्षयात्, वायुर्दुष्टः कदाचित् कफविद्धित्तैः कृतेन मार्गस्यावरणेन-रोधेन, कोष्ठे-आमपक्वाशयाख्ये, कृताश्रयो-गृहीतास्पदः, तथा रौक्ष्यात्कारणात् काठिन्यमागतः-पिण्डितत्वं प्राप्तः, स्वाश्रये-पक्वाशयस्थाने, दुष्टः स्वतन्त्रः, पराश्रये-आमाशयस्थाने, दुष्टः परतन्त्रः पित्तकफयोरायत्तः, पिण्डितत्वात्कारणात् स्पर्शोपलभ्यः सन्, अमूर्तोऽपि-अकठिनोऽपि, मूर्तत्वमिव-काठिन्यमिव, संश्रितः-सम्पन्नो, गुल्म इत्यभिधीयते, तन्त्रकृद्भिरिति शेषः। बस्तिनाभिहृत्पार्श्वसंश्रयः, बस्त्यादिः संश्रयः-आधारो, यस्य स एवम्।

वातान्मन्याशिरःशूलं ज्वरप्लीहान्त्रकूजनम्॥४१॥
व्यधः सूच्येव विद्धस्य कृच्छ्रादुच्छ्वसनं मुहुः।
स्तम्भो गात्रे मुखे शोषः काश्र्यं विषमवह्निता॥४२॥
रूक्षकृष्णत्वगादित्वं चलत्वादनिलस्य च।
अनिरूपितसंस्थानस्थानवृद्धिक्षयव्यथः॥४३॥
पिपीलिकाव्याप्त इव गुल्मः स्फुरति तुद्यते।

स०-वाताद्गुल्मे सति मन्याशूलादयो भवन्ति। तथा, चलत्वाच्च वायोर्गुल्मोऽनिरूपितसंस्थानस्थानवृद्धिक्षयव्यथः स्यात्। अनिरूपिताः संस्थानादयो यस्य स एवम्। संस्थानं-आकारः। स्थानं-आश्रयः। तथा, पिपीलिकाभिर्व्याप्तः-चित इव, गुल्मः स्फुरति तुद्यते च। तुद्यत इति कर्मकर्तरि।

पित्ताद्दाहोऽम्लको मूर्च्छाविड्भेदस्वेदतृड्ज्वराः॥४४॥

हारिद्रत्वं त्वगाद्येषु गुल्मश्च स्पर्शनासहः।

दूयते दीप्यते सोष्मा स्वस्थानं दहतीव च॥४५॥

स०-पित्ताद्गुल्मे दाहादयः स्युः। तथा त्वङ्नखादिषु हारिद्रो वर्णः स्यात्। गुल्मश्च स्पर्शनं न सहते-स्पर्शनासहः, स्यात्। तथा, दूयते-उपतप्यते, दीप्यते-ज्वलतीव। सोष्मा च स्यात्। स च स्वस्थानं-गुल्माश्रितमास्पदं, दहतीव-तप्तायःपिण्ड इव। दूयत इति "दूङ् परितापे" दिवादिः।

कफात्स्तैमित्यमरुचिः सदनं शिशिरज्वरः।

पीनसालस्यहृल्लासकासशुक्लत्वगादिताः॥४६॥

गुल्मोऽवगाढः कठिनो गुरुः सुप्तः स्थिरोऽल्परुक्।

स०-कफाद्गुल्मे सति स्तैमित्यादयः स्युः। गुल्मोऽवगाढादियुक्तः स्यात्।

स्वदोषस्थानधामानः स्वे स्वे काले च रुक्कराः॥४७॥

प्रायः

स०-ते च गुल्माः स्वदोषस्थानधामानो दोषस्य-वातादेः, स्थानं-पक्वाशयादि स्वमात्मीयमात्मीयं, दोषस्थानं तद्धाम-स्थानं, येषां-वातपित्तकफगुल्मानां, ते प्रायो-बाहुल्येन, स्वदोषस्थानधामानः। तथा स्वे स्वे काले-आत्मीये वयोहोरात्रिभुक्तानामन्तमध्यादिलक्षणे, यथासङ्ख्यं वातपित्तकफगुल्मारुक्कराः-शूलकराः, भवन्ति।

त्रयस्तु द्वन्द्वोत्था गुल्माः संसृष्टलक्षणाः।

स०-द्वन्द्वोत्थाः-संसर्गजा गुल्मास्त्रयः, संसृष्टलक्षणाः स्युः।

सर्वजस्तीव्ररुग्दाहः शीघ्रपाकी घनोन्नतः॥४८॥
सोऽसाध्यो

स०-सर्वजस्त्रिदोषजो गुल्मस्तीव्ररुगादियुक्तः। स चासाध्यः।

रक्तगुल्मस्तु स्त्रिया एव प्रजायते।

स०-रक्तगुल्मः पुनः स्त्रिया एव प्रजायते।

अत्रैवोपपत्तिमाह-

ऋतौ वा नवसूता वा यदि वा योनिरोगिणी॥४९॥
सेवते वातलानि स्त्री क्रुद्धस्तस्याः समीरणः।
निरुणद्ध्यार्तवं योन्यां प्रतिमासमवस्थितम्॥५०॥
कुक्षिं करोति तद्गर्भलिङ्गमाविष्करोति च।
हृल्लासदौर्हृदस्तन्यदर्शनक्षामतादिकम्॥५१॥

स०-ऋतौ-आर्तवकाले, नवप्रसूता वा योनिरोगिणी वा स्त्री वातलान्यन्नपानानि यदि सेवते तस्याः-स्त्रियाः समीरणः-पवनः, कुपितो योन्यां प्रतिमासं यदवस्थितमार्तवं तदुपरुणद्धि। तत्-आर्तवं, कुक्षिं करोति, गर्भलिङ्गं चाविष्करोति-प्रकटयति। गर्भलिङ्गमिव लिङ्गं यस्येति "सप्तम्युपमानपूर्वस्य" इति बहुव्रीहिरुत्तरपदलोपश्च। अथ तदेव गर्भलिङ्गमाह-हृल्लासेत्यादि। मुनिस्तु रक्तगुल्मे (च. नि. अ. ३।१४)-"पादयोः श्वयथुर्भवति।" इत्यूचे। आदिशब्देन मूर्च्छादीनां ग्रहणम्।

क्रमेण वायुसंसर्गात्पित्तयोनितया च तत्।
शोणितं कुरुते तस्या वातपित्तोत्थुगुल्मजान्॥५२॥
रुक्स्तम्भदाहातीसारतृड्ज्वरादीनुपद्रवान्।
गर्भाशये च सुतरां शूलं दुष्टासृगाश्रये॥५३॥
योन्याश्च स्रावदौर्गन्ध्यतोदस्पन्दनवेदनाः।

स०-क्रमेण-अनन्तरं, वायुसंसर्गात्-मरुत्संश्लेषात्, तथा पित्तयोनितया च-पित्तस्य कारणत्वेन, तच्छोणितं वातपित्तोत्थगुल्मजानुपद्रवान् कुरुते रुक्स्तम्भदाहातीसार-तृड्ज्वरादीन्। अनया च भङ्ग्या वातपित्तगुल्मयोरुपद्रवा अप्युक्ता भवन्ति। गर्भाशय इत्यादि। गुल्मश्च गर्भाशये सुतरां शूलं करोति। किम्भूते ? दुष्टस्यासृज आश्रये-आधारभूते। योन्याश्च स्रावादीन् कुरुते।

गर्भलक्षणाद्रक्तगुल्मस्य विलक्षणं लक्षणमाह-

न चाङ्गैर्गर्भवद्गुल्मः स्फुरत्यपि तु शूलवान्॥५४॥
पिण्डीभूतः स एवास्याः कदाचित्स्पन्दते चिरात्।
न चास्या वर्द्धते कुक्षिर्गुल एव तु वर्द्धते॥५५॥

स०-न च गर्भ इवाङ्गैः-पाण्यादिभिरवयवैः, स्फुरति-निःस्पन्दते गुल्मोऽङ्गाभावात्, अपि तु शूलवान्। स एव-गुल्मः, पिण्डीभूतः कदाचिच्चिरेणास्याः स्पन्दते-न गर्भवच्छीघ्रम्। तथा, गर्भेऽन्तःस्थिते कुक्षिरस्या वर्धते। गुल्मे त्वन्तःस्थिते स एव वर्धते गुल्मो, न कुक्षिः। इति गर्भरक्तगुल्मयोर्लक्षणभेगः।

अथ गुल्मविद्रध्योर्लक्षणभेदं कथयति-

स्वदोषसंश्रयो गुल्मः सर्वो भवति तेन सः।
पाकं चिरेण भजते नैव वा, विद्रधिः पुनः॥५६॥
पच्यते शीघ्रमत्यर्थं दुष्टरक्ताश्रयत्वतः।
अतः शीघ्रविदाहित्वाद्विद्रधिः सोऽभिधीयते॥५७॥

स०-सर्वो गुल्मः स्वदोषः संश्रयो यस्य स एवम्। येन येन दोषेण वाताद्यन्यतमेनाथवा द्वन्द्वस्वरूपेण सन्निपातेनान्येन वा गुल्मो जायते स दोषस्तस्य गुल्मस्याश्रयः। तदेवं वातगुल्मस्य वात एवाश्रयो, न तस्य पित्तादयः। पित्तादिकृतानां त एवाश्रयाः, न पवन आश्रयः। एवं स्वदोषसंश्रयो गुल्मः सर्वो भवति। तेन-स्वदोषसंश्रयाख्येन कारणेन, गुल्मश्चिरेण कालेन पाकं भजते। एतच्च पित्तगुल्मं प्रति प्रायेण तथैकीयमतेनोक्तम्। अत एवाह-नैव वेति। अथवा गुल्मः पाकं न भजत एव। विद्रधिस्तु शीघ्रं-अचिरेणैव कालेन, पाकं भजते, अत्यर्थं दुष्टरक्ताश्रयत्वात्। अतः शीघ्रविदाहित्वात् कारणादसौ विद्रधिरभिधीयते। तथा चागमः (सुश्रुते नि. अ. ९।३२)-"मांसशोणिभूयस्त्वात् पाकं गच्छति विद्रधिः। मांसशोणितहीनत्वाद्गुल्मः पाकं न गच्छति॥" इति। तथा प्रायेण वातात्मकः सर्वो गुल्मो जायते। वात एवामूर्तोऽपि मूर्तत्वमिव संश्रितो गुल्म इत्युच्यते। अत एव वातस्यैव सर्वगुल्मेकारणं प्रति प्राधान्यम्। तस्माद्गुल्मस्य पाकानुपपत्तिः।

अथ गुल्मस्य बाह्याभ्यन्तरलक्षणमाह-

गुल्मेऽन्तराश्रये बस्तिकुक्षिहृत्प्लीहवेदनाः।
अग्निवर्णबलभ्रंशो वेगानां चाप्रवर्तनम्॥५८॥
अतो विपर्ययो बाह्ये कोष्ठाङ्गेषु तु नातिरुक्।
वैवर्ण्यमवकाशस्य बहिरुन्नतताऽधिकम्॥५९॥

इति गुल्मनिदानम्।

स०-गुल्मेऽन्तराश्रये-आभ्यन्तरे, बस्त्यादिवेदनादयः स्युः। तथा, अन्यादिभ्रंशो-विनाशो, वेगानां च प्रवर्तनं न भवति। अतः-अस्माद्वाह्ये, विपर्ययो-वैपरीत्यम्। यथा,-अन्यादिभ्रंशाभावो वेगानां च प्रवर्तनं भवति। तथा, बस्तिहृदयादिषु कोष्ठाङ्गेष्वतिरुङ्न भवति। यथाऽन्तरे तथाऽवकाशस्य गुल्मप्रदेशस्य वैवर्ण्यं-शरीरादन्यवर्णत्वम्। बहिः-बाह्यभागे, उन्नतत्वमधिकं भवति।

गुल्मानामानाहभूयिष्ठत्वादानाहलक्षणमाह-

साटोपमत्युग्ररुजमाध्मानमुदरे भृशम्।
ऊर्ध्वाधोवातरोधेन तमानाहं प्रचक्षते॥६०॥

स०-ऊर्ध्वाधोवातरोधेन कारणभूतेनोदरे भृशमाध्मानं यत् तमानाहं प्रचक्षते, मुनयः इति शेषः। किम्भूतम्? साटोपं-सशब्दम्, तथाऽत्युग्रा रुक्-पीडा, यत्र तदेवम्। सुश्रुतेन प्रत्याध्मानस्यापि लक्षणमभ्यधायि (नि. अ. १।८९)-"विमुक्तपार्श्वहृदयं तदेवामाशयोत्थितम्। प्रत्याध्मानं विजानीयात् कफव्याकुलितानिलम्॥" इति।

घनोऽष्ठीलोपमो ग्रन्थिरष्ठीलोर्ध्वं समुन्नतः।
आनाहलिङ्गस्तिर्यक्तु प्रत्यष्ठीला तदाकृतिः॥६१॥

स०-[घनो-]निबिडो, यो ग्रन्थिरष्ठीलयोपमीयते तथोर्ध्वं समुन्नतः-नाधस्तात्, स ग्रन्थिरानाहलिङ्गोऽष्ठीला भण्यते। तिर्यक् च (पुनः) यो ग्रन्थिः-नोर्ध्वं समुन्नतः, तदाकृतिः-अष्ठीलासदृशः, स ग्रन्थिः प्रत्यष्ठीलोच्यते।

तूनीप्रतून्यौ लक्षयति-

पक्वाशयाद्वुदोपस्थं वायुस्तीव्ररुजः प्रयान्।
तूनी, प्रतूनी तु भवेत्स एवातो विपर्यये॥६२॥

स०-गुदं चोपस्थं च गुदोपस्थम्। पक्वाशयात्-ततो देशात्, वायुस्तीव्ररुजः सन् गुदोपस्थं प्रयान्-गच्छन्, तूनीत्युच्यते। स एव-वायुः, अतो विपर्यये-गुदोपस्थात्पक्वाशयं गच्छन्, तीव्ररुजः सन् प्रतूनीति गद्यते।

उद्गारबाहुल्यपुरीषबन्ध-
तृत्यक्षमत्वान्त्रविकूजनानि।
आटोपमाध्मानमपक्तिशक्ति-
मासन्नगुल्मस्य वदन्ति चिह्नम्॥ ६३॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां तृतीये निदानस्थाने विद्रधिवृद्धिगुल्मनिदानं नामैकादशोऽध्यायः॥ ११॥

****

स०-उद्गारबाहुल्यादीन्यासन्नगुल्मस्य चिह्नं-प्राग्रूपं, वदन्ति।

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टाङ्गहृदयटीकायां सर्वाङ्गसुन्दराख्यायां तृतीये निदानस्थाने विद्रधिवृद्धिगुल्मनिदानं नामैकादशोऽध्यायः समाप्तः॥ ११ ॥

****

द्वादशोऽध्यायः।

अथोदरनिदानमारभ्यते। यतोऽनन्तरेऽध्याय आनाहलक्षणमुक्तम्। उदरं च कुक्षिमानह्य दोषाः कुर्वते। तस्मादतोऽनन्तरमुदरनिदानमुच्यते इत्याह-

अथात उदरनिदानं व्याख्यास्यामः।

इति ह स्माहुरात्रेयादयो महर्षयः।

(गद्यसूत्रे॥२॥)

रोगाः सर्वेऽपि मन्देऽग्नौ सुतरामुदराणि तु।

अजीर्णान्मलिनैश्चान्नैर्जायन्ते मलसञ्चयात्॥१॥

स०-सर्वेऽपि-ज्वरातीसारादयो, रोगा मन्देऽग्नौ सति जायन्ते, अतिशयेन पुनरुदराणि। अन्येभ्यश्चोदरहेतुभ्यो मन्दाग्नित्वं प्रधानमुदराणां कारणमिति मन्देग्नावित्यनेन प्रागुद्दिष्टेन द्योतयति। अजीर्णादित्यादि। चतुर्विधादजीर्णात्-आमविष्टब्धविदग्धरसशेषाख्यात्, तथा मलिनैश्चान्नैः-पूतिपर्युषितसङ्कीर्णादिलक्षणैः, तथा मलसञ्चयात्-चिरकालसम्भृतादोषाणां प्रचयात्, उदराणि जायन्ते।

अधुना सम्प्राप्तिविशेषमाह-

ऊर्ध्वाधो धातवो रुद्ध्वा वाहिनीरम्बुवाहिनीः।

प्राणान्व्यपानान् सन्दूष्य कुर्यस्त्वङ्मांससन्धिगाः॥२॥

आध्माप्य कुक्षिमुदरम्

स०-अम्बुवाहिनीर्वाहिनीः-जलवाहिनी स्रोतांसि, ऊर्ध्वाधो रुद्धा धातवो-वातादयः, उदरं कुर्युः। कीदृशाः ? त्वक् च मांसं च त्वङ्मांसे, तयोः सन्धिः-अन्तरं, तत्र गच्छन्तीति त्वङ्मांससन्धिगाः, तत्रस्था इत्यर्थः। किं कृत्वा ? कुक्षिमाध्माप्य-आनह्य। तथा, प्राणश्चाग्निश्चापानश्च तान् प्राणाग्न्यपानान् सन्दूष्यदूषयित्वा। प्रकृत्या मन्दोऽग्निः पुनर्वातादिभिः सन्दूषितो जठरं करोतीत्यर्थः।

अष्टधा तच्च भिद्यते।

पृथग्दोषैः समस्तैश्च प्लीहबद्धक्षतोदकैः॥३॥

स०-तच्च-उदरं, अष्टधा स्यात्। पृथग्दोषैः-वातपित्तकफैस्त्रयः, समस्तैः-सन्निपातेन चैकः, प्लीहोदरं बद्धोदरं क्षतोदरं जलोदरमिति [च चत्वारः, एवमष्टौ]। वातादिकृतान्यपि प्लीहाद्युदराणि प्लीहादिनिमित्तसंज्ञयोक्तानि। यथा, वृद्ध्याख्यो रोगः। संज्ञाविशेषश्च चिकित्साविशेषप्रतिपत्त्यर्थः।

तेनार्ताः शुष्कताल्वोष्ठाः शूनपादकरोदराः।

नष्टचेष्टाबलाहाराः कृशाः प्रध्मातकुक्षयः॥४॥

स्युः प्रेतरूपाः पुरुषाः

स०-तेन-उदरेण, आर्ताः-पीडिताः पुरुषाः, शुष्कताल्वोष्ठाः शूनपादादयो नष्टचेष्टादिकाः कृशादयश्च स्युः।

भाविनस्तस्य लक्षणम्।

क्षुन्नाशोऽन्नं चिरात्सर्वं सविदाहं च पच्यते॥५॥

जीर्णाजीर्णं न जानाति सौहित्यं सहते न च।

क्षीयते बलतः शश्वच्छ्वसित्यल्पेऽपि चेष्टिते॥६॥

वृद्धिर्विशोऽप्रवृत्तिश्च किञ्चिच्छोफश्च पादयोः।

रुग्बस्तिसन्धौ ततता लघ्वल्पाभोजनैरपि॥७॥

राजीजन्म वलीनाशो जठरे

स०-तस्य भाविनो-भविष्यतो, लक्षणं क्षुन्नाशादिकं स्यात्। तथा, बस्तिसन्धौ रुक्-शूलम्। तथा, लघुभोजनैरल्पभोजनैरभोजनैरपि च बस्तिसन्धौ ततता-विस्तीर्णता, आध्माततेत्यर्थः। तथा, राजीनां जन्म-सम्भवो, वलीनां च नाशो जठरे स्यात्।

जठरेषु तु।

सर्वेषु तन्द्रा सदनं मलसङ्गोऽल्पवह्निता॥८॥

दाहः श्वयथुराध्मानमन्ते सलिलसम्भवः।

स०-जठरेषु-जठराख्येषु, सर्वेषु तु रोगेषु तन्द्रा-आलस्यं, तथा सदनं देहस्य भवति। तथा, मलस्य सङ्गः-पुरीषस्याप्रवृत्तिः। तथा, अल्पाग्नित्वम्। तथा, दाहः श्वयथुराध्मानं च। अन्ते-अवसाने, सलिलसम्भवः।

अतोयमदुरं किंलक्षणम् ? इत्याह-

सर्वं त्वतोयमरुणमशोफं नातिभारिकम्॥९॥

गवाक्षितं सिराजालैः सदा गुडगुडायते।

नाभिमन्त्रं च विष्टभ्य वेगं कृत्वा प्रणश्यति॥१०॥

मारुतो हृत्कटीनाभिपायुवङ्क्षणवेदनाः।

सशब्दो निश्चरेद्वायुर्विबद्धा मूत्रमल्पकम्॥११॥

नातिमन्दोऽनलो लौल्पं न च स्याद्विरसं मुखम्।

स०-सर्वमुदरमतोयं-जलोदरतामप्राप्तं, वर्णतोऽरुणं, तथाऽशोफं-शोफेनानाक्रान्तं, तथा नातिभारिकं-नातिशयेन गुरु, तथा सिराजालैः-सिरासमूहैर्जालाकृतिभिः, गवाक्षितं-निरन्तरमाक्रान्तं, सदा-सर्वकालं, गुडगुडायते-गुडगुड ईदृशमव्यक्तं शब्दमाचरति। तथा, मारुतो नाभिं विष्टभ्य-स्तब्धतां नीत्वा, तथाऽन्त्रं च विष्टभ्य, वेगं कृत्वा-हृत्कटीनाभिपायुवङ्क्षणवेदना इत्येवंरूपमात्मीयं संरम्भं प्रदर्श्यानन्तरं, प्रणश्यति। तथा, सशब्दो

वायुरन्तर्निश्चरेत्-निर्याति। तथा विड्बद्धा, तथा मूत्रमतिशयेनाल्पं स्यात्। तथा किञ्चिन्मन्दोऽग्निः, तथा लौल्यं-गृद्धिः, न च विरसं मुखं स्यात्। यत्र तदतोयसम्भवं वेद्यम्। अस्माच्च विपरीतलक्षणं सामर्थ्यात् सतोयम्।

तत्र वातोदरे शोफः पाणिपान्मुष्ककुक्षिषु॥ १२॥
कुक्षिपार्श्वोदरकटीपृष्टरुक् पर्वभेदनम्।
शुष्ककासोऽङ्गमर्दोऽधोगुरुता मलसङ्ग्रहः॥ १३॥
श्यावारुणत्वगादित्वमकस्माद्वृद्धिह्रासवत्।
सतोदभेदमुदरं तनुकृष्णसिराततम्॥ १४॥
आध्मातदृतिवच्छब्दमाहतं प्रकरोति च।
वायुश्चात्र सरुक्शब्दो विचरेत्सर्वतोगतिः॥ १५॥

स०-तत्र-तेषूदरेषु मध्ये, वातोदरे शोफः पाण्यादिषु, तथा कुक्ष्यादिषु रुक् पर्वभेदनं तथा शुष्ककासादयः स्युः। अकस्मात्-निमित्तं विना, उदरं वृद्धिह्रासयुतं स्यात्, तथा सतोदभेदं, तथा तनुकृष्णसिराभिस्ततं-व्याप्तम्, आहतं च तदुदरमाध्मातभस्त्रेव शब्दं करोति। अत्र च-वातोदरे, वायुः सरुक्शब्दः सर्वतोगतिश्च सन् विचरेत्-भ्रमति।

पित्तोदरे ज्वरो मूर्च्छा दाहस्तृट् कटुकास्यता।
भ्रमोऽतिसारः पीतत्वं त्वगादावुदरं हरित्॥ १६॥
पीतताम्रसिरानद्धं सस्वेदं सोष्म दह्यते।
धूमायति मृदुस्पर्शं क्षिप्रपाकं प्रदूयते॥ १७॥

स०-पित्तोदरे ज्वरादयः स्युः। तथा, त्वगादौ पीतत्वं भवति। जठरं हरितवर्णं तथा पीतताम्राभिः सिराभिर्नद्धं-युक्तं, सस्वेदं शोष्म च स्यात्, दह्यते-तप्यते च। तथा, धूमायति। तथा, मृदुः-अकठिनः, स्पर्शो यस्य तदेवम्। तथा, क्षिप्रपाकं स्यात्। प्रदूयते-उपतप्यते च।

श्लेष्मोदरेऽङ्गसदनं स्वापः श्वयथुगौरवम्।
निद्रोत्क्लेशारुचिश्वासकासशुक्लत्वगादिता॥ १८॥
उदरं स्तिमितं श्लक्ष्णं शुक्लराजीततं महत्।
चिराभिवृद्धि कठिनं शीतस्पर्शं गुरु स्थिरम्॥ १९॥

स०-श्लेष्मोदरेऽङ्गसादादयः स्युः। तथोदरं स्तिमितं-निश्चलम्, तथा श्लक्ष्णं-कोमलस्पर्शम्, तथा शुक्लराजीभिस्ततं-व्याप्तम्, तथा बृहत्, तथा चिराभिवृद्धि कठिनं च तथा शीतस्पर्शम्, तथा गुरु, तथा स्थिरं-न तु चलम्।

अधुना सन्निपातोदरं लक्षयितुमाह-

त्रिदोषकोपनैस्तैस्तैः स्त्रीदत्तैश्च रजोमलैः।
गरदूषीविषाद्यैश्च सरक्ताः सञ्चिता मलाः॥ २०॥
कोष्ठं प्राप्य विकुर्वाणाः शोषमूर्च्छाभ्रमान्वितम्।
कुर्युस्त्रिलिङ्गमुदरं शीघ्रपाकं सुदारुणम्॥ २१॥
बाधते तच्च सुतरां शीतवाताभ्रदर्शने।

स०-मलाः-वातादयः, सरक्ताः सञ्चितास्त्रिलिङ्गं-त्रिदोषलक्षणं, तथा शोषादियुतं, तथा शीघ्रपाकं, तथा सुदारुणमुदरं कुर्युः। किम्भूतैः सञ्चिताः ? त्रिदोषकोपनैः-सङ्कीर्णादिभोजनैः, तैस्तैः-सर्वरोगनिदानोक्तैः, तथा स्त्रिया दत्तै रजोमलैः-कार्मणापरपर्यायैर्वशीकरणैः, तथा गरेण दूषीविषाद्यैश्च। आदिशब्देन विरुद्धाभ्यवहारादेर्ग्रहणम्। अनेनास्य हेतुविशेषकथनम्। कीदृशा दोषाः ? कोष्ठं प्राप्य-आश्रित्य, विकुर्वाणाः-विक्रियां याताः। तच्च-जठरं, सुतरां शीतवाताभ्रदर्शने बाधते। इत्यनेनास्य विशेषलक्षणं कथितम्।

प्लीहोदरादीन्यधुना लक्षयति-

अत्याशितस्य सङ्क्षोभाद्यानयानादिचेष्टितैः॥२२॥
अतिव्यवायकर्माध्ववमनव्याधिकर्शनैः।
वामपार्श्वाश्रितः प्लीहाच्युतः स्थानाद्विवर्द्धते॥२३॥
शोणितं वा रसादिभ्यो विवृद्धं तं विवर्द्धयेत्।
सोऽष्ठीलेवातिकठिनः प्राक् ततः कूर्मपृष्ठवत्॥२४॥
क्रमेण वर्द्धमानश्च कुक्षावुदरमावहेत्।
श्वासकासपिपासास्यवैरस्याध्मानरुग्ज्वरैः॥२५॥
पाण्डुत्वमूर्च्छाछर्दीभिर्दाहमोहैश्च संयुतम्।
अरुणाभं विवर्णं वा नीलहारिद्रराजिमत्॥२६॥

स०-अतितृप्तस्य नरस्य यानगमनादिचेष्टितैर्यः सङ्क्षोभस्तस्मात्, तथाऽतिव्यवायादिभिः कर्शनैः प्लीहा स्थानात्-स्वाशयात्, च्युतो विवर्धते-विशेषेण वृद्धिं गच्छति। किम्भूतः प्लीहा ? वामपार्श्वाश्रितः। अथवा रसादिभ्यो धातुभ्यः शोणितं विवृद्धं-वृद्धिहेतुभिरधिकं कृत्वा वृद्धिं प्राप्तं, अनन्तरं तं-प्लीहानं स्वस्थानाच्युतमच्युतं वा, विशेषेण वर्धयेत्-स्वप्रमाणादाधिक्यं जनयेत्। सः-प्लीहा, अष्ठीलेवातिकठिनः प्राग्भूत्वा, ततः-अनन्तरं, कृच्छपपृष्ठाकृतिः क्रमेण-न सहसैव, वर्धमानः-आधिक्यं गच्छन्, कुक्षौ-स्वीये स्थाने, उदरं विदध्यात्। कीदृशम् ? श्वासादिभिर्दाहमोहपर्यन्तैः संयुतम्। तथा, अरुणाभं-अरुणवर्णम्, अथवा विवर्ण-अनिश्चितवर्णम्, तथा नीलहारिद्रराजिमत् एवंविधा राजयो विद्यन्ते यस्मिंस्तदेवम्।

उदावर्तरुजानाहैर्मोहतृड्दहनज्वरैः।
गौरवारुचिकाठिन्यैर्विद्यात्तत्र मलान् क्रमात्॥२७॥

स०-तत्र-प्लीहोदरे, पृथग्लक्षणलक्षितान्मलान्-वातादीन्, क्रमेणोदावर्तादिना विद्यात्। तत्रोदावर्तरुजानाहैर्वातं विद्यात्। मोहतृड्दहनज्वरैः पित्तं विद्यात्। गौरवारुचिकाठिन्यैः कफं विद्यात्।

अथ यकृल्लक्षयति-

प्लीहवद्दक्षिणात्पार्श्वात् कुर्याद्यकृदपि च्युतम्।

स०-यथा पूर्वोक्तैर्हेतुभिः प्लीहा वामपार्श्वाच्च्युतो विवर्धते-विवृद्धो भूत्वाऽनन्तरमुदरमावहेत्, तद्वद्यकृदपि दक्षिणात् पार्श्वाच्च्युतं सद्वर्धते-वृद्धं सदुदरं कुरुते। अथवा शोणितं स्वहेतुतो विवृद्धं यकृद्विवर्धयेत्, तच्च विवृद्धमुदरमावहेत्। इति प्लीहोदरयकृदुदरयोः सादृश्यम्।

अथ बद्धोद्रं लक्षयति-

पक्ष्मवालैः सहान्नेन भुक्तैर्बद्धायने गुदे॥ २८॥
दुर्नामभिरुदावर्तैरन्यैर्वाऽन्त्रोपलोपिभिः।
वर्चःपित्तकफान् रुद्धा करोति कुपितोऽनिलः॥ २९॥
अपानो जठरं तेन स्युर्दाहज्वरतृड्भवाः।
कासश्वासोरुसदनं शिरोहृन्नाभिपायुरुक्॥ ३०॥
मलसङ्गोऽरुचिश्च्छर्दिरुदरं मूढमारुतम्।
स्थिरं नीलारुणसिराराजिनद्धमराजि वा॥ ३१॥
नाभेरुपरि च प्रायो गोपुच्छाकृति जायते।

स०-पक्ष्माणि च वालाश्च पक्ष्मवालाः, तैरन्नेन सह भुक्तैर्बद्धायने गुदे सत्यपानो वायुर्विगुणः-कुपितो, जठरं करोति। बद्धमयनं-द्वारं पुरीषानिलवाहि, यस्य तदेवंविधे गुदे। तथा दुर्नामभिर्गुदे

बद्धायने, तथोदावर्तैर्बद्धायने, तथाऽन्यैर्वाऽन्त्रोपलेपिभिः-उपदेहिभिर्दध्योदनमाशोमादिभिः, गुदे बद्धायने, अपानो जठरं करोति। किं कृत्वा ? वर्चःपित्तकफान् रुद्धा-आवृत्य, तद्बद्धोदरमुच्यते। तेन-बद्धोदरेण, दाहज्वरतृड्भवाः स्युः। तथा, कासश्वासावूरुसदनं शिरोहृन्नाभिपायुरुक् स्यात्। तथा, मलानां-मूत्रपुरीषादीनां, सङ्गः-अप्रवर्तनम्। अरुचिस्तथा छर्दिः स्यात्। तथोदरं मूढमारुतं भवेत्। मूढो-बहिरनिःसरणरूपो, मारुतो यस्मिंस्तदेवम्। मूढमारुतत्वस्य सामान्यलक्षणेनैव गृहीतत्वात्पुनर्ग्रहणमतिशयार्थम्। तथा, स्थिरं-अचलम्। तथा, नीलारुणसिराराजिभिर्नद्धं-व्याप्तम्, अथवाऽराजि स्यात्। तच्चोदरं प्रायो नाभेरुपरिष्टाद्गोपुच्छाकृति जायते। यथायथोर्ध्वं तथातथा सूक्ष्ममित्यर्थः। अनेनास्य संस्थानमुक्तम्।

अधुना छिद्रोदरं लक्षयति-

अस्थ्यादिशल्यैः सान्नैश्चद्भुक्तैरत्यशनेन वा॥३२॥
भिद्यते पच्यते वाऽन्त्रं तच्छिद्रैश्च स्रवन्बहिः।
आम एव गुदादेति ततोऽल्पाल्पं सविड्रसः॥३३॥
तुल्यः कुणपगन्धेन पिच्छिलः पीतलोहितः।
शेषश्चापूर्य जठरं जठरं घोरमावहेत्॥३४॥
वर्द्धयेत्तदधो नाभेराशु चैति जलात्मताम्।
उद्रिक्तदोषरूपं च व्याप्तं च श्वासतृड्भ्रमैः॥३५॥
छिद्रोदरमिदं प्राहुः परिस्रावीति चापरे।

स०-अस्थितृणकण्टकपाषाणधातुश्वङ्गदार्वादिशल्यैः सान्नैः-सहभोजनेन भुक्तैः। अथवा, अत्यशनेन-अतिमात्रभोजनेन, यदाऽन्त्रं भिद्यते-सच्छिद्रं सम्पद्यते, अथवा पच्यते-पाकं याति। तच्छिद्रैश्च-अन्त्रच्छिद्रैर्भेदोत्पन्नैः, पाकतो वा, बहिराम एव-अपरिपक्व एव, सविड्रसः स्रवन्नल्पाल्पमेव गुदादेति-आयाति। तुल्यः-सदृशः, कुणपगन्धेन-शवगन्धेन। तथा पिच्छिलः, पीतलोहितश्च वर्णेन। शेषश्च रसो-यो गुदान्नागच्छति, स जठरमापूर्य-पूरयित्वा, घोरं-कष्टतरं, जठराख्यं व्याधिं कुर्यात्। तत्-उदरं, अधो नाभेर्वर्धयेत्-वृद्धिं गच्छेत्। वर्धिश्चुरादिः। तथा,

आशु-शीघ्रमेव, जलात्मतां-जलोदरत्वमेति, उद्रिक्तदोषरूपं च। उद्रिक्तं-अधिकं, दोषाणां-वातपित्तकफानां, रूपं-आकृतिः, यस्य तदेवम्। तथा, श्वासतृङ्भमैर्व्याप्तमिदमुदरं छिद्रोदरं प्राहुराचार्याः। अपरे त्वाचार्याः परिस्रावीत्याहुः।

अथोदकोदरदर्शनार्थमाह-

प्रवृत्तस्नेहपानादेः सहसाऽऽमाम्बुपायिनः॥ ३६॥
अत्यम्बुपानान्मन्दाग्नेः क्षीणस्यातिकृशस्य वा।
रुद्धाऽम्बुमार्गाननिलः कफश्च जलमूर्छितः॥ ३७॥
वर्धयेतां तदेवाम्बु तत्स्थानादुदराश्रितौ।
ततः स्यादुदरं तृष्णागुदस्रुतिरुजान्वितम्॥ ३८॥
कासश्वासारुचियुतं नानावर्णसिराततम्।
तोयपूर्णदृतिस्पर्शशब्दप्रक्षोभवेपथु॥ ३९॥
दकोदरं महत्स्निग्धं स्थिरमावृत्तनाभि तत्।

स०-प्रवृत्तं-आरब्धं, स्नेहपानादि येन स प्रवृत्तस्नेहपानादिः। आदिग्रहणाद्वमनादिकं कर्म पञ्चविधं गृह्यते। तस्य तथाभूतस्य सहसाऽऽमाम्बुपायिनः-सहसैवापक्वपानीयपस्य, तथा मन्दाग्नेः-नष्टवह्नेः, तथा क्षीणस्य-विशिष्टव्याध्याक्रान्ततया धात्वपचयवतः, तथाऽतिकृशस्य-अनशनादिना क्षीणमेदोमांसस्य, एवंविधस्य पुरुषस्यात्यम्बुपानादम्बुमार्गान्-तोयवाहिनि स्रोतांसि, रुद्धाऽनिलः कफश्च। किम्भूतः ? जलमूर्छितः-तोयमिश्रितः। तावुभौ वातकफौ जलमूर्छितावुदराश्रितौ तदेवाम्बु तत्स्थानात्-उदकस्थानात् क्लेमतो, वर्द्धयेताम्। ततः-अनन्तरं, उदरं स्यात्। तृष्णादियुतं, तथा कासादियुतं, तथा नानावर्णाभिः-अनेकवर्णाभिः सिराभिः, ततं-व्याप्तम्। तोयेत्यादि। शब्दस्य प्रक्षोभः-संरम्भः शब्दप्रक्षोभः, वेपथुः-कम्पः, स्पर्शश्च शब्दप्रक्षोभश्च वेपथुश्च त एवम्, तोयेन पूर्णा तोयपूर्णा, सा चासौ दृतिश्च तोयपूर्णदृतिः, तोयपूर्णदृतिवत् स्पर्शशब्दप्रक्षोभवेपथवो यस्मिन्नुदरे तत्तोयपूर्णदृतिस्पर्शशब्दप्रक्षोभवेपथु, दकोदरं-जलोदरं, स्यात्। तच्च महत्-अन्येभ्य उदरेभ्यो विस्तीर्णम्, तथा स्निग्धं, तथा स्थिरं-अचलम्, आवृत्तनाभि तत्, आसमन्ताद्वृत्ता-वर्तुला, नाभिर्यस्य तदेवम्।

अदुना जठरेऽप्यवसाने यथा जलसम्भवः स्यात्तथाऽऽह-

उपेक्षया च सर्वेषु दोषाः स्वस्थानतश्च्युताः॥४०॥
पाकाद्द्रवा द्रवीकुर्युः सन्धिस्रोतोमुखान्यपि।
स्वदेश्च बाह्यस्रोतःसु विहतस्तिर्यगास्थितः॥४१॥
तदेवोदकमाप्याय्य पिच्छां कुर्यात्तदा भवेत्।
गुरूदरं स्थिरं वृत्तमाहतं च न शब्दवत्॥४२॥
मृदु व्यपेतराजीकं नाभ्यां स्पृष्टं च सर्पति।
तदनूदकजन्मास्मिन्कुक्षिवृद्धिस्ततोऽधिकम्॥४३॥
सिरान्तर्धानमुदकजठरोक्तं च लक्षणम्।

स०-उपेक्षया-अचिकित्सनात्, सर्वेषूदरेषु, दोषाः-वातपित्तकफाः, स्वस्थानतः-आत्मीयात् स्थानात्, च्युताः-स्थानान्तरं गताः, तथा पाकाद्धेतोस्ते दोषा द्रवा अधिकं द्रवीकुर्युः सन्धिस्रोतोमुखान्यपि। अन्धयश्च स्रोतोमुखानि च सन्धिस्रोतोमुखानि-द्वाराणि। न केवलं स्वयं दोषा द्रवत्वं गताः, यावत्सन्धिस्रोतोमुखान्यपि द्रवीकुर्युः, इत्यपिशब्दार्थः। स्वेदश्च बाह्यस्रोतःसु संवृतेषु विहतो-निरुद्धः, तिर्यगास्थितः-तिर्यक् प्रवृत्तश्च, तदेवोदकं प्राक् कुक्षौ वृद्धिं गतमाप्याय्य-वृद्धिं गमयित्वा, पिच्छां कुर्यात्। तदा भवेद्गुरूदरं स्थिरं-अचलं, वृत्तं-वर्तुलं, च। तथाऽऽहतं च पाण्यादिना न शब्दवत्-नशब्दयुक्तम्, तथा मृदु-अकठिनम्, तथा व्यपेता राज्यो यस्मात् तद्व्यपेतराजीकं स्यात्। नाभ्यां च स्पृष्टं सत् सर्पति-प्रसारि सम्पद्यते। तदनु-ततोऽनन्तरम्, अस्मिन्-उदराख्ये व्याधौ, उदकजन्म-जलसम्भवः। ततः-अनन्तरं, अधिकं कृत्वा कुक्षिवृद्धिर्भवेत्। तथा, सिरान्तर्धानं-सिराणामदर्शनम्। किमेतदेव लक्षणम् / नेत्याह-उदकजठरोक्तं च लक्षणम्। न केवलं यदधुनैवोक्तं लक्षणम्, यावज्जलोदरोक्तं चेति चशब्दस्यार्थः।

इदानीमुदराणां सुखसाध्यत्वाभावात् कृच्छ्रसाध्यासाध्यत्वे वेदयति-

वातपित्तकफप्लीहसन्निपातोदकोदरम्॥४४॥

कृच्छ्रं यथोत्तरम्

स०-वाताद्युद्भवमुदरं यथोत्तरं कृच्छ्रम्। तेन वातोदरात् पित्तोदरात् पित्तोदरं यावदुदकोदरमत्यर्थं कृच्छ्रम्, कृच्छ्रसाध्यत्वात्।

पक्षात्परं प्रायोऽपरे हतः।

स०-पाठापेक्षया ये द्वे अपरे-बद्धक्षतोदरे, ते प्रायः पक्षात्परं-अनन्तरं, हतो-मारयतः। प्रायोग्रहणात्-कदाचिन्नियतायुष्युत्पन्ने नैव मारयतः।

सर्वं च जातसलिलं रिष्टोक्तोपद्रवान्वितम्॥४५॥

स०-किलोपेक्षया सर्वेषूदरेष्वन्ते सलिलसम्भव इत्युक्तम्। सर्वं च जठरं जातोदकं यद्वातादिसमुत्थं कृच्छ्रमुक्तं तदपि हन्त्येव। अत्रापि प्रायोग्रहणमनुवर्तनीयम्। कदाचिज्जातोदकमपि न मारयति, अपि तु यापयत्येव। तथा, रिष्टोक्तोपद्रवान्वितं-रिष्टाध्यायोक्तैरुपद्रवैर्युक्तं "जठरं हन्ति दुर्बलम्। शूनाक्षं कुटिलोपस्थं" (हृ. शा. अ. ५।९०) इत्यादिभिश्च, तदपि हन्ति।

जन्मनैवोदरं सर्वं प्रायः कृच्छ्रतमं मतम्।
बलिनस्तदजाताम्बु यत्नसाध्यं नवोत्थितम्॥४६॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां तृतीये निदानस्थाने उदरनिदानं नाम द्वादशोऽध्यायः॥१२॥

****

स०-जन्मनैव-जात्यैव स्वभावेनैव, उदरं सर्वं प्रायः कृच्छ्रतमं मतम्, व्याधिस्वभावात्। प्रायोग्रहणात्किञ्चिदुदरं कृच्छ्रमेव भवति, न कृच्छ्रतमम्। अत एवाह-बलिन इत्यादि। बलिनो-बलवतः, तदुदरमुत्थितं नवं सत् अजातोदकं सत्, यत्नसाध्यमिति।

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टाङ्गहृदयटीकायां सर्वाङ्गसुन्दराख्यायां तृतीये निदानस्थाने उदरनिदानं नाम द्वादशोऽध्यायः समाप्तः॥१२॥

****

त्रयोदशोऽध्यायः।

उदरनिदानादनन्तरं पाण्डुशोफविसर्पनिदानमारभ्यते। यतो यथैवोदरं दोषसङ्घातजं तथैतेऽपि, इत्याह-

अथातः पाण्डुरोगशोफविसर्पनिदानं व्याख्यास्यामः

इति ह स्माहुरात्रेयादयो महर्षयः।

(गद्यसूत्रे॥२॥)

पित्तप्रधानाः कुपिता यथोक्तैः कोपमैर्मलाः।

तत्रानिलेन बलिना क्षिप्तं पित्तं हृदि स्थितम्॥१॥

धमनीर्दश सम्प्राप्य व्याप्नुवत्सकलां तनुम्।

श्लेष्मत्वग्रक्तमांसानि प्रदूष्यान्तरमाश्रितम्॥२॥

त्वङ्मांसयोस्तत्कुरुते त्वचि वर्णान् पृथग्विधान्।

पाण्डुहारिद्रहरितान् पाण्डुत्वं तेषु चाधिकम्॥३॥

यतोऽतः पाण्डुरित्युक्तः स रोगः

स०-यत्र मलाः-वातादयः, पित्तप्रधाना यथोक्तैः-सर्वरोगनिदानाद्युक्तैः, कोपनैः कुपिताः-क्रुद्धाः, पाण्डुरोगहेतवः। कथम्? इत्याह-तत्रेत्यादि। [तत्र-] तेषु तथाभूतेषु सत्सु, वातेन बलिना-बलवता, क्षिप्तं पित्तं हृदि स्थितमनन्तरं तत्पित्तं धमनीर्दश-हृदि स्थिताः, सम्प्राप्य-आश्रित्य, सकलां तनुं व्याप्नुवत्-अश्नुवानम्। सकलशब्दोपादानं मूत्रपुरीषादीनामपि ग्रहणार्थम्। अत एवाख्यास्यति (श्लो. ९) -"कृष्णरूक्षारुणसिरानखविण्मूत्रनेत्रता।" इति। तथा श्लेष्मत्वग्रक्तमांसानि प्रदूष्य। किम्भूतं पित्तम्? त्वङ्मासयोरन्तरं-मध्यमाश्रितम्। तत्-पित्तं, त्वचि वर्णान् पृथग्विधान्-नानाप्रकारान्, पाण्डुहारिद्रहरितान् कुरुते। तेषु-वर्णेषु मध्ये, यतो-यस्मात्, अतिशयेन पाण्डुत्वमधिकमतः-अस्मात्, स रोगः पाण्डुरित्युक्तः-संज्ञितः। ननु, 'पित्तप्रधानाः' इति कथमुक्तम्? यावता (यतो) वायोर्बलीयस्त्वात् 'वातप्रधानाः' इति वक्तुं युक्तं स्यात्। बलीयस्त्वं चानन्तरमेव प्रतिपादितं 'तत्रानिलेन बलिना क्षिप्तं' इति। असदेतत्। यतो नात्र बलीयस्त्वाबलीयस्त्वकृते प्राधान्याप्राधान्ये विवक्षिते। किन्तर्हि? पाण्डुरोगकरणं प्रति कर्तृत्वाकर्तृत्वे। पित्तस्य च पाण्डुरोगकरणं प्रति मुख्यं कर्तृत्वम्, अतः 'पित्तप्रधानाः' इति युक्तमुक्तम्। ननु, यदि त्रयो दोषाः पाण्डुरोगहेतवः, कथं तर्हि वक्ष्यति? (श्लो. ७)-"स पञ्चधा पृथग्दोषैः समस्तैर्मृत्तिकादनात्।" इति। उच्यते। सर्वः पाण्डुरोगस्त्रिदोषज एव। किन्तु हेतुविशेषैर्यो रूपभेदस्तेन पञ्चात्मकः शोफवत्, इति न किञ्चिदत्रायुक्तम्।

तेन गौरवम्।

धातूनां स्याच्च शैथिल्यमोजसश्च गुणक्षयः॥४॥

ततोऽल्परक्तमेदस्को निःसारः स्याच्छ्लथेन्द्रियः।

मृद्यमानैरिवाङ्गैर्ना द्रवता हृदयेन च॥५॥

शूनाक्षिकूटः सदनः कोपनः ष्ठीवनोऽल्पवाक्।

अन्नद्विट् शिशिरद्वेषी शीर्णरोमा हतानलः॥६॥

सन्नसक्थो ज्वरी श्वासी कर्णक्ष्वेडी भ्रमी श्रमी।

स०-तेन-पाण्डुरोगेण, धातूनां-रसरुधिरादीनां, गौरवं शैथिल्यं च स्यात्। तथा, ओजसो गुणक्षयो-माधुर्य(मन्द)शैत्यादीनामोजोगुणानां (हृ. नि. अ. ६।१) विनाशः। तत एव-ओजोगुणक्षयात्, पाण्ड्वामयी नरोऽल्परक्तमेदस्कः। अल्पे रक्तमेदसी यस्य स एवम्। तथा, निःसारो-दुर्बलः स्यात् \ तथा श्लथेन्द्रियः। [श्लथानि-] शिथिलानि, इन्द्रियाणि-वाक्पाणिपादपायूपस्थरूपाणि, यस्य स श्लथेन्द्रियः। तथा, इन्द्रियशब्देन बुद्धीन्द्रियाणां चक्षुरादीनामधिष्ठानान्युपलक्ष्यन्ते। ननु, पित्तप्रधानाः कुपिता इति पित्तवृद्धिरुक्ता। पित्तवृद्ध्या च रक्तवृद्ध्या भवितव्यम्। तत्कथमुक्तमल्परक्ततेति ? अत्रोच्यते। दोषाणामन्योन्यदूषणात् दूषस्य च दोषैर्दूषितत्वात् प्रसादपरम्परयाऽपुष्टौ सत्यां किट्टबाहुल्यात् पित्त[स्य]आधिक्यम्, न रक्तस्य प्रसादात्मकस्य, इति पित्ताधिक्यमल्परक्तता चेत्युपपन्नम्। तथा, अङ्गैः-अवयवैः, मृद्यमानैरिवासौ नर उपलक्षितः, तथा हृदयेन द्रवता च। तथा, शूनावक्षिकूटौ यस्य स एवम्। तथा, सदनः-अङ्गसादवान्। तथा, कोपनादिकः स्यात्।

स पञ्चधा पृथग्दोषैः समस्तैर्मृत्तिकादनात्॥७॥

स०-सः-पाण्डुरोगः, पञ्चधा स्यात्। कथम् ? इत्याह-पृथग्दोषैः सन्निपातेन मृद्भक्षणाच्च। ननु, मृत्तिकादनात् पृथग्पाण्डुरोगो न वाच्यः, पृथग्वातादिदोषजे पाण्डुरोगेऽन्तर्भूतत्वात्। मृदा हि वातादिप्रकोपो विधीयते तिक्तोषणादिभिरिव। वातादिप्रकोपश्च पाण्डुरोगकृत्। तस्मात्पृथङ्मृदो न युक्तो निर्देशः। अत्र ब्रूमः। मृदोऽन्ये ये वातादिप्रकोपहेतवः पाण्डुरोगसम्पादने सम्भावनायोग्याः, ते पाण्डुरोगं सम्पाद्य हेतुस्वरूपसत्तया विनिवर्तन्ते। मृत्तिका तु तीक्ष्णैः संशोधनैर्विना पाण्डुरोगं यावत्कायेऽवतिष्ठते। इत्ययं वातादिकोपहेतुभ्योऽन्येभ्यो मृदः पाण्डुरोगं प्रति विशेषः। तस्मान्मृदा पृथक् पाण्डुरोगो वक्तुं न्याय्यः।

प्राग्रूपमस्य हृदयस्पन्दनं रूक्षता त्वचि।
अरुचिः पीतमूत्रत्वं स्वेदाभावोऽल्पवह्निता॥८॥
सादः श्रमो

स०-अस्य पाण्डुरोगस्य हृदयस्पन्दनादि प्राग्रूपम्।

अनिलात्तत्र गात्ररुक्तोदकम्पनम्।

कृष्णरूक्षारुणसिरानखविण्मूत्रनेत्रता॥९॥

शोफानाहास्यवैरस्यविड्भेदाः पार्श्वमूर्धरुक्।

स०-तत्र-तेषु पाण्डुरोगेषु मध्ये, वातात्पाण्डुरोगे गात्ररुगादयः स्युः।

पित्ताद्धरितपीताभसिरादित्वं ज्वरस्तमः॥१०॥

तृद्विदमूर्च्छाशीतेच्छा दौर्गन्ध्यं कटुवक्कता।

वर्चोभेदोऽम्लको दाहः

स०-पित्ताद्धरितपीताभसिरादित्वं(त्वादि) स्यात्।

कफाच्छुक्लसिरादिता॥११॥

तन्द्रा लवणवक्त्रत्वं रोमहर्षः स्वरक्षयः

कासश्छर्दिश्च

स०-कफाच्छुक्लसिरादिता[दि] स्यात्।

निचयान्मिश्रलिङ्गोऽतिदुःसहः॥१२॥

स०-निचयात्-सन्निपातात्, मिश्रलिङ्गः पाण्डुरोगः सोऽतिदुःसहो-घोरतमः।

मृत्कषायाऽनिलं पित्तमूषरा मधुरा कफम्।

दूषयित्वा रसादींश्च रौक्ष्याद्भुक्तं विरूक्ष्य च॥१३॥

स्रोतांस्यपक्वैवापूर्य कुर्याद्रुद्धा च पूर्ववत्।
पाण्डुरोगं ततः शूननाभिपादास्यमेहनः॥ १४॥
पुरीषं कृमिमन्मुञ्चेद्भिन्नं सासृक्कफं नरः।

स०-मृद्भक्षिता कषायरसा वातं दूषयित्वा पाण्डुरोगं कुर्यात्। ऊषरा-सक्षारमृत्तिका, पित्तं दूषयित्वा पाण्डुरोगं कुर्यात्। मधुरा मृत्तिका कफं दूषयित्वा पाण्डुरोगं कुर्यात्। तथा, रसादींश्च धातून् दूषयित्वा रौक्ष्याच्च हेतोर्भुक्तं विरूक्ष्य चेति। यतः स्वभावत एव मृत्तिका रूक्षा। तस्माद्भुक्तं विरूक्षयति। स्रोतांसि चापूर्य रुद्धाऽपक्वैव सती पाण्डुरोगं पूर्ववत् पित्तप्रधानाः कुपिता इत्यादिना न्यायेन कुर्यात्। मृत्तिकाया गुरुत्वात् पाकाभावः। अथवा अशब्दोऽत्रेषदर्थे। अलोमिका एडकेति यथा। तेन किञ्चित्पक्वेति गम्यते। ततः-तेन पाण्डुरोगेण, शूननाभ्यादिकः सन् कृम्यादियुतं पुरीषं मुञ्चेत्।

अथ प्रतिज्ञावाक्येऽनुक्तामपि कामलां तुल्यहेत्वादिकत्वात् प्रदर्शयन्नाह-

यः पाण्डुरोगी सेवेत पित्तलं तस्य कामलाम्॥ १५॥
कोष्ठशाखाश्रयां पित्तं दग्ध्वाऽसृङ्मांसमावहेत्।
हारिद्रनेत्रमूत्रत्वङ्नखवक्त्रशकृत्तया॥ १६॥
दाहाविपाकतृष्णावान् भेकाभो दुर्बलेन्द्रियः।

स०-यो नरः पाण्डुरोगी सन् पित्तलं-मरिचकाञ्चिकादिद्रव्यमत्यर्थं, सेवेत-उपयुङ्क्ते, तस्य-पाण्डुरोगिणः, पित्तं कर्तृ कामलामावहेत्। कीदृशीम्। कोष्ठशाखाश्रयाम्। कोष्ठो-महास्रोतः, शाखा-रक्तादयस्त्वक् च, इति तदुभयमाश्रयो यस्यास्ताम्, किं कृत्वा ? रक्तं मांसं च दग्ध्वा। कथम् ? हारिद्रनेत्रमूत्रत्वङ्नखवक्त्रशकृत्तया। तदा च पुरुषो दाहादिमान् मण्डूकच्छायो दुर्बलेन्द्रियश्च स्यात्। दुर्बलानि-स्वविषयेऽप्यशक्तानि, इन्द्रियाणि यस्य स एवम्।

किं पाण्डुरोगिण एव पित्तलान्यासेवमानस्य कामला भवेत्, उतापाण्डुरोगिणोऽपि ? इत्याह-

भवेत्पित्तोल्बणस्यासौ पाण्डुरोगादृतेऽपि च॥ १७॥

स०-पाण्डुरोगमन्तरेणापि पित्ताधिकस्य नरस्य पित्तलान्यासेवमानस्यासौ कोष्ठशाखाश्रया कामला स्यात्, न केवलं पाण्डुरोगिणः।

उपेक्षया च शोफाढ्या सा कृच्छ्रा कुम्भकामला।

स०-उपेक्षया-चिकित्सां विना, सैव-कामला, यदा शोफाढ्या-श्वयथुबहुला, स्यात्तदा कुम्भकामलेत्युच्यते। कृच्छ्रा-कृच्छ्रसाध्या।

हलीमकं लक्षयति-

हरितश्यावपीतत्वं पाण्डुरोगे यदा भवेत्॥ १८॥

वातपित्ताद्भ्रमस्तृष्णा स्त्रीष्वहर्षो मृदुर्ज्वरः।

तन्द्राबलानलभ्रंशो लोढरं तं हलीमकम्॥ १९॥

अलसं चेति शंसन्ति

स०-पाण्डुरोगे सति यदा हरितश्यावपीतता भ्रमादयश्च वातपित्तात्स्युः, अतश्च तं हलीमकं शंसन्ति, मुनय इति शेषः। तं च हलीमकं, लोढरं तथाऽलसं चाचक्षते।

तेषां पूर्वमुपद्रवाः।

शोफप्रधानाः कथिताः स एवातो निगद्यते॥ २०॥

इति पाण्डुरोगनिदानम्।

स०-तेषां-पाण्डुरोगप्रकाराणां, पूर्वमुपद्रवा यतः शोफप्रधानाः कथिताः। अतः-अस्माद्धेतोः, पाण्डुरोगनिदानादनन्तरं शोफ एव भण्यते, न विसर्पः। शोफः प्रधानः-प्रथमो, येषां त एवं कथिताः। क्वः ? इहैव। यथोक्तम् (श्लो. ६)-"शूनाक्षिकूटः" इत्यादि। तथा (श्लो. १४) -"शूननाभिपादास्यमेहनः" इति।

अथ शोफनिदानम्।

पित्तरक्तकफान्वायुर्दुष्टो दुष्टान् बहिःसिराः।
नीत्वा रुद्धगतिस्तैर्हि कुर्यात्त्वङ्मांससंश्रयम्॥२१॥
उत्सेधं संहतं शोफं तमाहुर्निचयादतः।
सर्वं

स०-बहिर्भूताः सिरा बहिःसिराः,-बाह्याः सिराः। वायुः पित्तरक्तकफान् कर्मभूतान् बहिः सिराः कर्मभूता नीत्वोत्सेधं कुर्यात्। नयतेर्द्विकर्मकत्वात् पित्तादयो बहिःसिराश्च कर्म। यथा,-अजां नयति ग्राममिति तेनायमर्थोऽवतिष्ठते-बहिःसिरासु पित्तादीन्नीत्वेति। किम्भूतो वायुः ? दुष्टः सन्,-कोपनैः कुपितः। किम्भूतमुत्सेधम् ? त्वक् च मांसं च त्वङ्मांसे, ते संश्रयः-आश्रयो, यस्य तम्। तैर्हीति हिशब्दोऽवधारणे। तैरेव-बहिःसिराः प्राप्तैः पित्तरक्तकफैः, रुद्धगतिः। अत एव संहतं-समन्ताद्धतं निश्चलमिव सम्पन्नं, उत्सेधम्। यतश्चैवं वातपित्तकफैः शोफः सञ्जायते, तस्मात्सर्वं शोफं निचयात्-दोषत्रयात्, आहुः।

ननु, एवं सतीदं विरुध्यते "दोषैः पृथग्द्वयैः सर्वैः" इति। अत आह-

हेतुविशेषैस्तु रूपभेदान्नवात्मकम्॥२२॥
दोषैः पृथग्द्वयैः सर्वैरभिघाताद्विषादपि।

स०-तुशब्दो विशेषार्थः। यद्यपि सर्वस्त्रिदोषजः शोफस्तथाऽपि हेतुविशेषैर्यो रूपभेदस्तस्मान्नवात्मकं शोफमाहुः। तथा हि-योऽयं सन्निपातः शोफहेतुरेष कदाचित्समं कृत्वा कुप्यति कदाचिद्विषमं कृत्वैकदोषवृद्धिस्वरूपतया। एवं च हेतुविशेषैर्यो लक्षणभेदस्तस्मान्नवप्रकारत्वं शोफस्य न्याय्यमेव। लक्षणभेदश्चैषां स्पष्ट एव। तथा चाभिघाताद्धेतोश्च यथावदन्यल्लक्षणं विषाद्धेतोरन्यल्लक्षणं तद्वत् पृथग्वातादेश्च

यथावदन्यत् द्वन्द्वजे चान्यत् सन्निपातजे चान्यदिति। एवं लक्षणविशेषान्नवात्मकमाहुः। उपलक्षणं चेदम्, चिकित्साविशेषादपि हि नवात्मक एव शोफः।

द्विधा वा निजमागन्तुं सर्वाहैकाङ्गजं च तम्॥२३॥
पृथून्नतग्रथिततताविशेषैश्च त्रिधा विदुः।

स०-अथवा निजागन्तुभेदेन द्विधा श्वयथुमाहुः। तथा, तं-शोफं, सर्वाङ्गजं-सर्वशरीरजं, एकाङ्गजं-एकावयवजं च, इति पुनर्द्विप्रकारमाहुः। पृथुश्चोन्नतश्च ग्रथितश्च तेषां भावः पृथून्नतग्रथितता, तया विशेषास्तैस्त्रिधा-त्रिप्रकारं, शोफं विदुः। विदुरिति "विद ज्ञाने" इत्यस्मादुसादेशः। पृथुत्वेन-विस्तीर्णकृतत्वेन विशेषेण, तथोन्नतत्वेन विशेषेण, तथा ग्रथितस्वरूपत्वेन विशेषेणेति योज्यम्।

सामान्यहेतुः शोफानां दोषजानां विशेषतः॥२४॥
व्याधिकर्मोपवासादिक्षीणस्य भजतो द्रुतम्।
अतिमात्रमथान्यस्य गुर्वम्लस्निग्धशीतलम्॥२५॥
लवणक्षारतीक्ष्णोष्णशाकाम्बु स्वप्नजागरम्।
मृद्वाम्यमांसवल्लूरमजीर्णश्रममैथुनम्॥२६॥
पदातेर्मार्गगमनं यानेन क्षोभिणाऽपि वा।
श्वासकासातिसारार्शोजठरप्रदरज्वराः॥२७॥
विषूच्यलसकच्छर्दिगर्भवीसर्पपाण्डवः।
अन्ये च मिथ्योपक्रान्तास्तैर्दोषा वक्षसि स्थिताः॥२८॥
ऊर्ध्वं शोफमधो बस्तौ मध्ये कुर्वन्ति मध्यगाः।
सर्वाङ्गगाः सर्वगतं प्रत्यङ्गेषु तदाश्रयाः॥२९॥

स०-वक्ष्यमाणो गुर्वभ्लस्निग्धादिको वर्गः [शोफानां-] श्वयथूनां निजानामागन्तूनां च, सामान्यहेतुः-उत्पत्तौ कारणम्। दोषजानां श्वयथूनां पुनरतिशयेन हेतुः, न तथाऽऽगन्तूनां, इति विशेषशब्देन द्योतयति। व्याधिकर्मोपवासादिभिः क्षीणस्य, व्याधिना-ज्वरादिना क्षीणस्य, तथा कर्मणा-पञ्चविधेन वमनविरेचननिरूहानुवासननस्याख्येन, तथोपवासेन, आदिग्रहणादन्येन च मार्गादिना क्षीणस्य, द्रुतं कृत्वा-सहसैव, गुर्वादिकं भजतः। अथेति समुच्चये। व्याध्यादिक्षीणलक्षणेभ्यः सकाशादन्यस्य स्वस्थादेरप्यतिमात्रं-मात्रामतिक्रम्य, भजतो दोषा वक्षसि स्थिता ऊर्ध्वं शोफं कुर्वन्ति, प्रकृतत्वाद्वक्षस ऊर्ध्वम्। बस्तौ स्थिता अधः शोफं कुर्वन्ति। मध्ये स्थिता दोषा मध्ये शोफं कुर्वन्ति। ग्राम्याणां-चटककुक्कुटादीनां, मांसं ग्राम्यमांसम्। वल्लूरं-शुष्कमांसम्। स्वप्नोऽत्राहःस्वप्नो जागरश्च रात्रिजागरो बोध्यः। यानेन-तुरगादिना, क्षोभिणा-शरीरसंरम्भजनकेन। तथा, श्वासादयः पाण्डुपर्यान्ता रोगाः प्राधान्येन। तथा, अन्येऽपि-श्वासकासादिव्यतिरिक्ता रोगाः, मिथ्योपक्रान्ताः-मिथ्योपचरिता अयथाशास्त्रमुपक्रान्ताः, शोफहेतवः। तैरपि दोषा वक्षसि स्थिता ऊर्ध्वं शोफं कुर्वन्ति। बस्तौ स्थिता अधो, मध्यगा मध्ये, सर्वाङ्गगाः सर्वगतं, प्रत्यङ्गेषु तदाश्रयाः, दोषाः शोफं कुर्वन्ति।

तत्पूर्वरूपं दवथुः सिरायामोऽङ्गगौरवम्।

स०-तस्य-श्वयथोः, पूर्वरूपं तत्पूर्वरूपम्। दवथुः-चक्षुरादिषु यस्तीव्र ऊश्मा स भण्यते। यदुक्तम्-"दवथुश्चक्षुरादिभ्यस्तीव्रमूष्मप्रवर्तनम्।" इति। तथा, सिरायामो-यत्र प्रदेशे श्वयथुरुद्भूषुस्तत्र सिराणां दैर्घ्यमिव। तथा, अङ्गगौरवं स्यात्।

वाताच्छोफश्चलो रूक्षः खररोमाऽरुणासितः॥३०॥
सङ्कोचस्पन्दहर्षार्तितोदभेदप्रसुप्तिमान्।
क्षिप्रोत्थानशमः शीघ्रमुन्नमेत्पीडितस्तनुः॥३१॥
स्निग्धोष्णमर्दनैः शाम्येद्रात्रावल्पो दिवा महान्।
त्वक् च सर्षपलिप्तेव तस्मिंश्चिमिचिमायते॥३२॥

स०-वाताच्छोफश्चलादिलक्षणः।

पीतरक्तासिताभासः पित्तादाताम्ररोमकृत्।

शीघ्रानुसारप्रशमो मध्ये प्राग्जायते तनुः॥३३॥

सतृड्ढाहज्वरस्वेददववक्लेदमदभ्रमः।

शीताभिलाषी विड्भेदी गन्धी स्पर्शासहो मृदुः॥३४॥

स०-पित्ताच्छोफः पीतरक्तासिताभासादिलक्षणः। स च मध्ये-मध्यप्रदेशे, प्राक्-पूर्वं, जायते। प्राग्ग्रहणं पश्चात्सकलेऽपि देहदेशे स्यादिति द्योतयति।

कण्डूमान् पाण्डुरोमत्वक्कठिनः शीतलो गुरुः।

स्निग्धः श्लक्ष्णः स्थिरः स्त्यानो निद्राच्छर्द्यग्निसादकृत्॥३५॥

आक्रान्तो नोन्नमेत्कृच्छ्रशमजन्मा निशाबलः।

स्रवेन्नासृक् चिरात्पिच्छां कुशशस्त्रादिविक्षतः॥३६॥

स्पर्शोष्णकाङ्क्षी च कफात्

स०-कफाच्छोफः कण्डूयुतादिलक्षणः स्यात्। तथा, आक्रान्तः-पीडितः सन्, वातिक इव नोन्नमेत्। तथा, कृच्छ्रे शमजन्मनी यस्य स एवम्। तथा, निशाबलो-रात्रावधिक इत्यर्थः। तथा, कुशशस्त्रादिभिर्विक्षतः स शोफो न रक्तं स्रवेत्। किन्तर्हि ? चिरेण पिच्छां-लसीकापरपर्यायां, स्रवेत्। तथा, स्पर्शाभिलाषी उष्णाभिलाषी च स्यात्।

यथास्वं द्वन्द्वजास्त्रयः।

सङ्करादेतुलिङ्गानाम्

स०-हेतवश्च लिङ्गानि च, तेषां सङ्करात्-सङ्कीर्णत्वेन, यथास्वं द्वन्द्वजास्त्रयः शोफाः, स्युरिति शेषः।

निचयान्निचयात्मकः॥३७॥

स०-निचयात्मको-दोषत्रयजः शोफो, निचयात्-हेतुलिङ्गनिचयात्, स्यात्।

अभिघातेन शस्त्रादिच्छेदभेदक्षतादिभिः।
हिमानिलोदध्यनिलैर्भल्लातकपिकच्छुजैः॥३८॥
रसैः शूकैश्च संस्पर्शाच्छ्वयथुः स्याद्विसर्पवान्।
भृशोष्मा लोहिताभासः प्रायशः पित्तलक्षणः॥३९॥

स०-तथा, शस्त्रादिच्छेदभेदक्षतादिभिर्यः शोफः सोऽभिघातेन, वेद्य इति शेषः। तथा, हिमेनानिलेन तथोदध्यनिलेन-सागरजेन वायुना, तथा रसैः शूकैश्च भल्लातकपिकच्छुजैः संस्पर्शाच्छ्वयथुर्विसर्पवान् भवेत्। स च भृशोष्मा लोहिताभासश्च बाहुल्येन च पित्तलक्षणः स्यात्। पित्तशोफस्य लक्षणं पित्तशोफलक्षणम्, पित्तशोफलक्षणमिव लक्षणं यस्य स पित्तलक्षणः। सप्तम्युपमानपूर्वस्येति बहुव्रीहिरुत्तरपदलोपश्च।

विषजः सविषप्राणिपरिसर्पणमूत्रणात्।
दंष्ट्रादन्तनखापातादविषप्राणिनामपि॥४०॥
विण्मूत्रशुक्रोपहतमलवद्वस्त्रसङ्करात्।
विषवृक्षानिलस्पर्शाद्गरयोगावचूर्णनात्॥४१॥
मृदुश्चलोऽवलम्बी च शीघ्रो दाहरुजाकरः।

स०-विषजः शोफः सविषाणां प्राणिनामङ्गे परिसर्पणात्-गमनात्, तथा तेषामेव मूत्रणात्। तथा, दंष्ट्रादन्तनखानामापातात् अविषप्राणिनामपि शोफः स्यात्। अपिशब्दान्न केवलं सविषप्राणिनाम्। तथा, विण्मूत्रशुक्रैरुपहतं-तत्स्पर्शाद्दूषितमप्रशस्तम्। विण्मूत्रशुक्रोपहतं च

तन्मलवच्च विण्मूत्रशुक्रोपहतमलवत्, तथाविधं च तद्वस्त्रं च, तस्य सङ्करः-संस्पर्शः, तस्मादपि शोफः स्यात्। तथा विषवृक्षाणामनिलस्तस्य संस्पर्शात्, गरयोगस्यावचूर्णनं-अवध्वंसनं, तस्माच्च मृद्वादिगुणयुक्तः श्वयथुः स्यात्।

नवोऽनुपद्रवः शोफः साध्योऽसाध्यः पुरेरितः॥४२॥

इति शोफनिदानम्।

स०-नवः-अचिरोत्पन्नः, तथाऽनुपद्रवः-उपद्रवरहितः, शोफः साध्यः। असाध्यः पुरा-विकृतिविज्ञानीये, ईरितः-अभिहितः। यथोक्तम्(हृ. शा. अ. ५।९२)-"अनेकोपद्रवयुतः पादाभ्यां प्रसृतो नरम्। नारीं शोफो मुखाद्धन्ति कुक्षिगुह्यादुभावपि॥" इति।

श्वयथुवद्दोषैर्दूष्यैश्च यतो विसर्पो भवति, अतस्तन्निदानं प्रकम्यते-

अथ विसर्पनिदानम्।

स्याद्विसर्पोऽभिघातान्तैर्दोषैर्दूष्यैश्च शोफवत्।

स०-विसर्पः सर्व एव शोफवत्। दोषैः-पृथग्वातपित्तकफैर्द्वयैः समस्तैस्तथाऽभिघातात्, एवमभिघातान्तैर्दोषैः शोफवद्विसर्पसम्भवः। दूष्यैरपि शोफवत्। एवं "पित्तरक्तकफान् वायुः" (श्लो. २१) इत्यादिरपि ग्रन्थोऽत्र योज्यः।

त्र्यधिष्ठानं च तं प्राहुर्बाह्यान्तरुभयाश्रयात्॥४३॥

यथोत्तरं च दुःसाध्याः

स०-तं च-विसर्पं, त्र्यधिष्ठानं प्राहुः, आत्रेयादय इति शेषः। [कस्मात् ?] बाह्यान्तरुभयाश्रयात्-पूर्वार्जितकर्मवशात् कदाचिद्बाह्याश्रयो विसर्पो जायते, बाह्य आश्रयो यस्य स तथा, एवं कदाचिदन्तराश्रयः, कदाचिदुभयाश्रयः, [तस्मात्]। ते च बाह्यान्तरुभयाश्रया विसर्पा यथोत्तरं दुःसाध्याः। दुःखेन साध्यन्त इति दुःसाध्याः।

तत्र दोषा यथायथम्।

प्रकोपणैः प्रकुपिता विशेषेण विदाहिभिः॥४४॥

देहे शीघ्रं विसर्पन्ति तेऽन्तरन्तःस्थिता बहिः।

बहिःस्था द्वितये द्विस्थाः

स०-तस्मिन् विसर्पे यथायथं प्रकोपणैः-तिक्तोषणादिभिः, प्रकुपिता विशेषेण पुनर्विदाहिभिरत्यर्थं कृत्वा प्रकुपिता देहे शीघ्रं-आश्वेव, विसर्पन्ति। तेऽन्तःस्थिता अन्तर्विसर्पन्ति। बहिःस्था दोषा बहिर्विसर्पन्ति। द्वितयेऽन्तर्बहीरूपे, द्विस्थाः-उभयस्थाः सन्तो, विसर्पन्ति।

विद्यात्तत्रान्तराश्रयम्॥४५॥

मर्मोपतापात्सम्मोहादयनानां विघट्टनात्।

तृष्णातियोगाद्वेगानां विषमं च प्रवर्तनात्॥४६॥

आशु चाग्निबलभ्रंशादतो बाह्यं विपर्ययात्।

स०-तत्र-तेषु त्रिषु विसर्पेषु मध्ये, अन्तराश्रयं विसर्पं मर्मोपतापादिभिर्विद्यात्। मर्माणां-हृदयादीनां, उपतापो-दुःखं, तस्मात्। तथा, सम्मोहात्-मूर्च्छोद्भवात्। अयनानां-कर्णनासादीनां, विघट्टनात्-विशेषेण चलनादतिशयेन परिस्फुरणादित्यर्थः। तथा, तृष्णाया अतियोगात्। तथा वेगानां-नानारूपाणां वेदनानां, विषमं कृत्वा-विच्छिद्य विच्छिद्य कृत्वा, प्रवर्तनात्। आशुच-शीघ्रमेव, अग्निबलयोर्भ्रंशात्-विनाशात्। अतो [विपर्ययात्-पूर्वोक्तान्तर्विसर्प] लक्षणविपर्ययात्, बाह्यं-बाह्याश्रयं, विसर्पं विद्यात्।

तत्र वातात्परीसर्पो वातज्वरसमव्यथः॥४७॥

शोफस्फुरणनिस्तोदभेदायामार्तिहर्षवान्।

स०-[तत्र-] तेषु विसर्पेषु मध्ये, वाताद्यो विसर्पः स वातज्वरतुल्यव्यथः स्यात् शोफादियुतश्च।

पित्ताद्द्रुतगतिः पित्तज्वरलिङ्गोऽतिलोहितः॥४८॥

स०-पित्ताद्विसर्पो द्रुतगतिः-शीघ्रव्यापी, तथा पित्तज्वरलिङ्गोऽतिलोहितश्च स्यात्। पित्तज्वरलिङ्गानीव लिङ्गानि यस्य, इति सप्तम्युपमानपूर्वस्येत्यादिना बहुव्रीहिरुत्तरपदलोपश्च।

कफात्कण्डूयुतः स्निग्धः कफज्वरसमानरुक्।

स०-कफाद्विसर्पः कण्डूमान् स्निग्धः कफज्वरतुल्यरुक् च। वातादिज्वरलक्षणं यथोक्तम् (हृ. नि. अ. २।११)-"वैषम्यं तत्रतत्राङ्गे तास्ताः स्युर्वेदनाश्चलाः।" इत्यादि।

स्वदोषलिङ्गैश्चीयन्ते सर्वे स्फोटैरुपेक्षिताः॥४९॥

ते पक्वभिन्नाः स्वं स्वं च बिभ्रति व्रणलक्षणम्।

स०-सर्वे च विसर्पा उपेक्षिताः-उपक्रमरहिताः, स्फोटैश्चीयन्ते-व्याप्यन्ते। किम्भूतैः ? स्वदोषलिङ्गैः-यथायथं स्वदोषलक्षणैः। ते च पक्वभिन्नाः स्वंस्वं-आत्मीयमात्मीयं दोषं(षजं), व्रणलक्षणं बिभ्रति-धारयन्ति। पूर्वं पक्वाः पश्चाद्भिन्नाः पक्वभिन्नाः, "पूर्वकाल" इत्यादिना समासः। "तत्र मारुतात्। श्यावः कृष्णोऽरुणः" (हृ. उ. अ. २५।५) इत्यादिग्रन्थनिर्दिष्टं व्रणलक्षणम्। "पित्तेन क्षिप्रजः" इत्यादिग्रन्थनिर्दिष्टम्। एवं कफादिलक्षणमपि बोध्यम्।

अधुना द्वन्द्वजं लक्षयति-

वातपित्ताज्ज्वरच्छर्दिमूर्च्छातीसारतृड्भ्रमैः॥५०॥
अस्थिभेदाग्निसदनतमकारोचकैर्युतः।
करोति सर्वमङ्गं च दीप्ताङ्गारावकीर्णवत्॥५१॥
यं यं देशं विसर्पश्च विसर्पति भवेत्स सः।
शान्ताङ्गारासितो नीलो रक्तो वाऽऽशु च चीयते॥५२॥
अग्निदग्ध इव स्फोटैः शीघ्रगत्वाद् द्रुतं च सः।
मर्मानुसारी वीसर्पः स्याद्वातोऽतिबलस्ततः॥५३॥
व्यथेताङ्गं हरेत्संज्ञां निद्रां च श्वासमीरयेत्।
हिध्मां च स गतोऽवस्थामीदृशीं लभते न ना॥५४॥
क्वचिच्छर्मारतिग्रस्तो भूमिशय्यासनादिषु।
चेष्टमानस्ततः क्लिष्टो मनोदेहश्रमोद्भवाम्॥५५॥
दुष्प्रबोधोऽश्नुते निद्रां सोऽग्निवीसर्प उच्यते।

स०-वातपित्ताद्विसर्पो ज्वरादिभिर्युतः सकलमङ्गं च दीप्ताङ्गारावकीर्णवत्-ज्वलिताङ्गारव्याप्तसदृशं करोति। यं यं च शरीरदेशं विसर्पो विसर्पति-प्रसरति, स स प्रदेशः शान्तागारवदसितो नीलो रक्तो वा भवेत्। तथा, सः-विसर्पो, द्रागेवाग्निदग्ध इव स्फोटैश्चीयते-व्याप्यते। स च विसर्पः शीघ्रगत्वात्-तत्स्वभाववशात्, मर्मानुसारी द्रुतं-त्वरितं कृत्वा, स्यात्। तत एव च वातोऽतिबलो-बलीयान्, अङ्गं-शरीरं, व्यथेत-पीडयेत्। संज्ञां-संविदं, हरेत्-नाशयेत्, निद्रां च हरेत्। श्वासमीरयेत्-कुर्यात्, तथा हिध्मां च। सः-विसर्पी, ना-पुरुषः, ईदृशीमवस्थां गतः-प्राप्तः, चेतोनवस्थालक्षणया-अरत्या, ग्रस्तः-अभिभूतो, न क्वचिद्भूमिशय्यासनादिषु शर्म-सुखं, लभते। अरतिग्रस्त इति हेतौ प्रथमा, अरतिग्रस्तत्वादित्यर्थः। एवं क्वचिदपि सुखालाभाद्भूम्यादिषु चेष्टमानः-परिलुठन्, ततः क्लिष्टो-मनसा कायेन च, मनोदेहश्रमोद्भवां-

तदुत्थां, निद्रामश्नुते। किम्भूतः ? दुष्प्रबोधः,-दुःखेन प्रबोधो-निद्रापगमो, यस्य स एवम्। एष चाम्याख्यो विसर्प उच्यते।

कफेन रुद्धः पवनो भित्त्वा तं बहुधा कफम्॥५६॥
रक्तं वा वृद्धरक्तस्य त्वक्सिरास्रावमांसगम्।
दूषयित्वा च दीर्घाणुवृत्तस्थूलखरात्मनाम्॥५७॥
ग्रन्थीनां कुरुते मालां रक्तानां तीव्ररुग्ज्वराम्।
श्वासकासातिसारास्यशोषहिध्मावमिभ्रमैः॥५८॥
मोहवैवर्ण्यमूर्छाङ्गभङ्गाग्निसदनैर्युताम्।
इत्ययं ग्रन्थिवीसर्पः कफमारुतकोपजः॥५९॥

स०-कफेन पवनो रुद्धस्तमेव-कफं, बहुधा भित्वा ग्रन्थीनां मालां कुरुते। रक्तं च वृद्धरक्तस्य नरस्य दूषयित्वा ग्रन्थीनां मालां कुरुते। किम्भूतं रक्तम् ? त्वक्सिरास्रावमांसगम्। किम्भूतानां ग्रन्थीनां ? दीर्घाणुवृत्तस्थूलखरस्वभावानां तथा रक्तवर्णानाम्। किम्भूताम्, मालां ? तीव्ररुग्ज्वराम्। तीव्रौ रुग्ज्वरौ यस्यास्ताम् तथा श्वासादिभिर्युताम्। इत्ययं-अनन्तरोक्तो, ग्रन्थवीसर्प उच्यते। कफवातकोपजश्चायं वेद्यः।

कफपित्ताज्ज्वरः स्तम्भो निद्रातन्द्राशिरोरुजः।
अङ्गावसादविक्षेपप्रलापारोचकभ्रमाः॥६०॥
मूर्च्छाग्निहानिर्भेदोऽस्थां पिपासेन्द्रियगौरवम्।
आमोपवेशनं लेपः स्रोतसां स च सर्पति॥६१॥
प्रायेणामाशये गृह्णन्नेकदेशं न चातिरुक्।
पिटकैरवकीर्णोऽतिपीतलोहितपाण्डुरैः॥६२॥
मेचकाभोऽसितः स्निग्धो मलिनः शोफवान् गुरुः।
गम्भीरपाकः प्राज्योष्मा स्पृष्टः क्लिन्नोऽवदीर्यते॥६३॥

पङ्कवच्छीर्णमांसश्च स्पष्टस्नायुसिरागणः।

शवगन्धिश्च वीसर्पं कर्दमाख्यमुशन्ति तम्॥ ६४॥

स०-कफपित्तात् कर्दमाख्यो जायते। तत्र ज्वरादयः स्युः। स च-विसर्पः, प्रायेण-बाहुल्येन, आमाशये-नाभिस्तनान्तरमध्ये, एकदेशं गृह्नन्-आक्रामन्, अनन्तरं देहं सर्पति-व्याप्नोति। न चातिरुक् स्यात्। तथा, पिटकैरवकीर्णो-व्याप्तः, स्यात्। किम्भूतैः ? अतिपीतलोहितपाण्डुरैः। तथा, मेचकाभादिकः स्यात्। मेचको-मयूरकण्ठसदृशो वर्णः। तं-तादृशं, विसर्पं कर्दमाख्यं-कर्दमसंज्ञं, उशन्ति, मुनय इति शेषः।

सर्वजो लक्षणैः सर्वैः सर्वधात्वतिसर्पणः।

स०-सर्वैस्त्रिभिर्दोषैर्जातः सर्वजः-सन्निपातोद्भवो, वीसर्पः सर्वैर्लक्षणैरुपलक्षितः। स च सर्वान् धातूनतिशयेन सर्पति सर्वधात्वतिसर्पणः स्यात्।

बाह्यहेतोः क्षतात्क्रुद्धः सरक्तं पित्तमीरयन्॥ ६५॥

विसर्पं मारुतः कुर्यात् कुलत्थसदृशैश्चितम्।

स्फोटैः शोफज्वररुजादाहाढ्यं श्यावलोहितम्॥ ६६॥

स०-मारुतो-वातः, क्षताद्बाह्यकारणात् क्रुद्धः सन् विसर्पं कुर्यात्। किं कुर्वन् ? पित्तं सह रक्तेन प्रेरयन्। तथा, स्फोटैः-पिटकैः, चित्तं-व्याप्तम्। किम्भूतैः ? कुलत्थसदृशैः। तथा, शोफादिभिराढ्यं-अतिशयेन युतम्। तथा, श्यावलोहितं-वर्णेन।

पृथग्दोषैस्त्रयः साध्या द्वन्द्वजाश्चानुपद्रवाः।

असाध्यो क्षतसर्वोत्थौ सर्वे चाक्रान्तमर्मकाः॥ ६७॥

शीर्णस्नायुसिरामांसाः प्रक्लिन्नाः शवगन्धयः॥ ६७ १/२॥

इति विसर्पनिदानम्।

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां तृतीये निदानस्थाने पाण्डुरोगशोफविसर्पनिदानं नाम त्रयोदशोऽध्यायः॥ १३॥

****

स०-पृथग्दोषैः-वातपित्तकफैः केवलैः, त्रयो विसर्पाः साधयितुं शक्याः। द्वन्द्वजाश्चानुपद्रवाः-कासवैवर्ण्यज्वरादिभिरुपद्रवैः (हृ. शा. अ. ५।९७) रहिताः, त्रयः साध्याः। क्षतसर्वोत्थौ द्वौ विसर्पावसाध्यौ, तथास्वभावत्वात्। सर्वे विसर्पाश्चाक्रान्तमर्मकाः-अभिभूतमर्मकाश्च, असाध्याः। तथा, शीर्णानि स्नायुसिरामांसानि यैस्तेऽप्यसाध्याः। तथा, प्रकर्षेण-अतिशयेन क्लिन्नाः, तथा शवगन्धयः-कुणपगन्धतुल्याः, ये तेऽप्यसाध्याः। शवस्येव गन्धो येषामिति "उपमानाच्च" इति गन्धस्येदादेशः।

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टाङ्गहृदयटीकायां सर्वाङ्गसुन्दराख्यायां तृतीये निदानस्थाने पाण्डुरोगशोफविसर्पनिदानं नाम त्रयोदशोऽध्यायः समाप्तः॥ १३ ॥

****

चतुर्दशोऽध्यायः।

विसर्पनिदानादनन्तरं तुल्यहेत्वादित्वात्कुष्ठनिदानमारभ्यते-

अथातः कुष्ठश्वित्रकृमिनिदानं व्याख्यास्यामः।
इति ह स्माहुरात्रेयादयो महर्षयः।

(गद्यसूत्रे॥२॥)

मिथ्याहारविहारेण विशेषेण विरोधिना।
साधुनिन्दावधान्यस्वहरणाद्यैश्च सेवितैः॥१॥
पाप्मभिः कर्मभिः सद्यः प्राक्तनैर्वोरिता मलाः।
सिराः प्रपद्य तिर्यग्गास्त्वग्लसीकासृगामिषम्॥२॥
दूषयन्ति श्लथीकृत्य निश्चरन्तस्ततो बहिः।
त्वचः कुर्वन्ति वैवर्ण्यं दुष्टाः कुष्ठमुशन्ति तत्॥३॥

स०-मिथ्याहारादिना तथा साधुनिन्दावधादिभिः पाप्मभिः कर्मभिः सद्यः सेवितैः-अनुष्ठितैः, प्राक्तनैर्वा-अन्यजन्माचरितैः। सेवितग्रहणेन सातत्यानुष्ठानं द्योतयति। तेन कदाचित्करणत्वमेषां न कुष्ठहेतुरिति गम्यते। तैस्तथाभूतैः कर्मभिर्मिथ्याहारादिना च ईरिताः-दुष्टाः, मलाः-वातपित्तकफाः, शिरास्तिर्यग्गामिनीः प्रपद्य-आश्रित्य, त्वग्लसीकासृगामिषं दूषयन्ति। तदेव च त्वगादिकं शिथिलीकृस्य ततः-अनन्तरं, बहिर्निश्चरन्तो-बाह्यदेशे प्रसरन्तः, त्वचो [यत्] वैवर्ण्यं कुर्वन्ति तत्कुष्ठमुशन्ति, मुनय इति शेषः।

कुतोऽस्य रोगस्य कुष्ठमिति संज्ञा ? इत्याह-

कालेनोपेक्षितं यस्मात्सर्वं कुष्णाति तद्वपुः।
प्रपद्य धातून्व्याप्यान्तः सर्वान् संक्लेद्य चावहेत्॥४॥
सस्वेदक्लेदसङ्कोथान् कृमीन् सूक्ष्मान् सुदारुणान्।
लोमत्वक्स्नायुधमनीतरुणास्थीनि यैः क्रमात्॥५॥
भक्षयेच्छ्वित्रमस्माच्च कुष्ठबाह्यमुदाहृतम्।

स०-यस्माद्धेतोरुपेक्षितं-अनुपक्रान्तं सत्, कालेन सर्वं वपुः-शरीरं, कृष्णाति तस्मात्तत् कुष्ठमित्युच्यते। तच्च कुष्ठं धातून् सर्वान् प्रपद्य-प्राप्य, अनन्तरमन्तर्व्याप्य-प्रकृतत्वात्तेषामेवान्तरं व्याप्य, तथा सर्वस्तानेव धातून् संक्लेद्य-क्लेदयित्वा, कृमीनावहेत्-कुर्यात्। किम्भूतान्? स्वेदादिभिर्युतान्। तथा, सूक्ष्मान्। तथा, सदारुणान्-दुस्चिकित्स्यान्। यैः-कृमिभिः, तत्कुष्ठं लोमादीन् भक्षयेत्। श्वित्रस्येदग्रूपता न विद्यते या कुष्ठस्योक्ता। अस्माच्च कारणाच्छ्वित्रं कुष्ठबाह्यमुदाहृतम्, कुष्ठाद्बाह्यं त्वग्गतमात्रमेवोक्तमित्यर्थः।

कुष्ठानि सप्तधा दोषैः पृथङ्मिश्रैः समागतैः।

स०- कुष्ठानि सप्तधा-सप्तप्रकाराणि। कथम्? इत्याह-पृथक्-वातपित्तकफैः। तैरेव च मिश्रैः-वातपित्ताभ्यां वातकफाभ्यां पित्तकफाभ्यां। तैरेव दोषैः समागतैः-सन्निपतितैः।

ननु, एवं सत्येकदोषजं द्विदोषजं कुष्ठम्, न सर्वं त्रिदोषजं स्यात्, इत्याशङ्क्याह-

सर्वेष्वपि त्रिदोषेषु व्यपदेशोऽधिकत्वतः।

स०-सर्वेष्वपि कुष्ठेषु त्रिदोषेषु-सन्निपातजेष्वपि, अधिकत्वेन व्यपदेशः। सन्निपातस्य समविषमात्मकत्वात्।

अत आह-

वातेन कुष्ठं कापालं, पित्तादौदुम्बरं, कफात्॥७॥

मण्डलाख्यं विचर्ची च, ऋक्षाख्यं वातपित्तजम्।

चर्मैककुष्ठकिटिभसिध्मालसविपादिकाः॥८॥

वातश्लेष्मोद्भवाः, श्लेष्मपित्ताद्दद्रुशतारुषी।

पुण्डरीकं सविस्फोटं पामा चर्मदलं तथा॥९॥

सर्वैः स्यात्काकणं

स०-[वातेन-] वातोल्बणेन सन्निपातेन, कापालं नाम कुष्ठं भवति। पित्तात्-पित्ताधिकात्सन्निपातात्, औदुम्बरं नाम कुष्ठं जायते। कफात्-कफाधिकात्सन्निपातात्, मण्डलाख्यां कुष्ठं जायते। तथा विचर्ची च, कफादेवेति चार्थः। ऋक्षाख्यं कुष्ठं वातपित्तजं-वातपित्तोल्बणात्सन्निपाताज्जातम्। एवमग्रेऽपि योज्यम्। चर्मैककुष्ठकिटिभसिध्मालसविपादिका वातश्लेष्मोद्भवाः। श्लेष्मपित्तात् दद्रुशतारुषी द्वे कुष्ठे। न केवलं दद्रु शतारुश्च श्लेष्मपित्तात्, यावत्पुण्डरीकं तथा विस्फोटस्तथा पामा तथा चर्मदलं जायते। सर्वैः-त्रिभिरेव समैर्दोषैः, काकणं नाम कुष्ठमुत्पद्यते। एवमेतान्यष्टादश कुष्ठानि भवन्ति।

पूर्वं त्रिकं दद्रु सकाकणम्।

पुण्डरीकर्क्षजिह्वे च महाकुष्ठानि सप्त तु॥१०॥

स०-पूर्वं त्रिकं-कापालोदुम्बरमण्डलाख्यं, तथा दद्रुः काकणं पुण्डरीकमृक्षजिह्वं चेति महाकुष्ठानि सप्त स्युः।

अतिश्लक्ष्णखरस्पर्शखेदास्वेदविवर्णताः।

दाहः कण्डूस्त्वचि स्वापस्तोदः कोठोन्नतिः श्रमः॥ ११॥

व्रणानामधिकं शूलं शीघ्रोत्पत्तिश्चिरस्थितः।

रूढानामपि रूक्षत्वं निमित्तेऽल्पेऽपि कोपनम्॥ १२॥

रोमहर्षोऽसृजः काष्ण्यं कुष्ठलक्षणमग्रजम्।

स०-अतिश्लक्ष्णादिकं कुष्ठलक्षणमग्रजं-प्राग्रूपमित्यर्थः।

अधुनैतेषां लक्षणान्याह-

कृष्णारुणकपालाभं रूक्षं सुप्तं खरं तनु॥ १३॥

विस्तृतासमपर्यन्तं हृषितैर्लोमभिश्चितम्।

तोदज्यमल्पकण्डूकं कापालं शीघ्रसर्पि च॥ १४॥

स०-कृष्णारुणकपालाभमित्यादिकं कापालस्य लक्षणम्।

पक्वोदुम्बरताम्रत्वग्रोम गौरसिराचितम्।

बहलं बहलक्लेदरक्तं दाहरुजाधिकम्॥ १५॥

आशूत्थानावदरणकृमि विद्यादुदुम्बरम्।

स०-पक्वोदुम्बरताम्रेत्यादिकमौदुम्बरस्य लक्षणम्।

स्थिरं स्त्यानं गुरु स्निग्धं श्वेतरक्तमनाशुगम्॥ १६॥

अन्योन्यसक्तमुत्सन्नं बहुकण्डूस्रुतिक्रिमि।

श्लक्ष्णपीताभपर्यन्तं मण्डलं परिमण्डलम्॥ १७॥

स०-स्थिरं स्त्यानमित्यादिकं मण्डलस्य लक्षणम्।

सकण्डूपिटिका श्यावा लसीकाढ्या विचर्चिका।

स०-सकण्डूपिटिकेत्यादिकं विचर्चिकाया लक्षणम्।

परुषं तनु रक्तान्तमन्तःश्यावं समुन्नतम्॥ १८॥
सतोददाहरुक्क्लेदं कर्कशैः पिटिकैश्चितम्।
ऋक्षजिह्वाकृति प्रोक्तमृक्षजिह्वं बहुक्रिमि॥ १९॥

स०-परुषमित्यादिकं ऋक्षजिह्वस्य लक्षणम्। ऋक्षजिह्वेव प्रकाशखरा आकृतिर्यस्य ऋक्षजिह्वस्य तथैवम्।

हस्तिचर्मखरस्पर्शं चर्म

स०-हस्तिचर्मवत् खरस्पर्शं चर्माख्यं कुष्ठम्।

एकाख्यं महाश्रयम्।
अस्वेदं मत्स्यशकलसन्निभम्

स०-एकसंज्ञं कुष्ठं महाश्रयं-विस्तीर्णाशयम्। तथा, अस्वेदं-स्वेदरहितम्। तथा, मत्स्यशकलसन्निभं-मत्स्यत्वङ्मण्डलसदृशम्। सुश्रुते त्वेककुष्ठस्यैवं लक्षणमभ्यधायि (नि. अ. ५। ९)-"कृत्स्नो देहो यस्य रक्तोऽरुणो वा तदेकाख्यं कुष्ठमाहुः सुकष्टम्।" इति। खरनादेऽप्युक्तम्-"महदस्वेदनं मत्स्यशकलाकारमेकजम्।" इति ।

किटिभं पुनः॥२०॥

रूक्षं किणखरस्पर्शं कण्डूमत्परुषासितम्।

स०-किटिभं तु रूक्षं किणखरस्पर्शं कण्डूमत्परुषासितम्।

सिध्मं रूक्षं बहिः स्निग्धमन्तर्घृष्टं रजः किरेत्॥२१॥

श्लक्ष्णस्पर्शं तनु श्वेतताम्रं दौग्धिकपुष्पवत्।

प्रायेण चोर्ध्वकाये स्यात्

स०-सिध्मं नाम कुष्ठं बही रूक्षम्, अन्तः स्निग्धम्, घृष्टं सद्रजः किरेत्-क्षिपेत्। तथा श्लक्ष्णस्पर्शम्। तथा तनु। वर्णेन श्वेतताम्रम्, दौग्धिकपुष्पवत्-अलाबुकुसुमाभम्। तच्च प्रायेण-बाहुल्येन, ऊर्ध्वकाये स्यात्। खरनादेऽप्युक्तम्-"अलाबुपुष्पवत्सिध्मं घृष्टं यच्चोद्गमेद्रजः।" इति।

गण्डैः कण्डूयुतैश्चितम्॥२२॥

रक्तैरलसकम्

स०-अलसकं नाम कुष्ठं गण्डै रक्तवर्णैः कण्डूयुतैश्च व्याप्तं भवेत्।

पाणिपाददार्यो विपादिकाः।

तीव्रार्त्यो मन्दकण्ड्वश्च सरागपिटिकाचिताः॥२३॥

स०-विपादिकाः पाणिपाददार्यः स्युः। तथा, तीव्रार्त्यः-अत्यन्तपीडया युताः। तथा, मन्दकण्ड्वः-अल्पखर्जूकाः। तथा, सरागपिटिकाचिताश्च। पाणिपादौ दारयन्तीति कर्मण्यणतान्ङीप्।

दीर्घप्रताना दूर्वावदतसीकुसुमच्छविः।

उत्सन्नमण्डला दद्रूः कण्डूमत्यनुषङ्गिणी॥२४॥

स०-दूर्वावद्दीर्घप्रताना दद्रूः। तथा, अतसीपुष्पाभा। तथा, उत्सन्नमण्डला च। तथा, कण्डूमती। तथा, अनुषङ्गिणी-प्रसक्तानुप्रसक्त्या संश्लेषवती शरीरमनुधावती।

स्थूलमूलं सदाहार्तिं रक्तश्यावं बहुव्रणम्।

शतारुः क्लेदजन्त्वाढ्यं प्रायशः पर्वजन्म च॥२५॥

स०-शतारुर्नाम कुष्ठं स्थूलमूलादिलक्षणम्, यावत् प्रायशः पर्वजन्म चेति।

रक्तान्तमन्तरा पाण्डु कण्डूदाहरुजान्वितम्।

सोत्सेधमाचितं रक्तैः पद्मपत्रमिवांशुभिः॥२६॥

घनभूरिलसीकासृक्प्रायमाशु विभेदि च।

पुण्डरीकम्

स०-पुण्डरीकं नाम कुष्ठं रक्तपर्यन्तम्। तथा, अन्तरा-मध्ये, पाण्डु। तथा, कण्डूदाहरुजायुतम्। तथा, उन्नतियुक्तम्। तथा, रक्तैरंशुभिः-सूक्ष्मरेखाभिः, आचितं-व्याप्तं, पद्मपत्रमिव। तथा, घनभूरिलसीकासृक्प्रायम्। आशु च विभेदि।

तनुत्वग्भिश्चितं स्फोटैः सितारुणैः॥२७॥

विस्फोटम्

स०-विस्फोटं नाम कुष्ठं तनुत्वग्भिः स्फोटैश्चितं-व्याप्तम्। किम्भूतैः ? सितारुणैः-श्वेतलोहितैः।

पिटिकाः पामा कण्डूक्लेदरुजाधिकाः।

सूक्ष्माः श्यावारुणा बह्व्यः प्रायः स्फिक्पणिकूर्परे॥२८॥

स०-पिटिकाः कण्डूक्लेदरुजाधिकाः पामेत्युच्यते। किम्भूताः ? सूक्ष्माः श्यावारुणाः बह्व्यश्च। प्रायो-बाहुल्येन, सा च पामा स्फिजोः पाण्योः कूर्परयोश्च स्यात्।

सस्फोटमस्पर्शसहं कण्डूषातोददाहवत्।

रक्तं दलच्चर्मदलम्

स०-चर्मदलं नाम कुष्ठं स्फोटवत् तथा स्पर्शाक्षमम्। तथा, कण्ड्वादियुतम्। तथा, रक्तं-वर्णेन। तथा दलत्-स्फुटत्, स्यात्।

काकणं तीव्रदाहरुक्॥२९॥

पूर्वं रक्तं च कृष्णं च काकणन्तीफलोपमम्।

कुष्ठलिङ्गैर्युतं सर्वैर्नैकवर्णं ततो भवेत्॥३०॥

स०-काकणं नाम कुष्ठं तीव्रदाहरुक्। तथा पूर्वं-प्रथमं, रक्तं तथा कृष्णं काकणन्तीफलोपमं-गुञ्जाफलसदृशम्। ततः-अनन्तरं, सर्वैः कुष्ठलिङ्गैर्युतम्। नैकवर्णं-अपि तु श्वेतपीतादिवर्णमपि स्यादित्यर्थः। सुश्रुते तु मण्डलशतारुर्विपादिकालसकचर्मदलविश्फोटाख्यानि नोदितानि। स्थूलारुष्कमहाकुष्ठपरीसर्वविसर्परकसारुणाख्यानि तत्रोक्तानि। एवं च तल्लक्षणम् (नि. अ. ५। ८) -"यत्र स्थूलमूलान्यरूंषि जायन्ते सन्धिषूग्राणि तत् स्थूलारुष्कं कुष्ठम्। उत्पद्यन्ते सर्वदेहे महाख्यं त्वक्सङ्कोचस्वापतोदाङ्गसादाः। यस्मिन् दीर्घाः स्फोटिकाः स्रावत्यः संसर्पेयुस्तं परीसर्पमाहुः॥तुल्यः सर्पेद्यो विसर्पेण शीघ्रं त्वग्रक्तादीन्व्याप्य स स्याद्विसर्पः। कृत्स्ने देहे स्फोटिकाः स्रावहीनाः कण्डूप्राया रक्तसास्ताः प्रदिष्टाः। अरुणानि तनूनि विसर्पिणि तापयुतान्यरुणानि।" इति। तदेतेषु कुष्ठमेदेषु यथा नामविपर्ययस्तथा लक्षणविपर्ययोऽपि। किन्त्वेतेऽपि कुष्ठभेदा दृश्यन्ते एव, इत्येतदपि लक्षणमादरणीयमेवेति मन्यामहेऽधिकं कुष्ठेषु, इत्यादि।

कुष्ठेषु त्रिदोषजेषु सत्सु, इदं वाताधिकं कुष्ठमिदं पित्ताधिकं कुष्ठमिदं कफाधिकं कुष्ठमिति कथं ज्ञातव्यम्? इत्याह-

दोषभेदीयविहितैरादिशेल्लिङ्गकर्मभिः।
कुष्ठेषु दोषोल्बणताम्

स०-कुष्ठेषु दोषोल्बणतां-दोषाधिक्यं, दोषभेदीयविहितयथायथं लिङ्गकर्मभिरादिशेत्। लिङ्गानि च तानि कर्माणि च लिङ्गकर्माणि। यथा-वायोः स्रंसादीनि, पित्तस्य दाहादीनि, श्लेष्मणः स्नेहकाठिन्यादीनि, यथायथ्मात्मीयैरेव कर्मभिर्यतस्तेषां लिङ्गं लक्ष्यते ततस्तेषां दोषाणां कर्माण्येव लिङ्गान्युच्यन्ते। अत एव च स्रंसादीनि कर्माणि दोषाणामुक्त्वाऽनन्तरमिदमुवाच (हृ. सू. अ. १२।५४)-"इत्यशेषामयव्यापि यदुक्तं दोषलक्षणम्। दर्शनाद्यैरवहितस्त-त्सम्यगुपलक्षयेत्॥" इति।

सर्वदोषोल्बणं त्यजेत्॥३१॥
रिष्टोक्तं यच्च यच्चास्थिमज्जशुक्रसमाश्रयम्।

स०-सर्वदोषोल्बणं-सन्निपातजं, कुष्ठं त्यजेत्-न चिकित्सेत्। रिष्टोक्तमिति यच्च विकृतिविज्ञानीये कथितं (हृ. शा. अ. ५।९८)-"कुष्ठं विशीर्यमाणाङ्गं" इत्यादि, तच्च नोपक्रमेत्। यच्च कुष्ठमस्थिमज्जशुक्रसमाश्रयं तच्च त्यजेत्।

याप्यं मेदोगतम्
स०-मेदोगतं कुष्ठं याप्यं-पथ्यादिभिर्यापयितुं शक्यम्।

कृच्छ्रं पित्तद्वन्द्वास्रमांसगम्॥३२॥
स०-पित्तस्य द्वन्द्वं पित्तद्वन्द्वम्। पित्तद्वन्द्वजं तथा रक्तगं मांसगं च कुष्ठं कृच्छ्रं-कृच्छ्रसाध्यम्।

अकृच्छ्रं कफवाताढ्यं त्वक्स्थमेकमलं च यत्।

स०-कफवाताढ्यमकृच्छ्रं-सुखसाध्यम्। तथा त्वक्स्थं, तथा एकदोषाधिकं च यत्कुष्ठं तच्च सुखसाध्यम्।

तत्र त्वचि स्थिते कुष्ठे तोदवैवर्ण्यरूक्षताः॥३३॥

स्वेदस्वापश्चयथवः शोणिते, पिशिते पुनः।

पाणिपादाश्रिताः स्फोटाः क्लेदः सन्धिषु चाधिकम्॥३४॥

कौण्यं गतिक्षयोऽङ्गानां दलनं स्याच्च मेदसि।

नासाभङ्गोऽस्थिमज्जस्थे नेत्ररागः स्वरक्षयः॥३५॥

क्षते च कृमयः, शुक्रे स्वदारापत्यबाधनम्।

स०-तत्र-तेषु कुष्ठेषु मध्ये, त्वचि प्राप्ते कुष्ठे तोदादयः स्युः। रक्तस्थे कुष्ठे स्वेदाद्याः स्युः। मांसस्थे कुष्ठे पाणिपादाश्रिताः स्फोटाः स्युः, सन्धिषु चातिशयेन क्लेदो भवति। मेदसि स्थिते कुष्ठे कौण्यं-कुणिता, तथा गतिक्षयः, तथाऽङ्गानां दलनं-छेदनमिव, स्यात्। अस्थिमज्जस्थे कुष्ठे नासायाः-घ्राणस्य भङ्गः, तथा नेत्रयो रागः स्वरस्य च क्षयः स्यात्, क्षते च कृमयः स्युः। शुक्रस्थे कुष्ठे दारणामपत्यानां च बाधनं-उपद्रवैः स्वेदादिभिः पीडनं स्यात्।

यथापूर्वं च सर्वाणि स्युर्लिङ्गान्यसृगादिषु॥३६॥

इति कुष्ठनिदानम्।

स०-असृगादिषु धातुषु कुष्ठाक्रान्तदेहानां नराणां यानि लिङ्गान्युक्तानि तानि यथापूर्वं स्युः। यथा-स्वेदादीनि रक्तस्थे कथितानि पाण्याद्याश्रिताः स्फोटादयश्च मांसस्थे स्युः। एवं मेदःप्रभृतिषु योज्यम्। एवं च स्वेदस्वापादीनि सर्वाण्यपि शुक्रस्थे कुष्ठे दाराणामपत्यानां च स्युरिति यथापूर्वंशब्दस्यार्थः।

कुष्ठनिदानादनन्तरं श्वित्रस्योच्यते। कुष्ठश्वित्रयोरेककारणत्वात्। अत एवाह-

अथ श्वित्रनिदानम्।

कुष्ठैकसम्भवं श्वित्रं किलासं दारुणं च तत्।
निर्दिष्टमपरिस्रावि त्रिधातूद्भवसंश्रयम्॥ ३७॥

स०-कुष्ठानामेकः-समानः, सम्भवो यस्य तच्छ्वित्रं कुष्ठैकसम्भवं भवति। किलासं दारुणं च तन्निर्दिष्टम्, न केवलं श्वित्रमिति। तच्चापरिस्रावि-न कुष्ठवत् स्रवति। उद्भवो-जन्म, संश्रयः-आश्रयः, उद्भवश्च संश्रयश्चोद्भवसंश्रयौ, धातुशब्देनोभयं परिगृह्यते, वातादयस्त्रयो दोषास्तथा रक्तादयस्त्रयो धातवः, धातवश्च धातवश्च धातवः, त्रयो धातवो यथाक्रममुद्भवसंश्रयौ यस्य तत् त्रिधातूद्भवसंश्रयम्।

वाताद्रूक्षारुणं, पित्तात्ताम्रं कमलपत्रवत्।
सदाहं रोमविध्वंसि, कफाच्छ्वेतं घनं गुरु॥ ३८॥
सकण्डु च, क्रमाद्रक्तमांसमेदःसु चादिशेत्।

स०-वाताद्रूक्षारुणं श्वित्रं स्यात्। पित्तात् कमलपत्रमिव ताम्रं वर्णेन, तथा सदाहम्, तथा रोमविध्वंसि-रोमशातनस्वभावम्। कफाच्छ्वेतम्, तथा घनम्, तथा गुरु-अङ्गेनानुभूयते, तथा सह कण्ड्वा वर्तत इति सकण्डु। क्रमात्-यथाक्रमं, वाताद्युद्भवं श्वित्रं रक्तमांसमेदःसु चादिशेत्। तत्र वातोद्भवं श्वित्रं रक्ताश्रयम्। पित्तोद्भवं मांसाश्रयम्। कफोद्भवं मेदोधात्वाश्रयमिति क्रमशब्दस्यार्थः।

वर्णेनैवेदृगुभयं कृच्छ्रं तच्चोत्तरोत्तरम्॥ ३९॥

स०-एवेति चार्थे। उभयं-दोषोद्भवं रक्ताद्याश्रयं श्वित्रं, वर्णेन चेदृक्-अरुणं ताम्रं श्वेतं यथाक्रमम्, न पुनर्वाताद्युद्भवत्वदन्यवर्णं रक्तादिसंश्रयत्वादन्यवर्णमित्यर्थः। तच्च-श्वित्रं

वाताद्युद्भवं रक्तादिसंश्रयं च, उत्तरोत्तरं कृच्छ्रसाध्यमादिशेदिति प्रकृतम्। रक्ताश्रयाद्वातजात्कृच्छ्रात् मांसाश्रयं पित्तजं कृच्छ्रतरम्। ततो मेदःसंश्रितं कफजं कृच्छ्रतममिति।

अधुना साध्यासाध्यविभागार्थमाह-

अशुक्ररोमाबहलमसंसृष्टं मिथो नवम्।
अनग्निदग्धजं साध्यं श्वित्रं, वर्ज्यमतोऽन्यथा॥४०॥
गुह्यपाणितलौष्ठेषु जातमप्यचिरन्तनम्।

स०-अशुक्ररोम यच्छित्रं, तथा अबहलं-अघनं, तथा मिथः-परस्परं, असंसृष्टं-अमिलितं, तथा नवं-अवर्षातिक्रान्तं, तथाऽनग्निदग्धजं-अग्निदग्धजं यन्न भवति, तच्च साध्यम्। वर्ज्यमतोऽन्यथा-शुक्ररोम श्वित्रं, तथा बहलं, तथा परस्परसंसृष्टं, तथा चिरकालोत्पन्नमग्निदग्धजं च, तच्चासाध्यम्। गुह्यपाणितलौष्ठेषु जातमचिरन्तनमप्यचिन्त्यस्वभावत्वेन वर्ज्यम्।

स्पर्शैकाहारशय्यादिसेवनात् प्रायशो गदाः॥४१॥
सर्वे सञ्चारिणो, नेत्रत्वग्विकारा विशेषतः।

इति श्वित्रनिदानम्।

स०-सर्वे रोगाः प्रायशो-बाहुल्येन, सञ्चारिणः-सञ्चरणशीलाः। कुतः? एके च त आहारशय्यादयश्चैकाहारशय्यादयः, आदिशब्देनासनादीनां ग्रहणम्, स्पर्शः-संश्लेषः, स्पर्शश्च एकाहारशय्यादयश्च, तेषां सेवनं-भजनं, तस्मात्। नेत्रे च त्वक् च नेत्रत्वक्, तत्र विकाराः-गदाः, ते विशेषेण सञ्चारिणः।

अधुना क्रमप्राप्तान् कृमीनधिकृत्याह-

अथ कृमिनिदानम्।

कृमयस्तु द्विधा प्रोक्ता बाह्याभ्यन्तरभेदतः॥४२॥

स०-कृमयो द्विधा प्रोक्ताः, मुनिभिरिति शेषः। तुरवधारणे, द्विधैवेत्यर्थः। कथम्? इत्याह- बाह्याभ्यन्तरमेदतः। एके बाह्या ये केशवस्त्रादिजा यूकालिक्षादयः। अन्ये चान्तराः, यथा- अन्त्रादादयः।

जन्मभेदेन चतुष्प्रकाराः। कथम्? इत्याह-

बहिर्मलकफासृग्विड्जन्मभेदाच्चतुर्विधाः।

स०-बहिर्मलजन्मानः केशवस्त्रमलेभ्यः शरीरबाह्येभ्य उत्पन्नत्वात्, तथा कफजन्मानो रक्तजन्मानो विड्जन्मानश्चेति चतुर्विधाः। विट्-पुरीषम्।

नामतो विंशतिविधाः

स०-नामतो-नामभेदात्, कृमयो विंशतिप्रकाराः।

बाह्यास्तत्रामृजोद्भवाः॥४३॥

तिलप्रमाणसंस्थानवर्णाः केशाम्बराश्रयाः।

बहुपादाश्च सूक्ष्माश्च यूका लिक्षाश्च नामतः॥४४॥

द्विधा ते कोठपिटिकाकण्डूगण्डान् प्रकुर्वते।

स०-तत्र-तेषु बाह्याभ्यन्तरेषु कृमिषु मध्ये, अमृजोद्भवाः-बाह्यमलरूपेणोत्पन्नाः, बाह्याः। ते च तिलानामिव प्रमाणसंस्थानवर्णा येषां त एवम्। केशा [अम्बरं-] वस्त्रं चाश्रयो येषां त एवम्। तथा बहुपादाः सूक्ष्माश्च। नामतो-नाम्ना, यूका लिक्षाश्चेति द्विधा। ते च कोठादीन् विदधति।

कुष्ठैकहेतवोऽन्तर्जाः

स०-अन्तर्जाः-अन्तराः कृमयः, कुष्ठैकहेतवः कुष्ठेन सहैकः-तुल्यो, हेतुः-निदानं मिथ्याहारादिकं, येषां त एवम्।

श्लेष्मजास्तेषु चाधिकम्॥४५॥

मधुरान्नगुडक्षीरदधिसक्तुनवौदनैः।

स०-तेषु-अन्तर्जेषु कृमिषु मध्ये, श्लेष्मजा अधिकं-अतिशयेन, मधुरान्नादिभिः स्युः।

रक्तजानां निदानविशेषो वक्ष्यमाण इति पुरीषोत्थांस्ता(त्थानां ता)वदाह-

शकृज्जा बहुविड्वान्यपर्णशाकोलकादिभिः॥४६॥

स०-शकृज्जाः शकृदुद्भूताः, ते कुष्ठैकहेतुसामान्येऽप्यधिकं बहुविड्वान्यैः-यवमाषादिभिः, बहुविड्भिरेव पर्णशाकैः-पालङ्क्यादिभिः, तथोलकादिभिः। उलकः-स्वेदपर्यायः। अपरे तु "उलुकादिभिः" इति जगुः। उलुकं-हरितावस्थं शिम्बीधान्यमिति व्याचक्षते च।

कफादामाशये जाता वृद्धाः सर्पन्ति सर्वतः।

पृथुब्रघ्ननिभाः केचित् केचिद्गण्डूपदोपमाः॥४७॥

रूढधान्याङ्कुराकारास्तनुदीर्घास्तथाऽणवः।

श्वेतास्ताम्रावभासाश्च नामतः सप्तधा तु ते॥४८॥

अन्त्रादा उदरावेष्टा हृदयादा महाकुहाः।

कुरवो दर्भकुसुमाः सुगन्धास्ते च कुर्वते॥४९॥

हृल्लासमास्यस्रवणमविपाकमरोचकम्।

मूर्च्छाच्छर्दिज्वरानाहकार्श्यक्षवथुपीनसान्॥५०॥

स०-कफादामाशये जाताः-न पक्काशये। तत्र हि पृथगध्येष्यते (श्लो. ५३)-"पक्काशये पुरीषोत्थाः" इति। ते च वृद्धाः सन्तः सर्वतः-सर्वस्मिन् शरीरे, सर्पन्ति-प्रसरन्ति। सर्वत इति "आद्यादित्वात्(दिभ्यः) " तसिः। पृथुब्रघ्ननिभा इत्यादिना संस्थानकथनम्। श्वेता इत्यादिना वर्णकथनम्। नामतो-नाम्ना च, ते सप्तधा-सप्तप्रकाराः। तुश्चार्थे। तान्येव सप्त नामान्याह-अन्त्रादा इत्यादिना। अन्त्राण्यदन्तीत्यन्त्रादाः, इत्यादीन्यर्थानुगतानि नामानि। कानिचित् यादृच्छिकानि कुरव इत्यादीनि। ते च-कफजाः कृमयो, हृल्लासादिकं कुर्वन्ति।

अधुना रक्तजानाह-

रक्तवाहिसिरोत्थाना रक्तजा जन्तवोऽणवः।

अपादा वृत्तताम्राश्च सौक्ष्म्यात्केचिददर्शनाः॥५१॥

केशादा लोमविध्वंसा लोमद्वीपा उदुम्बराः।

षट् ते कुष्ठैककर्माणः सहसौरसमातरः॥५२॥

स०-रक्तजाः कृमयो रक्तवाहिसिरोत्थानाः स्युः। तथा, अपादा वृत्तास्ताम्रवर्णाश्च। सौक्ष्म्यात्-सूक्ष्मत्वात्कारणात्, केचिददर्शनाः-प्रत्यक्षप्रमाणासमधिगम्याः कार्येणैवानुमीयन्ते। तेषां नामान्याह-केशादा लोमविध्वंसा लोमविध्वंसा लोमद्वीपा उदुम्बरा इति। तथा सह सौरसमातृभ्याम् वर्तन्त इति सहसौरसमातरः। सौरसमातृसंज्ञं नामद्वयम्। एवं षडेते रक्तजाः

कृमयः। अन्ये त्वेवं पठन्ति "सहजा रसमातरः " इति। सह शरीरेण जायन्त इति सहजाः, रसो माता-जननी, येषां तत्प्रभवत्वात्ते रसमातर इति। कुष्ठेन सहैकं कर्म-रोमहर्षकण्डूतोदादिकं केशलोमध्वंसादिकं त्वक्सिरास्नायुमांसतरुणास्थिभक्षणं वा, येषां त एवम्।

पक्वाशये पुरीषोत्था जायन्तेऽधोविसर्पिणः।

वृद्धाः सन्तो भवेयुश्च ते यदाऽऽमाशयोन्मुखाः॥५३॥

तदाऽस्योद्गारनिःश्वासा विड्गन्धानुविधायिनः।

पृथुवृत्ततनुस्थूलाः श्यावपीतसितासिताः॥५४॥

ते पञ्च नाम्ना कृमयः ककेरुकमकेरुकाः।

सौसुरादाः सुलूनाख्या लेलिहा जनयन्ति च॥५५॥

विड्भेदशूलविष्टम्भकार्श्यपारुष्यपाण्डुताः।

रोमहर्षाग्निसदनगुदकण्डूर्विनिर्गमात्॥५६॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां तृतीये निदानस्थाने कुष्ठश्वित्रकृमिनिदानं नाम चतुर्दशोऽध्यायः॥१४॥

****

स०-पुरीषोत्थाः पक्वाशय एव जायन्ते। पुरीषस्य पक्वाशयस्थत्वात्। ते चाधोविसर्पिणः स्युः-नोर्ध्वगाः। वृद्धाः सन्तो-वृद्धिं गताः, यदाऽऽमाशयोन्मुखास्ते स्युस्तदाऽस्य-कृमिमतो रोगिणः, उद्गारनिःश्वासा विड्गन्धानुविधायिनः-पुरीषगन्धानुकारिणो, भवेयुः। तथा ते पृथुवृत्ततनुस्थूलाः संस्थानेन स्युः, श्यावपीतसितासिता वर्णेन, तथा नाम्ना पञ्च सङ्ख्या। तान्येव नामान्याह-ककेरुकेत्यादिना। ते च विनिर्गमाद्धेतोर्विड्भेदादीन् जनयन्ति।

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टाङ्गहृदयटीकायां सर्वाङ्गसुन्दराख्यायां तृतीये निदानस्थाने कुष्ठश्वित्रकृमिनिदानं नाम चतुर्दशोऽध्यायः समाप्तः॥१४॥

****

पञ्चदशोऽध्यायः।

कुष्ठनिदानादनन्तरं वातव्याधिनिदानमारभ्यते, वातरोगाणां कुष्ठवद्बहुप्रकारत्वाद्विविधदुःखदायित्वाच्च। इत्यत आह-

अथातो वातव्याधिनिदानं व्याख्यास्यामः।

इति ह स्माहुरात्रेयादयो महर्षयः।

(गद्यसूत्रे॥२॥)

सर्वार्थानर्थकरणे विश्वस्यास्यैककारणम्।

अदुष्टदुष्टः पवनः, शरीरस्य विशेषतः॥१॥

स०-अर्थाश्चानर्थाश्चार्थानर्थाः-शुभाशुभाः। सर्वे च तेऽर्थानर्थाश्च सर्वार्थानर्थाः, तेषां करणं-निवृत्तिः, तस्मिन्। अस्य विश्वस्य-जगतः, एकं-प्रधानं, कारणं वातः। किम्भूतः ? अदुष्टदुष्टः, यथाक्रमम्,-अदुष्टः सर्वार्थकरणे-जगत्स्थितिलक्षणे, वायुः प्रधानं कारणम्। सर्वानर्थकरणे-जगद्विनाशलक्षणे, दुष्टः पवनः प्रधानो हेतुः। शरीरस्य पुनर्विशेषतः-अतिशयेन, अर्थानर्थकरणे प्रधानं कारणमिति शेषः। पञ्चधात्वं गतेन प्राणादितया शरीरजननाद्धारणाच्च। अतस्तद्दुष्टौ यतितव्यमिति सम्बन्धः।

कथं वायुः कारणमित्यवगम्यते ? इत्याह-

स विश्वकर्मा विश्वात्मा विश्वरूपः प्रजापतिः।

स्रष्टा धाता विभुर्विष्णुः संहर्ता मृत्युरन्तकः॥२॥

तद्दुष्टौ प्रयत्नेन यतितव्यमतः सदा।

स०-यतोऽसौ वायुर्विश्वकर्मा, विश्वानि-शरीरजननवर्धनधारणभञ्जनशोषणादीन्यर्थानर्थकरणानि, कर्माणि यस्य स विश्वकर्मा। कस्माद्विश्वकर्मा? इत्याह-विश्वात्मा, विश्वेषां-शुभाशुभानां, आत्मा-हेतुः। हेत्वर्थोऽत्रात्मशब्दः। ननु, विश्वात्मेति कथं ज्ञायते? इत्याह-विश्वरूप इति। यतो विश्वरूपं-बाह्याध्यात्मिकाख्यं, यस्य स एवम्। तथा, प्रजापतिः-प्रजानां पालकः। तथा, स्रष्टा-प्रकृतत्वाद्विश्वस्य। तथा, धाता-विश्वस्य धारकः, तथा हि-बाह्यो लोको वायुमण्डलेन धार्यते, सत्यलोकोऽपि प्राणापानादिभिः। कस्माद्विश्वरूपः? यस्माद्विभुः, अतस्तदर्थानर्थकरणे प्रभुरिवेत्यर्थः। कस्मात्प्रजापतिः? यस्माद्विष्णुः,-व्यापी। "विष्लृ-व्याप्तौ" इत्यस्यौणादिके नुप्रत्यये विष्णुशब्दः। संहर्ता-बाह्याध्यात्मिकसर्गसंहरणात्। मृत्युः-यमरूपः, तत्कार्यकरणात्। तथा, अन्तको-यमभट्टारक एव साक्षात्। यतश्चैवमतस्तद्दुष्टौ-तस्याप्रकोपे, सदा-सर्वकालं, यतिव्ययम्।

तस्योक्तं दोषविज्ञाने कर्म प्राकृतवैकृतम्॥३॥

समासाद्यासतो दोषभेदीये नाम धाम च।

प्रत्येकं पञ्चधा चारो व्यापारश्च

स०-तस्य-पवनस्य, कर्मोक्तम्। क्व? दोषविज्ञाने,-दोषविज्ञानीयाध्याये (ह्र. सू. अ. ११)। किम्भूतं कर्म? प्राकृतवैकृतम्। प्राकृतौ भवं प्राकृतं-स्वाभाविकमुत्साहोच्छ्वासादिलक्षणम्। वैकृतं तु-"वृद्धस्तु कुरुतेऽनिलः। कार्श्यकार्ष्ण्योष्ण" इत्यादिग्रन्थनिर्दिष्टम्। एतत्समासात्-सङ्क्षेपतो, वायोः कर्म। व्यासतो-विस्तरतः पुनः, दोषभेदीये नाम धाम चोक्तमित्यनुवर्तनीयम्। प्रत्येकं पञ्चधा। एकमेकं प्रति प्रत्येकं नाम धाम च। प्राणादिभेदेन नाम पञ्चधा। धाम-स्थानमपि, पञ्चधा मूर्धादिभेदेन। प्राणस्य मुर्धा स्थानम्, "प्राणोऽत्र मूर्धगः" (ह्र. सू. अ. १२।४) इति वचनात्। तथा, "उरः स्थानमुदानस्य" इति। तथा, "व्यानो हृदि स्थितः" इति। तथा, "समानोऽग्निसमीपस्थः" इति। तथा, "अपानोऽपानगः" इति। तथा, चारोऽपि पञ्चधा। चरणं-चारो गतिः। तथा चोक्तम् (ह्र.सू.अ.१२।४)-"प्राणः उरःकण्ठचरः" "उदानो नासानाभिगलचरः" "व्यानः कृत्स्नदेहचरः" "समानः कोष्ठचरः" "अपानो बस्तिमेढ्रोरुगोचरः' इति। व्यापारोऽपि वायोः प्राणादिभेदेन पञ्चधा। तत्र प्राणस्य व्यापारो "बुद्धिहृदयेन्द्रियचित्तधृक्" इत्यादिः, उदानस्य व्यापारो "वाक्प्रवृत्तिः" इत्यादिः, व्यानस्य

व्यापारो "गत्यपक्षेपणोत्क्षेपणादिकः", समानस्य व्यापारोऽन्नग्रहणादिकः, अपानस्य व्यापारः शुक्रार्तवादीनां निष्क्रमणरूपत्वम्, एवं विस्तरेण दोषभेदीये वातः प्राणादिभेदेन पञ्चधा नामादिभिरुक्तः।

इह वैकृतम्॥४॥

तस्योच्यते विभागेन सनिदानं सलक्षणम्।

[असङ्ख्यमपि सङ्ख्याय यदशीत्या पुरेरितम्।]

स०-इह-अस्मिन्नध्याये, तस्य-वातस्य, वैकृतं कर्म विभागेन-पृथग्रूपतया, उच्यते। किम्भूतम् ? सनिदानं सलक्षणम्। सह निदानेन सनिदानम्। तथा, सह लक्षणेन सलक्षणम्।

वायोश्चोभयथाऽपि कोपः सम्भवति। तमिदानीं दर्शयन्नाह-

धातुक्षयकरैर्वायुः कुप्यत्यतिनिषेवितैः॥५॥

चरन् स्रोतःसु रिक्तेषु भृशं तान्येव पूरयन्।

तेभ्योऽन्यदोषपूर्णेभ्यः प्राप्य वाऽऽवरणं बली॥६॥

स०-धातुक्षयकरैराहारविहारादिभिरतिनिषेवितैः-अतिमात्रसेवितैश्चिरकालसेवितैश्च, पवनः कुप्यति। किं कुर्वन् ? स्रोतःसु रिक्तेषु चरन्,-धातुक्षयकरातिसेवनात्, यतस्तदानीं स्रोतसां शून्यता भवति। तथाभूतेषु स्रोतःसु प्रभञ्जनस्तदन्तः प्रविशंस्तान्येव स्रोतांसि रिक्तानि भृशं पूरयन्नेवं धातुक्षयात् कुप्यति मरुत्। तथा तेभ्यः स्रोतोभ्योऽन्यदोषपूर्णेभ्य आवरणं प्राप्य बली वायुरेवं वा कुप्यति।

तत्र पक्वाशये क्रुद्धः शूलानाहान्त्रकूजनम्।

मलरोधाश्मवर्ध्मार्शस्त्रिकपृष्ठकटीग्रहम्॥७॥

करोत्यधरकाये च तांस्तान् कृच्छ्रानुपद्रवान्।

स०-एवमुभयथा वायुः पक्वाशये क्रुद्धः शूलानाहावन्त्रकूजनादींश्च करोति। तथा, अधरकाये च-शरीरस्याधस्तात्, तांस्तान्-नानाविधान्, उपद्रवान्-व्याधीन्, कृच्छ्रान्-कृच्छ्रसाध्यान्, करोति। कायस्याधर इति पूर्वापरेत्यादिना समासः।

आमाशये तृड्वमथुश्वासकासविसूचिकाः॥८॥
कण्ठोपरोधमुद्गारान् व्याधीनूर्ध्वं च नाभितः।

स०-आमाशये क्रुद्धस्तृडादींस्तथाऽन्यानप्यनुक्तान् व्याधीन्नाभेरूर्ध्वं-ऊर्ध्वकाये, करोति।

श्रोत्रादिष्वन्द्रियवधं

स०-श्रोत्रादिषु-इन्द्रियाधारेषु, क्रुद्धः इन्द्रियाणां वधं-विनाशं, करोति।

त्वचि स्फुटनरूक्षते॥९॥

स०-त्वचि क्रुद्धस्तस्यास्त्वचः स्फुटनं रूक्षतां च करोति।

रक्ते तीव्रा रुजः स्वापं तापं रागं विवर्णताम्।
अरूंष्यन्नस्य विष्टम्भरुचिं कृशतां भ्रमम्॥१०॥

स०-रक्ते क्रुद्धस्तीव्र रुजस्तथा स्वापादीन् करोति।

मांसमेदोगतो ग्रन्थींस्तोदाढ्यान् कर्कशान् श्रमम्।
गुर्वङ्गं चातिरुक्स्तब्धं मुष्टिदण्डहतोपमम्॥११॥

स०-मांसमेदोगतस्तत्रस्थः क्रुद्धो ग्रन्थींस्तोदादियुतांस्तथा श्रमादींश्च करोति। सुश्रुते चात्र विशेष उक्तः। तथा च तद्ग्रन्थः- (सु. नि. अ. १।२६)-कर्कशांस्तोदबहुलान् ग्रन्थीन् मांससमाश्रितः। वायुर्मेदोयुतः कुर्याद्ग्रन्थीन् मन्दरुजोऽव्रणान्॥" इति।

अस्थिस्थः सक्थिसन्ध्यास्थिशूलं तीव्रं बलक्षयम्।

स०-अस्थिस्थः क्रुद्धः सक्थिसन्ध्यस्थिशूलं तीव्रं-दारिणं, बलक्षयं च करोति।

मज्जस्थोऽस्थिषु सौषिर्यमस्वप्नं सन्ततां रुजम्॥१२॥

स०-मज्जस्थः क्रुद्धोऽस्थिसौषिर्यादीन् करोति।

शुक्रस्य शीघ्रमुत्सर्गं सङ्गं विकृतिमेव वा।
तद्वद्गर्भस्य शुक्रस्थः

स०-शुक्रस्थः क्रुद्धः शुक्रस्य शीघ्रमुत्सर्गं सङ्गादीन्वा करोति। तद्वत्-तथैव, गर्भस्यापि तथाभूतबीजोत्पन्नत्वात् शीघ्रोत्सर्गादीन् करोति।

सिरास्वाध्मानरिक्तते॥१३॥
तत्स्थः

स०-तत्स्थः-सिरास्थितः, क्रुद्धस्तास्वेव सिरास्वाध्मानरिक्तते करोति।

स्नावस्थितः कुर्याद्ध्वस्यायामकुब्जताः।

स०-स्रावस्थितः क्रुद्धो गृध्रस्यादीन् करोति।

वातपूर्णदृतिस्पर्शं शोफं सन्धिगतोऽनिलः॥ १४॥
प्रसारणाकुञ्चनयोः प्रवृत्तिं च सवेदनाम्।

स०-सन्धिगतोऽनिलः क्रुद्धः शोफं कुर्यात्। किम्भूतम्? वातपूर्णदृतिस्पर्शं-तत्तुल्यम्। तथा, प्रसारण आकुञ्चने च सवेदनां प्रवृत्तिं करोति।

सर्वाङ्गसंश्रयस्तोदभेदस्फुरणभञ्जनम्॥ १५॥
स्तम्भनाक्षेपणस्वापसन्ध्याकुञ्चनकम्पनम्।

स०-सर्वाङ्गसंश्रयोऽनिलस्तत्रस्थः क्रुद्धस्तोदादीन् करोति।

यदा तु धमनीः सर्वाः क्रुद्धोऽभ्येति मुहुर्मुहुः॥ १६॥
तदाऽङ्गमाक्षिपत्येष व्याधिराक्षेपकः स्मृतः।

स०-यदा तु सर्वाः धमनीर्वायुः क्रुद्धोऽभ्येति-आभिमुख्येनागच्छति, पुनःपुनस्तदाऽङ्गं-शरीरं, आक्षिपति-आक्रमति, एष वातव्याधिराक्षेपकः स्मृतः।

अथापतन्त्रकं लक्षयति-

अधः प्रतिहतो वायुर्व्रजन्नूर्ध्वं हृदाश्रिताः॥ १७॥
नाडीः प्रविश्य हृदयं शिरः शङ्खौ च पीडयन्।

आक्षिपेत्परितो गात्रं धनुर्वच्चास्य नामयेत्॥ १८॥

कृच्छ्रादुच्छ्वसिति स्तब्धस्रस्तमीलितदृक्ततः।

कपोत इव कूजेच्च निःसंज्ञः सोऽपतन्त्रकः॥ १९॥

स एव चापतानाख्यो मुक्ते तु मरुता हृदि।

अश्नुवीत मुहुः स्वास्थ्यं मुहुरस्वास्थ्यमावृते॥ २०॥

स०-अधः प्रतिहत ऊर्ध्वं व्रजन् मारुतो हृदाश्रिताः-हृदयस्थाः, नाडीरन्तः प्रविश्य हृदयं तथा शिरश्च शङ्खौ च पीड्यन्, आक्षिपेत्परितो गात्रं-समन्तात्कायमाक्षिपेत्,-संहरेत्। तथा, धनुर्वच्चास्य-अपतन्त्रकवतः, प्रकृतत्वाद्गात्रं नामयेत्। तथा स पुमान् कृच्छ्रादुच्छ्वसिति-कथञ्चिच्छ्वसिति। दृक्-चक्षुरिन्द्रियाधिष्ठानं दृक्शब्देनेह गृह्यते। स्तब्धा स्रस्ता मीलिता च दृग्यस्यासौ स्तब्धस्रस्तमीलितदृक्। ततः-अनन्तरं, कपोत इव कूजेत्-अव्यक्तं शब्दं विदध्यात्। तथा, निःसंज्ञो-विचेतनः सम्पद्यते। सः-एवंरूपो वातव्याधिः, अपतन्त्रकाख्यो भण्यते। स एव चापतानकसंज्ञो निगद्यते। मुक्ते त्वित्यादि। वायुनाऽनाक्रान्ते हृदये क्षणं स्वास्थ्यं प्राप्नुयात्। मुहुरस्वास्थ्यं-तेनावृते हृद्यस्वास्थ्यमश्नुवीत।

गर्भपातसमुत्पन्नः शोणितातिस्रवोत्थितः।

अभिघातसमुत्थश्च दुश्चिकित्स्यतमो हि सः॥ २१॥

स०-स चाकालगर्भपातात्समनन्तरं योषितां प्रायो जायते। कदाचिच्छोणितातिस्रवात् स्त्रीणां पुरुषाणां च, अभिघाताच्च स्यात्। सः-अपतन्त्रको, गर्भपातसमुत्पन्नो दुश्चिकित्स्यः स्यात्, शोणितातिस्रवोत्थितो दुश्चिकित्स्यतरः, अभिघातसमुत्थो दुश्चिकित्स्यतमः।

मन्ये संस्तभ्य वातोऽन्तरायच्छन् धमनीर्यदा।

व्याप्नोति सकलं देहं जत्रुरायम्यते तदा॥ २२॥

अन्तर्धनुरिवाङ्गं च वेगैः स्तम्भं च नेत्रयोः।

करोति जृम्भां दशनं दशनानां कफोद्भमम्॥ २३॥

पार्श्वयोर्वेदनां वाक्यहनुपृष्ठशिरोग्रहम्।

अन्तरायाम इत्येष

स०-मन्ये द्वे-ग्रीवापार्श्वाश्रिते नाड्यौ, वायुः संस्तभ्य, अन्तरायच्छन् धमनीर्यदा गृह्णन् सकलं देहं व्याप्नोति तदा जत्रुरायम्यते-वक्रीक्रियते। जत्रुशब्दस्य पुंस्त्वं लोकाश्रयत्वाल्लिङ्गस्येति। अन्तर्धनुरिवाङ्गं च,-तथाऽन्तः-मुखतो भागात्, अङ्गं-शरीरं च, धनुरिवायम्यत इति चार्थः। वेगैः-विच्छिद्य पुनरुद्भवैर्भज्यत इव तुद्यत इव इति च नानाव्यथारूपैः। तथा स्तम्भं च नेत्रयोः करोति। तथा जृम्भाम्। तथा, दशनानां-दन्तानां, दशनं-खादनम्। दशनमित्यत्र "दाम्नीशसयुयुज" इत्यादौ दंशेरनुनासिकलोपनिर्देशो ज्ञापनार्थः, कृतोऽन्यस्मिन्नपि प्रत्ययो लोपो भवतीति तेन ल्युट्यपि भवति। दशनमिति वचनादत्र नलोपः। प्रायिकं चैतज्ज्ञापकमिति "हितं कीटैश्च दंशनम्" इत्यपि भवति। तथा कफस्योद्वमनम्। तथा, पार्श्वयोर्द्वयोर्वेदनां-शूलम्। तथा, वाक्यादीनां ग्रहं-स्तम्भम्। इत्येषः-वातव्याधिः, अन्तरायामसंज्ञोऽङ्गस्यान्तरायमनात्-वक्रीकरणात्, उच्यत इति शेषः।

बाह्यायामश्च तद्विधः॥२४॥

देहस्य बहिरायामात् पृष्ठतो नीयते शिरः।

उरश्चोत्क्षिप्यते तत्र कन्धरा चावमृद्यते॥२५॥

दन्तेष्वास्ये च वैवर्ण्यं प्रस्वेदः स्रस्तगात्रता।

बाह्यायामं धनुष्कम्भं ब्रुवते वेगिनं च तम्॥२६॥

स०-बाह्यायामश्च तद्विधः-तादृशः। देहस्य बहिरायामात्-अङ्गस्य धनुर्वद्बहिर्वक्रीकरणात्, बहिरायाम उच्यत इति पृष्ठाभिमुखं नीयते। तथा, तत्र-बाह्यायामे, उरो-वक्षः, उत्क्षिप्यते-उन्नतिं नीयते। तथा, कन्धरा-ग्रीवा च, अवमृद्यते-क्षुद्यते। तथा, दन्तेषु वक्त्रे च वैवर्ण्य-प्राकृताद्वर्णाद्वर्णान्तरापत्तिः। तथा, प्रकर्षेण स्वेदः। तथा, स्रस्तगात्रता-श्लथाङ्गता। तं-तथाभूतं वातव्याधिं, बाह्यायामं धनुष्कम्भं च ब्रुवते। तमेव केचिद्वेगिनमित्याचक्षते।

अधुना व्रणायाममाह-

व्रणं मर्माश्रितं प्राप्य समीरणसमीरणात्।
व्यायच्छन्ति तनुं दोषाः सर्वामापादमस्तकम्॥२७॥
तृष्यतः पाण्डुगात्रस्य व्रणायामः स वर्जितः।

स०-दोषा व्रणं मर्माश्रितं प्राप्यानन्तरं समीरणस्य समीरणात्-प्रेरणात्, सर्वां तनुं-सकलं देहमापादमस्तकं, व्यायच्छन्ति-विशेषेणाक्रामन्ति। [सः-] एष व्रणायामः, तृष्यतस्तथा पाण्डुगात्रस्य नरस्य वर्जितः, असाध्यत्वात्।

गते वेगे भवेत्स्वास्थ्यं सर्वेष्वाक्षेपकेषु च॥२८॥

स०-सर्वेषु चाक्षेपकेषु- "यदा तु धमनीः सर्वा" (श्लो. १६)-इत्यादिग्रन्थनिर्दिष्टेषु व्रणायामपर्यन्तेषु, वेगे गते सति-वेगानां शान्तौ सत्यां, स्वास्थ्यं भवेत्-नान्यदा।

जिह्वातिलेखनाच्छुष्कभक्षणादभिघाततः।
कुपितो हनुमूलस्थः स्रंसयित्वाऽनिलो हनू॥२९॥
करोति विवृतास्यत्वमथवा संवृतास्यताम्।
हनुस्रंसः स तेन स्यात्कृच्छ्राच्चर्वणभाषणाम्॥३०॥

स०-जिह्वातिलेखनादिभिः कुपितो हन्वोर्मूले स्थितो वायुर्हनू स्रंसयित्वा-स्थानाच्चालयित्वा, विवृतास्यत्वं-प्रसारितमुखत्वं, अथवा संवृतास्यत्वं करोति। सः-एवंभूतो, हनुस्रंस उच्यते। तेन च-हनुस्रंसेन, कृच्छ्रात्-कथमपि, चर्वणं भाषणं च स्यात्।

वाग्वाहिनीसिरासंस्थो जिह्वां स्तम्भयतेऽनिलः।

जिह्वास्तम्भः स तेनान्नपानवाक्येष्वनीशता॥ ३१॥

स०-वाग्वाहिनीसिरासंस्थो वायुर्जिह्वां स्तम्भयते। सः-एवंविधो, जिह्वास्तम्भ उच्यते। तेन-जिह्वास्तम्भेन, अन्नपानवाक्येषु अनीशता-असमर्थता, भवति।

शिरसा भारहरणादतिहास्यप्रभाषणात्।

उत्त्रासवक्रक्षवथोः खरकार्मुककर्षणात्॥ ३२॥

विषमादुपधानाच्च कठिनानां च चर्वणात्।

वायुर्विवृद्धस्तैस्तैश्च वातलैरूर्ध्वमास्थितः॥ ३३॥

वक्रीकरोति वक्रार्धमुक्तं हसितमीक्षितम्।

ततोऽस्य कम्पते मूर्द्धा वाक्सङ्गः स्तब्धनेत्रता॥ ३४॥

दन्तचालः स्वरभ्रंशः श्रुतिहानिः क्षवग्रहः।

गन्धाज्ञानं स्मृतेर्मोहस्त्रासः सुप्तस्य जायते॥ ३५॥

निष्ठीवः पार्श्वतो यायादेकस्याक्ष्णो निमीलनम्।

जत्रोरूर्ध्वं रुजा तीव्रा शरीरार्धेऽधरेऽपि वा॥ ३६॥

तमाहुरर्दितं केचिदेकायाममथापरे।

स०-शिरोभारहरणादिभिर्वायुर्विवृद्धो-विशेषेण वृद्धिं गतः, तथा तैस्तैश्च वातलैः-सर्वरोगनिदानाद्युक्तैः, ऊर्ध्वमास्थितः-शरीरस्योपरिभागे आसमन्तात्स्थितो, वक्रार्धं वक्रीकरोति। तथा, उक्तंहसितमीक्षितं च वक्रीकरोति। तथा, उक्तं हसितमीक्षितं च वक्रीकरोति। ततः-अनन्तरं, अस्य-नरस्य,मूर्धा कम्पते। तथा, वाक्सङ्गो जायते। तथा, स्तब्धनेत्रतादयश्च। तथा, निष्ठीवो-निष्ठीवनं, पार्श्वेन गच्छेत्। एकस्य चाक्षिणो निमीलनं स्यात्। जत्रोरूर्ध्वं तीव्रा रुजा-दारुणा पीडा, भवति। शरीरार्धेऽधरेऽपि वा-अधस्ताद्वा, तं-ईदृशं वातव्याधिं, केचिदर्दितमाहुः, अपरे तन्त्रकृत एकायामं वदन्ति।

रक्तमाश्रित्य पवनः कुर्यान्मूर्द्धधराः सिराः॥३७॥
रूक्षाः सवेदनाः कृष्णाः सोऽसाध्यः स्यात्सिराग्रहः।

स०-पवनो रक्तमाश्रित्य-श्रयित्वा, मूर्द्धाश्रिताः सिरा रूक्षादिगुणयुक्ताः कुर्यात्। स सिराग्रह उच्यते। स चासाध्यः।

गृहीत्वाऽर्धं तनोर्वायुः सिराः स्नायूर्विशोष्य च॥३८॥
पक्षमन्यतरं हन्ति सन्धिबन्धान् विमोक्षयन्।
कृत्स्नोऽर्धकायस्तस्य स्यादकर्मण्यो विचेतनः॥३९॥
एकाङ्गरोगं तं केचिदन्ये पक्षवधं विदुः।

स०-वायुस्तनोः-शरीरस्य, अर्धं गृहीत्वा सिराः स्नायूश्च विशोष्य ततोऽन्यतरं-वामं दक्षिणं वा, पक्षं हन्ति। किं कुर्वन्? सन्धीनां बन्धान् विमोक्षयन्-विघट्टयन्। तस्यैव च-व्याधिमतः, कृत्स्नः-सर्वोऽर्धकायः, अकर्मण्यः-क्रियायामशक्तो, विचेतनश्च स्यात्। तं-ईदृशं वातव्याधिं, केचिदेकाङ्गरोगं वदन्ति, अन्ये पक्षवधमित्याहुः। अर्धकाय इति "अर्धं नपुंसकम्" इति समासः।

सर्वाङ्गरोगं तद्वच्च सर्वकायाश्रितेऽनिले॥४०॥

स०-सर्वकायाश्रिते वायौ तेन-पूर्वोक्तेनैकाङ्गरोगोक्तेन लक्षणेन, तुल्यं वर्तते तद्वत्, सर्वाङ्गरोगमित्याहुः।

शुद्धवातहतः पक्षः कृच्छ्रसाध्यतमो मतः।
कृच्छ्रस्त्वन्येन संसृष्टो विवर्ज्यः क्षयहेतुकः॥४१॥

स०-शुद्धवातेन हतः पक्षः-एकाङ्गरोगः कृच्छ्रसाध्यतमो मतः-अतिशयेन कृच्छ्रसाध्यः। अन्येन संयुक्त वातः कृच्छ्रः-कृच्छ्रसाध्यः। क्षयहेतुकः पक्षो विवर्ज्यो-नोपक्रम्यः, असाध्यत्वात्।

आमबद्धायनः कुर्यात्संस्तभ्याङ्गं कफान्वितः।
असाध्यं हतसर्वेहं दण्डवद्दण्डकं मरुत्॥४२॥

स०-आमेन बद्धानि-स्थगितानि, अयनानि-द्वाराणि प्रकृतत्वात् स्रोतसां, येन स आमबद्धायनः, कफान्वितो मारुतोऽङ्गं संस्तभ्य-स्तम्भयित्वा दण्डवत् दण्डकाख्यं वातव्याधिविशेषं कुर्यात्। तमसाध्यम्। तथा हताः सर्वा ईहाः-चेष्टाः, यस्मिंस्तमेवंभूतम्।

अंसमूलस्थितो वायुः सिराः सङ्कोच्य तत्रगाः।
बाहुप्रस्पन्दितहरं जनयत्यवबाहुकम्॥४३॥

स०-वायुरंसमूले स्थितः, तत्रगाः-अंसमूलाश्रिताः, सिराः सङ्कोच्यावबाहुकाख्यं वातव्याधिं जनयति। किम्भूतम्? बाहुप्रस्पन्दितं हरतीति बाहुप्रस्पन्दितहरम्, "हरतेरनुद्यमनेऽच्" इत्यच्।

तलं प्रत्यङ्गुलीनां या कण्डरा बाहुपृष्ठतः।
बाहुचेष्टापहरणी विश्वाची नाम सा स्मृता॥४४॥

स०-तलं-हस्ततलं, प्रति-लक्षणी (लक्ष्यी)कृत्य, या कण्डरा-सुमहान् स्नायुसङ्घातः, सा बाहुपृष्ठतो गता, तथा मारुतार्दिता-वातेन पीडीता सती, बाहुचेष्टां-भुजव्यापारं, अपहरति [इति] बाहुचेष्टापहरणी। बाहुलकादत्र कर्तरी ल्युट् स्त्रीत्वं च। एवंभूता विश्वाची संज्ञा स्मृता, मुनिभिरिति शेषः।

वायुः कट्यां स्थितः सक्थ्नः कण्डरामाक्षिपेद्यदा।

तदा खञ्जो भवेज्जन्तुः पङ्गुः सक्थ्नोर्द्वयोरपि॥४५॥

स०-कट्यां स्थितो मारुतो यदा सक्थ्नः-ऊरोः सम्बन्धिनीं, कण्डरामाक्षिपेत्-आकर्षेत्, तदा प्राणी खञ्जो भवेत्। द्वयोरपि सक्थ्नोः सम्बन्धिनीं कण्डरां यदाऽऽक्षिपेत्तदा पङ्गुः स्यात्।

कम्पते गमनारम्भे खञ्जन्निव च याति यः।

कलायखञ्जं तं विद्यान्मुक्तसन्धिप्रबन्धनम्॥४६॥

स०-तथा यो गमनारम्भे कम्पते-वेपते, खञ्जन्निव च याति। तं-एवंभूतं, कलायखञ्जाख्यं व्याधिं विद्यात्। किम्भूतम्? मुक्तं सन्धिप्रबन्धनं यत्र, तं तथाविधम्।

शीतोष्णद्रवसंशुष्कगुरुस्निग्धैर्निषेवितैः।

जीर्णाजीर्णे तथाऽऽयाससङ्क्षोभस्वप्नजागरैः॥४७॥

सश्लेष्ममेदःपवनमाममत्यर्थसञ्चितम्।

अभिभूयेतरं दोषमूरु चेत्प्रतिपद्यते॥४८॥

सक्थ्यस्थीनि प्रपूर्यान्तः श्लेष्मणा स्तिमितेन तत्।

तदा स्कभ्नाति तेनोरू स्तब्धौ शीतावचेतनौ॥४९॥

परकीयाविव गुरू स्यातामतिभृशव्यथौ।

ध्यानाङ्गमर्दस्तैमित्यतन्द्राच्छर्द्यरुचिज्वरैः॥५०॥

संयुतौ पादसदनकृच्छ्रोद्धरणसुप्तिभिः।

तमूरुस्तम्भमित्याहुराढ्यवातमथापरे॥५१॥

स०-जीर्णेन सहितमजीर्णं जीर्णाजीर्णं-पक्वापक्वमाहारकदम्बकं, केनचिन्निमित्तेन जाठराग्निसंयोगादाहारराशेः कश्चिद्भागः पक्वः कश्चिदपक्व इति जीर्णाजीर्णम्, तस्मिन्सति।

शीतोष्णादिभिस्तथाऽऽयाससङ्क्षोभादिभिर्निषेवितैः-चिरमभ्यस्तैः, आममत्यर्थं सञ्चितं-बहु सम्भृतं, ऊरु यदा प्रतिपद्यते-उभावाश्रित्यास्ते, तदा-तस्मिन्काये, तेन-यथोक्तेन हेतुना, तावूरु स्कभ्नाति-स्तम्भयति। किम्भूतमामम्? सश्लेष्ममेदःपवनम्। सह श्लेष्मणा मेदसा पवनेन च वर्तत इति सश्लेष्ममेदःपवनम्, न तु केवलमेव। तथा, इतरं दोषं-वातश्लेष्मापेक्षया पित्ताख्यं, अभिभूय-आक्रम्य, न वातं कफं वा। तेन हि तयोरभिभवो न युक्तः, तत्सहवर्तमानत्वात्। तथा, तेन सहवर्तमानेनापि श्लेष्मणा च स्तिमितेन-स्त्यानेन, सक्थिसम्बन्धीन्यस्थीन्यन्तः प्रपूर्य-तानि निर्भराणि कृत्वा, तदा तत्-आमं, ऊरु स्कभ्नातीति योज्यम्। तेन हेतुना तदा-तस्मिन्काले, तावरू स्तब्धौ-निश्चलौ, तथा स्पर्शतः शीतौ, तथाऽचेतनौ-सूच्यादिभिस्तुद्यमानावपि पीडां न वेदयेताम्, अत एव परकीयाविव गुरु स्याताम्। तथाऽतिभृशव्यथौ-अत्यन्तशूलान्वितौ। परकीयाविति "कुग्जनस्य परस्य च" इति ईयः कुगागमश्च। तथा ध्यानादिभिः संयुतौ। ध्यानं-चिन्ता दौर्मनस्यमित्यर्थः। तथा पादसदनादिभिः संयुतौ। एवंलक्षणो यो व्याधिविशेषस्तमूरुस्तम्भमाहुः, तन्त्रकृत इति शेषः। अपरे आचार्या आढ्यवातमिति तमाहुः। आमशब्दस्य नपुंसकत्वं लोकाश्रयत्वाल्लिङ्गस्येति बोध्यम्।

वातशोणितजः शोफो जानुमध्ये महारुजः।
ज्ञेयः क्रोष्टुकशीर्षश्च स्थूलः क्रोष्टुकशीर्षवत्॥५२॥

स०-जानुमध्ये महारुजः शोफो वातशोणिताज्जातः क्रोष्टुकशीर्षाख्यो वातव्याधिभेदः। स च स्थूलः शृगालशिरःसदृशो भवति।

रुक् पादे विषमन्यस्ते श्रमाद्वा जायते यदा।
वातेन गुल्फमाश्रित्य तमाहुर्वातकण्टकम्॥५३॥

स०-पादे-चरणे विषमन्यस्ते सति, अथवा श्रमेण यदा गुल्फमाश्रित्य वातेन रुग्जायते, तं वातकण्टकाख्यं वातव्याधिमाहुः।

पार्ष्णिं प्रत्यङ्गुलीनां या कण्डरा मारुतार्दिता।
सक्थ्युत्क्षेपं निगृह्णाति गृध्रसीं तां प्रचक्षते॥५४॥

स०-पार्ष्णिं प्रति-पार्ष्ण्यभिमुखं, या अङ्गुलीनां कण्डरा सा मारुतेन-वायुना, अर्दिता-व्यथिता, चरणोद्धरणावसरे यः सक्थ्युत्क्षेपः-ऊर्ध्वं प्रेरणं, तं निगृह्णाति-अवमृद्नाति सक्थ्नोर्निश्चल-त्वमिवोत्पादयति। तां-कण्डरां, व्याधिविशेषसंज्ञां गृध्रसीं प्रचक्षते, तन्त्रकृत इति शेषः।

विश्वाची गृध्रसी चोक्ता खल्ली तीव्ररुजान्विते।

स०-विश्वाची चोक्ता "बाहुचेष्टापहरणी" (श्लो. ४४) इत्यादिना ग्रन्थेन, गृध्रसी चाधुनैवोक्ता। ते द्वे तीव्ररुजान्विते सत्यौ खल्ली भण्यते।

हृष्येते चरणौ यस्य भवेतां च प्रसुप्तवत्॥५५॥

पादहर्षः स विज्ञेयः कफमारुतकोपजः।

स०-यस्य पुंसश्चरणौ हृष्येते प्रसुप्ताविव च स्याताम्, सः-एवंभूतो वातव्याधिः, पादहर्षाख्यः। स च वातश्लेष्मकोपजो वेद्यः।

पादयोः कुरुते दाहं पित्तासृक्सहितोऽनिलः॥५६॥

विशेषतश्चङ्क्रमिते पाददाहं तमादिशेत्॥५६ १/२॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां तृतीये निदानस्थाने वातव्याधिनिदानं नाम पञ्चदशोऽध्यायः॥१५॥

****

स०-अनिलः पित्तरक्तसहितः पादयोर्दाहं कुरुते, विशेषेण तु चङ्क्रमिते सति। तं-एवंभूतं, पाददाहमादिशेत्-ब्रूयात्, भिषगिति शेषः।

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टाङ्गहृदयटीकायां सर्वाङ्गसुन्दराख्यायां तृतीये निदानस्थाने व्यातव्याधिनिदानं नाम पञ्चदशोऽध्यायः समाप्तः॥१५॥

****

षोडशोऽध्यायः।

वातशोणितनिदानं वातव्याधिनिदानात् पृथगारभ्यते, बहुवक्तव्यत्वात्। अन्यथा वातव्याधिविशेष एव वातशोणिताख्यो व्याधिरिति तत्रैव वक्तुं युक्तं स्यात्। तस्माद्वातशोणितनिदानं प्रक्रम्यत इत्याह-

अथातो वातशोणितनिदानं व्याख्यास्यामः।

इति ह स्माहुरात्रेयादयो महर्षयः।

(गद्यसूत्रे॥२॥)

विदाह्यन्नं विरुद्धं च तत्तच्चासृक्प्रदूषणम्।

भजतां विधिहीनं च स्वप्नजागरमैथुनम्॥१॥

प्रायेण सुकुमाराणामचङ्क्रमणशीलिनाम्।

अभिघातादशुद्धेश्च नृणामसृजि दूषिते॥२॥

वातलैः शीतलैर्वायुर्वृद्धः कृद्धो विमार्गगः।

तादृशैवासृजा रुद्धः प्राक्तदेव प्रदूषयेत्॥३॥

आढ्यरोगं खुडं वातबलासं वातशोणितम्।

तदाहुर्नामभिः

स०-मद्याम्लतक्रदधिनिष्पावव्रीहिवारिचरमांसकुलत्थकुठेरादिकं-विदाह्यन्नं, तथा विरुद्धमन्नं-संयोगमात्रादिवशात् यथा "आनूपमामिषं माषक्षौद्रक्षीर" (ह्. सू. अ. ७।२९) इत्यादिकं प्रागुक्तम्, तत्तच्चासृक्प्रदूषणं-अन्यदप्याहारविहारजातं यत्तत्रतत्रोक्तम्, तद्भजतां-शीलयतां, नृणां-पुरुषाणां, तथा विधिहीनं-अयथाशास्त्रं, स्वप्नजागरमैथुनं भजतां प्रायेण सुकुमाराणाम्, प्रायोग्रहणम(णेना)न्येषामपि रक्तोपचयहेत्वाहारसेविनाम्, तथा अचङ्क्रमणशीलिनां-

अत्यन्तमास्यादिसुखसेविनाम्, अभिघातात्-अनेकविधात्प्रहारविशेषात्, तथा अशुद्धेः-अशोधनान्मलानिर्हरणात्, तेषामसृजि दूषिते-तद्दूषणहेतुभिर्यथोक्तैर्दुष्टे सम्पन्ने, ततो वातलैः-तिक्तोषणादिभिः सर्वरोगनिदानोक्तैः, तथाऽतिशयेन शीतलैर्वायुर्वृद्धः-अत्यन्तमुपचयं प्राप्य, पश्चात्कुद्धः-कुपितः, अत एव च विमार्गगो-विशेषेणोन्मार्गगामी, तादृशैव-तथाभूतेनैव, असृजा दुष्टेन क्रुद्धेन रुद्धो-विहतगतिः कृतात्यन्तसंश्लेषः, तदेव-शोणितं, प्राक्-पूर्वं, प्रदूषयेत्। प्राग्ग्रहणादनन्तरं सर्वान् धातून् मांसादीन् प्रदूषयेत्। तच्च तथाविधं रक्तमत्युपचितं प्रदुष्टमाढ्यरोगं खुडं वातबलासं वातशोणितमिति नामभिराचार्या आहुः।

तच्च पूर्वं पादौ प्रधावति॥४॥

विशेषाद्यानयानाद्यैः प्रलम्बौ

स०-तच्च रोगस्वभावात् पूर्वं पादौ प्रधावति-समुत्पद्यते। तौ च पादौ विशेषात्-अतिशयेन, यानयानाद्यैः प्रलम्बौ-उच्छ्रूनौ सन्तौ, प्रधावति। यानेन-हस्त्यश्वादिना, यानं-गमनम्। आदिग्रहणादन्यैरपि पादप्रलम्बनोत्पादकैर्गजतुरगादिसदृशैः।

तस्य लक्षणम्।

भविष्यतः कुष्ठसमं तथा सादः श्लथाङ्गता॥५॥

जानुजङ्घोरुकट्यंसहस्तपादाङ्गसन्धिषु।

कण्डूस्फुरणनिस्तोदभेदगौरवसुप्तताः॥६॥

भूत्वा भूत्वा प्रणश्यन्ति मुहुराविर्भवन्ति च।

स०-तस्य-वातशोणितस्य, भविष्यतो-भाविनो, लक्षणं-प्राग्रूपं, कुष्ठसमं-कुष्ठेन तुल्यम्, कुष्ठस्य यत् प्राग्रूपं-"अतिश्लक्ष्णखरस्पर्शं (हृ, नि. अ. १४।११) इत्यादि कुष्ठनिदानोक्तं, तदस्यापि। न केवलमेतदेव यावत्तथा सादः श्लथाङ्गतेत्यादि च, यावन्मुहुराविर्भवन्ति चेत्येतदपि भविष्यतो लक्षणम्।

पादयोर्मूलमास्थाय कदाचिद्धस्तयोरपि॥७॥

आखोरिव विषं क्रुद्धं कृत्स्नं देहं विधावति।

स०-तच्च वातशोणितं पादयोर्मूलमास्थाय-तत्र पूर्वं स्थितिं कृत्वा, कदाचिद्धस्तयोरपि प्रतिष्ठां कृत्वा, आखोः-मूषकस्य सम्बन्धि, यथा विषं क्रुद्धं देहैकदेशे पूर्वं स्थितिं कृत्वाऽनन्तरं कृत्स्नं देहं विधावति-विशेषेण प्रसरति।

तच्च वातशोणितमुत्तानगम्भीरभेदेन द्विधा स्यादित्याह-

त्वङ्मांसाश्रयमुत्तानं तत्पूर्वं जायते ततः॥८॥

कालान्तरेण गम्भीरं सर्वान् धातूनभिद्रवत्।

स०-त्वक् च मांसं च, ते आश्रयो यस्य वातरक्तस्य तदेवंभूतं तत्-वातशोणितं, उत्तानं पूर्वं-प्राक्, जायते। ततः-पश्चात्, कालान्तरेण पुनः सर्वान् धातून्-अपरानपि मेदःप्रभृतीन्, अभिद्रवद्गम्भीरं जायते।

कण्ड्वादिसंयुतोत्ताने त्वक्ताम्रा श्यावलोहिता॥९॥

सायामा भृशदाहोषा

स०-उत्ताने वातशोणिते त्वक् कण्ड्वादिसंयुता-कण्डूस्फुरणनिस्तोदादियुक्ता (श्लो. ६), तथा ताम्रा श्यावलोहिता-व्यामिश्रवर्णा, भवति। तथा सहायामेन वर्तत इति सायामा, तथा भृशदाहोषा-अत्यर्थं दाहरुग्युक्ता।

गम्भीरेऽधिकपूर्वरुक्।

श्वयथुर्ग्रथितः पाकी वायुः सन्ध्यस्थिमज्जसु॥१०॥

छिन्दन्निव चरत्यन्तर्वक्रीकुर्वंश्च वेगवान्।

करोति खञ्जं पङ्गुं वा शरीरे सर्वतश्चरन्॥११॥

स०-गम्भीरे वातशोणितेऽधिकपूर्वरुक् श्वयथुः स्यात्। अधिकं कृत्वा पूर्वा रुक् यस्य श्वयथोरसावधिकपूर्वरुक् श्वयथुः। कुतोऽधिकपूर्वरुक्? प्रकृतत्वादुत्तानवातशोणितात्। तथा श्वयथुर्ग्रथितः, तथा पाकी-पाकयुक्तः, स्यात्। तथाऽस्मिन् गम्भीरे वायुर्वेगवान्-बलवान्, शरीरे सर्वतश्चरन्-गच्छन्, वक्रीकुर्वंश्च सामर्थ्यात्तदेव शरीरं खञ्जं पङ्गुं वा करोति। तथा असौ सन्ध्यस्थिमज्जसु छिन्दन्निवान्तश्चरति।

वातेऽधिकेऽधिकं तत्र शूलस्फुरणतोदनम्।
शोफस्य रौक्ष्यकृष्णत्वश्यावतावृद्धिहानयः॥१२॥
धमन्यङ्गुलिसन्धीनां सङ्कोचोऽङ्गग्रहोऽतिरुक्।
शीतद्वेषानुपशयौ स्तम्भवेपथुसुप्तयः॥१३॥

स०-तत्र-वातशोणिते, वाताधिकेऽधिकं शूलस्फुरणतोदनं भवति। शूलं-सन्तता रुक्। तोदनं तु-विच्छिन्ना रुक् प्रतोदेनेव। तथा, शोफस्य रौक्ष्यकृष्णत्वश्यावतावृद्धिहानयः स्युः, वातस्य चलस्वभावत्वात्। तथा, धमनीनां-सिराविशेषाणां, अङ्गुलिसन्धीनां च सङ्कोचः स्यात्। तथा, अङ्गग्रहः-अङ्गान्यवबद्धानीव स्युः। तथा, अतिरुक् शीतद्वेषानुपशयौ च भवतः। शीतद्वेषः-शीतासहिष्णुत्वम्। तथा, अनुपशयः-असुखानुबन्धः। केनानुपशयः? प्रकृतत्वाच्छीतद्वेषेणोष्णकामितयोष्णसेवनेन भवति। तथा, स्तम्भवेपथुसुप्तयः स्युः। स्तम्भ इव स्तम्भो-देहस्तब्धता। वेपथुः-कम्पनम्। देहस्य सुप्तिः-अङ्गानामचैतन्यम्।

वातोत्तरस्य लक्षणमुक्त्वा रक्तोत्तरं वक्तुमाह-

रक्ते शोफोऽतिरुक्तोदस्ताम्रश्चिमिचिमायते।
स्निग्धरूक्षैः शमं नैति कण्डूक्लेदसमन्वितः॥१४॥

स०-अधिक इत्यत्रानुवर्तते। रक्तेऽधिके शोफोऽतिरुक्तोद इति। वातेऽप्यधिके शोफः सरुग्भवति किन्तु रक्तेऽधिकेऽतिरुक्तोदः शोफः स्यादिति विशेषः। तथा, ताम्रो-वर्णेन, भवति। चिमिचिमामिवाचरति-चिमिचिमायते। तथा, स्निग्धरूक्षैरसौ शोफः शमं नैति-न याति, कण्डूक्लेदयुक्तः सन्।

पित्ते विदाहः सम्मोहः स्वेदो मूर्च्छा मदः सतृट्।
स्पर्शाक्षमत्वं रुग्रागः शोफः पाको भृशोष्मता॥ १५॥

स०-पित्ते-पित्तानुविद्धे वातशोणिते, विदाहादयः स्युः।

कफे स्तैमित्युगुरुतासुप्तिस्निग्धत्वशीतताः।
कण्डूर्मन्दा च रुक्

स०-कफानुविद्धे वातशोणिते स्तैमित्यादयः स्युः।

द्वन्द्वसर्वलिङ्गं च सङ्करे॥ १६॥

स०-द्वन्द्वशब्देन च वातपित्तकफरक्तानां द्वन्द्वानीति प्रायेणेह गृह्यन्ते, सर्वशब्देन च वातपित्तरक्तकफा गृह्यन्ते। द्वन्द्वं च सर्वं च द्वन्द्वसर्वे, तयोर्लिङ्गं-लक्षणं, द्वन्द्वसर्वलिङ्गम्। सङ्करे-व्यामिश्रत्वे सति, द्वन्द्वसर्वलिङ्गं वातशोणितं भवति। कस्य सङ्करे? प्रकृतत्वाद्वातपित्तरक्तकफानां द्वन्द्वसङ्करे द्वन्द्वलिङ्गं वातशोणितं भवति। सर्वसङ्करे-सर्वेषां वातादीनां सङ्करे, सर्वलिङ्गं वातशोणितं भवति।

एकदोषानुगं साध्यं नवं, याप्यं द्विदोषजम्।
त्रिदोषजं त्यजेत्स्रावि स्तब्धमर्बुदकारि च॥ १७॥

स०-एकदोषानुगं वातशोणितं नवं साध्यं-साधयितुं शक्यम्। द्विदोषोद्भवं याप्यं-यापनार्हम्। त्रिदोषजं वातशोणितं त्यजेत्-असाध्यत्वान्नोपक्रमेत्। तथा, स्रावि यद्वातरक्तमर्बुदकारि च, तच्चासाध्यम्।

रक्तमार्गं निहत्याशु शाखासन्धिषु मारुतः।
निविश्यान्योन्यमावार्य वेदनाभिर्हरत्यसून्॥ १८॥

स०-शाखासन्धिषु मारुतो निविश्य-तत्र स्थितिं कृत्वा, तथा रक्तमार्गमाशु-शीघ्रं निहत्य, अनन्तरमन्योन्यमावार्य-प्रकृतत्वाद्रक्तं कर्तृ वातमावार्य वातोऽपि रक्तम्, ततो वेदनाभिः-वातरक्तोचिताभिः पीडाभिः, असून्-प्राणान्, हरति।

वायौ पञ्चात्मके प्राणो रौक्ष्यव्यायामलङ्घनैः।
अत्याहाराभिघाताध्ववेगोदीरणधारणैः॥ १९॥
कुपितश्चक्षुरादीनामुपघातं प्रवर्तयेत्।
पीनसार्दिततृड्श्वासश्वासादींश्चामयान्बहून्॥ २०॥

स०-पञ्चात्मके-प्राणादिभेदात् पञ्चस्वभावे वाते सति, प्राणो नाम वातो रौक्ष्यादिभिः कुपितश्चक्षुरादीनामुपघातं प्रवर्तयेत्-विदधाति। तथा, पीनसदींश्च बहून् रोगान् कुर्यात्। आदिशब्देन हिध्मादयो गृह्यन्ते।

उदानः क्षवथूद्गारच्छर्दिनिद्राविधारणैः।
गुरुभारातिरुदितहास्याद्यैर्विकृतो गदान्॥ २१॥
कण्ठरोधमनोभ्रंशच्छर्द्यरोचकपीनसान्।
कुर्याच्च गलगण्डादींस्तांस्तान् जत्रूर्ध्वसंश्रयान्॥ २२॥

स०-उदानः क्षवथुविधारणादिभिर्विकृतः-कुपितः, कण्ठरोधादीन् गदान् कुर्यात्। चशब्दोऽत्र भिन्नक्रमः। गलगण्डादींश्च गदान्, तांस्तान्-अनेकविधान्, जत्रूर्ध्वसंश्रयान् कुर्यात्।

व्यानोऽतिगमनध्यानक्रीडाविषमचेष्टितैः।
विरोधिरूक्षभीहर्षविषादाद्यैश्च दूषितः॥ २३॥
पुंस्त्वोत्साहबलभ्रंशशोफचित्तोप्लवज्वरान्।
सर्वाङ्गरोगनिस्तोदरोमहर्षाङ्गसुप्तताः॥ २४॥
कुष्ठं विसर्पमन्यांश्च कुर्यात्सर्वाङ्गगान् गदान्।

स०-व्यानोऽतिगमनादिभिर्विरोध्यादिभिश्च दूषितो-दुष्टिं प्राप्तः, पुंस्त्वोत्साहादिभ्रंशादीन् अपरानपि सर्वाङ्गगान् गदान् कुर्यात्।

समानो विषमाजीर्नशीतसङ्कीर्णभोजनैः॥ २५॥
करोत्यकालशयनजागराद्यैश्च दूषितः।
शूलगुल्मग्रहण्यादीन् पक्वामाशयजान् गदान्॥ २६॥

स०-समानो विषमादिभोजनादिभिरकालशयनादिभिश्च दूषितः शूलादीन् पक्वामाशयजान् गदान् करोति।

अपानो रूक्षगुर्वन्नवेगाघातातिवाहनैः।
यानयानासनस्थानचङ्क्रमैश्चातिसेवितैः॥ २७॥
कुपितः कुरुते रोगान् कृच्छ्रान् पक्वाशयाश्रयान्।
मूत्रशुक्रप्रदोषार्शोगुदभ्रंशादिकान् बहून्॥ २८॥

स०-अपानो रूक्षान्नादिभिरतिसेवितैर्वेगाघातादिभिश्चातिसेवितैः कुपितः कृच्छ्रान्-दारुणान्, पक्वाशयाश्रयान् मूत्रशुक्रप्रदोषादीन् बहून् गदान् कुर्यात्।

सर्वं च मारुतं सामं तन्द्रास्तैमित्यगौरवैः।
स्निग्धत्वारोचकालस्यशैत्यशोफाग्निहानिभिः॥२९॥
कटुरूक्षाभिलाषेण तद्विधोपशयेन च।
युक्तं विद्यान्निरामं तु तन्द्रादीनां विपर्ययात्॥३०॥

स०-सर्वमपि मारुतं तन्द्रादीभिर्लक्षणैर्युतं सामं विद्यात्। तन्द्रादिलक्षणविपर्ययेण तु निरामं जानीयात्।

वायोरावरणं चातो बहुभेदं प्रवक्ष्यते।

स०-अतः-सामादिलक्षणादनन्तरं, वातस्यावरणं बहुभेदं-अनेकप्रकारं, प्रकर्षेण वक्ष्यते। किल नास्याम एवावरणम्, अपि त्वन्यदप्यस्तीति द्योतयति।

लिङ्गं पित्तावृते दाहस्तृष्णा शूलं भ्रमस्तमः॥३१॥
कटुकोष्णाम्लवर्णैर्विदाहः शीतकामता।

स०-पित्तेनावृते मरुति दाहादिकं लिङ्गम्।

शैत्यगौरवशूलानि कट्वाद्युपशयोऽधिकम्॥३२॥
लङ्घनायासरूक्षोष्णकामता च कफावृते।

स०-कफावृते वायौ शैत्यादिकं लिङ्गं लङ्घनादिकामता च।

रक्तावृते सदाहाऽर्तिस्त्वङ्मांसान्तरजा भृशम्॥३३॥

भवेच्च रागी श्वयथुर्जायन्ते मण्डलानि च।

स०-रक्तावृते पवनेऽर्तिः-पीडा, भृशं त्वङ्मांसान्तरजा दाहयुक्ता स्यात्। रागवाश्च श्वयथुः स्यात्। तथा, मण्डलानि च जायन्ते।

मांसेन कठिनः शोफो विवर्णः पिटिकास्तथा॥३४॥

हर्षः पिपीलिकानां च सञ्चार इव जायते।

स०-मांसेनावृते वायौ कठिनो विवर्णश्च शोफस्तथा पिटिकाः स्युः, हर्षश्च। तथा, पिपीलिकानां गात्रेषु सञ्चार इव जायते।

चलः स्निग्धो मृदुः शीतः शोफो गात्रेष्वरोचकः॥३५॥

आढ्यवात इति ज्ञेयः स कृच्छ्रो मेदसाऽऽवृते।

स०-मेदसा आवृते वायावङ्गेषु शोफश्चलस्तथा स्निग्धस्तथा शीतो मृदुश्च स्यात् तथाऽरोचकः। सः-एवंविधः, आढ्यवात इति वेद्यः। स च कृच्छ्रः-कृच्छ्रसाध्यः।

स्पर्शमस्थ्यावृतेऽत्युष्णं पीडनं चाभिनन्दति॥३६॥

सूच्येव तुद्यतेऽत्यर्थमङ्गं सीदति शूल्यते।

स०-अस्थ्यावृते समीरणे स्पर्शमत्युष्णं पीडनं चाभिनन्दति-अभिलषति। तथा, अङ्गमतिशयेन सूच्येव तुद्यते। तथा, सीदति शूल्यते च।

मज्जावृते विनमनं जृम्भणं परिवेष्टनम्॥ ३७॥

शूलं च पीड्यमानेन पाणिभ्यां लभते सुखम्।

स०-मज्जावृते समीरे विनमनादिकं स्यात्। विनमनं-अङ्गानाम्। तथा, पाणिभ्यां पीड्यमानेन च-प्रकृतत्वादङ्गेन, सुखं लभते।

शुक्रावृतेऽतिवेगो वा न वा निष्फलताऽपि वा॥ ३८॥

स०-शुक्रावृते प्रभञ्जनेऽतिवेगो वा-प्रकृतत्वाच्छुक्रस्य, न वा वेगो निष्फलता वा स्यात्।

भुक्ते कुक्षौ रुजा जीर्णे शाम्यत्यन्नावृतेऽनिले।

अन्नावृते वाते भुक्ते सति रुजा कुक्षौ भवति। जीर्णेऽन्ने सति रुजा शाम्यति।

मूत्राप्रवृत्तिराध्मानं बस्तेर्मूत्रावृते भवेत्॥ ३९॥

स०-मूत्रावृते वायौ मूत्रस्याप्रवृत्तिराध्मानं च बस्तेः स्यात्।

विडावृते विबन्धोऽधः स्वस्थाने परिकृन्तति।

व्रजत्याशु जरां स्नेहो भुक्ते चानह्यते नरः॥ ४०॥

शकृत्पीडितमन्नेन दुःखं शुष्कं चिरात्सृजेत्।

स०-विडावृते मातरिश्वनि स्वस्थाने-अपानाख्ये, अधोविबन्धो जातविबन्धत्वात् परिकृन्तति। स्नेहश्चाशु जरां याति। भुक्ते च सति नर आनह्यते-आध्माप्यते। शकृदन्नेन पीडितं चिरेण शुष्कं दुःखं कृच्छ्रेण सृजेत्।

सर्वधात्वावृते वायौ श्रोणिवङ्क्षणपृष्ठरुक्॥४१॥

विलोमो मारुतोऽस्वस्थं हृदयं पीड्यतेऽति च।

स०-सर्वधात्वावृतेऽनिले श्रोण्यादिरुक् स्यात्। तथा, पवनो विगुणो भवति। हृदयं च व्याकुलं [अति] पीड्यते च।

भ्रमो मूर्च्छा रुजा दाहः पित्तेन प्राण आवृते॥४२।\

विदग्धेऽन्ने च वमनम्

स०-प्राणे पित्तेनावृते भ्रमाद्याः स्युः। अन्ने च विदाहावस्थां प्राप्ते सति वमनं स्यात्।

उदानेऽपि भ्रमादयः।

दाहोऽन्तरूर्जाभ्रंशश्च

स०-उदाने च पित्तेनावृते सति भ्रमाद्याः-पूर्वोक्ताः, स्युः। तथा, अन्तर्दाह ऊर्जायाः-बलस्य च, विनाशः।

दाहो व्याने च सर्वगः॥४३॥

क्लमोऽङ्गचेष्टासङ्गश्च ससन्तापः सवेदनः।

स०-व्याने च पित्तेनावृते सर्वशः(गः)-अन्तर्बहिश्च दाहः, क्लमादयश्च स्युः।

समान ऊष्मोपहतिरतिस्वेदोऽरतिः सतृट्॥४४॥

दाहश्च स्यात्

स०-समाने पित्तेनावृते ऊष्मणः-अग्नेः, उपहतिः-उपघातः, अतिस्वेदादयश्च स्युः।

अपाने तु मले हारिद्रवर्नता।

रजोतिवृत्तिस्तापश्च योनिमेहनपायुषु॥४५॥

स०-अपाने पुनः पित्तेनावृते सति मले-पुरीषादौ, हारिद्रवर्णता स्यात्। योन्यादिषु रुजः-पीडयाः, अतिवृत्तिस्तापश्च स्यात्।

श्लेष्मणा त्वावृते प्राणे सादस्तन्द्राऽरुचिर्वमिः।

ष्ठीवनं क्षवथूद्गारनिःश्वासोच्छ्वाससङ्ग्रहः॥४६॥

स०-प्राणे च श्लेष्मावृते सादादयः स्युः।

उदाने गुरुगात्रत्वमरुचिर्वाक्स्वरग्रहः।

बलवर्णप्रणाशश्च

स०-उदाने च श्लेष्मावृते गुरुगात्रत्वादयः स्युः।

व्याने पर्वास्थिवाग्ग्रहः॥४७॥

गुरुताऽङ्गेषु सर्वेषु स्खलितं च गतौ भृशम्।

स०-व्याने कफावृते पर्वास्थिवाग्ग्रहस्तथाऽङ्गेषु गौरवं गतौ च स्खलनं स्यात्।

समानेऽतिहिमाङ्गत्वमस्वेदो मन्दवह्निता॥४८॥

स०-समाने कफावृतेऽशीताङ्गत्वमस्वेदो मन्दाग्नित्वं च स्यात्।

अपाने सकफं मूत्रशकृतः स्यात्प्रवर्तनं।

स०-अपाने कफावृते मूत्रशकृतः प्रवर्तनं सकफं स्यात्।

इति द्वविंशतिविधं वायोरावरणं विदुः॥४९॥

स०-इति-अनेन प्रकारेण, वायोरावरणं द्वाविंशतिप्रकारं [विदुः-] जानन्ति, तन्त्रकृत इति शेषः।

प्राणादयस्तथाऽन्योन्यमावृण्वन्ति यथाक्रमम्।

सर्वेऽपि विंशतिविधं विद्यादावरणं च तत्॥५०॥

स०-प्राणादयः-पञ्च वायवः, अन्योन्यं-परस्परं, आवृण्वन्ति यथाक्रमं-यथासङ्ख्यं, तथा-तेनोक्तेन प्रकारेण, यथा पित्तकफाभ्यं प्राणादय आवृतास्तथा प्राणादयोऽन्योन्यमावृण्वन्तीति तथाशब्दस्यार्थः। तत्र यथा,-प्राणेनोदानादयश्चत्वार आव्रियन्ते, तथैवोदानादिभिरपि प्राण आव्रियते। एवमुदानेन व्यानादयस्त्रय आव्रियन्ते, व्यानादिभिश्च त्रिभिरुदानः। तथा व्यानेन समानापानौ, तथा समानापानाभ्यां व्यानः। समानेनापानः, अपानेनाऽपि समान आव्रियते। इत्येकद्वित्रादिक्रमेणाप्येवमावरणं निरूप्यम्। एवं च सर्वेऽपि परस्परमावृण्वन्ति। तच्चावरणं विंशतिभेदं विद्यात्।

अथास्यावरणस्य लिङ्गमाह-

निःश्वासोच्छ्वासस्ंरोधः प्रतिश्यायः शिरोग्रहः।

हृद्रोगो मुखशोषश्च प्राणेनोदान आवृते॥५१॥

उदानेनावृते प्राणे वर्णौजोबलसङ्क्षयः।

स०-प्राणेनोदान आवृते निःश्वासोच्छ्वाससंरोधादयः स्युः। उदानेन प्राण आवृते वर्णौजोबलसङ्क्षयः स्यात्। ननु च, पित्तादिभिः प्राणादीनामावरणं युक्तम्। परस्परं तु प्राणादीनां यदावरणं तदमूर्तत्वादनुपपन्नमिव मन्यामहे। ब्रूमः। द्वयोर्वातयोरन्योन्यमुपसर्पतोर्बलवता दुर्बलस्याभिघातेन गतिभङ्गात्स तेनावृतमार्ग इत्युच्यते। तस्माद्वातानामपि परस्परमावरणं युक्तमेव।

दिशाऽनया च विभजेत्सर्वमावरणं भिषक्॥५२॥
स्थानान्यवेक्ष्य वातानां वृद्धिं हानिं च कर्मणात्।

स०-अनया दिशा-दिङ्मात्रप्रदर्शनेन, सर्वमावरणं विभजेद्भिषक्। इयं चात्र दिक्,-उदानेनावृतेऽपाने छर्दिश्वासकासादयः स्युस्तथाऽल्पोऽग्निरतिसारश्च। उदानेऽपानेनावृते बस्त्याध्मानोदावर्तगुल्माल्पाग्निपरिकर्तिकाः स्युः। अपाने व्यानेनावृते विण्मूत्ररेतसामतिप्रवृत्तिः। व्याने समानेनावृते मूर्च्छातन्द्राप्रलापाङ्गसादवह्न्योजोबलक्षयः। व्यान उदानेनावृते च श्यावास्यता स्तब्धताऽल्पाग्निता स्वेदश्चेष्टाहानिर्निमीलनमिति। एवमन्यदप्यावरणं भिषक् स्वमनीषया यथाशास्त्रसंस्कारवत्या विभजेत्। ग्रन्थकृता तु ग्रन्थगौरवभयान्नोक्तम्। कथं विभजेत्? इत्यत्र युक्तिं दर्शयति-स्थानानीत्यादि। स्थानानि-पक्वाशयादीनि दोषभेदीयोक्तानि, वातानां-प्राणादीनां, अवेक्ष्य। तथा, वृद्धिं-आवरकवायुसम्बन्धिनां वैकृतकर्मणां, अवेक्ष्य-ज्ञात्वा। तथा, आवार्यमरुतां हानिमवेक्ष्य, सर्वमावरणं-अनुक्तमपि, विभजेत्। यथा-उत्साहोच्छ्वासचेष्टादीनि कर्माणि प्राणादिसम्बन्धीनि यदा हीनानि दृश्यन्ते उदानादीनां कर्माणि वाक्प्रवृत्त्यादीनि वृद्धानि तदैवं ज्ञातव्यम्, यथा-प्राण उदानादीनामेकेन द्वाभ्यां त्रिभिश्चतुर्भिर्वा आवृत इति। एवमुदानादिष्वपि प्राणादिभिरावरणं विभागीकार्यम्।

अधुनाऽस्या आवृतेरसङ्ख्येयत्वमपि दर्शयन्नाह-

प्राणादीनां च पञ्चानां मिश्रमावरणं मिथः॥५३॥
पित्तादिभिर्द्वादशभिर्द्वादशभिर्मिश्राणां मिश्रितैश्च तैः।

स०-प्राणादीनां पञ्चानां वायूनां परस्परमावार्यावरकत्वेन स्थितानां मिश्रं-द्वयेन त्रयेण चतुष्टयेन च, मिथः-परस्परं, आवरणमवेक्ष्य यात्यावृतिरसङ्घातामिति सम्बन्धः। तथा, पित्तादिभिर्द्वादशभिः-धात्ववसानैः, मिश्राणां प्राणादीनां मिश्रं मिथ आवरणमेवक्ष्य यात्यावृतिरसङ्घतामिति योज्यम्। अत्र चैषा उदाहरणदिग्द्रष्टव्या,-प्राणेन द्वादशविधेन पित्तादिभिर्मिश्रितत्वात् चतुर्णामुदानादीनामावरणं विभजेत्। तथा, चतुर्भिरुदानादिभिः पित्तस्यावरणं प्रत्येकं द्वादशविधैर्द्वादशविधस्यैकस्य प्राणस्यावरणमिति। तैरित्यनेन प्राणादयः परामृश्यन्ते। तैः-पित्ताद्यावरणमिश्रितैः प्राणादिभिः, परस्परमावार्यावरकत्वेन स्थितैर्मिश्रमावरणमवेक्ष्य यात्यावृतिरससङ्घतामिति योऽज्यम्। चः समुच्चये।

मिश्रैः पित्तादिभिस्तद्वन्मिश्रणाभिरनेकधा॥५४॥
तारतम्यविकल्पाच्च यात्यावृतिरसङ्घताम्।
तां लक्षयेदवहितो यथास्वं लक्षणोदयात्॥५५॥
शनैःशनैश्चोपशयाद्गूढामपि महुर्मुहुः।

स०-तैस्तुल्यं तद्वत्। यथा प्राणादीनां पित्तादिभिर्द्वादशभिर्मिश्राणां मिश्रमावरणं मिथस्तथा मिश्रैश्च तैः-प्राणादिभिः, यथा मिश्रमावरणं मिथस्तथैव मिश्रैः-संयुक्तैरेतैः पित्तादिभिर्न केवलैः, प्राणादीनां मिश्रमावरणं मिथस्तथा मिश्रैः पित्तादिभिर्ये प्राणादयो मिश्रितास्तैस्तथाभूतैः प्राणादीनामावरणम्। एवमनेकधा मिश्रणाभिः-बहुभिः संयोजनैः, आवृतिरसङ्घतां याति। तथा तारतम्यविकल्पाच्च प्राणदीनांमावृतिरसङ्घतां याति-सङ्घामतिक्रम्य गच्छति। तां-आवृतिं, तेषां प्राणादीनां गूढां-दुर्लक्ष्यामपि, अवहितः-तज्ज्ञानाय तत्परः सन्, लक्षयेत्-जानीयात्। कथम्? यथास्वं लक्षणोदयात्। तेषां प्राणादीनां यथायथं लक्षणोदयात्-आत्मीयाल्लिङ्गोद्भवात्, शनैःशनैः-न झटित्येव, तथा मुहुर्मुहुः-क्षणे क्षणे लक्षयेत्, न तु सकृदेव, प्राणादीनां यथास्वं लक्षणोदयाज्जानीयादिति। न केवलं केवला-द्यथास्वं लक्षणोदयात् प्राणादीनामावृतिं लक्षयेत्, यावदुपशयादप्येषां गूढामप्यावृतिमवगच्छेत्। तत्र प्राणादीनामेकैकेनान्योन्यावरणे विंशतिर्भेदाः। एवमेकेन द्वयोर्द्वाभ्यां चैकस्यावरणे निरूप्यमाणे त्वमी भेदाः- प्राणस्योदानव्यानाभ्यामन्योन्यावरणे द्वौ भेदौ। एवमुदानसमानाभ्यामुदानापानाभ्यां [व्यानसमानाभ्यां व्यानापानाभ्यां समानापानाभ्यां] च सहान्योन्यावरणे पराणि पञ्च द्विकानि,

इति प्राणस्य द्वादश भेदा भवन्ति। उदानस्य षट्। व्यानस्य द्वौ। एवं व्यानस्योदानादिभिस्त्रिभिरन्योन्यावरणे षट्। उदानस्य द्वौ। प्राणस्योदानादिभिश्चतुर्भिर्द्वौ चान्योन्यावरणाद्भेदौ भवतः। तथा, प्राणादीनां पित्तादिभिर्द्वादशभिरावृतत्वात् द्वादशप्रकाराणामन्योन्यानां मिश्रणात् चत्वारिंशतानि विंशत्युत्तराणि भवन्ति। एवमन्यदप्यावरणं निरूप्यम्।

विशेषाज्जीवितं प्राण उदानो बलमुच्यते॥५६॥
स्यात्तयोः पीडनाद्धानिरायुषश्च बलस्य च।

स०-प्राणादयः सर्व एव वाता जीवितम्, विशेषेण तु प्राणाख्यो वायुर्जीवितमुच्यते। तथा, उदानाख्यो वायुर्विशेषेण बलमुच्यते। यतश्चैवमतस्तयोः-प्राणादानयोः, पीडनात्-क्षोभणात्, यथास्वमायुषो बलस्य च हानिर्भवेत्। तस्माद्धेतोः प्राणोदानाख्यौ पवनावाहारादिना यत्नेन भिषजा रक्ष्यौ। तथा च वक्ष्यति (हृ. चि. अ. २२।६९)-"प्राणो रक्ष्यश्चतुर्भ्योऽपि तत्स्थितौ देहसंस्थितः।" इति।

आवृता वायवोऽज्ञाता ज्ञाता वा वत्सरम् स्थिताः॥५७॥
प्रयत्नेनापि दुःसाध्या भवेयुर्वाऽनुपक्रमाः।

स०-वातादीनामन्यमेनावृता इत्येवमज्ञाताः-सम्यगनिश्चिताः, वर्षोषिताः प्रयत्नेनापि दुःसाध्याः-कृच्छ्रसाध्या भवेयुः। ज्ञाता वा-पित्तादिना आवृता यथावत्सम्यङ्निश्चयं गताः, वत्सरं स्थिताः। वाशब्द एवार्थे, अनुपक्रमा एव भवेयुः। ततो वाता आवृतेः प्रयत्नेन रक्षणीयाः।

विद्रधिप्लीहहृद्रोगगुल्माग्निसदनादयः॥५८॥
भवन्त्युपद्रवास्तेषामावृतानामुपेक्षणात्॥५८ १/२॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां तृतीये निदानस्थाने वातशोणितनिदानं नाम षोडशोऽध्यायः॥ १६॥

****

स०-तेषां-वायूनां, आवृतानामुपेक्षणात्-अचिकित्सनात्, विद्रध्यादय उपद्रवा जायन्ते। तस्मात्तदुपक्रमे यतितव्यमिति।

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टाङ्गहृदयटीकायां सर्वाङ्गसुन्दराख्यायां तृतीये निदानस्थाने वातशोणितनिदानं नाम शोडशोऽध्यायः समाप्तः॥ १६॥

****

चिकित्सितस्थानम्।

प्रथमोऽध्यायः।

श्रीगणेशाय नमः। श्रीसरस्वत्यै नमः। श्रिगुरुभ्यो नमः। अथेदानीं चिकित्सितस्थानस्यारम्भः। तस्य चायं सम्बन्धः। रोगपरीक्षा निदानस्थाने गदिता। साम्प्रतं चिकित्सा वक्तुं युक्ता। तथा च मुनिः (च. सू. अ.२०/२ ०)-"रोगमादौ परीक्षेत ततोऽनन्तरमोषधम्।" इति। तस्माच्चिकित्सितस्थानारम्भो न्याययः। तत्र यथोद्देशो व्याधीनां निदानस्थाने, तेनैव क्रमेणास्य स्थानस्य विरचना युक्तेति ज्वरचिकित्सितमेव विवक्षुराह-

अथातो ज्वरचिकित्सितं व्याख्यास्यामः।

इति ह स्माहुरात्रेयादयो महर्षयः।

(गद्यसूत्रे॥२॥)

स०-इति ह स्माहुरात्रेयादयो महर्षय इत्यनेनागमशरणत्वमात्मनः प्रतिपादयति।

आ० र०- अथ चिकित्सास्थानमारभ्यते, निदानस्थानानन्तरत्वात्। तत्रादौ ज्वरचिकित्सा[माह]-अथात इति। व्याख्या पूर्ववत्। चिकित्सितं-व्याधिप्रतीकारः, तं व्याख्यास्याम इति।

आमाशयस्थो हत्वाऽग्निं सामो मार्गान् पिधाय यत्।

विदधाति ज्वरं दोषस्तस्मात्कुर्वीत लङ्घनम्॥१॥

प्रागूपेषु ज्वरादौ वा, बलं यत्नेन पालयन्।

बलाधिष्ठानमारोग्यमारोग्यार्थः क्रियाक्रमः॥२॥

स०-आमाशयस्थो दोषो वह्निं हत्वा। सहामेन वर्तत इति सामः। तथ, मार्गान् पिधाय-स्रोतांसि स्थगयित्वा, यत्यस्माद्धेतोः, ज्वरं विदधाति, तस्मात्कारणाल्लङ्घनं कुर्वीत। लङ्घनमत्रोपवासः। तथा चोक्तम्। "लङ्घनस्याविशेषोक्तावुपवासं प्रकल्पयेत्।" इति। अत एवायमपि वक्ष्यति (श्लो. १०)-"तस्मादादोषपचनाज्जवरितानुपवासयेत्।" इति। कदा लङ्घनं कुर्वीत ? इत्याह-प्रागूपेषु-पूर्वलक्षणेषूत्पन्नमात्रेष्वेव, ज्वरादौ वा-उत्पन्नमात्रे ज्वरे सति। किं कुर्वन् लङ्घनं कुर्वीत ? इत्याह-बलं यत्नेन पालयन्, -प्राणास्तात्पर्येण रक्षन्, तदविरोधेनेत्यर्थः। ननु, कुत एवं विधीयते ? इत्याह-बलाधिष्ठानमित्यादि। यस्मादारोग्यं-स्वास्थ्यं, बलाधिष्ठानम्। बलमधिष्ठानं-आश्रयो, यस्य तदेवम्। तथा, क्रियाक्रम आतोग्यार्थः-स्वास्थ्यप्रयोजनः।

आ० र० - लङ्घनमाह-आमाशयस्थ इति। आमाशयस्थत्वादिचतुष्टयं लङ्घनसाध्यत्वे हेतुः। प्रागूपज्ञानदिने लङ्घनं कार्यम्। तदतिक्रमे [ज्वरादौ] रूपज्ञानदिने॥ लङ्घनस्यारोग्यार्थत्वात्, आरोग्यस्य बलाधीनत्वात्, यावन्न बलक्षयस्तावत् [लङ्घनं] कार्यम्। वङ्गसेने तु (ज्वराधिकारे श्लो.१४१)-"ज्वरस्य पुर्वरूपेषु वर्तमानेषु बुद्धिमान्। पाययेत्सर्पिरच्छं तु ततः स लभते सुखम्॥ विधिर्मारुतजेष्वेश पैत्तिकेषु विरेचनम्। मृदु प्रच्छर्दनं तद्वत् कफजेषु विधीयते॥ सर्वं त्रिदोषजेषूक्तं यथादोषं विकल्पयेत्।" इति। एतच्च प्रकृतिदेशकालादिभिर्दोषस्य ज्ञाने सति ज्ञेयम्, पूर्वरूपेणाज्ञानात्। तत्र च लङ्घनमेवानिषिद्धम्।

लङ्घने विहिते सति यत्स्यात् तदाह-

लङ्घनैः क्षपिते दोषे दीप्तेऽग्नौ लाघवे सति।
स्वास्थ्यं क्षुत्तृड् रुचिः पक्तिर्बलमोजश्च जायते॥३॥

स०-लङ्घनैः-उपवासैः, दोषे-पूर्वोक्ते, क्षपिते-क्षयं नीते, तथाऽग्नौ दीप्ते-समिद्धे सति, तथा लाघवेऽङ्गानां सति, स्वास्थ्यादि जायते। स्वास्थ्यं-यथाप्रकृतित्वम्। रुचिः-

अन्नाभिलाषः। पक्तिः-पाक आमस्य। बलं-उत्साहः। ओजः-परं धातुतेजः। क्षपिधातुरनुक्तोपि धातुगणे शिष्टप्रयोतवशादङ्गीकृतः। लङ्घनैरिति जातौ बहुवचनम्(?)। तेन कदाचिदेकेनैव लङ्घनेन कदाचिदनेकैर्दोषक्षयो जायत इति ज्ञेयम्।

आ०र०- लङ्घनफलमाह-लङ्घनैरिति। लङ्घनानि द्वादश वमन विरेचनबस्तिनस्यरक्त-स्रावदीपनपाचनान्नवर्जनोदकवर्जनव्यायामातपमारुतभेदाद्भवन्ति।

तत्रोत्कृष्टे समुत्क्लिष्टे कफप्राये चले मले।

सहल्लासप्रसेकान्नद्वेषकासविषूचिके॥४॥

सद्योभुक्तस्य सञ्जाते ज्वरे सामे विशेषतः।

वमनं वमनार्हस्य शस्तं

स०-तत्र-तस्मिन्मले, उत्कृष्टे-स्वजन्मगुणकर्मलक्षणतोऽधिके। तथा, कफप्राये-कफबहुले वाताख्ये पित्ताख्ये वेति सामर्थ्याद्गम्यते। समुत्क्लिष्टे-स्वस्थानाच्चलिते बहिरेनिर्याते। तथा, चले-शिथिले, उत्क्लिष्टेऽपि हि कदाचित् स्थानावष्टम्भादचलः स्यात्। एतदेव कफोत्क्लिष्टादिकं दर्शयति-सहल्लासेस्यादि। हल्लासादीनां द्वन्द्वः। सह तैर्वर्तते यस्तस्मिन्। हल्लासः-उद्वमनमिवानुभवः। उद्वमनं-हृदयस्य। प्रसेकः-पानीयस्येव निष्ठीवनम्। सद्योभुक्तस्येत्यादि। ईदृशो मले सति सद्यः कृताहारस्य ज्वरे सञ्जाते विशेषण सामे ज्वरे ज्वरे वमनार्हस्य वमनं शस्तम्। वमनार्हाः-वमनविरेचनविधौ प्रोक्ताः।

आ० र०- ज्वरविशेषे वमनमाह-तत्रोत्कृष्ट इति। उत्कृष्टदोषादिष्वेकादशेषु ज्वरेषु वमनं शस्तम्। तथाऽपि सामे विशेषेण। उत्कृष्टः-अतिप्रभूतः। समुत्क्लिष्टो-बहिर्निर्जिगमिषुः। कफप्रायः-श्लेष्मबहुलः। चलः-चञ्चलः।

कुर्यात्तदन्यथा॥५॥

श्वासातीसारसम्मोहहृद्रोगविषमज्वरान्।

स०-अन्यथा-उक्तविधिविपर्ययेण, तत्-वमनं कृतं, श्वासादीन् कुर्यात्। तथा,- अनुत्क्लिष्टः कफाप्रधानः स्थिरो हृल्लासादिरहितो-विपरीतः।

आ० र० - अन्यथावमने दोषमाह-कुर्यात्तदिति।

वमनद्रव्याण्याह-

पिप्पलीभिर्युतान् गालान् कलिङ्गैर्मधुकेन वा॥ ६॥
उष्णाम्भसा समधुना पिबेत्सलवणेन वा।
पटोलनिम्बककोंटवेत्रपत्रोदकेन वा॥ ७॥
तर्पणेन रसेनेक्षोर्मद्यैः कल्पोदितानि व।
वमनानि प्रयुञ्जीत बलकालविभागवित्॥ ८॥

स०-गालो-मदनफलम्, अस्य निरपायत्वाच्छ्रेष्ठत्वाच्चपिप्ल्यादिद्रव्येभ्योऽनेन सहोपयोगिभ्यो बहूपयोगितया प्रधावविभक्त्या प्रागुपन्यासः। अन्यथा "कल्पयेत्सदृशान् भागान् प्रमाणं यत्र नोदितम्।" (हृ. क. अ. ६१२४) इति मदनफलेन पिप्पल्यादीनां च तुल्यं प्रमाणं प्राप्नुयात्। पिप्पलीभिर्युतान् गालानथवा शक्रयवैर्युतानथवा मधुयष्टिकया वा युतानथवोष्णाम्बुना माक्षिकयुतेन वा सह पिबेत्। अथवा पटोलादीनां पत्रोदकेन वा सह पिबेत्। अथवा तर्पणादिभिः पिबेत्। अथवा कल्पोदितानि-वमन्कल्पोक्तानि वमनानियोग्यानि प्रयुञ्जीत। बलकालविभागविदिति अस्यां देहबलावस्थायां तथा व्याधिबलावस्थायां चेदं वमनं दातुं योग्यमिति यो विभागं वेत्ति स बलकालविभागवित्।

आ० र० - वमनयोगानाह-पिप्पलीभिर्युतानिति। पिप्पलीन्द्रयवयष्टीमधुयुक्तैर्मदनफलैस्त्रयः। समधूष्णोदकसलव णोदकपटोलाद्युदकमदे(न्थे)क्षुरसमद्यैरालोडनार्थे प्रत्येकम्। कल्पोदितानि

वा-यथालाभं यथासात्म्यं यथादोषं च प्रयोगार्थमनेकधोपदेशात्। अत एवोक्तं बलकालविभागवित्। एवं सर्वत्र ज्ञेयम्।

कृतेऽकृते वा वमने ज्वरी कुर्याद्विशोषणम्।
दोषाणां समुदीर्णानां पाचनायशमाय च॥९॥

स०-वमने योग्यो यो ज्वरी स कृते वमने, अपरस्तु वमनेऽयोग्यः सोऽकृते वमने, विशोषणं-उपवासलक्षणं, कुर्यात्। एवं कृतवमनोऽकृतवमनो वा ज्वरी सर्वथा लङ्घनं कुर्यात्। किमर्थम्? इत्याह-दोषाणां-वातादीनां, समुदीर्णानां-समन्तात्समुत्थानां, पाचनाय-पक्त्यर्थं, शमाय-शान्त्यर्थं च। निरमाणां पुनः समुदीर्णानं शान्त्यर्थमेव।

आ० र० - अन्नवर्जनमाह-कृतेऽकृते वेति। कृते वमने वमनयोग्यत्वाभावादकृते वा। अपक्कानां पाचनाय, पक्कानां शमनाय।

दोषेण भस्मनेवाग्नौ छन्नेऽन्नं न विपच्यते।
तस्मादादोषपचनाज्ज्वरितानुपवासयेत्॥१०॥

स०-दोषेण-आमाख्येन वातादिना वा सहैकलोलीभूतेन, अग्नौ छन्ने-च्छादिते, अन्नमामाशयस्थं न विपच्यते भस्मनेव। यथा बाह्योऽग्नौ स्थगिते तोयतण्डुलादिकं स्थालीस्थं न विपच्यते, तथैवामाशयस्थमन्नमामेन छन्नेऽगौ न विपच्यते। यतश्चैवं तस्माद्धेतोरामदोषस्य-पूर्वोक्तस्य, पचनं-पाकमवधिं कृत्वा, ज्वरितान्नरानुपवासयेत्।

आ० र० - विशेषेण युक्तिमाह-आमेन भस्मनेवेति।

तृष्णगल्पाल्पमुष्णाम्बु पिबेद्वातकफज्वरे।
तत्कफं विलयं नीत्वा तृष्णामाशु निवर्तयेत्॥११॥

उदीर्य चाग्निं स्रोतांसि मृदूकृत्य विशोधयेत्।

लीनपित्तानिलस्वेदशकृन्मूत्रानुलोमनम्॥ १२॥

निद्राजाड्यारुचिहरं प्राणानामवलम्बनम्।

विपरीतमतः शीतं दोषसङ्घातवर्द्धनम्॥ १३॥

स०- [तृष्णक्-] तृष्णावान्नरः, अल्पाल्पं-स्तोकं स्तोकं, वातकफज्वरे उष्णाम्बु पिबेत्। तृष्णागिति " स्वपितृषोर्नजिङ्" इति नजिङ्। अल्पाल्पमिति "प्रकारे गुणवचनस्य" इति द्वित्वम्। तत्-उष्णाम्बु पीतं, कफं-वातस्त्यानं, विलयं नीत्वा-विलीनविग्रहतामापाद्य, तृष्णामाशु निवर्तयेत्, तर्पण स्वभावत्वात्। तथा, अग्निमुदीर्य-समिद्धं कृत्वा, स्रोतांसि विशोधयेत्। किं कृत्वा ? मृदूकृत्य,-तेषां स्रोतसां मार्दवमुत्पाद्य। तथा, लीनानि-अप्रवृत्तस्वरूपाणि च, तानि पित्तानिलस्वेदशकृन्मूत्राणि च, तेषामनुलोमनं-प्रवर्तनम्। तथा, प्राणानां-जीविताख्यानां, अवलम्बनम्। तदुष्णं जलमाश्रित्य तथा प्राणाः प्रवर्तन्त इत्यर्थः। अनेन चोष्णाम्बुकर्मकथनव्याजेन वातकफज्वरस्वरूपमपि किञ्चित् प्रकाशयति। यथा,- वातशोषितेन कफेन स्त्यानीभूतेनात्र तृष्णा जायते, तथाऽधिकमग्निमान्द्यम्, स्रोतसामशुद्धत्वम्, तथा लीनानि पित्तादीन्यत्र स्युः, इति।

आ० र०- उदकवर्जनमाह-तृष्णगल्पाल्पमिति। तच्च न सर्वथा, किञ्चाल्पाल्पमुष्णाम्बु षडङ्गादिषृतं वा। तत्राद्यं वातकफज्वरे, द्वितीयं पित्तज्वरादौ। तृष्णक्-तृषावान्।

उष्णाम्बुगुणानाह-तत्कफं विलयं नीत्वेति। लीनानां पित्तादीनामनुलोमनम्।

शीताम्बुदोषानाह-विपरीतमतः शीतमिति। दोषसङ्घातः-आमपित्तश्लेश्मरसादिसङ्घात।

उष्णमेवंगुणत्वेऽपि युञ्ज्यान्नैकान्तपित्तले।

उद्रिक्तपित्ते दवथुदाहमोहातिसारिणि॥ १४॥

विषमद्योत्थिते ग्रीष्मे क्षतक्षीणेऽस्रपित्तिनि।

स०-एवंगुणमप्युष्णाम्बु एकान्तपित्तले-केवलपित्तले ज्वरिणि, वा, न युञ्ज्यादिति। तथा, उद्रिक्तं-अधिकं, पित्तं यस्मिंस्तस्मिंश्च न युञ्ज्यात्। तथ, तदुष्णाम्बु दवथ्वादिमति नरे न युञ्ज्यात्। चक्षुरादिभ्यो यस्तीव्र ऊष्मा प्रवर्तते स दवथुः। सर्वाङ्गीणस्तीव्र ऊष्मा-दाहः। मोहो-भ्रमः। तथा, विषमद्याभ्यामित्थिते-जाते ज्वरे। तथा, ग्रीष्मकाले। तथा, क्षतश्च क्षीणश्च क्षतक्षीणः, क्षतः-उरःक्षतः, क्षीणो-धात्वपचयवान्, तस्मिंस्तथाभुते नरे न युञ्ज्यात्। तथा,अस्रपित्तनि-रक्तपित्तवति [नरे, न युञ्जयात्]।

आ० र० - उष्णाम्बु ज्वरविशेषे निषेधति-उष्णमेवंबुणत्वेऽपीति। एकान्तपित्तले-पित्तज्वरे। उद्रिक्तपित्ते-संसर्गजे सन्निपातजे वा। दवथुः-इन्द्रियसन्निपाद्यः (?)।

घनचन्दनशुण्ठ्यम्बुपर्पटोशीरसाधितम्॥ १५॥

शीतं तेभ्यो हितं तोयं पाचनं तृड्ज्वरापहम्।

स०-तेभ्यः-उद्रिक्तपित्तादिभ्यः पिपासितेभ्यो, घनादिसाधितं शीतं तोयं हितम्। पानीयसाधने च तन्त्रान्तरे विधिरुक्तो यथा-"कर्षं गृहीत्वा द्रव्यस्य तोयस्य प्रस्थमावपेत्। अर्धावशेषं तद्ग्राह्यं तोयपाने त्वयं विधिः॥" इति।

आ० र० - निषेद्धो [ष्णो] दकानां शीतोदकमाह-घनचन्दनेत्यादि। [चन्दनशब्देन रक्तचन्दनं ग्राह्यम्,] "चन्दने रक्तचन्दनम्" इति वचनात्।

ऊष्मा पित्ताद्दते नास्ति ज्वरो नास्त्यूष्मणा विना॥ १६॥

तस्मात्पित्तविरुद्धानि त्यजेत् पित्ताधिकेऽधिकम्।

स०-पित्तं विना ऊष्मा न विद्यते, ज्वरश्चोष्मणा विना नास्ति, सन्तापलक्षणत्वात् ज्वरस्य। यतश्चैवं तस्माद्यानि पित्तस्य वितुद्धान्याहारविहारादीनि तानि सर्वस्मिन् ज्वरे

त्यजेत्। पित्ताधिके पुनरधिकं कृत्वा-अतिशयेन, त्यजेत्। पित्ताधिक इत्यत्राधिकग्रहणेनेदं प्रतिपादयति,-सर्वो ज्वरस्त्रिदोषजो भूयसा तु व्यपदेश इति।

आ० र० -ऊष्मा-सन्तापः। सर्वस्मिन् ज्वरे निषेधः, पित्ताधिके त्वधिकम्। रागप्राप्तस्यायं निषेधो न विधिप्राप्तस्योक्तो(ष्णो)दकादेः।

स्नानाभ्यङ्गप्रदेहांश्च परिशेषं च लङ्घनम्॥ १७॥

स०-न केवलं ज्वरे पित्तविरुद्धानि त्यजेत्। यावत् स्नानादींश्च त्यजेत्। स्नानादीनां पित्तहरत्वाशङ्कया सेव्यत्वे प्राप्तेऽचिन्त्यप्रभावत्वात् ज्वरे विरुद्धानीति तत्सेवनं निषेधति। प्रदेहः चन्दनाद्यनुलेपः। परिशेषं च लङ्घनं त्यजेत्, यल्लङ्घनमुपयुक्तमुपवासलक्षणं ततो यदन्यत्तत् परिशेषम्,-शुध्द्याद्येकादशप्रकारं च, तत्त्यजेत्। उपवासलक्षणं तु लङ्घनं नवज्वरे कर्तव्यमेव।

आ० र० - स्नानादीनि ज्वरे निषधति-स्नानाभ्यङ्गप्रदेहां श्चेति। प्रदेहः-अनुलेपनम्। परिशेषं लङ्घनं-दीपनपाचनादि।

अजीर्ण इव शूलघ्नं सामे तीव्ररुजि ज्वरे।
न पिबेदौषधं तद्धि भूय एवाममावहेत्॥ १८॥
आमाभिभूतकोष्ठस्य क्षीरं विषमहेरिव।

स०-यथाऽजीर्णे सामे तीव्ररुज्यपि शूलघ्नमौषधं न पिबेत्, प्रत्यवायभयात्। तथैव सामे ज्वरे दारुणपीडावति तदानीमाम्पक्त्यर्थं मुस्तापर्पटकाद्यौषधं क्काथादिकल्पनाकल्पितं न पिबेत्। हि-यस्मात्, तत्-औषधं पीतं, अस्यामवस्थायामामाभिभूत कोष्ठस्य प्रयुक्तं भूय एवाममावहेत्। अत्र च साम इत्युक्ते बह्वाम इति गम्यते। अल्पे ह्यजीर्णे भेषजमनुज्ञातमेव। तथा चोवाच तन्त्रकारः (ह.सू.अ.८/१९)-"जीर्णाशने तु भैषज्यं युञ्ज्यात्स्तब्धगुरुदरे।

दोषशेषस्य पाकार्थमग्नेः सन्धुक्षणाय च॥" इति। तस्मात्सामो बह्वाम इति बोध्यम्। अथात्र दृष्टान्तमाहक्षीरं विषमहेरिव। यथा क्षीरं विषघ्नमप्यभिहितमहीनां तदेव विषं कुर्यात्।

आ० र० - निषेधे युक्तिमाह-अजीर्ण इव शूलघ्नमिति। यथा विषघ्नमपि क्षीरं विषाभिभूतकोष्ठे विषवर्धनम्, एव मामघ्नमप्यौषधं आमाभिभूतकोष्ठे आमवर्धनम्। वङ्गसेने तु(?)-"वैयात्याद्यधिकोऽप्यत्र भेदः कर्तुमिहेच्छति। कदा तेनैव कर्तव्यो मेदो नैवान्यथा भवेत्॥ कषायं पिप्पलीमूलत्रिवृच्चूर्णावचूर्णिकम्। सामज्वरे कफोरस्के एतत्स्रंसनमुच्यते॥ यवक्षरान्वितो यद्वा क्काथो धान्यपटोलयोः।" इति।

सोदर्दपीनसश्वासे जङ्घापर्वास्थिशूलिनि॥ १९॥

वातश्लेष्मात्मके स्वेदः प्रशस्तः, स प्रवर्तयेत्।

स्वेदमूत्रशकृद्घातान् कुर्यादग्नेश्च पाटवम्॥ २०॥

स०-उदर्दादयः प्रागुक्ताः। उदर्दश्च पीनसश्च श्वासश्च तैः सह वर्तते यो ज्वरस्तस्मिन्। तथा, जङ्घे, च पर्वाणि चास्थीनि च, तत्र शूलं, तद्विद्यते यस्य तस्मिंश्च। तथा, वातश्लेष्मात्मके वातकफोद्भवे स्वेदः प्रशस्तो-हितः। स आचरितः स्वेदादीन् प्रवर्तयेत्। अग्नेश्च पाटवं-दीप्ततरत्वं, विदध्यात्।

आ० र० - ज्वरविशेषे स्वेदमाह-सोदर्दपीनसश्वास इति। "उदर्द उक्तो वक्षोभिष्यन्दोऽन्यैः शीतवेपथुः। शीताम्बुस्पर्शजः शोथो रागकण्डूयुतोऽपरैः॥" इत्यायुर्वेदप्रकाशोक्तस्त्रिविधोऽप्युदर्दः।

स्वेदगुणानाह-स प्रवर्तयेत्। स्वेदमुत्रेति। स्वेदः स्वेदादीन् प्रवर्तयेत्। सिद्धयोगे तु (ज्वराधिकारे श्लो. १३१)-"खर्परभृष्ट [पटस्थितकाञ्जिकसिक्तो हि वालुकास्वेदः। शमयति वातकफामयमस्तकशूलाङ्गभङ्गादीन्॥"] इति।

स्नेहोक्तमाचारविधिं सर्वशश्चानुपलयेत्।

स०-तथा, स्नेहोक्तं-स्नेहविध्यध्याये कथितं, आचारविधिं च सर्वशोऽनुपालयेत्, कुर्यादित्यर्थः।

आ० र०- स्नेहविध्युक्तं नियममतिदिशति-स्नेहोक्तमिति। स्नेहोक्तमाचारविधिमिति उष्णोदकोपचारीति।

लङ्घनं स्वेदनं कालो यवाग्वस्तिक्तको रसः॥२१॥

मलानां पाचनानि स्युर्यथावस्थं क्रमेण वा।

स०-मलानां-सामानां वातादीनां पृथक्सिथतानां संसर्गस्थितानां सन्निपातस्थितानां च, समर्थ्यालङ्घनादयस्तिक्तरसावसानाः पाचनानि स्युः। यथावस्थं-अवस्थानतिक्रमेण। कस्याञ्चिज्जवरावस्थायां लङ्घनं-उपवासलक्षणं, मलानां पाचनं स्यात्। कस्याञ्चित् स्वेदनं स्यात्। [कस्याञ्चित्] कालः षडहाख्यः। कस्याञ्चिद्यवाग्वः-पेयाः। कस्याञ्चित्तिक्तको रसः-तिक्तरसाघ्रातद्रव्योपयोगः। एवमवस्थावशात् लङ्घनादयस्तिक्तरसान्ता मलानामेकैकशः पाचनानि स्युः। अथवा क्रमेणैव पाचनानि स्युः, यथा-लङ्घनं स्वेदनं च कृत्वा षडहादूर्ध्वं यवाग्वस्तिक्तको रसः पाचनान्यविपक्वानां मलानां तरुणे ज्वरे स्युः। तत्र "आमाशयस्थः" (श्लो.१) इत्यादिना ग्रन्थेन निर्दिष्टा लङ्घनयोग्यावस्था, "सोदर्दपीनस" (श्लो. १९) इत्यादिना च स्वेदनयोग्यावस्था, "इत्ययं षडहो नेयः" (श्लो. ३८) इत्यादिना च निर्दिष्टा कालयोग्यावस्था, "युक्त लङ्घितलिङ्गैस्तुतं" (श्लो. २४) इत्यादिना पेयायोग्यावस्था, "उद्रिक्तपित्ते" (श्लो. १४) इत्यादिना च तिक्तरसोपयोगयोग्यावस्था, इति यथावस्थं द्रष्टव्यम्। क्रमस्तु यथा,-वातश्लेष्मके सामे ज्वरे प्रथमं लङ्घनं कुर्वन्नेव स्वेदनं द्वित्रादिदिनलक्षणं च कालं लङ्घितलक्षणयुक्तस्य यवाग्वादिपेयाद्यन्नभुक्तस्यानन्तरं मुस्तापर्पटकादितिक्तरसोपयोगः, इति क्रमार्थः।

आ० र०- लङ्घनादीनां प्रयोगकालमाह-लङ्घनं स्वेदनमिति। लङ्घनं-वमनम्, क्षुत्तृषो कालशब्देन ग्रहणात्। यथावस्थमिति उत्कृष्टदोषाद्यवस्थायां वमन्म्, सोदर्दत्वाद्यवस्थायां स्वेद्रम, सामत्वमात्रावस्थायां कालः, क्षुद्बोधावस्थायां यवागूः, मृदुज्वरत्वाद्यवस्थायां तिक्तको रसः। अनुत्पन्नैतदवस्थे तु ज्वरे क्रमेण लङ्घनादीनि कुर्यात्।

ज्वरे "लङ्घनं कुर्वीत" इत्युक्तम्। अस्यविशिष्टविषयेऽपवादमाह-

शुद्धवातक्षयागन्तुजीर्णज्वरिषु लङ्घनम्॥२२॥

नेष्यते

स०-शुद्धेन वातेन-आमदोषाद्यदुष्टेन, यो ज्वरः स शुद्धवातज्वरः। क्षयेण-धात्वपचयादिलक्षणेन, यो ज्वरः स क्षयज्वरः। यश्च भूतविषवाय्वग्निसम्प्रहारादिसमुद्भवः स आगन्तुज्वरः। तथा, अतरुणो ज्वरः स जीर्णज्वरः। ते विद्यन्ते येषां त एवंभूताः। तेषु लङ्घनं नेष्यते।

आ० र०- ज्वरविशेषे लङ्घनं निषेधति-शुद्धवातक्षयेति। शुद्धवातः-निरामवायुः। क्षयो-राजयक्ष्मा। आगन्तुः-अभिघातादिजः। जीर्णः-चिरकालजः।

तेषु तर्हि किं कार्यम्? इत्याह-

तेषु हि हितं शमनं यन्न कर्शनम्।

स०-हि-यस्मात्, तेषु-शुद्धवातादिज्वरेषु, शमनं हितम्। शमनस्य सन्तर्पणापतर्पणरूपेण द्वैविध्यात् किं तच्छमनं तेभ्यो हितम्? इत्याह-यन्न कर्शनम्, बृहणमित्यर्थः। यद्येवं तत्स्पष्टमेव बृंहणमित्येतदेव कस्मान्न कृतम्? किं शमनं यन्न कर्शनमिति पदद्वयोपादानेन? ब्रूमः। अर्थान्तरद्योतनार्थमेतदुक्तम्। तथा चायमर्थो विशिष्ट

उभययोरुपादानेन प्रकाश्यते। यथा-न सर्वसर्विकया यद्बृहणं शमनं तत्तेभ्यो हितम्। किन्तर्हि ? किञ्चिद्बृहणं शमनं तत्तेभ्यो हितमिति।

आ० र० - यस्मात्, तेषु शमनं हितम्। किं लङ्घनभेदः ? नेत्याह-यन्न कर्शनम्, -बृंहणभेद इत्यर्थः। "बृंहणं शमनं त्वेव वायोः पित्तानिलस्य च।" (हृ.सू.अ. १४१७) इति वचनात्। वैत्राशम्यमात्र(?)निवारकबृंहणलाभार्थं शमनशब्दोक्तिः। वङ्गसेने तु (ज्वराधिकारे श्लो.१६६)-"कार्यं न बाले वृद्धे वा।" इति।

तत्र सामज्वराकृत्या जानीयादविशोषितम्॥२३॥

द्विविधोपक्रमज्ञानमवेक्षेत च लङ्घने।

स०-[तत्र-] तेषु ज्वरेषु, मध्ये, सामज्वरस्याकृत्या लक्षणेन "ज्वरोपद्रवतीक्ष्णत्वं" (हृ. नि. अ. २१५४) इत्यादिना, अविशोषितं-अलङ्घितं, विद्यात्। लङ्घने-लङ्गनलक्षणापेक्षया, द्विविधोपक्रमज्ञानं-द्विविधोपक्रमणीयाध्यायोक्तलक्षणं, चवेक्षेत। तल्लक्षणं-च-"विमलन्द्रियता सर्गो मलानां" (हृ.सू.अ.१४११७) इत्यादि। "अतिकार्श्यं" (हृ,सू.अ. १४१२९) इत्यादिभिरति लङ्घितं च।

आ० र० - अलङ्घितलक्षणमाह-तत्र सामज्वराकृत्येति। "ज्वरोपद्रवतीक्ष्णत्वं" इत्यादि सामज्वराकृत्या अलङ्घितलक्षणे सिद्धेऽप्यलङ्घितलक्षणं लक्षणसङ्करे लङ्घितोऽभूदित्येवमर्थः। लङ्घितलक्षणमाह द्विविधोपक्रमे-"विमलेन्द्रियतासर्गः" इत्यादि।

युक्तं लङ्घितलिङ्गैस्तु तं पेयाभिरुपाचरेत्॥२४॥

यथास्वौषधसिद्धाभिर्मण्डपूर्वाभिरादितः।

षडहं वा मृदुत्वं वा ज्वरो यावदवाप्नुयात्॥२५॥

तस्याग्निर्दीप्यते ताभिः समिद्भिरिव पावकः।

स०-लङ्घितलिङ्गैः-विशोषितलक्षणैः, युक्तं ज्वरितं नरं ज्ञात्वा तं पेयाभिरुपाचरेत्। किम्भूताभिः ? यथास्वौषधसिद्धाभिः। यद्यत्स्वं यथास्वमिति वीप्सायामव्ययीभावः। यथास्वं च तदौषधं च यथास्वौषधम्। वातादेः पृथग्यूपस्य संसृष्टस्य सन्निपतितस्य यद्यस्य योग्यमौषधं तेन सिद्धाभिः-वक्ष्यमाणैः पेयादिद्रव्यैर्यथायथं योग्यैः कृताभिरित्यर्थः। किम्भूताभिः ? मण्डः पूर्वः-प्रधानः, अच्छतया याभ्यस्ताभिरिति समासः। एवं मण्डात् किञ्चिद्धनाः पेयाः कार्या इत्यर्थोऽवतिष्ठते। न तु मण्डः पूर्वः-प्रथमोऽभ्यवहारो, यासां ता मण्डपूर्वा इति व्याख्येयम्। एवं हि व्याख्यायमाने सर्वासां पेयानां मण्डपूर्वाणां ज्वरेऽभ्यवहारः प्राप्नोति। ततश्च (श्लो.२७)-"सृष्टविड्बहुपित्तो वा सशुण्ठीमाक्षिकां हिमां पेयां पिबेत्।" तामपि मण्डपूर्वा पिबेत्, न केवलामिति। एतच्च क्रियमाणं विरुद्धं स्यात्। तथा क्वथितामलकेऽत्यर्थं पित्तशमने क्व मण्डः ? तथा क्व बहुपित्तो ज्वरी वा मण्डः "श्रृतः पिप्पीशुण्ठीभ्यां युक्तो लाजाम्बुदाडिमैः।" (च.सू.अ. २७/२५६) इत्येवंस्वरूपः ? पेयायाश्च ज्वरघ्नत्वमुक्तम्। तथा क्षुधिते सम्यग्लङ्घितं ज्ञात्वा मण्डात् किञ्चिद्धनाभिः पेयाभिरसावुपाचरणीयः। तस्य-ज्वरिणः, ताभिः-पेयाभिः, अग्निर्दीप्यते-समिध्यते, समिद्भिः-"एधैः, यथा बाह्यः पावकः। मुनिना चोक्तम् (च.चि.अ.३/१४९)-"ताश्च भेषजसंयोगाल्लामुनिना चोक्तम् (च.चि.अ.३/१४९)-"ताश्च भेषजसंयोगाल्लघुत्वाच्चाग्निदीपनाः। वातमूत्रपुरीषाणां दोषाणां चानुलोमनाः। स्वदनाय द्रवोष्णत्वाद्रवत्वात्तृप्रशान्तये। आहारभावात् प्राणाय सरत्वाल्लाघवाय च॥ज्वरघ्यो ज्वरसात्म्यत्वात्तस्मात्पेयाभिरादितः। ज्वरानुपाचरेद्धीमान्" इति। खरनादेनाप्युक्तम्-"पिबेद्यच्छां ससिक्थां वा स्वां स्वां पेया नवज्वरे।" इति। कियन्तं कालं ज्वरिणं पेयाभिरुपाचरेत्? इत्याह-षडहमित्यादि। पेयाभिर्ज्वरिणं षडहं यावदुपाचरेत्। षण्णामह्नां समाहारः, "तद्धितार्थोत्तरपद" इत्यादिना समासः, "राजाहःसखिभ्यष्टच्" इति टच्, न सङ्ख्यादेः समाहारे" इत्यह्नादेशो यदि शान्तो ज्वरस्तदा दोषदूष्याद्यपेक्षया भक्तयूषादिभिरुपाचरेदिति वाशाब्देन गमयति। मृदुत्वं वेति। अथवा षडहेऽती तेऽपि यावज्जवरो मार्दवं गच्छति तावत्पेयाभिरुपाचरेत्। ननु, तर्हि किं षडहं वेत्यनेन? अत्र केचिदेवमाहुः। षडहादर्वाक्प्रायेण मृदुतायामपि जातायां षडहं यावत् ज्वरिणं पेयाभिरुपाचरेदिति द्योतनार्थं षडहं वेति कृतम्। अपरे तु काल एव बाहुल्येन ज्वरमार्दवस्येति ज्ञापनार्थमिदं कृतमिति मन्यन्ते। ज्वरमार्दवे तु जाते पाचनादियोगः कार्यः। तथा च वक्ष्यति (श्लो.३९)- "ततः पक्वेषु दोषेषु लङ्घनाद्यैः प्रशास्यते। कषायः" इति।

आ० र० - पेयोपचारमाह-युक्तं लङ्घितलिङ्गैरित्यादि। यथास्वौषधसिद्धाभिरिति। षडहं मृदुत्वं वा-यथाऽस्मिन् ज्वरे यदौषधं पाचनं शमनं वा। मण्डपूर्वाभिः-प्रथमदिने मण्डः प्रयुज्यते, द्वितीयदिनादौ प्रयुक्ताभिः। आदितः-आदौ, अन्ते यूषै रसैश्चेत्यर्थः। एतेन प्रथमदिने मण्डः, द्वितीयतृतीयचतुर्थेषु पेयाः-यवागूविलेप्यः, "यवाग्वां च" (श्लो.३७) इति वक्ष्यमाणत्वात्, चकारेण विलेपी, पञ्चमे यूषौदनः, षष्ठे रसौदनः, इति षडहमुपाचरेत्। यूषौदनरसौदनौ युक्त्या हि, "इत्थयं षडहो नेयः" (श्लो.३८) इति वक्ष्यति। ज्वरमृदुत्वाद्यवेक्ष्य यावध्यन्तरे (?) प्रकारान्तरं स्वयमूह्यम्।

उक्तोपचारफलमाह-तस्याग्निरिति। तस्य-लङ्घितस्य। ताभिः-मण्डादिरसयूष-रसपेयादिभिः।

अथ ता एव पेया वक्तुमुपक्रमते-

प्राग्लाजपेयां सुजरां सशुण्ठीधान्यपिप्पलीम्॥२६॥
ससैन्धवां, तथाऽम्लार्थी तां पिबेत्सहदाडिमाम्।

स०-प्राक्-पूर्वं सर्वाभ्यः पेयाभ्यो, लाजपेयां पिबेत्, न तु यवादिप्रकृतिजां पेयाम्। कीदृशीम्? सुजराम्, अल्पजत्वाद्याच्छीघ्रं जरां याति ताम्। तथा, सशुण्ठीधान्यपिप्पलीशुण्ठ्यादिभिः शृतामिति बोध्यम्। अत एव ससैन्धवामिति पृथग् निर्दिष्टम्। अन्यथा सशुण्ठीधान्यपिप्पलीसैन्धवामिति निर्देशं कुर्यात्। मुनिरप्याह (च. चि. अ. ३११७७)- "लाजपेयां च सुजरां पिप्पलीनागरैः शृताम्" इत्यादि। ससैन्धवामित्यत्र सशब्दस्येषत्पर्यायत्वात् अल्पसैन्धवामितिबोध्यम्।

आ० र० - पेयासु प्रथमं लाजपेया योजेत्याह-प्राग्लाजपेयामिति। सुजरां-सुक्थिताम्। क्थनं च शुण्ठ्यादिक्काथेन। क्काथश्च षडङ्गवत्साध्यः। सलवणत्वं तु पश्चात्, "कषाययोनयः पञ्च रसा लवणवर्जिताः।" (ह्. क. अ. ६/८) इति वचनात्। "चतुर्दशगुणे पेया" इति वचनात् लाजाश्चतुर्दशगुणे क्काथे क्थनीयाः। अस्या एव पेयायाः मण्डः प्रथमदिने पेयः। उक्तं

हिसिद्धयोगे (ज्वराधिकारे श्लो. १५९) "शस्तं सुलङ्घितस्यादौ विधाय कवलग्रहम्। लाजसक्तुकपथ्यं स्यात्सैन्धवेनावचूर्णितम्॥ रक्तपित्तहितत्वेन दाहज्वरहृतेस्तथा। सक्तवः शीतवीर्याः स्युर्लाजपूर्वा हिता न ते॥ पाचनो दीपनो लाजमण्डस्तेनोष्ण इष्यते। अतोऽयं दशमूलादिसाधितो भिषजां मतः॥ तच्चेज्जीर्यत्यविघ्नेन ज्वरी जीवेत्तदाध्रुवम्।" इति। यत् "वाते वातकफे पित्ते सामवातरुजाज्वरे। वाठ्यमण्डं प्रशंसन्ति पटोलमगधान्वितम्॥" इति। तद्वद्धमलविषयम्। भृष्टः शकलीकृतो यवो-वाठ्यः।

अम्लार्थिनः पेयामाह-तथाऽम्लार्थीति। तां-लाजपेयाम्। तथा-तद्वत्साधिताम्। सहदाडिमां-शुण्ठ्यादिषु दाडिमं प्रदेयम्।

तथा, अम्लार्थी-यो ज्वर्यम्ल प्रार्थयते सः, तां-पूर्वोक्तां पेयां, सहदाडिमां पिबेत्। पूर्वस्याः पेयायाः सदाडिमत्वमेवास्या विशेषः। "वोपसर्जनस्य" इति सहशब्दस्य सभावः।

सृष्टविड् बहुपित्तो वा सशुण्ठीमाक्षिकां हिमाम्॥२७॥

स०-पिबेदित्यनुवर्तते। सृष्टविट्-भिन्नवर्चा ज्वरी, बहुपित्तो वा सशुण्ठीमाक्षिकां हिमां पेयां पिबेत्, नोष्णां नान्यथा यो ज्वरी। धान्यपिप्पल्यावत्रापास्ये, शुण्ठीग्रहणात्। अत्र च शुण्ठ्या द्रव्येभ्योऽसंयोगान्मधुरपाकत्वादग्निमान्द्योत्सारणोपक्षीणशक्तित्वाद् युक्तः पित्ते प्रयोगः। एवमन्यत्रापि शुण्ठ्याः प्रयोगे चिन्त्यम्। सैन्धवं तु तावन्मात्रं सर्वत्राविरुद्धमेव।

आ० र०- शिथिलमलपित्तोत्तरयोः पेयामाह-सृष्टविडिति। हिमायां माक्षिकप्रक्षेपः, किञ्चिन्माधुर्यं यथा स्यात्।

बस्तिपार्श्वशिरःशूली व्याघ्रीगोक्षुरसाधिताम्।

स०-बस्त्यादिशूली व्याघ्रीगोक्षुरसाधितां पेयां पिबेत्।

आ० र० - बस्त्यादिशूलिनः पेयामाह-बस्तिपार्श्वशिरः-शूलीति।

पृश्निपर्णीबलाबिल्वनागरोत्पलधान्यकैः॥२८॥
सिद्धां ज्वरातिसार्यम्लां पेयां दीपनपाचनीम्।

स०-पृश्निपर्ण्यादिसाधितां पेयां दीपनपाचनीं ज्वराति सारवान् अम्लां पिबेत्। दीपनी चासौ पाचनी चेति पुंवत्कर्मधारयेति पुंवद्भावः। अत्राम्लग्रहणं न कर्तव्यम्। यतः सर्वत्रपेयाप्रसङ्गेऽम्लार्थी यो ज्वरी स सदाडिमां पेयां पिबेदित्युक्तम्। तस्मात्किमनेन? ब्रूमः। अम्लाभिलाषी भवतु वा मा भवतु। तथाऽप्यम्लामेव ज्वरातिसारी पिबेदित्यस्यार्थस्य द्योतनार्थमम्लामित्युक्तम्।

आ० र० - ज्वरातिसारिणः पेयामाह-पृश्निपर्णीति। अम्लां-दाडिमोपेताम्।

ह्रस्वेन पञ्चमूलेन हिक्कारुक्श्वासकासवान्॥२९॥

स०-पिबेत्सिद्धामित्यत्रानुवर्तते। ह्रस्वेन-बृहत्यादिना, पञ्चमूलेन सिद्धां पेयां हिध्मादिवान् पिबेत्।

आ० र० - हिध्मादियुक्तस्य पेयामाह ह्रस्वेन पञ्चमूलेनेति। ह्रस्वेन-बृहत्यादिना। रुक्-शूलम्।

पञ्चमूलेन महता कफार्तो यवसाधितम्।
विबद्धवर्चाः सयवां पिप्पल्यामलकैः कृताम्॥३०॥
यवागूं सर्पिषा भृषां मलदोषानुलोमनीम्।

स०-कफार्तो नरो बिल्वादिना-महता, पञ्चमूलेन सह यवसाधितां पिबेत्। तण्डुला एवात्र प्रकृतित्वेन योज्याः। यवास्तुक्काथ एव। विबद्धं-विष्टब्धं, वर्चः-पुरीषं, यस्य-नरस्य, स नरः सयवां-यवप्रधानां पिबेत्। किम्भूताम्? पिप्पल्यामलकैः कृताम्। तथा, सर्पिषा भृष्टां-सम्यगाज्येन संस्कृताम्। तथा, मलः-पुरीषादिः, दोषो-वातादिः, तेषामनुलोमनीं-स्वभार्गप्रवर्तिनीम्।

आ० र०- कफार्तस्य पेयामाह-पञ्चमूलेन महतेति। यवरूपेयं सर्पिषा भृष्टा यावन्निरध(न्निर्धूम)त्वं तावत्सर्पिः सन्ताप्य तन्मध्ये प्रक्षिप्ताम्।

चविकापिप्पलीमूलद्राक्षामलकनागरैः॥३१॥
कोष्ठे विबद्धे सरुजि

स०-कोष्ठे विबद्धे-विबद्धदोषाधिष्ठाने, तथा सरुजि चविकादिभिः साधितां पेयां पिबेत्।

आ० र०- विबाद्धशूलयुक्तस्य पेयामाह-चविकापिपलीति।

पिबेत्तु परिकर्तिनि
कोलवृक्षाम्लकलशीधावनीश्रीफलैः कृताम्॥३२॥

स०-तुः पुनरर्थे। परिकर्तनं-परिकर्तिका छेदनमिवानुभवः, स यस्यास्ति स परिकर्ती कोष्ठः, तस्मिन्परिकर्तिनि तु कोष्ठे, कोलादिभिः साधितां पेयां पिबेत्। श्रीफलं-बिल्वफलम्।

आ० र०- परिकर्तिनः पेयामाह-पिबेत्त्विति। कोलंबदरम्। कलशी-पृष्णिपर्णी। श्रीः-बिल्वः।

अस्वेदनिद्रस्तृष्णार्तः सितामलकनागरैः।

सिताबदरमृद्वीकासारिवामुस्तचन्दनैः॥३३॥

तृष्णाच्छर्दिपरीदाहज्वरघ्नीं क्षौद्रसंयुताम्।

स०-अस्वेदनिद्रो नरस्तृष्णार्तश्च सितादिभिः साधितां पेयां पिबेत्।

आ० र० - अस्वेदनिद्रातृष्णार्तस्य पेयामाह-अस्वेदनिद्रातृष्णार्त इति। सिता-शर्करा, सा च मधुवद्योज्या। सङ्ग्रहे (चि.अ. १)-"सिताधात्र्याज्यनागरैः" इति पाठः। तेन सर्पैर्भृष्टाः कार्याः। परीवारः-उपद्रवः।

कुर्यात्पेयौषधैरेव रसयूषादिकानपि॥३४॥

स०-पेयोद्दिष्टैरेवौषधैर्मांसरसादयोऽपि यथोपयोगं कर्तव्याः। [तथा च सङ्ग्रहेऽध्यगीष्ट-(चि. अ. १)-"कुर्यात् पेयौषधरेव रसयूषादिकानपि।"] रसोऽत्र मांसरसः। यूषाः-मुद्गादिसम्बन्धिनः क्काथाः। आदिग्रहणात् पानियमस्तुतक्व्यञ्जनादयो गृह्यन्ते। पेयादिषु च द्रव्यपरिमाणादिकं पूर्वोक्तं सूपशास्त्रादिभ्यो वाऽवगन्तव्यम्। तथा च तन्त्रान्तरे-"पेयायूषरसाद्येषु रसालापानकादिषु। द्रव्यमात्रां प्रयुञ्जीत लोकसिद्धां यथार्हतः॥" इति॥ यस्य पुंसो यत्परिमाणैर्द्रव्यैर्मात्रा योग्या तस्य तत्परिमाणैर्द्रव्यैरेव पेयादयः कार्या इत्यर्थः। अन्ये त्वेवं मन्यन्ते,-पेयायूषरसाद्येषु द्रव्यपरिमाणमल्पमेव कल्पयितव्यम्। पानार्थं च यद्द्रव्यैः सधितं तोयमुक्तं तदल्पपरिमाणद्रव्यैरेव शधनीयम्। अल्पपरिमाणेनैव द्रव्येण तत्तोयं सम्यक् पाच्यते। तथा च खारणादिरपाठीत्-"बहुद्रव्यो घनः क्काथः स्वच्छमल्पौषधं जलम्।" इति। श्रपणक्रियासामान्येऽप्यस्योभयस्य पृथक्संज्ञाविनिर्देशो द्रव्यपरिमाणभेदादयं क्काथ इदं जलमिति। ज्वरिणां च प्रथमं यथाऽच्छाः पेया देयास्तथा यूषरसा अप्यच्छा एव देयाः, अग्निमान्द्यभयात्। क्काथोऽप्यत एव बहुपरिमाणद्रव्यसाध्यत्वाद्घनतया तिक्तरसद्रव्यकृतोऽपि प्रथमं ज्वरे निषिद्धः।

आ० र० - पेयौषधैरेव रसयूषादिकानपि कुर्यादित्वाह-कुर्यादिति।

किं सर्वत्र ज्वरे सर्वाः सर्वदा सर्वस्मिन्देशे पेया देया न ? इत्याशङ्क्याह-

मद्योद्भवे मद्यनित्ये पित्तस्थानगते कफे।
ग्रीष्मे तयोर्वाऽधिकयोस्तृड्दर्दिदाहपीडिते॥ ३५॥
ऊर्ध्वं प्रवृत्ते रक्ते च पेयां नेच्छन्ति

स०-मद्योद्भव इत्यादिष्वर्थेषु पेयां नेच्छन्ति, मुनय इति शेषः। मद्येनोद्भवो यस्य तस्मिन् मद्योद्भवे ज्वरे, तथा मद्यनित्ये पुरुषे, तथा कफे पित्तस्थानगते सति, तथा ग्रीष्मकाले, तथा तयोर्वाऽधिकयोः, तयोरिति पित्तकफौ परामृश्येते, पित्तकफयोश्चाधिकयोः, पित्तस्थानगते कफ इत्यस्तयोरेव प्रकृतत्वात्, तथा तृड्दर्दिदाहैः समुदितैः पीडिते पुरुषे यो ज्वरस्तस्मिंश्च, प्रत्येकं तु तृडार्तेऽनुज्ञातैव, आस्वेदनिद्रस्तृष्णात्त इत्युक्तेः, दाहार्तेऽपि सृष्टविड्बहुपित्तो वेत्याह, तथा यस्योर्ध्वं प्रवृत्ते रक्ते ज्वरस्तस्मिंश्च पेयां नेच्छन्ति।

आ० र०- ज्वरविशेषे पेयां निषेधति-मद्योद्भव इति। मद्यनित्ये पुरुषे। तयोः- पित्तकफयोरधिकयोर्वा।

तेषु तर्हि किं कार्यम् ? इत्याह-

तेषु तु।
ज्वरापहैः फलरसैरद्भिर्वा लाजतर्पणान्॥ ३६॥
पिबेत्सशर्कराक्षौद्रान्

स०-तेषु पुनर्विषयभूतेषु लाजतर्पणान्-लाजसक्तून्, पिबेत्,-पेयावसरे न तु यवसक्तून् पिबेत्। ज्वरापहैः फलरसैःद्राक्षादीनां ज्वरघ्नानां फलानां रसैः-स्वरसैः, अथवा तद्रसैःक्काथैः।

अथवा, अद्भिः-जलैः, क्वथितशीतलैरित्यर्थाद्गम्यते। किम्भूतान् लाजतर्पणान्? सशर्कराक्षौद्रान्।

आ० र० - निषिद्धपेयस्य तर्पणमाह-तेषु त्विति। लाजतर्पणं-लाजचूर्णकृतमर्थम्। सङ्ग्रहे तु (चि.अ. १)-"द्राक्षादाडिमकाश्मर्यपथ्यापीलुपरुषकैः। ज्वरघ्नैस्तोयमृदितैरद्भिर्वा लाजतर्पणान्। पिबेत्सुक्ष्मरजसः" इति। तत्र तर्पणशब्देन सक्तवः। ते च लाजानाम्।

ततो जीर्णे तु तर्पणे।

यवाग्वां वौदनं क्षुद्वानश्नीयाद्भृष्टतण्डुलम्॥ ३७॥

दकलावणिकैर्यूषै रसैर्वा मुद्गलावजैः।

स०-ततः-तर्पणपानादनन्तरं, जीर्णे तर्पणे, यवाग्वां वेति यवागूपानार्हे नरे यवाग्वां जीर्णायां, क्षुद्वान् पुरुषो-जातबुभुक्षः सन्, द्वितीयेऽन्नकाल ओदनमश्नीयात्-भुञ्जीत। किम्भूतम्? भृष्टास्तण्डुला यस्मिन्। किं केवलमोदनं भुञ्जीत? नेत्याह-दकेत्यादि। दकलावणिकैः-कुलत्थादीनां सम्बन्धिभिर्यूषः-क्वाथैः, ओदनमद्यात्। अथवा, अवस्थावशात् मुद्गलावजैरोदनमद्यात्। मुद्गलावजरसैरिति वक्तव्ये रसैरिति पृथङ्निर्देशो लावजरसानां प्राधान्यज्ञापनार्थम्। तथा लावजरसाः संस्कार्याः संस्कारकाश्च मुद्गाः, अत एव बहुमात्राणां लावानामल्पानां च मुद्गानामत्रोपयोगः कार्य इत्यवतिष्ठते। "नातिमां सास्तनुरसा दकलावणिकाः स्मृताः।" इति केचिदाहुः। अन्येत्वाचक्षते,-"अल्पमांसपटुस्नेहा दकलावणिकाः स्मृताः।" इति।

आ० र० - यूषोदनरसौदनावाह-ततो जीर्णे त्विति। यस्य तर्पणमुक्तं तस्य तर्पणे जीर्णे, यस्य यवागूरुक्ता तस्य यवाग्वां जीर्णायां, ओदनमश्नीयात्। जीर्णत्वमपि विकारः पाकः। स च दिनत्रयेण जायते। त्रिदिनं तर्पणं यवागूं वा भुक्त्वा ततो यूषौदनं ततो रसौदनं भुञ्जीतेत्यर्थः। मुद्गजैर्यूषै रसैः। लावजैर्दकलावणिकैः। दकं-उदकम्, तेन मुद्गजैर्यूषै रसैः। लावजैर्दकलावणिकैः। दकं-उदकम्, तेन लवणेन च संस्कृतैः, अकृतैरित्यर्थः।

वाशब्दादमुद्गलावजैरपि यथा सात्म्यं धान्यान्तरमांसान्तरजैः। यूषैर्वा रसैर्वेति व्याख्याने मुद्गलावजैरिति विशेषणं न घटते, क्रमाभावात्।

इत्ययं षडहो नेयो बलं दोषं च रक्षता॥३८॥

स०-इति-पूर्वोक्तेन प्रकारेण, प्रथमो ज्वरस्य षडहो नेयः अतिवाह्यः, नान्यो ज्वरस्य सम्बन्धी, इत्ययमिति निर्देशाल्लभ्यते- किं कुर्वता भिषजा षडहो नेयः ? बलं रक्षता, तथा दोषं तत्काले सामं वाताद्यन्यतमं पृथक् संसृष्टं सन्निपतितं वा तज्ज्वरकारणं रक्षता,-तत्र तद्रक्षां कुर्वता, यथाऽसौ दोषः कृच्छ्रसाध्यतामसाध्यतां वा न याति। अत्र च यदि किल बलरक्षार्थं सन्तर्पणं क्रियते तदा सन्तर्पणस्यामवृद्धिहेतुत्वात् सामो दोषो वर्धेत, अथामदोषक्षपणार्थमपतर्पणं कुर्वीत तदा बलहानिः स्यात्, तस्मान्मध्यमया वृत्त्याऽवहितेन वैद्येनोभयं रक्षतोपक्रमः कार्यः, नात्रावहेला कार्येत्यर्थः।

आ० र० - मण्डाद्युपचारमुपसंहरति-इत्ययं षडहो नेय इति।

ततः पक्वेषु दोषेषु लङ्घनाद्यैः प्रशस्यते।
कषायो दोषशेषस्य पाचनः शमनोऽथवा॥३९॥

स०-लङ्घनाद्यैः-तिक्तसावसानैस्तत्कालोचितैर्ज्वरकारिसाममलपक्तृहेतुभिः, पक्वेषु दोषेषु ततः-षडहादूर्ध्वं, कषायः प्रशस्यते। मुस्तापर्पटकादिः पाचनः, प्राधान्येन पाचनसंज्ञया विहितत्वात्। तथा वक्ष्यमाणः कलिङ्गकादिरर्घश्लोकसमापनः (श्लो. ४८) पञ्चप्रकारः शमनः प्रशस्यते, प्राधान्येन शमनसंज्ञया विहितत्वात्। तथा चाध्येष्यते तन्त्रकृत् (श्लो. ५१) "पञ्चैते सन्ततादीनां पञ्चानां शमना मताः।" इति। तदेतदुभयं-पाचनशब्दश्रुत्याक्षिप्तो मुस्तापर्पटकादिः शमनश्रुत्याक्षिप्तः कलिङ्गकादिः, कषायः-क्वाथः, प्रशस्यते। कस्य पाचनः ? इत्याह-दोषशेषस्य। अत एव पक्वेषु दोषेषु लङ्घनाद्यैरित्यल्पपक्वेषु पक्वप्रायेष्वौषदामेषु दोषेष्विति बोध्यम्। अन्यथा पक्वस्य पाचनमयुक्तमिव स्यात्, पिष्टपेषणन्यायेनानर्थकत्वात्। तथा चापक्वं यद्वस्तुजातं तदग्निः पचति, पचन्तमग्निः पाचनः पाचयात। एवं च

पाक्याभावात् किमग्निः पचतु? किं वा कषायः पाचयतु? इत्यनुपपन्नमिवैतत्स्यात्। यदा पुनर्मुस्तापर्पटकादिः कलिङ्गादिरन्यो वा कश्चित् कषायस्तिक्ताद्यन्यतमो वातादिदोषज्वरशान्त्यर्थं प्रयुज्यते तदा पाचनो भवन्नपि शमनसंज्ञः, न पाचनसंज्ञः। ननु, प्रथम एव दिने तिक्तरसकषायमनुजज्ञे तन्त्रकृत्। तथा चोवाच (श्लो. १५)-"घनचन्दनशुण्ठ्यम्बुपर्पटोशीरसाधितम्। शीतं तेभ्यो हितं तोयं पाचनं तृड्ज्वरापहम्॥" इति। तत्कथमेतत्? अत्रोच्यते। ज्वरिणः प्रसक्ततृषोऽवश्यं पानं किञ्चिद्वितरणीयम्। न च (पाने) मद्येक्षुरसदधिमस्त्वारनालक्षीरादीनामत्र योग्यत्वेऽपि ज्वरस्यैवं विधानि निषद्धानि तन्त्रकृद्भिः, शिशिरजलमप्यामदोषस्रोतःसंरोधाग्निसादादीनावहेत् ज्वरं गाढतरं कुर्यात्। तस्मात् पानार्थे तिक्तसाधितमुक्तमम्ब्वनुमेने। द्रव्याणि चात्र स्वल्पमात्रयैव योज्या नीत्यनन्तरमेव प्रत्यपादि। किञ्च ज्वरितस्तृषतो जलं बहौषधं पातुमपि न क्षमेत। किञ्च कतिपयान्येव घनादीनि जलसंस्कारेण पातुमनुमतानि, न सकलान्यपि तिक्तान्यनुमतानि। किंतर्हि? विशिष्टप्रभावं दर्शयन्ति घनादीन्येव। विशिष्टप्रभावत्वं चान्यत्रापि द्रव्याणां दृष्टम्। यथा-शमीफलं मधुरमपि केशघ्नम्, तथाऽम्लमप्यामलकं पित्तकफघ्नम्, सैन्धवं लवणमपि चक्षुष्यम्, इत्याद्यन्यदप्यूह्यम्। तस्मात् घनादीनां पानीयसंस्कारोपयोगो नवज्वरेऽपि हितः।

आ० र०- औषधमाह-ततः पक्वेष्विति। ततः-षडहात्परम्। कषायः-स्वरसादिः अपक्वदोषशङ्कायां पाचनः, तदभावे शमनः। वृद्धिजशनम्(?)। पक्वेषु दोषेष्विति दिनसङ्ख्यानादरार्थम्। तदुक्तिस्तु क्रमकथनार्थम्।

तिक्तः पित्ते विशेषेण प्रयोज्यः, कटुकः कफे।

स०-कषाय इति वर्तते। ज्वरस्य प्रकृतत्वात् पित्ते-पित्तज्वरे, तिक्तकषाय-कल्पनाप्रकारः प्रयोज्यः। तिक्तः पित्ते विशेषेणेत्यतो विशेषनिर्देशादन्यदोषोत्थेऽपि ज्वरे तिक्तरसाधिष्ठितो द्रव्यकषायो यथावस्थं प्रयोज्यः, न केवलं पित्तज्वराख्ये, व्याधिदोषघ्नत्वात्। तथा तिक्तो रसो निसर्गत एव ज्वरघ्नः शास्त्रेऽस्मिन्पठितः। यथा (हृ. सू. अ. १०/१४) -"तिक्तः स्वयमरोचिष्णुररुचिं कृमितृड्विषम्। कूष्ठमूर्च्छाज्वरोत्क्लेददाह-पित्तकफान् जयेत्॥" इति। मुनिरप्यवोचत् (च. सू. अ. २६४३)- "तिक्तो रसः स्वयमरोचिष्णुररोचकघ्नो विषघ्नः कृमिघ्नो मूर्च्छादाहप्रशमनस्तृष्णाप्रशमनस्त्वङ्मांसयोः स्थिरीकरणो ज्वरघ्नः" इत्यादि।

तस्माद्रसेषु यथा तिक्तरसस्य ज्वरघ्नत्वं तथा नान्येषां रसानामित्यवेहि। गुडूच्यादेश्च द्रव्यस्य तिक्तरसत्वादेव ज्वरघ्नत्वस्य प्रतिपादितत्वात् पुनर्यज्ज्वरघ्नत्वमुक्तं तच्छक्त्युत्कर्षायेति बोध्यम्। गुडूच्याश्च मुनि(?)गुणानाह। यथा (सङ्ग्रहे अ. १२)-"तिक्ताऽमृता त्रिदोषघ्नी ग्राहिण्युष्णा रसायनी। दीपनी ज्वर तृड्दाहकामलावातरक्तनुत्॥" इति। एवमन्येषामपि द्रव्याणामाधेयसामर्थ्याद्युत्कर्षसिद्धमपि यत् पुनरुच्यते, तत्तेषां तस्य कर्मणः शक्त्युत्कर्षार्थं बोध्यम्। कटुक इत्यादि। कटुकरसाधिष्ठितो ज्वरघ्नद्रव्यविशेषजः क्काथः कफे-कफज्वरे प्रयोज्यः, न तु यः कश्चित्कटुकद्रव्यकषायः, सर्वस्य ज्वरघ्नत्वानुपपत्तेः। यस्माद्द्रव्यप्रभावाद्विशिष्टमेव कटुरसाधिष्ठितं किमपि यद् द्रव्यं तज्जवरघ्नमिति मन्तव्यम्। एतदेव तस्माच्चायं ग्रन्थकृत् "कफे कटुको योज्यः" इति जगाद।

आ० र० - यस्मिन् दोषे यः कशायस्तमाह-तिक्तः पित्त इति। विशेषेणेति वचनात् कफेऽपि, न तु वाते, विरुद्धत्वात्।

पित्तश्लेष्महरत्वेऽपि कषायः स न शस्यते॥४०॥

नवज्वरे, मलस्तम्भात्कषायो विषमज्वरम्।

कुरुतेऽरुचिहृल्लासहिध्माध्मानादिकानपि॥४१॥

स०-कषायः-कषायरसाधिष्ठितद्रव्यजः कषायः, स पित्तश्लेष्महरत्वेऽपि नवज्वरे,-तरुणज्वरे, न शस्यते। कुतः? इत्याह-मलेत्यादि। कषायो ह्यत्र योजितो मलस्तम्भात्कारणात् विषमज्वरं-सततादिकं, कुरुते। कषायस्तम्भिता हि मलाः कोष्ठमप्रतिपन्नत्वात् सम्यक्पाकमयान्तः सन्धिस्तोतोलीनाः कषायपानविहितवेगा अशक्तत्वाद्विषममेव ज्वरं कुर्वन्ति। यदि हि तेषां कषायदानेन शक्तिहानिर्न कृता स्यात् तदा सन्ततमेव ज्वरं कुर्युः। तस्मात् स्वल्पत्वात् सततादिकं विषमज्वरं कर्तुमेषां युक्तम्। ननु, पित्तश्लेष्महरत्वेपीत्यनर्थम्। यतः "कषायः पित्तकफहा" (ह्र.सू.अ.१०१२०) इति पूर्वमुक्तम्। अस्त्येवैतत्। अर्थविशेषज्ञापनार्थं तु पुनरुक्तम्। नवज्वरे-एकदोषजे सन्निपातजे वातकफजे वातपित्तजे, केवलं कषायो न शस्तोऽपि तु पित्तश्लेष्मज्वरेऽपि न शस्तः, तस्मात् पित्तकफजेऽपि ज्वरे नायं योज्य इत्यर्थः। तथा, कषायोऽयं योजितो न केवलं विषमज्वरं करोति, यावदरुच्यादीश्च करोति। अत्रापि मलस्तम्भादिति सम्बध्यते। तेन यद्यप्यादिशब्देना-

नियतरुपाणामनेकानाव्याधीनां ग्रहणं प्राप्तम्, तथाऽपि मलस्तम्भाद्ये व्याधय उत्पद्यन्तेऽरुच्यादिरूपास्तेषामेवेह ग्रहणार्थमेवं सम्बन्धः कृतः। तथा, विषमज्वरारुचिहृल्लासहिध्माध्मानादिकानपीत्येकविभक्त्यैव निर्देशः कर्तुं व्यवच्छद्य पृथङ्निर्देशो यः कृतस्तेनेदं द्योत्यते,-कषायः प्रयोजितोऽवश्यमेव विषमज्वरं कुरुते, अरुच्यादीन् पुनर्नावश्यं कुरुते, इति। तदेवं कषायो रसविशेषो मलस्तम्भादेव नवज्वरे निषिध्यते, न तु कल्पनावशात्। तथा च मुनिः (च. चि. अ. ३११६०)-"यः कषायः कषायस्तु स वर्ज्यस्तरुणे ज्वरे। न तु कल्पनमुद्दिश्य कषायः प्रतिषिध्यते॥" इति।

आ० र० - कषायं ज्वरे निषेधति-पित्तश्लेष्महरत्वेऽपीति। कषायः-कषायरसस्य कषायः।

निषेधातिक्रमे दोषमाह-मलस्तम्भादिति। सङ्ग्रहे तु (चि.अ. १)-"न च्यवन्ते न पच्यन्ते कषायस्तम्भिता मलाः। तिर्यग्गता विमार्गा वा वर्द्धयन्त्यपि च ज्वरम्॥ वह्वामकफवातत्वाच्छूलानाहादिकानपि।" इति।

सप्ताहादौषधं केचिदाहुरन्ये दशाहतः।

केचिल्लघ्वन्नभुक्तस्य योज्यमामोल्बणे न तु॥४२॥

स०-सप्ताहादनन्तरमष्टमेऽह्नयौषधं-ज्वरघ्नं यथायोग्यं श्रृतादिकल्पनया कल्पितं, योज्यमिति किचिदेवाचार्या आहुः। अन्ये तु दशाहादूर्ध्वमौषधं-मुस्तापर्पटकादिकं, योज्यमाहुः। केचिदाचार्या लघ्वन्नभुक्तस्य नरस्यौषधं योज्यमित्याहुः। लघ्वन्नशब्देन पेयादिकं भण्यते, ओदनतस्तस्य लघुत्वोक्तेः। लघ्वन्नं भुक्तं येनासौ लघ्वन्नभुक्तः। आहिताग्न्यादित्वान्निष्ठान्तस्य परनिपातः। "परमतमप्रतिषिद्धमनुमतमेव" इति सर्वमेतत् प्रमाणम्, अवस्थावशेन प्रयोगार्हत्वात्। आमोल्बणे तु न-आमाधिकज्वरिणि पुरुषे पुनरौषधं ज्वरघ्नं मुस्तापर्पटकादिकं षडहादूर्ध्वं सप्ताहात् दशाहाद्वा न योज्यम्।

आ० र० - उक्तमौषधकालं मतान्तरेण निराकुरुते-सप्ताहादौषधमिति। लघ्वन्न-मण्डादि, षडहादनन्तरं अवधित्रयमप्यप्रयोजकम्। यावदामोल्बणस्तावदौषधं न योज्यम्।

किमिति चेत्? आह-

तीव्रज्वरपरीतस्य दोषवेगोदये यतः।
दोषेऽथवाऽतिनिचिते तन्द्रास्तैमित्यकारिणि॥४३॥
अपच्यमानं भैषज्यं भूयो ज्वलयति ज्वरम्।

स०-तीव्रज्वरेण परीतस्य ज्वरिणः पुंसो दोषवेगोदये दोषस्य-आमाद्याख्य-स्योल्बणस्य, वेगो-मुस्तापर्पटकादिनोत्क्लेशात्, दोषवेगः, तस्योदयः-प्रादुर्भावो, दोषवेगोदयः। अथवा, उल्बणामस्य वातादेर्दोषस्य वेगोदयः, तस्मिन् दोषवेगोदये सति। अथवा तथैव दोषे-आमाख्ये, अतिनिचिते-अतिशयेन सञ्चयं प्राप्ते, वातादौ व दोष उल्बणे। अत एव तन्द्रास्तैमित्येऽवश्यं करोति तस्मिन् तन्द्रास्तैमित्यकारिणि। यतो-यस्मात्, तदानीमामच्छन्नपावकेनापच्यमानं भैषज्यं-औषधं मुस्तापर्पटकादिश्रृतादिकल्पनाकल्पितं, तदौषधं प्रयुक्तं भूयः-पुनरपि, ज्वरं ज्वलयति-उत्तेजयति न शमयति। तस्मादामोल्बणे ज्वरे न षडहादूर्ध्वं नापि सप्ताहान्न च दशाहादूर्ध्वं भैषज्यं योज्यम्।

आ० र० - स्वसिद्धान्ते युक्तिमाह-तीव्रज्वरपरीतस्येति। द्विविधो ह्यामोल्बणो ज्वरः-अपक्वः पच्यमानश्च। तत्र प्रथमेऽर्थे पच्यमानस्योक्तिः, अपक्वस्य द्वितीये। उभयोरपि प्रयुक्तमौषधमपच्यमानं पुनर्ज्वरं ज्वलयति।

कदा तर्हि योज्यम्? इत्याह-

मृदुर्ज्वरो लघुर्देहश्चलिताश्च मला यदा॥४४॥
अचिरज्वरितस्यापि भेषजं योजयेत्तदा।

स०-मृदुर्ज्वरः-उपद्रवमृदुतया। लघुः-पटुः देहः। चलिता मलाः-मूत्रपुरीषादयः। मृदुर्ज्वर इत्यादिलक्षणावस्था यदा भवति तदाऽस्यामवस्थायामचिरज्वरितस्यापि-

अनितिक्रान्तषडहस्यापि, भैषज्यं योज्यम्। अपिशब्दात् किं पुनः षडहेऽप्यतीते ज्वरितस्यैवंलक्षणायामवस्थायमुत्पन्नायां तदौषधं च न योज्यम्? इत्येवं व्याध्यवस्था कालतो गरीयसीत्युक्तं भवति।

आ० र० - औषधयोग्यां ज्वरावस्थामाह-मृदुज्वर इति।

अथ तदौषधमाह-

मुस्तया पर्पटं युक्तं शुण्ठ्या दुःस्पर्शयाऽपि वा॥४५॥

पाक्यं शीतकषायं वा पाठोशीरं सवालकम्।

पिबेत्तद्वच्च भूनिम्बगुडूचीमुस्तनागरम्॥४६॥

स०-मुस्तया सह पर्पटं युक्तमथवा शुण्ठ्या धन्वयासेन युक्तं पाक्यं-श्रृतं, शीतकषायं-शीतकल्पनाकल्पितं, वा कृत्वा पिबेदिति वक्ष्यमाणेन सम्बन्धः। पाठा चोशीरं च पाठोशीरं वालकेन सह श्रृतं शीतं वा पिबेत्। स्वरसकल्कफाण्टाख्यकल्पनाभ्यः श्रृतशीताख्यकल्पनाद्वयकल्पितस्यास्य तथा सामर्थ्यस्य दृष्टत्वादेतत्कल्पना-युगलमुपन्यस्तवान्। वा समुच्चये भिन्नक्रमे। तद्वदित्यादि। न केवलं मुस्तापर्पटकं पिबेत्, तथा पाठोशीरं सवालकं पिबेत्, यावद्भूनिम्बगुडूचीमुस्तनागरमपि पिबेदिति।

आ० र० - औषधमाह-मुस्तया पर्पटं युक्तिमिति। तच्च पञ्चधा, -मुस्तापर्पटम्, शुण्ठीपर्पटम्, दुरालभापर्पटम्, पाठादित्रयम् भूनिम्बादिचतुष्टयं च। तच्च पाक्यं शीतकषायं वा कृत्वा पिबेत्। पाक्यः-क्काथः।

यथायोगमिमे योज्याः कषाया दोषपाचनाः।

ज्वरारोचकतृष्णास्यवैरस्यापक्तिनाशनाः॥४७॥

स०-इमे-पूर्वोक्ता मुस्तापर्पटकादयः कषायाः, यथायोगंयोगानतिक्रमेण, यो यः कषायो यस्मिन् ज्वरे दातुं युक्तः स तत्र योज्य इति यथायोगं योज्याः। किंक्रिया एते स्युः ? इत्याह-दोषपाचनाः, दोषस्य-आमाख्यस्य पक्वप्रायस्य, पाचनाः। तन्त्रान्तरे चोक्तम्-"प्रयुक्तं पाचयेदामं यतत्पाचन मुच्यते। पित्तादिजिन्निरामस्य यत्स्यात्तच्छमनं मतम्॥" इति। अत्र मुस्तापर्पटस्य पूर्वमुपन्यासो ज्वरनाशनेभ्योऽन्येभ्योऽस्य मुस्तापर्पटस्य प्राधान्यप्रदर्शनार्थः। तथा चाचार्योऽभ्याणां मध्ये "मुस्तापर्पटक ज्वरे" (ह्र. उ. अ. ४०/४८) इति निर्देक्ष्यते। तस्मान्मुस्तापर्पटस्यैव ज्वरनाशने ज्यायस्त्वमित्यवेहि, व्याधिप्रतिपक्षत्वात्।

आ० र० - उक्तानामौषधानां विषयं विभागं फलं चाह-यथायोगमिति। यथायोगं-यो यत्र देशे काले वा लभ्यः, यत्र ज्वरे वा द्रव्यशक्तिपर्यालोचनया योग्यः, स तत्र योज्यः, स तत्र योज्यः। सिद्धयोगे तु (ज्वराधिकारे श्लो. ८२)-"नागरं देवकाष्ठं च धान्यकं बृअहतीद्वयम्। दद्यात्पाचनकं पूर्वं ज्वरिताय ज्वरापहम्॥" इति। सङ्ग्रहे तु (चि.अ. १)-"पाठेन्द्रयवभूनिम्बमुस्तपर्पटकामृताः। जयन्त्याममतीसारं ज्वरं च समहौषधाः॥ इति।

कलिङ्गकाः पटोलस्य पत्रं कटुकरोहिणी॥४८॥

पटोलं सारिवा मुस्ता पाठा कटुकरोहिणी।

पटोलनिम्बत्रिफलामृद्वीकामुस्तवत्सकाः॥४९॥

किराततिक्तममृता चन्दनं विश्वभेषजम्।

धात्रीमुस्तामृताक्षौद्रमर्धश्लोकसमापनाण्॥५०॥

पञ्चते सन्ततादीनां पञ्चानां शमना मताः।

स०-कलिङ्गकादयोऽर्धशोकैः समापनं येषां तेऽर्धश्लोकसमापनाः पञ्चैते पञ्चानां सन्ततादीनां यथासङ्ख्यं शमना मताः मुनीनामिति शेषः।

दुरालभामृतामुस्तानागरं वातजे ज्वरे॥५१॥

अथवा पिप्पलीमूलगुडूचीविश्वभेषजम्।

कनीयः पञ्चमूलं च

स०-दुरालभादि पाचनं वातजे ज्वरे, अथवा पिप्पल्यादिकं वातजे ज्वरे, कनीयो-बृहत्यादिकं, पञ्चमूलं च वातजे ज्वरे, इति योज्यम्।

आ० र०- सामान्यपाचनान्युक्त्वा विशेषपाचनानि कथयति। तत्र वातज्वरस्याह-दुरालभामृतामुस्तानागरमिति। दुरालभादिचतुष्कः पिप्पलीमूलाद्यष्टको वा।

पित्ते शक्रयवाघनम्॥५२॥

कटुका चेति सक्षौद्रं मुस्तापर्पटकं तथा।

सधन्वयासंभूनिम्बं

स०-पित्ते-पित्तजेज्वरे, शक्रयवादयः समाक्षिका मताः। पित्तजेऽपि मुस्तापर्पटकं धन्वयासकिराततिक्ताभ्यां सहित हितम्।

आ० र०- पित्तज्वरस्याह-पित्ते शक्रयवाघनमिति। इन्द्रयवादित्रिको मुस्तादिचतुष्को वा।

वत्सकाद्यो गणः कफे॥५३॥

अथवा वृषगाङ्गेयीशृङ्गबेरदुरालभाः।

स०-"वत्सकमूर्वीभाङ्गी" (ह्. सू. अ. १५।३३) इत्यादिः कफे मतः। अथवा वृषादिः। गाङ्गेयी-मुस्ता।

आ० र०- कफज्वरस्याह-वत्सकाद्यो गण इति। "वत्सकमूर्वाभार्गी" इत्यादिगणः, वृषादिचतुष्को वा। गाङ्गेयीमुस्ता। शृङ्गबेरं-शुण्ठी।

रुग्विबन्धानिलश्लेष्मयुक्ते दीपनपाचनम्॥५४॥

अभयापिप्पलीमूलशम्याककटुकाघनम्।

स०-रुग्विबन्धादियुक्ते ज्वरेऽभयादिघनावसानं दीपनपाचनम्।

आ० र० - सशूलविबन्धस्य कफवातज्वरस्याह-रुग्विबन्धानिलश्लेष्मयुक्त इति। सिद्धयोगे तु (ज्वराधिकारे श्लो. ८८)-"बिल्वादिपञ्चमूलाम्बु पाचनं वातजे ज्वरे॥ कलिङ्गं कट्फलं मुस्तं पाठा तिक्तकरोहिणी। पक्वं सशर्करं पीतं पाचनं पैत्तिके ज्वरे॥ मातुलिङ्गशिफाविश्वकाय-स्थाग्रन्थिकोद्भवम्। कफज्वरेशु सक्षारं पाचनं वा कणादिकम्॥ सम्सृष्टदोषेषु हितं संसृष्टमथ संसृष्टमथ पाचनम्।" इति।

अथ शमनानि। तत्र सङ्ग्रहे (चि.अ. १)-"सगुडाः सारिवाद्राक्षाशताह्वाकणरेणुकाः। काश्मर्यसारिवाद्राक्षात्रायमाणामृतागुडाः॥ शतपुष्पावचाकुष्ठदेवदारुहरेणुकाः। शर्करामधुसंयुक्ताः समांसीमुस्तधान्यकाः॥ कृष्णापुनर्नवाद्राक्षाशताह्वागुडसारिवाः। शालिपर्णीबलाद्राक्षासारिवाच्छिन्नसम्भवाः॥ आरग्वधो बला रास्ना काश्मर्यं मधुकं गुडः। शतावरीछिन्नरुहास्वरसो वा गुडान्वितः॥ सकृष्णजीरकसितानागरश्चामृतारसः। वातज्वरं जयत्याशु केवलो वाऽमृतारसः॥ भार्गीसरलगाङ्गेयीदारुकुष्ठैलवालुकम्। कोष्णं गुडघृतोपेतं पिबेद्वा वातजे ज्वरे॥' इति। सिद्धयोगे तु (ज्वराधिकारे श्लो.८९)-"किराताब्दामृतोदीच्यवृहतीद्वयगोक्षुरैः। सस्थिराकलशीविश्वैः क्काथो वातज्वरापहः॥" इति। वङ्गसेने तु (ज्वराधिकारे श्लो. २२७)-"पञ्चमूलीबलारास्नाकुलत्थैः सह पौष्करैः। पर्वभेदं शिरःकम्पं निहन्ति पवनज्वरम्॥ दर्भं बलां गोक्षुरकं पाचयेत्पादशेषितम्। शर्कराघृतसंयुक्तं पिबेद्वातज्वरापहम्॥" इति। इति वातज्वरः।

अथ पित्तज्वरः। तत्र सङ्ग्रहे (चि.अ. १)-"पटोलादिगुडूच्यादी सूत्रोक्तौ पित्तजे ज्वरे। अञ्जनादिः सकाश्मर्यः सारिवादिः सशर्करः॥ सितामधुककाश्मर्यशीतोशीरपरूषकम्। गुडूचीसारिवृत्तरोध्रकमलोत्पलशकराः। द्राक्षाभयातिक्तघनशम्याकफलपपटम्। श्यामापर्पटदुःस्पर्शातिक्तातिक्त बृषासिताः॥ श्यामा-प्रियङ्गुः। शर्करातिक्तकटुकात्रायमाणाबिभीरकम्। गुडूच्यामलकैर्युक्तः केवलो वाऽपि पर्पटः॥ कषायो वा हिमस्तिक्तद्राक्षामधुकनिम्बजः। पित्तज्वरघ्नीतिक्ता वा श्लक्ष्णपिष्टा सशर्करा॥" इति। वङ्गसेने तु (ज्वराधिकारे श्लो. २४१)-"पटोलयवधान्याकमधुकं मधुसंयुतम्। हन्ति पित्तज्वर दाहं तृष्णां चातिप्रमाथिनीम्॥ द्राक्षारग्वधयोश्चापि काश्मर्यस्याथवा जलम्। पटोलाभयनिष्काथो मधुना मधुरीकृतः। तीव्रपित्तज्वरामर्दी पानात्तृट्दाहनाशनः॥ एकः पर्पटकः श्रेष्ठः पित्तज्वरधिनाशनः किं पुनर्यदि युज्येत चन्दनोदीच्यनागरैः॥ गुडूचीमुस्तधान्याकमधुक कटुरोहिणी। तृष्णाशूलारुचिच्छर्दिपित्तज्वरहरो गणः। किरातामृतधान्याब्द-चन्दनोशीरपर्पटैः। सपद्मकैः कृतः क्काथो हन्ति पित्तभवं ज्वरम्। दाहहृल्लासमरुचिमु-

त्क्लेशवमथुक्लमान्॥ ससितो निशि पर्युषितः प्रातर्धान्याकतण्डुलक्काथः। पीतः शमयत्यचिरादन्तर्दाहं ज्वरं घोरम्॥ चन्दनं मधुकं द्राक्षा कटुका सदुरालभा। चन्दनादिगणः प्रोक्तो हन्याद्दाहज्वरारुचीः॥ मुद्गानामञ्जलीचूर्णं यष्टीमधुकमाधितम्। पाक्यं शीतकषायं वा पिबेत्पित्तज्वरापहम्॥ ह्रीबेरं मुस्तकं धान्यं चन्दनं यष्टिकाऽमृता। वृषोशीरयुतः क्काथः शर्करामधुसंयुतः। रक्तपित्त जयत्युग्रं तृष्णादाहज्वरापहः॥ भूनिम्बातिविषारोध्रं मुस्तकेन्द्रयवामृतम्। वासक नागरं बिल्वं कषायो माक्षिकान्वितः। सश्वासकासविड्भेदरक्-तपित्तज्वरापहः॥ पथ्यातैलघृतक्षौद्रैर्लेहो दाहज्वरापहः। कासासृक्पित्तवीसर्पश्वासान् हन्ति वमीरपि॥" इति। इति पित्तज्वरः।

अथ कफज्वरः। तत्र सङ्ग्रहे (चि. अ. १)-"कफजेऽतिविषोशीरपटोलमरिचक्षपाः। समूर्वेन्द्रयवद्वीपिकुष्ठनिम्ववचागुडाः॥ क्षपा-हरिद्रा। सप्तच्छदामृतानिम्बस्फूर्जातं माक्षिकान्वितम्। स्फूर्जातः-तिन्दुकः। निशा त्रिकटुकं तिक्ता नागपुष्पं कलिङ्गकाः॥ सारिवातिविषाकुष्ठदुःस्पर्शामुस्तगुग्गुलु। परूष त्रिफला तिक्ता बीजं वृक्षकजं घनः॥ नागरत्रिफलामुस्तामूर्वापाठाः समाक्षिकाः।" इति। वङ्गसेने तु (ज्वराधिकारे श्लो. २६४) -"त्रिफलात्रिवृतामुस्तं कटुकं सकलिङ्गकम्। पटोलारग्वध चैव रोहिणी चित्रकं समम्। क्काथः क्षौद्रयुतः श्लेष्मज्वरकासगलामये॥ निम्बविश्वामृताभीरुशठीभूनिम्बपौष्करम्। पिप्पली बृहती चेति क्काथो हन्ति कफज्वरम्॥ त्रिफलापटोलवासाछिन्नरुहातिक्तरोहिणीषड्ग्रन्था। मधुना श्लेष्मसमुत्थे दशमूलीवासक्रस्य वा क्काथः॥ आमलक्यभया कृष्णा चित्रकश्चेत्ययं गणः। सर्वज्वरकफातङ्के भेदी दीपनपाचनः॥ सिन्धुवारदलक्काथं कणाढ्यं कफजे ज्वरे। जङ्घयोश्च बले क्षीणे कर्णे च पिहिते पिबेत्॥ कट्फलं पुष्करं कृष्णा शृङ्गी च मधुना सह। कासश्वासज्वरहरः श्रेष्ठो लेहः कफान्तकृत्॥ कफज्वरार्तस्त्रिफलां पिप्पलीं च समाक्षिकाम्। कासे श्वासे च मधुना सर्पिषा च सुखी भवेत्॥ कट्फलं पुष्करं शृङ्गी मुस्तकं कटुकं शठी। समस्तान्येकशो वाऽपि श्लक्ष्णचूर्णानि कारयेत्॥ सार्द्रकस्वरसक्षाद्रं लिह्यात्कफविनाशनम्। शूलानिलारुचिच्छर्दिकासश्वासक्षयापहम्॥ क्षौद्रोपकुल्यासंयोगः कासश्वासज्वरापहः। ह्रीहानं हन्ति हिक्कां च बालानां च प्रशस्यते।" इति। इति कफज्वरः।

अथ संसर्गजाः। तत्र सङ्ग्रहे (चि.अ. १)-संसर्गसन्निपातेषु मिश्रानेतान्विकल्पयेत्।" इति।

द्राक्षामधूकमधुकतोयाकाश्मर्यसारिवाः॥ ५५॥

मुस्तामलकह्रीबेरपद्मकेसरपद्मकम्।

मृणालचन्दनोशीरनीलोत्पलपरूषकम्॥५६॥

फाण्टो हिमो वा द्राक्षादिर्जातीकुसुमवासितः।

युक्तो मधुसितालाजैर्जयत्यनिलपित्तजम्॥५७॥

ज्वरं मदात्ययं छर्दिं मूर्च्छां दाहं श्रमं भ्रमम्।

ऊर्ध्वगं रक्तपित्तं च पिपासां कामलामपि॥५८॥

स०-द्राक्षादिरयं गणः फाण्टः-"सद्योऽभिषुतपूतः" (ह्. क. अ. ६१११) इत्येवंलक्षणः, तथा हिमः-शीतो वा, "रात्रिंद्रवे स्थितः" (ह्. क. अ. ६/१०) इत्येवंलक्षणः। तथा जातीकुसुमैः सुगन्धीकृतो मधुसितालाजैर्युक्तो वातपित्तजं ज्वरं जयति, मदात्ययादिंश्च।

आ० र०- वातपित्तज्वरे शमनमाह-द्राक्षामधूकेति। मृणालं-बिसम्। चूर्णपलोपेतमुष्णोदकचतुष्पलं शीतं वस्त्रपूतं-फाण्टः। हिमः-शीतकषायः। मधुसितालाजानां मिथः समानां पेयत्वानुपघातेन प्रक्षेपः।

पाचयेत्कटुकां पिष्ट्वा कर्परेऽभिनवे शुचौ।

निष्पीडितो घृतयुतस्तद्वसो ज्वरदाहजित्॥५९॥

स०-कटुकां पानीयेन पिष्ट्वा कर्परे-मृद्घटखण्डे, अभिनवे तथा शुचौ पाचयेत्। तस्या रसो निष्पीडितः सर्पिर्युक्तो ज्वरदाहौ जयति।

आ० र०- शमनान्तरमाह-पाचयेत्कटुकामिति। पाकोऽत्र पुटकाविधिना। सङ्ग्रहे तु (चि.अ. १)-"गोकण्टकबलादर्भाः ससिता वातपित्तजे। द्राक्षामलकभूनिम्बाः सगुडूचीशठीगुडाः॥ त्रायान्तीसारिवाद्राक्षाकाश्मर्यच्छिन्नजागुडाः। द्राक्षामसूरत्रायन्तीगुडूचीसारवाबलाः॥" इति। सिद्धयोगे तु (ज्वराधिकारे श्लो.११६)-"त्रिफलाशाल्मलीरास्नाराजव्रुक्षाटारूषकैः। श्रृतमम्बु हरेत्तूर्णं वातपित्तोद्भवं ज्वरम्॥ [विश्वामृताब्दभूनिम्बैः पञ्चमूलीसमन्वितैः। कृतः कषायो हन्त्याशु वातपित्तोद्भवं ज्वरम्॥] पञ्चमूलीहस्वा। निदिग्धिकामृतारास्नात्रायमाणाबलान्वितैः।

मसूरविदलैः क्काथो वातपित्तज्वरं जयेत्॥ विदलाः-यन्त्रदलनजा अवयवाः। गुडूची पर्पटं मुस्तं किरातं विश्वभेषजम्। वातपित्तज्वरे देयं पञ्चभद्रमिदं शुभम्॥" इति। वङ्गसेने तु (ज्वराधिकारे श्लो. २९२)-"बलाभार्ग्यमृतैरण्डचन्दनोशीरपर्पटैः। उपकुल्याब्दह्रीबेरैः कषायं च पिबेत्ततः। पर्वभेदं शिरःकम्पं वातपित्तज्वरं जयेत्॥ नीलोत्पलमुशीरं च बला पद्मकमेव च। काश्मरी मधुकं द्राक्षा मधूकानि परूषकम्। पेयः शीतकषायोऽयं वातपित्तज्वरापहः॥ आरग्वधफलं मुस्तं यष्टीमधुकमेव च। उशीरमभया चैव हरिद्रादारुसाह्वया॥ पटोलं पिचुमन्दश्च तथा कटुकरोहिणी।

कफवाते वचातिक्तापाठारग्वधवत्सकाः।

पिप्पलीचूर्णयुक्तो वा क्काथश्चिच्छन्नोद्भवोद्भवः॥ ६०॥

स०-वातश्लेष्मणि कषायकल्पनया कल्पिता वचादयो मताः। अथवा, गुडूचीसम्भवः क्काथः पिप्पलीचूर्णयुतो मतः।

आ० र० - अथ वातकफज्वरः। तत्र शमनमाह-कफवात इति।

शमनान्तरमाह-पिप्पलीचूर्णयुक्तो वेति।

व्याघ्रीशुण्ठ्यमृताक्काथः पिप्पलीचूर्णसंयुतः।

वातश्लेष्मज्वरश्वासकासपीनसशूलजित्॥ ६१॥

स०-व्याघ्र्यादिक्काथः कणाचूर्णसंयुक्तो वातश्लेष्मज्वरादिजित्।

आ० र० - शमनान्तरमाह-व्याघ्रीशुण्ठ्यमृताक्काथ इति।

पथ्याकुस्तुम्बरीमुस्ताशुण्ठीकट्वृणपर्पटम्।

सकट्फलवचाभार्ङ्गीदेवाह्वं मधुहिङ्गुमत्॥ ६२॥

कफवातज्वरष्ठीवकुक्षिहृत्पार्श्ववेदनाः।

कण्ठामयास्यश्वयथुकासश्वासान्नियच्छति॥ ६३॥

स०-पथ्यादि पाचनं सिद्धचूर्णं मधुहिङ्गुभ्यां संयुतं कफवातज्वरादीन् पराकरोति।

आ० र०- शमनान्तरमाह-पथ्याकुस्तुम्बरीति। सिद्धयोगे (ज्वराधिकारे श्लो. १३४)-"पिप्पलीपिप्पलीमूलचव्यचित्रकनागरैः। दीपनीयः स्मृतो वर्गः कफानिलगदापहः॥ पिप्पलीभिः श्रृतं तोयमनभिष्यन्दि दीपनम्। वातश्लेष्मविकारघ्नं प्लीहघ्नं ज्वरनाशनम्॥ मुस्तपर्पटदुःस्पर्शागुडूचीविश्वजं जलम्। कफवातारुचिच्छर्दिदाहशोफज्वरापहम्॥ दशमूलीरसः पेयः कणायुक्तः कफानिले। अविपाकेऽतिनिद्रायां पार्श्वरुक्श्वासकासके॥" इति। वङ्गसेने तु (ज्वराधिकारे श्लो. ३३५)-"सभूनिम्बामृतादारु कट्फलं कटुका वचा। कषायं पाययेदाशु वातश्लेष्मज्वरापहम्। पर्वभेदशिर शूलकासारोचकपीडितम्॥ तृष्णान्विते वातकफज्वरार्ते सश्वासकासारुचिविड्विबन्धे। हितं जलं पाचनदीपनं च पटोलशुण्ठीयवपिप्पलीनाम्॥" इति। इति वातकाफज्वरः।

आरग्वधादिः सक्षौद्रः कफपित्तज्वरं जयेत्।

तथा तिक्तावृषोशीरत्रायन्तीत्रिफलामृताः॥ ६४॥

पटोलातिविषानिम्बमूर्वाधन्वयवासकाः।

स०-"आरग्वधेन्द्रयवादिभिः" (ह्. सू. अ. १५११७) माक्षिकसहितः कफपित्तज्वरं जयति। तथा तिक्तादयः कफपित्तज्वरं घ्नन्ति।

आ० र०- अथ पित्तकफज्वरः। तत्र शमनमाह-आरग्वधादिरिति।

शमनान्तरमाह-तथेति। सङ्ग्रहे तु (चि.अ. १) - "वृषपुष्पच्छदरसः शर्करामाक्षिकान्वितः। पित्तश्लेष्मज्वरं हन्ति सासृक् पित्तं सकामलम्॥ अनन्ताविश्वभैषज्यकटुकातोयतोयदाः। ज्वरतृट्भ्रमसम्मोहधूमकास्रकनाशनाः॥" इति। अनन्ता-दुरालभा। सिद्धयोगे तु (ज्वराधिकारे श्लो. १२२)-"कण्टकार्यमृताभार्गी नागरेन्द्रयवासकम्। भूनिम्बं चन्दनं मुस्तं पटोलं कटुरोहिणी॥ कषायं पाययेदनं पित्तश्लेष्मज्वरापहम्। दाहतृष्णारुचिच्छार्दिकासहृत्पार्श्वशूलनुत्॥ [गुडूचीनिम्बधान्याकं पद्मकं चन्दनान्वितम्।] एष सर्वज्वरान् हन्ति गुडूच्यादिस्तु दीपनः। हृल्लासारोचकच्छर्दिपिपासादाहनाशनः॥ सशर्करामक्षमात्रां कटुकामुष्णवारिणा। पीत्वा ज्वरं जयेज्जन्तुः कफपित्तसमुद्भवम्॥ पटोलं पिचुमन्दं च त्रिफला मधुकं वला। साधितोऽयं कषायः स्यात्पित्तश्लेष्मभवे ज्वरे॥ दीपनं कफविच्छेदि पित्तवातानुलोमनम्। ज्वरघ्नं पाचनं भेदि श्रृतं धान्यपटोलयोः॥" इति। इति पित्तकफज्वरः।

सन्निपातज्वरे व्याघ्रीदेवदारुनिशाघनम्॥६५॥
पटोलपत्रनिम्बत्वक्त्रिफलाकटुकायुतम्।

स०-सन्निपातज्वरे व्याघ्र्यादिकटुकान्तं पाचनम्।

आ० र० - अथ सन्निपातज्वरः। तत्र शमनमाह-सन्निपातज्वर इति।

नागरं पौष्करं मूलं गुडूची कण्टकारिका॥६६॥
सकासश्वासपार्श्वार्तौ वातश्लेष्मोत्तरे ज्वरे।

स०-नागरादिपाचनं वातश्लेष्माधिके ज्वरे कासादीन्निहन्ति।

आ० र० - शमनान्तरमाह-नागरमिति। सङ्ग्रहे तु (चि.अ.१)-"मुस्ता पर्पटकं पथ्या मृद्वीका कटुरोहिणी। त्रायन्तीकणतन्मूलद्राक्षापथ्यामधूलिकाः॥ मधूलिका-जलजयष्टीमधुः।

त्रिफलोशीरषड्ग्रन्थायष्टीमधुघनाबलाः॥" इति। सिद्धयोगे तु (ज्वरा. श्लो. १६६)-"पञ्चमूली किरातादिर्गणो योज्यस्त्रिदोषजे। पित्तोत्कटे च मधुना कणया वा कफोत्कटे॥ वातपित्तज्वरोक्तोऽयं नवाङ्गः। उभयं दशमूलं तु सन्निपातज्वरापहम्। कासे श्वासे च तन्द्रायां पार्श्वशूले च शस्यते। पिप्पलीचूर्णसंयुक्तं कण्ठहृद्ग्रहनाशनम्॥ उभयं-द्विपञ्चमूलात्मकम्। चिरज्वरे वातकफोल्बणे वा त्रिदोषजे वा दशमूलमिश्रः। किरारतिक्तादिगणः प्रयोज्यः शुद्धार्थिने वा त्रिवृताविमिश्रः॥ आदिशब्दात् गुडू चीमुस्ताशुण्ठ्यः। दशमूलमिश्रस्यैव त्रिवृतामिश्रवम्। दशमूली शठी शृङ्गी पौष्करं सदुरालभम्। भार्गी कुटजबीजं च पटोलं कटुरोहिणी॥ अष्टादशाङ्ग इत्येष सन्निपातज्वरापहः। कासहृद्ग्रहपार्श्वार्तिश्वासहिक्कावमीहरः॥ भूनिम्बदारुदशमूलमहौषधाब्दतिक्तेन्द्रबीजधनिकेभकणाकषायः। तन्द्राप्रलापकसनारुचिदा-हमोहश्वासादियुक्तमखिलं ज्वरमाशु हन्ति॥ मुक्तापर्पटकोशीरदेवदारुमहौषधम्। त्रिफला धन्वयासश्च नीली कम्पिल्लकं त्रिवृत्॥ किराततिक्तकं पाठा बला कटुकरोहिणी। मधुकं पिप्पलीमूलं मुस्ताद्यो गण उच्यते॥ अष्टादशाङ्गमुदितमेतद्वा सन्निपातनुत्। पित्तोत्तरे सन्निपाते हितं चोक्तं मनीषिभिः। मन्यास्तम्भ उरोघात उरःपार्श्वशिरोग्रहे॥ बृहत्त्यौ पौष्करं भार्गी शठी शृङ्गी दुरालभा। वत्सकस्य च बीजानि पटोलं कटुरोहिणी। बृहत्यादिर्गणः प्रोक्तः सन्निपातज्वरापहः। कासादिषु च सर्वेषु हितः सोपद्रवेषु च॥ शठी पुष्करमूलं च व्याघ्री शृङ्गी दुरालभा। गुडूची नागरं पाठा किरातं कटुरोहिणी॥ एष शठ्यादिको वर्गः सन्निपातज्वरापहः। कासहृद्ग्रहपाश्वार्तिश्वासे तन्द्यां च शस्यते॥" इति। वङ्गसेने तु (ज्वरा. श्लो. ४४३)- "दशमूलस्य निक्काथः कात्फलादिरजोयुतः। तुल्यार्द्रकरसः पीतो मृत्युकल्पं ज्वरं जयेत्॥ दशमूलीकषायं तु सपौष्करकणान्वितम्। सन्निपातज्वरे देयं श्वासकासतृषान्विते॥ अमृतादशमूलाभ्यां साधितं विधिवज्जलम्। सन्निपातज्वरं हन्यान्त्रयोदशविधं नृणाम्॥ विश्वशठीदशमूली-छिन्नापाठेभपिप्पलीन्द्रयवाः। सकिराततिक्तवासाः शमयन्ति हृतौजसं सद्यः॥ त्र्यूषणदशमूलशठीभार्गीछिन्नोद्भवाक्काथः। पीतः शमयति सहसा ज्वरमुग्रं सन्निपाताख्यम्॥ द्विपञ्चमूलीषड्ग्रन्थाविश्वगृध्रनखीद्वयात्। गृधनखीद्वयं-कन्थारिकाद्वयम्। कफवातहरः क्काथः सन्निपातहरः परः॥ सिंहास्यपर्पटारिष्टं यष्टीधान्याकनागरम्। दारुग्रगन्धेन्द्रयवाः श्वदंष्ट्रा ग्रन्थिकं तथा॥ एषां कषायमाहृत्य सन्निपातज्वरी पिबेत्। श्वासातिसारकासघ्नं शूलारुचिहरं परम्॥ कङ्कलं त्रिफला दारु चन्दनं सपरूषकम्। कटुकापद्मकोशीरं विपचेत्कार्षिकं जलम्॥ तत्सन्निपातदाहघ्नं पीतमात्रेयपूजितम्। दीर्घाकालप्रयुक्तानां ज्वरिणाममृतोपमम्॥ व्योषाब्दत्रिफलारिष्टपटोलीतिक्तवत्सकैः। सभूनिम्बामृतापाठैस्त्रिदोषज्वरजिज्जलम्॥ तिल्वकं त्रिवृता दन्ती समुलं चतुरङ्गुलम्। पक्वं कषायं विस्राव्य नीलिनीचूर्णमिश्रितम्। ससर्पिष्कं पिबेत्तूर्णम् सन्निपाते विरेचनम्॥ (श्लो. ३९२)-वर्धनैर्वाऽपि हीनस्य हापनैरुच्छ्रितस्य वा।

कफस्थानानुपूर्व्या सन्निपातज्वरे क्रिया॥ हीनस्य वर्धनाद्वानिर्वृद्धयोरिति निश्चयः। हापनादतिवृद्धस्य हीनयोर्वृद्धिसम्भवः॥ ततः समत्वं दोषाणामुरः स्थानं कफस्य तु। तत्रस्थानां क्रिया तद्वदिति ज्वरविनिर्जयः॥ यथादोषोच्छ्रयं चैव ज्वरान् शेषानुपक्रमेत्। निर्हरेत्पित्तमेवादौ ज्वरेषु समवायिषु। दुर्निवारतरं तद्धि ज्वरार्तेषु विशेषतः॥ सन्निपाते क्षुधार्तं यो भोजयेत्पिशितौदनम्। स कथं भिषगाख्यातिं लभेन्मूढो नराधमः॥ सन्निपाते तु दाहार्तं यः सिञ्चिच्छीतवारिणा। आतुरः स कथं जीवेद्विषग्वा स कथं भवेत्॥ सन्निपाते च कम्पन्तं विलपन्तं च योघृतम्। पाययेद्भोजयेद्वाऽपि तौ च स्यातामु(तां शु)भौ कथम्॥ सन्निपातेन तृष्यन्तं पार्श्वरुक्तालुशोषिणम्। यः पाययेज्जलं शीतं स मृत्युर्नरविग्रहः॥समुद्रतरणं ह्येतद्वदन्ति भिषगीश्वराः। मृत्युना सह योद्धव्यं सन्निपातं चिकित्सिता॥ सन्निपातार्णवे मग्नं योऽभ्युद्धरति मानवम्॥कस्तेन न कृतो धर्मः कां च पूजां न सोऽर्हति॥ श्लेष्मनिग्रहमेवादौ कुर्याव्द्याधौ त्रिदोषजे। निरस्ते श्लेष्मणि ह्यस्य स्रोतःसूद्घाटितेषु च। लाघवं जायते सद्यस्तृष्णा चैवोपशाम्यति॥ लङ्घानं वालुकास्वेदो नस्यं निष्ठीवनं तथा। अवलेहोऽञ्जनं चैव प्राक् प्रयोज्यं त्रिदोषजे॥ सुरसार्जकनिर्यासः समधुव्योषसैन्धवः। महाश्लेष्मानिलोद्रेकसंज्ञानाशविमोक्षणः॥" [इति। सिद्धयोगे तु (ज्व. श्लो. १५३)]-"मधूकसारसिन्धूत्थवचोषणकणाः समाः। श्लक्ष्णं पिष्ट्वाऽम्भसा नस्यं कुर्यात्संज्ञाप्रबोधनम्॥(श्लो. १५१)-मातुलिङ्गार्द्रकरसं कोष्णं त्रिअल्वणान्वितम्। अन्यद्वा सिद्धिविहितं नस्यं तीक्ष्णं प्रयोजयेत्॥ तेन प्रभिद्यते श्लेष्मा प्रभिन्नश्च प्रसिच्यते। शिरोहृदयकण्ठास्यपार्श्वरुक् चोपशाम्यति॥ (श्लो. १४७)-आर्द्रकस्वरसोपेतं सैन्धवं कटुकत्रयम्। आकण्ठं धारयेदास्ये निष्ठीवेच्च पुनःपुनः॥ तेनास्य हृदये श्लेष्मा मन्यापार्श्वशिरोगलात्। लीनोऽप्याकृष्यते शुष्को लाघवं चास्य जायते॥ पर्वभेदो ज्वरो मूर्च्छा निद्राकासगलामयाः। मूखाक्षिगौरवं जाड्यमुत्क्लेशश्चोपशाम्यति॥ सकृद्विचतुः कुर्याद्दृष्ट्वा दोषबलाबलम्। एतद्धि परमं प्राहुर्भेषजं सन्निपातिनाम्॥ स्विन्नमामलकं पिष्ट्वा द्राक्षाभिः सह संसृजेत्। विश्वभेषजसंयुक्तं मधुना सह लेहयेत्॥ तेनास्य शाम्यते मूर्च्छा कासः श्वासस्तथैव च॥ कट्फलं पौष्करं शृङ्गी व्योषं यासश्च कारवी। श्लक्ष्णचूर्णीकृतं चैतन्मधुना सह लेहयेत्॥ एषाऽवलेहिका हन्ति सन्निपातं सुदारुणम्। हिक्कां श्वासं च कासं च कण्ठरोधं नियच्छति। एतद्योज्यं कफोद्रेके चूर्णमार्द्रकजै रसैः॥ सर्वेषु सन्निपातेषु न क्षौद्रमवचारयेत्। शीतोपचारि क्षौद्रं स्याच्छितं चात्र विरुध्यते॥ क्रियाभिस्तुल्यरूपाभिः क्रियासङ्कर्यमिष्यते। भिन्नरूपतया तास्तु न तु कुर्वन्ति दूषणम्॥ (श्लो. १५४)-शिरीषबीजगोमूत्रकृष्णामरिचसैन्धवैः। अञ्जनं स्यात्प्रबोधाय सरसोनशिलावचैः॥ यदा तुल्यानिलकफौ तालुक्लोमगलाश्रितौ। कुर्यात्तावधिकं शोषं जिह्वायाः खरतां तथा॥ तथा तां स्फुटितां जिह्वां संशुष्कां मधुपिष्टया। द्राक्षया सघृतं चास्य लेपयेत्सन्निपातिनः॥ स्वेदोद्गमे भृष्टकुलित्थ चूर्णनिपातनं शस्तमिति

ब्रुवन्ति।" इति। वङ्गसेने तु (ज्व.श्लो. ५०३)-"दुर्गोऽम्भसि यथा मज्जद्भाजनं त्वरया बुधः। गृह्णीयात्तलमप्राप्तं तथाऽभिन्यासपीडितम्॥ कारवीपुष्करैरण्डत्रायन्तीनागरामृताः। दशमूलीशठीश्रृङ्गीवासाभार्गीपुनर्नवाः॥ तुल्या मूत्रेण निष्काथ्य पीताः स्रोतोविशोधनाः। अभिन्यासज्वरायासमाशु घ्नन्ति समुद्धतम्॥ मातुलुङ्गाश्मभिद्विल्वव्याघ्रीपाठोरुबूकजः। कथो लवणमूत्राड्योऽभिन्यासानाहशूलनुत्॥ व्याघ्रीदुरालभाभार्गीशठीश्रृङ्गि सपौष्करम्। पक्काम्बु श्लेष्महृत्पेयमभिन्यासप्रशान्तये॥ भार्गी पुष्करमूलं च रास्ना बिल्वं समुस्तकम्। नागरं दशमूलं च पिप्पल्यासु च साधितम्। हिङ्ग्वार्द्रकरसोपेतं पिप्पलीचूर्णसंयुतम्॥ सन्निपातज्वरं घोरमभिन्यासं च दारुणम्। हृत्पार्श्वशूलमानाहं सद्यःपीतं नियच्छति॥ बीजपूरकबिल्वाश्मभेदकं बृहतीद्वयम्। सकेशीकं तथैरण्डं जले चाष्टगुणे श्रृतम्॥ पक्वगोमूत्रसंयुक्तं बिडसौवर्चलान्वितम्। हृद्वस्तिशूले सानाहेऽप्यभिन्यासज्वरे हितम्॥ दन्तीं द्रवन्तीं बृहतीं सैरण्डं [बीजपूरकम्। श्यामां व्याघ्रीं च निष्काथ्याभिन्यासे बहुवर्चसि॥ सिंही व्याघ्र्यमृता द्राक्षा अजाजी सकटुत्रिकम्। श्रृङ्गीविड] च समं पक्त्वा विस्राव्य साधयेत्॥ घृतात्तैस्तण्डुलैर्भृष्टैः पेयामुष्णां ज्वरी पिबेत्। हिक्की श्वासी च कासी च तथाऽभिन्यासपीडितः। विबद्धवातविण्मूत्रे पानमस्य प्रयोजयेत्॥ बृहती पौष्करं भार्गी शठी श्रृङ्गी दुरालभा। पक्त्वा पानं प्रशंसन्ति श्लेष्मा तेनास्य शाम्यति॥ त्रिवृद्विशालात्रिफलाकटुकारग्वधैः कृतः। सक्षारो भेदनः क्काथः पेयः सर्वज्वरापहः॥ तिक्ताऽभया त्रिवृत्तीर्णा त्रायन्ती राजवृक्षकः। क्षाराढ्यः सैन्धवोपेतः क्काथो भेदी ज्वरापहः॥ शिरीषबीजं मरिचं बस्तमूत्रेण तत्समम्। अञ्जनं तदभिन्यासे संज्ञाबोधनमिष्यते॥ मातुलुङ्गरसं तस्य हिङ्गुशुण्ठीयुतं मुखे। दद्यात्प्रबोधनं तीक्ष्णं कटुतिक्तोपसंहितम्॥ त्वगेलापत्रसुषवीबृहतीकण्टकारिकाः। मरीचं पिप्पली बिल्वं चिरिबिल्वं सचित्रकम्॥ करञ्जबीजं मञ्जिष्ठा त्रायन्ती विश्वभेषजम्। गलप्रबोधनं श्रेष्ठमभिन्यासज्वरापहम्॥ करञ्जवह्निमञ्जिष्ठात्रायन्तीविश्वकूलकम्। कूलकं-पटोलम्। बृहत्यौ सुषवी व्योषं क्काथः स्याद्गलशोधनः॥ इत्यभिन्यस उद्दिष्टः सरूपः सचिकित्सितः। चिकित्सिते कृतेऽप्येवं [यस्य संज्ञा न जायते। ललाटे पादयोर्वाऽपि] तस्य दाहः प्रशस्यते॥ (श्लो. ४९०)- ज्योतिष्मत्यास्तथा तैलं मूलं पिण्डालुकस्य च। तन्द्रीविनाशनं श्रेष्ठं नस्य कर्मणि योजितम्॥ सैन्धवं श्वेतमरिचं सर्षपं कुष्ठमेव च। बस्तमूत्रेण पिष्टानि नस्यं तन्द्रीनिवारणम्॥ असुराह्वपतङ्गस्य विट् चूर्णं मधुसंयुतम्। अञ्जनाद्बोधयेन्मुग्धं तन्द्रितं सन्निपातिनम्॥ जातीपुष्पं प्रवालं च रोहिणी मरिचं वचा। सैन्धवं बस्तमूत्रेण तन्द्रीनाशनमुत्तमम्॥ अयोरजः श्वेतरोध्रमञ्जनं मरिचं तथा। गोपित्तेन समायुक्तं तन्द्रीनाशनमुत्तमम्॥" इति। इति सन्निपातज्वरः।

मधूकपुष्पमृद्वीकात्रायमाणापरूषकम्॥ ६७॥

सोशीरतिक्तात्रिफलाकाश्मर्यं कल्पयेद्भिमम्।

कषायं तं पिबन् काले ज्वरान् सर्वानपोहति॥ ६८॥

जात्यामलकमुस्तानि तद्वद्धन्वयवासकम्।

स०-मधूकपुष्पादिकं काले-शास्त्रोक्ते, शीतकषायं पिबन् ज्वरान् सर्वान्-एकदोषद्विदोषजान्, अपोहति। "उपसर्गादस्यत्यूह्योर्वेति वाच्यम्" इति परस्मैपदम्। जातिपल्लवा आमलकानि मुस्तं धन्वयासकं तद्वत्-पूर्ववच्छितकषायं कल्पयित्वा पिबन् सर्वान् ज्वरान् हन्ति। धन्वयवासकं चेति चशब्दोऽत्र लुप्तो द्रष्टव्यः। तदेतैश्चतुर्भिर्द्रव्यैरेतत् पाचनम्। केचित्तु धन्वयवासकं पृथगेवेच्छन्ति। तस्मादेतत्कृतोऽपि कषायः पूर्ववद्वोध्यः।

आ० र० - अथ ज्वरसामान्यम्। तत्र शमनमाह-मधूकपुष्पेति। तच्च त्रिधा-मधुकपुष्पादिदशकं जात्यादित्रिकं धन्वयासकं चेति। त्रयोऽपि शीतकषायाः ।

बद्धविट् कटुकाद्राक्षात्रायन्तीत्रिफलागुडम्॥ ६९॥

स०-तथा च बद्धविट् पुरुषः कटुकादिकं कषायं पिबेदिति वर्तते, न तु हिममिति। शीतस्य मलस्तम्भहेतुत्वादस्य चौषधस्य शोधनरूपत्वात्। गुडा-सुधा, गुड इत्यन्ये।

आ० र० - बद्धविद्धस्य शोधनमाह-बद्धविडिति। शीतकषाये गुडप्रक्षेपः। इति ज्वरौषधानि।

जीर्णौषधोऽन्नं पेयाद्यमाचरेत्।

स०-जीर्ण-परिणतं, औषधं यस्य स जीर्णौषधः सन्, पेयाद्यमेव पूर्वोक्तमन्नं भुञ्जीत। अद्यत इत्यन्नम्, इति कृत्वा पेयादेरप्यन्नत्वम्। आदिशब्देन यूषादिपरिग्रहः।

आ० र० - अथ ज्वरौषधानन्तरं पथ्यानि। तत्र पेयाद्यं पथ्यमाह-जीर्णौषधोऽन्नमिति। तच्च लङ्घनानन्तरौषधदानविषयम्। पेयाद्यनन्तरौषधदाने रसौदनपर्यन्तपथ्यसेवानिष्पत्तेः पुनः पेयादिक्रमस्यानुचितत्वात्। आद्यशब्दाद्यूषौदनादयः। सिद्धयोगे तु (ज्व.श्लो. ८४)-"औलोमोऽनिलः स्वास्थ्यं क्षुत्तृष्णा सुमनस्कता। लघुत्वमिन्द्रियोद्गार-शुद्धिर्जीर्णौषधाकृतिः। क्लमो दाहोऽङ्गसदनं भ्रमो मूर्च्छा शिरोरुजा। अरतिर्बलहानिश्च सावशेषौषधाकृतिः॥ औषधशेषे भुक्तं पीतं च तथौषधं च शेषेऽन्ने। न करोति गदोपशमं प्रकोपयत्यन्यरोगांश्च॥" इति।

श्लेष्मवान्न तु।

पेया कफं वर्धयति पङ्कं पांसुषु वृष्टिवत्॥७०॥

स०-श्लेष्मवान्न तु-जीर्णौषधोऽपि श्लेष्मवान्नरः पेयादिकं ना श्नीयात्। किम्? इत्याह-पेयेत्यादि। यतः पेया कफं वर्धयति--विलीनरुपस्य कफस्य स्त्यानभावतामुत्पादयन्ती संस्थानविशेषमुपर्युपरिभावतयोपचयमुत्पादयति, न तु सा कफं साक्षाद्वर्धयति, इति वर्धयतेरर्थः, अनेकार्थत्वाद्धातूनामिति, एषचार्थोऽनुरूपतन्त्रकारदृष्टान्तदर्शनादवगम्यते। तथा चाहपङ्कं पांसुषु वृष्टिवदिति। यथा,-पांसुषु वृष्टिः पतिता न तु पङ्कं वर्धयति-शिथिलरूपतां पांसूनामपास्य निबिडरूपतामिव तेषामुत्पादयति। न पांसून् वृष्टिर्वर्धयति-आधिक्यं नयति, न वर्धयतेऽत्रा(त्येत्य)र्थः। तन्त्रकारस्यार्थ एवं विवक्षितो भविष्यत् तदानीमत्रैवं स्पष्टमेव दृष्टन्तमदर्शयिष्यत्। यथा-"पेया कफं वर्धयति यथा वृष्टिर्नदीजलम्।" इति।

आ० र० - श्लेष्मज्वरे पेयां निषेधयति-श्लेष्मवान्न त्विति।

पेयानिषेधे युक्तिमाह-पेया कफं वर्धयति पङ्कं पांसुषु वृष्टिवत्। श्लेष्माबिषवदेहानामिति। यथा पांसुषु पतिता वृष्टिः पङ्कं वर्द्धायति तथा श्लेष्माभिषवे-कफक्लिन्ने देहे, पतिता पेया कफं वर्द्धयति।

तच्च तन्त्रकारोऽमुनैवानुसारेणाह-

श्लेष्माभिष्यण्णदेहानामतः प्रागपि योजयेत्।

यूषान् कुलत्थचणककलायादिकृतान् लघुन्॥७१॥

रूक्षांस्तिक्तरसोपेतान् हृद्यान् रुचिकरान् पटून्।

स०-आभिष्यण्ण इति, अभिपूर्वात्स्यन्देः स्रवणार्थो व्युत्पादितः। श्लेष्मणा-स्रुतिरूपेणैव, अभिष्यण्णः-क्लिन्न इव, देहो येषां ते श्लेष्माभिष्यण्णदेहाः, तेषाम्, अतो ज्वरिणां प्रागपि प्रथमपथ्यावसरेऽपि, यूषान् योजयेत्। किमुत श्लेष्मवतः पुंसो जीर्णौषधस्य यूषान्न योजयेत्? इत्यपिशब्दस्यथः। किम्भूतान्? कुलत्थादिकृतान्। तथा, लघून्। ननु, कुलत्थादीनां लघुत्वात्तत्कृता यूषा लघव एव भविष्यन्ति। तत्किं लघूनित्यनेन? अत्रोच्यते। शम्बीधान्यानां मध्ये गुरवोऽपि राजमाषमाषादयः सन्ति, तन्निवृत्त्यर्थमेतत्। अपि च, लघूनित्यनेन यूषप्रकृतिद्रव्यैरल्पपरिमाणैः कृतानिति द्योतयति। यतोऽल्पपरिमाणैः कुलत्थादिभिः कृता लघुतराः स्युः, तस्माल्लघूनिति युक्तम्। तथा, रूक्षान्-घृतभर्जनकादिरहितान्। तथा, तिक्तरसयुक्तान्। तथा, हृद्यान्-इष्टरसगन्धवर्णस्पर्शयुक्तत्वाच्चेतस आह्लादकरान्। तथा, रुचिकरान्-ज्वरिणोऽन्यस्य वा रोचिष्णून्। तथा, पटून्-सलवणान्।

आ० र०- पेयास्थाने यूषमाह-अतः प्रागपीति। प्रागपि-"युक्तं लङ्घितलिङ्गैस्तु तं पेयाभिरुपाचरेत्।" (श्लो. २४) इत्यत्रापि। लघून्-सम्यक्पाकेन। रूक्षान्-अकृतत्वेन धान्यस्यानवत्वेन [च]। पटून्-सैन्धवयोगेन।

रक्ताद्याः शालयो जीर्णाः षष्टिकाश्च ज्वरे हिताः॥७२॥

श्लेष्मोत्तरे वीततुषास्तथा वाटीकृता यवाः।

स०-रक्ताद्याः-"रक्तो महान् सकलमः" (ह्.सू.अ.६१९) इत्यादयः। तथा, षष्टिका व्रीह्यादयोऽपि, जीर्णाः-पुराणाः, हिताः-पथ्याः। श्लेष्मोत्तरे-प्रभूतश्लेषमणि ज्वरे, वीततुषाः-अपनीतत्वचो, यवाश्च पथ्याः। कीदृशाः ? वाटीकृताः-भृष्टविदलीकृता इत्यर्थः।

आ० र० - पथ्ययोग्यं धान्यमाह-रक्ताद्या इति। वाटीकृताः-बाधत्वं नीताः। बाधत्वं-भृष्टस्य शकलीकरणम्।

ओदनस्तैः स्रुतो द्विस्त्रिः प्रयोक्तव्यो यथायथम्॥७३॥

दोषदूष्यादिबलतो ज्वरघ्नक्काथसाधितः।

स०-ओदनस्तैः-रक्ताशाल्यादिभिः पूर्वोक्तैश्च, कृतो ज्वरिणो यथायथं यो यस्य दाने योग्यः स तस्य प्रयोक्तव्यः। किम्भूतः ? द्विस्त्रिः स्रुतो-द्वौ वारौ त्रीन् वारान् वा जलं दत्त्वा धातः। कथं प्रयोज्यः ? दोषदूष्यादिबलेन। ज्वरघ्नैः-ज्वरापहैर्द्रव्यैः, क्काथं कृत्वा, तेन क्काथेन साधितः। दोषस्य-वातादेर्बलं तथा दूष्यस्य रसादेर्बलमपेक्ष्य, आदिग्रहणाद्देशकालवयः सत्त्वसात्म्यशरीराहारबलं गृह्यते। एकाहादिकानां ज्वरिणामकृतपेयानामेव कुलत्थमुद्गचणकादियूषा उक्ताः।

आ० र० - ओदनविधिमाह-ओदनस्तैरिति। तैः-रक्तशाल्यादिभिः, द्विस्त्रिर्वा स्रुतो-यूळितः(?), उदकान्तरप्रक्षेपेण।

सम्प्रति सामान्येन ज्वरिणां कृतपेयानां यूषादीनाह-

मुद्गाद्यैर्लघुभिर्यूषाः कुलत्थैश्च ज्वरापहाः॥७४॥

स०-मुद्गाद्यैः-शिम्बीधान्यैः, लघुभिः कृता यूषास्तथा कुलत्थैः कृता यूषा ज्वरघ्नाः। मुद्गाद्यैरित्यादिः प्रकारे। तेन सुजरा मुद्गचणककुलत्थमकुष्टमसूरादयो गृह्यन्ते। मुद्गशब्दस्यादौ

निर्देश इदं बोधयति,-यूषसाध्ये व्याधौ बाहुल्येन मुद्गयूषः कार्यः, मुद्गानां पथ्यतमत्वात्। तथा चोवाच मुनिः (च.सू.अ.२५/३८)-"मुद्गः शिम्बीधान्यानां पथ्यत्वे श्रेष्ठतमः।" इति। ननु, मुद्गाद्यैरित्यादिशब्देनैव कुलत्था गृहिता एव, किं पृथङ्निर्देशेन? ब्रूमहे। कुलत्थयूषस्य ज्वरविषये विरलः प्रयोगः कार्य इति सूचयितुं पृथक्कृतो निर्देश इति। तथा च कुलत्था एवंगुणाः (ह.सू.अ.६/१ ९)-"उष्णाः कुलत्थाः पाकेऽम्लाः शुक्राश्मश्वासपीनसान्। कासार्शः कफवातांश्च घ्नान्ति पित्तास्रदाः परम्॥ इति। एवमुष्णत्वादम्लपिपाकित्वादतिपित्तास्रकारित्वात् कुलत्थानां यूषो बहुद्रव्यपरिमाणो बहुमात्रोपयुक्तो ज्वरस्य न शान्तये सम्पद्यते, प्रत्युत वृद्धये स्यादिति सम्भाव्यते, पित्तविरुद्धत्वात्। तस्मादल्पपरिमाणद्रव्यसाधितोऽल्पमात्रया कुलत्थयूषः श्लेष्माद्युपशमकृद्यावन्मात्रः स्यात्तावानेव प्रयोज्यत इति स्थितम्।

आ० र० - यूषद्रव्याण्याह-मुद्गाद्यैरिति।

कारवेल्लककर्कोटबालमूलकपर्पटैः।
वार्ताकनिम्बकुसुमपटोलफलपल्लवैः॥७५॥
अत्यन्तलघुभिर्मांसैर्जाङ्गलैश्च हिता रसाः।
व्याघ्रीपरूषतर्कारीद्वा क्षामलकदाडिमैः॥७६॥
संस्कृताः पिप्पलीशुण्ठीधान्यजीरकसैन्धवैः।
सितामधुभ्यां प्रायेण संयुता वा कृताकृताः॥७७॥

स०-कारवेल्लकादिभी रसा ज्वरे हिताः। मुनिस्तु कारवेल्लकादीनां शाकत्वमेवेच्छति (च.चि.अ.३११८७)। खरणादेऽप्युक्तम्-"पटोलं सफलं निम्बं कर्कोटककठिल्लकम्। शाकं पर्पटकं च स्यात्" इति। तथा जाङ्गलैः-जाङ्गलदेशप्राणिजैस्तदभावात्तत्तुल्यैरन्यदेशप्राणिजैरपि, मांसैर्हिता रसा व्याघ्र्यादिभिः संस्कृतास्तथा पिप्पल्यादिभिः संयुता इति वक्ष्यमाणेन सम्बन्धः। संस्कारमात्रयोगभाजः पिप्पल्यादयोऽत्र योज्य इत्यर्थः। प्रायेण केचिदेव सितामधुभ्यां युक्ता अवस्थावशात्, न तु सर्व एव। किम्भूता रसा यूषाश्चैवंविधाः कार्याः? कृताकृताः। पानकदाडिमाजाजीशुण्ठ्याद्यैरपि संस्कृता यूषा रसाश्च-कृताः। विपरीतास्त्वतः-अकृताः।

आ० र० - खलद्रव्याण्याह-कारवेल्लकेति। निम्बस्य कुसुमम्। पटोलस्य फलं पल्लवश्च। रसा इति वक्ष्यमाणमत्रयोज्यम्। खलत्वं तु धान्यमांसेतरकृतत्वात्॥

रसद्रव्याण्याह-अत्यन्तलघुभिरिति।

यूषादीनामुपकरणद्रव्याण्याह-व्याघ्रीपरूषेति। तानि च व्याघ्र्यादीनि त्रयोदश। प्रयेणैतान्यन्यान्यप्यवस्थावशात् प्रयोज्यानि। ते तु यूषादयः संस्कृताः संयुता वा कार्याः। प्रक्षेप्यापनयनेन संस्कृतत्वम्, अनपनयनेन संयुतत्वम्। प्रक्षेपश्च यथायोगं कथनकाले कथनानन्तरं वा। स्नेहेन विशिष्टाः-कृताः, अविशिष्टाः-अकृताः, कटुपञ्चम्लानामुक्तत्वात्।

अनम्लतक्रसिद्धानि रुच्यानि व्यञ्जनानि च।

अच्छान्यनलसम्पन्नानि

स०-अनम्लेन तक्रेण सिद्धानि। तथा, रुच्यानि-अभ्यवहर्तुमभिलषितानि। तथा, अच्छानि-तनूनि न घनानि। तथा, अनलसम्पन्नानि-वह्निपक्वानि। केचिद्धि तक्रमपक्वमेवाच्छीकृत्य संस्कृत्य च शुण्ठीजीरकादिनाऽभ्यवहरन्ति तन्निषेधायैतदुक्तम्। एवंविधानि व्यञ्जनानि-तेमनानि रसकषायाणी, ओदनेन सहाभ्यवहर्तव्यानि।

आ० र० - व्यञ्जनविधिमाह-अनम्लतक्रसिद्धानीति। व्यञ्जनानि-शाकानि। अच्छानि-अघनानि। अनलसम्पन्नानि-सुपक्वानि।

अनुपानेऽपि योजयेत्॥ ७८॥

तानि क्वथितशीतं च वाति मद्यं च सात्म्यतः।

स०-अनुपानेऽपि-आतुरस्य पश्चात्पानेऽपि, तानि योजयेत्। तथा क्वथितशीतं च वारि मद्यं च, सात्म्यतः-सात्म्यवशात्, अनुपानेऽपि योजयेत्।

आ० र०- अनुपानान्याह-अनुपानेऽपीति। तानि-व्यञ्जनानि पानयोग्यानि कृतानि।

सज्वरं ज्वरमुक्तं वा दिनान्ते भोजयेल्लघु॥७९॥

श्लेष्मक्षयविवृद्धोष्मा बलवाननलस्तदा।

स०-सज्वरं नरं दिनान्ते भोजयेत्,-अथवा ज्वरमुक्तं-अचिरकालज्वरत्यक्तम्। किम्भुतं भोजनं भोजयेत्? लघु,-मात्रया स्वभावात् (च) उभयथा यल्लघु। किमित्येतस्मिन् काले लघु भोजयेत्? इत्याह-श्लेष्मेत्यादि। तदा-तस्मिन्दिनान्ताख्ये काले, श्लेष्मक्षयो यस्तेन विवृद्ध ऊष्मा-स्वभवो, यस्यानलस्य जाठराग्नेरसौ शेलष्मक्षयविवृद्धोष्माऽनलः। अत एव बलवान् तदपक्तुं शक्तः।

आ० र० - पथ्यग्रहणकालमाह-सज्वरं ज्वरमुक्तं वेति। ज्वरमुक्तं तु-आबललाभात्। दिनान्ते-पञ्चदशे मुहूर्ते। लघु-अल्पमात्रम्। तदा-दिनान्ते।

यथोचितेऽथवा काले देशसात्म्यानुरोधतः॥८०॥

स०-अथवा यथोचिते काले सज्वरं ज्वरमुक्तं वाऽऽतुरं भोजयेत्। यस्य यस्य य उचितः-सात्म्यः, आहारकालस्तस्मिन् भोजयेत्। यथोचिते हि काले प्रायः क्षुदुपगमो जायते। कथं भोजयेत्? इत्याह-देशेत्यादि। देशसात्म्यवशात् तं भोजयेत्, नैवमेव।

आ० र० - दिनान्तस्यापवादमाह-यथोचितेऽथवेति। देशो-भूमिर्देहश्च।

ननु, एवं यस्य पूर्वाह्णे काले भोजनमुचितं तदा तस्य भोजने दीयमाने को गुणः स्यात्? इत्याह -

प्रागल्पवह्निर्भुञ्जनो न ह्यजीर्णेन पीड्यते।

स०-यस्मादल्पवह्निः-मन्दाग्निः, पूर्वाह्णे भुञ्जानोऽजीर्णेन न पिड्यते-न बाध्यते।

आ० र० - अपवादापवादमाह-प्रागल्पवह्निरिति। योऽल्पवह्निः प्राक्-दिनान्ते, भुञ्जानो हि-स्फुटं, अजीर्णेन न बाध्यते, तस्माद्दिनान्त एव भुञ्जीत। अमन्दवह्निं प्रति पुर्वोऽपवादः।

अधुना सर्पिःपानकालं निरूपयति-

कषायपानपथ्यान्नैर्दशाह इति लङ्घिते॥८१॥

सर्पिर्घ्रात्कफे मन्दे वातपित्तोत्तरे ज्वरे।

पक्वेषु दोषेष्वमृतं तद्विषोपममन्यथा॥८२॥

दशाहे स्यादतीतेऽपि ज्वरोपद्रववृद्धिकृत्।

लङ्घनादिक्रमं तत्र कुर्यादाकफसङ्क्षयात्॥८३॥

स०-कषायस्य-मुस्तापर्पटकादेः, पानं कषायपानम्, तेन। तथा, पथ्यान्नैः-पेयायूषादिभिः, दशाह इति-अनेन प्रकारेण, लङ्घिते-अतिक्रान्ते। तथेति प्रायेण क्षीणः कफः सम्भाव्यतेऽतो दशाहे लङ्घित इत्युक्तम्। आमज्वरसंज्ञानिवृत्तिस्तु षडहादूर्ध्वं सप्तमेऽह्न्यष्टमे वाऽहनि ज्वरस्य जायते। तथा च मुनिः (च. चि. अ. ३/२७२)-"सप्ताहेन हि पच्यन्ते सप्तधातुगता मलाः। निरामश्चाप्यतः प्रोक्तो ज्वरः प्रायोऽष्टमेऽहनि॥" इति। तस्मात् कषायपानपथ्यान्नैरित्यादितो दशाहे लङ्घिते कफे मन्दे-क्षीणप्राये, सर्पिदद्यात्। किम्भूते ज्वरे? वातपित्तोत्तरे, -वातपित्ताधिके। अस्यामवस्थायां पक्वेषु-निरामेशु वातादिदोषेषु, सर्पिर्दद्यात्। पक्वेषु सर्पिर्दत्तममृतं-महागुणमित्यर्थः। अन्यथा पुनः अपक्वेषु दोषेषु कफोत्तरे, तत्सर्पिर्दत्तं विषोपमं-विषतुल्यं, दशाहेऽतिक्रान्तेऽपि स्यात्। अतोऽस्यामवस्थायां सर्पिर्दत्तं ज्वरस्य

तदुपद्रवाणां च वृद्धिं करोति, तस्मादस्यामवस्थायां सर्पिःपानमयुक्तम्। तत्र-कफोत्तरे ज्वरे सति, लङ्घनादिक्रमं कुर्यात्। कियन्तं कालम्? आकफसङ्क्षयात्, -यावत्कफस्य-ज्वरकारिणोऽधिकस्य, सङ्क्षयः-सम्यक् क्षयः, न धातुक्षयोऽपि यावत्। यतः कफज्वरेऽपि विडङ्गादिसर्पिर्वक्ष्यति (श्लो. १३)।

आ० र०- असर्पिष्कस्य भोजनस्यावधिमाह-कषायपानपथ्यान्नैरिति। पक्वेषु दोषेषु दशाहेऽनतीतेऽप्यमृतोपमं सर्पिः। अपक्वेष्वतीतेऽपि विषोपमम्, ज्वरोपद्रववर्धनात्। तत्र-तथाविधे चिरपाकज्वरे, लङ्घनादिक्रममेव कुर्यात्, न ससर्पिष्कभोजनादिष्टं [बृं]हणक्रमम्। सिद्धयोगे तु पथ्ये विशेष उक्तः (ज्वराधिकारे श्लो. ४२)-"श्रमोपवासानिलजे हितो नित्यं रसौदनः॥ मुद्गययूषौदनश्चापि देयः कफसमुत्थिते। स एव सितया युक्तः शीतः पित्तज्वरे हितः॥ मुद्गामलकयूषस्तु वातपित्तात्मके हितः। मुद्गामलकयूषस्तु गाढविड्के विधीयते॥ शुष्कमूलकयूषस्तु कफवातात्मके हितः। निम्बकूलकयूषस्तु हितः पित्तकफात्मके॥ कूलकः-पटोलम्। लघुना पञ्चमूलेन पिप्पल्या सह धान्यया। महत्या पञ्चमूल्या तु व्याघ्रीदुःस्पर्शगोक्षुरैः॥ सिद्धानि भिषगन्नानि प्रयुञ्जीत यथाक्रमम्। वातपित्ते श्लेष्मपित्ते कफवाते त्रिदोषजे॥(श्लो. १६४)-यवकोलकुलत्थानां मुद्गमूलकशुण्ठयोः। एकैकं मुष्टिमाहृत्य पचेदष्टगुणे जले॥ पञ्चमुष्टिक इत्येष वातपित्तकफापहः। शस्यते गुल्मशूले च श्वासे कासे क्षये ज्वरे॥ मूलकशुण्ठः-शुष्कमूलकम्। पञ्चमूष्टिकयूषेण त्रिकण्टककृतेन वा। आदोषशमनात्पथ्यं त्रिकण्टेनैव साधयेत्॥ महादाहो विधातव्यो यूषश्चणकसम्भवः। मुस्तापर्पटकैरातो निर्यूहेन प्रसाधितः॥ कफपित्तज्वरहरो यूषो धान्यपटोलयोः। (वङ्गसेने ज्वरा. श्लो. ४१६)-यवकोळकुलत्थैस्तु मुद्गमूलकशुण्ठकैः॥ धान्याकविश्वैः संयुक्तैर्यूषो वातकफापहः। सप्तमुष्टिक इत्येष सन्निपातज्वरापहः॥ कफवातामदोषघ्नः कण्ठहृद्वक्त्रशोधनः॥" इति। इति नवज्वरः।

अथ जीर्णज्वरचिकित्सामाह-

देहधात्वबलत्वाच्च ज्वरो जीर्णोऽनुवर्तते।

स०-जीर्णः-पुराणो ज्वरः, अनुवर्तते-अनुबध्नाति। कुतः ? देहधात्वबलत्वात्। देहधातवः-तदारम्भका रसरुधिरादयः, देहग्रहणाद्वातपित्तश्लेष्माणोऽपि धारणाद्धातव उच्यन्ते। देहधातूनामबलत्वं-स्वल्पत्वम्। तस्माच्च जीर्णो ज्वरोऽनुबध्नाति, न स्वभावमात्रादेव, इति चशब्दस्यार्थः।

आ० र०- अथ जीर्नज्वरः। तत्र जीर्णज्वरानुवृत्तौ हेतुमाह-देहधात्वबलत्वाच्चेति। देहस्याबलवत्त्वं-स्रोतसामदृढत्वम्। धातूनामबलत्वं-स्वस्रोतोभिसञ्चरणाशक्तिः।

जीर्णज्वरस्य शान्त्यर्थं देहबलाधानार्थं च सर्पिःपानं हितमिति प्रतिपादयन्नाह-

रूक्षं हि तेजो ज्वरकृत्तेजसा रूक्षितस्य च॥८४॥

वमनस्वेदकालाम्बुकषायलघुभोजनैः।

यः स्यादतिबलो धातुः सहचारी सदागतिः॥८५॥

तस्य संशमनं सर्पिर्दीप्तस्येवाम्बु वेश्मनः।

स०-रूक्षं यत्तेजस्तज्ज्वरकृत्। रूक्षमिति वचनाद्देहोष्मा जाठरोऽनलो गृह्यते, तस्यैव ज्वरकृत्त्वात्। तथोक्तम् (ह.नि.अ.२/३)-"मलास्तत्र स्वैःस्वैर्दुष्टाः" इत्यादि यावत्। "ज्वरं निर्वर्तयन्ति ते।" इत्यादि जाथारानलस्यैव ज्वरकृतत्वम्। तेन ज्वरकृता रूक्षेण तेजसा रूक्षितस्य च पुंसः सर्पिः संशमनम्। चशब्दाच्चान्यस्यापि। अत एवाह-वमनेत्यादि। वमनादिभी रौक्ष्यकृद्भिः कृतैस्तदानीं यः स्यात्-भवेत्, अतिबलः-प्रवृद्धत्वादतिसमर्थो धातुः। को धातुः ? सहचारी,-यः सह चरति तच्छीलो वाताख्यो धातुरग्निना सह चरति। ननु, एवं परस्परसहचरभावत्वेऽग्निरपि वायुना सह चरति, ततोऽग्निस्वभावत्वात् पित्ताख्योऽपि धातुरिह सहचारी प्राप्तः, तन्निवृत्त्यर्थं सदागतिरित्याह। सदागतित्वं वायोरेवान्वर्थत्वेनोपपद्यत इति पित्तस्याग्रहणम्। किं कस्य यथा संशमनम् ? अम्बु वेश्मनो-गृहस्य, दीप्तस्य-ज्वलितस्य, जलं यथा।

आ० र० - सर्पिःप्रयोगे युक्तिमाह-रूक्षमित्यादि। हि-यस्मात्, जीर्णावस्थायां निरामं तेजो ज्वरं करोति। तेन च तेजसा रूक्षितस्य ज्वरिणः, तथा वमनादिभिर्नवज्वरोपक्रमै रूक्षितस्य, सहचारी-सखा, पुनस्तदेव वर्धयति। ततो धातून् नयति। तस्य-तथानुवृत्तस्य जीर्णज्वरस्यानुवृत्तौ प्रधानभूतस्य वायोः, सर्पिः संशमनम्।

वातपित्तजिताम्ग्च्यं संस्कारं चानुरुध्यते॥८६॥

सुतरां तद्धतो दद्याद्यथास्वौषधसाधितम्।

स०-यस्माद्धतं सर्वेषां वातपित्तजिताम्ग्च्यं यथा न तथाऽन्यान्यौषधानि वातपित्तजिन्तीति। अत एव प्रागभ्यधात् (श्लो. ८२)-"सर्पिर्दद्यात्कफे मन्दे वातपित्तोत्तरे ज्वरे।" इत्यादि। यस्माच्च घृतं संस्कारमनुरुध्यते-अनुवर्तते। गुणान्तराधानं-संस्कारः। तं च यस्माद्धतं सुष्ठ्वतिशयवैलक्षण्यादनुरुध्यते-आत्मसात्करोति। तैलादिरपि स्नेहः संस्कारमनुवर्तते। न तु यथा घृतं स्वशैत्यमजहदेव संस्कारमनुवर्तत इति। एतच्च स्नेहविधौ प्रतिपादितमेव। अमुमेव च न्यायमङ्गीकृत्य मुनिरप्यवोचत् (च.नि.अ.१/४०)-"नान्यः स्नेहस्तथा कश्चित् संस्कारमनुवर्तते। यथा सर्पिरतः सर्पिः सर्वस्नेहोत्तमं मतम्॥" इति। हि-यस्मात्, सुतरां संस्कारमनुरुध्यते घृतम्, तस्माद्धतं जीर्णे वातपित्तोत्तरे निर्विकल्पं दद्यात्। कीदृशम्? यथास्वौषधसाधितम्,-यथायथं व्याधिप्रतिपक्षैरौषधैः पक्वम्।

आ० र०- सर्पिर्दानं विधत्ते-वातपित्तजिताम्ग्यमिति। यत एवं अतस्तत्सर्पिर्दद्यात्। सर्पिर्पोऽपि तैलं वातहरमिति चेत्तत्राह-वातपित्तजिताम्ग्यं पित्तसंसृष्टश्श(वा)तायु(?)। जीर्णज्वरे तैलमप्यौषधसाधितं तथेति चेत्तत्राह-संस्कारं चानुरुध्यते सुतराम्। अत एव यथास्वौषधसाधितमित्युक्तम्।

विपरीतं ज्वरोष्माणं जयेत्पित्तं च शैत्यतः॥८७॥

स्नेहाद्वातं घृतं तुल्यं योगसंस्कारतः कफम्।

स०-घृतं विपरीतं ज्वरोष्माणं जयेत्। ज्वरनिर्वर्तक ऊष्माजाठरोऽनलो, रूक्षतीक्ष्णादिगुणः स पक्तिस्थानन्निरस्तो ज्वरनिर्वर्तको घृतस्य स्निग्धशीतत्वादिगुणयोगाद्विपरीतः, एवं विपरीतं ज्वरोष्माणं घृतं जयेत्। पित्तं च शैत्यतः-शैत्याद्धृतं जयेत्, न स्नेहात्, "पित्तं सस्नेह" (ह्.सू.अ.१/११) इति वचनात्। स्नेहात्-स्निग्धत्वात्, घृतं वातं जयेत् न तु शैत्यात्, "शीतोऽनिलः" (ह्.सू.अ.१/११) इति वचनात्। कफं स्निग्धशीतत्वादिना तुल्यं योगसंस्काराभ्यां जयेत्। योगो-युक्तिः कफज्वरहरैर्द्रव्यैः सह योजना, संस्कारो-गुणाधानम्, योगश्च संस्कारश्च योगसंस्कारौ, ताभ्यां घृतं कफं जयेत्। ननु, विपरीतं ज्वरोष्माणं घृतं जयेदिति न घटते, घृतस्याग्निवृद्धिहेतुत्वात्। तथा च वक्ष्यति (ह्.चि.अ.१०/६८)-"स्नेहमेव परं विद्याद्दुर्बलानलदीपनम्। नालं स्नेहसमिद्धिस्य शमायान्नं सुगुर्वपि॥" इति। अत्राचक्ष्महे। घृतं स्नेहनत्वदीपनत्वाभ्यां वातशमनं कुर्वञ्ज्वरोष्माक्षेपत्वं वातस्य विनिर्वाय ज्वरोष्मणोऽपि रौक्ष्यतैक्ष्ण्यादियुतस्य घृतं विपरीतगुणत्वाच्छमं करोति, न वृद्धिम्। ननु, यथा स्नेहाद्वातं शमयति तथा तत एव स्नेहात्किमिति घृतं समानगुणत्वात् पित्तं शमयति ? बृमः। जीर्णज्वरे लङ्घनादिभिरतिरूक्षेण ज्वरोष्मणा पित्तं रूक्षमेव सम्पन्नं स्नेहभागपरिक्षयान्न सस्नेहम्, अतः कथं कृत्वा ज्वरयतु ?। तच्च घृतं पित्तमेव शमयति, न वातं कोपयति, द्रव्यप्रभावत्वात्सस्नेहनत्वाच्च।

आ० र० - सर्पिषो व्याधिविपरीतत्वं हेतुविपरीतत्वं चाह-विपरीतं ज्वरोष्माणमिति। विपरीतं-उष्णम्। ज्वरं वातमपि विपरीतम्। कफस्तु शीतत्वात् स्निग्धत्वाच्च तुल्यः, तमप्युष्णरूक्षयोगसंस्काराज्जयेत्।

पूर्वे कषायाः सघृताः सर्वे योज्या यथामलम्॥८८॥

स०-पूर्वे कषायाः-प्रागुक्तानि पाचनानि, सह घृतेन प्रयुञ्जयात्। कथम् ? यथामलं-दोषानतिक्रमेण।

आ० र० - उक्तैः क्काथैः सर्पिःपानमाह-पूर्वे कषाया इति। यथामलं-यथादोषम्, वातज्वरे वातज्वरघ्ना इत्यादि। ये तु प्रागेव ससर्पिष्का उक्ताः, ते न ज्वरे दानार्थम्, तत्र च न सर्पिः प्रधानं चूर्णाद्या वा, एतत्प्रयोगात्। इह तु प्रधानम्, अत एव समेन क्काथेन पेयम्, भागानुक्तौ समत्वात्।

त्रिफलापिचुमन्दत्वङ्मधुकं बृहतीद्वयम्।

समसूरदलं क्काथः सघृतो ज्वरकासहा॥८९॥

स०-त्रिपलादीनि मसूरदलानि चैष क्काथो घृतेन सहोपयोजितो ज्वरकासहा स्यात्।

आ० र० - कासोपद्रवके ज्वरे सर्पिःप्रयोगमाह-त्रिफलेति। मसूरदलान्तानि क्काथ्यानि।

पिप्पलीन्द्रयवधावनितिक्ता-
सारिवामलकतामलकीभिः।
बिल्वमुस्तहिमपालनिसेव्यै-
र्द्राक्षयाऽतिविषया स्थिरया च॥९०॥
घृतमाशु निहन्ति साधितं
ज्वरमग्निं विषमं हलीमकम्।
अरुचिं भृशतापमंसयो-
र्वमथुं पार्श्वशिरोरुजं क्षयम्॥९१॥

स०-पिप्पलीत्यादिभिर्द्रव्यैः कल्कीकृतैर्घृतचतुर्थांशैस्तोयेन चतुर्गुणेन घृतापेक्षया साधितं घृतमाशु ज्वरं हन्ति, विषमा ग्न्यादींश्च।

आ० र०- पिप्पल्यादिसिद्धं घृतमाह-पिप्पलीति। धावनी-कण्टकारी। तामलकी-भूम्यामलकी। हिमं-चन्दनम्। पालनी-त्रायमाणा। सेव्यं-उशीरं। अत्र घृते द्र वमुदकम्, पिप्पल्यादीनां कल्कः।

तैल्वकं पवनजन्मनि ज्वरे
योजयेत्त्रिवृतया वियोजितम्।
तिक्तकं वृषघृतं च पैत्तिके
यच्च पालनिकया श्रृतं हविः॥९२॥

स०-तैल्वकं घृतं-वातव्याधिचिकित्सितोक्तं (अ.२१/३२), त्रिवृतया रहित [वातिके ज्वरे] पिबेत्। पैत्तिके ज्वरे तिक्तकं कुष्ठचिकित्सितोक्तं (अ.१९/२) , तथा वृषघृतं-रक्तपित्तचिकित्सितोक्तं (अ.२/४०), अत्रैव वा वक्ष्यमाणं (श्लो.९४), योजयेत्। पालनिकया-त्रायन्त्या, यद्धृतं पक्वं तच्च पित्तज्वरे योजयेत्।

आ० र०- तैलवकादिघृतान्यतिदिशति-तैल्वकमिति। तैल्वकं-वातव्याधिचिकित्सितोक्तं "पलाष्टकं तिल्वकतो वरायाः" (अ. २१/३२) इत्यादि। तत्र च त्रिवृदुक्ता, सा प्रत्याख्याता। तिक्तकादीनि त्रीणि पित्तज्वरे। तच्च तिक्तकं-कुष्ठचिकित्सितोक्तं "पटोलनिम्बकटुका" (अ. १९/२) इत्यादि। वृषघृतं-रक्तपित्तचिकित्सितोक्तं "समूलमुस्तकं क्षुण्णं" (अ. २/४०) इत्यादि। पालनिकाघृतं-विद्रधिचिकित्सितोक्तं "कुडवं त्रायमाणायाः" (अ. १३/१३) इत्यादि।

विडङ्गसौवर्चलचव्यपाठा-
व्योशाग्निसिन्धूद्भवयावशूकैः।
पलांशकैः क्षीरसमं घृतस्य
प्रस्थं पचेज्जीर्णकफज्वरघ्नम्॥९३॥

स०-विडङ्गादिभिः पलप्रमाणौर्घृतप्रस्थं क्षीरतुल्यं चतुर्गुणजलं पचेत्। तच्चोपयुक्तं जीर्णो यः कफज्वरस्तं हन्ति।

आ० र०- कफज्वरघ्नं घृतमाह-विडङ्गसौवर्चलेति। विडङ्गादीनां दशानां कल्कीकृतानां प्रत्येकं पलम्। घृतस्य प्रस्थं-द्वात्रिंशत्पलानि।

गुडूच्या रसकल्काभ्यां त्रिफलाया वृषस्य च।

मृद्वीकाया बलायाश्च स्नेहाः सिद्धा ज्वरच्छिदः॥९४॥

स०-गुडूच्यादीनां पञ्चानां पृथक्पृथग्रसकल्काभ्यां सिद्धाः पञ्च स्नेहाः ज्वरच्छिदो-जीर्णज्वरघ्नाः स्युरित्यर्थः।

आ० र०- गुडूचीघृतादिपञ्चकमाह-गुडूच्या रसकल्काभ्यामिति। सङ्ग्रहे तु (चि.अ. २)-"वासागुडूचीत्रिफलात्रायमाणायवासकात्। क्काथे क्षीरे च विपचेज्ज्वरघ्नं कल्कितैर्घृतम्॥ पिप्पलीमुस्तमृद्वीकाचन्दनोत्पलनागरैः। बलादुरालभामुस्तात्रायन्तीनिम्बपर्पटम्॥ पञ्चमूलं कनीयश्च क्काथयित्वा घृतं पचेत्। सक्षीरं कल्कितैर्द्राक्षामेदामलकषौष्करैः॥ शठीतामलकीयुक्तैस्तच्च ज्वरहरं परम्। क्षयकासशिरःपार्श्वहृच्छूलांसाभितापनुत्॥ कुलत्थकोलत्रिफलादशमूलयवान् पचेत्। द्विपलान् सलिलद्रोणे पूते पिष्ट्वाऽक्षिकान् क्षिपेत्॥ पञ्चकोलकसप्ताह्वयस्थानिम्बतुम्बरून्। शथीपुष्करमूलार्कमूलप्रतिविषावचाः॥ किराततिक्तकं मुस्तं कर्कटाख्यां दुरालभाम्। नक्तमालमुभे पाठे कटुकाशिग्रुतेजिनीः॥ सोमवल्कद्विरजनीकण्टकीकण्टकारिकाः। पटोलीहिङ्गुगोजिह्वाकेम्बुकं मदनाञ्जटाम्॥ लवणानि पलांशानि क्षारानर्द्धपलोन्मितान्। प्रस्थं चाज्यस्य तत्सिद्धं दीपनं कफवातजित्॥ हृत्प्लीहग्रहणीगुल्मश्वासकासार्शसं हितम्। दीर्घज्वराभिभूतानां ज्वरिणाममृतोपमम्॥ वयस्था-गुडूची। तेजनी-मूर्वा। सोमवल्कः-कह्लः। कण्टकीविकङ्कतः। मदनो-राठः। क्षारान्-यवक्षारसवर्जिकाक्षारटङ्कणक्षारान्। मञ्जिष्ठातिविषापथ्यावचानागररोहिणीः। देवदारु हरिद्रां च द्रोणेऽपां पालिकान् पचेत्॥क्काथेऽस्मिन् साधयेत्पिष्टैर्घृतप्रस्थं पिचून्मितैः। शृङ्गवेरकणाहिङ्गुद्विक्षारपटुपञ्चकैः॥ तत्कफावृतसर्वोत्थज्वरिणाममृतोपमम्। वर्ध्महिध्मारुचिश्वासकासपाण्डुविकारिणाम्॥ गलग्रहप्रमेहार्शःप्लीहापस्मारशोषिणाम्। उदावर्तपरीतानां मन्दाग्निक्रिमिकोष्ठिनाम्॥" इति। सिद्धयोगे तु (ज्वराधिकारे श्लो. २५३) -"दशमूलीरसे सर्पिः सक्षीरे पञ्चकोलकैः। सक्षारैर्हन्ति तत्सिद्धं ज्वरकासाग्निमन्दताम्। वातपित्तकफव्याधीन् प्लीहानं चपि पाण्डुताम्॥ अस्य षड्लेन दत्वा(?)सर्पिः प्रस्थम्, षड्लः कल्कः, क्षीरं समम्, अर्थाद्दशमूलीरसस्त्रिगुणः। पञ्चकोलैः ससिन्धूत्थैः पालिकैः पयसा समम्। सर्पिःप्रस्थं शृतं प्लीहविषमज्वरगुल्मनुत्॥" इति। वङ्गसेने तु (ज्वराधिकारे श्लो.७३१)

-"कल्याणकं षट्पलं वा घृतं जीर्णज्वरे पिबेत्॥ कुक्कुटं तरुणं सद्यः शकृत्पादास्यवर्जितम्। तस्य मांसस्य कुर्वीत शृतं पलशतं भिषक्॥ बृहती कण्टकारी च श्रृङ्गी कर्कटकस्य च। बदराणि कुलित्थाश्च भार्गी ह्यामलकं तथा॥ शकटी पुष्करं मूलं पञ्चमूलं महत्तथा। एतत्तुलां च सङ्गृह्य तद्विद्रोणेऽम्भसः पचेत्॥ पादशेषं परिस्राव्य कषायं ग्राहयेद्भिषक्। षड्गुणं क्षीरमाहृत्य विपचेत्तु घृताढकम्॥ तत्र कल्कीकृतं दद्यादाश्वत्थं पञ्चमूलकम्। तत्साधुसिद्धं विज्ञाय शुभे भाण्डे निधापयेत्॥ तस्य काले पिबेन्मात्रां बलं दोषमवेक्ष्य च। जीर्णे तस्मिंस्तु भुञ्जीत रक्तशाल्योदनं मृदु॥ जीर्णज्वरोपसृष्टानां शुष्यतां श्वासकासिनाम्। प्रयोज्यं कौक्कुटं सर्पैर्यक्ष्मणां विषमज्वरे। लेखनं बृंहणीयं च बलवर्णाग्निवर्धनम्॥ पञ्चमूलकं-पञ्चाङ्गम्। वासारिष्टामृताभार्गीपञ्चमूलफलत्रिकैः। सयासमधुकद्राक्षाकाश्मर्यैरक्षसम्मितैः॥ घृतप्रस्थं विपक्तव्यमेभिर्मात्रामतः पिबेत्। वृद्धवासाघृतं प्रोक्तमेतत्सर्वज्वरापहम्॥ मागधीचूर्णकुडवं तस्मादष्टगुणं हविः। जले चतुर्गुणे सिद्धं ज्वरघ्नं प्लीहनाशनम्॥" इति।

जीर्णे घृते च भुञ्जीत मृदुमांसरसौदनम्।

बलं ह्यलं दोषहरं परं तच्च बलप्रदम्॥९५॥

स०-घृते च परिणते सति मृदु-अतीक्ष्णं मांसरसाशनं भुञ्जीत। हि-यस्मात्, अलं बलं जातं दोषहरं भवति। तच्चरसाशनं अतिशयेन बलकरं स्यात्।

आ० र० - घृतानन्तरं पथ्यमाह-जीर्णे घृते चेति। हियस्मात्, बलमत्यर्थं दोषहरम्। तच्च-मांसं, अत्यर्थं बलप्रदम्।

कफपित्तहरा मुद्गकारवेल्लादिजा रसाः।

प्रायेण तस्मान्न हिता जीर्णे वातोत्तरे ज्वरे॥९६॥

शूलोदावर्तविष्टम्भजनना ज्वरवर्धनाः।

स०-अत एव तस्मात्कारणात् मुद्गकारवेल्लादिजा रसाः कफपित्तहरा जीर्णज्वरे वातोत्तरे प्रायेण न हिताः। ते ह्युपयुक्ताः शूलादिकृतो ज्वरवर्धनाश्च स्युः।

आ० र० - यूषखलयोर्निषेधमाह-कफपित्तहरा इति। मुद्गादिरसाः-यूषः। कारवेल्लादिरसाश्च-खलः। इति जीर्णज्वरघृतानि।

न शाम्यत्येवमपि चेज्ज्वरः कुर्वीत शोधनम्॥९७॥

शोधनार्हस्य, वमनं प्रागुक्तं तस्य योजयेत्।

आमाशयगते दोषे बलिनः पालयन्बलम्॥९८॥

स०-एवमपि कृते सति यदि ज्वरो न शाम्यति तदा शोधनाहस्य नरस्य प्रागुक्तं-"पिप्पलीभिर्युतान् गालान्" (श्लो.६) इत्यादिकं, वमनं योजयेत्। कदा? दोषे आमाशयगते सति, बलवतः पुंसो वमनं योजयेत्, बलं पालयन्-रक्षयन्।

आ० र० - जीर्णज्वरशोधनानि। तत्र शोधनकालमाह-न शाम्यतीति।

वमनमाह-वमनं प्रागुक्तमिति। प्रागुक्तं-"पिप्पलीभिर्युतान् गालान्" इत्यादि। सङ्ग्रहे तु (चि.अ. २) "सन्तर्पणोत्थे वमनं पिप्पलीलवणाम्बुना। शर्करामाक्षिकाम्भोभिर्दाहतृष्णोल्बणे ज्वरे॥" इति।

पक्के तु शिथिले दोषे ज्वरे वा विषमद्यजे।

मोदकं त्रिफलाश्यामात्रिवृत्पिप्पलिकेसरैः॥९९॥

ससितामधुभिर्दद्याद्योषाद्यं वा विरेचनम्।

(लिह्याद्वा त्रैवृतं संयुक्तं मधुसर्पिषा।)

द्राक्षाधात्रीरसं तद्वत्सद्राक्षां वा हरीतकीम्॥१००॥

आरग्वधं वा पयसा मृद्वीकानां रसेन वा।

त्रिफलां त्रायमाणां वा पयसा ज्वरितःपिबेत्॥१०१॥

स०-पक्के पुनर्दोषे तथा शिथिले-अविष्टब्धे, अथवा विषजेमद्योत्थे वा ज्वरे, मोदकं त्रिफलादिभिर्विरेचनं दद्यात्। व्योषाद्यं वा-"व्योषत्रिजातकाम्भोदकृमिघ्नामलकैस्त्रिवृत्। सर्वैः समा समसिता क्षौद्रेण गुटिकाः कृताः॥" (हृ.क.अ. २/२१) इति वा, दद्यात्। अथवा पयसा-क्षीरेण, मृद्वीकानां रसेन वा, आरग्वधं विरेचनं दद्यात्। त्रिफलां त्रायन्ती वा पयसा ज्वरी पिबेत्।

आ० र० - विरेचनमाह-पक्के त्विति। श्यामा-श्याममूला त्रिवृत्। त्रिवृत्-अरुणमूला। केसरं-नागकेसरम्। सितया मोदकं कृत्वा मधुना लिह्यात्।

व्योषाद्यं विरेचनमतिदिशति-व्योषाद्यं वेति। तच्च विरेचनकल्पोक्तं "व्योषत्रिजातकाम्भोद" इत्यादि।

विरेचनषट्कमाह-द्राक्षाधात्रीरसं तद्वचिति। तत्र त्रीणि धात्रीहरीतक्यारग्वधैर्द्राक्षायुक्तैः। त्रीण्यारग्वधत्रिफलात्रायमाणाभिः पयोयुक्ताभिः। सङ्ग्रहे तु (चि.अ. २)-"रसमामलकानां वा घृतभृष्टं ज्वरापहम्। लिह्याद्वा त्रिवृतश्चूर्णं कृष्णात्रिफलयोस्तथा॥ सर्पैर्मधुभ्यां त्रिफलां पिबेद्वाक्षारसेन वा। सघृतं त्रिफलाक्काथं सर्पिषा वा विना घृतम्॥ पयोनुपानमुष्णं वा मृद्वीकास्वरसं पिबेत्।" इति। वङ्गसेने तु (ज्वराधिकारे श्लो. ७२७) -"मधुकारग्वधद्राक्षातिक्तायासफलत्रिकैः। सपटोलैर्जलं भेदि ज्वरं हन्ति त्रिदोषजम्॥ अरोचके गात्रसादे वैवर्ण्येऽङ्गमलादिषु। शान्तज्वरोऽपि शोध्यः स्यादनुबन्धभयान्नरः॥" इति।

विरिक्तानां च संसर्गी मण्डपूर्वा यथाक्रमम्।

स०-विरिक्तानां ज्वरिणां चशब्दाद्वमितानां च यथाक्रमंक्रमानतिक्रमेण, संसर्गी कर्तव्येत्यध्याहार्यम्। मण्डः पूर्वः-प्रथमो, यस्यां सैवम्। मण्डं प्रथमं दत्त्वाऽनन्तरं पेयाविलेप्यादयो यथाक्रमं देयाः। कृतवमनविरेचनान्तरं यः पेयाद्यवचारणाक्रमः स संसर्गीत्युच्यते।

आ० र० - विरेचनानन्तरं पथ्यमाह-विरिक्तानां चेति। संसर्गी-पेयादिक्रमः, "पेयां विलेपीं (ह्.सू.अ. १८१२९) इत्यादिकः।

च्यवमानं ज्वरोत्क्लिष्टमुपेक्षेत मलं सदा॥ १०२॥

पक्वोऽपि हि विकुर्वीत दोषः कोष्ठे कृतास्पदः।

स०-ज्वरेणोत्क्लिष्टं-उत्क्लेशितं ज्वरोत्क्लिष्टं, मलं-पुरीषाख्यं, च्यवमानं-पतन्तं, सदा उपेक्षेत-न तद्विधारेणे प्रयत्नं कुर्यात्। ननु, औषधानि (धेन) किमित्यसौ न विघ्नीयते ? इत्याह-पक्वोऽपित्यादि। दोषः-पुरीषाख्यो, यतः पक्वः। अपिशब्दात्किमुतापक्वः ? कोष्ठे-आमपक्वाशयाश्रयाख्ये, कृतं-गृहीतं, आस्पदं-अवस्थैतः, येन स एवंभूतो विकुर्वीत-विकारं कुर्यात्।

आ० र० - स्वयंप्रवृत्तेः स्तम्भनं निषेधयति-च्यवमानमिति।

अतिप्रवर्तमानं वा पाचयन् सङ्ग्रहं नयेत्॥ १०३॥

आमसङ्ग्रहणे दोषा दोषोपक्रम ईरिताः।

स०- अतिप्रवर्तमानं वा तं मलं अपक्वं पाचयन् सङ्ग्रहं नयेत्- न त्वाम एव सङ्गृहीतव्य इत्याह-आमसङ्ग्रहण इत्यादि। आमशब्दः पुरीषाख्यस्य दोषस्य पच्यमानावस्थोपलक्षणार्थः। आमस्य-अपक्वस्य दोषस्य, सङ्ग्रहणमामसङ्ग्रहणं तस्मिन्नाम सङ्ग्रहणे ये दोषा भवन्ति ते दोषोक्रमे-दोषोपक्रमणीयेऽध्याये, ईरिताः-उक्ताः। तथा च तत्रोक्तम् (ह्.सू.अ.१३१३१)-"उत्क्लिष्टनघ ऊर्ध्वं वा न चामान् वहतः स्वयम्। धारयेदौषधैर्दोषान् विधृतास्ते हि रोगदाः॥" इति। तस्मादामसङ्ग्रहणार्थमौषधं न देयम्।

आ० र० - [अति] प्रवृत्तौ पाचनपूर्वकं स्तम्भनं कार्यमित्याह-अतिप्रवर्तमानं वेति।

तथा, आमज्वरेऽप्यामनिर्हरणार्थमौषधं न देयम्, इतिप्रतिपादयन्नाह-

पाययेद्दोषहरणं मोहादामज्वरे तु यः॥ १०४॥

प्रसुप्तं कृष्णसर्पं स कराग्रेण परामृशेत्।

स०- तुर्व्यतिरेके भिन्नक्रमः। यस्तु मोहात्-अज्ञानात्, भिषक्पापो दोषहरणमामज्वरे पाययेत् स स्वयमनर्थकारी सुप्तं कृष्णसर्पं करस्याग्रेण परामृशेत्-स्पृशेत्। अतिप्रत्यवायं पश्यतैवमुक्तं तन्त्रेकृता। तत्र च वाक्ये रूपकाख्योऽलङ्कारः। तस्य ह्येतल्लक्षणम्-"तदपरमौपम्ये सति यस्मिन् स्याद्वाक्ययोर्योगः।" अस्योदाहरणम्-"यः सेवते कुनृपतिं कुरुते बधिरस्य कर्णजापं सः इति।

आ० र० - आमज्वरे शोधनं निषेधयति-पाययेद्दोषहरणमिति।

ज्वरक्षीणस्य न हितं वमनं न विरेचनम्॥ १०५॥

स०-ज्वरेण क्षीणस्य पुंसो न वमनं हितं न च विरेचनं हितम्।

आ० र० - ज्वरक्षीणस्य शोधनं निषेधयति-ज्वरक्षीणस्येति।

तर्हि कथं दोषनिर्हरणं तस्य ? इत्याह-

कामं तु पयसा तस्य निरुहैर्वा हरेन्मलान्।

स०-तस्य कामं-यथेष्टं कृत्वा, पयसा निरूहैर्वा मलान् हरेत्।

आ० र० - ज्वरक्षीणस्य पयःपानं बस्तिकर्म च शोधनार्थं विधत्ते-कामं त्विति।

क्षीरोचितस्य प्रक्षीणश्लेष्मणो दाहतृड्वतः॥ १०६॥

क्षीरं पित्तानिलार्तस्य पथ्यमप्यतिसारिणः।

स०-क्षीरमुचितं-सात्म्यं, यस्य तस्य क्षीरोचितस्य, तथा प्रकर्षेण क्षीणः श्लेष्मा यस्य तस्य प्रक्षीणश्लेष्मणः, तथा दाहश्च तृट् च ते विद्येते यस्य तस्य दाहत्वतः, अत एव पित्तानिलाभ्यामार्तस्य-पीडितस्य, क्षीरं पथ्यम्। अतिसारिणोऽपिपथ्यम्, किं पुनः प्रक्षीणः श्लेष्मा यस्य तस्य क्षीरोचितस्य पूर्वोक्तविशेषणविशिष्टस्य क्षीरं न पथ्यम्? इत्यपि शब्दार्थः।

आ० र० - पयःपानेऽधिकारिणमाह-क्षीरोचितस्येति। अतिसारिणोऽपि-किं पुनः शोध्यस्य।

तद्वपुर्लङ्घनोत्तप्तं प्लुष्टं वनमिवाग्निना॥ १०७॥

दिव्याम्बु जीवयेत्तस्य ज्वरं चाशु नियच्छति।

स०-तच्च-क्षीरं, लङ्घनोत्तप्तं वपुर्जीवयेत्-कायस्य सप्राणतामुत्पादयेत्। किं किमिव? अग्निना-दावेन, प्लुष्टं वनं यथा दिव्याम्बु जीवयेत्-प्रतोहयेत्, तथा वपुः क्षीरमिति। लङ्घनशब्देनात्र सामान्यं लङ्घनवाच्यं वस्तु भण्यते। "शरीरलाघवकरं यद्द्रव्यं कर्म वा पुनः। तल्लङ्घनमिति ज्ञेयम्" इत्येवंलक्षणम्, न तु विशिष्टमुपवासलक्षणम्, योग्यतावशात्। तस्यज्वरिणः पुंसः, तत्-क्षीरं, आशु ज्वरं च नियच्छति। न केवलं वपुर्जीवयेदिति चार्थः।

आ० र० - क्षीरगुणानाह-तद्वपुरिति। दिव्याम्बु-वृष्ट्यम्बु, यथा दग्धं वनं जीवयेत् तथा क्षीरं वपुर्जीवयेत्।

संस्कृतं शीतमुष्णं वा तस्माद्वारोष्णमेव वा॥ १०८॥

विभज्य काले युञ्जीत ज्वरिणं हन्त्यतोऽन्यथा।

स०-यत एवं महागुणं क्षीरं तस्माद्धेतोः संस्कृतं-द्रव्यान्तरेण, तथा शीतमुष्णं वेति कृत्वा, अथवा धारोष्णमेव काले विभज्य, युञ्जीत-यथाविषयं काले प्रयोजयेत्। अतः-यथानिरूपितात् क्षीरोपयोगविषयात्, अन्यथा-अन्येन प्रकारेण, प्रयुक्तं क्षीरं ज्वरिणं हन्ति।

आ० र० - क्षीरविशेषे नियममाह-संस्कृतमिति। संस्कृतं-औषधसिद्धम्। तच्च शीतमुष्णं वा दोषवशात्। धारोष्णं तूष्णमेव। तद्वत्-संस्कृतसमफलम्।

पयः सशुण्ठीखर्जूरमृद्वीकाशर्कराघृतम्॥१०९॥

श्रृतशीतं मधुयुतं तृड्ढाहज्वरनाशनम्।

स०-क्षीरं शुण्ठ्यादियुतं श्रृतमनन्तरं शीतं मधुयुतं तृड्ढा हजिदित्यर्थः।

आ० र० - संस्कृतं क्षीरमाह-पय इति। तस्य शुण्ठ्यादिभिस्त्रिभिः पाकः, शर्कराघृतयोः पक्वोष्णे प्रक्षेपः, मधुनः पक्वशीते।

तद्वद् द्राक्षाबलायष्टीसारिवाकणचन्दनैः॥११०॥

चतुर्गुणेनाम्भसा वा पिप्पल्या वा श्रृतं पिबेत्।

स०-तेनैव पूर्वोक्तेन पयसा तुल्यं-तद्वत्। यथा पूर्वोक्तं श्रृतशीतं तृड्ढाहज्वरहृत् तथा द्राक्षादिभिः श्रृतमनन्तरं शीतं मधुयुतं तृडादिजिदित्यर्थः। अथवा क्षीरं चतुर्गुणेन जलेन श्रृतं पिबेत्। अथवा पिप्पल्या श्रृतं पिबेत्।

आ० र० - क्षीरान्तरमाह-तद्वदिति। तद्वत्-शर्करादियुतम्।

क्षीरद्वयमाह-चतुर्गुणेनाम्भसेति।

कासाच्छ्वासाच्छिरःशूलात्पार्श्वशूलाच्चिरज्वरात्॥
मुच्यते ज्वरितः पीत्वा पञ्चमूलीश्रृतं पयः।

स०-पञ्चमूलेन श्रृतं क्षीरं पीत्वा कासादिभ्यो मुच्यते। मुच्यत इति कर्मकर्तरि तङ्। चिरज्वरो-दीर्घकालानुबन्धी ज्वरः।

आ० र०- क्षीरान्तरमाह-कासाच्छ्वासादिति।

श्रृतमेरण्डमूलेन बालबिल्वेन वा ज्वरात्॥ ११२॥
धारोष्णं वा पयः पीत्वा विबद्धानिलवर्चसः।
सरक्तपिच्छातिसृतेः सतृड्शूलप्रवाहिकात्॥ ११३॥

स०-एरण्डमूलेनाथवा बालबिल्वेन श्रृतमथवा धारोष्णं क्षीरं पीत्वा पुरुषो ज्वराद्विमुच्यते। किम्भूताज्ज्वरात्? विबद्धा निलवर्चसः। विबद्धे-विशेषेण बद्धे, असम्यक्प्रवर्तनाद्निलवर्चसी यस्मिन् ज्वरे स विबद्धानिलवर्चाः, तस्माज्ज्वराद्विमुच्यते। तथा, रक्तं च पिच्छा च रक्तपिच्छे, ताभ्यामुपलक्षिता अति सृतिः-अतीसारः, सह तया वर्तते यो ज्वरः, तस्मात्तथाविधाज्ज्वरात् तथा सह तृषा सह शूलेन तथा प्रवाहिकया-निश्चारिकापरसंज्ञया, वर्तते यस्तमात् तथाविधाज्जवरात् प्रमुच्यते।

आ० र०- क्षीरत्रयमाह-श्रृतमेरण्डमूलेनेति। अतिसृतिः-अतिसारः, सरक्तपिच्छयोः पिच्छा अतस्तूदकवत्(?)।

सिद्धं शुण्ठीबलाव्याघ्रीगोकण्टकगुडैः पयः।
शोफमूत्रशकृद्वातविबन्धज्वरकासजित्॥ ११४॥

स०-शुण्ठ्यादिभिः साधितं पयः शोफादिजित्।

आ० र०- क्षीरान्तरमाह-सिद्धमिति। गुडेन पक्वोष्णप्रक्षिप्तेन सिद्धत्वम्

वृश्चीवबिल्ववर्षाभूसाधितं ज्वरशोफनुत्।

स०-वृश्चीवादिभिः साधितं पयो ज्वरशोफनुदिति। वृश्चीवः-सूक्ष्मपुननर्वः। स्थूलपुनर्नवस्तु-वर्षाभूः। पुनर्नवद्वयं बिल्वं चात्र योज्यम्।

आ० र०- क्षीरान्तरमाह-वृश्चीवेति। वृश्चीववर्षाभ्वौपुनर्नवे।

शिंशिपासारसिद्धं च क्षीरमाशु ज्वरापहम्॥ ११५॥

स०-शिंशिपासारेण सिद्धं-श्रृतं क्षीरमुपयुक्तं, आशु-न तु चिरेण, ज्वरहृत्। क्षीरस्य श्रवणे विधिरतीसारचिकित्सितोक्तः (हृ. चि. अ. ९१३९)-"पयस्युत्काथ्य मुस्तानां विंशति" इत्यनुसारेणानुकल्प्यः। तत्रान्तरे त्वेवमुक्तम्-"द्रव्यादष्टगुणं क्षीरं क्षीरात्तोयं चतुर्गुणम्। क्षीरावशेषः कर्तव्यः क्षीरक्काथे त्वयं विधिः॥" इति। ननु, किं वातपित्तोत्तरे ज्वरे ज्वरे घृतं प्रधानमा श्रीयतां पूर्ववचनप्रामाण्यात्? अथवा क्षीरं प्रधानमेतद्वचनप्रामाण्यात्? इत्यत्र संशयः। अत्रोच्यते। उभयमपीदं घृतं क्षीरं च वातपित्तोत्तरे ज्वरे प्रधानम्, अवस्थावशात् सात्म्यवशाच्च क्वचित्किञ्चिदुपयुज्यते।

आ० र०- क्षीरान्तरमाह-शिंशपासारसिद्धं चेति।

निरुहस्तु बलं वह्निं विज्वरत्वं मुदं रुचिम्।
दोषे युक्तः करोत्याशु पक्के पक्काशायं गते॥ ११६॥

पित्तं वा कफपित्तं वा पक्वाशयगतं हरेत्।

स्रसनं त्रीनपि मलान् बस्तिः पक्वाशयाश्रयान्॥ ११७॥

स०-निरुहो युक्तो दोषे पक्वे तथा पक्वाशयं गते सति बलादीन् द्रागेव करोति। पित्तं केवलं कफपित्तं वा पक्वाशयाश्रितं स्रंसनं-विरेचनं, हरेत्। बस्तिः प्रयोजितस्त्रीनपि मलान्वाताद्यान् हरेत्। कीदृशान्? पक्वाशयमाश्रितान्।

आ० र०- निरूहगुणानाह-निरूहस्त्विति। पक्वाशयाश्रयान्-पक्वाशयमाश्रित्य, मलांस्तु-सर्वगतान्, हरेत्। अयं तु पक्वाशयगतानित्यपकर्ष एव, पक्वाशयादुर्ध्वं हि पित्ताशयः।

प्रक्षीणकफपित्तस्य त्रिकपृष्थकटिग्रहे।

दीप्ताग्नेर्बद्धशकृतः प्रयुञ्जीतानुवासनम्॥ ११८॥

स०-प्रक्षीणे कफपित्ते यस्य पुंसस्तथा दीप्ताग्नेर्बद्धवर्चस्स्त्रक्पृष्ठकटिग्रहे सत्यनुवासनं प्रयुञ्जीत।

आ० र०- निरूहाङ्गेऽनुवासनेऽधिकारिणमाह-प्रक्षीणकफपित्तस्येति।

पटोलनिम्बच्छदनकटुकाचतुरङ्गुलैः।

स्थिराबलागोक्षुरकमदनोशीरवालकैः॥ ११९॥

पयस्यर्धोदके क्वाथं क्षीरशेषं विमिश्रितम्।

कल्कितैर्मुस्तमदनकृष्णामधुकवत्सकैः॥ १२०॥

बस्ति मधुघृताभ्यां च पीड्येज्ज्वरनाशनम्।

स०-पटोलादिभिः क्वाथं क्षीरेऽर्धोदके क्षीरशेषं तथामिश्रितं कल्कीकृतैर्द्रव्यैर्-मुस्तादिभिर्मधुघृताभ्यां च योजितं बस्तिं ज्वर नाशनं दद्यात्।

आ० र०- निरूहमाह-पटोलनिम्बेति। पटोलनिम्बयोश्छदनं-पत्रम्। पयसो द्वौ भागौ पटोलादिक्वथितस्योदकस्यैको भाग इत्यर्धोदकत्वम्। न स्याप्यु(दु) क्तरसामित्यादि-वचनात्(?)समत्वे प्राप्तेऽर्धत्वविधिः।

चतस्रः पर्णिनीर्यष्टीफलोशीरनृपद्रुमान्॥ १२१॥

क्वाथयेत्कल्कयेद्यश्टीशताह्वाफलिनीफलम्।

मुस्तं च बस्तिः सगुडक्षौद्रसर्पिर्ज्वरापहः॥ १२२॥

स०-मुद्गपर्णी माषपर्णी शालिपर्णी पृश्निपर्णीत्यादि(चेति)-चस्रः पर्णीनीः यष्टीफलादींश्च क्वाथयेत्। फलं-मदनफलम्। तथा, यष्ट्यादीन् कल्कयेत्, इत्येष सगुडादिर्बस्तिर्ज्वरहृत्।

आ० र०- निरूहान्तरमाह-चतस्रः पर्णिनीरिति। चतस्रः पर्णीनीः-मुद्गमाषशालपृश्निपूर्वाः। फलं-मदनफलम्। नृपद्रुमः-आरग्वधः। फलिनी-प्रियङ्गुः। फलं-मदनफलम्। सङ्ग्रहे तु (चि.अ. २)-"त्रायमाणामृतायष्टीमदनांशुमतीद्वयैः। सबलाचन्दनवृषैर्जाङ्गलैश्च मृगद्विजैः॥ क्वाथे कृते क्षिपेत्पिष्ट्वा फलयष्टिकणाघनम्। स सद्योज्वरहा बस्तिः साज्यक्षौद्रोऽल्पसैन्धवः॥ आम्रादीनां त्वचं शङ्खं चन्दनं मधुकित्पलम्। स्वर्णगैरिकमञ्जिष्ठामृणालाञ्जनपद्मकम्॥ क्षीरेण कल्कितं बस्तिं शीतं समधुशर्करम्। दाहज्वरहरं दद्यात् सिद्धं तैश्चानुवासनम्॥" इति।

जीवन्तीं मदनं मेदां पिप्पलीं मधुकं वचाम्।

ऋद्धिं रास्नां बलां बिल्वं शतपुष्पां शतावरीम्॥ १२३॥

पिष्ट्वा क्षीरं जलं सर्पिस्तैलं चैकत्र साधितम्।

ज्वरेऽनुवासनं दद्याथास्नेहं यथामलम्॥ १२४॥

स०-जीवन्त्यादीनि द्रव्याणि स्नेहस्य चतुर्भागमात्राणि जलेन पिष्ट्वा क्षीरं स्नेहसमं तैलात्सर्पिषश्च चतुर्गुणं जलं च तैलसर्पिर्द्रव्याच्चतुर्गुणमित्येकत्र साधितं पक्वमेतत् ज्वरेऽनुवासनं दद्यात्। यथास्नेहं यथामलं-यो यस्मिन् ज्वरे दोषे-वातादौ, यः स्नेहो योग्यस्तत्र तं, दद्यात्।

आ० र०- अनुवासनमाह-जीवन्तीमिति। क्षीरस्य चत्वारो भागाःजलस्य चत्वारः, सर्पिष एकः, तैलस्यैकः, कल्कस्य सार्धः, इत्येकत्र-मिलितं, साधयेत्। स्नेहः-शरीरस्निग्धत्वम्, तदनुसारेण मलानुसारेण च कल्पना। सङ्ग्रहे तु (चि.अ. २)-"चन्दनागरुकाश्मर्यपटोलमदनोत्पलैः। पटोलारिष्टमदनगुडूचीमधुकैरपि॥" इति।

ये च सिद्धिषु वक्ष्यन्ते बस्तयो ज्वरनाशनाः।

स०-ये च बस्तयः सिद्धिषु-बस्तिकल्पाध्याये, वक्ष्यन्ते ज्वरनाशनास्ते च, 'देयाः' इति शेषः।

आ० र०- बस्त्यन्तरमतिदिशति-ये च सिद्धिष्विति। सिद्धिषु-कल्पस्थाने। ते च योज्या इति शेषः। इति जीर्णज्वरः।

शिरोरुग्गौरवश्लेष्महरमिन्द्रियबोधनम्॥ १२५॥

जीणज्वरे रुचिकरं दद्यान्नस्यं विरेचनम्।

स्नैहिकं शून्यशिरसो दाहार्ते पित्तनाशनम्॥ १२६॥

स०-जीर्णज्वरे विरेचनाख्यं नस्यं दद्यात्। कीदृशं तन्नस्यं स्यात्? शिरसो रुजं गौरवं च श्लेष्माणं च हरति तच्छीलं तत्। तथा, इन्द्रियाणां-वक्षुरादीनां, च बोधनम्। तथा, रुचिकृत्। शून्यशिरसः पुंसः स्नहिकं-स्नेहेन मिश्रं स्निग्धं, नस्यं दद्यात्। दाहार्ते शिरसि पित्तहरं नस्यं दद्यात्।

आ० र०- अथ ज्वरोपद्रवाः। तत्र शिरःशूलादिषु नस्यमाह-शिरोरुग्गौरवश्लेष्महरमिति। विरेचनं-शोधनम्। स्नैहिकं-बृंहणम्। पित्तनाशनं-शमनम्।

धूमगण्डूषकवलान् यथादोषं च कल्पयेत्।
प्रतिश्यायास्यवैरस्यशिरः कण्ठामयापहान्॥ १२७॥

स० -धूमादींश्च यथादोषं कल्पयेत्। किम्भूतान्? प्रति श्यायादिघ्नान्।

आ० र०- प्रतिश्यायादौ धूमादीनाह-धूमगण्डूषकवलानिति।

अरुचौ मातुलुङ्गस्य केसरं साज्यसैन्धवम्।
धात्रीद्राक्षासितानां वा कल्कमास्येन धारयेत्॥ १२८॥

स०-अरुचौ सत्यां बीजपूरकस्य केसरं सघृतसैन्धवमास्येन धारयेदिति सम्बन्धः। अथवा धात्र्यादीनां कल्कं धारयेत्।

आ० र०- अरुचौ कवल(कल्क)द्वयमाह-अरुचाविति। वङ्गसेने तु (ज्वराधिकारे श्लो. २३१)-"शर्करादाडिमाभ्यां च द्राक्षादाडिमयोस्तथा। वैरस्ये धारयेत्कल्कं गण्डूषं च तथा घृतम्॥ (श्लो. २५९)-हरीतकी प्रियङ्गुश्च पिप्पली लोध्रमेव च। दार्वी हरिद्रा तेजोह्वा सक्षौद्रं मुकधावनम्॥ एतेन कटुभावश्च मुखरोगश्च शाम्यति। वक्त्रं विशदतामेति भक्तच्छन्दश्च जायते॥ (श्लो. २८०)-अजाजीशर्करायुक्तोदाडिमस्वरसेन तु। रुचिष्यो मधुना युक्तः कर्तव्यः कवलग्रहः॥" इति।

यथोपशयसंस्पर्शान् शीतोष्णद्रव्यकल्पितान्।

अभ्यङ्गालेपसेकादीन् ज्वरे जीर्णे त्वगाश्रिते॥ १२९॥

कुर्यादञ्जनधूमांश्च तथैवागन्तुजेऽपि तान्।

स०-त्वगाश्रिते जीर्णज्वरेऽभ्यङ्गान् कुर्यात्। यथोपशयं-यथासुखावहं, संस्पर्शो येषां, तान्, तथा शीतवीर्यैरुष्ण वीर्यैश्च द्रव्यैः कल्पितान्-योजितान्। तथा, अञ्जनधूमांश्च कुर्यात्। अञ्जनधूमानागन्तुजेऽपि ज्वरे तथैव कुर्यात्। सद्योगत्वादागन्तुजेऽप्येतेऽनिषिद्धा एव। तानिति पुनः कृतमतिशयार्थम्। विशेषेणागन्तुजेऽपि ज्वरे-भूतविषाद्युद्भवे, तान् कुर्यादित्यर्थः।

आ० र०- त्वग्गते ज्वरेऽभ्यङ्गादीनाह-यथोपशयसंस्पर्शानिति। ते च शीताभिलाषिणः शीतैर्द्रव्यैः शीतस्पर्शाः कल्प्याः, उष्णाभिलाषिण उष्णैरुष्णस्पर्शाः। आदिशब्दादवगाहादयः। अञ्जनधूपांश्च त्वग्गते कुर्यात्।

प्रसङ्गादागन्तुजे नस्यादीनाह-तथैवागन्तुजेऽपीति। वङ्गसेने त्वभ्यङ्गतैलान्युक्तानि (ज्वराधिकारे श्लो. ७७७)-"लाजामधुकमञ्जिष्ठामूर्वाचन्दनसारिवाः। तैलं षड्धरणं नाम ह्यभ्यङ्गाज्ज्वरनाशनम्॥ लाक्षा निशा कुष्ठशुण्ठी मञ्जिष्ठा च सुवर्चिका। मूर्वा च चन्दनं सिद्धं तैलं तक्रेऽथ षड्गुणे॥ अभ्यङ्गेन प्रशमयेद्दाहं शीतज्वरं नृणाम्। (श्लो. ६२८)-दध्नः ससारकस्यात्र तक्रं कट्टरमिष्यते॥ (श्लो. ७१९)- स्वर्जिकाकुष्ठमञ्जिष्ठा [लाक्षामूर्वामहौषधैः। सक्षीरैः साधितं तैलमभ्यङ्गाद्दाहशीतनुत्॥ बलामधुकमञ्जिष्ठा] पद्मापद्मकचन्दनैः। स्मौद्रफेनह्रीबेररज-नीसारिवोत्पलैः॥ पिष्टैस्तैलं पचेदेतैरजाक्षीरं चतुर्गुणम्। वातपित्तज्वराज्जीर्णात्तेनाभ्यक्तो विमुच्यते॥" इति।

दाहे सहस्रधौतेन सर्पिषाऽभ्यङ्गमाचरेत्॥ १३०॥

स०-दाहे सति सर्पिषा सहस्रधौतेनाभ्यङ्गमाचरेत्।

आ० र०- दाहस्यौषधान्याह-दाहे सहस्रधौतेनेति। सहस्रधौतेन-सहस्रकृत्वो धौतेन। यावति मज्जति तावच्छीतोदके घृतं प्रक्षिप्य हस्तेन मर्दयेत्, तदुदकं स्रावयेत्, इत्येको वारः, एवं सहस्रम्।

सूत्रोक्तैश्च गणैस्तैस्तैर्मधुराम्लकषायकैः।
दूर्वादिभिर्वा पित्तघ्नैः शोधनादिगणोदितैः॥ १३१॥
शीतवीर्यैर्हिमस्पर्शैः क्वाथकल्कीकृतैः पचेत्।
तैलं सक्षीरमभ्यङ्गात्सद्यो दाहज्वरापहम्॥ १३२॥
शिरो गात्रं च तैरेव नातिपिष्टैः प्रलेपयेत्।
तत्क्वाथेन परीषेकमवगाहं च योजयेत्॥ १३३॥
तथाऽऽरनालसलिलक्षीरशुक्तघृतादिभिः।

स०-सूत्रोक्तैः-सूत्रस्थानोदितैः, मधुराम्लकषायकैर्गणैः। तत्र मधुरो गणो-"घृतहेम" (ह.सू.अ. १०/२२) इत्यादिः, अम्लो गणो-"धात्रीफलाम्लीका" (ह. सू. अ. १०/२५) इत्यादिः, कषायो गणः-"पथ्याऽक्षं" (ह. सू. अ. १०/३९) इत्यादिः, तत्र चैतैर्मधुराम्लकषायैर्वर्गैः। तत्र दूर्वादिदिभिर्गणैः- "दूर्वाऽनन्ता" (ह.सू.अ. १५/६) इति निर्दिष्ट एकः, "न्यग्रोधादिः" (ह. सू. अ. १५/४९) द्वितीयः, तृतीयस्तु "पद्मकपुण्ड्रौ" (ह. सू. अ. १५/१२) इत्यादिः, चतुर्थः "सारिवोशीर" (ह. सू. अ. १५/११) इत्यादिः, एतै पूर्वोक्तैर्गणैः पित्तघ्नैः शोधनादिगणसङ्ग्रहोक्तैः शीतवीर्यैर्हिमस्पर्शैर्भेषजैस्तथा स्पर्शतो वीर्यतश्च शीतगुणैः, अक्काथाः क्काथाः कृताः, अकल्काः कल्काः कृताः, तैः क्वाथकल्कीकृतैरेतैर्गणैस्तैलं क्षीरेण सह पचेत्। तच्च पक्वमभ्यङ्गात्-म्रक्षणात्, सद्यो-न चिरेण कालेन, दाहज्वरं जयेत्। न केवलमेतैर्गणैस्तैलं पचेद्दाहज्वरशान्त्यै, यावत्तैरेव शिरो-मूर्धानं, गात्रं च नातिपिष्टैः-किञ्चित्पिष्टैः, प्रलेपयेत्। सुपिष्टैर्ह्येतैः प्रत्युत दाह उत्पद्यते। तथा चोक्तम् (सङ्ग्रहे सू. अ. ७)-"श्लक्ष्णशुष्कघनो लेपश्चन्दनस्यापि दाहकृत्। त्वग्गतस्योष्मणो रोधाच्चीकृत्त्वन्यथाऽगुरोः॥ इति। अनेनैवाभिप्रायेण शीतज्वरे वक्ष्यति (श्लो. १४१)-"तैः सुपिष्टैश्च लेपयेत्।" इति। गात्रग्रहणेनैव शिरोग्रहणे लब्धे पुनः शिरोग्रहणं विशेषार्थम्। विशेषेण शिरो लेपयेत्, तस्य विशेषेण ज्वराश्रयत्वात्। तथाचोक्तम्-"विमुक्तस्यापि हि शिरो ज्वरो यस्य न मुञ्चति। अविमुक्तः स

विज्ञेया ज्वरः पुनरुपैति तम्॥" इति। तस्माच्छिरसो विशेषेण लेपनार्थं पृथगुपादानम्। तेषां गणानाम् क्काथस्तत्क्काथः, तेन परिषेकमवगाहं च क्काथपूर्णायां द्रोण्यां योजयेत्। तथा, आरनालादिभिः परिषेकादि योजयेत्।

आ० र०- अभ्यङ्गार्थं तैलमाह-सूत्रोक्तैश्चेति। तैस्तैरित्यगणपठितैरपि। तैरेव-तैलद्रव्यैः, तत्क्काथेनारनालादिभिर्वा पृथक् परिषेकोऽवगाहश्च।

कपित्थमातुलुङ्गाम्लविदारीरोध्रदाडिमैः॥ १३४॥

बदरीपल्लवोत्थेन फेनेनारिष्टकस्य वा।

लिप्तेऽङ्गे दाहरुङ्मोहाश्रच्छर्दिस्तृष्णा च शाम्यति

स०-कपित्थादिभिर्वदरीपल्लवोद्भवेन वा फेनेन लिप्तेऽङ्गे सति दाहादयः शाम्यन्ति।

आ० र०- दाहघ्नं लेपत्रयमाह-कपित्थेति। मातुलुङ्गद्स्याम्लं केसरम्। अरिष्टको-रक्षाफलः। वङ्गसेने तु (ज्वरा. श्लो. २५८)-"जिह्वातालुगलक्लोमशेषे मूर्ध्नि तु दपयेत्। केसरं मातुलुङ्गस्य मधुसैन्धवसंयुतम्॥' इति।

यो वर्णितः पित्तहरो दोषोपक्रमणे क्रमः।

तं च शीलयतः शीघ्रं सदाहो नश्यति ज्वरः॥ १३६॥

स०-यश्च दोषोपक्रमणीयाध्याये पित्तहरः क्रमो वर्णितः-उक्तः, तं च-क्रमं, शीलयतः-अभ्यसतः, ज्वरो दाहेन सह नश्यति।

आ० र०- सूत्रोक्तं पित्तक्रममतिदिशति-यो वर्णित इति।

वीर्योष्णैरुष्णसंस्पर्शैस्तगरागुरुकुङ्कुमैः।

कुष्ठस्थौणेयशैलेयसरलामरदारुभिः॥ १३७॥

नखरास्नापुरवचाचण्डैलाद्वयचोरकैः।

पृथ्वीकाशिग्रुसुरसाहिंस्राध्यामकसर्षपैः॥ १३८॥

दशमूलामृतैरण्डद्वयपत्तूररोहिषैः।

तमालपत्रभूतीकशल्लकीधान्यदीप्यकैः॥ १३९॥

मिशिमाषकुलत्थाग्निप्रकीर्यानाकुलीद्वयैः।

अन्यैश्च तद्विधैर्द्रव्यैः शीते तैलं ज्वरे पचेत्॥ १४०॥

क्वथितैः कल्कितैर्युक्तैः सुरासौवीरकादिभिः।

तेनाभ्यञ्जयात्सुखोष्णेन, तैः सुपिष्टैश्च लेपयेत्॥ १४१॥

कवोष्णैस्तैः परीषेकमवगाहं च कल्पयेत्।

केवलैरपि तद्वच्च सुक्तगोमूत्रमस्तुभिः॥ १४२॥

आरग्वधादिवर्गं च पानाभ्यञ्जनलेपने।

धूपानगरुजान् यांश्च वक्ष्यन्ते विषमज्वरे॥ १४३॥

अभ्यनग्निकृतान् स्वेदान् स्वेदि भेषजभोजनम्।

गर्भभूवेश्मशयनं कुथकम्बलरल्लकान्॥ १४४॥

निर्धूमदीप्तैरङ्गारैर्हसन्तीश्च हसन्तिकाः।

मद्यं सत्र्यूषणं तक्रं कुलत्थव्रीहिकोद्रवान्॥ १४५॥

संशीलयेद्वेपथुमान् यच्चान्यदपि पित्तलम्।

दयिताः स्तनशालिन्यः पीना विभ्रमभूषणाः॥ १४६॥

यौवनासवमत्ताश्च तमालिङ्गेयुरङ्गनाः।

वीतशीतं च विज्ञाय तास्ततोऽपनयेत्पुनः॥ १४७॥

स०-वीर्योष्णैरुष्णसंस्पर्शैः-उभयथा वीर्यतः स्पर्शतश्चोष्णैस्तगरादिभिर्द्रव्यैः, [अन्यैश्च-] अपरैरपि, तद्विधैः-उष्णवीर्यैः उष्णसंस्पर्शैश्च, क्काथीकृतैः कल्कीकृतैश्च सुरादिभिः-अम्लपाकरसैः, [शीते-] शीतज्वरएतद्विषये, तैलं पचेत्। तेन-तैलेन, सुखोष्णेनाभ्यञ्जयात्-म्रक्षयेत्।

तैश्च-पूर्वोक्तैर्द्रव्यैः, सुपिष्टैः-अतिश्लक्ष्णैः, लेपयेत्। तैश्च किञ्चिदुष्णैः परिषेकमवगाहं च कल्पयेत्-योजयेत्। तद्वच्च-तथैव, सुक्तादिभिः केवलैश्च परिषेकादिकं कल्पयेत्। "आरग्वधेन्द्रव" (हृ. सू. अ. १५/१७) इत्यादि च पानाभ्यञ्जनलेपने कल्पयेत्। अगरुजाम् धूपान् कल्पयेत्। यांश्च धूपान् विषमज्वरे वक्ष्यन्ते तांश्च कल्पयेत्।

तथा स्वेदान् शीलयेत्। किम्भूतान्? अग्निकृताननग्निकृतांश्च-स्वेदयति साधु स्वेदि यद्भेषजं भोजनं च तच्च संशीलयेत्। तथा गर्भे-गर्भगृहाभ्यन्तरे, यद्भवेश्म-भूमिगृहं, तत्र शयनं-शय्याम्, तथा कुथादीनावरणविशेषान्, तथा हसन्तिकाः-वह्निशकटिकाः, शीलयेत्। किम्भूताः? निर्धूमदीप्तैरङ्गारैर्हसन्तीरिव। तथा, मद्यादींश्च शीलयेत्। वेपथुमन्तमङ्गना आलिङ्गयेयुर्दयितादिगुणयुक्तः। गतशीतं च विदित्वा ततस्ताः-योषाः, पुनरपनयेत्। एतच्च ब्रुवंस्ताभिः संभोगाभिलाषं निवारयति।

आ० र०- शीतस्यौषधान्याह-वीर्योष्णैरिति। पुरो-गुग्गुलुः। पृथ्वीका-बाह्लिका। ध्यामकं-कत्तृणम्। तमालपत्रं-पत्रकम्। [भूतीकं-] भूस्तृणम्। प्रकीर्या-करञ्जः। क्वथितैः कल्कितैश्च तगरादिभिः सुरासौवीरकाद्यम्लद्रवयुक्तैः। तेन-तैलेन। तैः-तैलद्रव्यैः। केवलैः-जलपिष्टैः। अपिशब्दात् सुरादिपिष्टैः शुक्तादिभिः, तद्वत्-तगरादियुक्तैः केवलैरपि। सङ्ग्रहे तु (चि.अ. २)-"कुङ्कुमागरुकस्तूरीनखैलासुरदारुभिः। शैलेयचण्डात्वग्वक्त्रास्नाकपिपुरामयैः॥ पृथक्प्रदेहाः सर्वैर्वा शीतघ्ना दृढकल्किताः। वक्रं-तगरम्। कपिः-सिह्लकः। आमयं-कुष्ठम्। यवचूर्णं घृताभ्यक्तं पचेत् क्षीरे चतुर्गुणे। दर्वीप्रलेपिनं लेपं तं ज्वरार्तस्य योजयेत्॥" इति। वक्ष्यते आचार्यः। हसन्ती-हास्यमिव कुर्वन्ती। हसन्तिकाशकटिका। सत्व्यूषणं मद्यादिपञ्चकम्। सङ्ग्रहे तु (चि. अ. २)-"अजाज्याः सगुडं कल्कं सगुडं वाऽमृतारसम्। रसं वार्ताकफलजं पिबेद्वा मधुसंयुतम्॥ मधुकागुरुकौन्तीनां कल्को व्याघनखस्य च। मद्येन पीतः सक्षौद्रस्तीव्रशीतज्वरापहः॥ आनाहे कालविल्कुर्यात्क्रियामलसकोदिताम्। पिप्पलीपिप्पलीमूलयवानीचव्यसाधिताम्॥ यवागूं पाययेच्चैनमनिलस्यानुलोमनीम्। सोपद्रवोऽपि चेदेवं ज्वरः शीतो न शाम्यति॥ अत्युदीर्णेऽनिलकफे स्वे स्थाने पित्तधाम्नि वा। तक्रानुपानं त्रपुसं भक्षयित्वाऽनलं भजेत्॥ आस्वेदसम्भवस्तिष्ठेत्प्रावृतस्तद्वदातपे। ततो

विमृदितः स्नातो युक्ताशी स्याद्गते ज्वरे॥ शमं तौ पित्तवृध्द्यैव प्रपद्येते स्वधाम च। निवर्तते ततः शीघ्रं वातश्लेश्मोद्भवो ज्वरः॥" इति।

अधुना सन्निपातचिकित्सितं ब्रूते-

वर्धनेनैकदोषस्य क्षपणेनोच्छ्रितस्य वा।

कफस्थानानुपूर्व्या वा तुल्यकक्षाञ्जयेन्मलान्॥ १४८॥

स०-हीनाधिकभावत्वेन विषमदोषजे सन्निपाते वर्धनेनैकदोषस्यार्थात् क्षीणस्य क्षीणयोर्वा, उच्छ्रितस्योच्छ्रितयोर्वा क्षपणेन, देशकालबलान्मलान् जयेत्। कथं विषमदोषजे सन्निपाते वर्धनेनैकदोषस्य सन्निपातज्वरस्योपशान्ति? तस्माद्वर्धनमयुक्तम्। अत्राचक्ष्महे। सन्निपातस्थेन क्षीणेन दोषेण सताऽक्षीणौ दोषौ ज्वरकारिणौ। न तौ सुखेन जेतुं शक्येते, विषमाश्रयत्वात्। क्षीणस्य तु दोषस्य वर्धनेन दोषसाम्यमुत्पाद्यैकरूपया क्रियया सन्निपातः सुखेन जेतुं शक्यते। तस्माद्वर्धनेनैकदोषस्येति वक्तुं युक्तम्। तथा च,-वाताख्ये यतो दोषे शीतलघुरूक्षादिरुपैर्द्रव्यैर्वृद्धिर्भवति। वर्धमानेन च तत्रस्थौ पित्तकफावप्येवं प्रायेण किञ्चित् क्षयं यातः, तत्क्ष्याच्च ज्वरोऽप्यसौ मार्दवं गतः सुखेन जेतव्य इति। एवं दोषत्रयस्यापि ज्वरकारणे तथा युक्त्या प्रतीकारः कृतो भवति। एवमुच्छ्रितस्यापि क्षपणैरे(णेनै)करूपया क्रियया सुखेन सन्निपातो जीयते। तदेवं व्युल्बणैकोल्बणैर्दोषैर्जनिते सन्निपाते चिकित्साक्रम उक्तः। सम्प्रति समदोषजे सन्निपाते चिकित्साक्रमं दर्शयितुमाह-कफेत्यादि। स्थितिः-स्थानम्, कफश्च स्थानं च कफस्थाने, तयोरानुपूर्वी-क्रमः, तया च तुल्यकक्षान्-समान् सन्निपातान्, ज्वरे मलान् जयेत्। तत्र कफः प्राग्जेतव्यस्ततः पित्तं ततो वायुरिति कपानुपूर्वीत्युच्यते। उक्तं च (सङ्ग्रहेसू.अ.२१)-"स्थानतः केचिदिच्छन्ति प्राक् तावच्छ्लेष्मणो वधम्। शिरस्युरसि कण्ठे च प्रलिप्तेऽन्नरुचि कुतः॥ तदभावे कथं भोज्यपानद्रव्यावचारणम्। असत्यभ्यवहारे च कुतो दोषस्य निग्रहः॥ तस्मादादौ कफो धात्यः कायद्वारार्गलो हि सः। मध्यस्थायि यतः पित्तमाशुकारि च चिन्त्यते॥ अतो वातसस्वस्यास्य कुर्यात्तदनु निग्रहम्। अधःस्थायी च तदनु निग्राह्यः स्यात्समीरणः॥" इति। सुश्रुतस्त्वाह(?) (सङ्ग्रहे सू.अ. २१)-"[सुश्रुतश्च न सर्वत्र मतमेतद्ब्रवीति तु।] जयेज्ज्वरेऽतिसारे च क्रमात्पित्तकफानिलान्॥ प्रायेण तापात्मतया ज्वरे तेजो विशिष्यते। विशश्च सरता पित्तात्तथा च मृदुकोष्ठता॥ तस्य चानुबलः श्लेष्मा

गौरवापक्तिजाड्यकृत्। वायुश्च वर्धतेऽवश्यं यस्त्वहःसु तयोः क्षये॥ ज्वरातिसारयोस्तस्मादेष दोषजये क्रमः। कफपित्तानिलानन्ये क्रमादाहुस्तयोरपि॥ यस्मादामाशयोत्क्लेशाद्व्युत्थिष्ठं तत्समुद्भवः। क्रमेणाद्येन तत्रापि प्रवृद्धान् स्वाशये स्थितान्। स्वाशयेषु प्रदुष्टानांस्थितैव ह्याशुकारिता। विज्ञाय कर्मभिः स्वैः स्वैर्दोषोद्रेकं यथामलम्। भेषजं योजयेत्तत्तु स्वीकुर्यान्न क्रमं भिषक्।" इति। अन्ये त्वाहुः (सं.सू.अ. २१)-"क्रमान्मरुत्पित्तकफाः सर्वत्र सदृशे बले। वातादीनां यथापूर्वं यतः स्वाभाविकं बलम्॥ ऊचे पराशरोऽप्यर्थममुमेव प्रमाणयन्। यथोपन्यासतः प्राप्तमादौ दोषभिषग्जितम्। नेतृभङ्गेन दृष्तो हि समं सैन्यपराजयः॥" इति। स्थानानुपूर्व्या वा दोषांस्तुल्यकक्षान् जयेत्। स्थानं च यद्यप्यविशेषेणैव सम्भवति तथाऽपीह ज्वरकारिदोषप्रस्तावादामाशयो गृह्यते। तेनामाशयस्थो दोषः प्राग्जेतव्यस्ततः पक्वाशयस्थः, इति स्थानानुपूर्वी-स्थानमाहात्म्ययस्य चिकित्सक्रमः, कार्यः। तथा च प्राग्ध्यगीष्ट (हृ. सू. अ. १७११३)-"आमाशयगतेवायौ कफे पक्वाशयाश्रिते। रूक्षपूर्वं तथा स्नेहपूर्वं स्थानानुरोधतः॥" इति। तदेवं कफस्थानानुपूर्व्या वा तुल्यकक्षान् मलान् जयेत्। अन्ये त्वेवं व्याख्यानयन्ति, -कफस्य स्थानंकफस्थानम्, कफस्थानलक्षणा चासावानुपूर्वी च, तया कफ स्थानानुपूर्व्या वा तुल्यकक्षान् मलान् जयेत्। यद्यपि कफस्थानानि कण्ठादीन्यपि तथाऽपीह ज्वरकारिदोषप्रस्तावादामाशयोगृह्यते। तथा चोक्तम् (श्लो.१)-"आमशयस्थो हत्वाऽग्निं सोमो मार्गान् पिधाय यत्। विदधाति ज्वरं दोषस्तस्मात्कुर्वीत लङ्घनम्॥" इति। तदेवं रूक्षोष्णपाचनादिः क्रमोऽत्र कार्य इत्यवतिष्ठते। ननु, कफस्थानानुपूर्व्या वेत्येतन्न वाच्यम्, यतस्तुल्यकालं त्रिदोषहरैर्द्रव्यैः सन्निपातस्य क्रिया कार्या। द्रव्याणि दोषघ्नानि। अत्रोच्यते। ज्वरनाशनानि द्रव्याणि त्रिदोषघ्नानि विरलानि। एकदोषघ्नानि पुनर्ज्वरहन्तृणि त्रिदोषघ्नेभ्यः समर्थराणि बहुतराणीति कफस्थानानुपूर्व्या वेत्युक्तम्। अपि च दोषकालादिवशाच्चिकित्साप्रकारान्तरोऽयमुपयुज्यत इति।

आ० र०- दाहशीतयोरेकज्वरोपद्रवयोरौषधमाह-वर्धनेनेति। यदा दाहोऽल्पः शीतमधिकं तदा दाहहेतोर्वर्धनेन शीतहेतोः क्षपणेन वा शीतजयः, पश्चाद्दाहजयः। यदा शीतमल्पं दाहोऽधिकः तदा शीतहेतोर्वर्धनेन दाहहेतोः क्षपणेन वा दाहजयः, पश्चाच्छीतजयः। यदा दाहशीते तुल्ये तदा तुल्यकक्षान् मलान् कफानुपूर्व्या वा स्थानानुपूर्व्या जयेत्। कफपित्तवातानां क्रमाज्जयः-कफानुपूर्वी। उरःकोष्ठबस्तीनां क्रमाज्जयः-स्थानानुपूर्वी। उक्तं च सङ्ग्रहे (चि.अ. २)- "वमनैश्च विरेकैश्च बस्तिभिश्च यथाक्रमम्। ज्वरानुपचरेद्धीमान् कफपित्तानिलोद्भवान्॥ संसृष्टैः सन्निपतितैरेकनैकोल्बणैः समैः। ज्वरान् दोषैः क्रमापेक्षी यथोक्तैरौषधैर्जयेत्॥ वर्धनेनैकदोषस्य

क्षण्णेनोच्छ्रितस्य वा। कफस्थानानुपूर्व्या वा सन्निपातज्वरं जयेत्॥" इति। तथा (सं.चि.अ. २)-"निद्रानिवारणोपायः सन्न्यासेऽभिहितो हितः। सन्निपाते विशेषेण दारुणोऽयमुपद्रवः॥ कम्पः प्रलपनं यस्य सज्ञानाशश्च दारुणः। रसैस्तु लाववर्तीरकुलीरशशतैत्तिरैः॥ तर्पयेत्प्राक् पुराणेन सर्पिषाऽयं जयेदपि। बलारास्नागुडूच्याद्यैस्तैलैश्च परिषेचयेत्॥" इति।

सन्निपातचिकित्साप्रक्रमादिदमप्याह-

सन्निपातज्वरस्यान्ते कर्णमूले सुदारुणः।
शोफः सञ्जायते येन कश्चिदेव विमुच्यते॥ १४९॥

स०-सन्निपातज्वरस्यावसाने कर्णमूलप्रदेशे सुष्ठ दारुणः शोफः सञ्जायते। येन-शोफेनोत्पन्नेन, कश्चिदेव विमुच्यते। कश्चिदेवेत्यमेनास्य रोगस्य नावश्यमसाध्यतेति ब्रूते।

आ० र०- कर्णमूलोपद्रवमाह-सन्निपातज्वरस्यान्त इति।

अत एव चिकित्सामत्राह-

रक्तावसेचनैः शीघ्रं सर्पिःपानैश्च तं जयेत्।
प्रदेहैः कफपित्तघ्नैर्नावनैः कवलग्रहैः॥ १५०॥

स०-रक्तावसेचनादिभिः कवलग्रहान्तैराशु तं जयेत्। प्रदेहः-प्रलेपः।

आ० र०- कर्णमूलौषधमाह-रक्तावसेचनैरिति। वङ्गसेने तु (ज्व. श्लो. ५३२)-"गैरिकं पांसुजं शुण्ठी वचाकट्फलकाञ्जिकम्। कर्णशोथहरो लेपः सन्निपातज्वरे भृशम्॥" इति।

शीतोष्णस्निग्धरूक्षाद्यैर्ज्वरो यस्य न शाम्यति।

शाखानुसारी तस्याशु मुञ्चेद्बाह्वोः क्रमाच्छिराम्॥ १५१॥

स०-आदिशब्देन स्तम्भस्वेदनादयो गृह्यन्ते। शीतोष्णादिभिरुपक्रमैर्यथायथं पृथग्वातपित्तश्लेष्मसंसर्गसन्निपातज्वरप्रशमनैः सम्यक् प्रयोजितैर्ज्वरो यस्य नरस्य शमं न गच्छति, तस्य शाखानुसारित्वाद्धेतोर्बाह्वोः क्रमात्-एकैकस्मिन् न युगपद् द्वयोर्भुजयोः, शिरां मुञ्चेत्। शाखाशब्देनात्र केवलं रक्तं विवक्षितम्, न मांसादयः। अत एव रक्तस्यैव चिकित्सानुवाच मुञ्चेच्छिरामिति। मांसजानां हि शस्त्रक्षाराग्निकर्मादिचिकित्सा। तस्माच्छाखाशब्देन रक्तस्यैव ग्रहणं युक्तम्।

आ० र०- रक्तस्रावसाध्यं ज्वरमाह-शीतोष्णस्निग्धरूक्षाद्यैरिति। "शाखा-रक्तादयस्त्वङ्क बाह्योरोगायनं हि सा (ह्. सू. अ. १२/४४)।" तदनुसारी-तव्यापी।

अथ विषमज्वरः। तत्र शमनान्याह-कलिङ्गका इति। सङ्ग्रहे तु (चि.अ.अ १)-"पटोलेन्द्रयवारिष्टभद्रमुस्तामृताद्वयम्। सारिवाद्वितयं पाठा त्रायन्ती कटुरोहिणी॥ पटोलारिष्टमृद्वीकाशम्याकत्रिफलावृषाः। चन्दनोशीरधान्याब्दगुडूचीविश्वभेषजम्॥ देवदारु स्थिरा शुण्ठी वासा धात्री हरीतकी। पञ्च पञ्च ज्वरान् घ्नन्ति योगा मधुसितोत्कटाः॥" इति। अरिष्टो-निम्बः। अमृताद्वयं-गुडूचीहरीतक्यौ।

अयमेव विधिः कार्यो विषमेऽपि यथायथम्।

ज्वरे विभज्य वातादीन् यश्चानन्तरमुच्यते॥ १५२॥

स०-अयमेव-पूर्वोक्तो, विधिर्विषमेऽपि-विषमज्वरे सतकादौ, यथास्वं वातादीन् विभज्य कार्यः। अनन्तरमधुनैव च यो विधिरुच्यते पटोलकटुकादिभिः, सोऽपि विषमज्वरे कार्यः।

आ० र०- अतिदेशमाह-अयमेवेति। अयं-सन्ततज्वरोक्तः।

पटोलकटुकामुस्ताप्राणदामधुकैः कृताः।
त्रिचतुःपञ्चशः क्काथा विषमज्वरनाशनाः॥ १५३॥

स०-पटोलादिभिस्त्रिभिश्चतुर्भिः पञ्चभिर्वा कृताः क्काथा विषमज्वरघ्नाः।

आ० र०- क्काथनाह-पटोलेति।

योजयेत्रिफलां पथ्यां गुडूचीं पिप्पलीं पृथक्।
तैस्तैर्विधानैः सगुडं भल्लातकमथापि वा॥ १५४॥

स०-त्रिफलां वा पथ्यां वा गुडूचीं पिप्पलीं वा पृथक् पृथक् योजयेत् सततकादिके विषमज्वरे। अथवा तैस्तैः-रसायनाद्युक्तैर्विधिभिः, गुडसहितं भल्लातकं वा योजयेत्।

आ० र०- त्रिफलादिरसायनान्याह-योजयेत्रिफलामिति। तैस्तैः-रसायनविध्युक्तैः। भल्लातकरसायनं तु सगुडमेव।

लङ्घनं बृंहणं वाऽऽदौ ज्वरागमनवासरे।

स०-यदि वा ज्वरागमनदिवसे आदौ-प्रथमं, लङ्घनं बृंहणं वा योजयेत्।

आ० र०- ज्वरोत्पत्तिदेने अभ्ज्जनं गुरुस्निग्धमधुरभोजनं वा कार्यमित्याह-लङ्घनं बृंहणं वेति।

प्रातः सतैलं लशुनं प्राग्भक्तं वा तथा घृतम्॥ १५५॥

जीर्णं तद्वद्दधि पयस्तक्रं सर्पिश्च षड्लम्।

कल्याणकं पञ्चगव्यं तिक्ताख्यं वृषसाधितम्॥ १५६॥

स०-विषमज्वरे प्रगे सहतैलेन लशुनं योजयेत्। प्राग्भक्तमित्यादि। भक्तात्प्रथमं प्रातर्वा घृतं च जीर्ण-पुराणं, योजयेत्। तथैव दधि, तथा पयः, तथा तक्रं, षड्लं च सर्पिःक्षयचिकित्सितोक्तं (हृ. चि. अ. ५/२ ८) , प्रातः प्राग्भक्तं वा योजयेदित्यर्थः। कल्याणकं-उन्मादप्रतिषेधोक्तं (हृ. उ. अ. ६/२६), पञ्चगव्यं-अपस्मारप्रतिषेधोक्तं (हृ. उ. अ. ७/१९) , तिक्ताख्यं-कुष्टचिकित्सितोक्तं (हृ. चि. अ. १९/२) , तथा वृषसाधितं-रक्तपित्तचिकित्सितोक्तं (हृ. चि. अ. २/४०), प्रातः प्राग्भक्तं वा य़ोजयेत्।

आ० र०- लशुनपुराणघृतदधिक्षीरतक्राणि पृथक् सतैलानि प्रातःकाले भोजनादौ वा प्रयोज्यानीत्याह-प्रातः सतैलमिति।

षड्लादीन्यतिदिशति-सर्पिश्चेति।

षड्लादीन्यतिदिशति-सर्पिश्चेति।

त्रिफलाकोलतर्कारीक्काथे दग्ना श्रृतं घृतम्।

तिल्वकत्वक्कृतावाप विषमज्वरजित्परम्॥ १५७॥

स०-त्रिफलादिक्काथे चतुर्गुणे सर्पिर्दधिसमं शाववरोध्नत्वक्कृतावापमतिशयेन विषमज्वरजित्।

आ० र०- घृतान्तरमाह-त्रिफलाकोलतर्कारीक्काथ इति।

सुरां तीक्ष्णं च यन्मद्यं शिखितित्तिरिदक्षजम्।

मांसं मेद्योष्णवीर्यं च सहान्नेन प्रकामतः॥ १५८॥

सेवित्वा तदहः स्वप्यादथवा पुनरुल्लिखेत्।

स०-सुरां च तीक्ष्णं च यन्मद्यं शिखितिरिदक्षजं च मांसं मेध्यो(द्यो)ष्णवीर्यमन्नेन सह बहु सेवित्वा तदहः स्वप्यात्। यस्मिन् दिने तद्भुक्तं तं दिवसं शयीत। तदहः स्वप्यादिति "कालाध्वनोरत्यन्तसंयोगे" इति द्वितीया। अथवा पूर्वोक्तपीतभुक्तभक्तो नरः पुनरुल्लिखेत्-उद्वमेत्।

आ० र०- प्रयोगान्तरमाह-सुरामिति। सुरामन्यद्वा तीक्ष्णं मद्यं, शि(खीतितिरिकुक्कुटान्मांसं,]... अन्यद्वा मेध्योऽद्यो) [ष्णवीर्यं-अ](घी)योष्णमांसं, अन्नेन सह ज्वरोत्पत्तिदिने सेवित्वा स्वप्यात्। न जीर्यति चेदुल्लिखेत्-वमेत्।

सर्पिषो महतीम् मात्रां पीत्वा वा छर्दयेत्पुनः॥ १५९॥

स०-सर्पिषो वा महतीम्-उत्तमां, मात्रां पीत्वा पुनश्छर्दयेत् उद्वमेत्।

आ० र०- सर्पिर्वमनमाह-सर्पिष इति।

नीलिनीभजगन्धां च त्रिवृतां कटुरोहिणीम्।

पिबेज्ज्वरस्यागमने स्नेहस्वेदोपपादितः॥ १६०॥

स०-नीलिन्यादीन् पृथग्ज्वरागमनवासरे कृतस्नेहस्वेदः पिबेत्।

आ० र०- विरेचनमाह-नीलिनीमिति। सद्यःस्नेहनं स्वेदं च कृत्वा नीलिन्यादिचतुष्टयं ज्वरोत्पत्तिदिने पिबेत्।

मनोह्वा सैन्धवं कृष्णा तैलेन नयनाञ्जनम्।

योज्यं

स०-मनोह्वादिकं तैलेन नयनाञ्जनं योज्यम्। अञ्जनशब्दो म्रक्षणेऽपि दृश्यत इतिनयनशब्देऽत्र प्रयुक्तः।

आ० र०- अञ्जनमाह-मनोह्वेति

हिङ्गुसमा व्याघीवसा नस्यं ससैन्धवम्॥ १६१॥

पुरणसर्पिः सिंहस्य वसा तद्वत्ससैन्धवा।

स०-हिङ्गुतुल्या व्याघ्रीवसा नस्यं ससैन्धवं योज्यम्। व्याघीति स्त्रीलिङ्गनिर्देशः स्त्रिया ग्रहणार्थोऽचिन्त्यत्वात्प्रभावस्य, अन्यथा पुंलिङ्गेनैव निर्देशं कुर्यात्। यथा वक्ति-"पुराणसर्पिः सिंहस्य वसा तद्वत्ससैन्धवा।" इति।

आ० र०- नस्यमाह-हिङ्गुसमा व्याघीवसा नस्यमिति। व्याघ्री-व्याघ्रजातिस्त्री, तस्याः वसा।

नस्यान्तरमाह-ससैन्धवम्। पुराणसर्पिरिति।

स्यान्तरमाह-सिंहस्य वसा तद्वत् ससैन्धवेति।

पलङ्कषा निम्बपत्रं वचा कुष्ठं हरीतकी॥ १६२॥

सर्षपाः सयवाः सर्पिर्धूपो विड्वा बिडालजा।

स०-पलङ्कषादिधूमः सर्वेषु ज्वरेषु कार्यः। अथवा बिडालाजाता विडालजा विट्।

आ० र०- धूपमाह-पलङ्कषेति। पलङ्कषा-गुग्गुलुः।

धूपान्तरमाह-विड्वा बिडालजेति।

विडालजा विड्गार्जारविष्ठा।

पुरध्यामवचासर्जनिम्बार्कागरुदारुभिः॥ १६३॥

धूपो ज्वरेषु सर्वेषु कार्योऽयमपराजितः।

स०-पुरादिभिः सहापराजिताख्योऽयं धूपो ज्वरेषु कार्यः।

आ० र०- अपराजितं धूपमाह-पुराध्यामेति। पुरोगुग्गुलुः। ध्यामकं-तृणम्। सर्जो-राला।

धूपनस्याञ्जनोस्रासा ये चोक्ताश्चित्तवैकृते॥ १६४॥

स०-ये च चित्तवैकृते-उन्मादापस्मारे, धूमादय उक्तास्ते च विषमज्वरे योज्याः। विकृतमेव वैकृतम्। प्रज्ञादित्वात्स्वार्थेऽण्।

आ० र०- उन्मादादिषूक्तान् धूपादीनतिदिशति-धूपनस्याञ्जनोच्त्रासा इति। उच्त्रासः-अकस्माद्भयोत्पादनम्। चित्तवैकृतं-उन्मादोऽपस्मारश्च, तत्र ये उक्तास्ते कार्याः।

दैवाश्रयं च भैषज्यं ज्वरान् सर्वान् व्यपोहति।

विषेषाद्विषमान् प्रायस्ते ह्यागन्त्वनुबन्धजाः॥ १६५॥

स०-न केवलं धूपादयो ज्वरं नाशयन्ति। दैवाश्रयं चौषधं मणिमङ्गलबल्युपहार-प्रायश्चित्तजपदानस्वस्त्ययनहोमादिकं सर्वान् ज्वरान्-आगन्तून्निजांश्च, व्यपोहति।

"उपसर्गादस्यत्यूह्योर्वा वचनम् (र्वेति वाच्यम्)" इति तङभावः। विशेषेण विषमान् व्यपोहति। यस्मात्ते-विषमज्वराः, आगन्तुनां-भूतादीनां, अनुबन्धज्ञाताः।

आ० र०- दैवव्यपाश्रयमौषधमाह-दैवाश्रयं चेति। दैघाश्रयं-जपहोमादि। हि-यस्मात्, प्रायो-बाहुल्येन, ते विषमाः, आगन्त्वनुबन्धजाः-ग्रहावेशादिसम्भवाः।

यथास्वं च सिरां विध्येदशान्तौ विषमज्वरे।

स०-विषमज्वराशान्तौ सत्यां यथास्वं-दोषाद्यपेक्षया, सिरां विध्येत्। सङ्ग्रहे च रसादिधातुस्थ्य् ज्वरे चिकित्सोक्ता। यथा (चि.अ.२)-"रससंस्थे तु सर्वस्मिन् कुर्याद्वमनलङ्घने। सेकसंशमनालेपरक्तमोक्षमसृकूस्थिते॥ तीक्ष्णं विरेकं मांसास्थे, मेदोघ्नं मेदसि स्थिते। अस्थिस्थे वातशमनमभ्यङ्गस्वेदमर्दनम्॥ ज्वरे वातार्तिशमनं विशेषाद्बस्तिकर्म च।" इति। मज्जस्थशुक्रस्थयोर्ज्वरयोरसाध्यत्वात्तत्र चिकित्सा नोक्ता।

आ० र०- शिराव्यधमाह-यथास्वं चेति। "तृतीयर्केऽसयोर्मध्ये स्कन्धस्याधश्चतुर्थके।" (ह. सू. अ. २७/१३) इत्यादि-यथास्वम्। सङ्ग्रहे तु (चि.अ. २)-"पञ्चगव्यस्य महतो विधिना पञ्चमाहिषम्। पञ्चाजं चतुरैष्ट्रं वा सिद्धं सिद्धं घृतं तथा॥ चौतुरौष्टं-पयोदधिमूत्रघृतैः। कटुरोहिणीमञ्जिष्ठावृषग्रन्थिकचित्रकैः। पाठास्वगुप्ताद्विनिशैः पञ्चगव्यस्य पञ्चसु॥ प्रस्थेषु संयुतैः सेव्यं विषमज्वरजित्परम्। वाक्स्वरस्मृतिमेधाग्निबलारोग्यवृषत्वकृत्॥ श्रृतक्षीरघृतक्षौद्रसिताकृष्णाः खजाहताः। विषमज्वरहृद्रोगक्षतकासक्षयापहाः॥ आस्थापनं वा तदहर्दद्यात्स्विन्नस्य यापनम्। पयसा वृषदंशस्य शकृद्वा तदहः पिबेत्॥ मस्तुना वा वृषशकृत् सुरया वा ससैन्धवम्॥ सहदेवावचाभद्रानाकुलीभिः प्रयोजयेत्। धूपनोद्वर्तनालेपान् सर्वज्वरनिबर्हणान्॥" इति। सिद्धयोगे तु (ज्व. श्लो. २३०)-"मुस्तामलकगुडूचीविश्वौषधकण्टकारिकाक्काथः। पीतः सकणाचूर्णः समधुर्विषमज्वरं हन्ति॥ अपामार्गजटा कट्यां लिहितैः सप्ततन्तुभिः। बद्धा वारे रवेस्तूर्णं ज्वरं हन्ति तृतीयकम्॥ गङ्गाया उत्तरे कूले अपुत्रस्तापसो मृतः। तस्मै तिलोदकं दद्यान्मुञ्चत्वेकाहिको ज्वरः॥ अगस्त्यन्पत्रस्वरसेन नस्यं निहन्ति चातुर्थकमुग्रवीर्यम्॥ सोमं सनुचरं देवं समातृगणमीश्वरम्। पूजयन् प्रयतः शीघ्रं मुच्यते विषमज्वरात्॥ विष्णुं सहस्रमूर्धानं चराचरपतिं विभूम्। स्तुवन्नामसहस्रेण ज्वरान्सर्वान् व्यपोहति॥ मूलं भूमिजयन्त्याश्च सहदेवोद्भावं तथा। तण्डुलीयकमूलं वा बद्धं मुर्ध्नि ज्वरापहम्॥ शान्तिं नयेन्त्रिवृद्वाऽपि सक्षौद्रा विषमज्वरम्।

मधुना चाभया लीढा हन्त्याशु विषमज्वरम्॥ (श्लो. २२८) अजाजी गुडसंयुक्ता विषमज्वर नाशिनी। गुडप्रगाढां त्रिफलां लिह्याद्वा विषमज्वरी॥" [इति। वङ्गसेने तु (ज्व. श्लो. ५७३)-] "शैलूषमण्डनरजः पुरुषानुरूपं शुभ्राङ्गवत्ससुरभीपयसा निपीतम्। आदित्यवारभवपालिदिने नरेण चातुर्थकं सुचिरजं जयति क्षणेन॥ शैलूषमण्डनं-हरीतालम्। पुरुषानुरूपं-पुरुषाकृति। कल्कः शिरीषपुष्पस्य रजनीद्वयसंयुतः। नस्यं सर्पिः समायोगाज्ज्वरं चातुर्थकं जयेत्॥ सितवर्षाभूमूलं पयस पीतं च पैत्तिकं जयति। चातुर्थकं सुचिरजं ताम्बूलेनैव भक्षणादथवा॥ कृष्णामलकीरामठदार्विवचाराजसर्षपरसोनैः। छागलमूत्रनिपिष्टैर्नस्यं त्वेकाहिकादिहरम्॥ क्षीराविकारजनिमर्दकसत्रपाणांमूलं ज्वरापहमवश्यमिदं शिखायाम्। बद्धं दिवाकरदिने यदि वाऽष्टमीषु रात्रिज्वरं हरति रञ्जितसूत्रबद्धम्॥" इति। इति विषमज्वरः।

केवलानिलवीसर्पविस्फोटाभिहतज्वरे॥ १६६॥

सर्पिःपानहिमालेपसेकमांसरसाशनम्।

कुर्याद्यथास्वमुक्तं च रक्तमोक्षादि साधनम्॥ १६७॥

स०-केवलानिलादिभिर्ज्वरे सर्पिःपानादिकं कुर्यात्। यच्च रक्तमोक्षादि साधनं यथास्वमुक्तं तच्च कुर्यात्।

आ० र०- अथागन्तुज्वरः। तत्राभिघातजन्मौषधमाह-केवलानिलेति। केवलनिलजो विसर्पजो विस्फोटजश्च ज्वरस्तुल्यौषधत्वादुक्तः। किन्त्वसावागन्तुः। किन्तु निजभेदः केवलः-पित्तकफामैरसंस्पृ(सृ)ष्टः।

ग्रहोत्थेभूतविद्योक्तं बलिमन्त्रादि साधनम्।

स०-ग्रहोत्थे ज्वरे भूतविद्योक्तं बलिमन्त्रादि साधनं चिकित्सितम्।

आ० र०- ग्रहावेशजस्यौषधमाह-ग्रहोत्थ इति। भूतविद्या-उत्तरस्थानोक्तं ग्रहप्रकरणम्।

ओषधीगन्धजे पित्तशमनं

स०-ओषधीगन्धजे पित्तशमनं चिकित्सितम्।

आ० र०- औषधीगन्धजस्यौषधमाह-औषधीगन्धज इति।

विषजिद्विषे॥ १६८॥

स०-विषे-विषजे ज्वरे, विषजिच्चिकित्सितम्।

आ० र०- विषजस्यौषधमाह-विषजद्विष इति।

इष्टैरर्थैर्मनोज्ञैश्च यथादोषशमेन च।
हिताहितविवेकैश्च ज्वरं क्रोधादिजं जयेत्॥ १६९॥
क्रोधजो याति कामेन शान्तिं क्रोधेन कामजः।
भयोशोकोद्भवौ ताभ्यां भीषोकाभ्यं तथेतरौ॥ १७०॥

स०-क्रोधादिजं ज्वरमिष्टैः-अभिमतैः, अर्थैः-विषयैः, तथा मनोज्ञैः-रम्यैः, तथा यथादोषं यः शमः-शमनं तेन, तथा हिताहितविवेकैश्च जयेत्। आदिशब्दोऽत्र भीशोकादि परिग्रहार्थः।

आ० र०- क्रोधादिजस्यौषधमाह-इष्टैर्थैरिति। इष्टैः-भोक्तुगुणेन मनोज्ञैः स्वगुणेन वा।

शापाथर्वणमन्त्रोत्थे विधिर्दैवव्यपाश्रयः।

ते ज्वराः केवलाः पूर्वं व्याप्यन्तेऽनन्तरं मलैः॥ १७१॥

तस्माद्दोषानुसारेण तेष्वाहारादि कल्पयेत्।

न हि ज्वरोऽनुबध्नाति मारुताद्यैर्विना कृतः॥ १७२॥

स०-शापाद्युत्थे ज्वरे दैवव्यपाश्रयो विधिः कार्यः। शापोमुनिपित्रादिभिः सक्रोधैर्दत्तः।

[ते-] ओषध्याद्युत्था ज्वराः पूर्वं केवला भवन्ति। अनन्तरं मलैः-वातादिभिः, व्याप्यन्ते। तस्माद्धेतोस्तेषु-ज्वरेषु, दोषानुसारेणाहारादि कल्पयेत्।

ननु, शापाद्युत्थेषु वातादिकोपो नाशङ्क्यत एव। तत्किमिति तेष्वाहारादिकं दोषानुसारेण कल्प्यते? इत्याह-न हीत्यादि। यस्माद्वातादीनन्तरेण विना कृतो ज्वरो नानुबध्नाति, तस्मादवश्यं तेष्वपि वातादिकोपः सम्भाव्यते। अत एव च तदनुसारेणाहारदिकल्पनम्।

आ० र०- शापजाभिचारजयोरौषधमाह-शापाथवर्णमन्त्रोत्थ इति। .....वङ्गसेने तु (ज्वर. श्लो. ५४१)-"औषधीगन्ध[विषजौ विषपित्तप्रबाधनैः। जयेत्कषायैर्मतिमान् सर्वगन्धकृतैर्भिषक्॥]" इति। इत्यागन्तुज्वरः।

अथ धातुज्वरः। [सङ्ग्रहे तु (चि. अ. २)-] "रससंस्थे तु सर्वस्मिन् कुर्याद्वमनलङ्घने। सेकसंशमनालेपरक्तमोक्षानसृक्स्थिते॥ तीक्ष्णान् विरेकान् मांसस्थे मेदोघ्नं मेदसि स्थिते। अस्थिस्थे वातशमनमभ्यङ्गस्वेदमर्द्दम्॥ ज्वरे वातार्तिशमनं विशेषाद्बस्तिकर्म च।" इति।

ज्वरकालस्मृतिं चास्य हारिभिर्विषयैर्हरेत्।

स०-ज्वरकालं च वेगं च यश्चिन्तयन् ज्वर्यते, अस्य चज्वरिणो, ज्वरकालस्मरणं हारिभिः-मनोहरैः, विषयैः-शब्दादिभिः, हरेत्-विस्मारयेत्।

आ० र०- अथ सर्वज्वरसाधारणानि। तत्र मनोहरसेवामाह-ज्वरकालस्मृतिमिति। ज्वरकालो-ज्वरवेगकालः, तस्य स्मृतिः-अस्मिन्काल आधत्ता इति स्मरणम्।

करुणार्द्रं मनः शुद्धं सर्वज्वरविनाशनम्॥ १७३॥

स०-शुद्धं-रागद्वेषाद्यनुपहतं, तथा करुणयाऽऽर्द्रं-कृपापरं, चेतः सर्वज्वरविनाशनं स्यात्।

आ० र०- मनसः शुद्धत्वं करुणार्द्रत्वं चाह-करुणार्द्रमिति।

त्यजेदाबललाभाच्च व्यायामस्नानमैथुनम्।
गुर्वसात्म्यविदाह्यन्नं यच्चान्यज्ज्वरकारणम्॥ १७४॥

स०-बललाभादा-बललाभमवधीकृत्य, व्यायामादि त्यजेत्-नाचरेत्। स्नानं च यद्यपि दीपनादिगुणयुक्तं प्रागधीतं, तथाऽपि प्रभावज्ज्वरं करोतीति तद्वर्जनम्। एवं व्यायामादिष्वपिचिन्त्यम्। [अन्यत्]-अपरमनुक्तमपीह यज्ज्वरकारणं, तदपि त्यजेत्। खारणादेऽप्युक्तम्-"पिष्टान्नं हरितं शाकं मांसं शुष्कं तिलान् दधि। ग्राम्यानूपौदकाजाविगव्यसूकरभाहिषम्॥ मांसं शुष्काणि शाकानि सर्वमेव त्यजेज्ज्वरी।" तथोक्तम्-"ज्वरितै स्थित्तिरिक्रौञ्चशिखिवर्तककुक्कुटाः। गुरुष्णत्वाद्विवर्ज्याः स्युरत्र सोपद्रवे ज्वरे॥" इति।

आ० र०- व्यायामादिवर्जनमाह-त्यजेदिति।

न विज्वरोऽपि सहसा सर्वान्नीनो भवेत्तथा।

निवृत्तोऽपि ज्वरः शीघ्रं व्यापादयति दुर्बलम्॥ १७५॥

स०-तथा विज्वरोऽपि-पूर्वानुभूतज्वरः, सहसा-अक्रमेणैव, सर्वान्नभक्षो न स्यात्। सर्वान्नीन इत्युपपदसर्वान्नेत्यादिना खः। यतो निवृत्तोऽपि-अपगतोऽपि, ज्वरः शीघ्रमेव दुर्बलं व्यापादयति।

आ० र०- सहसाऽऽहारवृद्दिं निषेधति-न विज्वरोऽपीति। सर्वान्नमतीति सर्वान्नीनः।

निषेधातिक्रमे दोषमाह-निवृत्तोऽपीति।

सद्यः प्राणहरो यस्मात्तस्मात्तस्य विशेषतः।

तस्यां तस्यामवस्थायां तत्तत्कुर्याद्भीषग्जितम्॥ १७६॥

स०-यस्माच्च ज्वरः सद्य एव प्राणहृद्भवति, तस्मात्कारणात्तस्य-ज्वरिणो, विशेषेणान्यरोगेभ्यः सकाशात्तस्यां तस्यांसामपच्यमानपक्वाजीर्णविषमचिरनिवृत्तज्वराद्यवस्थायां च, तत्तत्-लङ्घनस्वेदनयवागूपाचनक्षीरसर्पिःपानादिकं, भिषग्जितं-औषधं, कुर्यात्।

आ० र०- ज्वरचिकित्सायामादरं विधत्ते-सद्यः प्राणहर इति।

औषधयो मणयश्च सुमन्त्राः

साधुगुरुद्विजदैवतपूजाः।

प्रीतिकरा मनसो विषयाश्च

घ्नन्त्यपि विष्णुकृतं ज्वरमुग्रम्॥ १७७॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचिता यामष्टाङ्गहृदयसंहितायां चतुर्थे चितित्सितस्थाने ज्वरचिकित्सितं नाम प्रथमोऽध्यायः॥१॥

स०-ओषध्यादयो विष्णुकृतमप्युग्रं ज्वरं घ्नान्ति। किं पुनरपचारादिकृतं ज्वरं न घ्नान्ति ? इत्यपिशब्दार्थः। भौ तु भागाविति दोधकमेतत्।

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टाङ्गहृदयटी-कायां सर्वाङ्गसुन्दराख्यायां चतुर्थे चिकित्सितस्थाने ज्वरचिकित्सितं नाम प्रथमोऽध्यायः समाप्तः॥१॥

आ० र०- सिद्दौषधादिधारणमाह-औषधय इति। सङ्ग्रहे तु (चि.अ. २)-"कृत्या त्रिवर्गसंयुक्ता रुड्निद्रादिविनोदिनी। शास्त्रं विचित्रं श्रृणुयान्न प्रेतव्याधिताश्रयम्॥ मनोभिरामविषयं वचनं ह्लादि दक्षिणम्। मातरं पितरं देवान् वैद्यान् विप्रान् हरं हरिम्॥ पूजयेच्छीलयेद्दानदमसत्यदयार्जवान्। धारयेच्च शुचिर्मूर्ध्ना मणिरत्नमहौषधीः॥ आर्यावलोकितं पर्णशबरीमपराजिताम्। प्रणमेदार्यतारां च सर्वज्वरनिवृत्तये। जपंस्तथा गतोष्णीषं सर्वव्याधिचिकित्सितम्। आगन्तुदोषसहजैः सर्वरोगैर्विमुच्यते॥" इति॥

इति हेमाद्रिटीकायामायुर्वेदरसायने।
ज्वरप्रकरणं नाम समस्त्येन निरूपितम्॥१॥

****

द्वितिय़ोऽध्यायः।

ज्वरचिकित्सितादनन्तरं रक्तपित्तचिकित्सितमुच्यते। यतो महेश्वरस्य ललाटाज्जवरो बभूव, तत्सन्तापाद्रक्तपित्तमित्युक्तम्। अतो रक्तपित्तचिकित्सितस्यैवारम्भो युक्तः। यथा, निदाने यद्विशेषेण नोक्तं तदिह स्पष्टं कृत्वा निदानाभिप्रायमपि भण्यते, रक्तपित्तस्य क्षिप्रकारित्वात्।

अथातो रक्तपैत्तचिकित्सितक्ं व्याख्यास्यमः।

इति ह स्माहुरात्रेयादयो महर्षयः।

(गद्यसूत्रे॥२॥)

ऊर्ध्वगं बलिनोऽवेगमेकदोषानुगं नवम्।

रक्तपित्तं सुखे काले साधयेन्निरुपद्रवम्॥१॥

स०-बलिनो-बलवतः पुंसो न स्त्रियाः, यदुत्पन्नमूर्ध्वगं रक्तपित्तं तत्साधयेत्-उपक्रमेत्। तथा यदेवोर्ध्वगमवेगं-अवेगवत्, तथैको दोषः-कफाख्यः, अनुगः-अनुबलो, यस्य तदेकदोषानुगम्। निदानेऽप्युक्तम् (हृ.नि.अ.३/८)-"ऊर्ध्वं साध्यं कपाद्यस्मात्" इति। तथा नवं-अचिरोत्पन्नं, तथा यत्सुखे काले- तद्व्याधिप्रतिपक्षभूते हेमन्ते शिशिरे वा जातं, तथा यन्निरुपद्रवं-विकृतविज्ञानीयाध्याध्यायोक्तैः (हृ.शा.अ.५/७४) "रक्तपित्तंभृशं रक्तं" इत्यादिग्रन्थनिर्दिष्टैरुपद्रवै रहितम्। अतो लक्षणाद्यद्विपर्यलक्षणमूर्ध्वगमपि रक्तपित्तं तदर्थादसाध्यं याप्यं वा स्यादिति गम्यते।

आ० र०- अथ रक्तपित्तचिकित्सितम्। तत्र साध्यमाहऊर्ध्वमिति। अवोगं-वेगबाहुल्यरहितम्। सुखे-हेमन्तादौ।

अधोगं याप्ययेद्रक्तम् यच्चदोषद्वयानुगम्।

शान्तं शान्तं पुनः कुप्यन्मार्गान्मार्गान्तरं च यत्॥२॥

स०-अधोगं रक्तपित्तमूर्ध्वगरक्तपित्तोक्तैकदोषानुगादिविशेषणविषिष्टमपि यापयेत्। यच्च दोषद्वयानुगं-वातकफाभ्यां हीनबलाभ्यामनुगतमूर्ध्वगमपि, तच्च यापयेत्।

आ० र०- याप्यमाह-अधोगमिति, शान्तं शान्तमिति च। यत्-गच्छ्त्, इण् गतौ।

अतिप्रवृत्तं मन्दाग्नेस्त्रिदोषं द्विपथं त्यजेत्।

स०-शान्तं शान्तं-अतिशयेन शान्तं, पुनः कुप्यत्-कोपं गच्छत्, ऊर्ध्वगमेकदोषानुगमधोगं वा त्यजेत्। अथ मार्गात्-ऊर्ध्वात् नासाक्षिकर्णास्यलक्षणात्, मार्गान्तरं-गुदमेड्रलक्षणं, यत्-गच्छत्, एवं यत्प्रवृत्तं तच्च त्यजेत्। यदिति इणः शतरि इणो यणिति यादेशे यदिति रूपम्। अतिप्रवृत्तमूर्ध्वमार्गाधोमार्गाद्वा यद्रक्तपित्तं तत्त्यजेत्, रक्तस्य प्राणायतनत्वात्। उक्तं च-"जीवितं प्राणिनां तत्र रक्ते तिष्ठति तिष्ठति।" इति।

तथा, मन्दाग्नेर्यत्प्रवृत्तमधोगमूर्ध्वगं व तदपि विरुद्धोपक्रमत्वात्त्यजेत्। तथा हि,-मन्दाग्नेः कटुकाम्लोष्णरूक्षतीक्ष्णाद्यौषधमग्निसन्धुक्षणं यत्तद्धितम्, रक्तपित्ते चातो विपरीतप्रायं यत्तत्पथ्यम्। तथा, त्रिदोषमूर्ध्वगमधोगं वा तदपि त्यजेत्, विषमत्वात्। यतो न तद्वमनविषयं भवतुमर्हति नापि विरेचनविषयम्।

आ० र०- असाध्यमाह-अतिप्रवृत्तमिति। यत्रानुबन्ध्यपि पित्तं तद्धि (त्रि) दोषजम्। यत्र तु जनमेव तद्विदोष[ज] मेकदोषं (ष)[जं] वा। निदानोक्तानामपि साध्यादीनां पुनरुक्तिरपरिपूर्णपूरणाय। तत्र साध्यत्वे युक्तिरुक्ता, इह तु लक्षणमिति वा, पूर्वाचार्यातिविप्रकीर्णोक्तिप्रदर्शनं वा।

ज्ञात्वा निदानमयनं मलावनुबलौ बलम्॥३॥

देशकालाद्यवस्थां च रक्तपित्ते प्रयोजयेत्।

लङ्घनं बृंहणं वाऽऽदौ शोधनं शमनं तथा॥४॥

स०-निदानादि ज्ञात्वाऽनन्तरं रक्तपित्ते-ऊर्ध्वगेऽधोगे वा, आदौ-प्रथमत एव, लङ्घनं प्रयोजयेत्, अथवा बृंहणं, अथवा शोधनं शमनं वा। तत्र निदानं-तीक्ष्णोष्णकट्वम्लादिसेवनम्, एतज्ज्ञानं हि तन्निदानवर्जन उपयुज्यते। तथा च वक्ष्यति (श्लो.२४)-"यत्किञ्चित्कपित्तस्य निदानं तच्च वर्जयेत्।" इति। अयनं-ऊर्ध्वाधोलक्षणं ज्ञात्वा। तथा च वक्ष्यति (श्लो.८)- "रक्ते सपिच्छे सकफे ग्रथिते कण्ठमागगे। लिह्यान्माक्षिकसर्पिर्भ्यां क्षारमुत्पलनालजम्॥" इति। तथा (श्लो.४७)-"गुदागमे विशेषेण शोणिते वस्तिरिष्यते।" इत्यादि। तथा, पित्ताख्यस्य मलस्यात्र मूलभूतत्वात्सामर्थ्यात् मलौ-वातकफाख्यौ, अनुबलौ ज्ञात्वा चिकित्साविषेषं प्रयोजयेत्। तथा च वक्ष्यति (श्लो.३६)-"रक्तपित्तं न चेच्छाम्येत्तत्र वातोल्बणे पयः। युञ्जयाच्छागं" इत्यादि। तथा, बलं ज्ञात्वा। यतो वक्ष्यति (श्लो. १३)-"यथास्वं मन्थपेयादिः प्रयोज्यो रक्षता बलम्।" इति। देशो-द्विविधः शारीरो भूमिदेशश्च। तत्र शारीरो-मुखनासाद्यवयवरूपः। ऊर्ध्वगे हि रक्तपित्ते सत्यपि नासाप्रवृत्ते विशेषेणान्यदौषधमन्यप्रवृत्तेऽन्यत्। तथा, अधोगे रक्तपित्ते सत्यपि गुदप्रवृत्तेऽन्यदौषधं मेढ्रप्रवृत्ते चान्यत्। भूमिदेशश्च-त्रिविधोव्याख्यातो जाङ्गलानूपसाधारणभेदेन। तत्र जाङ्गलेऽन्यधौषधमनूपेऽन्यत् साधारणे चान्यत्। कालो-मुहूर्तादिः शीतोष्णवर्षलक्षण आवस्थिकश्च। तथा च शीते कालेऽन्यादृशमौषधमन्यस्मिन् कालेऽन्यादृषमौषधं रक्तपित्ते। आदिग्रहणेनानलाहा रसत्त्वसात्म्यवयःप्रकृतिप्रभृतयो गृह्यन्ते। अवस्थां च ज्ञात्वा अवस्थावशात्, रक्तपित्तस्य ह्यवस्थाविशेषेणान्यदौषधं स्यात्।

आ० र०- लङ्घनीयबृंहणीयशिधनीयशमनीय विभागमाह-ज्ञात्वेति। तत्र निदानज्ञानात् बृंहणोत्थे लङ्घनं लङ्घनोत्थे बृंहणम्। अयनज्ञानात् ऊर्ध्व लङ्घनमधोगे बृंहणम्। अनुबलमलज्ञानात् कफ़े वाते बृंहणम्। बलज्ञात् सम्पूर्णे बले लङ्घनमल्पे बृंहणम्। देशज्ञानात् अनूपे लङ्घनं जाङ्गले बृंहणम्। कालज्ञानात् विसर्गे लङ्घनमादाने बृंहणम्। आदिशब्दात् यौवने लङ्घनं वार्धके बृंहणमित्यादि। अवस्थाज्ञानात् अपके लङ्घनं पव्के बृंहणम्। पूर्वं शमनशोधनविभागो ज्ञेयः। आदौग्रहणात् लङ्घनानन्तरं बृंहणं बृंहणानन्तरं लङ्घनं च कार्यम्।

सन्तर्पणोत्थं बलिनो बहूदोषस्य साधयेत्।

ऊर्ध्वभागं विरेकेण वमनेन त्वधोगतम्॥५॥

शमनैर्बृंहणैश्चान्यल्लङ्घ्य बृंह्यानवेक्ष्य च।

स०-सन्तर्पणोत्थं बलिनो बहुदोषस्य नरस्य रक्तपित्तमूर्ध्वगं विरेकेण साधयेत्, अधोगतं तु वमनेन साधयेत्। अन्यतपतर्पणोत्थं रक्तपित्तं दुर्बलस्याल्पदोषस्योर्ध्वगं शमनैरधोगं बृंहणैरुपाचरेत्। बृंहणैर्वा शमनैः। न चेदं चिकित्सितं निरपेक्षं युञ्जीतेत्याह-लङ्घ्यबृंह्यानवेक्ष्य चेति। लङ्घनादुत्पन्नमधोगमपि शमनैरुपाचरेत्। बृंहणादुत्पन्नमूर्ध्वगमपि लङ्घनैरुपाचरेदित्यर्थः।

आ० र०- शोध्यत्वेऽपि वम्यविरेच्यविभागमाह-सन्तर्पणोत्थमिति। अधोगे वमनम्। ऊर्ध्वगे विरेचनम्। सन्तर्पणोत्थं इत्यत्र उभयत्र तुल्यम्।

शाम्यत्वेऽपि लङ्घनशाम्यबृंहणशाम्यविभागमाह- शमनैर्बृंहणैश्चेति। अन्यत्-अपतर्पणोत्थमल्पबलस्य चाल्पदोषस्यच। ऊर्ध्वगं लङ्घनशमनैस्तथा लङ्घ्ये पुरुषे सन्तर्पणोत्थत्वादित्रये सत्यपि बृंहणम्। बृंहे पुरुषे अतर्पणोत्थत्वादित्रये सत्यपि लङ्घनम्।

ऊर्ध्वं प्रवृत्ते शमनौ रसौ तिक्तकषायकौ॥६॥

उपवासश्च निःशुण्ठीषडङ्गोदकपायिनः।

स०-ऊर्ध्वं प्रवृत्ते रक्तपित्ते शुण्ठीरहितं षडङ्गोदकं पिबतः पुंसस्तिक्तकषायौ रसौ शमनम्। तथा, उपवासः।

आ० र०- शमनमाह-ऊर्वं प्रवृत्त इति। षडङ्गोदकं-"घनचन्दनशुण्ठ्यम्बुपर्पटोशीरसाधितम्।" (हृ. चि. अ. १११५) इति ज्वरोक्तम्, तच्चात्र शुण्ठीं विना कार्यम्।

अधोगे रक्तपित्ते तु बृंहणौ मधुरो रसः॥७॥

स०-अधोगे तु रक्तपित्ते बृंहणौ मधुरो रसो हितः।

आ० र०- बृंहणमाह-अधोगे रक्तपित्त इति।

ऊर्ध्वगे तर्पणं योज्यं प्राक् च पेया त्वधोगते।

स०-ऊर्ध्वगे रक्तपित्ते प्राक्-पूर्वं, तर्पणं योज्यम्, तथासात्म्यत्वात्। एवमधोगे रक्तपित्ते प्राक् पेया योज्या।

आ० र०- ऊर्ध्वगाधोगयोः पथ्यविभागमाह-ऊर्ध्वगे तर्पणमिति। ऊर्ध्वगे प्राक् तर्पणं पथ्यम्, अधोगे तु पेया शेषं ज्वरवत्।

आश्नतो बलिनोऽशुद्धं न धार्यं तद्धि रोगकृत्॥८॥

धारयेदन्यथा शीघ्रमग्निवच्चीघ्रकारि तत्।

स०-बलिनो नरस्याश्नतो रक्तमशुद्धं-दुष्टं, न धार्यं-न स्तम्भनीयम्। तद्धि घृतं सिराव्यधविध्युक्तान् विसर्पविद्रधिप्लीहादीन् रोगान् करोति। अन्यथा-विधिविपर्यये सति दुर्बलस्याभोजनस्य च, शीघ्रं धारयेत्। यस्मादग्निवच्छीघ्रं मरणकारि तत्-रक्तमस्तम्भितं, स्यात्।

आ० र०- अशुद्धस्य रक्तस्य स्तम्भनं निषेधति-अश्नत इति।

शुद्धस्य स्तम्भनं बिधते-धारयेदिति। अन्यथा-शुद्धत्वे, बलाशनयोरल्पयो-रशुद्धत्वेऽपि। तत्-अस्तम्भितं रक्तम्।

त्रिवृच्छ्यामाकषायेण कल्केन च सशर्करम्॥९॥

साधयेद्विधिवल्लेहं लिह्यात्पाणितलं ततः।

स०-त्रिवृता-शुक्लगोपीत्युच्यते। श्यामा-मालविका त्रिवृदुच्यते। तयोः कषायेण तथा तयोरेव [कल्केन] मात्रामाश्रित्यैतदुक्तम्। अत्र च कण्टकारिकालेहवत् (हृ.चि.अ.३१६२) क्वाथकल्कशर्कराणां परिमाणं वेद्यमिति वृद्धवैद्यव्यवहारः।

आ० र०- विरेचनमाह-त्रिवृच्छ्यामाकषायेणेति। कल्केनत्रिवृद्वयस्यैव। पाणितलं कर्षम्।

त्रिवृता त्रिफला श्यामा पिप्पली शर्करा मधु॥ १०॥

मोदकः सन्निपातोर्ध्वरक्तशोफज्वरापहः।

त्रिवृत्समसिता तद्वत् पिप्पलीपादसंयुता॥ ११॥

स०-तथा त्रिवृतादिभिर्मोदको-वटकः। शर्करापरिमाणं च पद्मकाद्यचूर्णवदवबोध्यम्। स च मोदकः सन्निपातोर्ध्वरक्तशोफज्वरहृद्भवति। पूर्वोक्तस्य लेहस्य विषयनिर्देशादेव विषयो वेद्यः। त्रिवृत्समसिता पिप्पलीपादसंयुता तद्वत्-सन्निपातादि हृदित्यर्थः।

आ० र०- स्विरेचनान्तरमाह-त्रिवृतेति। सन्निपातस्त्रिभिः सम्बध्यते।

विरेचनान्तरमाह-त्रिवृत्समसितेति। सङ्ग्रहे (चि. अ. ३)-" त्रिफ़लात्रिवृताधात्रीत्रायन्त्यारग्वधाभयाः। गवाक्षीक्षुरसक्षीरद्राक्षाः क्षौद्रसितोत्कटाः॥ यथास्वं कल्पबिहिता विरेकार्थं प्रयोजयेत्।" इति। त्रिफ़लादीनि दश विरेचनानि। प्रत्येकं मधुसितोत्कटानि। गवाक्षी-इन्द्रवारुणी।

एवमूर्ध्वगरक्तपित्तचिकित्सामुक्त्वा,अधोरक्तपित्तचिकित्सामाह-

वमनं फलसंयुक्तं तर्पणं ससितामधु।

ससितं वा जलं क्षौद्रयुक्तं वा मधुकोदकम्॥ १२॥

क्षीरं वा रसमिक्षोर्वा

स०-मदनफलेन संयुक्तं तर्पणं सितामधुभ्यां सह वमने देयम्, वातकोपभयादित्यभिप्रायः। अथवा सशर्करं फल संयुक्तं, [अथवा] मधुकोदकमथवा क्षौद्रसंयुक्तं, अथवा क्षीरं, अथवेक्षुरसम्। सर्वमेतत् मदनफलसंयुक्तं पृथक् प्रत्येकं देयम्।

आ० र०- वमनपञ्चकमाह-वमनं फ़लसंयुक्तमिति। पञ्चस्वपि मदनफ़लसंयोगः। सङ्ग्रहे तु (चि. अ. ३)-"फलेन्द्रयवगाङ्गेयीमधुकं वा समाक्षिकम्।" इति।

शुद्धस्यानन्तरो विधिः।

यथास्वं मन्थपेयादिः प्रयोज्यो रक्षता बलम्॥ १३॥

स०-ऊर्ध्व[ग]रक्तपित्तिनोऽधोगरक्तपित्तिनो वा यथाक्रमं विरेकवमनाभ्यां शुद्धस्यानन्तरं [यथास्वं-] यथायोगं यथाविधि, मन्थपेयादिः प्रयोक्तव्यः,-ऊर्ध्वगे मन्थादिरधोगे पेयादिरिति यथार्थः।

आ० र०- शुद्धस्य-शुद्धस्येति। अनन्तरः "ऊर्ध्वगे तर्पणं योज्यम्" (श्लो. ८) इत्यादि। बलंअग्निबलं देहबलं च।

मन्थो ज्वरोक्तो द्राक्षादिः, पित्तघ्नैर्वा फलैः कृतः।

स०-मन्थो ज्वरोक्तो द्राक्षादिः-"द्राक्षामधूकमधुक" (ह्र. चि. अ. १/५५) इत्यादिः। पित्तघ्नैर्वा-द्राक्षामलककाश्मर्यमधुकादिभिः, फलैः कृतः प्रयोक्तव्यः।

आ० र०- मन्थमाह-मन्थो ज्वरोक्त इति। द्राक्षादिः-"द्राक्षामधूकमधुक" इत्यादिः।

मन्थान्तरमाह-पित्तन्घैर्वेति।

मधुखर्जूरमृद्वीकापरूषकसिताम्भसा॥ १४॥

मन्थो वा पञ्चसारेण सघृतैर्लाजसक्तुभिः।

दाडिमामलकाम्लो व मन्दाग्न्यम्लाभिलाषिणाम्॥

स०-अथवा मध्वादिना द्रव्यपञ्चकेन कृतेन पञ्चसाराख्येन लाजसक्तुभिः ससर्पिष्कैर्मन्थो हितः। मन्दाग्नीनामम्लाभिलाषिणां च दाडिमामलकाभ्यामम्लश्च मन्थः प्रयोक्तव्यः।

आ० र०- मन्थान्तरमाह-मधुखर्जूरेति। पञ्च मध्वादीनि साराण्यत्रेति पञ्चसारम्, संज्ञा चेयम्।

मन्थान्तरमाह-दाडीमामलकाम्लो वेति। दाडिमामलकरसयोगादम्लः।

'अधोगे प्राक्पेया प्रयोज्या' इत्युक्तम्। अतस्ता एव पेया ब्रूते-

कमलोत्पलकिञ्जल्कपृश्निपर्णीप्रियङ्गुकाः।

उशीरं शाबरं रोध्रं शृङ्गबेरं कुचन्दनम्॥ १६॥

हीवेरं धातकीपुष्पं बिल्वमध्यं दुरालभा।

अर्धार्धैर्विहिताः पेया वक्ष्यन्ते पादयौगिकाः॥ १७॥

भूनिम्बसेव्यजलदा मसूराः पृश्निपर्ण्यपि।

विदारिगन्धा मुद्गाश्च बला सर्पिर्हरेणुकाः॥ १८॥

स०-कमलोत्पलेत्यादिभिर्वर्गैरर्धश्लोकैः पेया विहिताः। पादयौगिका वक्ष्यन्ते। भूनिम्बसेव्येत्यादयः।

आ० र०- त्रिभिरर्धचैंस्तिस्रः पेया आह-कमलोत्पलेति। चतुर्भिः पादैश्चतस्रः पेया आह-भूनिम्बसेव्यजलदा इति। विदारिगन्धा-शालिपर्णी। हरेणुकाः-सतीनाः। सङ्ग्रहे त्वधिकाः पेयाः (चि. अ. ३)-"चन्दनाम्बुप्रियङ्गवः। तुवर्यो वाऽतिबलया बलया वा हरेणवः॥" इति।

जाङ्गलानि च मांसानि शीतवीर्याणि साधयेत्।

पृथकपृथग्जले तेषां यवागूः कल्पयेद्रसे॥ १९॥

शीताः सशर्कराक्षौद्रास्तद्वन्मांसरसानपि।

ईषदम्लाननम्लान् वा घृतभृष्टान् सशर्करान्॥ २०॥

स०-मांसानि जाङ्गलानि शीतवीर्याणी-शशादिसबन्धीनि, पूर्वोक्तपेयौषधानां पृथक्पृथग्जले साधयेत्। अनन्तरं तस्मिन् रसे यवागूः कल्पयेत्। कीदृशीः ? शीतास्तथा सशर्कराक्षौद्राः। तद्वदित्यनेन शीतत्वं मांसरसानामतिदिशति, न तु सशर्कराक्षौद्रत्वमपि, अयोगार्हत्वात्। अत एवाह-तान् मांसरसान् ईषदम्लानम्लाभिलाषिणः, अनम्लाभिलाषिणोऽनम्लानेव। तथा, घृतभृष्टान् सशर्करान्-शर्करायुक्तान्।

आ० र०- उक्तानां पेयानां प्रकारान्तरमाह-जाङ्गलानि चेति तेषां-पेयौषधानां, जले-व्काथे। रसे-व्काथसिद्धमांसरसे।

मांसरसानाह-तद्वदिति। तद्वत्-पेयावत्, तण्डुलप्रक्षेपंविना। सङ्ग्रहे तु (चि. अ. ३) -"तत्कषाये हिताः पेयामांसपेयास्तथा रसाः। अनम्लाः किञ्चिदम्ला वा सघृतक्षौ द्रशर्कराः॥" इति।

शूकशिम्बीभवं धान्यं रक्ते शाकं च शस्यते।

अन्नस्वरूपविज्ञाने यदुक्तं लघु शीतलम्॥ २१॥

स०-तथा, शूकशिम्बीजं, धान्यं शाकं च रक्तपित्ते शस्यते। अन्नस्वरूपविज्ञानीयेऽध्याये (सू.अ. ६) यदुक्तं लघु च शीतलं च।

आ० र०- धान्यानि शाकानि चाह-शूकशिम्बीभवं धान्वमिति रक्ते-रक्तपित्ते।

पूर्वोक्तमम्बु पानीयं पञ्चमूलेन वा श्रृतम्।
लघुना श्रृतशीतं वा मध्वम्भो वा फलाम्बु वा॥ २२॥

स०-पूर्वोक्तमम्बु-षडङ्गं शुण्ठीरहितं, पानीयं-पातव्यम्। अथवा लघुना पञ्चमूलेन श्रृतम्। पानीयस्य श्रपणे तन्त्रकारैर्विधिरुक्तः। यथा-"कर्षं गृहीत्वा द्रव्यस्य क्काथयेत्प्रास्थिकेऽम्भसि। अर्धश्रृतं प्रयोक्तव्यं जलपाके त्वयं विधिः॥" इति। केवलं वा जलं श्रृतशीतं हितम्। मध्वम्भो-माक्षिकयुक्तं पानीयम्। फलाम्बु वा-द्राक्षाभिर्वा पित्तघ्नैः फलैः कृतम्।

आ० र०- तृषितस्य पानार्थमुदकमाह-पूर्वोक्तमम्बिति। पूर्वोक्तं-निःशुण्ठीषडङ्गोदकम्। लघुपञ्चमीलसिद्धं वा। श्रृतशीतं वा केवलम्। मधूदकं वा। फ़लोदकं वा फ़लानि-दाडिमादीनि च सारिवादिं च कल्पयेत्। अन्नपाने गणं तद्वद्दशकं दाहनाशनम्॥ कफ़ानुगे यूषशाकं मारुतानुगते रसम्। अभीरोरङ्कुरैर्लावाः सह मुद्गाः पटोलजैः। मकुष्ठा धन्वयासोत्थै रक्तपित्ते परं मताः।" इति।

शशः सवास्तुकः शस्तो विबन्धे

स०-शशः-शशस्य मांसं, सहवास्तुकेन विड्विबन्धे सति रक्तपित्तिनः शस्तः।

आ० र०- विबन्धे रसमाह-शशः सवास्तुक इति।

तित्तिरिः पुनः।
उदुम्बरस्य निर्यूहे साधितो मारुतेऽधिके॥ २३॥
प्लक्षस्य बर्हिणस्तद्वन्न्यग्रोधस्य च कुक्कुटः।

स०-तित्तिरिस्तु मारुतेऽधिक उदुम्बरस्य क्काथे साधितः शस्तः। प्लक्षस्य क्काथे साधितो बर्हिणो-मयूरः, तद्वत्-मारुतेऽधिके शस्तः। बर्हिण इति "फलबर्हाभ्यामिनच्।" तथैवन्यग्रोधस्य निर्यूहे कुक्कुटः शस्तः। उदुम्बरादिक्काथसाधनं तित्थिर्यादीनामौष्ण्यं प्रतिहन्तुम्।

आ० र०- मारुताधिके रसमाह-तित्तिरिः पुनरिति।

मारुता[धिके रसा] न्तरमाह-प्लक्षस्य बर्हिणस्तद्वदिति। बर्हिणो-मयूरः।

रसान्तरमाह-न्यग्रोधस्य च कुक्कुट इति। सङ्ग्रहे तु (चि. अ. ३) -"बिसोत्पलमृणालानां वर्तकक्ककरौ हितौ। वर्तीरोऽम्भोजनालानामश्वत्थस्य कपिञ्चलः॥" इति।

यत्किञ्चिद्रक्तपित्तस्य निदानं तच्च वर्जयेत्॥ २४॥

स०-यत्किञ्चिद्रक्तपित्तस्य कारणं-येन सेवितेन तज्जातं, तच्च वर्जयेत्-परिहरेत्।

आ० र०- वर्जनियमाह-यत्किञ्चिदिति।

वासारसेन फलनीमृद्वोध्राञ्जनमाक्षीकम्।
पित्तासृक् शमयेत्पीतं, निर्यासो वाऽटरूषकात्॥ २५॥
शर्करामधुसंयुक्तः केवलो वा, श्रृतोऽपि वा।
वृषः सद्यो जयत्यस्रं, स ह्यस्य परमौषधम्॥ २६॥

स०-वासकस्य रसेन फलिन्यादिकं पीतं रक्तपित्तं शमयति। अथवा, अटरूषकस्य रसः शर्करामधुयुक्तः पीतो रक्तपित्तं जयेत्। अथवा केवलो वासारसः। अथवा क्वथितो वृषः शीघ्रं रक्तं जयेत्। स वृषो यस्मादस्य-रक्तस्य, परमौषधम्।

आ० र०- शमनमाह-वासारसेनेति। फ़लिनी-प्रियङ्गुः। मृत्-सौराष्ट्री। अञ्जनं-रसाञ्जनम्। माक्षिकं-मधु।

[शमनान्तरमाह-निर्यास इति। निर्यासः-स्वरसः। स शर्करामधुसंयुक्तः केवलो वेति द्विविधः।]

शमनान्तरमाह-श्रृतोऽपि वा वृष इति। श्रुतोऽपि शर्करामधुसंयुक्तः केवलो वेति स्वरसवद्विविधः।

पटोलमालतीनिम्बचन्दनद्वयपद्मकम्।

रोध्रो वृषस्तन्दुलीयः कृष्णा मृन्मदयन्तिका॥२७॥

शतावरी गोपकन्या काकोल्यौ मधुयष्टिका।

रक्तपित्तहराः क्वाथास्त्रयः समधुशर्कराः॥२८॥

स०-पटोलादयोऽर्धश्लोकास्त्रयः क्वाथा मधुशर्करायुता रक्तपित्तं जयन्तीति योज्यम्। अत्र च वासक आर्द्रोऽपि द्विगुणो न योज्यः। एवं ह्युक्तं तन्त्रान्तरे- "वासाकुटजकूष्माण्डशतपुष्पासहाचराः। नित्यमार्द्राः प्रयोक्तव्यास्तथाऽपि द्विगुणा न ते॥" इति।

आ० र०- त्रिभिरर्धश्लैः क्वाथत्रयमाह-पटोलमालतीति। चन्दनद्वयं-श्वेतं रक्तं च। कृष्णा मृत्-कृष्णमृत्तिका। मदयन्तिका-यूथिका।

फलाशवल्कक्काथो वा सुशीतः शर्करान्वितः।

लिह्याद्वा मधुसर्पिभ्यां गवाश्वशकृतो रसम्॥२९॥

स०-अथवा पलाशत्वक्क्काथः शीतः शर्करायुतः पूर्वोक्तगुणः। अथवा मधुसर्पिभ्यां गवाश्वशकृतो रसं पिबेत्। गवाश्वेति "अवड् स्फोटायनस्य" इत्यवङादेशः।

आ० र०- क्काथान्तरमाह-पलाशवल्कव्काथो वेति। वल्कलं-त्वक्। लेहमाह-लेह्याद्वा मधुसर्पिर्भ्यामिति। शकृद्रसस्य पाकाद्घनीभावेन लेहत्वम्।

सक्षौद्रं ग्रथिते रक्ते लिह्यात्पारावताच्छकृत्।

स०-ग्रथिते-ग्रन्थिमति, रक्तपित्ते पारावतस्य शकृत् क्षौद्रेण सह लिह्यात्।

आ० र०- ग्रथिते रक्ते लेहमाह-सक्षौद्रमिति। ग्रथितंतन्तुलम्।

अतिनिः स्रुतरक्तश्च क्षौद्रेण रुधिरं पिबेत्॥३०॥

जाङ्गलं, भक्षयेद्वाऽऽजमामं पित्तयुतं यकृत्।

स०-अतिनिःस्रुतरक्तश्च जाङ्गलं रक्तं क्षौद्रेण सह पिबेत्। आजं यकृदपक्वं पित्तयुतं भक्षयेत्।

आ० र०- अतियोगे रुधिरमाह-अतिनिःसृतरक्तो वेति। जाङ्गलं-जाङ्गलवर्गीय-हरिणादिशरीरजम्।

अतियोगे यकृद्भक्षणमाह-भक्षयेद्वेति। अजस्य-छागस्येदमाजम्। आमं-अपक्वम्। आजेनैव पित्तेनैव पित्तेन युक्तम्।

चन्दनोशीरजलदलाजमुद्गकणायवैः॥ ३१॥
बलाजले पर्युषितैः कषायो रक्तपित्तहा।

स०-चन्दानादिभिर्बलाजले पर्युषितैः कषायो रक्तपित्तजित्।

आ० र०- अतियोगे शीतकषायमाह-चन्दनोशीरेति। बलाजले-बलाव्काथे।

प्रसादश्चन्दनाम्भोजसेव्यमृद्भष्टलोष्टजः॥ ३२॥
सुशीतः ससिताक्षौद्रः शोणितातिप्रवृत्तिजित्।

स०-चन्दनादिजः प्रसाद सुशीतः शर्करामाक्षिकाभ्यां सह रक्तस्यातिप्रवृत्तिं जयेत्।

आ० र०- अतियोगे शितकषायान्तरमाह-प्रसादेति। मृद्भष्टलोष्टं-पाकादग्निवर्णतां नीतं मृल्लोष्टम्।

आपोथ्य वा नवे कुम्भे प्लावयेदिक्षुगण्डिकाः॥ ३३॥
स्थितं तद्वुप्तमाकाशे रात्रिं प्रातः स्रुतं जलम्।
मधुमद्विकचाम्भोजकृतोत्तंसं च तद्गुणम्॥ ३४॥

स०-इक्षुगण्डिका आपोथ्य भृशमादौ सङ्कुट्य जले प्लावयेत्। नवे कुम्भे रात्रिमाकाशे गुप्तं-कीटाद्युपहतं यथा न स्यात्तथा. स्थितं तत्-इक्षुगण्डिकाजलं, प्रातः स्रुतं समाक्षिकं विकसितपद्मेन कृतशेखरं तद्गुणं-पूर्ववद्गुणमित्यर्थः।

आ० र०- अतियोगे शीतकषायान्तरमाह-अपोथ्य वेति। आपोथ्य-जर्जरीकृत्य। प्लवयेत्-नवकुम्भस्थे जले क्षिपेत्। अल्पत्वार्थं इक्षुगण्डिकाः-इक्षुखण्डानि। रात्रिमाकाशे स्थितंशिक्यालम्बनात्। गुत्पं-प्रकृतिकीटादिभ्यः। मधुमत्-क्षौद्रयुक्तम्। विक्कचाम्भोजकृतोत्तंसं-कुम्भकण्ठबद्धैरन्तःप्रविशद्भिरिव विकसितकमलईः सुरभीकृतम्। तद्गुणं-पूर्वौषधसमानम्।

ये च पित्तज्वरे चोक्ताः कषायास्तांश्च योजयेत्।

स०-पित्तज्वरे च ये कषाया उक्ताः-"शक्रयवाघनम्। कटुका चेति सक्षौद्रा" (ह्. चि. अ. ११५२) इत्यादयः, तांश्च-कषायान्, अत्र योजयेत्।

आ० र०- पित्तज्वरकषायानतिशति-ये चेति। सङ्ग्रहे तु (चि. अ. ३)-"वासारसेन भूनिम्बकटुकाशर्कराः पिबेत्। तेनैव वा क्षौद्रयुक्तं पद्मकेसरपद्मकम्॥ सरोध्रनागकुसुम-शाङ्गलोत्पलवास्तुकम्। शाङ्गलं-दूर्वा। पथ्यारजन्यहिंस्रा वा पलाण्डुं तद्वदेव वा॥ अहिंस्रा-कन्थारिभेदः। तद्वत्-मधुसर्पिर्भ्यां लिह्यात्। फ़लिनीलोध्रखदिरशाल्मलीकोदारजम्। शिरीषशेलुककुभसिन्दुवारातिमुक्तजम्॥ पलाशयूथिकाशिग्रुमधूकासनजन्म च। मधुनाचूर्णितं पुष्पमेकत्र पृथगेव वा॥ पुष्पैरेभिर्विपक्वं च सक्षौद्रं माहिषं घृतम्। लिह्यात् क्षौद्रेण पथ्यां वा किञ्चल्कं कमलस्य वा॥ लाजान् शृङ्गाटकं मुस्तं खर्जूरं कृष्णमृत्तिकाम्। क्षीरिवृक्षाङ्कुरान् द्राक्षां तवक्षीरिं सितोपलाम्॥ गैरिकं मधुकं शङ्खं शम्बूकमञ्जनम्। तण्डुलीयकमूलं वा बीजं वा वास्तुकोद्भवम्॥ रोध्रकालीयकोशीरफ़लिनीशङ्खगैरिकम्। पटोलपत्रं दूःस्पर्शा समङ्ग सारिवा लता॥ त्वग्जम्बूवेतसाश्वत्थहयाह्वोगुम्बरार्जुनात्। किराततिक्तक्रमुकमुस्तकट्फ़लपद्मकम्॥ प्रपौण्डरीकहीबेरकमलोत्पलपर्पटम्। चन्दनेन पृथग्युक्तं समस्तं वा सशर्करम्॥ फ़ाण्टीकृतं श्रृतं शीतं चूर्णं वा तण्डुलाम्भसा। पीतमाशुजयत्यस्रं तृड्दाहतमकानपि॥ तद्वदच्छः सितारोध्रमधूकोशीरचन्दनात्। मृच्छ्यामासारिवामुस्तुधातकीयष्टिकान्वितात्॥ अच्छः-प्रसादः। तद्वत्-चन्दनादिवत्। वैडूर्यमुक्तामृच्छङ्खगैरिकामललकोददकम्। मधूदकं रसं वेक्षोः पिबञ्जयति सोणितम्॥ त्रपुसीमूलकल्कं वा सक्षौद्रं तण्डुलाम्बुना। पिबेत्करञ्जबीजं वा तेन क्षौद्रसितायुतम्॥ रोध्रचन्दनयष्ट्याह्वं तेन यष्ट्याह्वमेव वा। नीलोत्पलं सिता यष्टी मधूकं पद्मकेसरम्॥ छिन्नोद्भवा च शीतोऽयं कषायो रक्तजित्परम्।" इति। वङ्गसेने तु (रक्तपित्ताधिकारे

श्लो ४८)-"तालीसचर्णयक्तः पेयः क्षौद्रेणवासकस्वरसः। कफ़पित्तश्वासव-मीतमकस्वरभेदरक्तपित्तहरः॥आटरूषकमृदीकापथ्याव्काथः सशर्करः। क्षौद्राढ्यः कसनश्वासरक्तपित्तनिबर्हणः॥शतावरी बला राम्ना काश्मर्यं सपरूषकम्। पाययेद्रक्तपित्तन्यं सद्यः शूलहरं परम्॥चन्दनेन्द्रयवाः पाठाकटुका सदुरालभा। गुडूची वासकं रोध्रं पिप्पलीक्षौद्रसंयुतम्। [कफ़ान्वितं जयेद्रक्तं तृष्णाकासज्वररापहम्॥] पिबेच्छीतकषायं वा जम्व्वाम्रार्जुनसम्भवम्। उदुम्बरफ़लानां वा रसं समधु पाययेत्॥अतसीकुसुमसमङ्गा वटप्ररोहत्वगम्भसा पीता। प्रशमयति रक्तपित्तं यदि भुङ्क्ते मुद्गयूषेण॥लोहगन्धिनि निःश्वासे उद्गारे धूमगन्धिनि। पृथ्वीकां शणमात्रां तु खादेद्विगुणशर्कराम्॥(श्लो. ४ ६)-" वासाकषायोत्पलमृत्प्रियङ्गुरोध्राञ्जनाम्भोरुहकेसराणि। पित्वासिताक्षौद्रयुतानि हन्यात्पित्तासृजो वेगमुदीर्णमाशु॥वासायां विद्यमानायामाशायां जीवितस्य च। रक्तपित्ती क्षयी कासी किमर्थमवसीदति॥समाक्षिकः पद्मप(द)लोद्भवो वा पीतो रसः शोणितमाशु हन्ति॥(श्लो. ६९) -" पक्वोदुम्बरकाश्मर्यपथ्याखर्जूरगोस्तनाः। मधुना न्धन्ति संलीढ रक्तपित्तं पृथक् पृथक्॥ वासकस्वरसे पथ्या सत्पधा परिभाविता। कृष्णा वा मधुना लीढा रक्तपित्तं द्रुतं जयेत्॥(श्लो. ९३) -चन्दनं नलदं लोध्रमुशीरं पद्मकेसरम्। नागपुष्पं च बिल्वं च भद्रमुस्तं सशर्करम्॥हीबेरं चैव पाठा च कुटजस्य फ़लं त्वचम्। श्रृचम्। श्रृङ्गबेरं सातिविषं धातकी च रसाञ्जनम्॥आम्रास्थि जम्बुसारास्थि तथा मोचरसोऽपि च। नीलोत्पलं समङ्गा च सूक्ष्मैला दाडिमत्वचम्॥ चतुर्विंशतिरेतानि समभागानि कारयेत्। तण्डुलोदकसंयुक्तं क्षौद्रेण योजयेत्। हितं लोहितपित्तानामर्शः सुज्वरितेषु च। मूर्च्छतमोपसृष्टानां तृषार्तानां च दापयेत्॥[अतीसारं तथा छर्दिः स्त्रीणां च रजसो ग्रहम्।] चलितानां च गर्भाणां स्तम्भनं परमुच्यते। अश्विभ्यां विहितो यूगोरक्तपित्तविनाशनः॥" इति। जम्बूसारा-राजजम्बूः। इति नवरक्तपित्तम्।

कषायैर्विविधैरेभिर्दीप्तेऽग्नौ विजिते कफे॥३५॥

रक्तपित्तं न चेच्छाम्येत्तत्र वातोल्बणे पयः।

युञ्जयाच्छागं श्रृतं, तद्वद्व्यं पञ्चगुणेऽम्भसि॥३६॥

पञ्चमूलेन लघुना श्रृतं वा ससितामधु।

जीवकर्षभकद्राक्षाबलागोक्षुरनागरैः॥३७॥

पृथक्पृथक्श्रृतं क्षीरं सघृतं सितयाऽथवा।

स०-एभिर्विविधैः-नानाप्रकारैः कषायैः, अग्नौ दीप्ते कफे च विजिते सति यदि रक्तपित्तं न शाम्यति, तदा तत्र वातोल्बणे रक्तपित्ते सति पञ्चगुणेऽम्भसि श्रृतं छागं पयो युञ्जयात्। पञ्चगुणेऽम्भसि गव्यं क्षीरं क्थितं तद्वत्-तेन छागेन समानगुणं, तच्च युञ्जयात्। अथवा लघुना पञ्चमूलेन श्रृतं गव्यं सशर्करामधु तद्गुणम्। तथा, जीवकर्षभकादिभिः पृथक् पृथक् श्रृतं सह घृतेनाथवा शर्करया सह तद्गुणम्।

आ० र०- अथ जीर्णरक्तपित्तम्। तत्र छागक्षीरप्रयोगमाह-कषायैर्विविधैरिति।

गव्यक्षीरमाह-तद्वद्गव्यमिति। तद्वत्-"अल्पाम्बुपानव्यायामकटुतिक्ताशनैः " (हृ. सू. अ. ५१२४) इत्युक्तहेतुमत्। पञ्चगुणेऽम्भसि श्रृतम्।

क्षीरान्तरमाह-पञ्चमूलेनेति क्षीरान्तरमाह-जीवकर्षभकेति।

गोकण्टकाभीरुश्रृतं पर्णिनीभिस्तथा पयः॥३८॥

हन्त्याशु रक्तं सरुजं विशेषान्मूत्रमार्गगम्।

स०-गोकण्टकादिभिस्तथा [पर्णिनीभिः-] शालिपर्णीपृश्निपर्णीमुद्गपर्णीमाषपर्णीभिः, श्रृतं शीघ्रमेव रक्तं सवेदनं हन्ति। विशेषेण मूत्रमार्गगतम्। विषेषग्रहणादन्यमार्गगमपि रक्तं हन्तीति द्योतयति।

आ० र०- मूत्रमार्गगे क्षीरमाह-गोकण्टकाभीरुश्रृतमिति।

विण्मार्गगे विशेषेण हितं मोचरसेन तु॥३९॥

वटप्ररोहैः शुङ्गैर्वा शुण्ठ्युदीच्योत्पलैरपि।

स०-विण्मार्गगे-गुदगते, रक्तपित्ते तु विशेषेण मोचरसेन शृतं क्षीरं हितम्। वटप्ररोहैर्वा शृतं क्षीरं, अथवा वटशुङ्गैः-प्रथमोद्भूतमुकुलितैः पल्लवप्रायैः, शुण्ठ्युदीच्योत्पलैर्वा शृतं पयो हितम्।

आ० र०- गुदप्रवृत्ते क्षीरचतुष्टयमाह-विण्मार्गगे विशेषेणेति। मोचरसः-शाल्मलीनार्यासः। शृ(शु) ङ्गैः-वटशृ(शु)ङैः। मुकुलावस्थं पत्रं-शृ(शु)ङ्गः।

रक्तातिसारदुर्नामचिकित्सां चात्र कल्पयेत्॥४०॥

स०-रक्तशब्दस्यातिसारदुर्नाम्नोः सम्बन्धः। रक्तातिसारस्य रक्तार्शसश्च, या चिकित्सा तामत्र-रक्ते, योजयेत्।

आ० र०- रक्तातिसाररक्तार्शश्चिकित्सामतिदिशति-रक्तातिसारेति।

पीत्वा कषायान् पयसा भुञ्जीत पयसैव च।

स०-कषायान्-पूर्वोक्तान्, पयसा पीत्वा पयसैवाश्नियात्।

आ० र०- पूर्वोक्तकषायान् सपयस्कानाह-पीत्वा कषायानिति।

कषाययोगैरेभिर्वा विपक्वं पाययेद्धृतम्॥४१॥

स०-एतैर्वा कषायाख्यैर्योगैर्विपक्वं घृतं रक्तपित्तिनं पाययेत्।

आ० र०- पूर्वोक्तकषायसिद्धानि घृतान्याह-कषाययोगैरिति।

समूलमस्तकं क्षुण्णं वृषमष्टगुणेऽम्भसि।

पक्त्वाऽष्टांशावशेषेण घृतं तेन विपाचयेत्॥४२॥

तत्पुष्पगर्भं तच्छीतं सक्षौद्रं पित्तशोणितम्।

पित्तगुल्मज्वरश्वासकासहृद्रोगकामलाः॥४३॥

तिमिरभ्रमवीसर्पस्वरसादांश्च नाशयेत्।

स०-मूलपल्लवादियुक्तं क्षुण्णं-चूर्णितं, वृषमष्टगुणे जले पक्त्वा तेन-आष्टाशावशेषेण क्वाथेन, घृतं विपाचयेत्। किम्भूतम्? तत्पुष्पगर्भम्। तस्य-वृषस्य, पुष्पाणी गर्भः-कल्को, यस्य तदेवम्। तच्च शीतिभूतं क्षौद्रेण सह पित्तशोणितादीन्नाशयेत्।

आ० र०- वासाघृतमाह-समूलमस्तकमिति। [सिद्धसारे रक्तपित्ताधिकारे श्लो. ४८]-"शतवर्यादिके चाज्ये शर्करामधु पादिकम्। मध्वेव पादिकं श्रेयो वासासर्पिषि सम्मतम्॥" इति। वङ्गसेने तु (रक्तपित्ताधिकारे)-"वृषस्य पत्राङ्कुरपुष्पशाखाकषायकल्केन घृतं विपक्वम्। समाक्षिकं क्षोणकफ़े प्रयुक्तं तद्रक्तपित्तं शमयत्युदीर्णम्॥(श्लो. १२६)-वासकस्वरसे सर्पिः पयसा सह पाचयेत्। कल्कै र्भूनिम्बकुटजमुस्तयष्ट्याह्वचन्दनैः॥ उशीरमधुकानन्तासारिवोदीच्यपद्मकैः। त्रायन्त्युत्पलमूर्वाभिर्मदयन्त्याश्चपल्लवैः। सिताक्षौद्रयुतं हन्याद्रक्तपित्तं सुदारुणम्। पैत्तंकासं च गुल्मं च स्वरभेदं हलीमकम्॥ये चान्ये कीर्तितारोगा रक्तपित्तकफ़ाश्रयाः। तान् सर्वान् शमयेदेतत् पीयमानं हिताशिना॥अश्वगन्धापलशतं तदर्धं गोक्षुरस्य च। शतावरी विदारी च शालिपर्णी बलाऽमृता॥अश्वत्थस्य च शुङ्गानि पद्मबीजं पुनर्नवा। काश्मर्यस्य फ़लं चेव माशबीजं तथैव च॥पृथग्दश पलानेताश्चतुर्द्रोणेऽम्भसः पचेत्। द्रोणशेषे रसे तस्मिन् पुते शीते प्रदापयेत्॥मृद्वीका पद्मकं कुष्टं पिप्पली रक्तचन्दनम्। पत्रकं नागपुष्पं च आत्म गुप्ताफ़लं तथा॥नीलोत्पलं सारिवे द्वे जीवनीयान्यशेषतः। पृथक्षर्षामा भागाः शर्करायाः पलद्वयम्॥रसः स्यात्पौण्ड्रकेक्षूणामाढकाकमाहरेत्। [चौर्गुणेन पयसा घप्रस्थं विपाचयेत्॥] रक्तपित्तं क्षतक्षीणं कामलां वातशोणितम्। हलीमकं पाण्डुरोगं वर्णभेदं स्वरक्षयम्॥मूत्रकृच्छ्रमुरोदाहं पार्श्वशूलं च नाशयेत्। एतद्राज्ञां प्रदातव्यं बह्वन्तःपुरचारिणाम्॥ स्त्रीणां चैवाप्रजातानां दुर्बलानां च देहिनाम्। श्रेष्ठं बलकरं धन्यं हृद्यं वृष्यं रसायनम्॥ ओजस्तेजस्करं स्वर्यमायुष्यं प्राणवर्धनम्। संवर्धयति शुष्कं च पुरुषं दुर्बलेन्द्रियम्॥

सर्वरोगविनिर्मुक्तस्तोयसोक्तो यथा द्रुमः।कामदेवमिति ख्यातं सर्पिरुक्तं महागुणम्॥ (श्लो.९९)-दूर्वासोत्पलकिञ्जल्का मञ्जिष्ठा सैलवालुका। सितासितमुशीरं च मुस्तचन्दनपद्मकम्॥ विपचेत्कार्षिकैरेतैः सर्पिराजं सुखाग्निना। तण्डुलाम्बुत्वजाक्षीरं दत्वा चैव चतुर्गुणम्॥ [द्राक्षायश्ग्ट्याह्वधुककाश्मरीचन्दनं सितम्। पिष्ट्वा तत्कार्षिकैर्द्रव्यैर्घृतप्रस्थं वोप्चयेत्॥] तत्पानं वमतो रक्तं नावनं नासिकागते। कर्णभ्यां यस्य गच्छेच्च तस्य कर्णौ प्रपूरयेत्॥ चक्षुःस्त्राविणि रक्ते च पूरत्तेन चक्षुषी। मेढ्रपायुप्रवृत्ते च बस्तिकर्मणि तद्धितम्॥ रोमकूपप्रवृत्ते च तदभ्यङ्गे प्रयोजयेत्। पित्तजेषु विकारेषु विस्फ़ोटादिषु बुद्धिमान्॥ विषेषु कीटदोषेषु विसर्पेषु प्रयोजयेत्। [रक्तस्त्रावीणि चार्शांसि लेपयेत्तेन सर्पिषा॥] दूर्वा सेन्दीवरी पद्मं मञ्जिष्ठासैलवालिका। राला मुस्ता तथोशीरं चन्दनं मधुकाह्वयम्॥ पद्मकं रोध्रकुष्ठं च चन्दनं रजनीद्वयम्। काकोल्यौ सारिवा चेति कल्कैरेतैश्च कार्षिकैः॥ घृतप्रस्थमजाक्षीरं तण्डुलोदकसंयुतम्। दूर्वायाः स्वरसेनैव साधितं पुर्ववद्गुणम्॥ न्यग्रोधोदुम्बराश्वत्थशुङ्गान्यापोथ्य वासयेत्। अहोरात्रं जले तत्पे घृतं तेनाम्भसा पचेत्॥ तदर्धशर्करायुक्तं लेहयेत्क्षौद्रपादिकम्। अधो वा यदि वाऽप्यूर्ध्वं रक्तं यस्य प्रवर्तते। सुखं भवति तस्याशु अग्निवेशवचो यथा॥ शतावरीदाडीमतित्तिडीकं काकोलि मेदे मधुकं विदारीम्। पिष्ट्वा च मूलं फ़लपुरकस्य घृतं पचेत् क्षीरचतुर्गुणं च। कासज्वरानाहविबन्धशूलं तद्रक्तपित्तं च घृतं निहन्ति॥ शतावर्यास्तु मूलानां रसप्रस्थद्वयं मतम्। तत्समं च बवेत्क्षीरं घृतप्रस्थं विपाचयेत्॥ जीवकर्षभकौ मेदा महामेदा तथिव च। काकोली क्षीरकाकोली मृद्वीका मधुकं तथा॥ मुद्गपर्णी माषपर्णी विदारी रक्तचन्दनम्। शर्करामधुसंयुक्तं सिद्धं विस्त्रावयेत् घृतम्॥ रक्तपित्तविकारेषु वातरक्तगदेषु च। क्षीणशुक्रेषु दातव्यं वाजीकरणमुत्तमम्॥ अङ्गदाहं शिरोदाहं ज्वरपित्तसमुद्भवम्। योनिशूलं च दाहं च मूत्रकृच्छ्रं च पैत्तिकम्॥ एतान् रोगान्निहन्त्याशु छिन्नाभ्रमिव मारुतः। शतावरीसर्पिरिदं बलवर्णाग्निवर्धनम्॥ [शतावर्यादिके चाज्ये शर्करामधु पादिकम्॥] (श्लो. १४१)-अनन्ता सारिवा पद्मं सलोध्रं नीलमुत्पलम्। कल्कैरेभिः पचेत्सार्पिः सक्षीरं नावनं परम्॥ रक्तपित्तं प्रशमयेन्नारीणां प्रदरं तथा। हस्तापादाङ्गदाहेषु ज्वरे रक्ते तत्थोर्ध्वगे। वासाघृतं शतावर्या सितया परमं हितम्॥ दूर्वामधुकमञ्जिष्ठाद्राक्षेक्षुरसचन्दनैः। सारिवाद्वयनक्ताह्वैस्तैलप्रस्थं विपाचयेत्॥ क्षीरं चतुर्गुणं दत्वा सिद्धमभ्यञ्जनं भवेत्। रक्तपित्तहरं ह्येतद्वल्यं वातन्धमुत्तमम्। दूर्वातैलमिति ख्यातं सवर्णकरणं महत्॥ (श्लो. १६७)- तुलामादय वासायाः पचेदष्टगुणे जले। तेन पादावशेषेण पाचयेदाढकं भिषक्॥ चूर्णानामभयानां तु खण्डाच्छुद्धाच्छतं तथा। द्विपलं पिप्पलीचूर्णात्सिद्धशीते च माक्षिकात्॥ कुडवं पलमानं च चातुर्जातं सुचूर्णितम्। क्षिप्त्वा लिलोडितं खादेद्रक्तत्ती यथाबलम्। कासश्वासगृहीतश्च यक्ष्मण च प्रपीडितः॥ लोहाच्चतुर्गुणं क्षीरमाज्यं द्विगुणमुत्तमम्। चुर्णपादं च वैडङ्गं दद्यान्मधुसिते समे॥ सर्वमेकत्र प्रक्षिप्य पात्रे ताम्रमये दृढे। पाकमानीय तत्वेन स्थापयेत् घृतभाजने॥

माषकादिक्रणादौ बक्षयेद्विधिपूर्वकम्। अनुपानं प्रयुञ्जीत नालिकेरजलादिकम्॥ रक्तपित्तं जयेर्रीव्रमसृपित्तं क्षतं क्षयम्। पिष्टिदं कान्तिजननमायुष्यं वृष्यमुत्तमम्॥ (श्लो. १९३) शतावरी छिन्नरुहा वृषमुण्डितिका बला। तालमूली च गात्यत्री त्रिफ़लायास्त्वचस्तथा॥ भार्गी पुष्करमूलं च पृथक् पञ्च पलानि च। जलद्रोणे विपक्तव्यमष्टभागावशेषितम्॥ दिव्यौषधिहतस्यापि माक्षिकेण हतस्य वा। पलद्वादशकं देयं रुक्मलोहस्य चूर्णितम्॥ खण्डतुल्यं घृतं देयं पलषोडकं बुद्धैः। पचेत्ताभ्रमये पात्रे गुडपाको मतो यथा॥ प्रस्थार्धं मधुनो देयं शुभाश्मजतुकं त्वचम्। शृभाश्मजतुकं त्वचम्। शृङ्गी विडङ्गं कृष्णा च शुण्ठ्याजाजी पलं पलम्॥ त्रिफ़ला धान्यकं पत्रं व्यक्षं मरिचकेसरम्। चूर्णं दत्वा सुमथितं स्निग्धेभाण्डे निधापयेत्॥ यथाकालं प्रयुञ्जीत बिडलपदकं ततः गव्यक्षीरानुपनं च सेव्यं मांसरसं पयः॥ गुरुवृष्यान्नपानानि स्निग्धमत्स्यादि बृंहणम्। रक्तपित्तं प्रदुष्टं च क्षतकासं विशेषतः॥ वातरक्तं प्रमेहं च शीतपित्तं वमिं क्रमम्। श्वयथुं पाण्डुरोच कुष्ठं प्लीहोदरं तथा॥ आनाहं रक्तस्रावं च असृपित्तं निहन्ति च। चक्षुष्यं बृंहणं वृष्यं माङ्गल्यं प्रीतिवर्धनम्॥ आरोग्यं पुत्रदं श्रेष्ठं कायाग्निबलर्धनम्। श्रीकरं लाघवकरं खण्डखाद्यं प्रकीर्तितम्॥ छागं पारावतं मांसं तित्तिरिक्रकराः शशाः। कुलिङ्गाः कृष्णसारा ये तेषां मांसानि योजयेत्॥ नारिकेलपयः पानं सुनिषण्णकवास्तुकम्। शुष्कमूलकजीवाख्यं पडोलं पानं सुनिषण्णकवास्स्तुकम्। शुष्कमूलकजीवाख्यं पडोलं बृहतीफ़लम्॥ फ़लं वार्ताकपक्काम्रं खर्जूरं स्वादुदाडिमम्। ककारप्व्कं यच्च मासं चानूपसम्भवम्॥ वर्जनीयं विशेषण खण्डखाद्यं प्रकुर्वता। लोहान्तरवदत्रापि पुटनादिक्रियेष्यते। (श्लो. १६१) - पञ्चाशत्पलिकं स्विन्नं कूष्नाण्डं प्रस्थामाज्यतः। पक्वं पलशतं खण्डाद्वासाक्काथाढके पचेत्॥ शुभाधात्रीफ़हनैर्भार्गीत्रिसुगन्धैश्च कर्षिकैः। ऐलेयविश्वधान्याकमरिचैश्च पलांशकैः॥ पिप्पलीकुडवं चैव मधुमानीं प्रदापयेत्। कासं श्वा [सं क्षयं हिक्कां रक्तपित्तं हलीमकम्॥ हृद्रोगमसृपित्तं च पीनसं च व्यपोहति। युक्तसर्पिषि कूष्माण्दे पाको ब] न्धेन मुद्रया॥" इति।

पलाशवृन्तस्वरसे तद्वर्भं च घृतं पचेत्॥ ४४॥

सक्षौद्रं तच्च रक्तघ्नं, तथैव त्रायमाणया।

स०-पलाशवृन्तानां स्वरसे तद्वर्भं-पलाशवृन्तकल्कं, घृतं पचेत्। तच्च क्षौद्रेण सह रक्तघ्नं भवति। तद्वदेव त्रायमाणया श्रृतं रक्तपित्तघ्नम्।

आ० र०- पलाशघृतमाह-पलाशवृन्तस्वरस इति। वृन्तंपुष्पनालम्। तद्गर्भं-वृन्तकल्कगर्भम्।

त्रायमाणाघृतमाह-तथैवेति। तथैव-क्वाथकल्कीकृतया। सङ्ग्रहे तु (चि. अ. ३) -"क्षीरेण वपनीपुष्पं मधुकं मधुशर्करा। वपनी-कार्पासी। रोध्रोत्पल-समङ्गाभिस्तद्वद्वत्सकसाधितम्॥रोध्रादित्रयेण, वत्सकेनैकेन। तद्वत्-क्वाथकल्काब्यां घृतम्। लाजगोधूममधुकसिताचुर्णं पयोद्रुतम्। घृतेनोत्कारिकां कृत्वाखादेत्पित्तास्रवारिणीम्॥" इति। वङ्गसेने तु (रक्त. श्लो.६८)-"द्राक्षया फ़लिनीभिर्वा बलया मधुकेन वा। श्वदंष्ट्रया शतावर्य रक्तजित्साधितं पयः॥(श्लो. ६६)-सशर्करं माक्षिकसंप्रयुक्तं विदारिगन्धादिगणे श्रृतं वा॥ (श्लो.७४) - क्षीरेण लाक्षां मधुमिश्रितेन प्रपीय जीर्णे पयसाऽन्नमद्यात्। सद्योनिहन्याद्रुधिरं क्षतोत्थं कान्तार्जुनानामथवाऽपि कल्कम्॥कल्कं मधूकत्रिफ़लार्जुनानां निशि स्थितं लोहमये सुपात्रे। साज्यं विलिह्यानुपिबेत्सुशीतं सशर्करं छागपयः क्षुधार्तः॥पारावास्य मांसं वा घृतसिद्धं सशर्करम्। भक्षयेन्मधुनाशीतं रक्तपित्तनिवारणम्॥प्रायेणोपहताग्नित्वात्सपिच्छमतिसार्यते। प्राप्नोति वाऽऽस्यवैतस्यम् न चान्नमभिनन्दति॥नागरेन्द्रयवौ तत्र पातव्यौ तण्डुलाम्बुना। सिद्धां यवागूं जीर्णे च चाङ्गेरीत(प)त्रदाडिमैः॥" इति।

रक्ते सपिच्छे सकफे ग्रथिते कण्ठमार्गते॥४५॥

लिह्यान्माक्षिकसर्पिर्भ्यां क्षारमुत्पलनालजम्।

पृथक्पृथक् तथाऽम्भोजरेणुश्यामामधूकजम्॥४६॥

स०-रक्ते पिच्छावति, पिच्छा-शाल्मल्या रससदृशी, तथा सकफे, तथा ग्रथिते-ग्रन्थिसदृशे, तथा कण्ठमार्गगे सति, क्षारमुत्पलनालजं माक्षिकसर्पिर्भ्यां लिह्यात्। ननु, क्षारस्य तैक्ष्ण्यादिगुणयोगाद्रक्तपित्ते न युक्त उपयोगः। तत्कथमिह तमनुमेने तन्त्रकृत्? ब्रूमः। उत्पलादीनि शीतस्वभावानि। तत्समुत्थश्च क्षारः सयोनिमनुकरोति। तथा चोक्तम् (ह.शा.अ. ११४)- "कारणानुविधायित्वाकार्याणां तत्स्वभावता।" इति। क्षारस्वरूपं च विष्यन्दनात्मकं धत्ते। तदेवं कण्ठमार्गगस्य कफानुबन्धस्य ग्रथितस्य रक्तस्य क्षारो घृतमाक्षिकाभ्यां संयुक्तो विष्यन्दनपूर्वं शोधयत्येव, न तु तस्य कोपाय स्यादिति युक्तोऽत्र क्षारोपयोगः।

आ० र०- रक्तपित्तविशेषे क्षारचतुष्टयमाह-रक्ते सपिच्छ इति। अम्भोजरेणुः-पद्मकेसरम्। स्यामा-प्रियङ्गुः। सङ्ग्रहे तु (चि. अ. ३)-" मृणालाम्भोजकिञ्जल्कश्यामासनमधूकजम्। तद्वत्पञ्चत्थक्पृथक् क्षारं, घृतं क्षीरेण साधयेत्॥ पिष्टैरभीरुकाकोलीमेदावृक्षाम्लदाडिमैः। फ़लपूरकमूलेन विदार्या मधुकेन च॥ तद्विबन्धज्वरानाहशूलकासास्रपित्तजित्। पञ्चमूलैर्वा सिद्धमाद्यैस्तदर्थकृत्॥" इति।

अम्भोजरेण्वादिजं च पृथक् पृथक् तथा माक्षिकघृताभ्यां लिह्यात्।

गुदागमे विशेषेण शोणिते बस्तिरिष्यते।

स०-गुदागमे रक्ते विशेषेण बस्तिरिष्यते।

आ० र०- गुदप्रवृत्ते बस्तिमाह-गुदगम इति। सङ्ग्रहे तु (चि. अ. ३) -" मधूकाञ्जनमञ्जिश्ःठामेउणालोत्पलगैरिकैः। सुवर्णरोध्रकालीयसमङ्गम्च्राम्बुचन्दनैः॥ सौगब्धिकसिताशङ्खैः पिष्टैर्मधुवृतान्वितैः। क्षीरेणास्थापयेपयेदेवं स्नानं च शिशिराम्भसा॥ क्षीरेणैवाशयेच्छालींस्ततो मधुकसर्पिषा। कालेऽनुवासयेदेवमतीसारेऽपि दुस्तरे॥ जीर्णेऽसृक्प्रबले कुर्याद्विरेकेचातियोगिनि। विदार्यादिगणेनेष्टं श्रृतं वाऽऽस्थापने पयः॥ सक्षौद्रशर्करासर्पिः सर्पिश्चैवानिवासने। मूत्राशयस्थं शमयेद्रक्तमुत्तरबस्तिभिः॥ईदृशैरएव तद्वच्च प्रदरेऽपि विधिः स्मृतः। छेदभेदादिभिश्चातिप्रवृत्ते शुद्धशोणिते॥ विशेषात्प्रदरस्थोक्तं योनिरोगेषु चौषधम्।" इति।

घ्राणगे रुधिरे शुद्धे नावनं चानुषेचयेत्॥ ४७॥

कषाययोगान् पूर्वोक्तान् क्षीरेक्ष्वादिरसाप्लुतान्।

क्षीरादीन्ससितांस्तोयं केवलं वा जलं हितम्॥ ४८॥

रसो दाडिमपुष्पाणामाम्रास्थ्नः शाद्वलस्य वा।

----------॥ ४९॥

स०-घ्राणगे रुधिरे शुद्धे सति नावनमनुषेचयेत्-नस्यं दद्यात्। कषाययोगान् पूर्वोक्तान्-वासकादीन्, घाणगेऽनुषेचयेत्। किम्भूतान्? क्षीरेक्ष्वादिरसेनाप्लुतान्-सद्रवान्। आदिशब्देन मांसरसघृतादि गृह्यते। क्षीरादीन् वा सशर्करान् दद्यात्। तथा तोयमर्थात्ससितं, वा केवलं जलं हितमिति। तथा दाडिमपुष्पाणां रसः, तथा चूतफलास्थ्नः, तथा दूर्वाया रसो, नस्यं पृथक्पृथक् हितम्।

आ० र०- घ्राणप्रवृत्ते नस्यमाह-घ्राणगे रुधिर इति। क्षीरादीन् ससितानित्यन्यः प्रयोगः। त्प्यं ससितमित्यन्यः। केवलं वा जलमित्यन्यः। रसो दाडिमपुष्पाणामित्यन्यः। आम्रास्न्धो रस इत्यन्यः। शाङ्वलस्य रस इत्यन्यः।

कल्पयेच्छीतवर्गं च प्रदेहाभ्यञ्जनादिषु॥४९॥

स०-शीतवीर्यवर्गं च प्रलेपाभ्यञ्जनादिषु कल्पयेत्।

आ० र०- प्रदेहादीनाह-कल्पयेदिति।

यच्च पित्तज्वरे प्रोक्तं बहिरन्तश्च भेषजम्।

रक्तपित्ते हितं तच्च क्षतक्षीणे हितं च यत्॥५०॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचिता-यामष्टाङ्गहृदयसंहितायां चतुर्थे चिकित्सितस्थाने रक्तपित्तचिकित्सितं नाम द्वितीयोऽध्यायः॥२॥

स०-यच्च पित्तज्वरेऽभिहितमौषधं बहिरन्तरे, तच्च रक्तपित्ते हितम्। तथा, यच्च क्षते क्षीणे च हितं तदपि रक्तपित्ते हितमिति।

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टाङ्गहृदयटी-कायां सर्वाङ्गसुन्दरा-ख्यायां चतुर्थे चिकित्सितस्थाने रक्तपित्तचिकित्सितं नाम द्वितीया-ध्यायः समाप्तः॥२॥

आ० र०- पित्तज्वरौषधं क्षतक्षीणोषध च रक्तापित्तऽतिदिशति-यच्चेति। वङ्गसेने तु (रक्त. श्लो.८ १)-"नासाप्रवृत्तरुदिरं घृतभृष्टं श्लक्ष्णपिष्टमामलकम्। सेतुरिव तोयवेगं रुणद्धि मीर्न्धिप्रलेपेन॥ रसो दाडीमपुष्पस्य दूर्वारससमन्वितः। अलक्तकरसोपेस्रयं नासापुटे भिषक्॥ योजयेन्नाशयेत् क्षिप्रं त्रिदोषमपि दारुणम्। नासारक्तं प्रवृत्तं तु हन्यादिति किमद्भुतम्॥ दूर्वाभयादाडिमपुष्पकाणां लाक्षामलक्योः स्वरसेन नस्यम्। [दिनत्रयं यः कुरुते प्रभाते नासासृजं नाम रुजं निहन्ति॥ श्यामाश्वमोरटानन्ताशकराभिः श्रृतं घृतम्। सर्वदोश्ःअहरं हृद्यं नस्यं] नासागतेऽसृजि॥ अश्वः-अश्वकन्दः। दूर्वा भव्यफ़लं माषः कुलत्था वंशपत्रिकाः। जलस्थलोद्भवौ कर्णमोटकौ खरमञ्जरी॥ दण्डोत्पलस्य मूलं च निष्काथ्याष्टगुणेऽम्भसि। तत्पादशेषितं तैलं तुल्यं कृत्वा विपाचयेत्। तत्तैलं प्रतिमशैअ आनाहाख्यं गदंजयेत्॥" इति। इति नासारुधिरम्।

इति हेमाद्रिटीकायामायुर्वेदरसायने।

रक्तपित्तप्रकारणं सामस्त्येन निरूपितम्॥

****

तृतीयोऽध्यायः।

रक्तपित्तचिकित्सितादनन्तरं कासचिकित्सितस्यारम्भः। तस्य च सम्बन्धो निदाने स्वयं ग्रन्थकृतैवोक्तः।

अथातः कासचिकित्सितं व्याख्यास्यामः।

इति ह स्माहुरात्रेयादयो महर्षयः।

(गद्यसूत्रे॥२॥)

केवलानिलजं कासं स्नेहैरादावुपाचरेत्।

वातघ्नसिद्धैः स्निग्धैश्च पेयायूषरसादिभिः॥१॥

लेहैर्धूमैस्तथाऽभ्यङ्गस्वेदसेकावगाहनैः।

बस्तिभिर्वद्धविड्घातं, सपित्तं तूर्ध्वभक्तिकैः॥२॥

घृतैः क्षीरैश्च, सकफं जयेत्स्नेहविरेचनैः।

स०-केवलानिलजं कासं-दोषान्तरासंसृष्टं, स्नेहैः-वातघ्नसिद्धैः, आदावुपाचरेत्। ननु शुद्धस्य वातस्य स्नेहैरेव प्रधानोपक्रम आदिमध्यावसानेषु, न पुनरन्य उपक्रमः, तस्मादादावित्यनेन नार्थः। अत्रोच्यते। वातः केवलो दोषान्तरावृतमार्गः कासस्य कारणम्, न त्वनावृतमार्गः। तथा च काससम्प्राप्तावुक्तम् (हृ. नि. अ. ३११९)-तत्राधो विहतोऽनिलः। ऊर्ध्वप्रवृत्तः" इत्यादि। एवं वातस्य विहतौ यो दोषः कारणं कफादिः, तस्य रूक्षाद्युपक्रमेणैव शमं कृत्वाऽनन्तरं कासेन सहोपक्रममस्य भिषजः कुर्युरिति तेषां भान्तिनिरसाथमादावित्युक्तम्। तथा, पेयादिभिरुपाचरेत्। तथा, बद्धौ विड्घातौ यस्मिन्कासे तं बस्तिभिरुपाचरेत्। सपित्तं च वातकासमूर्ध्वभक्तिकैः-भक्तसमनन्तरं पीयमानैर्घृतैर्भोजयेत् क्षीरैश्च। ऊर्ध्वभक्तिकैरिति ऊर्ध्वभक्तादिभिः। मयुरव्यंसकादित्वात् समासः,

अध्यात्मादिग्वाठ्ठञ्। तथा, वातघन्सिद्धैरित्येष्वपि योज्यम्। तथा, सकफं वातकासं स्नेहविरेचनैरुपाचरेत्।

आ० र०- अथ कासचिकित्सितम्। तत्र शुद्धवातचिकित्सामाह-केवलानिलजं कासमिति। आदौद्रहणं जितेऽपि वते कासानुवृत्तौ रूक्षोपचारार्थम्। स्निग्धैरिति पेयादिबस्त्यन्तानां विशेषणम्। आदिशब्दात् बलकान्ति..... दे य त (?) बस्तिभिर्बद्धविडातमिति वचनात् पूर्वैर्बद्धविड्वातेम..... द्वातं च (?)।

पित्तानुबद्धवातकासचिकित्सामाह-सपित्तं त्विति। ऊर्ध्वभक्तिकैः-ऊर्ध्वं भोजनात् प्रयुक्तैः।

कफानुबद्धवातकासचिकित्सामाह-सकफमिति। स्नेहाः-एरण्डतैलादयः।

गुडूचीकण्टकारीभ्यां पृथक्त्रिंशत्पलाद्रसे॥ ३॥
प्रस्थः सिद्धो घृताद्वातकासनुद्वह्निदीपनः।

स०-गुडूच्याः कण्टकार्याश्च पृथक्-प्रत्येकं, त्रिंशल्पलं तस्माद्यो रसस्तस्मिन् घृतात् प्रस्थः सिद्धो वातकासादिजित्। तिस्रोऽपि पञ्चम्य एता अपेक्षितक्रियेऽपादाने बोध्याः।

आ० र०- स्नेहैरित्युक्तम्। तानेव नेहानाह। तत्र घृतमाह-गुडूचीकण्टकारीभ्यामिति।

क्षाररास्नावचाहिङ्गुपाठायष्ट्याह्वधान्यकैः॥ ४॥
द्विशाणैः सर्पिषः प्रस्थं पञ्चकोलयुतैः पचेत्।
दशमूलस्य निर्यूहे पीतो मण्डानुपायिना॥ ५॥
स कासश्वासहत्पार्श्वग्रहणीरोगगुल्मनुत्।

स०-क्षारादिभिः पञ्चकोलयुतैर्द्विशाणमात्रैः कल्कैर्दशमूलक्काथे सर्पिषः प्रस्थं पचेत्। स च-सर्पिःप्रस्थो, मण्डानुपायिना पीतः कासादिजित्।

आ० र०- घृतान्तरमाह-क्षाररस्नेति।

द्रोणेऽपां साधयेद्रास्नादशमूलशतावरीः॥६॥
पलोन्मिता द्विकुडवं कुलत्थं बदरं यवम्।
तुलार्धं चाजमांसस्य तेन साध्यं घृताढकम्॥७॥
समक्षीरं पलांशैश्च जीवनीयैः समीक्ष्य तत्।
प्रयुक्तं वातरोगेषु पाननावनबस्तिभिः॥८॥
पञ्चकासान् शिरःकम्पं योनिवङ्क्षणवेदनाम्।
सर्वाङ्गैकाङ्गरोगांश्च सप्लीहोर्ध्वानिलान् जयेत्॥९॥

स० --रास्नादीनि पलोन्मितानि कुलत्थबदरयवान् द्विकुडवोन्मितान् आजमांसस्य च पञ्चाशत्पलानि जलद्रोणे पाचयेत्। तेन क्काथेन घृताढकं साध्यं तुल्यक्षीरं पालिकैर्जीवनीयैः-जीवन्तीकाकोल्यादिभिः (ह्. सू. अ. १५१८), तद्धृतं समीक्ष्य देशकालादीनालोच्य, पानादिभिः प्रयुक्तं पञ्चकासादीन् जयति।

आ० र०- घृतान्तरमाह-द्रोणेऽपामिति।

विदार्यादिगणक्काथकल्कसिद्धं च कासजित्।

स० - -विदार्यादिगणस्य क्काथकल्काभ्यां च सिद्धं सर्पिः कासजित्।

आ० र०- घृतान्तरमाह-विदार्यादिगणेति। सङ्ग्रहे तु (चि. अ. ४) -"काश्मर्यत्रिफला-व्योषशठीद्राक्षापरूषकम्। द्वे पाठे देवदार्वर्द्धिस्वगुप्पाग्निकगोक्षुराः॥व्याघ्री तामलकी मेदा काकनासा शतवरी। विदारी च घृतप्रस्थः कर्षांशैस्तैर्विपचितः। क्षीरेण च जयत्याशु ज्वरकासहली मकान्। गुल्मारुचियकृतप्लीहशिरोहृत्पार्श्ववेदनाः॥कामलार्शोनिला-ष्ठीलाक्षतशोषक्षयांश्च सः॥" इति। अग्नि[क]ः- चित्रकः। वङ्गसेने तु (कासाधिकारे श्लो.१६) - "दशमूलिकषायेण भार्गीकल्कं घृतं पचेत्। दक्षतित्तिरिनिर्यूहे तत्परं वातकासनुत्॥ भार्गीकल्कं घृतं चाथ पचेद्दन्धि चतु र्गुणे। भार्गीरसं द्विगुणितं वातकासहरं परम्॥घृतं व्याद्रीकषायेण व्याद्रीकल्कं विपाचयेत्॥चतुर्गुणेन दन्धा च तत्परंवातकासजित्॥" इति। इति श्नेहाः।

अशोकबीजक्षवकजन्तुघ्नाञ्जनपद्मकैः॥१०॥

सबिडैश्च घृतं सिद्धं तच्चूर्णं वा घृतप्लुतम्।

लिह्यात्पयश्चानु पिबेदाजं कासातिपीडितः॥११॥

स० --अशोकबीजादिर्भिडसहितैर्घृतं सिद्धं कासजित्। तेषां वा-अशोकबीजादीनां, चूर्णं घृतप्लुतं लिह्यात्। अनु पश्चाच्च, छागं क्षीरं कासेनातिपीडितः पिबेत्।

आ० र०- त्लेहैरित्युक्तम्। तानेव लेहानाह। तत्राशोकबीजादिलेहमात्-अशोकबीजेति। चूर्णसिद्धं घृतं स्त्यानीभूतं लिह्यात्। चूर्णं वा घृतान्वितं लिह्यात्। उभयत्राजापयोऽनुपानम्।

विडङ्गं नागरं रास्ना पिप्पली हिङ्गु सैन्धवम्।

भर्गी क्षारश्च तच्चूर्णं पिबेद्वा घृतमात्रया॥१२॥

सकफेऽनिलजे कासे श्वासहिध्माहताग्निषु।

स० --अथवा विडङ्गादिचूर्णं घृतस्य मात्रया-यथायोगं ह्रस्वमध्योत्तमया, पिबेत् वातजे सकफे कासे श्वासादिषु च।

आ० र०-विडङ्गादिलेहमाह-विडङ्गमिति। पिबेद्वेतिलेहायोग्यस्य पानविधिः। "घृतं तु पित्तेऽब्यधिके लिह्याद्वातेऽधिके पिबेत्। लीढं निर्वापयेत्पित्तमल्पत्वाद्धन्ति नानलम्॥ आक्रमत्यनिलं पीतमूष्माणं निरुणद्धि च।" (श्लो.११०) इति लेहपानयोग्यताविवेजः।

दुरालभां शृङ्गबेरं शठीं द्राक्षां सितोपलाम्॥ १३॥
लिह्यात्कर्कटशृङ्गी च कासे तैलेन वातजे।

स० -दुरालभादीन् कर्कटाशृङ्गी च वातजे कासे तैलेन लिह्यात्।

आ० र० - दुरालभादिलेहमाह-दुरालभामिति।

दुस्पर्शां पिप्पलीं मुस्तां भार्गीं कर्कटकीं शठीम्॥ १४॥
पुराणगुडतैलाभ्यां चूर्णितान्यवलेहयेत्।
तद्वत्सकृष्णां शुण्ठीं च सभार्गीं तद्वदेव च॥ १५॥

स० - दुःस्पर्शादीनि चूर्णितानि वातजे कासे पुराणगुडतैलाभ्यामवेलहयेत्। तथैव पिप्पलीसहितां शुण्ठीं पुराणगुडतैलाभ्यां लिह्याट्। तद्वच्च पुराणतैलाभ्यां भार्गीसहितां शुण्ठीं लेहयेत्।

आ० र०- दुःस्पर्शादिलेहमाह-दुःस्पर्शामिति।
लेहद्वयमाह-तद्वत्सकृष्णामिति। तद्वत्-पुराणगुडतैलाभ्याम्।

पिबेच्च कृष्णं कोष्णेन सलिलेन ससैन्धवाम्।
मस्तुना ससितां शुण्ठीं दध्ना वा कणरेणुकाम्॥ १६॥

पिबेद्वदरमज्ज्ञो वा मदिरादधिमस्तुभिः।

अथवा पिप्पलीकल्कं घृतभृष्टं ससैन्धवम्॥ १७॥

स०-पिप्पलीं जलेन सैन्धवसहितां पिबेत्। मस्तुना सशर्करां शुण्ठीं वा पिबेत्। अथवा दध्ना युक्तां पिप्पलीरेणुकां पिबेत्। अथवा बदरमज्ज्ञो मदिरादिभिः पिबेत्। बहुवचनोपादानाच्च मदिरया अथवा दध्ना मस्तुना वेत्येवं द्रष्टव्यम्, न तु दध्नो मस्तिवति। पिप्पलीकल्कं वा घृतभृष्टं सैन्धवयुक्तं मदिरादिभिः पिबेत्।

आ० र०- उक्तलेहतुल्यगुणं पानपञ्चकाह। पिबेत्कृष्णांचेति। कणा च रेणुका च कणरेणुकम्। मज्ज्ञः-अस्थ्यन्तर्गतबीजानि। पिप्पलीकल्के जलमेव द्रवम्, "पेषणालोडने वारि" (हृ. क. अ. ६१२३) इति परिभाषबलात्। हारीतात्-"दुरालभा शठी क्षणा मधूकं सिताशर्करा। लीढं निहन्ति वतोत्थं कासं क्षौद्रेण योजितम्॥उभे मेदेतुगाक्षीरी पिप्पली सितशर्करा। लिह्यात्तैलं घृतत्तैलं घृतक्षौद्रैर्वात्कासनिवारणम्॥पद्मकं त्रिफला व्योषं विडङ्गं सुरदारु च। बला रास्ना च तुल्यानि सूक्ष्मचूर्णानि कारयेत्॥समं चूर्णैस्त्विमैः सर्वैः पृथक् क्षौद्रं घृतं सिताम्। लिह्याल्लेहं विमथ्यैतत्सर्वकासहरं शिवम्॥" इति।

कासी सपीनसो धूमं स्नैहिकं विधिना पिबेत्।

हिध्माश्वासोक्तधुमांश्च क्षीरमांसरसाशनः॥ १८॥

स०-कासी पीनसी च स्नैहिकं धूमं विधिना पिबेत्। क्षीरमांसरसाशनो हिध्मोक्ताण् श्वासोक्तांश्च धूमान् पिबेत्।

आ० र०- धूमैरीत्युक्तम्। तानेव धूमानाह। तत्र सपीनसे कासे धूममाह-कासी सपीनस इति। विधिना-धूमपानोक्तेन "शरावसम्पुटच्छिद्रे नाडीं न्यस्य दशाङ्गुलाम्। अष्टाङ्गुलां वा वक्रेण कासवान् धूममापिबेत्॥" (हृ. सू.अ. २११२१) इति। क्षीरेण मांसरसेन वा धूमे पीयमाने भोजनम्।

ग्राम्यानूपौदकैः शालियवगोधूमषष्टिकान्।

रसैर्माषात्मगुप्तानां यूषैर्वा भोजयेद्धितान्॥ १९॥

स०-ग्राम्यादिजैर्मासरसैरथवा माषात्मगुप्तानां यूषैः शाल्यादीन् हितानाशयेत्। हितानिति देशकालादिसात्म्यवशात् यवा (शाल्या) द्यन्यतमं यत् पथ्यं तद्भुञ्जीतेति प्रतिपादयति।

आ० र०-

यवानीपिप्पलीबिल्वमध्यनागरचित्रकैः।

रास्नाजाजीपृथक्पर्णीपलाशशठिपौष्करैः॥ २०॥

सिद्धां स्निग्धाम्लवणां पेयामनिलजे पिबेत्।

कटिहृत्पार्श्वकोष्ठार्तिश्वासहिध्माप्रणाशनीम्॥ २१॥

स०-यवान्यादिभिः सिद्धां स्निग्धामम्लवणां पेयां वातजेकासे पिबेत्। किम्भूताम्? कट्याद्यार्तिश्वासहिध्माप्रणाशनीम्।

आ० र०- त्यवान्यादिपेयामाह-यवानीपिप्पलीते। बिल्वफलस्य मध्यं-अन्तर्गतो भागः। यवान्यादीनां क्काथेन पेयाः।

दशमूलरसे तद्वत् पञ्चकोलगुडान्विताम्।

पिबेत्पेयां

स०-तद्वत्-पूर्वोक्तगुणाम्, दशमूलक्काथे सिद्धां पञ्चकोलगुडयुतां पेयां पिबेत्।

आ० र०- पेयान्तरमाह=दशमुलरस इति। रसः-व्काथः। पञ्चकोलचूर्णेन गुडेन च पानकाले योगः। तद्वत्-स्निग्धाम्ललवणां तद्गुणां च।

समतिलां क्षैरेयीं वा ससैन्धवाम्॥२२॥

स०-क्षैरेयीं-क्षीरसंस्कृतां वा पेयां, वातजे कासे पिबेत्। किम्भ्ताम्? समतिलां,-तिलसहितां। तथा, ससैन्धवाम्।

आ० र०- पेयान्तरमाह-समतिलामिति। तण्डुलसमास्तिलाः। क्षीरेण सिद्धा-क्षैरेयी।

मात्स्यकौक्कुटवाराहैर्मांसैर्वा साज्यसैन्धवाम्।

स०-अथवा मात्स्याद्यैर्मांसैः साधितां सघृतसैन्धवां पेयां पिबेत्।

आ० र०- पेयान्तरमाह-मात्स्यकौक्कुटवाराहैरिति। मांसैः-मांसरसैः, मांसग्रहणं प्राचुर्यार्थम्, अल्पेनोदकेन रसोग्रह्य इत्यर्थः। हारीते तु-"रसं कर्कटकानां वा घ्तभृष्टं सनागरम्। श्वासकासप्रशमनं श्रृङ्गीमत्स्यस्य वा पुनः॥" इति।कर्कटकः-कुलीरः। श्रृङ्गमत्स्यः-श्रृङ्गवान् मत्स्यः। रस एवायं सनागरः पेयः।

वास्तुको वायसीशाकं कासघ्नः सुनिषण्णकः॥२३॥
कण्टकार्याः फलं पत्रं बालं शुष्कं च मूलकम्।

स०-वास्तुकादयः शाकविशेषाः।

आ० र०- शाकान्याह-वास्तुक इति। वायसी-काकमाची। कासन्घः-कासमर्दः।

स्नेहास्तैलादयो

स०-तैलादयः स्नेहाः।

आ० र०- स्नेहानाह-स्नेहस्तैलादय इति।

भक्ष्याः क्षीरेक्षुरसगौडिकाः॥२४॥

स०-भक्ष्याः क्षीरादिसम्बन्धिनो हिताः। क्षीरं चेक्षुरसश्च गुडश्च, तेषामिमे क्षीरेक्षुरसगौडिकाः। "द्वन्द्वान्ते पदं यच्छ्रूयते तत्सर्वैः सम्बध्यते" इति भाष्यकारवचनात् सर्वैरप्यत्र सम्बन्धः। तेन क्षीरसम्बन्धिन इक्षुरससम्बन्धिनो गुडसम्बन्धिनश्च भक्ष्या हिता इत्यावतिष्ठते।

आ० र०- भक्ष्यानाह-भक्ष्याः क्षीरेक्षुरसगौडिका इति। क्षीरेन इक्षुरसेन गुडेन वा कृताः।

दधिमस्त्वारनालाम्लफलाम्बुमदिराः पिबेत्।

स०-तथा, दधिमस्त्वादीनि पिबेत्। इति वातजे कासे प्रायेणोपयोग्यन्नपानमुद्दिष्टम्।

आ० र०- पानान्याह-दधिमस्त्विति। अम्लानां फलानामम्बु। इति वातकासचिकित्सा।

पित्तकासे तु सकफे वमनं सर्पिषा हितम्॥२५॥

तथा मदनकाश्मर्यमधुककथितैर्जलैः।

फलयष्ट्याह्वकल्कैर्वा विदारीक्षुरसाप्लुतैः॥२६॥

स०-पित्तजे कासे, किम्भूते ? सकफे-कफयुक्ते, तु सर्पिषा वमनं हितम्। अत एव वक्ष्यति (श्लो.२७)-"पित्तकासे तनुकफे त्रिवृतां" इति। तस्मादत्रार्थात् बहुकफत्वं बोध्यम्। न केवलं सर्पिषा वमनं हितम्। यावन्मदनादिभिः क्वथितैर्जलैर्वमनमवस्थावशाद्धितम्, अथवा मदनफलमधुककल्कैर्विदार्यादिरसाप्लुतैर्वमनं हितम्।

आ० र०- अथ पित्तकासचिकित्सा। तत्र सकफे पित्तकासे वमनमाह-पित्तकासे त्विति। मदनादिव्क्काथेन ससर्पिष्केण वमनम्। फलयश्ट्याह्वचूर्णेन वा विदारीक्षुरसकल्कितेन वमनान्तरम्।

पित्तकासे तनुकफे त्रिवृतां मधुरैर्युताम्।
युञ्ज्याद्विरेकाय युतां घनश्लेष्मणि तिक्तकैः॥२७॥

स०-पित्तजे कासे तनुकफे-अघनश्लेष्मणि, त्रिवृतां मधुरैर्युतां विरेकाय युञ्जयात्। घने तु कफे तिक्तकैः सह त्रिवृतां युञ्जयात्।

आ० र०- विरेचनमाह-पित्तकासे तनुकासे इति। तच्च तनौ कफे मधुरैर्युक्तआ त्रिवृतया, घने तिक्तैः।

हृतदोषो हिमं स्वादु स्निग्धं संसर्जनं भजेत्।
घने कफे तु शिशिरं रूक्षं तिक्तोपसंहितम्॥२८॥

स०-हृतदोषो नरो हिमं मधुरं स्निग्धं संसर्जनं-विरेकादनन्तरं पेयादिक्रमं, भजेत्। घने तु कफे शीतं तथा रूक्षं तिक्तयुतं संसर्जनं भजेत्।

आ० र०- संसर्जनमाह-हृतदोष इति। तच्च तनौ कफे शीतस्वादुस्निग्धम्, घने शीततिक्तरूक्षम्। शुद्धस्य शुद्धयोग्यस्य वा।

लेहः पैत्ते सिताधात्रीक्षौद्रद्राक्षाहिमोत्पलैः।

सकफे साब्दमरिचः सघृतः सानिले हितः॥२९॥

स०-पित्तकासे सितादिभिर्लेहो हितः। सकफे पित्ते साब्द मरिचो लेहो हितः। सानिले पित्ते सघृतो लेहो हितः।

आ० र०- लेहमाह-लेहः पित्त इति। स च केवले पित्ते सितादिभिः, सकफे समुस्तमरिचैः, सवाते सघृतैः। सङ्ग्रहे तु (चि. अ. ४)-"पिप्पलीमुस्तयष्ट्याह्वद्राक्षामूर्वामहौषधम्। लाजामृत्फलाद्राक्षात्वक्क्षीरीपिप्पलीसिताः॥त् अमृतफलाधात्री। दुःस्पर्शा कर्कटी शुण्ठी शठी द्राक्षा बला सिता। निदिग्धिकामूलफलं वटबीजं रसाञ्जनम्॥खर्जुरं पिप्पली वांशी श्वदंष्ट्रा चेति ते। घृतक्षौद्रयुता लेहाः श्लोकार्धैः पित्तकासिनाम्॥पयोनुपानां श्रुङ्गी वा लिह्यात् साज्यसितामधुम्।" इति।

मृद्वीकाधशतं त्रिंशत्पिप्पलीः शर्करापलम्।

लेहयेन्मधुना

स० - तथा, मृद्वीकागुलिकाः पञ्चाशत् त्रिंशत्पिप्पलीः शर्करापलं च मधुना लेहयेत्।

आ० र०- लेहान्तरमाह-मृद्वीकार्धशतमिति।

गोर्वा क्षीरपस्य शकृद्रसम्॥३०॥

स०-गोर्वा वत्सस्य क्षीरपस्य-क्षीरवृत्तेः, शकृद्रसं मधुना लेहयेत्।

आ० र०- लेहान्तरमाह-गोर्वेति। क्षीरपस्य गोः-क्षीरमात्राहारस्य वत्सस्य, शकृद्रसं मधुना सह मर्दितं लेहयेत्।

त्वगेलाव्योषमृद्वीकापिप्पलीमूलपौष्करैः।
लाजमुस्ताशठीरास्नाधात्रीफलबिभीतकैः॥ ३१॥
शर्कराक्षौद्रसर्पिद्रसर्पिर्भिर्लेहो हृद्रोगकासहा।

स०-त्वगेलादिभिर्लेहो हृद्रोगकासहा भवति।

आ० र०-"पिप्पल्यामलकद्राक्षालाजालाक्षासिओत्पलाः। सञ्चूर्ण्य पक्काः पयसा लिह्यात् क्षौद्राष्टभागिकाः॥ विदरीक्षुमृणालानांरसान् क्षीरं सितोपलाम्। पिबेत् क्षौद्रेण संयोज्य पित्तकासमपोहति।" इति। योगरत्ने तु-"व्याघ्रीबलाभ्यां च जलं साधितं पित्तकासनुत्। तैरेव साधितं क्षीरमनुपानं प्रशस्यते॥ पिप्पल्यामलकद्राक्षा व्याघ्री यष्टी शतावरी। पिप्पली चेति तुल्यानि शर्करा च चतुर्गुणा॥ त्वक्क्षीरीं द्विगुणां दत्वा लेहयेन्मधुसर्पिषा। क्षतकासं जयत्येष लेहः पित्तोल्बणं तथा॥ चूर्णं तु पद्मबीजानां मधुना सम्प्रयोजयेत्॥ पित्तकासार्दितो लिह्यात् स्वस्थतां लभते क्षणात्॥ वासाकषायकल्काभ्यां घृतं समधुशर्करम्। सिद्धं तत्पित्तकासघ्नं सर्वपित्तविकाअनुत्॥" इति। वङ्गसेने तु (कासाधिकारे श्लो. ३०)-"बलाद्विबृहतीद्राक्षावासाभिः व्कथितं जलम्। पित्तकासापहं पेयं शर्करामधुयोजितम्॥" इति।

मधुरैर्जाङ्गलरसैर्यवश्यामाककोद्रवाः॥ ३२॥
मुद्गादियूषैः शाकैश्च तिक्तकैर्मात्रया हिताः।
घनश्लेष्मणि लेहाश्च तिक्तका मधुसंयुताः॥ ३३॥
शालयः स्युस्तनुकफे षष्टिकाश्च रसादिभिः।

स०-घनश्लेष्मणि पित्तकासे जाङ्गलै रसैर्मधुरैस्तथा मुद्गकुल्त्थादियूषैस्तथा तिक्तैः शाकैश्च सह यवादयो मात्रया-परिमिताः, हिताः। घनश्लेष्मणि लेहाश्च तिक्तद्रव्ययुक्ताः। तनुकफे पित्ते शालयः षष्टिकाश्च रसादिभिर्हिताः स्युः-भवेयुः।

आ० र०- अन्नपापानमाह-मधुरैरिति। तच्च घने श्लेष्मणि यवादिना शाल्यादि। लेहाः-लेह्यखलाः। ते च तिक्तद्रव्यकृता मधुमधुराश्च।

शर्कराम्भोऽनुपानार्थं द्राक्षेक्षुस्वरसाः पयः॥ ३४॥

स०-अनुपानार्थं शर्कराम्भो हितम्, द्राक्षेक्षुस्वरसाः पयश्च।

आ० र०- अनुपानान्याह-शर्कराम्भ इति।

काकोलीबृहतीमेदाद्वयैः सवृषनागरैः।
पित्तकासे रसक्षीरपेयायूषान् प्रकल्पयेत्॥ ३५॥

स०-काकोल्यादिभिर्मांसरसादीन् पित्तकासे प्रकल्पयेत्।

आ० र०- उक्तरसादिसाधनद्रव्याण्याह-काकोलीति। द्वयशब्दस्त्रिभिर्योज्यः।

द्राक्षां कणां पञ्चमूलं तृणाख्यं च पचेज्जले।
तेन क्षीरं श्रृतं शीतं पिबेत्समधुशर्करम्॥ ३६॥
साधितां तेन पेयां वा सुशीतां मधुनाऽन्विताम्।

स०-पित्तकासे तथा द्रक्षादीन् चतुर्गुणे जले पचेत्। तेन पादावशिष्टेन द्राक्षादीनां क्काथेन, समं क्षीरं क्वथितं [शीतं] मधुशर्करायुतं पिबेत्। तेन वा-जलेन, साधितां पेयां सुशीतां माक्षिकयुतां पिबेत्।

आ० र०- क्षीरान्तरमाह-द्राक्षां कणामिति। पेयान्तरमाह-साधितामिति। तेन-द्राक्षादिक्काथेन।

शठीह्रीबेरबृहतीशर्करावि श्वभेषजम्॥३७॥
पिष्ट्वा रसं पिबेत्पूतं वस्त्रेण घृतमूर्च्छितम्।

स०-शठ्यादीन् जले पिष्ट्वा वस्त्रेण पूतं रसं घृतमिश्रितं पिबेत्।

आ० र०- पानकमाह-शठीति। पिष्ट्वा-जलोष्णेन चतुर्गुणेन, फाण्टत्वात्। मूर्च्छितं-भृष्टम्।

मेद्दां विदारीं काकोलीं स्वयंगुप्ताफलं बलाम्॥३८॥
शर्करां जीवकं मुद्गमाषपर्ण्यौ दुरालभाम्।
कल्कीकृत्यपचेत्सर्पिः क्षीरेणाष्टगुणेन तत्॥३९॥
पानभोजनलेहेषु प्रयुक्तं पित्तकासजित्।
लिह्याद्वा चूर्णमेतेषां कषायमथवा पिबेत्॥४०॥

स०-शर्करादीन् कल्कीकृत्याष्टगुणेन क्षीरेण सर्पिः पचेत्। तच्च सर्पिः पानादिषु युक्तं पित्तकासजित्। एतेषां वा-शर्करादीनां, चूर्णं लिह्यात्। अथवैषामेव कषायं पिबेत्।

आ० र०- घृतचुर्णव्काथानाह-मेदां विदारीमिति। लिह्यान्मधुना। सङ्ग्रहे तु (चि. अ. ४)-" महिष्यजावीगोक्षीरधात्री फलरसैः समैः। सर्पिः सिद्धं पिबेत्तद्वन्मधुरेण गणेन वा। व्काथीकृतेनेक्षुरसे क्षीरयुक्तेन साधितम्। सशर्करं पिबेत्प्रातर्लिह्याद्वा माक्शिकान्वितम्।

मधुरेण-जीवनीयेन। क्षीरिवृक्षाङ्कुरव्काथे पव्कं क्षीरसमं घृरम्। पाययेत्पित्तकासार्तं मधुना वाऽवलेहयेत्॥" इति। इति [इत्तकासचिकित्सा।

कफकासी पिबेदादौ सुरकाष्ठात् प्रदीपितात्।

स्नेहं परिस्रुतं व्योषयवक्षारावचूर्णितम्॥४१॥

स०-कफकासी पूर्वं सुरकाष्ठात् प्रदीपितात् यः स्रुतः स्नेहस्तं व्योषयवक्षारावचूर्णितं पिबेत्।

आ० र०- कफकासचिकित्सा। तत्र स्नेहनमाहकफकासीति। परिस्रुतं-पातालयन्त्रेण।

स्निग्धं विरेचयेदूर्ध्वमधो मूर्ध्नि च युक्तितः।

तीक्ष्णैर्विरिकैर्वलिनं

स०-स्निग्धं च सन्तमनन्तरं विरेचयेत् ऊर्ध्वमधो मूर्ध्नि च। युक्तितो-यथाबलहानिर्न स्यादिति भावः। कैर्विरेचयेत्? तीक्ष्णैर्विरिकैः। किम्भूतमातुरम्? बलवन्तम्।

आ० र०- वमनविरेकनस्यान्याह-स्निग्धमिति। विरेकैः-वमनविरेचनानामौषधैः।

संसर्गी चास्य योजयेत्॥४२॥

यवमुद्गकुलत्थान्नैरुष्णारूक्षैः कटूत्कटैः।

कासमर्दकवार्ताकव्याघीक्षारकणान्वितैः॥४३॥

धान्वबैलरसैः स्नेहैस्तिमसर्षपनिम्बजैः।

स०-संसर्गी च-पेयादिपरिपाटीं च, अस्य योजयेत्। यवादिभिर्यथायोगमुष्ण-रूक्षैस्तथा कटूत्कटैः-प्रभूतकटुकैः, कासमर्दकादियुक्तैः। धन्वनि भवा धान्वाः-जाङ्गलाः, बिलेषु भवा बैलाः-बिलेशयाः, तेषां रसास्तैर्मासरसैः सहेत्यर्थः। तथा, स्नेहैस्तिलदिजैः सह।

आ० र०- शुध्यनन्तरं संसर्जनमाह-संसर्गी चेति। यवानां पेया विलेपी च। मुद्गानां कुलित्थानां वा यूषः। जाङ्गलानां बिलेशयानां वा रसः। स च कासमर्दाद्यन्वितः। क्षारो-यवक्षारः। तिलादिजैः स्नेहैर्यूषरसयोः कृतकत्वम्। वङ्गसेने तु (कासा. श्लो. ४ ०)-"मुद्गामलाभ्यां यवदाडीमाभ्यां कर्कन्धुना मूलकशुण्ठकेन। शुण्ठीकणाभ्यां सकुलत्थएन यूषो नवाङ्गः कफरोगहन्ता॥" इति।

दशमूलाम्बु घर्माम्बु मद्यं मध्वम्बु वा पिबेत्॥४४॥

मूलैः पौष्करशम्याकपटोलैः संस्थितं निशाम्।

पिबेद्वारि सहक्षौद्रं कालेष्वन्नस्य वा त्रिषु॥४५॥

स०-दशमूलाम्ब्वादीन्(नि) पिबेत्। अथवा, मूलैः पौष्करादिभिर्निशां संस्थितं-रात्रिस्थितं, वारि क्षौद्रेण सह प्रातः पिबेत्। अथवा, अन्नस्य त्रिषु कालेषु-आदिमध्यावसानलक्षणेषु, पिबेत्।

आ० र०- तृषितस्य पानान्याह-दशमुलाम्ब्विति। घर्माम्बु-उष्णोदकम्।

पानानन्तरमुष्णो (षितो) दकमाह-मूलैरिति। पुष्करादीनां मूलैः, निशामन्वितं-शीतकषायीकृतम्। त्रिषु कालेषु-अन्नादौ अन्नमध्ये अन्नान्ते वा।

पिप्पली पिप्पलीमूलं शृङ्गबेरं बिभीतकम्।

शिखिकुक्कुटपिच्छानां मषी क्षारो यवोद्भवः॥४६॥

विशाला पिप्पलीमूलं त्रिवृता च मधुद्रवाः।

कफकासहरा लेहास्त्रयः श्लोकार्धयोजिताः॥४७॥

स०-पिप्पल्यादयस्त्रयो लेहाः श्लोकार्धैर्योजिता मधुना सह कफकासहरा भवन्ति।

आ० र०- लेहत्रयमाह-पिप्पलिति। सङ्ग्रहे तु सत्प (चि. अ. ४)-"देवदार्वभया मुस्तं पिप्पली विश्वमेषजम्। गुडूची पिप्पली भार्गी शृङ्गी कर्कटकस्य च॥ व्योषदाहविडङ्गानि त्रिफलाशर्कराबलाः। निदिग्धिकाया मूलत्वक् मरीचैः सह योजिता॥" इति। [एभिः] चतुर्भिः सह।

मधुना मरिचं लिह्यान्मधुनैव च जोङ्गकम्।
पृथग्रसांश्च मधुना व्याघीवार्ताकभृङ्गजान्॥४८॥
कासघ्नस्याश्वशकृतः सुरसस्यासितस्य च।

स०-तथा कफकासे मधुना मरिचं लिह्यात्। माक्षीकेणैवा गुरुं लिह्यात्। व्याघ्र्यादिजान् रसान् पृथक्पृथक् मधुना लिह्यात्।

आ० र०- त्लेहाष्टकमाह-मधुना मरिचमिति। जोङ्गकंअगरुः। व्याघ्र्यादीनां षण्णां रसाः। कासन्धः-कासमर्दः। असितः सुरसः-कृष्णतुलसी।

देवदारुशठीरास्नाकर्कटाख्यादुरालभाः॥४९॥
पिप्पली नागरं मुस्तं पथ्या धात्री सितोपला।
लाजाः सितोपला सर्पिः शृङ्गी धात्रीफलोद्भवा॥५०॥
मधुतैलयुता लेहास्त्रयो वातानुगे कफे।

स०-देवदावादयो मधुतैलयुता लेहास्त्रयः-श्लोकार्धगदिताः, वातानुगे कफे स्युः। अत्र शृङ्गीधात्रीफलोद्भवेति केचिद्विशिष्टमामलकमाहुः। अन्ये तु शृङ्गी कर्कटशृङ्गीति व्याचक्षते।

आ० र०- वतानुगे कफे लेहत्रयमाह-देवदारुशठीति। धात्रीफलोद्भवा शृङ्गी-शृङ्गाकारा शुष्कामलकत्वक्।

द्वे पले दाडिमादष्टौ गुडाह्योषात्पलत्रयम्॥५१॥
रोचनं दीपनं स्वर्यं पीनसश्वासकासजित्।

स०-दाडिमस्य पले द्वे तु गुडादष्टौ त्रिकटुकात् पलत्रयमित्येतद्दाडिमाद्यं चूर्णं रोचनादिगुणं पीनसादिजित्।

आ० र०- गुटिकामाह-द्वे पले इति।

गुडक्षारोषणकणादाडिमं श्वासकासजित्॥५२॥
क्रमात्पलद्वयार्धाक्षकर्षार्धाक्षपलोन्मितम्।

स०-गुडादिकं क्रमेण पलद्वयमर्धकर्षं कर्षं अर्धकर्षं पलप्रमाणं पूर्वोक्तगुणम्।

आ० र०- गुटिकान्तरमाह-गुडक्षारोषणकणादाडिमादिति। पलद्वयं गुडस्य। अर्धाक्षः क्षारस्य। कर्षो मरीचस्य। अर्धाक्षः कणाःयाः। पलं दाडिमस्य। सङ्ग्रहे तु (चि. अ. ४)- " विडङ्गं सैन्धवं कुष्ठं व्योषं हिङ्गु मनः शिलाम्। कासे श्वासे च हिध्मायां लिह्यात् क्षौद्रघृताप्लुतम्॥ पाठाशुण्ठीशठीमूर्वागवाक्षिपिप्पलीघनम्। पिष्ट्वा घर्माम्बुना हिङ्गुसैन्धवाभ्यां युतं पिबेत्॥ तद्वन्मुस्ताशठीशृङ्गीनागरातिविषाभयाः।" इति।

पिबेज्जवरोक्तं पथ्यादि सशृङ्गिकं च पाचनम्॥५३॥

स०-तथा ज्वरचिकित्सितोक्तं (श्लो. ६२)-"पथ्याकुस्तुम्बरी" इत्यादिकं पाचनं पाचनं कर्कटश्रृङ्गीसहितं पिबेत् पूर्वगुणम्।

आ० र०- पाचनमाह-पिबेज्ज्वरोक्तमिति। अथ्यादि-पथ्याकुस्तुम्बरीमुस्तेत्यादि।

अथवा दीप्यकत्रिवृद्विशालाघनपौष्करम्।
सकणं क्वथितं मूत्रे कफकासी जलेऽपि वा॥५४॥

स०-दीप्यकादिकं गोमूत्रे क्वथितं जलेऽथवा क्वथितं पिप्पलीसहितं कफकासी पिबेत्।

आ० र०- पाचनान्तरमाह-अथवेति। तच्चमुत्रे जले[वा]व्क्थितम्।

तैलभृष्टं च वैदेहीकल्काक्षं ससितोपलम्।
पाययेत्कफकासघ्नं कुलत्थसलिलाप्लुतम्॥५५॥

स०-पिप्पलीकल्ककर्ष सशर्करं तैलेन पक्वं कुलत्थसलिलाप्लुतं कफकासघ्नं पाययेत्।

आ० र०- शमनमाह-तैलभृष्टं चेति। वैदेही-पिप्पलीकल्को-द्रवपिष्टपिण्डम्। अक्षं-कर्शम्। सङ्ग्रहे तु (चि. अ. ४)-"सौवर्चलाभयाधात्रीपिप्पलीक्षारनागरम्। चूर्णितं सर्पिषा वातकफकासहरं पिबेत्॥" इति।

दशमूलाढके प्रस्थं घृतस्याक्षसमैः पचेत्।
पुष्कराह्वशठीबिल्वसुरसाव्योषहिङ्गुभिः॥५६॥
पेयानुपानं तत्सर्ववातश्लेष्मामयापहम्।

स०-दशमूलक्काथाढके घृतस्य प्रस्थं पुष्करमूलादिभिः प्रत्येकं कर्षप्रमाणैः कल्कीकृतैः पचेत्। तत् पेयानुपानं सर्ववातकफामयघ्नम्।

आ० र०- घृतमाह-दशमूलाढके इति। आढके व्काथस्य।

निर्गुण्डीपत्रनिर्याससाधितं कासजिद्घृतम्॥५७॥

स०-निर्गुण्डीपत्रस्वरससाधितं घृतं कासजित्स्यात्।

आ० र०- घ्तान्तरमाह-निर्गुण्डीति।

घृतं रसे विडाङ्गानां व्योषगर्भं च साधितम्॥५७ १/२॥

स०-विडङ्गानां रसे व्योषगर्भं च साधितं घृतं पूर्वोक्तगुणम्।

आ० र०-[घृतान्तरमाह-घृतमिति।]

पुनर्नवशिवाटिकासरलकासमर्दामृता-
पटोलबृहतीफणिज्जकरसैः पयःसंयुतैः।
घृतं त्रिकटुना च सिद्धमुपयुज्य सञ्जायते
न कासविषमज्वरक्षयगुदाङ्कुरेभ्यो भयम्॥५८॥

स०-पुनर्नवादिरसैः पयसा युतैस्त्रिकटुना कल्केन च सिद्धं घृतमुपयुज्य-पीत्वा, कासादिभ्यो भयं न जायते। "वसुग्रहयुता जसौ जसयलाश्च पृथ्वी गुरुः।" अत्र पुनर्नवादिरसो घृताच्चतुर्गुणः क्षीरं घृतसमं घृतं व्योषाच्चतुर्गुणमिति पाकक्रमः।

आ० र०- घृतान्तरामाह-पुनर्नवेति। शिवाटिका-द्वितीयः पुनर्नवा। त्रिकटुना कल्केन।

समूलफलपत्रायाः कण्टकार्या रसाढके॥ ५९॥

घृतप्रस्थं बलाब्योषविडङ्गशठिदाडिमैः।

सौवर्चलयवक्षारमूलामलकपौष्करैः॥ ६०॥

वृश्चीववृहतीपथ्यायवानीचित्रकर्धिभिः।

मृद्वीकाचव्यवर्षाभूदुरालम्भाम्लवेतसैः॥ ६१॥

श्रृङ्गीतामलकीभार्गीरास्नागोक्षुरकैः पचेत्।

कल्कैस्तत्सर्वकासेषु श्वासहिध्मासु चेष्यते॥ ६२॥

कण्टकारीघृतं चैतत्कफव्याधिविनाशनम्।

स०-कण्टकार्याः समूलफलपत्राया रसाढके बलादिभिः कल्कैर्घृता-च्चतुर्थांशप्रमाणैर्घृतप्रस्थं पचेत्। तच्च सर्पिः सर्वकासाधिष्विष्यते-अभिहितम्। इदं च कण्टाकारीघृतं कफत्र्याधिविनाशनम्।

आ० र०- घृतान्तरमाह-समूलफलशाखाया इति। मूलंपिप्पलीमूलम्। सङ्ग्रहे तु (चि. अ. ४) -"कण्टकार्यास्तुलां क्षुण्णां पक्त्वा द्रोणेऽम्भसः पचेत्। तेनाढकेन क्वाथस्य घृतप्रस्थं पिचून्मितैः॥ रास्नादुः स्पर्शषङ्ग्रन्थापिप्पलीद्वयचित्रकैः। सौवर्चलयवक्षारकृष्णामूलैश्च तज्जयेत्॥ कासश्वासकफष्ठीवहिध्मारोचकपीनसान्।" इति।

पचेद्याघ्रीतुलां क्षूण्णां वहेऽपामाढकस्थिते॥ ६३॥

क्षिपेत् पूते तु सञ्चूर्ण्य व्योषरास्नामृताग्निकान्।

श्रृङ्गीभार्गीघनग्रन्थिधन्वयासान् पलार्धकान्॥ ६४॥

सर्पिषः षोडशपलं चत्वारिंशत्पलानि च।

मत्स्यण्डिकायाः शुद्धायाः पुनश्च तदधिश्रयेत्॥ ६५॥

दर्वीलेपिनि शीते च पृथक् द्विकुडवं क्षिपेत्।

पिप्पलीनां तवक्षीर्या माक्षिकस्यानवस्य च॥ ६६॥

लेहोऽयं गुल्महृद्रोगदुर्नामश्वासकासजित्।

स०-व्याघ्र्यास्तुलां क्षूण्णां-मर्दितां, जलस्य वहे-चतुर्द्रोणे, पचेत्। आढकस्थिते जले सञ्चूर्ण्य व्योषादीनि आर्धपलप्रमाणानि प्रत्येकं क्षीपेत्। अग्निरेवाग्निकः-चित्रकः। घुतस्य च षोडश पलानि, मत्स्यण्डिकायाः,-विमलायाः, चत्वारिंशत्पलानि, भूयश्च तत्सर्वं पचेत्। दर्वी लिम्पतीति दर्वीलेपी तस्मिन् दर्वीलेपिनि, अवलेहे शीते सति प्रत्येकं द्विकुडवप्रमाणं पिप्पल्यादि क्षिपेत्। अयं लेहो गुल्मादिजित्।

आ० र०- व्याघ्रीलेहमाह-पचेव्द्याघ्रीतुलामिति। वहेद्रोणचतुष्के। ग्रन्थि-पिप्पलीमूलम्। मत्स्यण्डिकायाः-शर्करायाः। अनवस्य-जीर्णस्य। सङ्ग्रहे तु (चि.अ. ४)-"त्रिफला पिप्पली पाठा सारिवा बृहतीद्वयम्। मरीचं पद्मकं मुस्तमुषीरं चाक्षसम्मितम्॥ पक्त्वा जलाढके पादशेषेक्षारपलाष्टकम्। दत्वा गुडस्य च पलं पचेदादर्विलेपनात्॥ लेहः कफोल्बणं कासं सर्वमेष नियच्छति। सधितं क्षीरमेभिर्वा तैलक्षोद्रयुतं पिबेत्॥" इति। वङ्गसेने तु (कासाधिकारे) -"कुष्ठं तामलकी भार्गी शठीक्षारो हरीतकी। कोलं चोष्णाम्भसा चीर्णं लेहो वा मधुसंयुतः॥ कोलं-मरिचम्। (श्लो. ४७) व्योषपुष्करमृद्वीकात्रिफलाशठिचित्रकैः। मधुतैलयुतो लेहः श्लेष्मकासनिबर्हणः॥ व्योषाजमोदचित्रकषड्ग्रन्थाचव्यकल्कितं सर्पिः। कफकासश्वासहरं वासकरससाधितं समधु॥" इति। योगरत्ने तु-"विडङ्गं सैन्धवं राम्ना शठी क्षारो महौषधम्। शेष्मकासे हितं चूर्णं लेहो वा मधुसंयुतः॥ बिभीतकं घृताभ्यक्तं गोशकृत्परिवेष्टितम्। स्विन्नमग्नौ हरेत्कासं ध्रुवमास्ये विधारितम्॥" इति।

शमनं च पिबेद्धूमं शोधनं बहले कफे॥ ६७॥

स०-तथा कफवासे शमनं धूमं पिबेत्। घनश्लेष्मणि शोधनं धूमं पिबेत्। घनश्लेष्मणि शोधनं धूमं पिबेत्।

आ० र०- धूममाह-शमनं चेति। शमनं धूमं पिबेत्। यस्य तु बहलः कफः [स] शोधनं धूमं पिबेत्।

अथ तमेव धूममाह-

मनःशिलालमधुकमांसीमुस्तेङ्गुदीत्वचः।

धूमं कासघ्नविधिना पीत्वा क्षीरं पिबेदनु॥ ६८॥

निष्धूतान्ते गुडयुतं कोष्णं धूमो निहन्ति सः।

वातश्लेष्मोत्तरान् कासानचिरेण चिरन्तनान्॥ ६९॥

स०- एतेषां सम्बन्धिनं धूमं कासघ्नविधिना-सूत्रोदितेन, पीत्वाऽनु-पश्चात्, निष्धूतान्ते कोष्णं क्षीरं गुडान्वितं पिबेत्। स धूमः पीतो वातश्लेष्मोत्तरान् कासांश्चिरन्तनान् आश्वेव हन्ति। चिरन्तनानिति "सायं चिरं" इत्यादिना ठ्युः।

आ० र०- धूमान्तरमाह-मनःशिलेति। अलं-हरितालम्। इङ्गुदी-तापसद्रुमः। त्वक्ताजि (?) चूर्णीकृत्वा तेषां धूमं पिबेदित्यर्थः। कासन्धविधिना-धूमपानोक्तेन। धूमोत्क्लिष्तकफनिष्ठा-नामक्षीरं पिबेत्। सङ्गहे तु (चि. अ. ४)-" प्रपौण्डरीकं मधुकं शार्ङ्गेष्टाऽलं मनः शिलाम्। मरीचं पिप्पलीं द्राक्षामेलां सुरसमञ्जरीम्॥ कृत्वा वार्तैं पिबेद्धूमं क्षौमचैलानुवार्तिनीम्। घृताक्तामनु च क्षीरं पिबेत्तद्वद्गुडाम्बु वा॥ शार्ङ्गेष्टा-उत्तुण्डुकी। सुरसः-तुलसी। तद्वत्-ष्ठ्यातान्ते। नेपालितालमरिचलाक्षानतकुटन्नटैः। उशीररोहिषफलद्रविडीवंशलेखनैः॥ पूर्वकल्पेन धू ओऽयं सानुपानो विधीयते। निपाली-मनः तालं-हरितालम्। द्रविडी-एला। वंशलेखनं-वंस्शत्वक्। कार्पासास्थ्यश्वगन्धा च धूमः कासविनाशनः। कोशातकीफलान्मध्यैः पिबेद्वा समनः शिलैः॥ " इति। योगरत्ने तु-"ताप्यमानसकासेन नासाबङ्गे स्वरेजडे। क्षवथौ घ्राणनासे च धूमनाडीं प्रयोजयेत्॥ क्षौमगर्भां पिबेद्वर्तिं हरितालं मनः शिलाम्। तालीसपत्रं कैडर्थं गुडान्नं चैव भोजयेत्॥ कैडर्थं-कङ्कलम्। धूमवर्तिर्बलाव्योषं हरितालं मनः शिला। अनुपानं श्रृतं वाऽपि प्रशस्तं काञ्जिकौदनम्॥ मधुकं चाजमोदश्च जीवन्त्यगुरुसर्जजौ। स्वैरण्दमूला कासन्धी धूमवर्तिरियं शुभा॥ सर्जजो-राला। क्षौमं हिङ्गुवचाभूर्जग्रन्थिश्चैष घृतान्वितः। धूमकासहरः

पीतः सर्वगन्धमयोऽपि वा॥ मनः शिला समालि.....दरैः परिशोधितैः। त्र्यहं पत्रैः कृतं धूमं पिबेत्कासनिवारणम्॥ जातेरुत्ताशिफाधूमं शिलागुग्गुलमिश्रितम्। गात्रस्य बदराङ्गारैः कारयेत्कासशान्तये॥ जातेरुत्तरदिङ्मूलं शिलैलागुग्गुलुं समम्। अजामूत्रेन पिष्टोऽयं धूपः कासहरः परः। मूलेन शरपिङ्खाया धूपः कासहरः परः।" इति।

तमकः कफकासे तु स्याच्चेत्पित्तानुबन्धजः।

पित्तकासक्रियां तत्र यथावस्थं प्रयोजयेत्॥ ७०॥

स ०- कफकासे यदि तमकः पित्तानुबन्धजः स्यात्। तत्रतमके, पित्तकासक्रियामवस्थावशात् प्रयोजयेत्।

आ० र०- तमकोपद्रवे प्रतीकारमाह-तमक इति। तमकः-प्रतमकः, "ज्वरमूच्छर्युतः शीतैः शाम्येत् प्रतमकस्तुसः।" (हृ. नि. अ. ४१११) इति वचनात्पित्तजत्वाच्च।

कफानुबन्धे पवने कुर्यात्कफहरां क्रियाम्।

पित्तानुबन्धयोर्वातकफयोः पित्तनाशिनीम्॥ ७१॥

वातश्लेष्मात्मके शुष्के स्निग्धमार्द्रे विरुक्षणम्।

कासे कर्म सपित्ते तु कफजे तिक्तसंयुतम्॥ ७२॥

स०-पवने कफानुबन्धे सति कफकासहरां क्रियां कुर्यात्। पित्तानुबन्धयोर्वातकफयोः पित्तकासनाशिनीं क्रियां विदध्यात्। वातश्लेष्मात्मके शुष्के कासे स्निग्धं कर्म। आर्द्रे तु कासे विरूक्षणं कर्म। कफजे तु कासे सपित्ते तिक्तसंयुतं विरूक्षणं कर्म।

आ० र०- अनुबन्धभेदाच्चिकित्सामाह-कफनुबन्ध इति। शुष्के-श्लेश्ष्मनिष्ठीवनहीने,आर्द्रे-युक्ते। सपित्ते कफजे तु शुष्के तिक्तयुतं स्निग्धम्, आर्द्रे रूक्षम्। इति कफकासचिकित्सा

उरस्यन्तःक्षते सद्यो लाक्षां क्षौद्रयुतां पिबेत्।

क्षीरेण

स०-अन्तःक्षत उरसि सति सद्यः-शीघ्रमेव, लाक्षां माक्षिकयुक्तां क्षीरेण पिबेत्। उरःसन्धानजनेन लाक्षायाः प्राधान्यात्। तथा चाग्र्यं सङ्ग्रहे (सू.अ.१३)-"लाक्षा सद्यःक्षतघ्नानाम्।" इति।

आ० र०- अथ क्षतकासचिकित्सा। तत्र क्षतस्यौषधमाह-उरस्यन्तःक्षत इति। सद्यः-उत्पन्नमात्रे।

शालीन् जीर्णेऽद्यात्क्षीरेणैव सशर्करान्॥७३॥

स०-जीर्णे-परिणते तस्मिन्नौषधे, क्षीरेणैव सह शालिम(लीन)द्यात् सशर्करम्(रान्)।

आ० र०- औषधान्तरमाह-पार्श्वबस्तिसरुगिति पार्श्वयोर्बस्तौ च स्रुक्-सशूलः। तां-लाक्षम्।

पार्श्वबस्तिसरुक्काल्पपित्ताग्निस्तां सुरायुताम्।

स०-पार्श्वबस्त्यादिरुगल्पाग्निश्च तां-लाक्षां, सुरायुतां पिबेत्।

आ० र०- औषधान्तरमाह-भिन्नविड्क इति। मुस्तुस्तादि भिश्चतुर्भिर्यु तां-लाक्षां।

भिन्नविड्कः समुस्तातिविषापाठां सवत्सकाम्॥७४॥

स०-भिन्नपुरीषो नरो मुस्तातिविषापाठावत्सकान्वितां लाक्षां पिबेत्।

आ० र०- औषधान्तरमाह-भिन्नविद्ध इति। मुस्तादिभिश्चतुर्भिर्युतां लाक्षां शीतोदकेन पिबेत्।

लाक्षां सर्पिर्मधूच्छिष्टं जीवनीयं गणं सिताम्।
त्वक्क्षीरी समितं क्षीरे पकत्वा दीप्तानलः पिबेत्॥ ७५॥

स०-लाक्षादीनि हि क्षीरे पकत्वा तत् क्षीरं दीप्ताग्निः पिबेत्।

आ० र०- औषधान्तरमाहा-लाक्षां सर्पिरिति। समित्-गोधमचूर्णम्।

इक्ष्वारिकाबिसग्रन्थिपद्मकेसरचन्दनैः।
श्रृतं पयो मधुयुतं सन्धानार्थं पिबेत्क्षती॥ ७६॥

स० - इक्ष्वारिकादिभिः श्रृतं क्षीरं मधुयुतं सन्धानार्थमुरसि क्षतः पुमान् पिबेत्।

आ० र०- औषधान्तरमाह-इक्ष्वारिकेति।

यवानां चूर्णमामानां क्षीरे सिद्धं घृतान्वितम्।
ज्वरदाहे सिताक्षौद्रसक्तून्वा पयसा पिबेत्॥ ७७॥

स०- यवानामामानां चूर्णं क्षीरे सिद्धं घृतयुतं ज्वरदाहे पिबेत्। अथवा, शर्करामाक्षिकयुतान् सक्तून् पयसा पिबेत्।

आ० र०- औषधान्तरमाह-यवानां चूर्णमिति। आमानां-उलम्बिकायोग्यानाम्। औषधान्तरमाह-सिताक्षौद्रसक्तून्वेति।

कासवांस्तु पिबेत्सर्पिर्मधुरौषधसाधितम्।
गुडोदकं वा क्वथितं सक्षौद्रमरिचं हितम्॥७८॥
चूर्णमामलकानां वा क्षीरे पक्वं घृतान्वितम्।
रसायनविधानेन पिप्पलीर्वा प्रयोजयेत्॥७९॥

स०- कासावांश्च मधुरौषधैः साधितं सर्पिः पिबेत्। अथवा, गुडोदकं क्वथितं सक्षौद्रमरिचं शीतं पिबेत्। आमलकानां वा चूर्णं क्षीरे सिद्धं सर्पिर्युक्तं पिबेत्। रसायनोक्तविधिना वा पिप्पलीः प्रयोजयेत्।

आ० र०- औषधान्तरमाह-कासवांस्त्विति। मधुराणिजीवन्त्यादीनि।

औषधान्तरमाह-गुडोदकं वेति। क्वथितं-क्वाथविधिना।

औषधान्तरमाह-चूर्णमामलकानां वेति।

औषधान्तरमाह-रसायनविधानेनेति।

कासी पर्वास्थिशूली च लिह्यात्सघृतमाक्षिकाः।
मधूकमधुकद्राक्षात्वक्क्षीरिपिप्पलीबलाः॥८०॥

स०- कासी पर्वास्थिशूलवांश्च सघृतमाक्षिका मधूकादीर्लिह्यात्।

आ० र०- औषधान्तरमाह-कासी पर्वास्थिशूलीति। वङ्गसेने तु (कासाधिकारे श्लो. ९३)-"चूर्णं ककुभसमुथ्यं वासकरसभावितं बहून् वारान्। मधुघृतसोतोपलाभिर्लेह्यं क्षतकासरक्तपित्तरम्॥" इति।

त्रिजातमर्धकर्षांशं पिप्पल्यर्धपलं सिता।

द्राक्षा मधूकं खर्जूरं पलांशं श्लक्ष्णचूर्णितम्॥८१॥

मधुना गुटिका घ्नन्ति ता वृष्याः पित्तशोणितम्।

कासश्वासारुचिच्छर्दिमूर्च्छाहिध्मामदभ्रमान्॥८२॥

क्षतक्षयस्वरभ्रंशप्लीहशोषाढ्यमारुतान्।

रक्तनिष्ठीवहृत्पार्श्वरुक्पिपासाज्वरानपि॥८३॥

स०-त्रिजातकमर्धकर्षप्रमाणं कणा कर्षद्वयमात्रा सितादिकं प्रत्येकं पलांशं श्लक्ष्णचूर्णितं मधुना कृता गुटिका वृष्याः पित्त शोणितादीन् घ्नन्ति।

आ० र०- एलादिगुटिकामाह-त्रिजातमर्धकर्षांशमिति।

वर्षाभूशर्करारक्तशालितण्डुलजं रजः।

रक्तष्ठीवी पिबेत्सिद्धं द्राक्षारसपयोघृतैः॥८४॥

मधूकमधुकक्षीरसिद्धं वा तण्डुलीयकम्।

स०- पुनर्नवादिचूर्णं द्राक्षारसपयोघृतैः सिद्धं रक्तष्ठीवी पिबेत्। अथवा, मधूकादिभिः सिद्धं तण्डुलीयकं पिबेत्।

आ० र०- औषधान्तरमाह-वर्षाभूशर्करेति।

औषधान्तरमाह-मधूकमकक्षीरसिद्धमिति। मधूकमधुकाभ्यां सिद्धेन क्षीरेण सिद्धम्।

यथास्वं मागविसृते रक्ते कुर्याच्च भेषजम्॥८५॥

स०- मार्गेण-मुखादिना, विसृते रक्ते यथायथं रक्तपित्त चिकित्सितोक्तमौषधं कुर्यात्।

आ० र०- रक्तपित्तौषधमतिदिशति-यथास्वमिति। योगरत्ने तु-""गङ्गगोदावरीक्षिप्राकालिन्दी-नर्मदोद्भवाम्। आहुत्यसिकतां श्वेतां सुसूक्ष्मां प्रसृतोन्मिताम्॥तुल्यां तैलघृतक्षौद्रैः सवसामज्जिभिस्तथा। सागारधूमैस्त्रिफलारसेन च विमिश्रिताम्॥सत्पभिः प्रसृतैः सार्धं खजेन मथितां पिबेत्। चटकाण्डरसं वाऽपि रक्तं वा छागजाङ्गलम्॥" इति। सङ्ग्रहे तु (चि. अ. ५) -"रक्तेऽतिवृत्ते छागं वा जाङ्गलं वा पिबेदसृक्।" तथा-"पिप्पलीमधुकं पिष्टं कार्षिकं ससितोपलम्। प्रास्थिकं गव्यमाजं च क्षीरक्षुरसस्तथा॥यवगोधूमश्रुद्वीकाचूर्णमामलकाद्रसः। तैलं च प्रसृतांशानि तत्सर्वं श्रुदानाऽग्निना॥पचेल्लेहं घृतंक्षौद्रयुतः स क्षतकासनुत्। कासहृद्रोगकार्श्यन्घो हितो वृद्धाल्परेतसाम्॥" इति। यवचूर्णादीनि प्रसृतांशानि।

मूढवातस्त्वजामेदः सुराभृष्टं ससैन्धवम्।

स०- मूढवातस्तु पुरुषोऽजाया मेदः सुरया भृष्टमीषत्सैन्धवसहितमद्यात्।

क्षामः क्षीणः क्षतोरस्को मन्दनिद्रोऽग्निदीप्तिमान्॥८६॥
श्रृतक्षीरसरेणाद्यात्सघृतक्षौद्रशर्करम्।

स०- क्षामः क्षीणः क्षतोरस्को मन्दनिद्रो दीप्ताग्निः श्रृतक्षीरस्य सम्बन्धिना सरेण सघृतक्षौद्रशर्करमजामेदोऽद्यात्।

आ० र०- औषधान्तरमाह-क्षामः क्षीण इति। अजामेद इत्युनषङ्गः।

शर्करायवगोधूमं जीवकर्षभकौ मधु॥८७॥

श्रृतक्षीरानुपानं वा लिह्यात्क्षीणः क्षतः कृशः।

स०- अथवा क्षीणः क्षतः कृशो वा शर्करादिकं लिह्यात्। कथम्? श्रृतक्षीरानुपानम्।

क्रव्यात्पिशितनिर्यूहं घृतभृष्टं पिबेच्च सः॥८८॥

पिप्पलीक्षौद्रसंयुक्तं मांसशोणितवर्धनम्।

स०- स च-क्षीणादिः, क्रव्यात्पिशितस्य निर्यूहं घृतेन भृष्टं पिबेत्। किम्भूतम्? पिप्पलीक्षौद्रान्वितम्। तच्च मांसशोणितवर्धनं स्यात्।

आ० र०- औषधान्तरमाह-क्रन्यात्पिशितनिर्यूहमिति। सः-क्षीणः क्षतकासी।

न्यग्रोधोदुम्बराश्वत्थप्लक्षशालिप्रियङ्गुभिः॥८९॥

तालमस्तकजम्बूत्वकूप्रियालैश्च सपद्मकैः।

साश्वकर्णैः श्रृतात्क्षीरादद्याज्जातेन सर्पिषा॥९०॥

शाल्योदनं क्षतोरस्कः क्षीणशुक्रबलेन्द्रियः।

स०- न्यग्रोधादिभिः श्रृतात्क्षीरात् समुद्भूतेन सर्पिषा शाल्योदनं क्षतोरस्कः क्षीणशुक्रादिश्च नरोऽद्यात्।

आ० र०- औषधान्तरमाह=न्यग्रोधोदुम्बरेति। तालमस्तको-अग्र.....मज्जा। न्यग्रोधादिभिः श्रृतं यत् क्षीरं, ततो जातं यत्सर्पिः, तेन शाल्योदनमद्यात्।

वातपित्तार्दितेऽभ्यङ्गो गात्रभेदे घृतैर्मतः॥९१॥

तैलैश्चानिलरोगघ्नैः पीडिते मातरिश्वना।

स०- वातपित्तपीडिते गात्रमेदे वाऽभ्यङ्गो घृतैर्मतः। मातरिश्वना-वातेन, पीडिते सति तैलैर्वातरोगघ्नैरभ्यङ्गो मतः। चशब्दाद्धतैरपीति द्योतयति।

आ० र०- घृताभ्यङ्गमाह-वातपितार्दित् इति। तैलाभ्यङ्गमाह-तैलैश्चेति।

हृत्पार्श्वार्तिषु पानं स्याज्जीवनीयस्य सर्पिषः॥९२॥

स०- हृत्पार्श्वपीडासु जीवनीयस्य सर्पिषः पानं स्यात्। इति सम्भावनायां लिङ्।

आ० र०- तौषधान्तरमाह्-हृत्पार्श्वार्तौ त्विति।

कुर्याद्वा वातरोगघ्नं पित्तरक्ताविरोधि यत्।

स०- अथवा वातरोगघ्नं यत् पित्तरक्ताविरोधि तत् कुर्यात्।

आ० र०- वातव्याध्युक्तमतिदिषति-कुर्याद्वेति।

यष्ट्याह्वनागबलयोः क्काथे क्षीरसमे घृतम्॥९३॥
पयस्यापिप्पलीवांशीकल्कैः सिद्धं क्षते हितम्।

स०- यष्ट्याह्वयस्य नागबलायाश्च क्काथे क्षीरतुल्ये पयस्यादिकल्कैः सिद्धं घृतं क्षतकासेहितम्।

आ० र०- तौषधान्तरमाह-यष्ट्याह्वनागबलयोरिति। सङ्ग्रहे तु (चि. अ. ५)-"श्रृतं वाऽष्टगुणे क्षीरे कोलला क्षारसान्वितम्। कल्कैः कङ्गुन्नदार्वीत्वग्वत्सकत्वकलैर्धृतम्॥" इति। कङ्गुन्नः-टुण्टुकः। फलं-वत्सकस्यैव।

जीवनीयो गणः शुण्ठी वरी वीरा पुनर्नवा॥९४॥

बलाभार्गीस्वगुप्तर्द्धिशठीतामलकीकणाः।

शृङ्गाटकं पयस्या च पञ्चमूलं च यल्लघु॥९५॥

द्राक्षाक्षोडादि च फलं मधुरस्निग्धबृंहणम्।

तैः पचेत्सर्पिषः प्रस्थं कर्षांशैः श्लक्ष्णकल्कितैः॥९६॥

क्षीरधात्रीविदारीक्षुच्छागमांसरसान्वितम्।

प्रस्थार्धं मधुनः शीते शर्करार्धतुलारजः॥९७॥

पलार्धकं च मरिचत्वगेलापत्रकेसरम्।

विनीय चूर्णितं तस्माल्लिह्यान्मात्रां यथाबलम्॥९८॥

अमृतप्राशमित्येतन्नराणाममृतं घृतम्।

सुधामृतरसं प्राश्यं क्षीरमांसरसाशिना॥९९॥

नष्टशुक्रक्षतक्षीणदुर्बलव्याधिकर्शितान्।

स्त्रीप्रसक्तान् कृशान् वर्णस्वरहीनांश्च बृंहयेत्॥१००॥

कासहिध्माज्वरश्वासदाहतृष्णास्त्रिपित्तनुत्।

पुत्रदं छर्दिमूर्च्छाहृद्योनिमूत्रामयापहम्॥१०१॥

स ०-जीवनीयो गणस्तथा शुण्ठ्यादयस्तैर्जीवनीयादिगणादिभिः कर्षांशैः सूक्ष्मचूर्णितैः क्षीरधात्र्यादिरसयुक्तं घृतस्य प्रस्थंद्वात्रिंशत्पलानि पचेत्। द्राक्षाक्षोडादीन्य(त्य)त्रादिशब्देन नारिकेलनिकोचादिपरिग्रहः। शीते घृते माक्षीकस्य षोडशपलानि, शर्कराचूर्णपलानि पञ्चाशत्, मरिचादीनि द्विकार्षिकाणि चूर्णितानि प्रक्षिप्य तस्मान्मात्रां यथाबलं लिह्यात्। अमृतप्राशमेतत्संज्ञं घृतं नराणाममृततुल्यम्, महागुणत्वात्।

यथा नागानां सुधा देवानाममृतम्। अत एवैतत् सुधामृतरसम्। प्राश्यं-भोज्यं, क्षीरमांसरसाशिना। एतच्च घृतं नष्टशुक्रादीन् बृंहयेत्। कासादिनुत्। पुत्रदम्। छर्द्यादिघ्नम्। अत्र च मधुरस्निग्धबृंहणानां द्राक्षादीनामपि यथालाभं कर्षप्रमाणमधिकं वा योज्यम्। यथा सामान्यपरिभाषोक्ता कर्षमात्रा परिपूर्णा स्यादिति।

आ० र०- अमृतप्राशमाह-जीवनीयो घण इति। वीराविदारी। पयस्या-दुग्धिका। मधुरादिगुणं फलं०तच्च द्राक्षाक्षोडादि प्रसिद्धं ग्राह्यमित्यर्थः। विनीय-निक्षिप्य। सुधापाताले, अमृतं-स्वर्गे, ताभ्यां तुल्यरसमिदं घृतं नराणाममृतम्। अत एवामृतप्राशाख्यम्।" रसायनमिवर्षीणाममराणामिवामृतम्। सुधेवोत्तमनागानां भैषज्यमिदमस्तु ते॥" (ह. सू. अ. १८/१७) इति मन्त्रलिङ्गात्।

श्वदंष्ट्रोशीरमञ्जिष्ठाबलाकाश्मर्यकट्टणम्।

दर्भामूलं पृथकूपर्णी पलाशर्षभकौ स्थिराम्॥ १०२॥

पालिकानि पचेत्तेषां रसे क्षीरचतुर्गुणे।

कल्कैः स्वगुप्ताजीवन्तीमेदर्षभकजीवकैः॥ १०३॥

शतावर्यर्द्धिमृद्वीकाशर्कराश्रावणीबिसैः।

प्रस्थः सिद्धो घृताद्वातपित्तहृद्रोगशूलनुत्॥ १०४॥

मूत्रकृच्छ्रप्रमेहार्शःकासशोषक्षयापहः।

धनुःस्त्रीमद्यभाराध्वखिन्नानां बलमांसदः॥ १०५॥

स० -श्वदंष्ट्रादीनि पालिकानि, तेषां रसे क्षीरचतुर्गुणे स्वगुप्तादिभिः कल्कैर्घृतात् प्रस्थः सिद्धो वातपित्तहृद्रोगशूलनुत्। मूत्रकृच्छ्रादिघ्निः। तथा, धनुरादिखिन्नानां बलमांसदः।

आ० र०- घृताम्तरमाह-श्वदंष्ट्रोशीरेति। श्वेदंष्ट्रया षोडशगुणे जले चतुर्थांशावशिष्टं पाकानन्तरं योरसः। यस्माच्चतुर्गुणं क्षीरं। अ.....करुणा एव हृतहृदयता।

मधुकाष्टपलद्राक्षाप्रस्थक्काथे पचेद्घृतम्।

पिप्पल्यष्टपले कल्के प्रस्थं सिद्धे च शीतले॥ १०६॥

प्रुथगष्टपलं क्षौद्रशर्कराभ्यां विमिश्रयेत्।

समसक्तु क्षतक्षीणरक्तगुल्मेषु तद्धितम्॥ १०७॥

स० -मधुयष्ट्या आष्टौ पलानि, द्राक्षायाः षोडश, एतत्काथे पिप्पल्यष्टपले घृतप्रस्थं पचेत्। घृते च सिद्धे सुशीते सति क्षौद्रशर्करयोः पृथगष्टपलं विमिश्रयेत्। एतच्च घृतं समसक्तु क्षत क्षीणे रक्तगुल्मे च हितम्।

आ० र०- घृतान्तरमाह-मधुकाष्टपलेति। तन्त्रिपटां समसुक्तौ।

धात्रीफलविदारीक्षुजीवनीयरसाद्धतात्।

गव्याजयोश्च पयसोः प्रस्थं प्रस्थं विपाचयेत्॥ १०८॥

सिद्धशीते सिताक्षौद्रं द्विप्रस्थं विनयेत्ततः।

यक्ष्मापस्मारपित्तासृक्कासमेहक्षयापहम्॥ १०९॥

वयःस्थापनमायुष्यं मांसशुक्रबलप्रदम्।

स० -धात्र्यादिरसस्य पृथक् प्रस्थं गव्याजयोः क्षीरयोः प्रस्थौ घृतस्य प्रस्थं च विपाचयेत्। सिद्धपूते च ततस्तस्मिन् घृते शर्कराक्षौद्रयोः प्रस्थौ द्वौ विनयेत्-क्षिपेत्। तत इति "अव्ययादित्वात्" तसिः। एतच्च यक्ष्मादिहरं तथा वयःस्थापनादिगुणम्।

आ० र०- घृतान्तरमाह-धात्रीफलेति। धात्रीफलरसादीनां नवानां नवप्रस्थः।

घृतं तु पित्तेऽभ्यधिके लिह्याद्वातेऽधिके पिबेत्॥ ११०॥

लीढं निर्वापयेत्पित्तमल्पत्वाद्धन्ति नानलम्।

आक्रामत्यनिलं पीतमूष्माणं निरुणद्धि च॥ १११॥

स० -पित्तेऽभ्यधिके घृतं लिह्यात्। वातेऽधिके घृतं पिबेत्। लीढं तु घृतं निर्वापयेत्-संशमयेत्। अनलं च न हन्ति लीढं घृतम्। कुतः ? अल्पत्वात्। अत्रायं सद्भावार्थः,-किल पीतेनाधिकेन द्रवतया वह्नेर्मान्द्येनावश्यं भवितव्यम्। तथा च वक्ष्यति (ह्र.चि.अ.१०/३२)-"अग्नेर्निर्वापकं पित्तं रेकेण वमनेन वा।" इति। तच्चाभ्यधिकं पित्तं लीढं घृतं संशमयति। अल्पत्वाच्च हेतोरग्निं न हन्ति-मन्दस्याग्नेरधिकं मान्द्यं न जनयति। पीतं सद्धृतमनिलमाक्रामति-प्रसह्य जयति। ऊष्माणं-जाठरं वह्निं जाज्वल्यमानं, रुणद्धि-आश्वेव स्थगयति, शमं किञ्चिन्नयति।

आ० र०- त्घृतलेहपानयोर्विषयभेदमाह-घृतं त्विति। निर्वापयेत्०शमयेत्, शीतत्वात्। लेह्यं शीतस्पर्शं भवति। अल्पत्वात्-वह्नेरनावरकत्वात्, असृतावयवत्वात्। अल्पदेशे व्यापित्वं ह्यल्पव्तम्। ऊष्माणं-अग्निम्।

क्षामक्षीणकृशाङ्गानामेतान्येव घृतानि तु।

त्वक्क्षीरीशर्करालाजचूर्णैः स्त्यानानि योजयेत्॥ ११२॥

सर्पिर्गुडान् समध्वंशान् कृत्वा दद्यात्पयोऽनु च।

रेतो वीर्यं बलं पुष्टिं तैराशुतरमाप्नुयात्॥ ११३॥

स० -क्षामाणां क्षीणानां कृशाङ्गानां च नृणामेतान्येव पूर्वोक्तानि घृतानि स्त्यानानि त्वकक्षीरीशर्करालाजचूर्णैः सह योजयेत्। सर्पिर्मिश्रान् गुडान् समध्वंशान् कृत्वा च दद्यात्। शर्करायाः पलानि पञ्चाशत् मधुनः पलानि षोडशात्र देयानि। मुनिना ह्येवमुक्तम् (च.चि.अ.११/६०)-धात्रीविदारीक्षुरसप्रस्थैः प्रस्थं घृतात्पचेत्। शर्करार्धतुलां शीते क्षौद्रार्धप्रस्थमेव च॥ क्षिप्त्वा सर्पिर्गुडान् कुर्याद्विक्काश्वासज्वरापहान्।" इति। पय इत्यादि। अनन्तरं पयः पिबेत्। तैः_सर्पिर्गुडैः, रेतोवीर्यादीन् शीघ्रतरं प्राप्नोति।

आ० र०- सर्पिर्गुडानाह-क्षामक्षीणकृशाङ्गानामिति। क्षामः-शुक्रेण हीनः। क्षीणे-बलवीर्याभ्याम्। कृशो-मासांदिभिः। स्त्यानानि घृतानि चूर्णैर्योजयेत्। तैः-मधुचतुर्थांशयुक्तैः। सर्पिर्गुडान्-घृतमोदकान् कृत्वा, रोगिणे दद्यात्। तदनु दुग्धं दद्यात्। सङ्ग्रहे तु (चि.अ. ५)

-"बला विदाई हस्वं च पञ्चमूलं पुनर्नवा। पञ्चनां क्षीरिवृक्षाणां शुङ्गा मुष्ट्यंशिकास्तथा॥एषां कषाये द्विक्षीरे विदार्याजरसांशिके। जीवनीयैः पचेत्पिष्टैरक्षमात्रैर्घृताढकम्॥सितापलानि पूते च इति द्वात्रिंशदावपेत्। गोधूमपिप्पलीवांशीचूर्णं शृङ्गाटकस्य च॥समाक्षिकं कौडविकं तत्सर्वं सजमूर्च्छितम्। स्त्यानं सर्पिर्गुडान्कृत्वा भूर्जपत्रेण वेष्टयेत्॥तान् जग्ध्वा पालिकान् क्षीरं मद्यं त्वनु पिबेत्कफे। शोषे कासे क्षते क्षीणे श्रमस्त्रीभारकर्षिते॥रक्तनिष्ठीवने तापे पीनसे चोरसि स्थिते। शस्ता पार्श्वशिरः शूले भेदे च स्वरवर्णयोः॥शृ९शु)ङ्गाः-पल्लवाङ्कुराः। मुष्टिः-पलम्। द्विक्षीरे-द्विगुणक्ष्◌ाः ईरे। [विदार्याज] रसः, अंशिकः-समभागो, यस्य तस्मिन्। गोधूमचूर्णादिपञ्चकं प्रत्येकं कुडवांशम्। बूर्जपत्रवेष्टनं स्थापनासौकर्यार्थम्। 'मद्यं तु कफे' इति वचनात् वाते पित्ते च क्षीरम्। शर्करया श्रृते क्षीर घृततैलाढकत्रये। चूर्णीकृताः क्षिपेत्पक्वसान्द्रे दशापलाः पृथक्॥द्राक्षात्मगुप्तावर्षाभूसमङ्गाभीरुपिप्पलीः। तद्वद्विदार्यामलके प्रस्थार्धं विश्वभेषजम्॥यष्ट्याह्वसौवर्चलयोर्द्विपलं मरिचस्य च। क्षामः क्षीणः कृशः शुष्यंस्तान् खादेत्पालिकैर्गुडैः॥तथा सद्यो रसादीनाम् वृध्द्यापुष्टिं समश्नुते॥तद्वत्-पृथक् दशपले। पालिकैर्गुडैः-पालिकान् गुडन् कृत्वा। गोक्षारादाढकं सर्पिःप्रस्थामिक्षुरसाढकम्। रसाद्विदार्याः कुडवं रसात्प्रस्थं च तैत्तिरात्॥दद्यात् सिध्यति तस्मिंस्तु पिष्टानिक्षुरसैरिमान्। मधूकपुष्पकुडवं कुडवं च प्रियालतः॥पलद्वयं तवक्षीर्याः खर्जूराणि च विंशतिम्। पृथग्बभीतकान्मज्ज्ञः पिप्पल्याश्च चतुर्थिकाम्॥त्रिंशत्पलानि खण्डच्च मधूकात्पाणिमानिकाम्। तथाऽर्धपलिकान्यत्र जीवनीयानि दापयेत्॥सिद्धे द्विकुडवं क्षौद्रावीते दत्वा च मोदकान्। करयेन्मरिचाजाजीप-लचूर्णावचूर्णावचूर्णितान्॥वातासृक्पित्तरोगेषु क्षतकासक्षयेषु च। क्षीणौजःस्वरशुक्रेषु योनिदोषेषु संस्रवे॥मृतप्रजासु वद्न्ध्यासु हिता गर्भस्य स्रुतौ।" इति। चतुर्थिकां०पलम्। पाणिमानिकां-कर्श◌ाः म्। मरिचाजाज्योः पृथक्पलम्।

वीतत्वगस्थिकृष्माण्डतुलां स्विन्नां पुनः पचेत्।

घट्टयन् सर्पिषः प्रस्थे क्षौद्रवर्णेऽत्र च क्षिपेत्॥११४॥

खाण्डाच्छतं कणाशुण्ट्योर्द्विपलं जीरकादपि।

त्रिजातधान्यमरिचं पृथगर्धपलांशकम्॥११५॥

अवतारितशीते च दत्वा क्षौद्रं घृतार्धकम्।

खजेनामथ्य च स्थाप्यं तन्निहन्त्युपयोजितम्॥११६॥

कासहिध्माज्वरश्वासरक्तपित्तक्षतक्षयान्।

उरःसन्धानजननं मेधास्मृतिबलप्रदम्॥११७॥

अश्विभ्यां विहितं ह्यं कूष्माण्डकरसायनम्।

स० -वीतानि-अपासितानि, त्वगस्थीनि यस्मात्कूष्माण्डात् तस्य तुलां स्निग्नां सतीं पुनः सर्पिषः प्रस्थे घट्टयन् पचेत्। अत्र च कूष्माण्डे माक्षिकवर्णे जाते सति खाण्डाच्छतं, फणाशुण्ठ्योर्द्विपलं, जीरकाच्च पलद्वयं, त्रिजातकादि प्रत्येकमर्धपलांशकं, क्षिपेत्। अवतारिते शीते चास्मिन् क्षौद्रस्य षोडश पलानि दत्वा, खजेन-दर्व्या, आमथ्य-विलोड्य, पश्चाद्भाण्डे स्थाप्यम्। एवं ह्यस्य सम्यग् घृतादिसमयोगः स्यात्। उपयोजितं च तत् कासादीन् हन्ति। उरःसन्धानं करोति। मेधादिप्रदम्। अश्विभ्यां-दस्राभ्यां, निर्दिष्टं कूष्माण्डकाख्यं रसायनम्।

आ० र०- कूष्माण्डकरसायनामाह-वीतत्वगस्थिकूष्माण्डतुलामिति। स्विन्नां त्यक्तद्रवां शीतीकृतां पुनः पचेत्। क्षौद्रवर्णे कूष्माण्दे। शतं-पलशतम्। खण्डप्रक्षेपसमये स्वेदनान्निर्गतः कूष्माण्डरसः प्रक्षेप्य इति वृद्धवैद्याः।

पिबेन्नागबलामूलस्यार्धकर्षाभिवर्धितम्॥११८॥

पलं क्षीरयुतं मासं क्षीरवृत्तिरनन्नभुक्।

एष प्रयोगः पुष्ट्यायुर्वलवर्णकरः परम्॥११९॥

मण्डूकपर्ण्याः कल्पोऽयं यष्ट्या विश्वौषधस्य च।

स० -नागबलामूलस्य पलं क्षीरयुतं पिबेत्। किम्भूतम्? अर्धकर्षादिवर्धितं मासं यावत्। किम्भूतो नरः? क्षीरवर्तनोऽनन्नादः सन्। अयं प्रयोगः सुष्ठु पुष्ट्यादिकरः। एवमेव कल्पो मण्डूकपर्ण्याः यष्ट्याः शुण्ठ्याश्च कार्यः।

आ० र०- नागबलारसायनमाह-पिबेदिति। वर्धितं अर्धकर्षेणैव, अष्टभिर्दिनैः पलं भवति। अतः पलमेव, यावन् मासः पूर्यते।

अन्यद्रसायनमाह-मण्डूकपर्ण्या इति। अयं-नागबलोक्तः। सङ्ग्रहे तु (चि. अ. ५) -"पादशेषं जलद्रोणे पचेन्नागबला तुलाम्। तेन क्वाथेन तुल्यांशं घृतं क्षीरं च साधयेत्॥ पलार्द्धिकै श्चातिबलायष्टीपुनर्नवैः। प्रपौण्डरीककाश्मर्यप्रियालकपिकच्छुभिः॥ अश्वगन्धासिताभीरुमेदायुग्मत्रिकण्टकैः। काकोलीक्षीरकाकोलीक्षीरशुक्लर्धिजीवकैः॥ म्णालबिसखर्जूरश्रृङ्गाटककसेरुकैः। एतन्नागबलासर्पिः पित्तं रक्तं क्षतं क्षयम्॥ जयेत्तृड्भ्रमदाहांश्च बलपुष्टिकरं परम्। वर्ण्यमायुष्यमोजस्यं वलीपलितनाशनम्॥ उपयुज्य च षण्मासं वृद्धोऽपि तरुणायते। क्षीरशुक्ला-क्षीरविदारी। मृणालबिसे-सूक्ष्मस्थूलपद्ममूले। शर्करापिप्पलीचूर्णैः सर्पिषा माक्षिकेण च॥ संयुक्तं वा श्रृतं क्षीरं पिबेत्कासज्वरापहम्। फलाम्लं सर्पिषा भृष्टं विदारीक्षुरसे कृतम्॥ स्त्रीषु क्षीणः पिबेद्यूषं जीवनं बृंहणं परम्। सक्तूनां वस्त्रपूतानां मन्थं क्षौद्रघृतान्वितम्। यवान्नसात्म्यो दीप्ताग्निः क्षतक्षीणः। जीवनीयोपसिद्धं वा जाङ्गलं घृतभर्जितम्॥ रसं प्रयोजेत् क्षीणो व्यञ्जनार्थं सशर्करम्॥ व्यञ्जनार्थं-शाकार्थम्। गोमाहिष्यश्वनागाजैः क्षीरैर्मांसरसैस्तथा। यवान्नं भोजयेद्यूषैः फलाम्लैर्वा घृताप्लुतैः॥" इति।

पादशेषं जलद्रोणे पचेन्नागबलातुलाम्॥ १२०॥

तेन क्वाथेन तुल्यांशं घृतं क्षीरं च साधयेत्।

पलार्धिकैश्चातिबलाबलायष्टीपुनर्नवैः॥ १२१॥

प्रपौण्डरीककाश्मर्यप्रियालकपिकच्छुभिः।

अश्वगन्धासिताभिरुमेदायुग्मत्रिकण्टकैः॥ १२२॥

काकोलीक्षीरकाकोलीक्षीरशुक्लाद्विजीवकैः।

मृणालबिसखर्जूरश्रृङ्गाटककसेरुकैः॥ १२३॥

एतन्नागबलासर्पिः पित्तरक्तक्षतक्षयान्।

जयेत्तृड्भ्रमदाहांश्च बलपुष्टिकरं परम्॥ १२४॥

वर्ण्यमायुष्यमोजस्यं वलीपलितनाशनम्।

उपयुज्य च षण्मासान् वृद्धोऽपि तरुणायते॥ १२५॥

स ० -नागबलायास्तुलां वारिद्रोणे पादशेषं यथा भवति तथा पचेत्। तेन-नागबलाक्काथेन, तुल्याशं घृतं तथा क्षीरं तथा पलार्धप्रमाणैरतिबलादिभिः कल्कैश्च साधयेत्। एतन्नागबलासर्पिः पित्तरक्तादीन् जयेत्। तथा, सुष्ठु बलादिकरम्। तथा, वर्णाय हितमायुष्यमोजस्यं वलीपलितघ्नं च। तथा, षण्मासा नुपयुज्येदं घृतं वृद्धोऽपि तरुण इवाचरति।

दीप्तेऽग्नौ विधिरेष स्यात्

स० -दीप्ते-समिद्धे, अग्नौ सत्येष विधिः स्यात्।

आ० र०- उक्तस्य क्षतकासोपचारस्य विश्ः अमाह-दीप्तेऽग्नाविति।

मन्दे दीपनपाचनः।

यक्ष्मोक्तः क्षतिनां शस्तो, ग्राही शकृति तु द्रवे॥ १२६॥

स० -मन्देऽग्नौ दीपनपाचनः। यक्ष्मोक्तो-राजयक्ष्मण्युक्तः, क्षतिनां शस्त उपक्रमः। द्रवे तु शकृति ग्राही उपक्रमः।

आ० र०- मन्देऽग्नावुपचारान्तरमाह-मन्द इति। यक्ष्नोक्तः-राजयक्ष्मचिकित्सितोक्तः।

द्रवमलस्योपचारान्तरमाह-ग्राहीति। ग्राही-यक्ष्मोक्त एव।

दशमूलं स्वयंगुप्तां शङ्खपुष्पीं शठीं बलाम्।

हस्तिपिप्पल्यपामार्गपिप्पलीमूलचित्रकान्॥ १२७॥

भार्गीं पुष्करमूलं च द्विपलांशं यवाढकम्।

हरीतकीशतं चैकं जलपञ्चाढके पचेत्॥ १२८॥

यवस्वेदे कषायं तं पूतं तच्चाभयाशतम्।

पचेद्गुडतुलां दत्त्वा कुडवं च पृथग्घृतात्॥ १२९॥

तैलात्सपिप्पलीचूर्णात्सिद्धशीते च माक्षिकात्।

लेहं द्वे चाभये नित्यमतः खादेद्रसायनात्॥ १३०॥

तद्वलीपलितं हन्याद्वर्णायुर्वलवर्धनम्।

पञ्चकासान् क्षयं श्वासं सहिध्मं विषमज्वरम्॥ १३१॥

मेहगुल्मग्रहण्यर्शोहृद्रोगारुचिपीनसान्।

अगस्त्यविहितं धन्यमिदं श्रेष्ठं रसायनम्॥ १३२॥

स०- दशमूलादिपुष्करान्तं पृथक् द्विपलप्रमाणम्। यवानामाढकं-चतुःषष्टिपलानि। हरीतकीफलानमेकं शतम्। हरीतकीफलानामेकं शतम्। एतत्सर्वं जलस्य पञ्चाढके पचेत्। यवस्वेदे च सति तं कषायं पूतंगालितं, तच्च स्विन्नमभयाशतं गुडतुलां दत्त्वा तथा घृततैलपिप्पलीचूर्णानां प्रत्येकं कुडवं दत्त्वा पचेत्। सिद्धे शीते च लेहे माक्षिककुडवं दत्त्वा, अतो-लेहाख्याद्रसायनात्, सत्रिभागपलमात्रं द्वे च हरीतक्यौ नित्यं खादेत्। तच्च भुक्तं वलीपलितं हन्यात्। वर्णादिवर्धनं तथा पञ्चकासादीन् हन्ति। अगस्त्येन महर्षिणा निर्मितमेतद्रसायनं धन्यं-श्रेष्ठमेतत्। अत्र च तैल घृतमधूनां समांशानामप्यविरोधः, पाकाच्छक्तयन्तरोत्पत्तेः।

आ० र०- अगस्त्यहरीतकीमाह-दशमुलमिति। यवस्वेदे सति-यदा यवाः स्विन्नास्तदा कषायः सिद्धो भवतीत्यर्थः लेहं पलद्वयमितम्।

दशमूलं बलां मूर्वां हरिद्रे पिप्पलीद्वयम्।

पाठाश्वगन्धापामार्गस्वगुप्तातिविषामृताः॥ १३३॥

बालबिल्वं त्रिवृद्दन्तीमूलं पत्रं च चित्रकात्।

पयस्यां कुटजं हिंस्रां पुष्पं सारं च बीजकात्॥ १३४॥

बोटस्थविरभल्लातविकङ्कतशतावरीः।

पूतीकरञ्जशम्याकचन्द्रलेखासहाचरम्॥ १३५॥

सौभाञ्जनकनिम्बत्वगिक्षुरं च पलांशकम्।

पथ्यासहस्रं सशतं यवानां चाढकद्वयम्॥ १३६॥

पचेदष्टगुणे तोये यवस्वेदेऽवतारयेत्।

पूते क्षिपेत्सपथ्ये च तत्र जीर्णगुडात्तुलाम्॥ १३७॥

तैलाज्यधात्रीरसतः प्रस्थं प्रस्थं ततः पुनः।

अधिश्रयेन्मृदावग्नौ दर्वीलेपेऽवतार्य च॥ १३८॥

शीते प्रस्थद्वयं क्षौद्रात्पिप्पलीकुडवं क्षिपेत्।

चूर्णीकृतं त्रिजाताच्च त्रिपलं निखनेत्ततः॥ १३९॥

धान्ये पुराणकुम्भस्थं मासं खदेच्च पूर्ववत्।

रसायनं वसिष्ठोक्तमेतत्पूर्वगुणाधिकम्॥ १४०॥

स्वस्थानां निष्परीहारं सर्वर्तुषु च शस्यते।

स० -दशमूलादि इक्षुरकान्तं पलप्रमाणम्। बोटः-अलम्बुसा। स्थविरं-शैलेयम्। चन्द्रलेखा-बाकुची। हरीतकीनामेकादशशतानि यवानामाढकौ द्वौ अष्टगुणे जले पचेत्। यवस्वेदे सति चावतारयेत्। तस्मिन् क्वाथे पूते पथ्यासहितां पुराणगुडात्तुलां तैलादीनां पृथक्पृथक् प्रस्थं क्षिपेत्। ततः-अनन्तरं, पुनः पचेत्। मृदौ वह्नौ दर्वीलेपे सत्यवतार्य शीते सति प्रस्थद्वयं क्षौद्रात् पिप्पलीनां चतुष्पलं चूर्णितं त्रिजाताच्च त्रिपलं क्षिपेत्। ततः-अनन्तरं, पुराणकुम्भस्थं-घृतरूढभाण्डस्थं, धान्यमध्ये मासं नीखनेत्। मासादूर्ध्वं पूर्ववत् खादेत्। एतद्रसायनं वसिष्ठेन कथितम्। अतस्त्यलेहाद्गुणैरधिकं स्वस्थानां निष्परीहारं सर्वर्तुष्विष्यते, तन्त्रकृद्भिरिति शेषः।

आ० र०- वसिष्ठहरीतकीमाह-दशमूलं बलामिति। बोटस्थविरो-मुडी। चन्द्रलेखा-बाकुची। सहाचरं-कुरण्टकः। इक्षुरः-कोकिलाक्षः। एतत्सर्वं पलांशकं-प्रत्येकं पलमात्रम्। सपथ्ये-हरीतक्येकादशशतीयुक्ते। पूर्ववत्लेहं द्वे चापथ्ये।

पालिकं सैन्धवं शुण्ठी द्वे च सौवर्चलात्पले॥ १४१॥

कुडवांशानि वृक्षाम्लं दाडिमं पत्रमार्जकात्।

एकैकां मरिचाजात्योर्धान्यकाद् द्वे चतुर्थिके॥ १४२॥

शर्करायाः पलान्यत्र दश द्वे च प्रदाययेत्।

कृत्वा चूर्णमतो मात्रामन्नपानेषु दापयेत्॥ १४३॥

रुच्यं तद्दीपनं बल्यं पार्श्वार्तीश्वासकासजित्।

स ० -सैन्धवं-लवणं, पलप्रमाणम्। शुण्ठी पलप्रमाणा। पालिकमिति पलं परिमाणमस्येति ठक्। पालिकं पालिकी चेति "नपुंसकमनपुंसकेन" इत्येकशेषः। सैवर्चललवणाच्च द्वे पले। कुडवप्रमाणानि वृक्षाम्लादीनि। आर्जकं-कुठेरकम्, तस्मात्पत्रम्। एकामेकां मरिचाजाज्योश्चतुर्थिकां-पलसंज्ञाम्, धान्यकाट् द्वे चतुर्थिके, शर्करापलानि च द्वादशात्र देयानि। तथा च मुनिः (च. चि. अ. ११/८२)-"पालिकं सैन्धवं शुण्ठी" इत्यारभ्य यावत् "शर्करायाः पलान्यत्र दश द्वे च प्रदापयेत्। कृत्वा चूर्णमतो मात्रा" इत्यादि। तस्मादत्राप्ययं ग्रन्थो निर्दिष्टो बोध्यः। प्रमादाच्च केचिन्न पठन्ति। अयं चात्रैवं वक्ति-"रुच्यं तद्दीपनं" इत्यादि। शर्करामन्तरेण तु रुच्यत्वमस्य कथमिवोपपद्यते ? तस्माद्युक्तोऽत्र शर्कराप्रयोग इति। एतच्चूर्ण कृत्वा, अतः- अस्माच्चूर्णात्, मात्रां यथोचितामन्नपानेषु दापयेत्, वैद्य इति शेषः। एतच्चूर्णं रुच्यं दीपनं बल्यं पार्श्वाद्यार्तिजित्।

आ० र०- षाडवं चूर्णमाह-पालिकमिति। शुण्ठ्यपि पालिकी। आर्जकात्-पर्णाशात्, पत्रम्। अत्र-पलविंशतौ।

एकां षोडशिकां धान्याद् द्वे द्वे चाजाजिदीप्यकात्॥ १४४॥

ताभ्यां दाडिमवृक्षाम्ले द्विर्द्विः सौर्वचलात्पलम्।

शुण्ठ्याः कर्षं दधित्थस्य मध्यात्पञ्च पलानि च॥ १४५॥

तच्चूर्णं षोडशपलैः शर्कराया विमिश्रयेत्।

शाडवोऽयं प्रदेयः स्यादन्नपानेषु पूर्ववत्॥ १४६॥

स० -धान्यकादेकां षोडशिकां-कर्षसंज्ञाम्। अजाजीदीप्यकाट् द्वे द्वे षोडशिके। ताभ्यां-अजाजीदीप्यकाभ्यां मिश्रिताभ्यां सकाशात्, दाडीमवृक्षाम्ले द्विर्द्विः-प्रत्येकं चतस्रः षोडशिका इत्यर्थः। एवमष्टौ कर्षा दाडिमस्य, अष्टौ वृक्षाम्लस्य। तथा सौवर्चलात् पलं, शुण्ठ्याः कर्षं, कपित्थस्य मज्जतः पञ्च पलानि। तत्-एतत्, चूर्णं शर्करायाः षोडशपलैः सम्मेलयेत्। अयं षोडवोऽन्नपानेषु पूर्ववत् प्रदेयः स्यात्। अर्हार्थे कृत्यः। केचित् षोडशिकां पलमित्याहुः।

आ० र०- षाडवान्तरमाह-एकां षोडशिकामिति। षोडशिकां-कर्षम्। ताभ्यां-मिलिताभ्यां पलमिताभ्याम्। द्विर्द्विद्विर्भूत्वा द्विः, प्रत्येकं चतुः पलमिते दाडिमवृक्षाम्ले। षादवः-षड्रसंयोगात्।

विधिश्च यक्ष्मविहितो यथावस्थं क्षते हितः।

स० -क्षते चावस्थावशाद्यक्ष्मणि यो विहितो विधिः स हितः।

आ० र०- यक्ष्मचिकित्सितमैदिशति-विधिश्चेति।

निवृत्ते क्षतदोषे तु कफे वृद्धे उरः शिरः॥ १४७॥
दाल्यते कासिनो यस्य स ना धूमान् पिबेदिमान्।

स० -क्षतदोषे च निवृत्ते-शान्ते सति, कफे वृद्धे यस्य कासवतः पुंस उरः शिरश्च दाल्यते-पाठ्यत इव, सः-कासी, धूमानिमान्-द्विमेदादीनां, पिबेत्।

आ० र०- धूमपानमाह-निवृत्त इति। दाल्यते-भिद्यते भिद्यमानमिव व्यथते। ना-पुरुषः। इमान्-वक्ष्यमाणान्।

द्विमेदाद्विबलायष्टिकल्कैः क्षौमे सुभावितेॽ॥ १४८॥

वर्तिं कृत्वा पिबेद्धूमं जीवनीयघृतानुपः।

स० -द्विभेदादिभिः कल्कैः क्षौ-सुभाविते वर्तिं कृत्वा धूमं पिबेत्। जीवनीयाख्यं घृतमनु-पश्चात्, पिबेत्।

आ० र०- धूममाह-द्विमेदाद्विवचायष्टीकल्कैरिति। सुभाविते-पुनःपुनर्लित्पे।

मनःशिलापलाशाजगन्धात्वक्क्षीरिनागरैः॥ १४९॥

तद्वदेवानुपानं तु शर्करेक्षुगुडोदकम्।

स० -मनःशिलादिभिस्तद्वदेव-द्विमेदादिभिर्यथा धूमं पिबेत्। अनु शर्करोदकमिक्षुरसं गुडोदकं वा पिबेत्। उदकसादृश्यादिक्षुरसोऽपीक्षूदकशब्देन गृहीतः।

आ० र०- धूमान्तरमाह-मनःशिलेति। तद्वदेव-कल्कैः क्षौमे सुभाविते वर्तिं कृत्वेति। शर्करोदकाद्यन्यतममनुपानम्।

पिष्ट्वा मनःशिलां तुल्यामार्द्रया वटशुङ्गयाॽ॥ १५०॥

ससर्पिष्कं पिबेद्धूमं तित्तिरिप्रतिभोजनम्।

स० -मनः शिलामार्द्रया वटशुङ्गया तुल्यां पिष्ट्वा सह सर्पिषा धूमं सतित्तिरिप्रतिभोजनं पिबेत्।

आ० र०- धूमान्तरमाह-पिष्ट्वेति। तित्तिरिमांसरसप्रधानं भोजनं यत्र धूमे तम्। इति क्षतजासचिकित्सा।

क्षयजे बृहणं पूर्वं कुर्यादग्नेश्च वर्धनम्॥ १५१॥

स० -क्षयजे कासे पूर्वोक्तं बृंहणं कुर्यादग्निसन्दीपनं च।

आ० र०- अथ क्षयकासचिकित्सा। तत्र प्रथमोपचारमाह-क्षयजे बृंहजमिति।

बहुदोषाय सस्नेहं मृदु दद्याद्विरेचनम्।

स० -बहुदोषाय-प्रभूतादोषाय क्षयकासिने, सह स्नेहेन मृदु विरेचनं दद्यात्।

आ० र०- विरेचनमाह-बहुदोषायेति।

तदेवाह-

शम्याकेन त्रिवृतया मृद्वोकारसयुक्तया॥ १५२॥
तिल्वकस्य कषायेण विदारीस्वरसेन च।
सर्पिः सिद्धं पिबेद्युक्त्या क्षीणदेहो विशोधनम्॥ १५३॥

स० -शम्याकेन्-कर्णिकारेण, अथवा त्रिवृतया द्राक्षारसयुक्तया तिल्वकस्य कषायेण विदारीस्वरसेन च सर्पिः सिद्धं युक्त्यादेशकालादिवलेन, क्षीणदेहो विशोधनं पिबेत्।

आ० र०- तदेव विरेचनत्रयमाह-शम्याकेनेति। शम्याककल्केन सिद्धं सर्पिरेकम्। त्रिवृत्कल्कद्राक्षारसारसाभ्यां द्वितीयम्। रोध्रव्काथविदारीरसाभ्यां तृतीयम्।

पित्ते कफे धातुषु च क्षीणेषु क्षयकासवान्।

घृतं कर्कटकीक्षीरद्विबलासाधितं पिबेत्॥ १५४॥

स० -पित्ते क्षीणे कपादिषु च क्षीणेषु क्षयकासी कर्कटक्यादिपक्वं घृतं पिबेत्।

आ० र०- शमनं घृतमाह। पित्ते कफ इति। कर्कतश्रृङ्गीबलातिबलाकल्केन क्षीरेण च साधितम्।

विदारीभिः कदम्बैर्वा तालसस्यैश्च साधितम्।

घृतं पयश्च

स ० -विदारीभिरिति बहुवचनं क्षीरविदार्यादिव्यक्तिविशेषाणां ग्रहणार्थम्। एवं कदम्बैरित्यत्रापि धाराकदम्बादिग्रहणार्थम्। जातौ बहुवचनमित्यन्ये। तालसस्यैः- तालफलैर्वा, साधितं घृतं पयो वा पिबेत्।

आ० र०- घृतान्तरमाह-विदारीभिरिति। वाशब्दः पुर्वघृतापेक्षया, चशब्दस्य समुच्चयार्थत्वात्।

मूत्रस्यवैवर्ण्ये कृच्छ्रनिर्गमे॥ १५५॥

शूने सवेदने मेढ्रे पायौ सश्रोणिवङ्क्षणे।

घृतमण्डेन लघुनाऽनुवास्यो मिश्रिकेण वा॥ १५६॥

स० -मूत्रस्य वैवर्ण्ये कृच्छ्रनिर्गमे सति तथा मेढ्रे शूने सवेदने पायौ श्रोण्यां वङ्क्षणे चैवंविधे सति नरो लघुना घृतमण्डेनानुवास्यः। मिश्रिकेण वा-घृततैलेन, अनुवास्यः।

आ० र०-[अनुवासनमाह-मूत्रस्येति।] लघुना-लघुपञ्चमूलसिद्धेन। [घृतमण्डेन-]चिरस्थितस्य घृतस्याच्छभागेन। मिश्रकेण-वृद्धिचिकित्सिक्तेन सुकुमारकाख्येन "पचेत्पुनर्नवतुलां" (हृ. चि. अ. १३/४१) इत्यादिना।

जाङ्गलैः प्रतिभुक्तस्य वर्तकाद्या बिलेशयाः।

क्रमशः प्रसहास्तद्वत्प्रयोज्याः पिशिताशिनः॥ १५७॥

औष्ण्यात्प्रमाथिभावाच्च स्रोतोभ्यश्च्यावयन्ति ते।

कफं शुद्धैश्च तैः पुष्टिं कुर्यात्सम्यग् वहन् रसः॥ १५८॥

स ० -अनुवासानान्तरं जाङ्गलैर्मांसैः-हरिणैणाजादिभिः, तद्भावात्तत्सदृशैरपि। प्रतिभुक्तस्यानन्तरं तथैव पिशिताशिनः प्रसहाः-द्वीपिव्याघ्रादयः, प्रयोज्याः। नानुवासितमात्रस्य जाङ्गलमांसप्रतिभुक्तस्यैव प्रसहाः पिशिताशिनश्च योज्याः, अग्निमान्द्यभयात्। ते प्रसहाः प्रमाथिभावात् तथौष्ण्यात् कफोपलिप्तेभ्यः स्रोतोभ्यः कफं च्यावयन्ति। प्रमाथिद्रव्यलक्षणं च खारणदादौगदितम्। यथा-"स्रोतांसि दोषलिप्तानि प्रमथ्य यत्। प्रविश्य सोक्ष्म्यात्तैक्ष्ण्याच्च तत्प्रमाथीति संज्ञितम्॥" इति। तैश्च-स्रोतोभिः,शुद्धैः सम्यग्वहन् रसः पुष्टिं कुर्यात्।

आ० र०- अनुवासनशुद्धस्य मांसओपचारमाह-जाङ्गलैरिति। जाङ्गलैः-मृगादिमांसरसैः। प्रतिभुक्तस्य-शुध्यक्तेष्टदोषशान्तिर्यथा भवत्येवं भुक्तस्य। वर्तकाद्याः-विष्किराः। पिशिताशिन इति सर्वेषां विशेषणम्। प्रथम् विष्किरास्ततो बिलेशयास्ततः प्रसहा इति क्रमः। तद्वत्-प्रतिभोजनवत्, अग्निबलापेक्षया मात्रावृद्धिरित्यर्थः। प्रमाथिभावात्-लीनमलोल्लेखनसामर्थ्यात्। तैः-स्रोतोभिः। रसो-रसधातुः।

चविकात्रिफलाभार्गीदशमूलैः सचित्रकैः।

कुलत्थपिप्पलीमूलपाठाकोलयवैर्जले॥ १५९॥

श्रृतैर्नागरदुःस्पर्शापिप्पलीशठिपौष्करैः।

पिष्टैः कर्कटपृङ्ग्या च समैः सर्पिर्विपाचयेत्॥ १६०॥

सिद्धेऽस्मिंश्चूर्णितौ क्षारौ द्वौ पञ्च लवणानि च।

दत्त्वा युक्त्या पिबेन्मात्रां क्षयकासनिपीडितः॥ १६१॥

स० -चविकादिभिर्जले श्रृतैर्नागरादिभिः पिष्टैः समैः सर्पिर्विपाचयेत्। सिद्धेऽस्मिन् घृते क्षारौ द्वौ, पञ्च-सैधवादीनि लवणानि च, दत्त्वा मात्रां प्रकृतत्वात् घृतस्य पिबेत्, कफकासार्तः पुरुषः।

आ० र०- माम्सयोग्यस्य घृतमाह-चविकात्रिफलेन्ति। समैः-नागरादिभिः पञ्चभिरेकया कर्कटश्रृङ्गया, अन्यथा समैरिति व्यर्थं, प्रत्येकं समस्य परिभाषाप्रात्वात्।

कासमर्दाभयामुस्तापाठाकटूफलनागरैः।

पिप्पल्या कटुरोहिण्या काश्मर्या सुरसेन च॥ १६२॥

अक्षमात्रैर्घृतप्रस्थं क्षीरद्राक्षारसाढके।

पचेच्छोषज्वरप्लीहसर्वकासहरं शिवम्॥ १६३॥

स० -कासमर्दादिभिरक्षप्रमाणैः क्षीरद्राक्षारसयोर्मिश्रितयोराढके घृतप्रस्थं पचेत्। शोषादिहरं शिवं च-आरोग्यकरम्।

आ० र०- घृतान्तरमाह-कासमर्दाभयेति।

वृषव्याघ्रीगुडूचीनां पत्रमूलफलाङ्कुरात्।

रसकल्कैर्घृत पक्वं हन्ति कासज्वरारुचीः॥ १६४॥

स०-वृषादीनां प्रत्येकं पत्रमूलफलाङ्कुरात् रसकल्कैः पक्वं घृतं कासादीन् हन्ति।

आ० र०- घृतान्तरमाह-वृषव्याघ्रीगुडूचीनामिति। पत्रादीनां चतुर्णां रसैस्तेषामेव कल्कैः। ते च वृषादीनां प्रत्येकं ग्राह्याः।

द्विगुणे दाडिमरसे सिद्धं वा व्योषसंयुतम्।
पिबेदुपरि भुक्तस्य यवक्षारयुतं नरः॥ १६५॥
पिप्पलीगुडसिद्धं वा छागक्षीरयुतं घृतम्।

स० -अथवा दाडिमस्वरसे द्विगुणे व्योषकल्कसंयुतं सिद्धं घृतं भुक्तस्याहारस्योपरि यवक्षारयुतं पिबेत्। पिप्पलीगुडाभ्यां वा चतुर्गुणे घृते घृताच्चतुर्गुणे जले घृतसमे छागक्षीर इति पक्वं पिबेत्।

आ० र०- घृतान्तरमाह-द्विगुण इति। व्योषयुतं साधनकाले। यवक्षारयुतं पानकाले।

घृतान्तरमाह-पिप्पलीगुडसिद्धं वेति। पिप्पलीगुडयोः कल्केन छागक्षीरेण च सिद्धम्।

एतान्यग्निविवृद्ध्यर्थं सर्पिंषि क्षयकासिनाम्॥ १६६॥
स्युर्दोषबद्धकण्ठोरःस्रोतसां च विशुद्धये।

स० -एतानि पूर्वोक्तानि चव्यादिभिर्विपक्वानि घृतान्यग्निवर्धनानि क्षयकासिनां स्युः। दोषोपलिप्तकण्ठोरःस्रोतसां च विशुद्धये स्युः।

आ० र०- उक्तानां घृतानां दीपनत्वं स्रोतः शोधनत्वं चाह-एतनीति। वङ्गसेने तु (कास. श्लो. ९९) -"शुभदेशसमुद्भूतं समुद्धृतं मूल[मश्व]गन्धायाः। पुण्येऽहनि सङ्कृष्णं विपचेद्द्रोणेऽम्भसस्तुलामस्मात्॥ ज्ञात्वाऽष्टभागशेषं गृण्हीयातद्रसं सुपरितूतम्। द्वे चैवात्र

पलशते दद्याच्छागस्य शुद्धमांसस्य॥सर्पिःप्रस्थमथैकं गव्यं च पयश्चतुर्गुणे दद्यात्। कल्कानक्षसमांशानूर्ध्वमतः सम्प्रवक्ष्यामि॥काकोलीयुगमृद्धी द्वे मेदे जीवकं स्वयंगुप्ताम्। ऋषभकमेलां मधुकं मृद्वीकाहस्तिपिप्पल्यौ॥जीवन्तीमुपकुल्यां बलां विदारीं शतावरी चात्र। दत्वा सम्यग्विपचेत्सर्पिरथोद्धृत्य पूत्वा च॥मधुशर्करयोः कुडवं दत्वा भाण्डे शुभे स्थितं मृदितम्। लीढ्वा तत्पाणितलं यथेष्टमाहारमश्नीयात्॥क्षीणक्षतशिशुवृद्धाः क्षीणेन्द्रियवर्णहीनमांसाश्च। प्राश्य प्रापुः सद्यः पुष्टिबलारोग्यतेजांसि॥उपयुज्य सर्पिरेतत्सत्पतिवर्षो युवेव भूत्वाऽऽशु। बहुशः स्त्रियोऽधिगच्छति न चात्र शुक्रक्षयं लभते॥ पुत्रार्थिनी च नारी लभते पुत्रान् वयस्यतीतेऽपि वन्ध्या लभते पुत्रं सर्पिः प्राश्यैतदश्वगन्धाद्यम्॥ उपयुक्ते यः पुरुषस्त्रीन् मासान् सार्धमासं वा। नारीशतं स गच्छनैव भवेद्योषितां तृप्तिः॥ खालित्यवलीपतैर्न चास्यदेहोऽभिभूते क्षिप्रम्। वातव्याधिभिरार्तास्तथैव हृद्व स्तिरोगार्ताः॥ भुञ्जाना भाजमानाः सर्पिररोगा भवन्तीह। एवं जगद्धितार्थं सर्पिरिदं वाजिगन्धायाः॥श्रेष्ठं वाजीकरणं निर्दिष्टं पूर्वमश्विभ्याम्॥(शो. ९ ५)-किलीरशुक्तिंश्च तकेण लावान्निःव्काथवर्गैर्मधुरैस्यथाऽन्यैः। पचेद्धअत्ं तत्तु निषेव्यमाणं हन्यात्क्षातोत्थं क्षतजं च कासम्॥" इति। योगरत्ने तु-"षोडशभिर्जपात्रैः मृद्वीकायाः पलानि दश षट् च। अष्टौ मधुयुक्तपचनि (?)च्छागं उलार्धं स्यात्॥अवशिष्टपादतोयं पूतं शीतं कषायमवतार्य। दत्वा कषायतुल्यं पयो घनसर्पिषः प्रस्थम्॥ऋषबकजीवकमेदाविदारिवीरात्मगुप्तानाम्। भव्याक्रोडनिकोचकशृङ्गाटकपद्मबीजानाम्॥भागानक्षसमांशानावप्य च साधयेत्तु मृद्वग्नौ। सम्यक्सिद्धे तस्मिन् दद्यात्सितशर्करापलान्यष्टौ॥मधुनश्च पलान्यष्टौ चत्वारि पलानि पिप्पलीचूर्णात्। समसक्तुकघृतमेतज्जनकेश्वरपूजितं समुद्दिष्टम्। क्षीणे क्षतेऽल्पशुक्रे तद्बुधिरे पैत्तिकेषुरोगेषु। स्त्रीकामेषु च देयं बल्यं वृष्यं च घृतमेतत्॥" इति।

प्रस्थोन्मिते यवक्काथे विंशति विजयाः पचेत्॥१६७॥

स्विन्ना मृदित्वा तास्तस्मिन्पुराणात्षड्पलं गुडात्।

पिप्पल्या द्विपलं कर्षं मनोह्वाया रसाञ्जनात्॥१३८॥

दत्त्वाऽर्धाक्षं पचेद्धृयः स लेहः श्वासकासजित्।

स० -यवक्काथे प्रस्थप्रमाणे हरीतकीविंशतिं पचेत्। स्विन्नास्ताः-हरीतकीः, तस्मिन्-यवक्काथे, मृदुत्वा पुराणाद् गुडात् षट्पलं, पिप्पल्या द्विपलं, कर्षं मनःशिलायाः, रसाञ्जनादर्धकर्षं दत्त्वाऽस्मिन्क्काथे पुनः पचेत्। स लेहः श्वासकासजित्।

आ० र०- हरीतकीलेहमाह-प्रस्थोन्मित इति। ताः-हरीतकीः। तस्मिन्-यवक्काथे। मृदित्वा-निरस्थीक्त्य,मर्दनेन श्लक्ष्णीकुर्यादित्यर्थः। योगरत्ने तु (वङ्गसेने कासा श्लो.१७०)-" समूलपुष्पच्छदकण्टकार्यास्तुलां जलद्रोणपरिप्लुतां च। हरीतकीनां च शतं निदध्यात्तथाऽत्र पक्त्व चरणावशेषम्॥ गुडस्य दत्वा शतमेतदग्नौ वोपक्कमुत्तार्थ ततः सुशीते। कटुत्रिकं च त्रिपलप्रमाणं पलानि षट् पुष्परसस्य तत्र॥ क्षिपेच्चतुर्जातपलं यथाग्नि प्रयुज्यमानो विधिनाऽवलेहः। वातात्मकं पित्तकफोद्भवं च द्विदोषजं कासमपि त्रिदोषम्॥ क्षतोद्भवं च हन्यात्सपीनसं श्वासमुरः क्षतं च। यक्ष्माणमेकादशरूपमुग्रं भृगूपदिष्टं हि रसायनं स्यात्॥" पुष्परसस्य-मधुनः। 'तुलामादाय वासायाः पचेदष्टगुणे जले।.....नपादावशेषेण पाचयेदभयाढकम्॥ श्लक्ष्णचूर्णीकृतं विधात्खण्डाच्छुद्धात्तथा शतम्। शीतीभूते निदध्याच्च क्षौद्रस्याष्टौ पलानि तु॥ वंशोद्भवायाश्चत्वारि पिप्पल्यर्धपलं तथा। चतुर्जातपलं चैव चूर्णितं तत्र दापयेत्॥ रक्तपित्तं निहन्त्येषा कासं श्वासं तथा क्षयम्। विद्रधिं जठरं गुल्मं तृष्णाहृद्रोगपीनसान्॥ पलार्धं भक्षयेदस्या यथेष्टं चात्र भोजनम्।' इति।

श्वाविधां सूचयो दग्धाः सघृतक्षौद्रशर्कराः॥ १६९॥

श्वासकासहरा, बर्हिपादौ वा मधुसर्पिषा।

एरण्डपत्रक्षारं वा व्योषतैलगुडन्वितम्॥ १७०॥

लेहयेत्, क्षारमेवं वा सुरसैरण्डपत्रजम्।

लिह्यात् त्र्यूषणचूर्णं वा पुराणगुडसर्पिषा॥ १७१॥

स०-श्वाविधां सम्बन्धिभ्यः सुचयो दग्धा घृतक्षौद्रशर्करान्विताः श्वासकासहराः बर्हिणो-मयूरस्य, वा पादौ दग्धौ मधुसर्पिषा सह श्वासकासहरौ। अथवा, एरण्डपत्रस्य क्षारंव्योषतैल्लगुडयुरं लेहयेत्। एवं-पूर्वोक्तेन प्रकारेण, सुरसैरण्डपत्रजं क्षारं व्योषतैलगुडान्वितं लेहयेत्। अथवा त्र्यूषणचूर्णं पुराणगुडसर्पिषा लिह्यात्।

आ० र०- क्षारलेहमाह-श्वाविधामिति। सूचयः-शलाकाः,याभिस्ते पक्षिणः श्वानं विध्यन्ति।

क्षारलेहान्तरमाह-बर्हिपादौ वेति। बर्हिपादौ-मयूरचरणौ, मधुसर्पिर्भ्यां लीढे तद्वत्।

क्षारलेहान्तरमाह-एरण्डपत्रक्षारं वेति।

क्षारलेहान्तरमाह-क्षारमेवं वेति। एवं-व्योषाद्यन्वितम्। सुरसः-तुलसी।

लेहान्तरमाह-लिह्यादिति। सङ्ग्रहे तु (चि. अ. ५) -"चित्रकत्रिफलाजाजी-कर्कटाङ्ग्याकटुत्रिकम्। द्रक्षां च क्षौद्र सर्पिर्भ्यां लिह्यादद्याङ्कुडेन वा॥पाठामधुक-जीवन्तीत्वक्क्षीरीत्रिफलाघनम्। शठीद्विबृहतीद्राक्षापिप्पल्येलावितुन्नकम्॥ सारिवापुष्करजटाकर्कख्या रसाञ्जनम्। पुनर्नवा लोहरजस्त्रायमाण यवानिका॥वृद्धिस्तामलकी भार्गी विडङ्गं धन्वयासकम्। क्षारचित्रकचव्याम्लवेतसव्योषदारु च॥सर्वकासाञ्जयेल्लीढं तच्चूर्णं मधुसर्पिषा।" इति। पिप्पली-गजपिप्पली, इतरस्या व्योषेणोक्तत्वात्। वितुन्नकं-क्षुद्रमुस्तम्।

पद्मकं त्रिपला व्योषं विडङ्गं देवदारु च।

बला रास्ना च तच्चूर्णं समस्तं समशर्करम्॥ १७२॥

खादेन्मधुघृताभ्यां वा लिह्यात्कासहरं परम्।

तद्वन्मरिचचूर्णं वा सघृतक्षौद्रशर्करम्॥ १७३॥

स०-पद्मकादीनां समस्तं चूर्णं समशर्करम्। पद्मकादीनां चूर्णमेकतः, एकतः शर्कराचूर्णम्, तदुभयं संयोज्य खादेत्भक्षयेत्। अथवा, समशर्करमेव मधुघृताभ्यां मिश्रयित्वा लिह्यात्। तथैव मरिचचूर्णं घृतक्षौद्रशर्करायुतं लिह्यात्।

आ० र०- समशर्करं चूर्णमाह-पद्मकमिति। एकेन केनचित् समशर्करा मा भुदिति समस्तग्रहणम्। खादेन्मधुघृताभ्यां विनैव।

मरिचचूर्णमाह-तद्वदिति। लिह्यात्कासहरं परमिति तद्वच्छब्दार्थः।

पथ्याशुण्ठीघनगुडैर्गुटिकां धारयेन्मुखे।
सर्वेषु श्वासकासेषु, केवलं वा बिभीतकम्॥ १७४॥

स०-पथ्याशुण्ठीघनगुडैर्गुटिकां मुखे धारयेत् सर्वेष्वेव श्वासकासेषु। केवलं वा बिभीतकं मुखे धारयेदिति योज्यम्।

आ० र०- गुटिकामाह-पथ्याशुण्ठीघनगुडैरिति। बिभीतकधारणमाह-केवलं वेति।

पत्रकल्कं घृतभृष्टं तिल्वकस्य सशर्करम्।
पेया वोत्कारिका छर्दितृड्कासामातिसारजित्॥ १७५॥

स०-पत्रकल्कं तिल्वकस्य घृते भृष्टं सशर्करं छर्दिट्टडादिजित्। पेया वा पत्रस्य कल्के सिद्धा तद्वत्। अथवा, उत्कारिका पत्रकल्ककृता छर्द्यादिजित्।

आ० र०- पेयामुत्कारिकां चाह-पत्रकल्कमिति। तिल्वकपत्राण्यार्द्राणि पिष्ट्वा कल्कं कुर्यात्। तं घृतेन भर्जयेत्। तत्समेन तण्डुलपिष्टेन योजयेत्, पेयार्थमुत्कारिकार्धेन (र्धं च)। उत्कारिका-पुपलिका। सङ्ग्रहे तु (चि. अ. ५)-"गौरसर्षपगण्डीरविडङ्गव्योषचित्रकान्। साभयान् साधयेत्तोये यवागूस्तेन चाम्भसा॥ससर्पिर्लवणा कासे हिध्माश्वासे सपीनसे। पाण्ड्वामये क्षये शोषे कर्णशूले च शस्यते॥" इति। षण्डीरं-स्नुहीकाण्दम्।

कण्टकारीरसे सिद्धो मुद्गयूषः सुसंस्कृतः।
सगौरामलकः साम्लः सर्वकासभिषग्जितम्॥ १७६॥

स० -कण्टकार्याः क्काथे मुद्गयूषः सुसंस्कृतो-हिङ्गुसैन्धवादिना, सगौरामलकाम्लः सर्वकासेषु भिषग्जितं-औषधम्।

आ० र०- यूषमाह-कण्टकारी इति। सुसंस्कृतः-स्नेहलवणादिभिः। गौरामलकं-पीतवर्णमामलकम्।

वातघ्नौषधनिःक्काथे क्षीरं यूषान् रसानपि।
वैष्किरान् प्रातुदान् बैलान् दापयेत्क्षयकासिने॥ १७७॥

स०-वातघ्नौषधानां निःक्काथे सिद्धं क्षीरमथवा यूषान् रसांश्च विष्किरमांसजान् प्रतुदजान् वा। तथा, बिलेषु भवा बैलाः प्राणिनस्तेषां रसान् क्षयकासिने वैद्यो दापयेत्।

आ० र०- क्षीरयूषरसनाह-वातघौषधनिःव्काथ इति। बैलान्-बिलेशयकृतान्।

क्षतकासे च ये धूमाः सानुपाना निदर्शिताः।
क्षयकासेऽपि ते योज्या वक्ष्यते यच्च यक्ष्मणि॥ १७८॥
बृंहणं दीपनं चाग्नेः स्रोतसां च विशोधनम्।
व्यत्यासात्क्षयकासिभ्यो बल्यं सर्वं प्रशस्यते॥ १७९॥

स० -क्षतकासे च ये धूमाः-द्विमेदेत्यादयः, सानुपाना उक्ताः, ते च क्षयकासेऽपि योज्याः। तच्च यक्ष्मणि वक्ष्यते बृंहणमग्निदीपनं स्रोतोविशोधनं, तच्च क्षयकासिने योज्यम्। तथा, क्षयकासिभ्यो व्यत्यासेन सर्वं चिकित्सितं बल्यं प्रशस्यते।

आ० र०- क्षतकासधूमानतिदिशति-क्षतकासे चेति। यक्ष्मोक्तमतिदिशति-वक्ष्यते यच्चेति। व्यत्यासात्-परिवर्तात्। बृंहणं त्यक्त्वा दीपनमित्त्वा (?) पुनर्ब्रुंहणमित्यादि परिवर्तः।

सन्निपातोद्भवो घोरः क्षयकासो यतस्ततः।

यथादोषबलं तस्य सन्निपातहितं हितम्॥ १८०॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां चतुर्थे चिकित्सित-स्थाने कासचिकित्सितं नाम तृतीयोऽध्यायः॥ ३॥

स०-सन्निपातोद्भवः क्षयकासो घोरो-दारुणो, यतो भवति, तस्माद् यथादोषबलं तस्य यत्सन्निपाते हितं तदत्र हितमिति।

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टाङ्गहृदयटी-कायां सर्वाङ्गसुन्दरा-ख्यायां चतुर्थे चिकित्सितस्थाने कासचिकित्सितं नाम तृतीयोऽ-ध्यायः समाप्तः॥ ३॥

आ० र०- क्ष्यकासे सर्वदोषाविरोधि कर्तव्यमित्याह सनिइपातोद्भव इति।

इति हेमाद्रिटीकायायुर्वेदरसायने।

कासप्रकरणं नाम सामस्त्येन निरूपितम्॥

****

चतुर्थोऽध्यायः।

कासचिकित्सितादनन्तरं श्वासहिध्माचिकित्सितं त्र्याख्यायते। सम्बन्धोऽत्र निदान एवोक्तः।

अथातः श्वासहिध्माचिकित्सितं व्याख्यास्यामः।

इति ह स्माहुरात्रेयादयो महर्षयः।

(गद्यसूत्रे॥२॥)

श्वासहिध्मा यतस्तुल्यहेत्वाद्याः, साधनं ततः।

तुल्यमेव

स०-यस्मात् श्वासहिध्मास्तुल्यहेत्वाद्याः। आदिग्रहणात् प्राग्रूपादयो गृह्यन्ते। निदने ह्युक्तम् (ह्.नि.अ.४/१८)-"श्वासैकहेतुप्राग्रूपसङ्घाप्रकृतिसंश्रयाः।" इति। ततः-तस्माद्धेतोः, साधनं- चिकित्सितं, श्वासहिध्मयोस्तुल्यमेव विहितम्।

आ० र०- अथ श्वासचिकित्सितम्। श्वासचिकित्सितं हिध्मास्वपि कर्तव्यमित्याह-श्वासहिध्मा इति। आद्यशब्दात् दोषदूष्यस्थानानि।

तदार्थं च पूर्वं स्वेदैरुपाचरेत्॥१॥

स्निग्धैर्लवणतैलाक्तं

स०-तदार्तं-श्वासहिध्मातुरं, पूर्वं-उपक्रमेभ्यः सर्वेभ्योऽपि प्राक्, स्वेदैरुपाचरेत्। किम्भूतैः ? स्निग्धैः-न रूक्षैः, वातकोपभयाट्। किम्भूतम् ? लवणान्वितेन तैलेनाभ्यक्तम्।

आ० र० - तत्र प्रथमं स्वेदमाह-तदार्तं चेति। तदार्तं श्वासहिध्मार्तम्।

किमेवं सति स्यात्? इत्याह-

तैः खेषु ग्रथितः कफः।
सुलीनोऽपि विलीनोऽस्य कोष्ठं प्राप्तः सुनिर्हरः॥२॥
स्रोतसां स्यान्मृदुत्वं च मरुतश्चानुलोमता।

स०-तैः-स्वेदैः, खेषु-स्रोतःसु, योऽस्य-श्वासहिध्मावतो, ग्रथितः-पिण्डितः, कफः सुलीनोऽपि-अतिशयेन श्लिष्टोऽन्त भूतः, अनयेतिकर्तव्यतया विलीनोऽस्य कोष्ठं प्राप्तः सुनिर्हरः स्यात्-सुखेन निर्हर्तुं शक्यते। तथा, स्रोतसां-वायुस्तब्धानां, मृदुत्वं च स्यात्। मरुतश्चानुलोमता-स्वमागगामित्वं स्यात्।

आ० र०- स्वेदफलमाह-तैः खेष्विति। खेषु-स्रोतःसु। ग्रथोति-घनीभूतः। सुलीनः-स्रोतोभिरेकतां गतः। एवंविधोऽपि कफः स्वौदैर्विलीनतां-द्रवतां नीतः, कोष्ठं प्राप्तः सुखं शोध्यो भवति।

स्विन्नं च भोजयेदन्नं स्निग्धमानूपजै रसैः॥३॥
दध्युत्तरेण वा, दद्यात्ततोऽस्मै वमनं मृदु।
विशेषात्कासवमथुहृ-ह्स्वरसादिने॥४॥
पिप्पलीसैन्धवक्षौद्रयुक्तं वाताविरोधि यत्।

स०-स्विन्नं च सन्दमातुरं स्निग्धं-शाल्याधिकं न रूक्षं यवादिकम्, आनूपजैः-सूकरादिमांसजै रसैः सह, भोजयेत्। अथवा स्वेदादनन्तरमस्मै-श्वासहिध्मावते, दध्युत्तरेण-दधिसरेण, वमनं मृदु दद्यात्। विशेषेण कासादिमते वमनं दद्यात्। तच्च वमनं पिप्पलीसैन्धवक्षौद्रयुक्तं वाताविरोधि-वातं न करोति, यत्तद्दद्यात्।

आ० र०- स्विन्नभोजनमाह-स्विन्नं चेति। स्निग्धं-स्निग्धैः शाल्यदिभिः कृतम्। दध्युत्तरेण-दधिसरेण।

वमनमाह-दद्यादिति। अस्मै-श्वासिने। कासाद्युपद्रवयुक्ताय तु विशेषात्-अतिशयेन,वमनं दद्यात्। पिप्पल्यादिभिस्त्रिभिर्युक्त मदनफलादिवच्च। वातावरोधि-वमनकल्पोक्तम्।

निर्हृते सुखमाप्नोति स कफे दुष्टविग्रहे॥५॥

स्रोतःसु च विशुद्धेषु चरत्यविहतोऽनिलः।

स० -निर्हृते कफेऽसौ (सः)-श्वासहिध्मावान्, सुखमश्नुते, रुङ्निवृत्तेः। किम्भूते कफे ? दुष्टो विग्रहः-शरीरं, येन तस्मिन्। तथा, स्रोतःसु विशुद्धेषु-उपलेपादिरहितेषु, वायुरविहतो-न केनचिद्गुद्धगतिः, स्रोतःसु चरति।

आ० र० - वमनफलमाह-निर्हृत इति। दुष्टो विग्रहः-शरीरं, येन।

ध्मानोदावर्ततमके मातुलुङ्गाम्लवेतसैः॥६॥

हिङ्गुपीलुबिडैर्युक्तमन्नं स्यादनुलोमनम्।

ससैन्धवं फालाम्लं वा कोष्णम् दद्याद्विरेचनम्॥७॥

स ० -ध्मानं-आनाहः। उदावर्तः-शकृदादीनामप्रवृत्तिः। तमकः-श्वासविशेषः। ध्मानं चोदावर्तश्च तमकश्च ध्मानोदावर्ततमकम्, तस्मिन्-प्रकृतत्वात् तथाविधे हिध्माश्वासवति। मातुलुङ्गाद्यैस्तथा हिङ्गुपीलुबिडैर्युक्तमन्नमनुलोमकारि स्यात्। अथवा, अस्यामवस्थायां सैन्धवेन सह फलाम्लं फलेन-वातानुलोमनेन बीजपूरादिना, अम्लं-अम्लीकृतं, तथा कोष्णं-ईषदुष्णं, विरेचनं दद्यात्।

आ० र० - विरेचनमाह-ध्मानोदावर्ततमक इति। ध्मानं-आध्मानम्। तमकः-तमःप्रवेशनम्। ध्मानादियुक्ते श्वासे विरेचनम्। तच्च मातुलुङ्गाद्युक्तमन्नान्तेन। यो न विरिच्यते तस्मै विरेचनं-त्रिवृन्मूलादि। फलैः-मातुलुङ्गादिभिरम्लं, ससैन्धवं च। योगरत्ने-"हिंग्वम्लवेतस-व्योषसौवर्चलफलत्रिकम्। तुल्यं त्रिवृद्द्विगुणितं तैः सर्वैः शर्करा समा॥ स्रंसनं श्वासहिक्काघ्नं पिबेत्तद्भक्षयेदथ।" इति।

स्रोतःशुध्यर्थं किमेवं क्रियते ? इत्याह-

एते हि कफसंरुद्धगतिप्राणप्रकोपजाः।

तस्मात्तन्मार्गशुद्ध्यर्थमूर्ध्वाधः शोधनं हितम्॥८॥

उदीर्यते भृशतरं मार्गरोधाद्वहज्जलम्।

यथा तथाऽनिलस्तस्य मार्गमरुमाद्विशोधयेत्॥९॥

स ० -यस्मादेते-हिध्माश्वासाः। कफेन संरुद्धा गतिर्यस्य स एवम्, कफसंरुद्धगतिश्वासौ प्राणाश्च, तस्य प्रकोपः, ततो जाताः। यत एवं तस्माद्धेतोस्तन्मार्गशुध्यर्थं-तस्य प्राणस्य वायोर्मार्गविशुद्धिनिमित्तं, ऊर्ध्वमधश्च शोधनं हितम्। एतच्च दृष्टान्तद्वारेण स्पष्टयति-उदीर्यत इत्यादि। यथा मार्गस्य रोधाज्जलं वहत् भृशतरं-सुतरां, उदीर्यते-वृद्धि याति। तथाऽनिलः स्वभावतो वहन् मार्गरोधात्-मार्गस्यावरणात्, भृशतरमुदीर्यते। तस्यवायोह्, मार्गमस्मात्-यथोक्तात्कारणात्, विशोधयेत्।

आ० र० - शोधने युक्तिमाह-एते हीति। एते-श्वासाः। उदीर्यते-उन्मार्गतां याति। वङ्गसेने तु (श्वासाधिकारे श्लो. ३०)-"स्नेहवस्तिं विना केचिदूर्ध्वं चाधश्च शोधनम्। मृदु प्राणवतां श्रेष्ठं श्वासिनामादिशन्ति हि॥" इति। प्राणो-बलम्।

अशान्तौ कृतसंशुद्धेर्धूमैर्लीनं मलं हरेत्।

स ० -पूर्वस्यां क्रियायां कृतायामप्यशमे सति, कृतसंशुद्धेः-शसहिध्मार्तस्य, लीनं-सूक्ष्मस्रोतःश्लिष्टं, मलं-कफाख्यं, धूमैः-वक्ष्यमाणैः, हरेत्।

आ० र० - शोधनेनाशान्तौ धूमः कर्तव्य इत्याह-अशान्ताविति।

हरिद्रापत्रमेरण्डमूलं लाक्षां मनःशिलाम्॥१०॥

सदेवदार्वलं मांसीं पिष्ट्वा वर्तिं प्रकल्पयेत्।

तां घृताक्तां पिबेद्धूमं यवान् वा घृतसंयुतान्॥११॥

मधूच्छिष्टं सर्जरसं घृतं वा गुरु वाऽगुरु।

चन्दनं वा तथा शृङ्गं वालान्वा स्नाव वा गवाम्॥ १२॥

ऋक्षगोधकुरङ्गैणचर्मशृङ्गखुराणि वा।

गुग्गुलुं वा मनोह्वां वा शालिनिर्यासमेव वा॥ १३॥

शल्लकीं गुग्गुलुं लोहं पद्मकं वा घृतप्लुतम्।

स० -हरिद्रादीनि पिष्ट्वा जलेन वर्तिं प्रकल्पयेत्। तां-वर्तिं, घृताक्तं कृत्वा धूमं पिबेत्, सामर्थ्यादग्निप्लुष्टाम्। अथवा यवान् घृताक्तान् धूमं पिबेत्। मधूच्छिष्टं-सिक्थक्तं, सर्जरसं घृतं वा एकीकृत्य धूमं पिबेत्। अथवा,, गुरु-श्रेष्ठं, अगुरुकृष्णागरु, धूमं पिबेत्। अथवा, चन्दनम् [धूमं पिबेत्]। अथवा, गवां शृङ्गं धूमं पिबेत्। अथवा, गवां वालान्-गलकम्बलजानि रोमाणी, धूमं पिबेत्। स्नाव वा-स्नायु वा गवामेव, धूमं पिबेत्। ऋक्षादीनां चर्मादीनि वा धूमं पिबेत्। खुरशब्दस्यार्धर्चादित्वान्नपुंसकत्वम्। गुग्लुं वा, अथवा मनः शिलां शालनिर्यासं वा धूमं पिबेत्। शल्लक्यादि घृताप्लुतं वा।

आ० र० - धूमानाह-हरिद्रापत्रमिति। [अत्र]...दश धूमाः। तत्राद्यः सप्तभिः, तृतीयपञ्चमौ द्वाभ्यां, नवमस्त्रिभिः, शेषा एकेन (?), सर्वे सघृताः।

अवश्यं स्वेदनीयानामस्वेद्यानामपि क्षणम्॥ १४॥

स्वेदयेत्ससिताक्षीरसुखोष्णस्नेहसेचनैः।

उत्कारिकोपनाहैश्च स्वेदाध्यायोक्तभेषजैः॥ १५॥

उरः कण्ठं च मृदुभिः

स० -अवश्यं स्वेदनीयानां तथाऽस्वेदार्हाणामपि क्षणमुरः कण्ठं च मृदुभिः स्वेदैः स्वेदयेत्। कैः ? सशर्कराक्षीरैः सुखोष्णैः स्नेहसेचनैः। तथा, स्वेदाध्याये यान्युक्तानि द्रव्याणि तत्कृतैरुत्कारिकोपनाहैश्च स्वेदयेत्।

आ० र० - [स्वेदमाह-] अवश्यमिति। स्वेद्यानां श्वासिनामुरः कण्ठं चावश्यं-निर्भयं, स्वेदयेत्। अस्वेद्यानां च सभयम्, यद्यपि न सहते तथाऽपि क्षणमेकं स्वेदयेत्। स्नेहं ससिताक्षीरसुखोष्णैः कुर्यात्। तेन सिञ्चेत्।

सामे त्वामविधिं चरेत्।

स० -सामे च श्वासहिध्मावत्यामविधिं-लङ्घनपाचनादिकं, चरेत् निरामीकरणाय।

आ० र० -.... सामे त्वामविधिं चरेदिति। आमविधिं-लङ्घनपाचनादिकम्।

अतियोगोद्धतं वातं दृष्ट्वा पवननाशनैः॥ १६॥

स्निग्धै रसाद्यैर्नात्युष्णैरभ्यङ्गैश्च शमं नयेत्।

स० -अतियोगाद्वमनविरेचनयोर्नराणामुद्धतं वातं दृष्ट्वा पवननाशनैः स्निग्धै रसाद्यैः-मांसरसघृतक्षीरादिभिराहारैः, तथा किञ्चिदुष्णैरभ्यङ्गैश्च शमं नयेत्।

आ० र० - श्लेष्मौषधातियोगोद्धतवातस्यौषधमाह-अहियोगोद्धतमिति। रसाद्यैः. ....काञ्चलिकैः।

अनुत्क्लिष्टकफास्विन्नदुर्बलानां हि शोधनात्॥ १७॥

वायुर्लब्धास्पदो मर्म संशोष्याशु हरेदसून्।

कषायलेहस्नेहाद्यैस्तेषां संशमयेदतः॥ १८॥

स० -अनुत्क्लिष्टकफानामस्विन्नानां दुर्बलानां च शोधनाद्धेतोः पवनो लब्धास्पदः सन् अन्यस्थानाश्रयवशादासादित सामर्थ्योऽत एवामन्दः शोषणस्वभावत्वाद् मर्म-हृदयाख्यं, संशोष्य शीघ्रमसून् हरेत्। तस्मादेवंविधान् हिध्माश्वासवतो न शोधयेत्। अतोऽन्यथाभूतांश्च

शोधयेदित्यर्थादुक्तं भवति। तथा च तेषां संशोधनादारोग्यं सम्पद्यते। अनुत्क्लिष्टकफादीनां शोधनायोग्यानां तर्हि किं कार्यम्? इत्याह-कषायेत्यादि। यतो यस्मात्ते संशोधनायोग्यास्तस्मात्तेषां कषायादिभिः संशमयेत्, श्वासहिध्मा इति शेषः।

आ० र० - शोधनमहानर्हाणां(?)शमनमाह-अनुत्क्लिष्टेति। .....त्वात्। आस्पदं-कारणम्। मर्म-हृदयम्। तेषां-अशोध्यानां, श्वासम्।

क्षीणक्षतातिसारासृक्पित्तदाहानुबन्धजान्।
मधुरस्निग्धशीताद्यैर्हिध्माश्वासानुपाचरेत्॥ १९॥

स० -क्षीणक्षतातिसारासृक्पित्तदाहानुबन्धजान् हिध्माश्वासान् मधुरादिभिरुपक्रमेत्।

आ० र० - क्षयाद्युत्पन्नस्य श्वासस्यौषधमाह-क्षीणक्षतेति। क्षीणादीनामनुबन्धो-दीर्घकालत्वम्, तस्माज्जातान्।

कुलत्थदशमूलानां क्काथे स्युर्जाङ्गला रसाः।
यूषाश्च

स० -कुलत्थदशमूलानां क्काथे जाङ्गलरसा यूषाश्च स्युः।

आ० र० - अथान्नपानानि। तत्र रसानाह-कुलत्थदशमूलानामिति।

शिग्रुवार्ताककासघ्नवृषमूलकैः॥ २०॥
पल्लवैर्निम्बकुलकबृहतीमातुलुङ्गजैः।
व्याघ्रीदुरालभाश्वङ्गीबिल्वमध्यत्रिकण्टकैः॥ २१॥
सामृताग्निकुलत्थैश्च यूषः स्यात्क्थितैर्जले।
तद्वद्रास्नाबृहत्यादिबलामुद्गैः सचित्रकैः॥ २२॥

स० -शिग्र्वादिभिश्च जले क्वथितैर्यूषः स्यात्। तथैव रास्नादिभिर्यूषः स्यात्।

आ० र० - यूषानाह-यूषाश्चेति। चकारात्पूर्वस्मिन् क्वाथे सिद्धाः। शिग्न्वादीनां मुद्गादिभिः सह प्रक्षेपः। तत्र निम्बादीनां पल्लवाः, इतरेषां यथास्वं प्रसिद्धोऽवयवः।

यूषान्तरमाह-व्याघ्रीदुरालभेति।

व्याघ्र्यादिक्वथितैर्जलैर्मुद्गादीनां यूषः।

यूषान्तरमाह- [तद्वदिति। सङ्ग्रहे तु (चि. अ. ६) -"शिरीषकुन्दकदलीकुसुमं पिप्पलीयुतम्। तण्डुलाम्बुप्लुतं हिध्माश्वासकासहरं परम्॥ आरनालेन पिष्ट्वा वा मातुलुङ्गरसान्वितान्। हिङ्गुसौवर्चलकणाकोलमुद्गान् जलेन वा॥ क्षारं वा त्रिफलापाठाबृहतीफलमूलजम्। मुक्ताप्रवालवैदूर्यशङ्खसौगन्धिकाञ्जनम्॥ मसारगल्लस्फटिककाचैलालवणद्वयम्। अपामार्गफलं ताम्रमयो रूप्यं शणात् फलम्॥ ज्योतीरसेन तल्लिह्यादयो वैकं मधुद्रवम्। लिह्याद्वा पिप्पलीद्राक्षा पथ्याशृङ्गीदुरालभाः॥ घृतमाक्षिकतैलैर्वा त्र्यूषणं क्षारसंयुतम्। पिप्पलीक्षौद्रयुक्तौ वा रसौ धात्रीकपित्थयोः॥ सितोपला त्वामलकी द्राक्षा गोश्वशकृद्रसः। जीवन्ती चोरकः शृङ्गी पौष्करं सुरसः शठी॥ पिप्पलीत्वग्बिडक्षारशुण्ठीहिङ्गुश्वेतसम्। एलातामलकीभार्ङ्गीवृक्षाम्लं चेति चुर्णितम्॥ रसेन मातुलङ्गस्य मद्येन हविषाऽथवा। लीढं प्रयुक्तमन्ने वा केवलं चोपयोजितम्॥] हिध्माश्वासविबन्धार्शःकासहृत्पार्श्वशूलजित्।" इति। वङ्गसेने (श्वासा. श्लो. ७५)-"शतं सङ्ग्रह्य भार्ग्यास्तु दशमूल्यास्तथा परम्। शतं हरीतकीनां च पचेत्तोये चतुर्गुणे॥ पादावशेषे तस्मिंस्तु रसे वस्त्रपरिस्रुते। आलोड्य तत्र च तुलां गुडस्य त्वभयाश्च ताः॥ पुनः पचेत्तु मृद्वग्नौ यावल्लेहत्वमागतः। शीते च मधुनश्चात्र षट्पलानि प्रदापयेत्। त्रिकटु त्रिसुगन्धं च पलिकानि पृथक् पृथक्। कर्षद्वयं यवक्षरं सञ्चूर्ण्य प्रक्षिपेत्ततः॥ भक्षयेदभयामेकां लेहस्यार्धपलं लिहेत्। श्वासं सुदारुणं हन्ति कासं पञ्चविधं तथा॥ स्वरवर्णप्रदो ह्येष जठराग्नेश्च दीपनः॥ कुलत्थं दशमूलं च तथैव द्विजयष्टिकम्। शतं शतं च सङ्गृह्य जलद्रोणे विपाचयेत्॥ पादावशेषे तस्मिंस्तु गुडस्यार्धतुलां क्षिपेत्। शीतीभूते च पक्के च मधुनोऽष्टौ पलानि तु॥ षट्पलानि तुगाक्षीर्याः पिप्पल्याश्च पलद्वयम्। त्रिसुगन्धि सुगन्धी च खादेदग्निबलं प्रति॥ श्वासं कासं ज्वरं हिक्कां नाशयेत्तमकं तथा॥" इति। जलदोर्णेऽत्र प्रतिशतं, तेन द्रोणद्वये क्वाथः।

पेया च चित्रकाजाजीशृङ्गीसौवर्चलैः कृता।

दशमूलेन वा कासश्वासहिध्मारुजापहा॥ २३॥

स० -पेया च चित्रकादिभिः कृताऽथवा दशमूलेन कृता, सा च कासदिहरा।

दशमूलशठीरास्नाभार्गीबिल्वर्द्धिपौष्करैः।

कुलीरशृङ्गीचपलातामलक्यमृतौषधैः॥ २४॥

पिबेत्कषायं जीर्णेऽस्मिन् पेयां तैरेव साधिताम्।

स० -दशमूलादिभिः कषायं पिबेत्। अस्मिन्कषाये परिणते तैरेव-दशमूलादिभिः, साधितां पेयां हिध्माश्वासी पिबेत्।

शालिषष्टिकगोधूमयवमुद्गकुलत्थभुक्॥ २५॥

कासहृ-हपार्श्वार्तिहिध्माश्वासप्रशान्तये।

स० -तथा शाल्यादिभुक् स्यात्, कासादिशान्त्यर्थम्।

सक्तुन् वाऽर्काङ्कुरक्षीरभावितानां समाक्षिकान्॥ २६॥

यवानां दशमूलादिनिष्काथलुलितान् पिबेत्।

स ० -अथवाऽर्काङ्कुरक्षीरभवितानां यवानां सम्बन्धिनः सक्तून् समाक्षिकान् दशमूलशठीत्यादिनिर्यूहान्वितान् पिबेत्।

अन्ने च योजयेत् क्षारहिङ्वाज्यबिडदाडिमान्॥ २७॥

सपौष्करशठीव्योषमातुलुङ्गाम्लवेतसान्।

स० -अन्ने-आहारे च, क्षारादीन् योजयेत्।

दशमूलस्य वा क्वाथमथवा देवदारुणः॥ २८॥

पिबेद्वा वारुणीमण्डं हिध्माश्वासी पिपासितः।

स० -हिध्माश्वासवान् पिपासितो दशमूलस्य क्वाथं देवदरुणो वा, अथवा वारुणीमण्दं पिबेत्।

पिप्पलीपिप्पलीमूलपथ्याजन्तुघ्नचित्रकैः॥ २९॥

कल्कितैर्लेपिते रूढे निःक्षिपेद्धृतभाजने।

तक्रं मासस्थितं तद्धि दीपनं श्वासकासजित्॥ ३०॥

स० -पिप्पल्यादिभिः कल्कितैर्लेपिते घृतभाजने रूढे-शुष्के, तक्रं निःक्षिपेत्। तच्च तक्रं मासस्थितं दीपनं श्वासकासजित्।

पाठां मधुरसां दारु सरलं च निशि स्थितम्।

सुरामण्डेऽल्पलवणं पिबेत्प्रसृतसम्मितम्॥ ३१॥

भार्गीशुण्ठ्यो सुखाम्भोभिः क्षारं वा मरिचान्वितम्

स्वक्वाथपिष्टां लुलितां बाष्पिकां पाययेत वा॥ ३२॥

स ० -पाठादिकं सुरामण्डे निशि स्थितं किञ्चिल्लवणं प्रसृतसम्मितं-पलद्वयमात्रं, पिबेत्। अथवा, भागीशुण्ठ्याविष्णाम्बुना पिबेत्। यवक्षारं मरिचयुक्तं वा। बाष्पिकां-हिङ्गुपत्रिकां, हिङ्गु पत्रिक्काथेन पिष्टां तेनैवालोडितां वा पाययेत्।

स्वरसः सप्तपर्णस्य पुष्पाणां व शिशिषतः।

हिध्माश्वासे मधुकणायुक्तः पित्तकफानुगे॥ ३३॥

उत्कारिका तुगाकृष्णामधूलीघृतनागरैर्हृ।

पित्तानुबन्धे योक्तव्या, पवने त्वनुबन्धिनि॥ ३४॥

श्वाविच्छशामिषकणाघृतशल्यकशोणीतैः।

सुवर्चलारसव्योषसर्पिर्भिः सहितं पयः॥ ३५॥

अनु शाल्योदनं पेयं वातपित्तानुबन्धिनि।

चतुर्गुणाम्बुसिद्धं वा छागं सगुडनागरम्॥ ३६॥

स ० -सप्तपर्णस्य-अयुग्मच्छदस्य स्वरसः, शिरीषात् पुष्पाणां वा स्वरसः, एतौ मधुकणायुतौ पित्तकफानुगे हिध्माश्वासे सति पाययेत्।

पित्तानुबन्धिनि हिध्माश्वासे तुगादिभिरुत्कारिका योज्या। भधूली-जलजा मधुयष्टी, गोधूमविशेषो वा।

पवने पुनरनुबन्धिनि श्वादादिभिरुत्कारिका निष्पादिता योज्या।

हिध्माश्वासे वातपित्तानुबन्धिनि सति सुवर्चलारसादिभिः सिद्धं पयोऽनु शाल्योदनं भुक्त्वा पश्चात् क्षीरं पेयम्, गव्यं छागं व देशसात्म्यादिवशात्।

पिप्पलीमूलमधुकगुडगोश्वशकृद्रसान्।

हिध्माभीष्यन्दकासघ्नान् लिह्यान्मधुघृतान्वितान्॥ ३७॥

स ०-पिप्पलीमूलादीन् मधुघृतान्वितान् सम्मिश्च्य हिध्माभिष्यन्दकासघ्नान् लिह्यात्।

गोगजाश्ववराहोष्ट्रखरमेषाजविड्रसम्।

समध्वेकैकशो लिह्याद्बहुश्लेष्माऽथवा पिबेत्॥ ३८॥

चतुष्पाच्चर्मरोमास्थिखुरशृङ्गोद्भवां मषीम्।

तथैव वाजिगन्धाया लिह्याच्छ्वासी कफोल्बणः॥ ३९॥

शठीपौष्करधात्रीर्वा पौष्करं वा कणान्वितम्।

गैरिकाञ्जनकृष्णा वा स्वरसं व कपित्थजम्॥ ४०॥

रसेन वा कपित्थस्य धात्रीसैन्धवपिप्पलीः।

घृतक्षौद्रेण वा पथ्याविडङ्गोषणपिप्पलीः॥ ४१॥

कोललाजामलद्राक्षापिप्पलीनागराणि वा।

गुडतैलनिशाद्राक्षाकणारास्नोषणानि वा॥ ४२॥

पिबेद्रसाम्बुमद्याम्लैर्लेहौषधरजांसि वा।

स०-गोगजादीनां शकृद्रसं बहुकफः समाक्षिकमेकैकशो लिह्यात्, अथवा पिबेत्। अथवा, चतुष्पदां चर्मादिजां मषीं, पिबेत्। श्वासी कफाधिकोऽश्वगन्धायाश्च मषीं तद्वत्-मधुना, लिह्यात्। शठीपौष्करादिण् वा मधुना लिह्यात्। पौष्करं सकणं वा लिह्यात्। गैरिकादीन् वा लिह्यात्, कपित्थजं स्वरसं वा। कपित्थस्वरसेन धात्र्यादीन् लिह्यात्। पथ्याविडङ्गादीन् घृतक्षौद्रेण वा लिह्यात्। कोलादीन् वा पूर्ववल्लिह्यात्, गुडदीन् वा। अथवा, लेहस्य-अगस्त्यादेः, औषधानां चूर्णानि मांसरसादिभिः पिबेत्।

जीवन्तीमुस्तसुरसत्वगेलाद्वयपौष्करम्॥४३॥

चण्डातामलकीलोहभार्गीनागरवालकम्।

कर्कटाख्याशठीकृष्णानागकेसरचोरकम्॥४४॥

उपयुक्तं यथाकामं चूर्णं द्विगुणशर्करम्।

पार्श्वरुग्ज्वरकासघ्नं हिध्माश्वासहरं परम्॥४५॥

स० -जीवन्त्यादिकं चूर्णं भुक्तं पार्श्वरुगादिघ्नं सुष्ठु हिध्मादिहरम्। लोहं-अगुरु।

शठीतामलकीभार्ङ्गीचण्डावालकपौष्करम्।

शर्कराष्टगुणं चूर्णं हिध्माश्वासहरं परम्॥४६॥

स० -शठ्यादिकं चूर्णं पूर्वगुणम्।

तुल्यं गुडं नागरं च भक्ष्येन्नावयेत् वा।

स० -तुल्यां सगुडशूण्ठी च भक्षयेत् नस्यं वा दद्यात्।

आ० र० - अथ नस्यानि। तत्र गुडनागरनस्यमाह-तुल्यं गुडमिति। नावयेत्-नासायां निषेचयेत्। भक्षणमपि श्वासघ्नम्।

लशुनस्य पलाण्डोर्वा मूलं गृञ्जनकस्य वा॥४७॥

चन्दनाद्वा रसं दद्यान्नारीक्षीरेण नावनम्।

स्तन्येन मक्षिकाविष्ठामलक्तकरसेन वा॥४८॥

ससैन्धवं घृताच्छं वा, सिद्धं स्तन्येन वा घृतम्।

कल्कितैर्मधुरद्रव्यैस्तत्पिवेन्नावयेत वा॥४९॥

सकृदुष्णं सकृच्छीतं व्यत्यासात् ससितामधु।

तद्वत्पयस्तथा सिद्धमधोभागौषधैर्घृतम्॥५०॥

स ०-लशुनादीनां मूलं पिष्ट्वा नारीक्षीरेण पृथक् पृथक् नावनं च स्यात् हिध्माश्वासार्तीय। चन्दनाद्वा रसं नारीक्षीरेण सह नस्यं दद्यात्। मक्षिकाविष्ठं स्तन्येन सह नस्यं दद्यात्, अलक्तकरसेन वा।

आ० र०-नस्यचतुष्कमाह-लशुनस्येति। नारीक्षीरं चतुर्ष्वपि।

नस्यत्रयमाह-स्तन्येनेति। माक्षिकाविष्ठां-मधु। घृताच्छंघृतमण्डम्।

नस्यान्तरमाह-सिद्धं स्तन्येनेति। मधुरैः-जीवन्त्यादिभिः। तद्धृतं पाने नस्ये च योज्यम्। तच्च व्यत्यासात्-प्रथममुष्णं ततः शीतं ततः पुनरुष्णं ततः पुनः शीतमित्यादि। यदोष्णं तदा ससितम्। यदा शीतं समधु।

क्षीरमाह-तद्वत्पय इति। तद्वत्-कल्कितैर्मधुरैः सिद्धं व्यत्यासात्प्रयोज्यम्।

घृतमाह-तथा सिद्धमिति। अधोभागौषधानि-श्यामादिवेरेचनानि। तथा-पूर्ववत्प्रयोज्यम्।

कणासौवर्चलक्षारवयस्थाहिङ्गुचोरकैः।

सकायस्थैर्घृतं मस्तुदशमूलरसे पचेत्॥५१॥

तत्पिबेज्जीवनीयैर्वा लिह्यात्समधु साधितम्।

स०-कणादिभिः कल्कैर्मस्तुदशमूलरसे स्नेहपानविध्युक्तपरिभाषामाश्रित्य घृतं पक्त्वा हिध्माश्वासार्तः पिबेत्। जीवनीयैर्वा द्रव्यैः कल्कर्घृतं पक्त्वा समाक्षिकं लिह्याट्-न पिबेत्। विषयभेदादेवं कार्यम्। अथवा, वस्तुस्वभावादेकस्मिन्नपि विषये कणादिभिः पक्वं घृतं पीतं हिध्माश्वासार्तानामारोग्याय, जीवनीयैः पुनः कल्कैः पक्वं घृतं लीढं तेषामारोग्यायेति।

आ० र०-घृतान्तरमाह-कणासौवर्चलेति। वयस्था-आमलकी। कायस्था-हरीतकी।

घृतान्तरमाह। जीवनीयैर्वेति। जीवनीयैः साधितं घृतं मधुना सह लिह्यात्।

तेजोवत्यभया कुष्ठं पिप्पली कटुरोहिणी॥५२॥

भूतीकं पौष्करं मूलं पलाशश्चित्रकः शठी।

पटुद्वयं तामलकी जीवन्ती बिल्वपेशिका॥५३॥

वचा पत्रं च तालीसं कर्षांशैस्तैर्विपाचयेत्।

हिङ्गुपादैर्घृतप्रस्थं पीतमाशु निहन्ति तत्॥५४॥

शाखानिलार्शोग्रहणीहिध्माहृत्पार्श्ववेदनाः।

स०-तेजोवत्यादिभिः कल्कैः कर्षांशैर्हिङ्गुपादैर्हिङ्गुनः पादः-चतुर्थांशो, येषां तैरेवंविधैर्घृतं पचेत्। तत्पीतं दुष्टकफावृतस्रोतसां प्रमाथितया तेषां विवृतत्वमुत्पादयन् शाखानिलादिन् हन्ति।

आ० र०- घृतान्तरमाह-तेजोवत्यभयेति। भूतीकंकत्तृणम्। पादः-कर्षचतुर्थांशः। सङ्ग्रहे तु (चि.अ. ६) -सिद्धं वा पुरमञ्जिष्ठालाक्षासर्जरसैः पिबेत्। सपद्मकमनोह्वालैर्घृतप्रस्थं पिचून्मितैः॥ वत्सकादिप्रतीवापं सिद्धं वा प्रथमे गणे। सपञ्चलवणं सर्पिः श्वासकासावपोहति॥ प्रथमे-विदार्यादौ। हिंस्राविडङ्गपूतीकत्रिकटुत्रिफलाग्निकैः। कोलमात्रैर्घृतप्रस्थं पाचयेत्सलिलाढके॥ क्षीरप्रस्थद्वयोपेतं तत्कासश्वासपीनसान्। अर्शांस्यरोचकं गुल्मं क्षयं हिध्मां च नाशयेत्॥" इति। कोलं-कर्षः।

अर्धांशेन पिबेत्सर्पिः क्षारेण पटुनाऽथवा॥५५॥

धान्वन्तरं वृषघृतं दाधिकं हपुषादि वा।

स०-धान्वन्तरादिघृतस्यार्धांशेन क्षारेण, अथवा पटुना लवणेन चाधांशेन, सर्पिः पिबेत्। धान्वन्तरं-प्रमेहोक्तम् (ह्र. चि. अ. १२/१९)। वृषघृतं-रक्तपित्तोक्तम् (ह्र. चि. अ. २/४०)। दाधिकं-गुल्मोक्तम् (ह्र. चि. अ. १४/१३)। हपुषादिकं-उदरोक्तम् (ह्र. चि. अ. १५/२२)।

आ० र०- घृटन्तरमाह-अर्धांशेनेति। सर्पिः-पुराणम्, उक्तं हि सङ्ग्रहे (चि. अ. ६) -"सैन्धवार्धांशसंयुक्तं पुराणं प्राययेद्घृतम्॥" इति।

घृतचतुष्कमतिदिशति-धान्वन्तरमिति। [धान्वन्तरादीनि-] प्रमेहरक्तपित्त-गुलम्जठरोक्तानि। वङ्गसेने (श्वासाश्लो. ५९) -"सौवर्चलयवक्षारक-टुकाव्योषचित्रकैः। घृतं वचाविडङ्गैश्च साधितं श्वासशान्तये॥ कुलत्थरससंयुक्तं पञ्चकोलश्रृतं घृतम्। दीपनं श्वासकासघ्नं कफव्याधिहरं परम्॥ तिक्तासौवर्चलक्षारपथ्यात्रिकटुहिङ्गुभिः। समालूरैर्घृतं सिद्धं सक्षीरं श्वासकासनुत्। गुल्मानाहंऽहौ) च शमयेत्प्रवृद्धान् गुदजानपि॥ सुवहाकालिका भार्गी शुगाख्या निचुलं फलम्। काकादनी श्रृङ्गवेरं वर्षाभूर्बृहतीद्वयम्॥ कोलमात्रैर्घृतप्रस्थं पचेदेतैर्जलाढके। कदुष्णं पीतमेतद्विश्वासामयविनाशनम्॥ तैलं दशगुणे सिद्धं भृङ्गराजरसे शुभे। पीयमानं यथान्यायं कासश्वासौ व्यपोहति॥" इति।

शीताम्बुसेकः सहसा त्रासविक्षेपभीशुचः॥५६॥

हर्षेर्ष्योच्छ्वासरोधाश्च हितं कीटैश्च दंशनम्।

स० -सहसा-झटित्येवाज्ञातसङ्केतस्यैव, हिध्माश्वासार्तस्य शीताम्बुना सेको हितः। त्रासः-चित्तस्योद्वेगकृत्कर्म, विक्षेपः-अवधूननम्, भीः-भयम्, शुक्-शोकश्चेतसः सन्तापः, त्रासादयश्चतस्रस्तामसगुणोद्भवाः, ईर्ष्या-असूया परगुणासहिष्णुता, इयं रजोगुणोदया, तथा उच्छ्वासस्य रोधः, एते च सर्वे हिध्माश्वासार्ताय हिताः। तथा, कीटैः-पिपीलिकादिभिः, तस्मिन् दंशनं हितम्, वातवेगविघाताय।

आ० र० - चित्तक्षोभणमौषधमाह-शीताम्बुसेक इति। विक्षेपेण वैयग्र्यम्।

एवं हिध्माश्वासानां विशेषेण चिकित्सामुक्त्वा सामान्येनाह-

यत्किञ्चित्कफवातघ्नमुष्णं वातानुलोमनम्॥५७॥

तत्सेव्यं प्रायशो यच्च सुतरां मारुतापहम्।

स० -यत्किञ्चित्-आहारविहारौषधादिकं, कफवातौ-पृथक् सहितौ वा, निहन्ति तत्कफवातघ्नम्। तथा, उष्णं-न-शीतम्। कफवातघ्नं हि प्रायेणोष्णमेव भवति। उष्णमिति यदिह कृतं तदतिशयेनोष्णं न त्वीषदुष्णमिति प्रतिपादनार्थम्। तथा, वातानुलोमनं कफवातघ्नत्वेनैव वातानुलोमनकारित्वे लब्धे प्राधान्येन वातप्रतिपक्षेण स्निग्धेन यद्युक्तं

तद्धिध्माश्वासार्तैः कफवातघ्नमधिकोष्णं सेव्यमिति प्रतिपादनायेति। अत एवाह-प्रायश इत्यादि। प्रायशो-बाहुल्येन, यत् सुतरां मारुतशमनं तत् हिध्माश्वासार्तैः सेव्यम्।

आ० र० - अनुक्तसङ्ग्रहार्थमाह-यत्किञ्चिदिति। यन्मारुतापहं तत्सुतरां सेव्यम्, कफकृन्न चेति। उक्तं हि सङ्ग्रहे (चि. अ. ६)-"वातकृद्वा कफहरं कफकृद्वाऽनिलापहम्। कार्यं नैकान्तिकं ताभ्यां प्रायः श्रेयोऽनिलापहम्॥" इति।

किमित्येवं क्रियते ? इत्याह-

सर्वेषां बृंहणे हल्पः शक्यश्च प्रायशो भवेत्॥५८॥

नात्यर्थं शमनेऽपायो भृशोऽशक्यश्च कर्षणे।

शमनैर्बृंहणैश्चातो भूयिष्ठं तानुपाचरेत्॥५९॥

स० -सर्वेषां-हिध्माश्वासार्तानां, हि-यस्मात्, बृंहणे विधीयमाने कदाचिद्दैववशात् योऽपायो-रोगाधिक्यमन्यरोगप्रादुर्भावो वा, भवेत् स प्रायशोऽल्पस्तथा शक्यः-साधयितुं सुखसाध्यः। तथा, तेषां, शमने भेषजादौ क्रियमाणेऽपायो यदि दैवात्स्यात् स नात्यर्थं-नातिशयेन। किं तर्हि ? मध्यमया वृत्त्या। हिध्माश्वासशान्त्यर्थं कर्षणे भेषजादौ क्रियमाणे योऽपायो जायते स भृशो-दुःसहः, अत एवाशक्यः-साधयितुं न शक्यते। यत एवं कर्षणे भृशोऽशक्यश्चापयो भवति। अतः-अस्मात्कारणात्, तान्-हिध्माश्वासान्, भूयिष्ठं-बाहुल्येन, शमनैर्भेषजैस्तथा बृंहणैरुपाचरेत्।

आ० र० - शमनबृंहणकर्शनानां क्रमद्धीनत्वमाह-सर्वेषामिति। यन्न बृंहणं न च कर्शनं तच्छमनम्। तत्र नात्यर्थमपायः-अपायस्यात्यन्ताभावः। अपायो बृंहणे तु कदाचिद्भवेत्, स चाल्पः, स च शक्यः। कर्शनेज् तु सदा, स चानल्पः स चाशक्यः।

अतः कर्शनं न कार्यमित्याह-शमनैर्बृंहणैरिति। प्रथमं शमनैस्तैरनुपशमे बृंहणैः। भूयिष्ठग्रहणात्कस्याञ्चिदवस्थायां कर्शनैरपि।

अधुना कासादीनां पञ्चानामध्येषां सामान्येन चिकित्सितं वक्तुमाह-

कासश्वासक्षयच्छर्दिहिध्माश्चान्योन्यभेषजैः॥४९ १/२॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां चतुर्थे चिकित्सित-स्थाने श्वासहिध्माचिकित्सितं नामचतुर्थोऽध्यायः॥४॥

स० -कासौक्तैर्भेषजैः श्वासादीनुपाचरेत्। श्वासाद्युक्तैः कासानुपाचरेत्। एवं परस्परं सर्वैर्यथोक्तैर्भेषजः सर्वानेतानुपाचरेदिति।

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टाङ्गहृदय-टीकायां सर्वाङ्गसुन्दरा-ख्यायां चतुर्थे चिकित्सितस्थाने श्वासहिध्माचिकित्सितं नाम चतुर्थोऽ-ध्यायः समाप्तः॥४॥

आ० र० - कासादिभेषजमन्योन्यमतिदिशति-कासश्वासेति। उपाचरेदित्यनुवर्त्यम्। [वङ्गसेने तु - (हिक्काधिकारे श्लो. १८)-"प्राणावरोधतर्जनविस्मापनभयभाषकैश्चघोरैः। कथाप्रयोगैः शमयेद्धिक्कां घोरां मनोघातैः॥ हिक्कार्तस्य पयश्च्छागं हितं नागरसाधितम्। रसं पिबेत्फलिन्या]श्च लाजसक्तून् ससैन्धवान्॥ प्रवालशङ्खत्रिफलाचूर्णं मधुघृताप्लुतम्। पिप्पली गैरिकं चेति लेहो हिक्कानिवारणः॥ कोलमज्जाऽञ्जनं लाजा तिक्ता काञ्चनगैरिकम्। कृष्णा धात्री सिता शुण्ठी कासीसं दधिनाम च॥ पाटल्याः सफलं पुष्पं कृष्णा खर्जूरमुस्तकम्। षडेते पादिका लेहा हिक्काघ्ना मधुसंयुताः॥ निर्धूमाङ्गारनिक्षिप्तश्लक्ष्णमाषरजोभवः। हिक्काः पञ्च निहन्त्याशु धूमः पीतो न संशयः॥" इति।

इति हेमाद्रिटीकायामायुर्वेदरसायने।
श्वासहिक्काप्रकरणं सामस्त्येन निरूपितम्॥४॥

****

पञ्चमोऽध्यायः।

श्वासहिध्माचिकित्सितादनन्तरं राजयक्ष्मचिकित्सितारम्भः। यतः कासश्वासक्षया-दीनन्योन्यभेषजैरुपाचरेदित्युक्तम्। क्षयश्च राजयक्ष्मा। तस्मादेतदारभ्यते-

अथातो राजयक्ष्मादिचिकित्सितं व्याख्यास्यामः।

इति ह स्माहुरात्रेयादयो महर्षयः।

(गद्यसूत्रे॥२॥)

बलिनो बहुदोषस्य स्निग्धस्विन्नस्य शोधनम्।

ऊर्ध्वाधो यक्ष्मिणः कुर्यात्सस्नेहं यन्न कर्शनम्॥१॥

स०-एवंभुतस्य राजयक्ष्मिण ऊर्ध्वाधः शोधनं-वमनं विरेचनं च कुर्याट्, अस्निग्धस्विन्नस्य शोधनानर्हत्वात्। स्निग्धस्विन्नग्रहणं त्वतिशयाथम्। किम्भूतं शोधनम्? सस्नेहं,-ईषत्स्निग्धम्, तथा यन्न कर्शनं-देहस्य न क्षपणम्। यक्ष्मण इति "द्वन्द्वोपताप" इत्यादिना इनिर्मित्वर्थायः।

आ० र० - अथ राजयक्ष्मचिकित्सितम्। तत्र शोधनमाह-बलिनो बहुदोषस्येति।

तत्र वमनमाह-

पयसा फलयुक्तेन मधुरेण रसेन वा।

सर्पिष्मत्या यवाग्वा वा वमनद्रव्यसिद्धया॥२॥

वमेत्

स० -पयसा-क्षीरेण मदनफलान्वितेन, राजयक्ष्मी वमेत्। एवं तेन वमनं कार्यम्। मधुरेण वा मांसरसेन मदनफलयुक्तेन वमेत्। अथवा, यवाग्वा घृतवत्या तथा वमनद्रव्येण-मदनफलादिना, सिद्धया वमेत्।

आ० र० - वमनमाह-पयसेति। रसेन-मांसरसेन।

विरेचनं दद्यात्रिवृच्छ्यामानृपद्रुमान्।

शर्करामधुसर्पिर्भिः पयसा तर्पणेना॥३॥

द्राक्षाविदारीकाश्मर्यमांसानां वा रसैर्युतान्।

स ० -त्रिवृदादीनेकैकशः शर्करामधुसर्पिर्युतान् विरेचनं दद्यात्। अथवा पयसा त्रिवृदादीन् दद्यात्। तर्पणेन वा सह त्रिवृदादीन् विरेचनं दद्यात्। रसैरिति बहुवचननिर्देशाद् द्राक्षादीनां पृथग्रसैरिति बोध्यम्।

आ० र० - विरेचनमाह-विरेचनमिति। शर्करादित्रिभिर्युक्तैः। द्राक्षादिचतुर्भिः पृथक्। वङ्गसेने (राजयक्ष्माधिकारे श्लो. ३०)-"बलिनो बहुदोषस्य पञ्चकर्माणि कारयेत्। यक्ष्मिणः क्षीणशुक्रस्य तत्कृतं स्याद्विषोपमम्॥ शुक्रायत्तं बलं पुंसां मलायत्तं च जीवितम्। अतो विशेषात्संरक्षेद्यक्ष्मिणो मलरेतसी॥ इति।

शुद्धकोष्ठस्य युञ्जीत विधिं बृंहणदीपनम्॥४॥

हृद्यानि चान्नपानानि वातघ्नानि लघूनि च।

स० -शुद्धकोष्ठस्य सतो यक्ष्मणो बृंहणं दीपनं च विधिं प्रयुञ्जीत। तथाऽन्नपानानि हृद्यानि-हृदयप्रियाणि तथा वातघ्नानि लघूनि च युञ्जीत। बाहुल्येनैतदुक्तम्।

आ० र० - शुद्धस्य कृत्यमाह-शुद्धकोष्ठस्येति।

तथा चाह

शालिषष्टिकगोधूमयवमुद्गं समोषितम्॥५॥

[लघुम(चा)च्युतवीर्यं च सुजरं बलकृच्च यत्।]

आजं क्षीरं घृतं मांसं क्रव्यान्मांसं च शोषजित्।

स० -तथा शाल्यादिकं वर्षोषितं युञ्जीत। आजं क्षीरं घृतं मांसं तथा क्रव्यान्मांसं च क्षयजित्।

आ० र० - यक्ष्मघ्नान्नपानमाह-शालिषष्टिकेति। समासंवत्सरः। क्रव्यान्मांसाशिनां मांसम्।

काकोलूकवृकद्वीपिगवाश्वनकुलोरगम्॥६॥

गृध्राभासखरोष्ट्रं च हितं छद्मोपसंहितम्।

ज्ञातं जुगुप्सितं तद्धि छर्दिषे न बलोजसे॥७॥

स ० -काकोलूकादिकमेतन्मांसं हितम्। किम्भूतम्? छद्मनोपसंहितम्-काकादयस्तित्तिर्यादिशब्देन देया इत्यर्थः। किमित्येवं क्रियते? इत्याह-यस्मात्तत् जुगुप्सितं ज्ञातं सत् छर्दिषे सम्पद्यते, न बलाय न वौजसे।

आ० र० - काकादिमांसभक्षणोपायमाह-काकोलूकेति।

मृगाद्याः पित्तकफयोः पवने प्रसहादयः।

वेसवारीकृताः पथ्या रसादिषु च कल्पिताः॥८॥

भृष्टाः सर्षपतैलेन सर्पिषा वा यथायथम्।

रसिका मृदवः स्निग्धाः प-द्रव्याभिसंस्कृताः॥९॥

हिता मौलककौलत्थास्तद्वद्यूषाश्च साधिताः।

स० -मृगाद्याः-मृगविष्किरप्रतुदा(दय)ः, पित्तकफयोर्हिताः। वाते [प्रसहादयः-] प्रसहमहामृगापूचरादयो, हिताः। किम्भूताः ? वेसवारीकृताः-पिष्टाः, पथ्याः। तथा, रसादयो-मांसरसादयः कल्पिताः। तथा, सर्षपतैलेन भृष्टाः, सर्पिषा वा देशकालाद्यपेक्षया यथायथं भृष्टाः। तथा, रसिकाः-प्रशस्तरसवन्तः, प्रशंसायां ह्येष मत्वर्थीयः। मृदवो-न तीक्ष्णाः। तथा स्निग्धाः सैन्धवादिभिः कृतसंस्कारा हिताः। तद्वत्-तथैव, मूलकादिकृता यूषाः।

आ० र० - मांसपाकप्रकारमाह-मृगाद्या इति। मृगाद्याश्चत्वारो वर्गाः। प्रसहाद्याश्चत्वारः। यथायथं-पित्ते सर्पिषा, कफवातयोः सर्षपतैलेन। रसिकाः-सुरसाः। पटु-द्रव्यलक्षणम्। यूषानाह-हिता इति। तद्वत्-मांसरसवत्।

सपिप्पलीकं सयवं सकुलत्थं सनागरम्॥ १०॥

सदाडिमं सामलकं स्निग्धमाजं रसं पिबेत्।

तेन षड्विनिवर्तन्ते विकाराः पीनसादयः॥ ११॥

स० -पिप्पल्यादिभिः संस्कृतमाजं मांसरसं घृतादिस्नेहेन स्निग्धं पिबेत्, इत्यत्र मांसानामवश्यं स्निग्धत्वेऽपि स्निग्धग्रहणमेषां घृतादिस्नेहेन स्निग्धत्वं कार्यमिति प्रतिपादयति। तेन रसेन पीतेन, षट् विकाराः पीनसादयः-"पीनसश्वासकासां समूर्धस्वररुजः" (ह्.नि.अ.५११३), शाम्यन्ति।

आ० र० - आजमांसरसमाह-सपिप्पलीकमिति। पीनसादयः-एकादशस्वाद्याः षट्। अस्य पाकविधिः [सिद्धयोगे राजयक्ष्माधिकारे श्लो.३]-"द्रव्यतो द्विगुणं मांसं सर्वतोऽष्टगुणं जलम्। पादस्थम् संस्कृतं चाज्ये षडङ्गो यूष उच्यते॥" इति। सङ्ग्रहे तु (चि.अ. ७)-"कोलदाडिमनिर्यासपिष्टयाऽस्थिविहीनया। द्राक्षया स्वच्छधान्याम्लप्लुतालोडितकल्कया॥ कार्यः सौवर्चलव्योषपत्रैलादीप्यकान्वितः। समाक्षिकः सकर्पूरः सलवङ्गः सकेसरः। चन्द्रकान्तो यथार्थाख्यः शोषहाऽग्निरुचिप्रदः। शुक्ताम्रधात्रीस्वरसैर्द्राक्षायाः कल्कितं पलम्॥ गुडषद्पलसंयुक्तं युक्तं श्लक्ष्णैश्च कार्षिकैः। वृक्षाग्लधान्यद्रविडीराजिकादाडिमोषणैः। पलेन नागपुष्पस्य किञ्चित्सौवर्चलेन च। ससेव्यपत्रत्वक्तोयः सुरसारसमूर्च्छितः॥ भूरिभुस्तृणको रागः कल्प्यो रुच्यः समाक्षिकः॥' इति। दिविडी-एला। तोयं-वालकम्। सुरसारसः-तुलसीरसः, तेन मुर्च्छितः-एकलोलीभाव नीतः। भूरि-उद्भूतरसगन्धि, भूस्तृणं यत्र स तथा। रागः-पानकभेदः।

पिबेच्च सुररां मद्यं जीर्णं स्रोतोविशोधनम्।

पित्तादिषु विशेषेण मध्वरिष्टाच्छवारुणीः॥ १२॥

सिद्धं वा पञ्चमूलेन तामलक्याऽथवा जलम्।

पर्णिनीभिश्चतसृभिर्धान्यनागरकेण वा॥ १३॥

कल्पयेच्चानुकूलोऽस्य तेनान्नं शुचि यत्नवान्।

स ०-अतितरां जीर्णं पुराणं, च मद्यं स्रोतोविशुद्धिकरं पिबेत्। पित्तादिषु पित्तकफवातेषु, यथायुक्त्या मध्वादीन् विशेषेण पिबेत्। अथवा, पञ्चमूलेन-ह्रस्वेन, सिद्धं जलं पिबेत्। तामलक्या वा जलं पर्णिनीभिश्चतसृभिर्वा जलं पक्वं पिबेत्। धान्यनागरकाभ्यां वा श्रृतं पिबेत्। अस्य च-यक्ष्मिणः, अनुकूलो यत्नवान् परिचारकोऽन्नं शुचि तेन-पञ्चमूलादिजलेन, कल्पयेत्। अनुकूलादिग्रहणमत्रातिशयार्थम्।

आ० र०- मद्यमाह-पिबेच्चेति। सुतरां-अन्येभ्यो द्रव्येभ्यः। मधु-माद्वीकं,तत्पित्ते। अरिष्टं कफे। अच्छवारुणी वाते।

पानीयमाह-सिद्धं वेति।

एतानि चत्वारि जलान्यन्नपाकेऽपि योज्यानीत्याह-कल्पयेच्चेति। तेन-पञ्चमूलादिजलान्यतमेन। अनुकूलो यत्नवानिति पाचकविशेषणम्। शुचीति पाक्यविशेषणम्। यक्ष्मिणोऽन्ने तात्पर्यार्थम्।

दशमूलेन पयसा सिद्धं मांसरसेन वा॥ १४॥

बलागर्भं घृतं योज्यं क्रव्यान्मांसरसेन वा।

सक्षौद्रं पयसा सिद्धं सर्पिर्दशगुणेन वा॥ १५॥

स०-दशमूलक्काथेन तथा पयसाऽथवा मांसरसेन बलाकल्केन साधितं घृतं योज्यम्। क्रव्यान्मांसरसेन वा बलागर्भं पक्वं घृतं योज्यम्। क्षीरेण वा दशगुणेन बलागर्भं सिद्धं घृतं सक्षौद्रं योज्यम्।

आ० र०- अथ घृतानि। तत्र घृतसप्त[क]माह-दशमूलेनेति। दशमूलगर्भे द्वे। बलागर्भमेकम्। दशमूलस्य क्काथश्चेचत्वारि। बलागर्भागर्भहीनमेकमिति सप्त(?)। सक्षौद्राणि पेयानि।

जीवन्तीं मधुकं द्राक्षां फलानि कुटजस्य च।

पुष्कराह्वं शठीं कृष्णां व्याघ्रीं गोक्षुरकं बलाम्॥ १६॥

नीलोत्पलं तामलकीं त्रायमाणां दुरालभाम्।

कल्कीकृत्य घृतं पक्वं रोगराजहरं परम्॥ १७॥

स० -जीवन्त्यादीन् कल्कीकृत्य घृतं चतुर्गुणे जले पक्वं रोगराजहरं परम्।

आ० र० - घृतान्तरमाह-जीवन्तीमिति।

घृतं खर्जूरमृद्वीकामधुकैः सपरूषकैः।

सपिप्पलीकं वैस्वर्यकासश्वासज्वरापहम्॥ १८॥

स ० -कल्कीकृत्य पक्वमित्यनुवर्तते। खर्जूरादिभिः कल्कीकृत्य घृतं पक्वं पिप्पलीचूर्णेन युक्तं वैस्वर्यादिहरम्।

आ० र० - अन्यदाह-घृतमिति। खर्जूरादिक्काथेन पिप्पलीकल्केन।

दशमूलश्रृतात्क्षीरात्सर्पिर्यदुदियान्नवम्।

सपिप्पलीकं सक्षौद्रं तत्परं स्वरबोधनम्॥ १९॥

शिरःपार्श्वसशूलघ्नं कासश्वासज्वरापहम्।

पञ्चभिः पञ्चमूलैर्वा श्रृताद्यदुदियाद्धृतम्॥ २०॥

स ० -दशमूलक्काथितात् क्षीराद्यत्सर्पिरुदियात्-उद्गच्छेत्, तत्-प्रत्यग्रं, पिप्पलीक्षौद्रान्वितमतिशयेन स्वरबोधनं शिरःपार्श्वसशूलघ्नं कासादिहरम्। अथवा, पञ्चभिः पञ्चमूलैः श्रृतात्क्षीरात् यदुद्गवेद्धृतं तत्पूर्वगुणम्।

आ० र० - अन्यदाह-दशमूलश्रृतादिति। नवं-प्रत्यहं कृतम्।

पञ्चानां पञ्चमूलानां रसे क्षीरचतुर्गुणे।
सिद्धं सर्पिर्जयत्येतद्यक्ष्मणः सप्तकं बलम्॥२१॥

स० -पञ्चानां पञ्चमूलानां रसे क्षीरचतुर्गणे पक्वमेतद्यक्ष्मणः सप्तकं बलं-पीनसादिकं, एतद्धृतं जयेत्।

आ० र० - अन्यदाह-पञ्चाभिः पञ्चमूलैर्वेति। रसक्षीरयोश्चतुर्गुणत्वं मिलितयोः, परिभाषया प्राप्तत्वात्।

सं-पञ्चकोलयवक्षारषड्लेन पचेद्धृतम्।
प्रस्थोन्मितं तुल्यपयः स्रोतसां तद्विशोधनम्॥२२॥
गुल्मज्वरोदरप्लीहग्रहणीपाण्डुपीनसान्।
श्वासकासाग्निसदनश्वयथूर्ध्वानिलञ्जयेत्॥२३॥

स ० -पञ्चकोलादिना षड्लेन कल्केन घृतप्रस्थं तुल्यक्षीरं पचेत्। तत्स्रोतसां विशोधनं स्यात्। अत्र चानुक्तमपि जलं स्नेहाच्चतुर्गुणं त्रिगुणं वा देयं पूर्वोक्तन्यायात्। तथा गुल्मादीन् जयेत्।

आ० र० - षड्लं घृतमाह-पञ्चकोलेति। षण्णां पलानि कल्कीकृतानाम्, पश्चात्कल्कीकरणे कल्काधिक्यत्। द्रवचातुर्गुण्यं जलेन पुरणीयम्, जलं विना मुक्तरसत्वाभावात्।

रास्नाबलागोक्षुरकस्थिरावर्षाभुवारिणि।
जीवन्तीपिप्पलीगर्भं सक्षीरं शोषजिद्धृतम्॥२४॥

स० -रास्नादिक्काथे जीवन्तीपिप्पलीकल्कं क्षीरसहितं पक्वं घृतं शोषजित्।

आ० र० - अन्यदाह-रास्नाबलेति।

अश्वगन्धाश्रृतात्क्षीराद्धृतं च ससितापयः।

स० -अश्वगन्धया श्रृतात् क्षीरादुद्धृतं घृतं शर्कराक्षीरयुतं पूर्वोक्तगुणम्।

आ० र० - अन्यदाह-अश्वगन्धाश्रृतादिति। सितया कल्केन पयसा वैद्रेण (द्रवेण) सिद्धम्।

साधारणामिषतुलां तोयद्रोणद्वये पचेत्॥ २५॥

तेनाष्टभागशेषेण जीवनीयैः पलोन्मितैः।

साधयेत्सर्पिषः प्रस्थं वातपित्तामयापहम्॥ २६॥

मांससर्पिरिदं पीतं युक्तं मांसरसेन वा।

कासश्वासस्वरभ्रंशशोषहृत्पार्श्वशूलजित्॥ २७॥

स० -साधारणस्य-बिलेशयप्रसहानां मांसस्य, तुलां-पलशतं जलद्रोणद्वये पचेत्। तेनाष्टभागशेषेण क्काथेन जीवनीयैः पालिकैः सर्पिषः प्रस्थं पचेत्। मांससर्पिःसंज्ञमेतत् केवलं पीतं मांसरसेन्स् वा युक्तं पीतं वातपित्तघ्नं कासादिजित्।

आ० र० - मांसघृतमाह-साधारणामिषतुलामिति। साधारणं-प्रसहबिलेशयानाम्। पीतं प्रातः, रसे[न]युक्तं भोजनम्। सङ्ग्रहे (चि.अ. ७)-"दुरालभां गोक्षुरकं चतस्रः पर्णिनीर्बलाम्। भागान् पलोन्मितान् कृत्वा पलं पर्पटकस्य च॥ पचेद्दशगुणे तोये दशभागावशेषिते। पूते तस्मिन् घृतप्रस्थं क्षीरं च द्विगुणं पचेत्॥ गर्भं दत्वा शठीकृष्णा भूनिम्बोत्पलसारिवाः। त्रायन्ती पौष्करं मूलं सहपत्रफलां फलम्॥ कुटजस्य जतेत्तद्धि शिरःपार्श्वांसवेदनाम्। तृष्णां छर्दिमतीसारकासदाहभ्रमज्वरान्॥ उत्पलसारिवा-कृष्णसारिवा। यष्टीबलागुडूच्यल्प-पञ्चमूलतुलां पचेत्। शूर्पेऽपामष्टभागस्थे तत्र पात्रं पचेद्धतात्॥ धात्रीविदारीक्षुरसत्रिपात्रे पयसोऽर्मणे। सम्पिष्टैर्जीवनीयैश्च पाराशरमिदं घृतम्॥ ससैन्यं राजयक्ष्माणमुन्मूलयति शीलितम्। मुर्वाहरिद्राखदिरक्काथं सर्पिः शकृद्रसम्॥ गोगजाजाविहयजं पयस्तुल्यान् दश द्रवान्। स्वादुस्कन्धं त्रिकटुकं कल्कितं देवदारु च॥ पचेत्तच्छ्वासशोषघ्नं तद्वद्वासावरीघृतम्।

सपञ्चपटु पञ्चाजं क्षयी क्षीरानुपः पिबेत्॥ द्विपञ्चमूलवरणयवबिल्वपुनर्नवाः। करञ्जबोटस्थविरकुलत्थबदराग्निकाः॥ भल्लातकं च तत्काथे षड्गुणे साधयेद्घृतम्। गर्भं दत्वा स्नुहीक्षीरं शुकाख्याचव्यसैन्धवम्॥ हरीतकीं च तच्छोषशोफमेदोदरापहम्॥" इति। तथा (सङ्ग्रहे चि. अ. ७)-"यवाग्वा वा पिबेन्मात्रां लिह्याद्वा मधुनाऽन्विताम्। सिद्धानां सर्पिषामेषामद्यादन्नेन वा सह॥" इति। सर्वेषां सर्पिषां प्रयोगान्तरमेतत्। वङ्गसेने तु (राज.श्लो. १५)-"गुडूचीसारिवाह्वस्वापञ्चमूलीबलावृषम्। समूलपत्रशाखं तु पृथग्दशपलांशिकम्॥ जलद्रोणे विपक्तव्यं यावत्पादावशेषितम्। पिप्पली चन्दनं रोध्रं हीबेरोशीरपर्पटम्॥ पाठाभूनिम्बयष्ट्याह्वत्रायन्तीनीलमुत्पलम्। मुस्तकेन्द्रयवाः शुण्ठी कटुकं सदुरालभम्॥ त्वक्पत्रं वृषमूलं च कल्कैरर्धपलैर्भिषक्। अजाक्षीरेण तत्तुल्यं घृतप्रस्थं विपाचयेत्॥ हन्ति यक्ष्माणमत्युग्रं रक्तपित्तं त्रिदोषजम्। श्वासकासक्षतक्षीणदाहशोषरुजापहम्॥ वासामृतारिष्टनिद्रग्धिकानां रसेऽश्वगन्धेभबलार्जुनानाम्। सिद्धं सपञ्चोषणपुष्कराणां कल्कैर्घृतं छागपयश्च शोषे॥" इति। योगरत्ने-"मधुकस्य शतं दद्यात् काश्मर्याणां तथाऽऽढकम्। परूषकाणां द्राक्षायाः खर्जूरौदनपाक्ययोः॥ मधूकपुष्पस्य तथा मुजातकढकम्(?)। द्विद्रोणेऽपां विपक्तव्यं चतुर्भागावशेषितम्॥ तस्मिन्कषाये पूते च पुनरग्नावधिश्रयेत्। आर्द्रामलककाश्मर्यविदारीक्षुरसाढकम्॥ तैलाढकं तु संयोज्य पचेत्क्षीरे चतुर्गुणे। तस्मिंस्तथा पच्यमाने कल्कांश्चेमान् समावपेत्॥ पिप्पलीं शृङ्गबेरं च कदलीं [च स] शर्कराम्। बलावालकदम्बं च सूक्ष्मैलां पद्मबीजकम्॥ शृङ्गाटकं कसेरुं च जीवनीयानि यानि च। द्विपलीनां पृथग्दत्वा विपचेन्मृदुनाऽग्निना॥तत्सिद्धं स्नावयित्वा तु शीतं क्षौद्रेण संसृजेत्। नस्यमभ्यञ्जनं पानं प्रशस्तं बस्तिकर्मइ। वातव्याधिषु सर्वेषु क्षतक्षीणे शिरोग्रहे। वातश्चले(?)प्रमेहे च गुल्मे चार्शे भगन्दरे॥ वातभग्नाङ्गहीनानां कासे श्वासे च हृद्ग्रहे। ज्वरातिसारेषरुचौ कर्णनादे स्वरक्षये॥ सुकुमारमिदं तैलं बालवृद्धसुखावहम्। एतद्धि वृष्यं बल्यं [च] रक्तमांसविवर्धनम्॥ स्ववर्णकरं चैव शोषिणाममृतोपमम्। निःपाकस्वस्य शैलस्य(?)सम्यक्सिद्धस्य योजयेत्॥ उदस्विदिव दध्यर्थं सोऽपि कृत्यकरो भवेत्। एकादश च षट् चैव शोषिणां य उपद्रवाः॥ सुकुमारं प्रशमयेन्मेध्यो(घो)ऽग्निरि(मि)व वृष्टिमान्॥" इति। ओदनपाक्या-बला।

एलाजमोदात्रिफलासौराष्ट्रीव्योषचित्रकान्।

सारानरिष्टगायत्रीशालबीजकसम्भवान्॥२८॥

भल्लातकं विडङ्गं च पृथगष्टपलोन्मितम्।

सलिले षोडशगुणे षोडशांशास्थितं पचेत्॥ २९॥

पुनस्तेन घृतप्रस्थं सिद्धे चास्मिन्पलानि षट्।

तवक्षीर्याः क्षिपोत्रिंशत्सिताया द्विगुणं मधु॥ ३०॥

घृतात्रिजातात्रिपलं ततो लीढं खजाहतम्।

पयोनुपानं तत्प्राह्ने रसायनमयन्त्रणम्॥ ३१॥

मेध्यं चक्षुष्यमायुष्यं दीपनं हन्ति चाचिरात्।

मेहगुल्मक्षयव्याधिपाण्डुरोगभगन्दरान्॥ ३२॥

स ०-एलादि प्रत्येकमष्टपलप्रमाणं षोडशगुणे जले षोडशां शस्थितं-षोडशांशावशेषितं यथास्यात्तथा, पचेत्। तेन-क्काथेन, पुनर्घृतप्रस्थं पचेत्। सिद्धे चास्मिन् घृते तुगाक्षीर्याः पलानि षट्, सितायास्त्रिंशत्पलानि, माक्षिकं घृताद्विगुणं-प्रस्थौ द्वावित्यर्थः, त्रिजातकात् पलत्रयं तदेतस्मिन् क्षिपेत्। खजाहतं समीकरणाय दर्व्याऽऽलोडितं, पूर्वाह्णे लीढं पयोनुपानं रसायनमयन्त्रणं मेध्यादिगुणं च स्यात्। आश्वेव गुल्मादीन् हन्ति।

आ० र० - अथ सर्पिर्गुडाः। तत्रैलादिसर्पिर्गुडमाह-एलाजमोदेति।

ये च सर्पिर्गुडाः प्रोक्ताः क्षते योज्याः क्षयेऽपि ते।

स० -ये च क्षते सर्पिर्गुडा गदितास्ते च क्षयेऽपि योज्याः।

आ० र०- क्षतकासोक्तान् सर्पिर्गुडनतिदिशति-ये चेति। वङ्गसेने (राज. श्लो. १२१)-"छागमांसतुलां गृह्य साधयेन्नल्वणेऽम्भसि। पादशेषेण तेनैव सर्पिःप्रस्थं विपाचयेत्॥ ऋद्धिर्वृद्धिश्च मेदे द्वे तथा ऋषभजीविते(वके)। काकोलीक्षीरकाकोली कल्कैः पृथक्पलोन्मितैः॥ सम्यक्सिद्धे चावतार्य शीते तस्मिन् प्रदापयेत्। शर्करायाः पलान्यष्टौ मधुनः कुडवं क्षिपेत्॥ पलं पलं लिहेत्प्रातर्यक्ष्माणं हन्ति दुस्तरम्। क्षतक्षयं च कासं च पार्श्वशूलमरोचकम्॥ स्वरक्षमुरोरोगं श्वासं हन्यात्सुदुस्तरम्। बलमांसकरं वृष्यमग्निसन्दीपनं परम्॥ (श्लो. १३५)-वासकस्य रसप्रस्थं मानिका सितशर्करा। पिप्पली द्विपलं तद्वदाज्यं मृद्वग्निना पचेत्॥ लेहीभूते ततः पश्चाच्छीते क्षौद्रपलाष्टकम्। दत्वाऽवचारयेद्वैद्यो मात्रया लेहमुत्तमम्॥ निहन्ति

राजयक्ष्माणं कासं श्वासं च दारुणम्। पार्श्वशूलं च हृच्छूलं रक्तपित्तं ज्वरं तथा॥ त्वक्क्षीरीस्त्राविणीद्राक्षामूर्वभकजीवकैः। वीरद्विक्षीरकाकोलीबृहतीकपिकच्छुभिः॥ खर्जूरवृषमेदाभिः क्षीरपिष्टैः पलोन्मितैः। धात्रीविदारीक्षुरसप्रस्थैः प्रस्थं घृतात्पचेत्। शर्करार्धतुलां शीते क्षौद्रार्धप्रस्थमेव च॥ दत्वा सर्पिर्गुडान् कुर्यात् कासहिक्काज्वरापहान्। यक्ष्माणं तमकं श्वासं रक्तपित्तं हलीमकम्॥ शुक्रनिद्राक्षयं तृष्णां हन्युः काश्र्यं सकामल्म्। तथैव च्यवनप्राशः पित्तोद्रेके प्रशस्यते॥" इति।

त्वगेलापिप्पलीक्षीरीशर्करा द्विगुणाः क्रमात्॥ ३३॥

चूर्णिता भाक्षिताः क्षौद्रसर्पिषा वाऽबलेहिताः।

स्वर्याः कासक्षयश्वासपार्श्वरुक्कफनाशनाः॥ ३४॥

स० -त्वगेलादयः क्रमेण द्विगुणाश्चर्णिता भुक्ता माक्षिकसर्पिर्भ्या वाऽबलेहिताः स्वर्याः-स्वराय हिताः स्युः, कासादिघ्नाश्च।

आ० र० - अथ चूर्णादीनि। तच्च(त्र) त्वगादिचूर्णमाह त्वगेलेति। क्षीरी-तुगाक्षीरि। सङ्ग्रहे (चि.अ. ७) - "खर्जूरपिप्पलीद्राक्षपथ्याश्रृङ्गीदुरालभाः। त्रिफलापिप्पलीमुस्त-श्रृङ्गाटीगुडशकराः॥ वीरा शठी पुष्कराख्या सुरसा शर्करा गुडः। नागरं चित्रको लाजाः पिप्पल्यामलकं गुडः॥ विडङ्गसारश्चविका त्र्यूषणं च विचूर्णितम्। अर्धश्लोकैः स्मृता लेहाः। पञ्चैते क्षौद्रसर्पिषा॥ स्वर्याः कासक्षयश्वासपार्श्वरुक्कफनाशनाः॥ तिलमाषाश्वगन्धा वा माक्षिकाजघृतद्रुताः। पूर्वोक्तेष्वेव [रोगेषु वातप्रायेषु] पूजिताः॥" इति। वङ्गसेने (राज. श्लो. ३ ६)-"धान्याकपिप्पलीविश्वदशामूलीजलं पिबेत्। पार्श्वशूलज्वरश्वासपीनसादिनिवृत्तये॥ अश्वगन्धामृताभीरुदशामूलीबलावृषाः। पुष्करातिविषे घ्नन्ति क्षयं क्षीररसाशिनः॥ कपिमांसं समादाय श्लक्ष्णचूर्णं तु कारयेत्। तत्पिबेत् क्षीरसंयुक्तं क्षयरोगहरं परम्॥ हरिणः छागमांसं तु [श्लक्ष्णचूर्णीकृतं शुभम्। अजाक्षीरेण पातव्यं क्षव्याधिविनाशनम्॥ दशमूलवचारास्ना] पुष्करसुरदारुनागरैः क्वथितम्॥ पेयं पार्श्वशिरोरुक्कासश्वासादिशान्तये सलिलम्। ककुभत्वङ्नागबलावानरिबीजानि चूर्णितं पयसि। पक्वं मधुघृतयुक्तं ससितं यक्ष्मादिकासहरम्॥ द्विपञ्चमूलमगधाधान्यनागरजं जलम्। चातुर्जातकसंयुक्तं पिबेन्नित्यं क्षयातुरः। कासज्वरादिशमनं बलपुष्टिविवर्धनम्॥ समूलपुष्पत्वक्पल्लवाया रसः प्रयोज्यो मदयन्तिकायाः। मासोपयोगेन समस्तलिङ्गं यक्ष्माणमुग्रं जयति प्रसह्य॥ छागं मांसं पयश्छागं सर्पिः सनागरम्।

छागोपसेवा शयनं छागमध्ये तु यक्ष्मनुत्॥ कूष्माण्डकफलोत्थेन रसेन परिपेषितम्। लाक्षाकर्षद्वयं पीत्वा जयेदग्रं क्षयं नरः॥ व्योषं शतावरी त्रीणि फलानि द्वे बले तथा। सर्वामयहरो योगः सोऽयं लोहरजोन्वितः॥ एतद्वक्षःक्षतं हन्ति कण्ठजां विविधां रुजम्। राजयक्ष्माणमत्युग्रं सोरुस्तम्भमथार्दितम्॥ (श्लो. ८५)-श्वङ्ग्वर्जुनाश्वगन्धानागबला-पुष्कराभयाच्छिन्नरुहाः। तालीसादिसमेता लेह्या मधुसर्पिषा च यक्ष्महराः॥" इति। योगरत्ने-"कृष्णाद्राक्षासितालेहः क्षयहा क्षौद्रतैलवान्। मधुसर्पिर्युतो वाऽश्वगन्धाकृष्णासितोद्भवः॥ शतावरी विदार्यश्वगन्धा पथ्या पुनर्नवा। बलात्रयं [श्व]दंष्ट्राऽऽज्यमधुलेहः क्षयापहः॥ शिलाजितुमधुव्योषताप्यलोहरजांसि यः। क्षीरभुक् लेढितस्याशु क्षयः क्षयमवाप्नुयात्॥ मधुताप्यविडङ्गाश्मजतुलोहघृताभयाः। घ्नन्ति यक्ष्माणमत्युग्रं सेव्यमाना हिताशिना॥ शर्करामधुसंयुक्तं नवनीतं लिहन् क्षयी। क्षीराशी लभते पुष्टिमतुल्ये वाऽऽज्यमाक्षिके॥ बाह्यालकरसो(सात्) सिद्धं सर्पिः पीतं क्षयं हरेत्। घृतमाक्षिकसम्मिश्रो बाह्यालकरसो यथा॥ जातसारं तु गण्डीरं सपुष्पं परिशोषयेत्। षडंशश्छेदितं कृत्वा तस्य पञ्चाढकं पचेत्॥ त्रींश्चैव त्रिफलाप्रस्थान् दशमूलीतुलां तथा। दद्यात्कुटजवल्कस्य पलानां पञ्चविंशतिम्॥ भल्लातकानीड(न्द्र)यवा विडङ्गं घनमेव च। अर्धप्रस्थ समान् भागानेकैकस्य समापयेत्॥ पाठा मधुरसा.....षड्ग्रन्था चित्रकस्तथा। एषां दशपलान् भागान् मृद्वीकायास्तथाऽऽढकम्॥ तोयद्रोणेषु दशसु पचेद्विद्रोणशेषितम्। तस्मिन्कषाये पूते तु द्वे गुडस्य तुले पचेत्॥ योगेन साधितं चैव शुभे भाण्डे निधापयेत्। द्वौ प्रस्थौ पिप्पलीनां तु द्वौ चायोरजसस्तथा॥ अर्धप्रस्थो विडङ्गानां कुडवो मरिचस्य च। एतानि सूक्ष्मचूर्णानि प्रतीवा पार्थमाहरेत्॥ चूर्णमिन्द्रयवानां च मधुना सह योजयेत्। भाण्डप्रलेपः कर्तव्यः समासिच्य निधापयेत्॥ एष मासस्थितो लेह्यो यथाव्याधिबलाबलम्। गण्डीरारिष्ट इत्येष व्यासतः परिकीर्तितः॥ एष शोषान् प्रमेहांश्च गुल्मांश्च जठराणि च। क्रिमिकोष्ठानि वर्ध्मानि प्लीहार्शांसि भगन्दरम्॥ श्वयथुं पाण्डुरोगांश्च ग्रहणीदोषमेव च। ग्रन्थीन् सगलगण्डांश्च गण्डमालां तथैव च॥ विषमज्वरकासांश्च विद्रधिं वातशोणितम्। अरिष्टः शमयत्येष युधि शक्र इवासुरम्॥ समूलां पिप्पलीं श्वङ्गीं बृहतीमश्मभेदकम्। पटोलं देवकाष्ठं च श्वदंष्ट्रामभयाशतम्॥ एकैकं षोडशपलं कोलानामाढकं मितम्। दन्तीचित्रकमूलानां पञ्चविम्शत्पलं पृथक्॥ चतुर्गुणे जलद्रोणे पचेदर्धावशेषितम्। शीतं समावपेद्भाण्डे प्रलिप्ते मधुसर्पिषा॥ खण्डस्य द्वे शते शुद्धे तद्वल्लेहस्य चावपेत्। पत्रं कृत्वा तिलोत्सेधं सूक्ष्मचूर्णीकृतानि च॥ प्रियङ्गुं पिप्पलीं रोध्रं मृद्वीकामेलवालुकम्। क्रमुकं शतपुष्पं च निम्बं तेजोवतीमपि॥ पालिकं देवदारुं च खदिराच्च चतुष्पलम्। क्षौद्रप्रस्थद्वयं चापि समासिच्य घटे शुभे॥ सौम्ये पुष्ये तथा हस्ते रोहिण्यामुत्तरासु च। दशरात्रस्थितो पे(दे)योऽरिष्ट

आत्रेयपूजितः॥ अश्विभ्यां कथितं पूर्वं रसायनमिदं शुभम्। यथाग्निबलमात्रां तु पिबेदस्य हिताशिनः॥ धन्यं पुष्टिकरं मेध्यं वलीपलितनाशनम्। क्षयकासज्वरप्लीहकुष्ठगुल्माग्निमार्दवे॥ श्वित्रेऽश्मर्याक्त(म)थोदर्दे विद्रध्यामथ(न्न)विद्विषु। गण्डरोगोदरतथा(?)रेतोदोषे च शस्यते॥ नाडीपीडकयोर्दोषे भूतापस्मारसङ्करे। रहस्यमेतद्वैद्यानामुपदिष्टं चिकित्सितम्॥ मद्यं क्रव्यादमांसं च शोषिणाममृतोपमम्॥ फलत्रिकक्काथविशुद्धमादौ शुद्धं गुडूच्या दशमूलशुद्धम्। स्थिरादिकाकोलियुतादिसिद्धं शिलाजतु स्यात्क्षयिषु प्रशस्तम्॥ स्थिरादिः-विदार्यादिः। काकोली युगादिः-पद्मकादिः। रसोनयोगं विधिवत्क्षयार्तः क्षीरेण वा नागबलाप्रयोगम्। भवेत वा मागधिकाविधानं तथैव योगं जतुनोऽश्मजस्य॥" इति।

अथ स्वरसादचिकित्सितम्।

विशेषात्स्वरसादेऽस्य नस्यधूमादि योजयेत्।

स० -अस्य-क्षयिणः, स्वरसादे विशेषेण नस्यधूमादि योज्यम्।

तत्रापि वातजे कोष्णं पिबेदौत्तरभक्तिकम्॥ ३५॥

कासमर्दकवार्ताकीमार्कवस्वरसैर्घृतम्।

साधितं कासजित्स्वर्यं सिद्धमार्तगलेन वा॥ ३६॥

स ० -[तत्र]-तेषु च खरसादेषु मध्ये, वातजे स्वरसादे कासमर्दादिस्वरसैः साधितमौत्तरभक्तिकं-भक्तादूर्ध्वं, घृतं पिबेत्। मार्कवो-भृङ्गराजः। तच्च सर्पिः कासजित् स्वर्यं च स्यात्। उत्तरभक्तादिति "मयूरव्यंसकादित्वात्" समासः, ततश्च "अध्यात्मादित्वात्" ठञ्। अथवा, आर्तगलेन-नीलपुष्पसहचरेण, सिद्धं घृतमेवं पिबेत्।

बदरीपत्रकल्कं वा घृतभृष्टं ससैन्धवम्।

स० -अथवा बदर्याः पत्रकल्कं घृतभृष्टं ससैन्धवं योजयेत्।

तैलं वा मधुकद्राक्षापिप्पलीकृमिनुत्फलैः॥३७॥

हंसपाद्याश्च मूलेन पक्वं नस्तो निषेचयेत्।

स०-अथवा तैलं मधुकादिभिः पक्वं नस्तोऽवसेचयेत्। कृमिघ्नं(नुत्)-विडङ्गम्। फलं-मदनफलम्। हंसपादी-कीटमारिका। नस्त इति "नसूनासिकाया यत्तसूक्षुद्रेष्" इत्यनेन तसि नसादेशः।

सुखोदकानुपानं च ससर्पिष्कं गुडौदनम्॥३८॥

आश्नीयात्पायसं चैवं स्निग्धं स्वेदं नियोजयेत्।

स०-तथा गुडौदनं सर्पिषा सह सुखोदकानुपानमश्नियात्। पायसं चैवं ससर्पिष्कं सुखोदकानुपानमद्यात्। स्वेदं च स्निग्धं योजयेत्।

पित्तोद्भवे पिबेत्सर्पिः शृतशीतपयोनुपः॥३९॥

क्षीरिवृक्षाङ्कुरक्काथकल्कसिद्धं समाक्षिकम्।

अश्नीयाच्च ससर्पिष्कं यष्टीमधुकपायसम्॥४०॥

स०-पित्तोद्भवे सर्पिः समाक्षिकं क्षीरिवृक्षाङ्कुरादिक्काथकल्कसिद्धं शृतशीतक्षीरानुपः पिबेत्। मधुयष्टिकान्वितं पायसं ससर्पिष्कं भुञ्जीत।

बलाविदारिगन्धाभ्यां विदार्या मधुकेन च।

सिद्धं सलवणं सर्पिर्नस्यं स्वर्यमनुत्तमम्॥४१॥

स०-बलादिभिः सिद्धं सर्पिः ससैन्धवं परं स्वर्यं स्यान्नस्यम्। विदारिगन्धा-शालिपर्णी।

प्रपौण्डरीकं मधुकं पिप्पली बृहती बला।
साधितं क्षीरसर्पिश्च तत्स्वर्यं नावनं परम्॥४२॥

स० -पित्तजे स्वरसादे प्रपौण्डरीकादिसाधितं क्षीरोद्भवं सर्पिः श्रेष्ठं नस्यम्।

लिह्यान्मधुरकाणां च चूर्णं मधुघृताप्लुतम्।

स० -मधुरकाणां च-मधुररसद्रव्याणां, चूर्णं मधुघृतान्वितं लिह्यात्।

पिबेत्कटूनि मूत्रेण कफजे रूक्षभोजनः॥४३॥
कटूफलामलकव्योषं लिह्यात्तैलमधुप्लुतम्।
व्योषक्षाराग्निचविकाभार्गीपथ्यामधूनि वा॥४४॥

स० -कफोद्भवे कटूनि-कटुकरसानि द्रव्याणी, मूत्रेण पिबेत्। रूक्षभोजनश्च स्यात्। तथा, कटूफलादिकं तैलमधुप्लुतं लिह्यात्। व्योषादीनि वा एवं लिह्यात्।

यवैर्यवागूं यमके कणाधात्रीकृतां पिबेत्।
भुक्त्वाऽद्यात्पिप्पलीं शुण्ठीं तीक्ष्णं व वमनं भजेत्॥

स ० -यवैरुपादानैर्यमके-स्नेहद्वये, कणाधात्रीकृतां-एतत्काथे सिद्धां, यवागूं पिबेत्। तथा, भुक्त्वा पिप्पलीं शुण्ठीं वाऽद्यात्। अथवा, तीक्ष्णं वमनं भजेत्।

शर्कराक्षौद्रमिश्राणि श्रृतानि मधुरैः सह।

पिबेत्पयांसि यस्योच्चैर्वदतोऽभिहतः स्वरः॥४६॥

इति स्वरसादचिकित्सितम्।

स०-यस्योच्चैर्भाषमाणस्य स्वरोऽभिहतः स मधुरैः-जीवनीयैः सह, श्रृतानि शर्करामाक्षिकमिश्राणि पयांसि पिबेत्।

अथारोचकचिकित्सितम्।

विचित्रमन्नमरुचौ हितैरुपहितं हितम्।

बहिरन्तर्मृजा चित्तनिर्वाणं हृद्यमौषधम्॥४७॥

द्वौ कालौ दन्तपवनं भक्षयेन्मुखधावनैः।

कषायैः क्षालयेदास्यं धूमं प्रायोगिकं पिबेत्॥४८॥

तालीसचूर्णवटकाः सकर्पूतसितोपलाः।

शशाङ्ककिरणाख्याश्च भक्ष्या रुचिकराः परम्॥४९॥

स०-अरोचके विचित्रं-नानाविधमन्नं, हितं-पथ्यम्। किम्भूतम्? हितैः-पथ्यैः, उपहितं-मिश्रितम्। एवमरुच्याख्यो व्याधिविशेषः सर्वव्याधिभ्यो गरीयान्। येनापथ्यमपि यदन्नं तस्मै तदपि देयं प्राणसन्धारणार्थम्, "अन्नमेव प्राणिनां प्राणाः" इत्याहुः। एवं च सर्व्याधिष्वरुचिरेव पूर्वं जेतव्या, ततो ज्वरादय इत्यर्थादुक्तं भवति।

बहिर्मृजा-बहिःशुद्धिः स्नानादिना बहिः परिमार्जनम्। अन्तमृजा-अन्तःशुद्धिः। तथा, चित्तनिर्वाणमरुचौ हितं हृद्यमौषधं च। तथा, द्वौ कालौ-सायंप्रातराख्यौ, दन्तधावनं भक्षयेत्। तथा, मुखधावनैः कषायैरास्यं क्षालयेत्। प्रायोगिकं-स्नैहिकं, धूमं पिबेत्।

तथा, तालीसचूर्णवटकाश्च। तथा, सकर्पूरशर्कराः शशाङ्ककिरणाख्या भक्ष्याः परं-अतिशयेन, रुचिकराः।

आ० र० - अथोरोचकचिकित्सितम्। तत्र सामान्यमाह-विचित्रमन्नमिति। अन्तर्मृजा-वमनादि। निर्वाणं-निर्वृत्तिः। द्वौ कालौ-प्रातर्भुक्त्वा सायं च। मुखधावनैः-तिक्तकद्वह्लकृतैः। प्रयोगिकं-शमनम्। तालीसचूर्णं-तालीसपत्रचूर्णः, तस्य वटकाः सितोपलया कार्याः। ते च कर्पूरेण सुरभीकृताः। शशाङ्ककिरणाः-कर्पूरनालिकाः।

सामान्येनारुचौ चिकित्सितान्युक्त्वा विशेषमाह-

वातादरोचके तत्र पिबेच्चूर्णं प्रसन्नया।

हरेणुकृष्णाकृमिजिद्राक्षासैन्धवनागरात्॥५०॥

एलाभार्गीयवक्षारहिङ्गुयुक्ताद्धृतेन वा।

छर्दयेद्वा वचाम्भोभिः

स० -वातेनारुचौ सत्यां हरेण्वादिभ्यश्चूर्णं प्रसन्नया पिबेत्। एलाभार्ग्यादियुक्तघृतेन वा पेयम्। वचाजलैर्वा वमेत्।

आ० र० - वातस्यौषधमाह-वातादिति।

वमनमाह-छर्दयेद्वेति। वचाम्भोभिः-वचाकल्कितैरुष्णाम्बुभिः।

पित्ताअच्च गुडवारिभिः॥५१॥

लिह्याद्वा शर्करासर्पिर्लवणोत्तममाक्षिकम्।

स० -पित्तादरुचौ गुडवारिणा वमेत्। शर्करादिकं [वा] लिह्यात्।

आ० र० - पित्तजस्यौषधमाह-पित्ताच्चेति। गुडवारिभिरिति मदनफलयुक्तैश्च्छर्दयेत्।

लेहमाह-लिह्याद्वेति। लवणोत्तमं-सैन्धवम्।

कफाद्वमेन्निम्बजलैर्दीप्यकारग्वधोदकम्॥५२॥

पानं समध्वरिष्टाश्च तीक्ष्णाः समधुमाधवाः।

पिबेच्चूर्णं च पूर्वोक्तं हरेण्वाद्युष्णवारिणा॥५३॥

स० -कफादरोचके निम्बजलैर्वमेत्। दीप्यककर्णिकारयोरुदकं पानं समाक्षिकम्। अरिष्टाश्च तीक्ष्णाः समार्द्वीकमाधवाः पानम्। हरेण्वादिचूर्णं च पूर्वोक्तं (श्लो.५०)उष्णाम्बुना पिबेत्।

आ० र० - कफजस्यौषधमाह-कफाद्वमेदिति। निम्बजलैरिति मदनफलयुक्तैः।

पानमाह-दीप्यकारग्वधोदकमिति। मधु-माध्वीकम्। माधवो-मधुकृतं मद्यम्।

॥चूर्णमाह-पिबेच्चूर्णमिति। सङ्ग्रहे (चि.अ. ७)-"त्रिकटुत्रिफलारात्रियवक्षारं मधुप्लुतम्। प्रातराहारकाले च युञ्जीत मुखधावनम्॥ रात्रिः-हरिद्रा। बिडं सौवर्चलं कुष्ठमजाजीमरीचं सिता। धात्र्येलापद्मकोशीरपिप्पलीचन्दनोत्पलम्॥ रोध्रं तेजोवती पथ्या यवक्षारं कटुत्रयम्। आर्द्रादाडिमनिर्यासः साजाजीसितशर्करः॥ सतैलमाक्षिकयुताश्चत्वारः कवलग्रहाः। चतुरोऽरोचकान् हन्युरे कदोषसमस्तजान्॥ कारव्यजाजीमरिचद्राक्षावृक्षाम्लदाडिमम्। सौवर्चलगुडक्षौद्रं सर्वारोचकनाशनम्॥" इति। वङ्गसेने(?)-"जम्ब्वाम्रपल्लवं रोध्रं त्रिफला चत्व्यचित्रकौ। पटोलं नक्तमालश्च शिरीषं खदिरासनौ॥ दार्वी हरिद्रा मुस्तं च तेजोह्वा मधुकं बला। एतानि समभागानि कषायमुपसाधयेत्॥ कवलग्रह इत्येष कर्तव्यो मधुना युतः। सर्वेषां मुखरोगाणामरुचीनां च नाशनः॥ षाडवश्च कपित्थानां सव्योषमधुशर्करः। अरोचकेषु सर्वेषु प्रशस्तो धारितो मुखे॥ आरनालं च शुक्तं च मार्द्वीकमदिरासवाः। दन्तयोरन्तरे धार्यास्तथैव कवलग्रहाः॥ त्वङ्मुस्तवेलाधान्यानि, मुस्तमामलकं त्वचा। त्वचोदार्यायवान्यश्च, पिप्पली तेजवत्यपि॥ यवानी तिन्तिडीकं च, पञ्चैते मुखधावनाः। श्लोकपादेषु विहिता रोचना मुखशोधनाः॥ कारञ्जं दन्तकाष्ठं च विधेयमरुचौ सदा। (वङ्गसेने अरोचकाधिकारे श्लो. ११)-"मरिचं मधुना लेह्यं कफजेऽरोचके भृशम्॥ अम्लीकागुडतोयं च त्वगेलामरिचान्वितम्। अभक्तच्छन्दरोगेषु शस्तं कवलधारणम्॥ शृङ्गवेररसं चैव मधुना सह योजयेत्। अरुचिश्वासकासघ्नं प्रतिश्यायकफवातनुत्॥ भोजनाग्रे सदा पथ्यं जिह्वाकण्ठविशोधनम्। अग्निसन्दीपनं हृद्यं लवणार्द्रकभक्षणम्॥ कारव्यजाजीपत्रैलाव्योषवृक्षाम्लदाडिमम्। सक्षौद्रशर्करं हृद्यं

रुचिकृद्वह्निदीपनम्॥ बिडचूर्णमधूपेतो रसो दाडिमसम्भवः। असाध्यामपि संहन्यादरुचिं वक्त्रधारितः॥ शिग्रूफलान्यष्टादश दश मरिचं विं[शतिश्च पिप्पल्यः। आर्द्रकपलं गुडपलं प्रस्थत्रयमारनालस्य॥ बिडलवनसहितमेतत् खजाहतं सुरभिगन्धाढ्यम्। व्यञ्जनसहस्रघाति ज्ञेयं कलहंसकं नाम्ना॥" इति।]

एलात्वङ्नागकुसुमतीक्ष्णकृष्णामहौषधम्।

भागवृद्धं क्रमाच्चूर्णं निहन्ति समशर्करम्॥५४॥

प्रसेकारुचिहृत्पार्श्वकासश्वासगलामयान्।

स० -एलादिकं चूर्णं क्रमेण भागवृद्धं समशर्करं प्रसेकादीन् हन्ति।

आ० र० - [समशर्करचूर्णमाह-] एलात्वगिति। केचित्त्वङ्नागपुष्पयोर्मध्ये पत्रकमधिकं पठन्ति, केचिन्नागपुष्पमरीचयोर्मध्ये। पाठत्रयमपि प्रमाणम्।

यवानीतित्तिडीकाम्लवेतसौषधदाडिमम्॥५५॥

कृत्वा कोलं च कर्षांशं सितायाश्च चतुष्पलम्।

धान्यसौवर्चलाजाजीवराङ्गं चार्धकार्षिकम्॥५६॥

पिप्पलीनां शतं चैकं द्वे शते मरिचस्य च।

चूर्णमेतत्परं रुच्यं हृद्यं ग्राहि, हिनस्ति च॥५७॥

विबन्धकासहृत्पार्श्वप्लीहार्शोग्रहणीगदान्।

स० -यवानीत्यादि कोलान्तानि प्रत्येकं कार्षिकाणि, शर्करायाः पलानि चत्वारि, धान्यकादिकमर्धकार्षिकं, शतमेकं पिप्पलीनां, द्वे शते मरिचस्य च, चूर्णमिदं परं रुच्यं तथा हृदयाय हितं ग्राहि, विबन्धादीन् हन्ति।

आ० र० - षाडवमाह_यवानीति। औषधं-शुण्ठी। कोलं-बदरम्। वराङ्गं-त्वक्। शतं-मेयस्य, न मानस्य कर्षादेः। "सङ्ख्या फलानां शतशोऽपला स्यात्।" इति वचनात्।

तालीसपत्रं मरिचं नागरं पिप्पली शुभा॥५८॥

यथोत्तरं भागवृद्ध्या त्वगेले चार्धभागिके।

तद्वच्यं दीपनं चूर्णं कणाष्टगुणशर्करम्॥५९॥

कासश्वासारुचिच्छर्दिप्लीहहृत्पार्श्वशूलनुत्।

पाण्डुज्वरातिसारघ्नं मूढवातानुलोमनम्॥६०॥

इत्यरोचकचिकित्सितम्।

स०-तालीसपत्रादयो यथोत्तरं-उत्तरोत्तरं, भागवृद्धाः कार्याः। त्वक् च एला च एतेऽर्धभागप्रमाणे। एतच्चूर्णं पिप्पल्यष्टगुणशर्करं दीपनं कासादिजिच्च, पाण्ड्वादिघ्नं मूढवातानुलोमनं च।

आ० र०- तालीसादिमाह-तालीसपत्रमिति। शुभावंशरोचना। अर्धभागिके-मिलिते तालीससमे। योगरत्ने-"तालीसोषणनागचव्यलवणैस्तुल्यांशकैर्द्विस्ततः कृष्णा ग्रन्थितित्तिडीकहुतभुक्त्वग्जीरकाख्यैर्युतैः। विश्वैलाबदराम्लवेतसघनैर्धान्याजमोदायुतै-ख्यंशैर्दाडिमपाद एष विहितः श्रेष्ठः सिताधायुतः॥ कण्ठास्योदरहृद्विकारशमनः कायाग्निसन्दीपनो गुल्माध्मानविषूचिकागुदरुजाश्वासक्रिमिच्छर्दिहा। कासारुच्यतिसारमूढमरुतां हृद्रोगिणां कीर्तितश्चूर्णोऽयं भिषजामतीव दयितः ख्यातो महाखाण्डवः॥ लवङ्गकङ्कोलमुशीरचन्दनं नतं सनीलोत्पलकृष्णजीरकम्। एला सकृष्णाऽगुरुभृङ्गकेसरं कणा सविश्वा नलदं सहाम्बुना॥ कर्पूरजातीफलवंशलोचनं सिताष्टभागं समसूक्ष्मचूर्णितम्। सुरोचनं तर्पणमग्निदीपनं बलप्रदं वृष्यतमं त्रिदोषनुत्॥ उरोविबन्धं तमकं गलग्रहं सकासहिध्मारुचियक्ष्मपीनसम्। ग्रहण्यतीसारमथासृजः क्षयं प्रमेहगुल्मांश्च निहन्ति सत्वरम्॥ कर्पूरचोचकङ्कोलजातीफलदलाः समाः। लवङ्गनागमरिचकृष्णाशुण्ठ्यो विवर्धिताः। चूर्णं सितासमं हृद्यं रोचनं क्षयकासजित्। वैस्वर्यश्वासगुल्मार्शश्छार्दिकण्ठामयापहम्॥ प्रयुक्तं चान्नपाने वा भेषजद्वेषिणां हितम्।" इति। विवर्धिताः-क्रमेण भागोत्तराः।

अर्कामृताक्षारजले शर्वरीमुषितैर्यवैः।

प्रसेके कल्पितान्सक्तून् भक्ष्यांश्चाद्याद्बली वमेत्॥ ६१॥

कटुतिक्तैस्तथा शूल्यं भक्ष्येज्जाङ्गलं पलम्।

शुष्कांश्च भक्ष्यान् सुलघूंश्चणकादिरसानुपः॥ ६२॥

स० -अर्कादिजले रात्रिस्थितैर्यवैः सक्तून् कल्पितान् भक्ष्यांश्च प्रसेके भक्षयेत्। बलवान् कटुतिक्तकैर्वमेत्। तथा, शूल्यं जाङ्गलं मांसं भक्षयेत्। शुष्कांश्च भक्ष्यान् भोजयेत्। भोज्यविशेषान् लघुतरान् भक्षयेत्। चणकादिरसमनु-पश्चात्, पिबेत्।

आ० र०- अथोपद्रवचिकित्सा। तत्र प्रसेकचिकित्सामाह-अर्कामृताक्षारजल इति। अर्कगुडूच्योः क्षारस्य क्षारविधिना गृहीते जले रात्रिमुषितर्यवैः सक्तवो भक्ष्याश्च कल्प्याः। यस्तु प्रसेकी बलवान् स कटुतिक्तैर्वमेत्। चणकादीनां रूक्षाणां रसो-यूषः, अनुपाने।

श्लेष्मणोऽतिप्रसेकेन वायुः श्लेष्माणमस्यति।

कफप्रसेकं तं विद्वान्स्निग्धोष्णैरेव निर्जयेत्॥ ६३॥

स० -बायुः श्लेष्माणं क्षिपति श्लेष्मणोऽतिप्रसेकेन हेतुभूतेन तं कफप्रसेकं विद्वान् स्निग्धोष्णैरेव निर्जयेत्।

आ० र०- चिकित्साम्तरमाह-श्लेष्मण इति। यस्मिन् कफस्यातिप्रसेकेन क्षीणत्वे सति कुपितो वायुः क्षीनत्वे सति कुपितो वायुः क्षीणमपि कफं बलादस्यति-प्रेरयति, तं स्निग्धोष्णेन चौषधेन निर्जयेत्-न रूक्षशीतेन। विद्वान्-अवस्थोपचारज्ञो वैद्यः।

पीनसेऽपि क्रममिमं वमथौ च प्रयोजयेत्।

स० -इमं-कफप्रसेकोक्तं, क्रियाक्रमं पीनसे वमथौ-छर्दिषि च, प्रयोजयेत्।

आ० र०- छर्दिपीनसयोः प्रसेकचिकित्सामाह-पीनसेऽपीति।

विशेषात्पीनसेऽभ्यङ्गान् स्नेहान् स्वेदांश्च शीलयेत्॥ ६४॥

स्निग्धानुत्कारिकापिण्डैः शिरःपार्श्वगलादिषु।

लवणाम्लकटूष्णांश्च रसान् स्नेहोपसंहितान्॥ ६५॥

स ० -विशेषेण पीनसेऽभ्यङ्गान् स्नेहान् स्वेदांश्च स्निग्धान् शीलयेत्। कैः ? उत्कारिकापिण्डैः। केषु ? शिरःपार्श्वगलादिषु। लवणादिंश्च रसान् स्नेहोपसंहितान् शीलयेत्।

आ० र० - पीनसे विशेषमाह-विशेषादिति। स्निग्धान् स्निग्धद्रव्यकृतान्। उत्कारिकाश्च पिण्डाश्चेति द्वन्द्वः। पिण्डाः-पिण्डाकारा भक्ष्याः।

शिरोंसपार्श्वशूलेषु यथादोषविधिं चरेत्।

औदकानूपपिशितैरुपनाहाः सुसंस्कृताः॥ ६६॥

तत्रेष्टाः सचतुःस्नेहाः

स ० -शिरोसपार्श्वशूलेषु दोषानुसारेणोपक्रमः कार्यः। तेष्वौदकानूपमांसैश्चतुःस्नेहयुताः सुसंस्कृता उपनाहा इष्टाः।

आ० र० - शिरःशूलादिचिकित्सामाह-शिरोंसपार्श्वशूलेष्विति।

वातजेषु विशेषमाह-औदकानूपपिशितैरिति। सुसंस्कृताः-कटुपद्वह्नैः।

दोषसंसर्ग इष्यते।

प्रलेपो नतयष्ट्याह्वशताह्वाकुष्ठचन्दनैः॥ ६७॥

बलारास्नातिलैस्तद्वत्ससर्पिर्मधुकोत्पलैः।

पुनर्नवाकृष्णगन्धाबलावीराविदारिभिः॥ ६८॥

स ० -दोषसंसर्गे च-द्वन्द्वे, तगरादिभिः प्रलेप इष्यते। तथैव बलादिभिः घृतमधुकोत्पलयुतैः, [तथा] पुनर्नवादिभिः।

आ० र० - संसर्गजेषु विशेषमाह-दोषसंसर्ग इति। त्रिभिरर्धैस्त्रयो लेपाः। सङ्ग्रहे तु द्वावधिकौ (चि. अ. ७)-"पलङ्कषा देवदारु चन्दनं मधुकं घृतम्। अभीरुयष्टीमधुकं पयस्या कट्टृणं घृतम्॥" इति।

नावनं धूमपानानि स्नेहाश्चौत्तरभक्तिकाः।

तैलान्यभ्यङ्गयोगीनि बस्तिकर्म तथा परम्॥६९॥

स ०-नस्यं तथा धूमपानानीष्यन्ते। तथा, औत्तरभक्तिकाश्च स्नेहाः। तैलान्यभ्यङ्गयोगीनि-अभ्यङ्गयोगप्रशस्तानि। तथा बस्तिकर्म-"प्राक्स्नेहः" (ह्.सू.अ.१९/६३) इत्यादिकम्, परं-चेष्टम्।

आ० र० - नस्यादीन्याह-नावनमिति। उत्तरभक्तिकाः-भोजनोत्तरं प्रयुक्ताः। परं-श्रेष्ठम्।

श्रृङ्गाद्यैर्वा यथादोषं दुष्टमेषां हरेदसृक्।

प्रदेहः सघृतैः श्रेष्ठः पद्मकोशीरचन्दनैः॥७०॥

दूर्वामधुकमञ्जिष्ठाकेसरैर्वा घृताप्लुतैः।

वटादिसिद्धतैलेन शतधौतेन सर्पिषा॥७१॥

अभ्यङ्गः पयसा सेकः शस्तश्च मधुकाम्बुना।

स० -श्रृङ्गाद्यैः-श्रृङ्गाजलौकोलाबुभिः, यथादोषं-वातपित्तकफदुष्टं, रक्तमेषां-यक्ष्मिणां, हरेत्।

प्रलेपः पद्मकादिभिः सघृतैः श्रेष्ठः, दूर्वादिभिर्वा घृताप्लुतैः।

वटादिना-न्यग्रोधादिना, सिद्धेन तैलेनाभ्यङ्गः शस्तः। शतधौतेन व घृतेन तथा क्षीरेण सेकः शस्तः। मधुयष्टिकाजलेन वा।

आ० र० - रक्तदुष्टौ विशेषमाह-श्रृङ्गाद्यैर्वेति। "वातादिधाम वा श्रृङ्गजलौकोलाबुभिः क्रमात्।" (ह्. सू. अ. २६।५५)इत्युक्तत्वात्। एषां-शिरोंसपार्श्वशूलिनाम्। केसरं-पद्मस्य वटादिः-म्यग्रोधादिगणः।

प्रायेणोपहताग्नित्वात्सपिच्छमतिसार्यते॥ ७२॥

तस्यातिसारग्रहणीविहितं हितमौषधम्।

स० -बाहुल्येनोपहताग्नित्वात्कारणात् पिच्छया सहातिसार्यते यक्ष्मी। तस्यातिसारे ग्रहण्यां च यदुक्तमौषधं तद्धितम्।

आ० र० - अतिसारचिकित्सामाह-प्रायेणेति। सङ्ग्रहे तु (चि. अ. ७)-"सनागरानिद्रयवान् पाययेत्तण्डुलाम्बुना। जीर्णेषु तेषु पेयां च चाङ्गेरीतक्रदाडिमैः॥ पाठा बिल्वयवानीनां चूर्णं तक्रेण वा पिबेत्। सुरया वा प्लुतां पाथां सनागरदुरालभाम्॥ जम्ब्वाम्रबिल्वमध्यं वा सकपित्थं सनागरम्। पेयामण्डेन योगैश्च पाठाद्यैः कारयेत्त्रिभिः॥ ससूप्यधान्यान् सस्नेहान् साम्लान् सलवणान् खलाम्। वेतसारुजुनजम्बूनां मृणालीकृष्णगन्धयोः॥ श्रीपर्ण्या मातुलुङ्गस्य धातक्या दाडिमस्य च। चाङ्गेर्या मदयन्त्याश्च यूथि कायाश्च पल्लवैः॥ कालविद्युग्धिकायाश्च चुक्रिकायाश्च योजयेत्। खलान् दधिसरोपेतान् ससर्पिष्कान् सदाडीमान्॥ रोचनान् दीपनान् हृद्यानतीसारहरान् परान्।" इति। पेयाया मण्डेन भक्तस्य[ ]ते जम्ब्वादिचूर्णं पिबेत्। मृणाली-पद्मिनी। कृष्णगन्धा-शिग्रुः। मदयन्त्याः-मल्लिकायाः। चुक्रिका-वि.... दा। तथा (सङ्ग्रहे चि. अ. ७)-"ज्वरादिष्वपि कुर्वीत विकारेषु यथामयम्। बह्वामयसमूहो हि यक्ष्माऽतः सोऽतिदुःसहः॥" इति।

पुरीषं यत्नतो रक्षेच्छुष्यतो राजयक्ष्मणः॥ ७३॥

सर्वधातुक्षयार्तस्य बलं तस्य हि विड्बलम्।

स० -तथा, राजयक्ष्मणः शुष्यतः सतः पुरीषं यत्नेन रक्षेत्। किमित्याह-यस्मात्तस्य-शोषिणः, सर्वधातुक्षयार्तस्य सतो विड्बलमेव बलं-न धात्वादिजं बलम्।

मांसमेवाश्नतो युक्त्या मार्द्वीकं पिबतोऽनु च॥ ७४॥

अविधारितवेगस्य यक्ष्मा न लभतेऽन्तरम्।

सुरां समण्डां मार्द्वीकमरिष्टान्सीधुमाधवान्॥७५॥

यथार्हमनुपानार्थं पिबेन्मांसानि भक्षयन्।

स्रोतोविबन्धमोक्षार्थं बलौजःपुष्टये च तत्॥७६॥

स० -मांसमेव युक्त्या-देशकालसात्म्यादिलक्षणया, भक्षयतो मार्द्वीकं च पश्चात् पिबतो वेगमधारयतो यक्ष्मा अन्तरं अवकाशं, न लभते।

तथा, सुरादीननुपानार्थं पिबेत्। मांसानि भक्षयेत्। तत्-सुराद्यनुपानं मांसभक्षणं च, स्रोतोविबन्धभोक्षार्थं बलायौजसश्च पुष्टये।

आ० र० - मांसमद्यप्रयोगमाह-मांसमेवेति।

स्नेहक्षीराम्बुकोष्ठेषु स्वभ्यक्तमवगाहयेत्।

उत्तीर्णं मिश्रकैः स्नेहैर्भूयोऽभ्यक्तं सुखैः करैः॥७७॥

मृद्नीयात्सुखमासीनं सुखं चोद्वर्तयेत्परम्।

स० -स्नेहादिकोष्ठेषु स्वभ्यक्तं सन्तमवगाहयेत्-निमग्नं स्थापयेत्। ततः कोष्ठादुत्तिर्णं भूयः पुनर्मिश्रकैः स्नेहैः-गुल्मोक्तैः (ह्र.चि.अ.१४/८९), अभ्यक्तं सुखैः-सुखावहैर्न दुष्करैः, करैः सुखेन तिष्ठन्तं मृद्नीयात्। परं-अतिशयेन, सुखं यथा भवति तथोद्वर्तयेत्।

आ० र० - अवगाहादीन्याह-स्नेहक्षीराम्बुकोष्ठेष्विति। अवगाहाभ्यङ्गमर्दनोद्वर्तनानि क्रमेण कुर्यात्। मिश्रकोयमकादिः।

जीवन्तीं शतवीर्यां च विकसां सपुनर्नवाम्॥७८॥

अश्वगन्धामपामार्गं तर्कारीम् मधुकं बलाम्।

विदारीम् सर्षपान् कुष्ठं तण्डुलानतसीफलम्॥७९॥

माषांस्तिलांश्च किण्वं च सर्वमेकत्र चूर्णयेत्।

यवचूर्णं त्रिगुणितं दद्ना युक्तं समाक्षिकम्॥८०॥

एतदुद्वर्तनं कार्यं पुष्टिवर्णबलप्रदम्।

स० -जीवन्त्यादिकं किण्वपर्यन्तं सर्वमेकत्र चूर्णयेत्। विकसा-मञ्जिष्ठा। यवचूर्णं सर्वेभ्यस्त्रिगुणं दद्ना युक्तं समाक्षिकमेतदुद्वर्तनं कार्यं पुष्ट्यादिप्रदम्।

आ० र० - उद्वर्तनयोगमाह-जीवन्तीमिति। शतवीर्यां-शतावरीम्। विकसां-मञ्जिष्ठाम्। तण्डुलान्-शालीनाम्। उत्सादनं-उद्वर्तनम्।

गौरसर्षपकल्केन स्नानीयाउषधिभिश्च सः॥८१॥

स्नायादृतुसुखैस्तोयैर्जीवनीयोपसाधितैः।

स ०-गौरसर्षपाणं कल्केन स्नानीयैः-स्नानार्हैर्गन्धद्रव्यविशेषैः, औषधिभिश्च-सहदेव्यादिभिः, ऋतौ-हेमन्तादिके, सुखावहैः-उष्णादिभिः, तोयैर्जीवनीयद्रव्यश्रृतैः स्नायात्।

आ० र० - स्नानमाह-गौरसर्षपकल्केनेति। स्नानैः-ग्रहस्नानोक्तैः द्रव्यैर्मन्त्रैश्चाषधिभिः संज्ञाभिः।

गन्धमाल्यादिकां भूषामलक्ष्मीनाशनीं भजेत्॥८२॥

स ०-तथा, गन्धैः-चन्दनकुङ्कमादिभिः, माल्यैः-कुसुमैः, आदिशब्देनालङ्कारादिग्रहणं, तैर्भूषामलक्ष्मीघ्नीं सेवेत।

आ० र० - अनुलेपनादीन्याह-गन्धमाल्यादिकामिति।

सुहृदां दर्शनं गीतवादित्रोत्सवसंश्रुतिः।

बस्तयः क्षीरसर्पिषि मद्यमांससुशीलता॥८३॥

दैवव्यपाश्रयं तत्तदथर्वोक्तं च पूजितम्॥८३ १/२॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचिता-यामष्टाङ्गहृदयसंहितायां चतुर्थे चिकित्सित-

स्थाने राजयक्ष्मादिचिकित्सितं नामपञ्चमोऽध्यायः॥५॥

स ० -तथा, सुहृदां_बन्धूनां, दर्शनम्। गीतस्य वादित्राणां तथोत्सवस्य-पुत्रजन्मविवाहादेः, संश्रवणम्। तथा, बस्तयः क्षीरसर्पीषि-क्षीराणां घृतानि, मद्यमांसानां सुशीलता। तथा, दैवव्यपाश्रयं-बलिमङ्गलहोमप्रायश्चित्तादिकम्। तथा, अर्थवोक्तं-अथर्ववेदविहितं यागादिकं च, पूजितं-प्रशस्तमेतदत्रेत्यर्थः।

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टाङ्गहृदयटीकायां सर्वाङ्गसुन्दरा-ख्यायां चतुर्थे चिकि-त्सितस्थाने राजयक्ष्मादिचिकित्सितं नाम पञ्चमोऽध्यायः समाप्तः॥५॥

आ० र० - सुहृद्दर्शनादीन्याह-सुहृदां दर्शनमिति। सङ्गहे (चि.अ. ७) "इष्ट्या यया च चन्द्रस्य राजयक्ष्मा पुरा जितः। पुरोहितः प्रयुञ्जीत वेदोक्तां तां जितात्मनः॥ अजा वा पर्युपासीत षण्मासानुटजे वसन्। तत्पयोमूत्रविड्वृत्तिपरिषेकप्रघर्षणः॥ ताभिः परिवृतः स्वप्यात्तच्छाकृद्रेणुसंस्तरे। एतद्रसायनं श्रेष्ठं रोगराजस्य नाशनम्॥" इति।

इति हेमाद्रिटीकायामायुर्वेदरसायने।
राजयक्ष्मप्रकरणं सामस्त्येन निरूपितम्॥५॥

****

षष्ठोऽध्यायः।

राजयक्ष्मचिकित्सितादनन्तरं छर्द्यादिचिकित्सितमारभ्यते। यतो यक्ष्मण एव उपद्रवभूता जायन्ते। अत एतदारम्भे युक्त इत्याह-

अथात-छर्दिहृद्रोगतृष्णाचिकित्सितं व्याख्यास्यामः

इति ह स्माहुरत्रेयदयो महर्षयः।

(गद्यसूत्रे॥२॥)

आमाशयोत्क्लेशभवाः प्रायश्च्छर्द्यो हितं ततः।

लङ्घनं प्रागृते वायोर्वमनं तत्र योजयेत्॥१॥

बलिनो बहुदोषस्य वमतः प्रततं बहु।

स० -उत्क्लेशनं-उत्क्लेशो,-दोषाणामुच्छ्रूनावस्थैव। आमाशयोत्क्लेशात् सम्भवो-जन्म, यासां ता आमाशयोत्क्लेशभवाः प्रायश्च्छर्द्यो यतस्तस्मात् प्राक्-प्रथमं, लङ्घनं हितम्। प्रायोग्रहणं वातजायां छर्द्यामामाशयोत्क्लेशासम्भवार्थं वायोऋते तद्योजयेत्। कार्ये कारणोपचारादेवं निर्दिष्टम्। वातजां हि छर्दिं मुक्त्वाऽव्यासु छर्दिषु लङ्घनं कार्यम्। लङ्घने कृतेऽप्यनु पशान्तवेगासु तत्र-तासु छर्दिषु, वमनं कार्यम्। बलिनः पुंसो-न दुर्बलस्य, अथवा बहुदोषस्य, तथा प्रततं-अनारतं, बहु वमतो वमनं योजयेत्।

ततो विरेकं क्रमशो हृद्यं मद्यैः फलाम्बुभिः॥२॥

क्षीरैर्वा सह स ह्यूर्ध्वं गतं दोषं नयत्यधः।

शमनं चौषधं रूक्षदुर्बलस्य तदेव तु॥३॥

स ० -ततो-वमनादनन्तरं विरेकौषधं क्रमशो-न सहसा, योजयेत्। किम्भुतं विरेकद्रव्यम्? हृद्यं-हृदयाय हितम्। कैः सह? मद्यैः-मार्द्वीकादिभिः। तथा, फलाम्बुभिः-शोभनद्रा क्षादिफलनिष्पादितवारिभिः। अथवा, क्षीरैः-गोक्षीरादिभिः सह। किमेवं स्यात्? इत्याह-स ह्यूर्ध्वमित्यादि। यस्मात्सः-विरेकः, ऊर्ध्वं गतं दोषं छर्द्यनुगमधो नयति। न केवलं शोधनं-वमनं विरेचनं वा, तत्र योजयेत्। यावच्छमनमपि यदौषधं तदपि तत्र योजयेत्। रूक्षदुर्बलस्य पुनः पुंसस्तदेव-शमनमेव, योजयेत्, शोधनासहत्वात्।

परिशुष्कं प्रियं सात्म्यमन्नं लघु च शस्यते।

उपवासस्तथा यूषा रसाः काम्बलिकाः खलाः॥४॥

शाकानि लेहा भोज्यानि रागषाडवपानकाः।

भक्ष्याः शुष्का विचित्राश्च फलानि स्नानघर्षणम्॥५॥

गन्धा_ सुगन्धयो गन्धफलपुष्पान्नपानजाः।

भुक्तमात्रस्य सहसा मुखे शीताम्बुसेचनम्॥६॥

स० -तत्र सर्वास्वपि छर्दिषु परिशुष्कादिगुणयुक्तमन्नं शस्यते। काम्बलिकादिलक्षणं कृतान्नवर्गे कथितम्। तथा फलानि, स्नानमुद्वर्तनादिरूपेण घर्षणं सुगन्धयः-शोभनगन्धाः, गन्धद्रव्यपुष्पफलान्नपानजाः शस्यन्ते। तत्र गन्धशब्देन गन्धद्रव्याणी। भुक्तमात्रस्य सहसा-झतित्येवाज्ञातसङ्केतस्य, मुखे शीताम्बुसेचनम्। इति सामान्येन छर्दीनामुपक्रमाः।

अधुना विशेषेणाह-

हन्ति मारुतजां छर्दिं सर्पिः पीतं ससैन्धवम्।

किञ्चिदुष्णं विशेषेण सकासहृदयद्रवाम्॥७॥

व्योषत्रिलवणाढ्यं वा सिद्धं वा दाडिमाम्बुना।

सशुण्ठीदधिधान्येन श्रृतं तुल्याम्बु वा पयः॥८॥

व्यक्तसैन्धवसर्पिर्वा फलाम्लो वैष्किरो रसः।

स्निग्धं च भोजनं शुण्ठीदधिदाडिमसाधितम्॥९॥

कोष्णं सलवणं चात्र हितं स्नेहविरेचनम्।

स० -वातजां छर्दिषं सर्पिः पीतं सैन्धवान्वितं किञ्चिदुष्णं विशेषेण हन्ति। पीतं-न तु लीढम्, अशक्तत्वात्। तथा चोक्तम् (ह.चि.अ.३/१११)-"आक्रामत्यनिलं पीतं" इति। तस्मात् पीतं घृतं छर्दिं हन्तीति युक्तम्। अथवा त्रिकटुत्रिलवणोत्कटं सर्पिः पीतं पूर्वोक्तगुणम्। दाडिमाम्बुन वा शुण्ठी दधिधान्येन सह सामान्यकल्पनया सिद्धं घृतं पीतं पूर्वोक्तगुणम्। जलतुल्यं वा पयः श्रृतं पूर्ववत्। अथवा, वैष्किरः-कुक्कुटादिजो, रसो बहुसर्पिःसैन्धवो मारुतजां छर्दिं हन्ति। किम्भूतः ? फलेन-दाडिममातुलुङ्गादिना, अम्लः-अम्लतां प्रापितः। स्निग्धं च भोजनं-अशनं, [शुण्ठी]दधिदाडिमेन संस्कृतं तु हितं-छर्दिं हन्ति। अत्र च-मारुतच्छर्दिषि, स्नेहेनएरण्डतैलादिना, विरेचनं स्नेहविरेचनं कोष्णं सलवणं च हितम्।

पित्तजायां विरेकार्थं द्राक्षेक्षुस्वरसैस्त्रिवृत्॥१०॥

सर्पिर्वा तैल्वकं योज्यं वृद्धं च श्लेष्मधामगम्।

ऊर्ध्वमेव हरेत् पित्तं स्वादुतिक्तैर्विशुद्धिमान्॥११॥

पिबेन्मन्थं यवागूं वा लाजैः समधुशर्कराम्।

मुद्गजाङ्गलजैरद्याद्वयञ्जनैः शालिषष्टिकम्॥१२॥

मृद्वष्टलोष्टप्रभवं सुशीतं सलिलं पिबेत्।

मुद्गोशीरकणाधान्यैः सह वा संस्थितं निशाम्॥१३॥

द्राक्षारसं रसं वेक्षोर्गुडूच्यम्बु पयोऽपि वा।

जम्ब्वाम्रपल्लवोशीरवटशुङ्गावरोहजः॥१४॥

क्काथः क्षौद्रयुतः पीतः शीतो वा विनियच्छति।

छर्दिं ज्वरमतीसारं मूर्च्छां तृष्णां च दुर्जयाम्॥१५॥

धात्रीरसेन वा शीतं पिबेन्मुद्गदलाम्बु वा।

कोलमज्जसितालाजामक्षिकाविड्भणाञ्जनम्॥१६॥

लिह्यात्क्षौद्रेण पथ्यां वा द्राक्षां वा बदराणि वा।

स० -पित्तजायां छर्द्यां विरेकार्थं-विरेकप्रयोजनाय, द्राक्षेक्षुस्वरसैस्त्रिवृद्देया। तैल्वकं वा सर्पिर्योज्यम्। पित्तजे छर्दिषि वृद्धं श्लेष्मधामगं पित्तमूर्ध्वमेव हरेत्-वमनं तत्र देयमित्यर्थः। कैर्द्रव्यः ? स्वादुतिक्तैः। आतुरो विशुद्धिमान्-कृतवमनविरेको लाजैर्मन्थं पिबेत्। किम्भूतम् ? समधुशर्करम्, अथवा यवागूं लाजैः समधुशर्करां पिबेत्। समधुशर्करश्च समधुशर्करा चेति "पुमान् स्त्रिया" इत्येकशेषः। तथा, मुद्गजैर्व्यञ्जनैर्जाङ्गलमांसै (मांसजै)श्च व्यञ्जनैः शालिषष्टिकमद्यात्। मृद्भष्टलोष्टजं सुशीतलं जलं पिबेत्। मुद्गादिभिर्वा सह निशां स्थितं जलं पिबेत्। द्राक्षारसादि वा यथायोगं पिबेत्।

जम्ब्वाम्रादिजः क्काथः क्षौद्रान्वितः शीतो वा-शीतकषायः, पीतः क्षौद्रयुतश्छर्द्यादीन् हन्ति।

मुद्गदलैः श्रृतमम्बु मुद्गदलाम्बु, तद्धात्रीरसेन सह पिबेत्। अथवा मुद्गदलानामम्बु मुद्गदलाम्बु, शीतं-शीतकषायं, पिबेत्। कोलादिकं क्षोद्रेण लिह्यात्। पथ्यां वा क्षौद्रेण लिह्यात्। द्राक्षां वा बदराणि वा लिह्यात्।

आ० र० -[पित्तच्छर्द्यौषधमाह-पित्तजायामिति।] समधुशर्करं लाजमन्थं लाजयवगूं वा समधुशर्कराम्। व्यञ्जनैः-यूषरसाद्यैः।

शमनमाह-मृद्भष्टलोष्टप्रभवमिति।

अन्यदाह-मुद्गोशीरकणाधान्यैरिति।

शमनचतुष्टयमाह-द्राक्षारसमिति।

अन्यदाह-जम्बवाम्रेति। शीतो वा-शीतकषायो वा।

अन्यदाह-धात्रीरसेनेति। शीतं-चन्दनम्।

अन्यदाह-मुद्गदलाम्बु वेति। मुद्गदलाम्बु-मुद्गशकलव्काथम्।

अन्यदाह-कोलमज्जेति।

लेहत्रयमाह-क्षौद्रेणेति। सङ्ग्रहे (चि. अ. ८)-"कोलास्थिमज्जास्त्रोतोजल-जोत्पलरकांसि वा। पिबेच्छीताम्बुनाशालिस्वर्णगैरिकजं रजः॥ पिष्टं वा चन्दनद्राक्षामांसीसेव्-याम्बुगैरिकम्। शालितडुलतोयेन पिबेद्वा ससितामधु॥ मधूकमधुकद्राक्षाकमलामलकाम्बुदम्।

ससारिवापरूषाख्यं मूर्वां वा माक्षिकान्विताम्॥मधुकं सात्मगुप्तां वा शीतं धात्रीरसेन वा।" इति।

कफजायां वमेन्निम्बकृष्णापिण्डीतसर्षपैः॥१७॥

युक्तेन कोष्णतोयेन, दुर्बलं चोपवासयेत्।

आरग्वधादिनिर्यूहं शीतं क्षौद्रयुतं पिबेत्॥१८॥

मन्थान् यवैर्वा बहुशश्छर्दिघ्नौषधभावितैः।

कफघ्नमन्नं हृद्यं च रागाः सार्जकभूस्तृणाः॥१९॥

लीढं मनःशिलाकृष्णामरिचं बीजपूरकात्।

स्वरसेन कपित्थस्य सक्षौद्रेण वमिं जयेत्॥२०॥

खादेत्कपित्थं सव्योषं, मधुना वा दुरालभाम्।

लिह्यान्मरिचचोचैलागोशकृद्रसमाक्षिकम्॥२१॥

स०-कफजायां छर्द्यां निम्बादिभिर्युक्तेन कोष्णजलेन वमेत्। दुर्बलं च नरमुपवासयेत्। आरग्वधादिनिर्यूहं शीतं क्षौद्रान्वितं पिबेत्। बहून् वारान् छर्दिघ्नौषधभावितैर्यवैर्मन्थान् पिबेत्। कफघ्नमन्नं हृद्यं च भुक्तम् सद्यमिं जयेत्। रागाः सकुठेरकभूस्तृणा वमिम् जयन्ति पीताः। मनःशिलादिकं बीजपूरकरसेन सक्षौद्रेण वमिं जयेत्। कपित्थस्य वा रसेन माक्षिकान्वितेन मनःशिलादिकं लीढं वमिं जयेत्। कपित्थं वा सत्रिकटुकं मधुना खादेत्। धन्वयवासं वा मधुना लिह्यात्।

आ० र० - कफच्छर्द्यौषधमाह-कफजायामिति। पिण्डीतो-मदनः।

उपासमाह-दुर्बलं चोपवासयेदिति। दुर्बलं-वमनासमर्थम्। शमनमाह-आररग्वधादिनिर्यूहमिति। सङ्ग्रहे (चि. अ. ८)-" त्रिफलाकणचव्याद्वा पेयां पत्रैः करञ्जजैः।" इति। त्रिफलादिभ्यः व्काथं सक्षौद्रम्, करञ्जपत्रपेयां वा सक्षौद्राम्।

अन्यदाह-मन्थान् यवैर्वेति।

भोजनमाह-कफन्धमन्नमिति।

शमनमाह-लीढमिति।

अन्यदाह-खादेदिति।

अन्यदाह-मधुना वेति।

अन्यदाह-लिह्यादिति। चोचं-लवङ्गत्वक्। सङ्ग्रहे (चि. अ. ८)-" समुस्तां मधुना शृङ्गी कोलास्थि वा सजाम्बवम्। तद्वद्विडङ्गत्रिफलं विडङ्गपरिपेलवम्॥" इति। योगरत्ने-"पिष्ट्वा धात्रीफलं लाक्षां शर्करां च पलोन्मिताम्। दत्वा मधु पलं चात्र कुडवं सलिलस्य च॥ वाससा गालितं पीतं हन्ति छर्दिं त्रिदोषजाम्॥ सारिवोशीरमधुककुस्तुम्बरुफलानि च। युक्त्या श्राव्यजलं देयं मधुना छर्दिनाशनम्॥ कृतं गुडूच्या विधिवत्कषायं हिमसंज्ञितम्। तिसृष्वपि भवेत्पथ्यं माक्षिकेण समन्वितम्॥ कपित्थ्रससंयुक्तांपिप्पलीं माक्षिकान्विताम्। मुहुर्मुहुर्नरो लीढ्वा छर्दिभ्यः प्रतिमुच्यते॥ धात्रीमुस्तकौर्ण तु मधुना परिमिश्रितम्। प्रलिहन् प्रातरुत्थाय छर्यते सुखमान्पुयात्॥ प्रयङ्गुचन्दनो शीरशतपुष्पायवैः समैघ्। कल्कं सुमुस्तकं लिह्याच्छर्दिन्धंमधुसंयुतम्॥ कुष्ठं नागरसम्मिश्रं लिह्याच्चूर्णं समं ततः। प्रातरुत्थाय तोयेन छर्यामयहरं परम्॥ यष्ट्याह्वं चन्दनोपेतं सम्यक्क्षीरप्रपेषितम् तेनैवालोड्य पातव्यं रुधिरच्छर्दिना शनम्॥ मातुलुङ्गरसो लाजाशर्करामधुसंयुतः। पिप्पलीचूर्णसंयुक्तः श्रेष्ठश्च्छर्दिनिवारणः॥ जात्या रसः कपित्थस्य पिप्पलीमरिचान्वितः। क्षौद्रेण युक्तः शमयेल्लेहोऽयं छद्रिमुल्बणाम्॥ सौवर्चलमजाज्यश्च शर्करा मरिचानि च। क्षौद्रेण संयुतं चुर्णं श्रेष्ठं छरिनिवारणम्॥ विदलानि च मुद्गानां पिप्पल्यश्चैव कुट्टिताः। प्रस्रुतं सलिलं चर्च्यां मधुसमन्वितम्। जब्वाम्रसारो मुस्तं च माचीद्राक्षा (?) च साधयेत्। कषायो मधुसंयुक्तः पेयश्च्छर्दितृषापहः॥ फल्गुप्रवालं मरिचं मधुकं नीलमुत्पलम्। क्षुण्णं शीअकषायोऽयं तृष्णाच्छर्दिनिवारणः॥ एतैरेवौषधैः सिद्धां लाजपेयां पिबेन्नरः। सशर्करां मधुयुताम् तृष्णाच्छर्दिनिवारिणीम्॥ अर्धोदकं निषेवेत माक्षिकेणाथवा पयः। तुष्णाछर्दिप्रशमनं जाङ्गलं रसमेव वा॥ क्षीरिणां चैव वृक्षाणां शुङ्गान् लिह्यार्सुकुट्टितान्। पिप्पलीमधुसंयुक्तान् तृष्णाछर्दिनिवारणान्॥" इति। [सिद्धसारे (छर्यधिकारे श्लो. २२)] - " लाजकपित्थमधुमागधिकोषणानां खौद्राभयात्रिकटिधान्यकजीकाणाम्। पथ्यामृतामरिचमाक्षिकपिप्पलीनां लेहास्त्रयः सकलवम्यरुचिप्रशान्त्यै॥ एलालवङ्गगजकेसरकोलमज्जालाजाप्रियङ्गुघनचन्दनपिप्पलीनाम्। चूर्णानि माक्षिकसिता-सहितानि लीढ्वाछर्दि निहन्ति कफमारुतपित्तजाताम्।" लाजसैन्धवसंयुक्तमाम्रबीजं समालिहेत्। मधुना छर्दिनाशाय क्षिप्रं सुखमवान्पुयात्॥" (वङ्ग. छर्च्य. श्लो. ४९) -"अश्वत्थवल्कलं शुश्कं दग्ध्वा निर्वापितं जले। तज्जलं पानमात्रेण छर्दि जयेति दुस्तराम्॥"

"विजयातिविषाव्काथस्छर्दिहृच्छूलनाशनः॥" (वङ्ग. छर्द्य. श्लो. ५७)-" आम्रास्थिबिल्वनिर्यूहः पीतः समधुशर्करः। निहन्याच्छ्वन्द्यतीसारं वैश्वानर इवाहुतिम्॥" इति।

आनूकूलोपचारेण याति द्विष्टार्थजा शमम्।

स० -द्विषार्थजा छर्दिर्मनसोऽनुकूलोपचारेण शाम्यति।

आ० र० - द्विष्टार्थछर्द्यौषधामाह-अनुकूलोपचारेणेति।

कृमिजा कृमिहृद्रोगगदितैश्च भिषगूजितैः॥२२॥

यथास्वं परिशेषाश्च, तत्कृताश्च तथाऽऽमयाः।

स० -कृमिभ्यो जाता छर्दिः कृमिहृद्रोगगदितैरौषधैः शमं याति। न केवलं कृमिजा छर्दिरेव शमं याति। यथास्वं परिशेषा अप्यामयाः-कृमिहृद्रोगकृताः, तेऽपि कृमिहृद्रोगगदितैर्भेषजैः शमं यान्ति।

आ० र० - कृमिच्छर्द्यौमाह-क्रिमिजा इति।

तृष्णा (शेष) च्छर्द्यामयानामौषधमाह-यथास्वं परिशेश्ःआश्चेति। यथास्वं-कारणभूतरोगानुसारेण अनुबन्धिदोषानुसारेण वा। परिशेषाः - उक्तेभ्योन्याः।

छर्द्युपद्रवाणामौषधमाह-तत्कृताश्चेति। तत्कृताः-छर्दिकृताः। तथा-यथास्वम्।

छर्दिप्रसङ्गेन हि मातरिश्वा
धातुक्षयात्कोपमुपैत्यवश्यम्।
कुर्यादतोऽस्मिन् वमनातियोग-
प्रोक्तं विधिं स्तम्भनबृंहणीयम्॥२३॥

सर्पिर्गुडा मांसरसा घृतानि

कल्याणकत्र्यूषणजीवनानि।

पयांसि पथ्योपहितानि लेहा-

श्छर्दि प्रसक्तां प्रशमं नयन्ति॥२४॥

इति छर्दिचिकित्सितम्।

स० -हि-यस्मात्, छर्दिप्रसङ्गेन-अनुबन्धेन, यो धातुक्षयः तस्माद्धेतोर्मातरिश्वा अवश्यं कोपमायाति। अतो हेतोर्वमनातियोगप्रोक्तं विधिं स्तम्भनं बृंहणं च कुर्यात्, न पुनस्तदुक्तमन्यं विधिम्। इन्द्रवज्रावृत्तम्। तथा, सर्पिर्गुडादयो दोषदूष्यानुरोधतो यथाकालमुपयुक्ताश्छर्दिं प्रसक्तां शमयन्ति। उपजातिवृत्तम्। तन्त्रान्तरे(?)चोक्तम् (हृ.क.अ.३/२५)-"अञ्जनं चन्दनोशीरमजासृक्शर्करोदकम्। लाजचूर्णैः पिबेन्मन्थमतियोगहरं परम्॥" इति।

आ० र० - प्रसक्तच्छर्द्यौषधमाह-छर्दिप्रसङ्गेनेति। सङ्ग्रहे (चि. अ. ७)-"त्वरमाणो जयेच्छर्दिं प्रसक्तामनुबन्धनीम्। कोष्ठाश्रया महामर्मपीडाकरतरा हि सा॥न चान्नेन विनाकायस्तन्मयो वर्ततेऽपि च। धातुक्षयोऽतिवमयौ समीरणसमीरणात्॥नियतं जायते तस्माद्वृतमत्र प्रयोजयेत् धान्वन्तरं त्र्यूषणं वा दोषदेहानुरोधतः॥" इति।

इति हेमाद्रिटीकायामायुर्वेदसायने।

छर्दिप्रकरणं नाम सामस्त्येन निरूपितम्॥

छर्दिचिकित्सितादनन्तरं हृद्रोगसाधनमुच्यते, हृद्रोगशब्दश्रवणसम्बन्धात्।

अथ हृद्रोगचिकित्सितम्।

हृद्रोगे वातजे तैलं मस्तुसौवीरतक्रवत्॥२५॥

पिबेत्सुखोष्णं सबिडं गुल्मानाहार्तिजिच्च तत्।

स ० -वातजे हृद्रोगे तैलं सुखोष्णं-किञ्चिदुष्णं, पिबेत्। किम्भूतम्? मस्तुसौवीरतक्राणि विद्यन्ते यस्मिंस्तदेवम्। तथा सह बिडलवणेन सबिडं, गुल्मादिजित्।

आ० र० - अतहृद्रोगचिकित्सितम्। तत्र वातजौषधमाह-हृद्रोग इति। सौवीरं-काञ्जिकम्। मस्त्वादित्रयं द्रव्यम्। बिडं कल्कः।

तैलं च लवणैः सिद्धं समूत्राम्लं तथागुणम्॥२६॥

स० -लवणैः-पञ्चभिः सैन्धवादिभिः, गोमूत्रेण काञ्जिकेन च तैलं सामान्यपरिभाषया पक्वं तथागुणं-गुल्मादिजित्।

आ० र० - अन्यदाह-तैलमिति। अम्लं-काञ्जिकम्।

बिल्वं राम्नां यवान् कोलं देवदारुं पुनर्नवाम्।
कुलत्थान् पञ्चमूलं च पक्त्वा तस्मिन्पचेज्जले॥२७॥
तैलं तन्नावने पाने बस्तौ च विनियोजयेत्।

स ० -बिल्वादीनि जले पक्त्वा तस्मिन् जले क्वाथीभूते तैलं पचेत्। तत्तैलं नस्ये पानेऽनुवासने च विनियोजयेत्। तच्च पूर्वसमम्।

आ० र० - अन्यदाह-बिल्वमिति।

शुण्ठीवयस्थालवणकायस्थाहिङ्गुपौष्करैः॥२८॥
पथ्यया च श्रृतं पार्श्वहृद्रुजागुल्मजिद्घृतम्।

स० -शुण्ठ्यादिभिः पक्वं च घृतं पार्श्वहृद्रुजादिजित्। वयस्था-आमलकी। कायस्था-काकोली।

आ० र० - घृतमाह-शुण्ठीकयस्थालवणववयस्थाहिङ्गुपौष्करैरिति। कयस्था-तुलसी। वयस्था-गुडूची।

सौवर्चलस्य द्विपले पथ्यापञ्चाशदन्विते॥ २९॥

घृतस्य साधितः प्रस्थो हृद्रोगश्वासगुल्मजित्।

स० -सौवर्चलस्य पलद्वये पथ्यापञ्चाशद्युक्ते साधितो घृतप्रस्थो हृद्रोगादिजित्।

आ० र० - अन्यदाह-सौवर्चलस्येति।

दाडिमं कृष्णलवणं शुण्ठी हिङ्गुश्लवेतसम्॥ ३०॥

अपतन्त्रकहृद्रोगश्वासघ्नं चूर्णमुत्तमम्।

आ० र० - चूर्णमाह-दाडीममिति। आपतन्त्रको-वातव्याधिनिदानोक्तः।

पुष्कराह्वशठीशुण्ठीबीजपूरजटाभयाः॥ ३१॥

पीताः कल्कीकृताः क्षारघृताम्लवणैर्युताः।

विकर्तिकाशूलहराः

स ०-पुष्कराह्वादयः कल्कीकृताः-पिष्टाः, तथा घृतादियुक्ताः पीता विकर्तिकाशूलहराः। विकर्तिका-हृदयस्यावर्तच्छेदनिका इव रुग्विशेषः। हृद्रोगप्रसङ्गादे-तच्चिकित्साऽप्युक्ता।

आ० र० - अन्यादाह-पुषराह्वेति। विकर्तिकाशूलंहृदयच्छेदनमिव।

क्वाथः कोष्णश्च त-णः॥ ३२॥

यवानीलवणक्षारवचाजाज्यौषधैः कृतः।

सपूतिदारुबीजाहपलाशशठिपौष्करैः॥ ३३॥

(यवक्षारो यवानी च पिबेदुष्णेन वारिणा।

एतेन वातजं शूलं गुल्मं चैव चिरोत्थतम्॥ १॥

भिद्यते सप्तरात्रेण पवनेन यथा घनः।)

स ०-क्काथश्च कोष्णो यवान्यादिभिर्देवदारुसहितैस्तद्गुणो विकर्तिकाशूलहरः। औषधं-शुण्ठी। बीजह्वः-बीजसारम्, बीजपूरकमित्यन्ये।

आ० र०- व्काथमाह-व्काथ इति। औषधं-शुण्ठी। पूतीकरञ्जः। बीजह्वो-बीजपूरः। यवान्यादिभिः सह पेयः। सः-व्काथः, पूत्यादिभिः कृतः। वङ्गसेने (हृदयरोगाधिकारे श्लो. १०) -"व्काथः कृतः पौष्करमातुलुङ्गपलाशपूतीकशठीसुराह्वैः। स नागराज्जाजिवचायवाभिः सक्षार उष्णो लवणश्च पेयः॥" इति वचनमूलेयं व्याख्या।

पञ्चकोलशठीपथ्यागुडबीजाह्वपौष्करम्।

वारुणीकल्कितं भृष्टं यमके लवणाव्वितम्॥ ३४॥

हृत्पार्श्वयोनिशूलेषु खादे-ल्मोदरेषु च।

स०-पञ्चकोलादिकं वारुण्या-प्रसन्नया सुरया, कल्कितंपिष्टं, यमके भृष्टं सैन्धवयुतं हृदादिशूलेषु गुल्मादिषु च खादेत्।

आ० र० - चूर्णमाह-पञ्चकोलेति।

स्निग्धाश्चेह हिताः स्वेदाः संस्कृतानि घृतानि च॥ ३५॥

स० -इह-वातजे हृद्रोगे, स्वेदाश्च स्निग्धा हिताः। घृतानि पक्कानि वा (च)।

आ० र० - स्नेहस्वेददावाह-स्निग्धाश्चेति। घृतानि स्नेहनार्थम्।

लघुना पञ्चमूलेन शुण्ठ्या वा साधितं जलम्।

वारुणीदधिमण्डं वा धान्याम्लं वा पिबेत्तृषि॥ ३६॥

स० -तृषि सत्यां ह्रस्वेन पञ्चमूलेन शुण्ठ्या वा साधितं जलं पिबेत्। वारुणीमण्डं वा दधिमण्डं वा पिबेत्।

आ० र० - पानपञ्चकमाह-लघुनेति।

सायामस्तम्भशूलामे हृदि मारुतदूषिते।

क्रियैषा

स० -आयामः-आक्षेपः, सह आयामादिभिर्वर्तते यद् हृदयं तस्मिंस्तथाविधे हृदि तथा मारुतदूषिते सति क्रियैषाचिकित्सेयं पूर्वोक्ता।

आ० र० - उक्तानामौषधानां विषमाह-सायामस्तम्भशूलाम इति। आयामः-आकर्षणमिव।

सद्रवायामप्रमोहे तु हिता रसाः॥ ३७॥

स्नेहाढ्यास्तित्तिरिक्रौञ्चशिखिवर्तकदक्षजाः।

स ० -सद्रवायामप्रमोहे पुनः हृदि मारुतदूषिते रसास्तित्तिर्यादिजाः। स्नेहाढ्याः-बहुस्नेहाः, हिताः।

आ० र० - विषयान्तरभेषजमाह-सद्रवायामप्रमोहे त्विति।

बलातैलं सहृद्रोगः पिबेद्वा सुकुमारकम्॥ ३८॥

यष्ट्याह्वशतपाकं वा महास्नेहं तथोत्तमम्।

स० -सहृद्रोगो नरो बलातैलं पिबेत्। सुकुमारकं वा-प्रमेहोक्तं घृतं, यष्ट्याह्वं च तच्छतपाकं च यष्ट्याह्वशतपाकं-शतकृत्वः पक्वं तत्तैलं वातशोणितोक्तं (ह्.चि.अ.२२१४९) पिबेत्। महसेन्हं तथोत्तमं पिबेत्।

आ० र० - स्नेहचतुष्कमाह-बलातैलमिति। बलातैलंशारीरके गर्भव्यापद्युक्तम् (ह्. शा.अ. २/४७), वातरक्तोक्तं वा बलाकषायकल्काभ्यां शतं सहस्रं वा वाराभ्यक्तम् (ह्. चि. अ. २२/४५)। सुकुमारकं-वृद्ध्चुक्तं घृतैरण्डतैलयमकम् (ह्. चि. अ. १३/४१), तैलमेव वा तन्त्रान्तरोक्तराजयक्ष्मणि सङ्गृहीतम्। यष्ट्याह्वशतपाकं-यष्टीमधुकल्ककषायाभ्यां शतं वारान् पक्वम्। उत्तमं महास्नेहं-वातव्याध्युक्तमपन्त्रके (ह्. चि. अ. २१/२८)।

तदेव चाह-

रास्नाजीवकजीवन्तीबलाव्याघ्रीपुनर्नवैः॥३९॥

भार्गीस्थिरावचाव्योषैर्महास्नेहं विपाचयेत्।

दधिपादं तथाम्लैश्च लाभतः स निषेवितः॥४०॥

तर्पणो बृंहणो बल्यो वातहृद्रोगनाशनः।

स० -रास्नादिभिः कल्कीकृतैर्महास्नेहं दधिपादं विपाचयेत्। दधिपादं च दध्नः पादः-चतुर्थभागप्रमाणो, यस्मिंस्तथाभूतम्। तथा, अम्लैः-काञ्जिकादिभिः, लाभतो-यथालाभम्। अनयैव कल्पनया सः-महास्नेहो, निषेवितस्तर्पणो बृंहणो बल्यो वातहृद्रोगघ्नश्च स्यात्।

आ० र० - महास्नेहान्तरमाह-रास्नाजीवकेति। दधिपादं-पादांशेन दन्ध्या युक्तम्।

दीप्तेऽग्नौ सद्रवायामे हृद्रोगे वातिके हितम्॥४१॥

क्षारं दधिगुडः सर्पिरौदकानूपमामिषम्।

स० -दीप्तेऽग्नौ सति वातहृद्रोगे सद्रवायामे सह द्रवेण-कम्पनेन, आयामेन च वर्तते यस्तस्मिंस्तथाभूते क्षीरादि हितम्। औदकामोषं-मत्स्यादिमांसम्, आनूपामिषं-ग्राम्यवराहादिजं मांसम्।

आ० र० - विषयान्तरभेषजमाह-दीप्तेग्नाविति।

एतान्येव च वर्ज्यानि हृद्रोगेषु चतुर्ष्वपि॥४२॥

शेषेषु, स्तम्भजाड्यामसंयुक्तेऽपि च वातिके।

स ० -वातहृद्रोगं मुक्त्वाऽन्येषु-शेषेषु, चतुर्षु हृद्रोगेष्वेतानि-क्षीरादीनि, वर्ज्यानि-न प्रयोज्यानि। न केवलमेष्वेतानि वर्ज्यानि, यावत्स्तम्भजाड्यामसंयुक्ते वातिकेऽपि हृद्रोग एतानि वर्ज्यानि।

आ० र०- हृद्रोगान्तरे क्षीरादीनि निषेधति-एतान्येवेति।

कफानुबन्धे तस्मिंस्तु रूक्षोष्णामाचरेत्क्रियाम्॥४३॥

स० -तस्मिन्-वातिके हृद्रोगे, कफानुबन्धे तु सति रूक्षोष्णां क्रियां सेवेत।

आ० र० - सकफे वातहृद्रोगे भेषजमाह-कफानुबन्ध इति। योगरत्ने- " नागरं वा पिबेदुष्णं कषायं वह्निवर्धनम्। कासश्वासानिलहरं शूलहृद्रोगनाशनम्॥पाठां वचां यवक्षारमभया-मह्लवेतसम्। दुरालभां चित्रकं च त्र्यूषणं लवणत्रयम्॥शठी पुष्करमूलं च तिन्तिडीकं सदाडिमम्। मातुलुङ्गाश्च मूलानि सूक्ष्मचूर्णानि कारयेत्॥सुखोदकेन मद्यैर्वा चूर्णान्येतानि पाचयेत्। अर्शः शूलं सहृद्रोगं गुल्मं चापि व्यपिहति॥" इति। सङ्ग्रहे (चि. अ. ८.)-"त्र्यूषणं त्रिफला पाठा मधूकं त्रुटी। पञ्चमूलं लघु बले मेदे वृद्धिः शतावरी॥कण्डूकरी तामलकी जीवकश्चाक्षसम्मितैः। तैः पचेत्सर्पिषः प्रस्थं दन्धः प्रस्थेन माहिषात्॥युक्तं सिद्धं च मधुना तन्निहन्ति निषेवितम्। हृत्पाण्डुग्रहणीपार्श्वश्वासकासहलीमकान्॥" इति।

पैत्ते द्राक्षेक्षुनिर्याससिताक्षौद्रपरुषकैः।

युक्तो विरेको हृद्यः स्यात्क्रमः शुद्धे च पित्तहा॥४४॥

क्षतपित्तज्वरोक्तं च बाह्यान्तः परिमार्जनम्।

कट्वीमधुककल्कं च पिबेत्ससितमम्भसा॥४५॥

स० -पैत्ते हृद्रोगे द्राक्षेक्षुनिर्यासादियुक्तो विरेको हृद्यः स्यात्। शुद्धे सत्यनन्तरं क्रमः पित्तहा स्यात्, स तु पेयादिकः कार्यः। क्षते पित्तज्वरे च या बहिरन्तश्च शुद्धिरुक्ता सा चात्र कार्या। कटुकीमधुककल्कं शर्करान्वितमम्भसा पिबेत्।

आ० र० - पित्तहृद्रोगस्य्पुषमाह-पैत्त्र इति। विरेचःत्रिवृच्चूर्णः।

विरेचकानन्तरं पेयादिक्रममाह-क्रमः शुद्धे च पित्तहेति। पित्तहा-पित्तघ्नैः कृतः।

अतिदेशमाह-क्षतपित्तज्वरोक्तं चेति। परिमार्जनं-शोधनम्, बाह्यं परिषेकेण, अन्तर्विरेकेण।

औषधान्तरमाह-कट्वीमधुकल्कमिति।

श्रेयसीशर्कराद्राक्षाजीवकर्षभकोत्पलैः।

बलाखर्जूरकाकोलीमेदायुग्मैश्च साधितम्॥४६॥

सक्षीरं माहिषं सर्पिः पित्तहृद्रोगनाशनम्।

स० -श्रेयस्यादिभिः साधितं क्षीरान्वितं माहिषं सर्पिः पित्तहृद्रोगघ्नम्। श्रेयसी-हस्तिपिप्पली। माहिषघृतस्यात्र निर्देशः शीततमत्वात्।

आ० र० - घृतमाह-श्रेयसीति। श्रेयसी-गजपिप्पली।

प्रपौण्डरीकमधुकबिसग्रन्थिकसेरुकाः॥४७॥

सशुण्ठीशैवलास्ताभिः सक्षीरं विपचेद्घृतम्।

शीतं समधु तच्चेष्टं स्वादुवर्गकृतं च यत्॥४८॥

बस्तिं च दद्यात्सक्षौद्रं तैलं मधुकसाधितम्।

स० -प्रपौण्डरीकादिभिः क्षीरयुतं पक्वं घृतं शीतीभुतं सन्माक्षिकोपेतं तच्चेष्टमत्र रोगे। स्वादुवर्गेण-द्राक्षादिना, यच्चकृतं तच्च हितम्। तथा, बस्तिं मधुकसाधितं-मधुकेन पक्वं, माक्षिकान्वितं दद्यात्।

आ० र० - घृतान्तरमाह-प्रपौण्डरीकेति। शैवलः-शैवालः।

घृतान्तरमाह-स्वादुवर्गकृतं च यदिति। स्वादुवर्गोरसस्कन्धेषूक्तः (ह्. सू. अ. १०१२२)।

बस्तिमाह-बस्तिं चेति-अनुवासनम्। वङ्गसेने(हृदयरोगा. शो. १७)-" अर्जुनस्या त्वचा सिद्धं क्षीरं योज्यंहृदामये। सितया पञ्चमुल्या वा बलया मधुकेन वा॥ स्थिरादिकल्कवत्सर्पिः क्षीरेणेक्षुरसेन वा। द्राक्षारसेन वा पक्वं पित्तहृद्रोगनाशनम्॥" इति।

कफोद्भवे वमेत्स्विन्नः पिचुमन्दवचाम्भसा॥४९॥

कुलत्थधन्वोत्थरसतीक्ष्णमद्ययवाशनः।

स ०-कफोद्भवे हृद्रोगे स्विन्नो निम्बवचाभ्यां क्थितेन जलेन वमेत् कुलत्थजाङ्गलादिरस(लरसादि)भुक्।

आ० र० - कफहृद्रोगौषधमाह-कफोद्भव इति।

पिबेच्चूर्णं वचाहिङ्गुलवणद्वयनागरात्॥५०॥

सैलायवानककणायवक्षारात्सुखाम्बुना।

फलधान्याम्लकौलत्थयूषमूत्रासवैस्तथा॥५१॥

पुष्कराह्वाभयाशुण्ठीशठीरास्नावचाकणात्।

क्वाथं तथाऽभयाशुण्ठीमाद्रीपीतद्रुकट्फलात्॥५२॥

स ० -चूर्णं वचादिभ्य उष्णोदकेन पिबेत्। यवानको-यवानीभेदः। तथा, फलधान्याम्लदिभिर्वैकतरेण(मेन)पिबेत्। तथा, पुष्करादेश्चूर्णं पूर्वोक्तैरुष्णा(म्ब्वा)दिभिः पिबेत्। तथा, हरीतक्यादेः क्वाथं पिबेत्।

आ० र० - चूर्णमाह-पिबेच्चूर्णमिति। सशब्दः सहार्थे। यवानकः-अजमोदा। फलाम्लं धान्याम्लं च। षण्णां द्रवाणांप्रकृत्यादिवशाद्विषय[वि]भागः। क्वाथमाह-पुष्कराह्वेति।

क्वाथान्तरमाह-तथेति। माद्री-अतिविषा। पीरुद्रुः-दार्वी।

क्वाथे रोहितकाश्वत्थखदिरोदुम्बरार्जुने।

सपलाशवटे व्योषत्रिवृच्चूर्णाव्विते कृतः॥५३॥

सुखोदकानुपानश्च लेहः कफविकारहा।

स ० -रोहितकादीनां क्वाथे त्रिकटुत्रिवृच्चूर्णयुते कृतो लेह उष्णोदकानुपानः कफविकारहा। अर्शश्चिकित्सितोक्तं (ह्.चि.अ.८/१०४)-"तुलां दिव्याम्भसि पचेत्" इति प्रमाणानुसारेण परिमाणमत्र निरूपितम्।

आ० र०- लेहमाह-क्वाथ इति। रोहितकादीनां सत्पानां क्वाथः। तस्य पुनः पाकाद्धनीभावसमये चूर्णप्रक्षेपः।

श्लेष्मगुल्मोदिताज्यानि क्षारांश्च विविधान् पिबेत्।

प्रयोजयेच्छिलाह्वं वा ब्राह्मं वाऽत्र रसायनम्।

तथाऽऽमलकलेहं वा प्राशं वाऽगस्त्यनिर्मितम्॥५५॥

स ० -कफहृद्रोगे, श्लेष्मगुल्मे यानि गदितान्याज्यानि-सर्पिषि, तत्रैवोक्तान् क्षारांश्च नानाविधाम्स्तान् पिबेत्। शिलाजतु प्रयोजयेत्। वा ब्राह्मं रसायनं-रसायनाध्यायोक्तम् (ह्.उ.अ.३९/१५)। तथा, आमलकलेहं वा-रसायनोक्तमेव

च्यवनप्राशाख्यम् (ह.उ.अ.३९/३३)। अथवा, प्राशं-लेहं, अगस्त्यनिर्मितं कासचिकित्सितोक्तं (ह.चि.अ.३/१२७), प्रयोजयेत्।

आ० र० - अतिदशति-श्लेष्मगुल्मोदिदिताज्यानीति। शिलाह्वं-शिलाजतुरसायनम् (ह. उ. अ. ३९/१३७), ब्राह्मंएकाशनम् (ह. उ. अ. ३९११५), आमलकलेहं-च्यवनप्राशम् (ह. उ. अ. ३९/३३), एतानि रसायनोक्तानि। अगस्त्यनिर्मितं-कासोक्तम् (ह. चि. अ. ३१/२७)। वङ्गसेने (ह्रुदयरोगा. श्लो. २८)-" सूक्ष्मैला माहधीमूलं प्रलीढं हविषा सह। नाशयत्याशु हृद्रोगं गुल्मानपि विशेषतः॥ फलतैलं विदध्याच्च बस्तु बस्तिविशारदः। 'फलैरष्टगुणेऽथाम्ले सिद्धमन्यासनं कफे (?)। ' इत्युक्तं फलतैलम्। 'हुङ्ग्रग्रन्धाबिडविश्वकृष्णाकुष्ठाभयाचित्रकयावशूकम्। पिबेत्ससौवर्धलपुषराह्वं यवाम्भसा शूल-हृदामयन्धम्॥ दशमूलकषायं तु लवणक्षारायोजितम्। कासं श्वासं सहृद्रोगं गुल्मशूलं च नाशयेत्॥ घृतन दुग्धेन गुडाम्भसा वा पिबन्ति चूर्णं ककुभत्वचो ये। हृद्रोगजीर्णज्वररक्तपित्तं इत्वा भवेयुश्चिजीविनस्ते॥ पुटदग्धहरिणशृङ्गं पिष्टं गव्येन सर्पिषापिबतः। हृत्पृष्ठशूलमचिरादुपैति शान्तं सुकष्टमपि॥ तैलाज्यदुड चूर्णं [गोधूमपार्थजं वाऽपि। पिबति पयसा स भवेज्जितसकलहृदामयः पुरुषः॥ गोधूमककुभचूर्णं] छागपयोगव्यसर्पिषा युक्तम्। मधुशर्करासमेतं शमयति हृद्रोगमुद्धतं पुंसाम्॥ मूलं नागबलायास्तु चूर्नं दुग्धेन पायये। हृद्रोगशासकासन्धं ककुभस्य च वल्कलम्। रसायनं परं बल्यं वातजिन्मासयोजितम्। संवत्सरप्रयोगेणजीवेद्वर्षशततत्राम्॥ पार्थस्य कल्कस्वरसेन सिद्धं शस्तं घृतं सर्वहृदामयेषु। घृतं बलानागबलार्जुनाम्बुसिद्धं सयष्टीमधुकल्कपादम्। हृद्रोगशूलक्षतक्तपित्त-तकासानिलासृशमयत्युदीर्णम्॥" इति।

स्यच्छूलं यस्य भुक्तेऽति, जीर्यत्यल्पं, जरां गते।
शाम्येत्स कुष्ठकृमिजिल्लवणद्वयतिल्वकैः॥५६॥
सदेवदार्वतिविषैश्चूर्णमुष्णाम्बुना पिबेत्।

स० -यस्य-पुंसो, भुक्ते-तत्काल एव, अति शूलं स्यात्। जीर्यात्यन्ने-मध्यमायां पाकावस्थायां, अल्पं शूलं स्यात्। जरांगते-किट्टसारतया परिणतेऽन्ने, तु शाम्येत्। सः-नरः, कुष्ठादिभिश्चूर्णमुष्णाम्बुना पिबेत्।

आ० र०- अथ प्रसङ्गाच्छूलप्रकरणम्। शूलं चतुर्धाअजीर्णेऽन्ने जीर्यति सर्वदा चेति। तत्राजीर्णशूलस्यौषधामाह-स्याच्छूलमिति।

यस्य जीर्णेऽधिकं स्नेहैः स विरेच्यः, फलैःपुनः॥५७॥

जीर्यत्यन्ने, तथा मूलैस्तीक्ष्णैः शूले सदाऽधिके।

स०-यस्य-पुंसो, जीर्णे सत्यधिकं शूलं भवेत्, स स्नेहैः-विरेचनद्रव्यसिद्धैः, विरेचनीयः। जीर्यत्यन्ने-पच्यमानावस्थायां, अधिकं शूले सति फलैर्विरेच्यः। तथा च मुनिः(?)-"मृद्वीकाऽथ विडङ्गानि खर्जुराणि परूषकम्। आरग्वधोऽथामलकं हरीतक्यो बिभीतकम्॥कम्पिल्लकोपचित्रे च त्रपुसं च मुकूलकम्। नीलिका कुबलं पीलु भवेत्फलविरेचनम्॥" इति। यस्य पुनः सदाऽधिकमेव शूलं-केवलं न भुक्तमात्रे जीर्णे जीर्यति वा, सः-पुरुषो, मूलैस्तीक्ष्णैः-मूलविरेचनैर्दन्तीत्रिवृच्छयामासप्तलादिद्रव्यैः समन्वितैः, विरेच्यः। तथा चोक्तम्-"सप्तलाशङ्खिनीदन्तीद्रवन्तीगिरिकर्णिकाः। त्रिवृच्छयामोदकीर्या च प्रकीर्या क्षीरिणी तथा॥ छगलाण्डी गवाक्षी च कुचाक्षी गिरिकर्णिका। मसूरविदला चैव भवेन्मूलविरेचनम्॥" इति।

आ० र०- जीर्णशूलस्यौषधमाह-यस्येति। स्नेहैः-एरण्डतैलादिभिः।

जीर्यच्छूलस्यौषधमाह-फलैः पुनर्जीर्यत्यन्न इति। फलैः-आरग्वधादिभिः।

सर्वदा शूलस्यौषधमाह-तथेति। मूलैः-श्यामादिभिः। तन्त्रान्तरे शूलप्रकरणं च स्मृतम्। तत्र वङ्गसेने (शूलरोगाधिकारे श्लो. १)-"दोषैः पृथक्समस्तामद्वन्द्वैः शूलोऽष्टधा भवेत्। सर्वेष्वेतेषु शूलेषु प्रायेण पवनः प्रभुः॥व्यायामयानादतिमैथुनाच्च प्रजागराच्छीतजलातिपानात्। कलायमुद्गाढकिकोरदूषादत्यर्थरूक्षाध्यशनाभिघातात्॥ कषायतिक्तातिचिरूढजान्नविरुद्धवल्लूरकशुष्कशाकात्। विड्भुक्रमूत्रानिलवेगरोध-च्छोकोपवासादतिभाष्यहास्यात्॥वायुः प्रवृद्धो जनयेद्धि शूलं हृत्पार्श्वपृष्ठत्रिकबस्तदेशे। जीर्णे प्रदोषे च घनागमे च शीए च कोपं समुपैति गाढम्॥मुहुर्मुहुश्चोपशमप्रकोपौ विड्वातसंस्तम्भनतोदभेदैः। संस्वेदनाभ्यञ्जनमर्दनाद्यैः स्निग्धोष्णभोज्यैश्च शमं प्रयाति॥ क्षारातितीक्ष्णोष्णाविदाहितैलनिष्पावपिण्याककुलत्थयूषैः। कट्वम्लसौवीरसुराविकारैः क्रोधानलायासरविप्रतापैः॥ग्राम्यातियोगादशनैर्विदग्धैः पित्तं प्रकुप्याशु करोति शूलम्। तृण्मोहदाहार्तिकरं हि नाभ्यां संस्वेदमूर्च्छाभ्रमदोषयुक्तम्॥मध्यंदिने कुप्यति चार्धरात्रे

विदाहकाले जलदात्यये च। शीते च शीतैः समुपैति शान्तिं सुस्वादुशीतैरपि भोजनैश्च॥ आनूपवारिजकिलासजनकैरपि हेतुभिश्च श्लेष्मा प्रकोपमुपगम्य करोति शूलम्॥ हृल्लासकाससदनारुचिसम्प्रसेकेरामाशये स्तिमितकोष्टशिरोगुत्वैः। भुक्ते सदैव रुजं कुरुतेऽतिमात्रं सूर्योदये च शिशिरे कुसुमागमे च॥ [द्विदोषलक्षणैरेतैर्विद्याच्छूलं द्विदोषजम्।] सर्वेषु दोषेषु च सर्वलिङ्गं विद्याद्विषक्सर्वभवं हि शूलम्। सुकष्टमेनं विषवज्रकल्पं विवर्जनीयं प्रवदन्ति तज्ज्ञाः॥ आटोपहृल्लासवमीगुरुत्वस्तैमित्यकानाहकफप्रसेकैः। कफस्य लिङ्गेन समानलिङ्गमामोद्भवं शूलमुदाहरन्ति॥ बस्तौ हृत्कण्ठपार्श्वेषु स शूलः कफवातिकः। कुक्षौ हृन्नाभिमध्येषु स शूलः कफपैत्तिकः। दाहज्वरजरो घोरो विज्ञेयो वातपैत्तिकः॥ एकदोषोत्थितः साध्यः कृच्छ्रसाध्योद्विदोषजः। सर्वदोषोत्थितो घोरस्तव्साध्यो बूर्युपद्रवः॥ निगृह्य मारुतं श्लेष्मा कुक्षिपार्श्वे व्यवस्थितः। साध्माटोपामसंरुद्धः सूचीभिरिव निस्तुदन्॥ उच्छ्वसित्यथ वक्रेण न चन्नमभिनन्दति। न च निद्रामुपैतेष पार्श्वशूलः प्रकीर्तितः॥ प्रकुप्यति यदा कुक्षौ वह्निमाक्रम्य मरुतह्। तदाऽस्य भोजनं भित्तं सोपस्तम्भं न पव्यति॥ उच्छ्वास्यानीतशकृता शूलेनाहन्यते मृदुः॥ नैवासने न शयने तिष्ठन् वा लभते सुखम्॥ कुक्षिशूल इति ख्यातो वातादामसमुद्भवात्॥ कफपित्तावरुद्धस्तु मारुतो रसमूर्च्छितः। हृदिस्थः करुते शूलमुच्छ्वासारोधनं परम्। हृच्छूल इति स ख्यातो रसमारुतसम्भवः॥ संरोधात्कुपितो वायुर्बस्तिं संश्रित्य तिष्ठति। बस्तिवङ्क्षणनाडीषु ततः शूलोऽस्य जायते। विण्मूत्रवातसंरोधी बस्तिशूलः स संज्ञितः॥ नाभ्यां वङ्क्षणयोश्चैव कुक्षौ मेढ्रेनुवर्तकः। मूत्रमावृत्य गृह्णाति मूत्रशूलः स मारुतात्॥ वायुः प्रकुपितोयस्य रूक्षाहारस्य देहिनः। वातं रुणद्धि कोष्टस्थं मन्दीकृत्य तु पावकम्॥ शूलं सञ्जनयेच्छीघ्रं स्त्रोत आवृत्य मारुतः। दाक्षिणं यदि वा वामं कुक्षिमादाय जायते॥ सर्वत्र वर्धते क्षिप्रं [भ्रमनिःश्वासघोषवत्। पिपासा वर्धतेऽतीव भ्रमो मूर्च्छा च जायते॥ उच्चारितो मूत्रितश्च न शान्तिमधिगच्छति। विङ्मूलमेतं जानीयाद्विषक् परमदारुणम्॥ वेदना च तृषा मूर्च्छा आनाहो गौरवारुची। कासश्वासौ च हिक्का च शूलस्योपद्रवाः स्मृताः॥ स्वैर्निदानैः प्रकुपितो वायुः सन्निहितस्तदा। कफपित्ते समावृत्य शूलकारी भवेद्बली॥ भुक्ते जीर्यति यच्छूलं तदेव परिणामजम्। तस्य लक्षणमप्येतत् समासेन विधीयते॥ आध्मानाटोपविण्मूत्रविभन्धारत्वेपनैः। सिग्धोष्णैः प्रशमं याति वातिकं तद्वदेद्विषक्॥ तृष्णादाहारतिस्वेदं क~ट्वम्लवणोत्तरम्। शूलं शीतशमप्रायं पैत्तिकं तद्वदेद्विषक्॥ छर्दिहृल्लाससम्मोहस्वल्परुग्दीर्घसन्तति। कटुतिक्तोपशान्तौ च तद्विज्ञेयं कफात्मकम्॥ संसृष्टलक्षणं बुद्धा परिकल्पयेत्। त्रिदोषजमसाध्यं स्यात् क्षीणमांसबलानलम्॥ जीर्णे जीर्यत्यजिर्णे वा यच्छूलमुपजायते। पथ्यापथ्यप्रयोगेन भोजनाभोजनेन वा। न शमं याति नियमात्सोऽन्नद्रव उदाहृतः॥ "] .....

(?)-" शृङ्गी द्वीजीरकं धान्यं वृद्धदारुकपत्रकैः। तुम्बुरूणि भद्रदारु क्षाराश्च लवणानि च॥ अजमोदा तालमुली विशाला भुतिकं वचा कोशातकी पटोलं च बृहत्पत्रकगन्धकैः॥ यावन्त्येतानि चूर्णानि मण्डूरं द्विगुणं ततः। गोमूत्रत्रिफलाक्वाथे निषिक्तं लोहचूर्णितं॥ कन्दात्कटाशृङ्गबेरश्रावणीकेशराङ्गजैहृ। रसैः सवज्रवल्लीजैस्तस्य तालसमस्य च॥ भावयित्वैकतश्चूर्णं गोमुत्रेऽष्टगुणे पचेत्। चतुर्गुणे त्रिफलजे व्काथे वा दर्विलेपनात्॥ उपयुञ्जीत मतिमान् यथादोषं यथाबलम्। ये च कुक्षिगता रोगा ग्रहणीमार्दवादयः॥ अर्शांसि च प्रवृद्धानि शूलानि जठराणि च। मदोदोषामवाताश्च कफानिलभवाश्च ये॥ व्याधयस्तान्निहन्त्येतद्भास्करस्तिमिरं यथा। विद्याविध्या.....गतं मण्डूरं सर्वरोगनुत॥ यदि सकलरुजो यन्नैव योगो निहन्यात् कथमिति नियतेर्वा याददोषं विना वा। तदखिलमुनिवाक्यप्रात्पतत्वार्थरत्नो नियतममृतवाक्यो वल्लभः स्याद्गुरूणाम्॥ आशुभुक्तो यवैः पिष्टमभ्रकं तत्र संस्थितम्। कन्दमाणास्थिसंहारखण्डकर्णरसैरधः। तण्डुलीयक.....शोणोमात्रिकमेव च॥ वृश्चीवं बृहतीभङ्गं तत्क्षणात्केसराङ्गनैः। पेषणं भावनं कुर्यात् पुतं वाऽनेकशो भिषक्॥ याव....द्रकं तत्स्याच्छुद्धिरेवं विहायसम्। स्वर्णमाक्षिकशाणं च ध्मातनिर्वापितं जले॥ त्रैफलेष्ववचूर्ण्यं वा लोहं पित्तादिकं पुनः। बृहत्पत्रक[।]रिकर्णत्रिफलावृद्धदारकैः॥ माणकन्दास्थिसंहारशृङ्गबेरभवैरसैः। दशमूलीमुण्डितिकातालमूलीसमुद्भवैः। पुटितं साधु यत्नेन शुद्धिमेवमयोजयेत्। वसिरं.....घालमधुपर्णीमयूरकम्॥ तण्डुलीयं च वर्षाभूदत्ताधश्चोर्ध्वमेव च। पाक्यं तु जीर्णमण्डूरं गोमूत्रेण दिनत्रयम्॥ अन्तर्बाष्पमदन्धं च तथा स्थाप्यं दिनत्रयम्। विचूर्णितं शुद्धिरियं लोहाकरस्य दर्शिता॥ जयन्त्या वर्धमानस्य आर्द्रकस्य रसेन वा। पयस्याश्चानुपूर्व्येण मर्दनं रसशोधनम्॥ गन्धाकं नवनीताख्यं कुटितं लोहभाजने। त्रिधा चण्डातपे युक्तं बृङ्गराजरसाप्लुतम्॥ ततो वह्निद्रवीभूतं त्वरितं वस्त्रगालितम्। यत्नाद्भृङ्गरसे क्षिप्तं पुनः शुष्कं विशुध्यति॥ गगनाद्विपलं चूर्णलोहस्य पलमात्रकम्। लोहकिट्टं पलार्धं च सर्वमेकत्र संस्थितम्॥ मण्डूकपर्णीवसिनतालमूलरसैः शुभैः। वरीभृङ्गकेसराजमाणमर्णरसैस्तथा॥ त्रिफलाभद्रमुस्ताभीः स्थालीपाकंविचूर्णितम्। रसगन्धकयोः कर्ष प्रत्येकं ग्राह्यमेकतः॥ तन्मनाश्च शिलाखल्वे यत्नतः कज्जलीकृतम्। वचा चव्यं यवानी च जीरके शतपर्णिका॥ व्योषं मुस्तं विडङ्गं च ग्रथितं खरमञ्जीरी। त्रिवृता चित्रको दन्ती सूर्यावर्तः सितस्तथा॥ भृङ्गमाणवकन्दाश्च खण्डकर्णक एव च। दण्दोत्पलं केसरा जकालीयकटकोऽपि वा॥ एषामर्धपलं ग्राह्यं पटघृष्टं सुचूर्नितम्। प्रत्येकं त्रिफलायाश्च पलार्धं पलमेव च॥ एतत्सर्वं समालोड्य लोहपात्रेषु भावयेत्। आतपे चण्डसंघृष्टमार्द्रकस्य रसैस्त्रिधा॥ तद्रसेन शिलापिष्टं गुटिकां कारयेद्भिषक्। बदरास्थिमिताः शुष्क....भावयेत्॥ तत्प्रातर्भोजनादौ तु सेवितं

गुटिकात्रयम्। अन्नोदकानुपानं च हितं मधुरसंश्रितम्॥दुग्धं च नालिकेरं च वर्जनीयं विशेषतः। भोज्यं यथेष्टमिष्टं च वारि भक्ताम्लकाञ्जिकम्॥हन्त्याम्लपित्तं प्लीहानं शूलं च परिणामजम्। पी.....शोथोदरगुल्मादामयान्॥यक्ष्मा.....मन्धाग्नित्वमरोचकम्। प्लीहानं श्वासमानाहमाम वातं स्वरामयम्। गु.....यख्यातवो ....नीकेसा विश्वयुतो यूषो धात्रीमुद्गादिभिः कृतः। रिर्य..... संसेव्य कुलित्थान् स विवर्जयेत्॥"

इति हेमाद्रिटीकायामायुर्वेदसायने।

अम्लापित्तप्रकरणं सामस्त्येन निरूपितम्।

प्रायोऽनिलो रुद्धगतिः कुप्यत्यामाशये गतः॥५८॥

तस्यानुलोमनं कायं शुद्धिलङ्घनपाचनैः।

स ० -बाहुल्येन मारुतो रुद्धमार्ग आमाशयं(ये) गतः कुप्यति। तस्य-मरुतः, शुद्ध्यादिभिः-अवस्थावशाद्वयस्तैः समस्तैर्वा, अनुलोमनं कार्यम्।

कृमिघ्नमौषधं सर्वं कृमिजे हृदयामये॥५९॥

इति हृद्रोगचिकित्सितम्।

स० -कृमिजे हृद्रोगे सर्वमेव च कृमिघ्नमौषधम्।

आ० र० - क्रिमिहृद्रोगौषधमाह-क्रिमिन्धमौषमिति।

वङ्गसेने (हृदयरो. श्लो. ३९)-" क्रिमिहृद्रोगिणं स्निग्धं भोजयेत्पिशितौदनम्। दन्द् च पललोपेतं त्र्यहं, पश्चाद्विरेचयेत्॥सुगन्धिभिः सलवणैर्योगैः साजाजिशर्करैः। विडङ्गगाढैर्धान्याम्लं पाययेद्धितमुत्तमम्॥हिदि स्थिताः पतन्त्येवमधस्तात्क्रिमयो नृणाम्। यवान्नं वितरेच्चास्मै सविडङ्गमतः परम्॥क्रमिजे पिबेन्मूत्रं विडङ्गामयसंयुतम्।" इति।

इति हेमाद्रिटीकायामायुर्वेदरसायने।

हृद्रोगस्य प्रकरणं साम्स्त्येन् निरूपितम्॥

अथ तृष्णाचिकित्सितम्।

तृष्णासु वातपित्तघ्नो विधिः प्रायेण शस्यते।

सर्वासु शीतो वाह्यान्तस्तथा शमनशोधनः॥६०॥

दिव्याम्बु शीतं सक्षौद्रं तद्वद्भो-मं च त-णम्।

निर्वापितं तप्तलोष्टकपालसिकतादिभिः॥६१॥

सशर्करं वा क्वथितं पञ्चमूलेन वा जलम्।

दर्भफुर्वेण मन्थश्च प्रशस्तो लाजसक्तुभिः॥६२॥

वाट्यश्चामयवैः शीतः शर्करामाक्षिकान्वितः।

यवागूः शालिभिस्तद्वत्कोद्रवैश्च चिरन्तनैः॥६३॥

शीतेन शीतवीर्यैश्च द्रव्यैः सिद्धेन भोजनम्।

हिमाम्बुपरिषिक्तस्य पयसा ससितामधु॥६४॥

रसैश्चानम्ललवणैर्जाङ्गलैर्घृतभर्जितैः।

मुद्गादीनां तथा यूषैर्जीवनीयरसान्वितैः॥६५॥

नस्यं क्षीरघृतं सिद्धं शीतैरिक्षोस्तथा रसः।

निर्वापणाश्च गण्डूषाः सूत्रस्थानोदिता हिताः॥६६॥

दाहज्वरोक्ता लेपाद्या निरीहत्वं मनोरतिः।

महासरि-दादीनां दर्शनस्मरणानि च॥६७॥

स० -तृष्णासु सर्वासु वातपित्तहरः सर्वोऽपि विधिरिष्यते। तथा, बाह्यतोऽभ्यन्तरे च शीतो विधिः। तथा, शमनं शोधनं च शस्यते। दिव्याम्बु-आन्तरिक्षं जलं, शीतं माक्षिकेण सह शस्यते। भो-मं च जलं तद्गुण-दिव्याम्बुसमानगुणं "शुचिपृथ्वसितश्वेते देशे" (ह्.सू.अ.५१५) इत्यादिलक्षणलक्षितम्, तच्च शस्यते। तस्य-दिव्यजलस्येव गुणा यस्य तत्तद्गुणम्।

तप्तलोष्टककपालसिकतादिभिस्तप्तं तन्निर्वपितं-शीतीकृतं शस्यते। अथवा, तदेव समशर्करं शस्यते। अथवा, दर्भपूर्वेण-तृणाख्येन, पञ्चमूलेन क्वथितं निर्वापितं शस्यते। तथा, लाजसक्तुभिः कृतो मन्थः प्रशस्तः। तथा, आमैः-अभृष्टैः, यवैर्वाट्यः प्रशस्तः शीतीभूतः शर्करामाक्षिकयुक्तः। यवागूः शालिभिस्तथैव शर्करामाक्षिकान्वित शस्ता। तथा, चिरन्तनैः कोद्रवैः शर्करामधुयुक्ता यवागूः शस्ता। तथा, शीतेन-शीतिकृतेन द्रव्येण, शीतवीर्यैश्च द्रव्यैः सिद्धेन भोजनं हितम्। अथवा, शीतजलैः परिषिक्तस्य पुंसः पयसा सशर्करामार्द्रीकं भोजनं हितम्। अथवा न केवलं पयसा सात्म्यादिवशान्मांसरसैर्जाङ्गलैः किञ्चिदम्ललवणैर्घृतभर्जितैर्भोजनं हितम्। तथा, मुद्गमसूरादिकानां यूषैर्जीवनीयरसयुक्तैर्भोजनं हितम्। तथा, शीतैः-शीतवीर्यैश्चन्दनादिभिः, तथेक्षुरसे सिद्धं क्षीरघृतं नस्यं हितम्। क्षीरोद्भवं घृतं क्षीरघृतम्। तथा, सूत्रस्थानोदिताः (अ.२२) निर्वापणाः-रोपणाः, गण्डूषा हिताः। तथा, दाहज्वरे य उक्ता लेपाद्याः-"दूर्वादिभिर्वा पित्तघ्नैः" (ह.चि.अ.१/१३९) इत्यादिग्रन्थनिर्दिष्टाः, ते च हिताः। तथा, निरीहत्वं-निर्व्यापारत्वं हितम्। तथा, मनसोरतिः-निर्वृतत्वम्। तथा, महासरितां महाह्रदानां-महातडागानां, च दर्शनस्मरणानि हितानि।

आ० र०- तथ तृष्णाचिकित्सितम्।[तत्र सामान्यतृष्णौषधमाह]-तृष्णास्विति। तद्गुणं-दिव्यदुणम्। दर्भपूर्वेण-पञ्चसूक्तेन तृणाख्येन। आमयवैः-कोमलयवैः, कृतो वाट्यः। शीतद्रव्यासिद्धेन शीतेन पयसा भोजनम्, पयोरसयूषाणां सात्म्यादिवशाव्यवस्था। क्षीरघृतं-क्षीरमन्थनोत्थं घृतम्। इक्षुरसो नस्यम्। निर्वापणाः-मधुगण्डूषादयः। निरीहत्वंनिर्व्यापारत्वम्। मनोरतिः-मनः सुखम्। सङ्ग्रहे तु (चि. अ. ८)नात्य[व]पीडनं(?)-"नारीक्षीरेण वा घृष्टमुष्ट्रास्थि ससितं हितम्।" इति। वङ्गसेने (तृषाधिकारे श्लो. २४)-"लाजोदकं मधुयुतं शीतं गुडविमार्दितम्। काश्मरीपिबेत्तृष्णार्दितो नरः॥ (च) विकापिप्पलिमुलयवानीधान्यनागरैः। श्रृतं शिअं तोयं [मुर्च्छातृड्दि] दोषाजित्॥ शर्कराकेसरक्षौद्रकृष्णाजीरकदाडिमैः। लेहो वा तृङ्क्षयी कृष्णाधुक्षीरिद्रुमाङ्कुरैः॥ अम्लं दाडिमबीकं पीतं धात्रीफलं च धन्याम्लैः। आर्द्रपटास्तरणकृतप्रावृगात्रस्तृषं हन्ति॥ गोस्तनीक्षुरसक्षीरयष्टीमधुत्पलैः। नियतं नस्यतः पितैस्तृष्णा शाम्यति दारुणा॥ कर्णशिरोमुखलेपाच्छुक्तिकया वाऽम्लदाडिमरसेन। तर्पयति शीघ्रमेतज्जलौघवत्सैकत रासिम्॥ कोलदाडीमवृक्षाम्लचुक्रीकाचुक्रिकारसः। पञ्चाम्लको मुखालेपः सद्यस्तृष्णां नियच्छति॥ क्षीरेक्षुरस मार्द्वीकक्षौद्रसीधुगुडोदकैः। वृक्षाम्लाम्लैश्च गण्डूषा मुखशोषप्रणाशनाः॥ दाडिमं बदरं रोध्रं कपित्थं बीजपुरकम्। पिष्ट्वा मूर्न्धि प्रलेपस्तु पिपासादाहनाशनः॥ वारि शीतं मधुयुतमाकण्ठाद्वा पिपासितम्। पायद्वामयेच्चापि तेन तृष्णा प्रशम्यति॥ वटप्ररोहं मधुकुष्ठमुत्पलं सलाजचुर्णं सलाजचुर्णं गुटिकां प्रकल्पयेत्। सुसंहिता सा वदए विधारिता तृष्णां प्रवृद्धामपि हन्ति सत्वरम्॥" इति। योगरत्ने-"मधुरैः सजीवनीयैः शीतैश्च सतिशूकैः श्रितं क्षीरं

पानाभ्यञ्जनसेकेष्विष्टं मधुशर्करायुक्तम्। लोहितकशालितण्डुलखर्जूरपरूषकोत्पलद्राक्षाः मधुपक्के लोष्ठमेव च जले स्थितं शीतलं पेयम्॥जम्बाम्रातकबदरिदलवेतसपञ्चवल्कपञ्चाम्लैः। हृन्मुखशिरःप्रदेहाः सघृता मूर्च्छाभ्रमातितृष्णान्धाः॥द्राक्षेक्षूत्पलयश्ःट्याद्यैः शर्करामधुयोजितैः। कषायं संपिबेच्छीतं तृष्णानाशकरं परम्॥लोष्टप्रतप्ततोयं तु शर्करामधुयोजितम्। लाक्षाचूर्णसमायुक्तं पीतं तृड्ढाहनाशनम्॥जम्ब्वाम्रपल्लवोषीरैः सिताऽरुणकाजितैः। सपयस्कः कृतः ढकाथः सम्पीतस्तृड्विनाशनः॥....रकवृक्षाम्लदाडिमाम्लोष्णवेतसैः। सशर्करैर्निहन्त्याशु लेहस्तृष्णां सुदुर्जयाम्॥सारिवा....लाजपिप्पलीमधुनागरैः। पयस्तृषान्धो गण्डूषः काञ्जिकैर्मुख....॥....मदनमधुकं शीतमम्बु विवर्धितम्।....अर्धशर्करायुक्तं पिबेत्तृष्णार्दितै....॥ इति।

इति तृष्णासु सामान्येन चिकित्सितमुक्तम्। विशेषेणाह-

तृष्णायां पवनोत्थायां सगुडं दधि शस्यते।

रसाश्च बृंहणाः शीता विदार्यादिगणाम्बु च॥६८॥

स० -पवनोत्थायां तृष्णायां दधि गुडेन सह शस्यते। मांसरसाश्च बृंहणाः शस्ताः। तथा विदार्यादिगणाम्बु "विदारिपञ्चाङ्गुल" (ह्.सू.अ.१५/९)इत्यादिभिः श्रृतं तोयं-पानीयं, शस्तम्।

आ० र०- वातृष्णौषधमाह-तृष्णायामिति। योगरत्ने-"पञ्चाङ्गिकाः पञ्च गणा य उक्तास्तेष्वम्बु[सिद्धं प्रथमे ग] णे वा। पिबेत्सुखोष्णं मनुजोऽचिरेण तृषो वुमुच्येत हि वातजायाः॥[तृष्णातिवृद्धौ] उदरे च पूर्णे संच्छर्दयेन्मागधिकोदकेन। विलेखनं चात्र हितं विधेयं स्याद्दा[डिमाम्रा] तकबीजपूरईः॥" [इति।] वङ्गसेने (तृषा. श्लो. २२)-" वातन्धमन्नपनं मृदुलघु शीतं रसो गुडूच्याश्च।" [इति।]

पित्ताजायां सितायुक्तः पक्वोदुम्बरजो रसः।

तत्काथो वा हिमस्तद्वत्सारिवादिगणाम्बु वा॥६९॥

तद्विधैश्च गणैः शीतकषायान् ससितामधून्।

मधुरैरौषधैस्तद्वत् क्षीरिवृक्षैश्च कल्पितान्॥७०॥

बीजपूरकमृद्वीकावटवेतसपल्लवान्।

मूलानि कुशकाशानां यष्ट्याह्वं च जले श्रृतम्॥७१॥

ज्वरोदितं वा द्राक्षादि पञ्चसाराम्बु वा पिबेत्।

स० -पित्तोत्थायां शर्करान्वितः पक्वोदुम्बरफलजो रसः, तेषां-उदुम्बराणां वा क्काथो हिमः, तद्वत्-सितायुक्तः, शस्त्यते। तथैव सारिवादिगणाम्बु-"सारिवोशीर" (ह्.सू.अ.१५१११) इत्यादि प्रशस्यते। तद्विधैः-शीतवीर्यैश्च, गणैः कृतान् शीतकषायान् ससितामाक्षिकान् पिबेत्। तथैव मधुरैः-द्राक्षादिभिर्द्रव्यैः, कल्पितान्। क्षीरिव्रुक्षैश्च-अश्वत्थन्यग्रोधादिभिः, कल्पितान् शीतकषायान् सशर्करामधून् पिबेत्। बीजपूरकादिपल्लवान् कुशकाशानां मूलानि मधुकं चैतज्जले श्रृतं पिबेत्। शीतमिति प्रकृतत्वाद्योग्यत्वाच्चात्र योज्यम्। अथवा, ज्वरचिकित्सितोक्तं [द्राक्षादि-] "द्राक्षामधूक" (ह्.चि.अ.११५५) इत्यादिकं फाण्टं शीतकषायं [वा] पिबेत्। पञ्चसाराम्बु वा-"मधुखर्जूरमृद्वीका" (ह्.चि.अ.२११४) इत्यादि रक्तपित्तचिकित्सिते पठितं, पिबेत्।

आ० र० - पित्ततृष्णौषधमाह-पित्तजायामिति। तद्विधैः-पित्तघ्नैः। तद्वत्-ससितामधून्। क्षीरिवृश्च तद्वत्। बीजपूरपल्लवादिसत्पकं जले श्रृतम्। वङ्गसेने (तृषा. श्लो. १८)-"काश्मर्यं शर्करायुक्तं चन्दनोशीरधान्यकम्। द्राक्षामधूकसंयुक्तं पित्ततर्षे जलं पिबेत्॥ स्याज्जीवनीयसिद्धक्षीरघृतं वातपित्तजे तर्षे। तद्वद्द्राक्षाचन्दनखर्जूरोशीरमधुयुतं तोयम्॥ जीर्णभुक्तः पिबेद्वाऽपि मधुना तण्डुलुदकम्।" [इति।]

कफोद्भवायां वमनं निम्बप्रसववारिणा॥७२॥

बिल्वाढकीपञ्चकोलदर्भपञ्चकसाधितम्।

जलं पिबेद्रजन्या वा सिद्धं सक्षौद्रशर्करम्॥७३॥

मुद्गयूषं च सव्योषपटोलीनिम्बपल्लवम्।

यवान्नं तीक्ष्णकवलनस्यलेहांश्च शीलयेत्॥७४॥

स० -श्लेष्मजायां तृष्णायां निम्बपत्रपानीयेन वमनं शस्तम्। बिल्वादिभिर्जलं साधितं कफतृष्णायां पिबेत्। रजन्या-हरिद्रया, जलं सिद्धं पिबेत्। सक्षौद्रशर्करं कफतृष्णायां मुद्गयूषं च त्रिकटुपटोलनिम्बपल्लवान्वितम् पिबेत्। यवान्नं तीक्ष्णकवलं तीक्ष्णनस्यं तीक्ष्णलेहं च शीलयेत्। शिम्बीधान्यम्। कच्छकः-तुमु(तूणी)कः। वङ्गसेने (तृषा-श्लो.२२)-"बिल्वाढकीधातकिपञ्चकोलदर्भेषु सिद्धं कफजां निहन्ति। "इति। योगरत्ने-"बिल्वाढकी[कन्यक] पञ्चमूलदर्भेषु सिद्धं कफजां निहन्ति।" इति। कच्छक(धातकि)-पञ्चकोलयोः स्थाने लघु[पञ्चमूलम्]। वङ्गसेने(तृश्लो.२३) -"सजीरकाण्यार्द्रक-शृङ्गबेरसौवर्चलान्यर्धजलप्लुतानि। मद्यानि हृद्यानि च गन्धवन्ति पीतानि सद्यः शमयन्ति तृष्णाम्॥" इति।

आ० र०- कफतृष्णौषधमाह-कफोद्भवायामिति। आढकीशिम्बीधान्यम्। कच्छकः-तुमु(तूणी)कः। वङ्गसेने (तृषा. श्लो २२)-"बिल्वाढकीधातकिपञ्चकोलदर्भेषु सिद्धं कफजां निहन्ति।" इति। योगरत्ने-"बिल्वाढकी[कन्यक]पञ्चमूलदर्भेषु सिद्धं कफजां निहन्ति।" इति। कच्छक(धातकि)-पञ्चकोलयोः स्थाने लघु[पञ्चमूलम्]। वङ्गसेने (तृषा. श्लो. २३)-"सजीरकाण्यार्द्रकशृङ्गबेरसौवर्चलान्यर्धजलप्लुतानि। मद्यानि हृद्यानि च गन्धवन्ति पीतानि सद्यः शमयन्ति तृष्णाम्॥" इति।

सर्वैरामाच्च तद्वन्त्री क्रियेष्टा वमनं तथा।

त्र्यूषणारुष्करवचाफलाम्लोष्णाम्बुमस्तुभिः॥७५॥

स० -सर्वैरामाच्च तृष्णायां सत्यां तद्वन्त्री सन्निपातघ्न्यामघ्नी च क्रियेष्टा। तथा च वमनमिष्टम्। त्र्यूषणीरुष्करवचादियुक्तेन फलाम्लेनोष्णजलेन वा मस्तुना व इष्टम्।

आ० र०- सन्निपातजौषधमाह-सर्वैरिति। तद्वन्त्री-सर्वदोषहन्त्री आमहन्त्री च। त्र्यूषणादिभिर्वमनम्। फलाम्लंमातुलुङ्गाद्यम्लम्। मदनफलं वमनत्वालुज्वम् (?)।

अन्नात्ययान्मण्डमुष्णं हिमं मन्थं च कालवित्।

स ० -अन्नात्ययात्-अन्नविरहात्, तृष्णायां सत्यां मण्डमुष्णं शीतं मन्थं च कालप्रकृतिसात्म्यादिवित् पिबेत्। वातकफप्रकृतिना उष्णो मण्डः पेयः। पित्तश्लेष्मप्रकृतिना वातपित्तप्रकृतिना च हिमो मन्थः पेयः। एवं कालसात्म्यादिषु निरुप्यम्। "सक्तवः सर्पिषाऽभ्यक्ताः शीतोदकपरिप्लुताः। नातिद्रवा नाति सान्द्रा मन्थ इत्यभिधीयते॥" इति।

आ० र० - उपवासजौषधमाह-अन्नात्ययादिति। उष्णां मण्डशीतकाले। शीतं मन्थमुश्णकाले। अत एव कालविदित्युक्तम्।

तृषि श्रमान्मांसरसं मन्थं वा ससितं पिबेत्॥७६॥

स० -श्रमात्तृषि जातायां मांसरसं मद्यं वा सशर्करं पिबेत्।

आ० र० - श्रमजौषधमाह-तृषि श्रमादिति।

आतपात्ससितं मन्थं यवकोलजसक्तुभिः।

सर्वाण्यङ्गानि लिम्पेच्च तिलपिण्याककाञ्जिकैः॥७७॥

स० -आतपात्तृषि यवकोलोद्भवैः सक्तुभिः सशर्करं मन्थं पिबेत्। सर्वाणि चाङ्गानि तिलपिण्याककाञ्जिकैर्लिम्पेत्।

आ० र० - आतपजौषध्हमाह=आरपादिति। किलजाः-शुष्कबदरत्वगुद्भवाः। तोलग्रहणं पिण्याकेन विकल्पार्थम्।

शीतस्नानाच्च मद्याम्बु पिबेत्तृण्मान् गुडाम्बु वा।

स ० -शीतस्नानाच्च तृण्मान् मद्याम्बु पिबेत्। तृण्मानिति मतुपि मय इति णत्वे रूपम्। गुडजलं वा पिबेत्।

आ० र० - उष्णाक्रान्तस्ये (नि. अ. ५/५५)युक्ततृष्णौषधमाह-शीतस्नानात्विति।

मद्यादर्धजलं मद्यं स्नातोऽम्लवणैर्युतम्॥७८॥

स० -मद्यात्तृण्मानर्धजलं मद्यं स्नातश्चाम्लवणाभ्यां युतं पिबेत्।

आ० र० - त्मद्यजौषधमाह-मद्यदिति। आयुतं-युक्तम्।

स्नेहतीक्ष्णतराग्निस्तु स्वभावशिशिरं जलम्।

स० -स्नेहेन तीक्ष्णतरोऽग्निर्यस्य स नरस्तृण्मान्निसर्गशीतलं जलं पिबेत्।

आ० र० - तीक्ष्णाग्नेः स्नेहजे (नि. अ. ५/५६)त्युक्ततृष्णौषधमाह-स्नेहतीक्ष्णतराग्निस्त्विति।

स्नेहादुष्णाम्ब्वजीर्णात्तु जीर्णान्मण्डं पिपासितः॥७९॥

स० -स्नेहात् पुनरजीर्णात् पिपासित उष्णाम्बु वा पिबेत्। जीर्णात्तु स्नेहत्तृषि मण्डं पिबेत्।

आ० र० - अजीर्णस्नेहजौषधमाह-स्नेहादिति।

जीर्णस्नेहजौषधमाह-जीर्णादिति। अतीक्ष्णाग्निविषयमर्दभेदद्वयम्।

पिबेत्स्निग्धान्नतृषितो हिमस्पर्धि गुडोदकम्।

स० -स्निग्धान्नेन भुक्तेन तृषितो हिमस्पर्धि-तुहिनशीतलं, गुडोदकं पिबेत्।

आ० र० - स्निग्धान्नजौषधमह-पिबेदिति। हिमस्पर्धि_....।

गुर्वाद्यन्नेन तृषितः पीत्वोष्णाम्बु तदुल्लिखेत्॥८०॥

स० -गुर्वाद्यन्नेन भुक्तेन तृषितः पीत्वोष्णाम्बु तत्-गुर्वाद्यन्नं, उद्वमेत्।

आ० र० - गुर्वादिभोजनजौषधमाह-गुर्वाद्यनेति।

क्षयजायां क्षयहितं सर्वं बृंहणमौषधम्।

स० -क्षयजायां तृषि क्षये हितं यद् बृंहणमौषधं तत्सर्वं हितं-शस्तम्।

आ० र० - रसक्षयजौषधमाह-क्षयजायामिति। क्षयहितं-राजयक्ष्महितम्।

कृषदुर्बलरूक्षाणां क्षीरं छागो रसोऽथवा॥ ८१॥

स० -कृशादीनां तृषि जातायं क्षीरं हितम्। अथवा छागो रसो हितः।

आ० र० - त्कृशादीनां विशेषमाह-कृशदुर्बलरूक्षाणामिति।

क्षीरं च सोर्ध्ववातायां क्षयकासहरैः श्रृतम्।

स० -सोर्ध्ववातायां तृषि क्षयकासहरैः श्रृतं क्षीरं हितम्। चशब्दान्मांसरसश्च।

आ० र० - सोर्ध्ववातायां विशेषमाह-क्षीरं चेति।

रोगोपसर्गाज्जातायां धान्याम्बु ससितामधु॥ ८२॥

पाने प्रशस्तं सर्वा च क्रिया रोगाद्यपेक्षया।

स ० -रोगोपसर्गाज्जातायां तृषि धान्याम्बु ससितामाक्षिकं पाने प्रशस्तम्। सर्वा च क्रिया रोगाद्यपेक्षया शस्ता।

आ० र० - रोगापसर्गजौषधमाह-रोगोपसर्गजातायामिति। धान्यं-कुस्तुम्बरी। वङ्गसेने (तृषा. श्लि. ३ ६) - " क्षतोद्भवांरूग्विनिवारणेन जयेसानामसृजश्च पानैः। क्षयोत्थितां क्षीरजलं निहन्यान्मांसोदकं वा मधुजोदकं वा॥ " इति।

तृष्यन् पूर्वामयक्षीणो न लभेत जलं यदि॥८३॥

मरणं दीर्घरोगं वा प्राप्नुयात्त्वरितं ततः।

सात्म्यान्नपानभैषज्यैस्तृष्णां तस्य जयेत्पुरा॥८४॥

तस्यां जितायामन्योऽपि व्याधिः शक्यश्चिकित्सितुम्॥८४ १/२॥

इति तृष्णारोगचिकित्सितम्।

इति श्रिवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचिता-यामष्टङ्गहृदयसंहितायां चतुर्थे चिकित्सित-स्थाने छर्दिहृद्रोगतृष्णाचिकित्सितं नाम षष्ठोऽध्यायः॥६॥

स० -पूर्वामयेन क्षीणः सन् तृष्णक्-पिपासितो, यदि जलं न लमेत तदा मरणं दीर्घरोगं वा प्राप्नुयात्। ततश्च हेतोस्त्वरितं-शीघ्रतरं, तस्य-नरस्य, पूर्वमन्येभ्यो रोगेभ्यः सात्म्यान्न फनभेषजैस्तृषं जयेत्, ततोऽपरं रोगम्।

किमेवं क्रियते ? इत्याह-तस्यां तृषि जितायां सत्यामन्योऽपि रोग उपक्रमितुं शक्यः।

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टाङ्गहृदय-टीकायां सर्वाङ्गसुन्दराख्यायां चतुर्थे चिकित्सित-स्थाने छर्दिहृद्रोगतृष्णाचिकित्सितं नाम षष्ठोऽध्यायः समाप्तः॥६॥

आ० र० - रोगाद्यापेक्षयेत्यस्यामाह-ऋष्यन्निति। रोगविरोधेऽपि जलं देयमित्यर्थः।

उपद्रवरूपाया अप्युपसर्गजायाः (?) प्राधान्यमाहत्वरितमिति। सात्म्यग्रहणं यद्युपशेते तत्तद्युक्तिनिरपेक्षमपि देयमित्येवमर्थः। वङ्गसेने (तृषा. श्लि. ४ १)-"मूर्च्छाच्छर्दितृषादाह-स्त्रीमद्यबृशकर्शिताः। पिबेयुः शीतलं तोयं रक्तपित्ते मदात्यये॥तृशितो मोहमायाति मोहात्प्राणान् विमुञ्चति। तस्मात्सर्वास्ववस्थासु न क्वचिद्वारि वार्यते॥अन्नेनापि विना जन्तुः प्राणान् धारयते चिरम्। तोयाभावात्पिपासार्तः क्षणात्प्राणौर्विमुच्यते॥ " इति।

इति हेमाद्रिटीकायामायुर्वेदरसायने।

तृष्णारोगप्रशमनं सामस्त्येन निरूपितम्॥

****

सप्तमोऽध्यायः

छर्द्यादिचिकित्सितादनन्तरं मदात्ययचिकित्सितारम्भः। चिकित्सासामान्य-हेतुर्यतस्तृष्णाया यथा वातपित्ते कारणं तथा मदात्ययस्यापि।

आथातो मदात्ययादिचिकित्सितं व्याख्यास्यामः।

इति ह स्माहुरात्रेयादयो महर्षयः।

(गद्यसूत्रे॥२॥)

यं दोषमधिकं पश्येत्तस्यादौ प्रतिकारयेत्।

कफस्थानानुपूर्व्या च तुल्यदोषे मदात्यये॥१॥

स०-यं दोषं-तत्र मदात्यये वातादिकं, उल्बणं पश्येत्-लक्षयेज्जानीयात्। तस्य-दोषस्य, आदौ-प्रथमत एव, प्रतिकारयेत्-प्रतिकारं कुर्यात्। एवं विषमदोषो मदात्ययश्चिकित्स्यः। तुल्यदोषे पुनर्मदात्यये कफस्थानानुपूर्व्या दोषान् प्रतिकारयेत्।

किमेत्येवं क्रियते? इत्याह-

पित्तमारुतपर्यन्तः प्रायेण हि मदात्ययः।

स०-हि-यस्मात्, कालक्रमेण पित्तमारुतावसानो बाहुल्येन मदात्ययः स्यात्। प्रथमं कफस्याधिक्यम्। ततः पित्तमारुता वधिकौ भवतः। कफस्थानानुपूर्वीव्याख्यानं ज्वरचिकित्सिते (श्लो.१४८) व्याख्यातम्।

हीनमिथ्यातिपीतेन यो व्याधिरुपजायते॥२॥

समपीतेन तेनैव स मद्येनोपशाम्यति।

स ०-हीनमिथ्यातिपीतेन मद्येन यो व्याधिरुत्पद्यते, सः-व्याधिः, तेनैव मद्येन समपीतेन-सम्यङ्मात्रया पीतेन, शाम्यति। "यावद् दृष्टेर्न सम्भ्रान्तिर्यावन्न क्षोभते मनः। तावदेव विरन्तव्यं मद्यादात्मवता सदा॥" (श्लो.१४) इत्येवं लक्षणं पानं सममेव पीतम्। येनैव मार्द्वीकेनाथवा माधवेन गाडादिना वा यो जातो व्याधिः स तेनैव मार्द्वीकादिना शाम्यति।

कुत एवं स्यात् ? इत्याह-

मद्यस्य विषसादृश्यात्

स०-यथा तीक्ष्णादिभिर्दशभिर्गुणैर्विषं युक्तं तथैव तत्सङ्ख्या तैरेव गुणैर्मद्यमपि युक्तम्। ततश्च मद्येनैव शान्तिर्युक्ता।

ननु, यदि विषसादृश्यं मद्यस्य, ततो यथा विषस्य विषान्तरेण शान्तिस्तथा मद्यस्यापि मद्यान्तरेण शान्तिः प्राप्तेत्याशङ्ख्याह-

विषं तूत्कर्षवृत्तिभिः॥३॥

तीक्ष्णादिभिर्गुणैर्योगाद्विषान्तरमपेक्षते।

स ०-सत्यमेतत्। एवं प्राप्तम्। किन्तु गुणैर्दशभिरुत्कर्षवृत्तिभिः-अधिकशक्तिस्वरूपैः, तीक्ष्णादिभिर्योगात्-सम्बन्धात्, विषं विषान्तरमपेक्षते। न तु तद्धीनात्तदेव स्वोत्थे रोगे प्रशमायालम्। मद्यं तु हीनवृत्तिभिर्दशभिर्गुणैर्योगान्न मद्यान्तरमपेक्षते। एवं तीक्ष्णादीनां गुणानां हीनोत्कर्षभेदाद्विषान्मद्यस्य वैलक्षण्यम्।

तीक्ष्णोष्णेनातिमात्रेण पीतेनाम्लविदाहिना॥४॥

मद्येनान्नरसक्लेदो विदग्धः क्षारतां गतः।

यान् कुर्यान्मदतृण्मोहज्वरान्तर्दाहविभ्रमान्॥५॥

मद्योत्क्लिष्टेन दोषेण रुद्धः स्रोतःसु मारुतः।

सुतीव्रा वेदना याश्च शिरस्यस्थिषु सन्धिषु॥६॥

जीर्णाममद्यदोषस्य प्रकाङ्क्षालाघवे सति।

यौगिकं विधिवद्युक्तं मद्यमेव निहन्ति तान्॥७॥

स०-स्वभावत एव तीक्ष्णोष्णेन तथाऽतिमात्रेण तथाऽम्लविदाहिना मद्येन पीतेनान्नरसक्लेदो विदग्धः क्षारतां च गतो यन् मदादीन् कुर्यात्। तथा मारुतो मद्योत्क्लिष्टेन दोषेण स्रोतःसुरुद्धो या दारुणा मूर्धादिषु वेदनाः कुर्यात् तान्-मदादीन्, ताश्च वेदनाः मद्यमेव यौगिकं विधिना युक्तं निहन्ति। किम्भूतस्य पुरुषस्य? जीर्णाममद्यदोषस्य, तथा प्रकाङ्क्षायां लाघवेसति, ते च ताश्च तान्, "पुमान् स्त्रिया" इत्येकशेषः। ननु, यदि मद्यमेव तान्निहन्ति ततश्चिकित्सान्तरारम्भो न युक्तः। मैवम्। बह्वयो हि चिकित्साः प्रतिरोगं प्रोक्ताः। तस्माच्चिकित्सान्तरोपन्यासो युक्त एव।

ननु, कथं तान् मद्यमेव निहन्ति? इत्याह-

क्षारो हि याति माधुर्यं शीघ्रमम्लोपसंहितः।

मद्यमम्लेषु च श्रेष्ठं दोषविष्यन्दनादलम्॥८॥

स०-यस्मात् क्षारोऽम्लोपसंहितो द्रागेव माधुर्यं याति। अम्लेषु मध्ये मद्यं दोषविष्यन्दनात् [अलं-] पर्याप्तम्।

तीक्ष्णोष्णाद्यैः पुरा प्रोक्तैर्दीपनाद्यैस्तथा गुणैः।

सात्म्यत्वाच्च तदेवास्य धातुसाम्यकरं परम्॥९॥

स ० -पुरा-मदात्ययनिदानोक्तैस्तीक्ष्णोष्णाद्यैर्गुणैः (नि. अ. ६/१) तथा मद्यवर्गोक्तैर्दीपनाद्यैर्गुणैः (सू. अ. ५/६२) करणभूतैः, तदेव-मद्यं, सुष्ठु धातुसाम्यकरम्। धातुसाम्यकरमिति हेतौ टः।

सप्ताहमष्टरात्रं वा कुर्यात्पानात्ययौषधम्।

जीर्यत्येतावता पानं कालेन विपथाश्रितम्॥१०॥

स ० -सप्ताहमथवाऽष्टरात्रं पानात्ययौषधं कुर्यात्-नाधिकं कालम्। यत एतावता कालेन विमर्गस्थं तत् पानं-मद्यपानं, परिणमति।

परं ततोऽनुबध्नाति यो रोगस्तस्य भेषजम्।

यथायथं प्रयुञ्जीत कृतपानात्ययौषधः॥११॥

स ० -ततः-तस्मात्कालात्, परं-ऊर्ध्वं, यो रोगोऽनुबध्नाति, तस्य-रोगस्य, कृतपानात्ययौषधश्च यथास्वं भेषजं प्रयुञ्जीत।

इति सामान्येन चिकित्सितमुक्त्वा विशेषेणाह-

तत्र वातोल्बणे मद्यं दधातिपिष्टकृतं युतम्।

बीजपूरकवृक्षाम्लकोलदाडिमदीप्यकैः॥१२॥

यवानीहपुषाजाजीव्योषत्रिलवणार्द्रकैः।

शुल्यिर्मांसैर्हरितकैः स्नेहवद्भिश्च सकुभिः॥ १३॥

उष्णास्निग्धाम्लवणा मेद्यमांसरसा हिताः।

आम्राम्रातकपेशीभिः संस्कृता रागषाडवाः॥ १४॥

गोधूममाषविकृतिर्मृदुश्चित्रा मुखप्रिया।

आर्द्रिकार्द्रककुल्माषसुक्तमांसादिगर्भिणी॥ १५॥

सुरभिर्लवणा शीता निर्गदा वाऽच्छवारुणी।

सरसो दाडिमात् क्काथः पञ्चमूलात्कनीयसः॥ १६॥

शुण्ठीधान्यात्तथा मुस्तुसुक्ताम्भोच्छाम्लकाञ्जिकम्

अभ्यङ्गोद्वर्तनस्नानमुष्णं प्रावरणं घनम्॥ १७॥

घनश्चागुरुजो धूपः पङ्कश्चागुरुकुङ्कुमः।

कुचोरुश्रोणिशालिन्यो यौवनोष्णाङ्गयष्टयः॥ १८॥

हर्षेणालिङ्गने युक्ताः प्रियाः संवाहनेषु च।

स० -[तत्र-] तेषु मदात्ययेषु मध्ये, वाताधिके मदात्यये पिष्टकृतं मद्यं दद्यात्। बीजपूरकादिभिर्देशसात्म्यादिवशाद्यस्तैः समस्तैर्यथायोगयुक्तम्। तथा, मेद्यस्य-मेदुरस्य, मांसस्यरसा हिताः। किम्भूताः? उष्णाः स्निग्धामललवणाश्च। तथा, रागाः षाडवाश्चाम्राम्रातकपेशीभिः संस्कृता हिताः। लक्षणमेषामृतुचर्यामुक्तम् (ह्.सू.अ.३/३०)। तथा, गोधूममाषयोर्विकृतिर्हिता। किम्भूता? मृदुः-अतीक्ष्णा, चित्रा-नानाप्रकारा, मुखप्रिया-वदनरुचिकृत्। तथा, आर्द्रिकादिगर्भिणी। [तथा,] अच्छवारुणी च हिता। किम्भूता? सुरभिर्लवणा शीता च। तथा निर्गदा-पुराणा। तथा, दाडिमात्स्वरसो हितः। पञ्चमूलात् कनीयसो-ह्रस्वात्, क्काथः। शुण्ठीधान्याच्च क्काथो हितः। तथा, मस्त्वादि हितम्। तथा, अभ्यङ्गनादि उष्णं हितम्। प्रावरणं-आच्छदनं, घनं हितम्, अगरुजश्च धूपो घनो-बहुलो, हितः। अगरुकुङ्कुमपङ्कानुलेपनं हितम्। तथा, प्रिया हर्षेण-प्रीत्या, आलिङ्गनं-परिष्वङ्गः, तत्र युक्ताः, संवाहनेषु-शरीरमर्दनेषु च, युक्ता हिताः। कुचाश्चोरवश्च श्रोणयश्च तेन शालन्ते यास्ता एवम्। तथा, यौवने नोष्णाऽङ्गयष्टिः-शरीरलता, यासां ता एवम्।

पित्तोल्बणे बहुजलं शार्करं मधु वा युतम्॥ १९॥

रसैर्दाडिमखर्जूरभव्यद्राक्षापरूषजैः।

सुशीतं ससितासक्तु योज्यं तादृक् च पानकम्॥ २०॥

स्वादुवर्गकषायैर्वा युक्तं मद्यं समाक्षिकम्।

स०-पित्ताधिके मदात्यये बहुजलं शार्करं-मद्यविशेषं योज्यम्। मधु-मक्षिकं वा, रसैर्दाडिमादिजैर्युक्तम्। तच्च सुष्ठु शीतं कृत्वा योज्यम्। परुषकाण्यत्र मधुराणि योज्यानि नाम्लानि, तेषां कफपित्तकरत्वात्। तथा च मुनिः (च. सू. अ. २७/१३२) "अम्लं परुषकं द्राक्षा बदराण्यारुकाणि च। पित्तश्लेष्मप्रकोपीणि" इति। तादृक् च-सुशीतं, पनकं योज्यम्। किम्भूतम्? सह सितासक्तुभिर्वतते यत्तदेवम्। सक्तवश्च लाजानां योज्याः, योग्यतरत्वात्, न तु यवानाम्। तथा, स्वादुवर्गस्य क्वाथेन संयुक्तं मद्यं समाक्षिकं योज्यम्।

शालिषष्टिकमश्नीयाच्छशाजैणकपिञ्जलैः॥ २१॥

सतीनमुद्गामलकपटोलीदाडिमै रसैः।

स०-शालिषष्टिक भुञ्जीत। कैः सह? शशादिजै रसैर्दै शादिसात्म्यवशात् सतीनादिजैश्च रसैः।

कफपित्तं समुत्क्लिष्टमुल्लिखेत्तृड्विदाहवान्॥ २२॥

पीत्वाऽम्बु शीतं मद्यं वा भूरीक्षुरससंयुतम्।

द्राक्षारसं वा सम्सर्गी तर्पणादिः परं हितः॥ २३॥

तथाऽग्निर्दीप्यते तस्य दोषशेषान्नपाचनः।

स०-तृड्विदाहवान् मदात्ययी कफपित्तं समुत्क्लिष्टं-समुत्थितं स्वस्थानाच्युताभासं, सम्यग्वमेत्। किं कृत्वा? अम्बु शीतं पीत्वा, मद्यं वा भूरिणेक्षुरसेन संयुतं पीत्वा, अथवा द्राक्षारसं पीत्वा। परं-अनन्तरं, संसर्गी तर्पणादिः सुष्ठु हितः। कृतवमनादिकस्यानन्तरं

पेयादिक्रमः संसर्गीत्युच्यते। एवं कृते सति तस्य-मदात्ययिनः, अग्निर्दीप्यते। किम्भूतः ? दोषशेषस्यान्नस्य-आहारस्य च, पाचनः।

कासे सरक्तनिष्ठीवे पार्श्वस्तनरुजासु च॥ २४॥

तृष्णायां सविदाहायां सोत्क्लेशे हृदयोरसि।

गुडूचीभद्रमुस्तानां पटोलस्याथव रसम्॥ २५॥

सश्रृङ्गबेरं युञ्जीत तित्तिरिप्रतिभोजनम्।

स० -पित्तमदात्यये कासे रक्तनिष्ठीवसहिते पार्श्वादिरुजासु च तृष्णायां विदाहसितायां हृदय उरसि च सोत्क्लेशे सति गुडूच्यादीनां रसमथवा पटोलस्य रसं सनागरं युञ्जीत। अल्पस्तित्तिरिस्तित्तिरिप्रति। "सुप्प्रतिना मात्रार्थे" इत्यव्ययीभावः।

तृष्यते चाति बलवद्वातपित्ते समुद्धते॥ २६॥

दद्याद् द्राक्षारसं पानं शीतं दोषानुलोमनम्।

जीर्णेऽद्यान्मधुराम्लेन चागमांसरसेन च॥ २७॥

स० -अतितृष्यते च पुरुषाय वातपित्तेऽधिके सति द्राक्षारसपानं दद्यात्। किम्भूतम् ? शीतलं तथा दोषानुलोमनम्। जीर्णे च तस्मिन् छागमांसरसेन मधुराम्लेनाश्नीयात्।

तृष्यल्पशः पिबेन्मद्यं मदं रक्षन् बहूदकम्।

मुस्तदाडिमलाजाम्बु जलं वा पर्णिनीश्रृतम्॥ २८॥

पाटल्युत्पलकन्दैर्वा स्वभावादेव वा हिमम्।

स० -तृषि सत्यामल्पं-मन्दं, मदं रक्षन् बहूदकं मद्यं पिबेत्। मुस्तादिजलं वा पिबेत्। पर्णिनीभिः क्वथितं वा पटो (पाट)ल्यादिश्रृतां वा सर्वमेतच्छीतं पात्व्यम्। यत्तोयं स्वभावादेव वा हिममिति।

मद्यातिपानादब्यातौ क्षीणे तेजसि चोद्धते॥ २९॥

यः शुष्कगलताल्वोष्ठो जिह्वां निष्कृष्य चेष्टते।

पाययेत्कामतोऽम्भस्तं निशीथपवनाहतम्॥ ३०॥

स० -मद्यातिपानाद्धेतोरब्यातौ क्षीणे-अल्पीभूते, तेजसि चोद्धते-क्षोभिते सति, यः पुरुषः शुष्कगलताल्वोष्ठः सन् जिह्वां निष्कृष्य-निःसार्य, चेष्टते-इतश्चेतश्च लुठ्ति, तं-नरं, कामतः-इच्छया, अम्भो निशीथे यः पवनस्तेनाहतं पाययेत्।

कोलदाडिमवृक्षाम्लचुक्रीकाचुक्रिकारसः।

पञ्चाम्लको मुखालेपः सद्यस्तृष्णं नियच्छति॥ ३१॥

स० -कोलादिभिः पञ्चाम्लको मुखालेपो द्राक् तृष्णां शमयति।

त्वचं प्राप्तश्च पानोष्मा पित्तरक्ताभिमूर्च्छितः।

दाहं प्रकुरुते घोरं तत्रातिशिशिरो विधिः॥ ३२॥

अशाम्यति रसैस्तृप्ते रोहिणीं व्यधयेच्छिराम्।

स० -पानस्य मद्यस्योष्मा त्वचं प्राप्तः पित्तरक्ताभ्यामभिमूर्च्छितो-मिश्रितो, दाहं दारुणं प्रकर्षेण कुरुते। तत्र-दाहे, [अति] शीतो विधिः कार्यः। शीतोपचारेणाप्यशाम्यति सति दाहे मांसरसैस्तृप्ते नरे रोहिणीसंज्ञां शिरां व्यधयेत्, वैद्य इति शेषः। व्यधयेदिति 'घटादित्वान्मत्वे' ह्रस्वः।

आ० र० -.....अथ दाहप्रकरणम्। दहः सप्तधा,-मद्यजःपित्तजस्तृड्रोधजः क्षयजोरक्तपूर्णजो मर्माभिघातजश्चेति। .....माह-त्वचं प्राप्तस्त्विति। सङ्ग्रहे.....।

उल्लेखनोपवासाभ्यां जयेच्छ्लेष्मोल्बणं पिबेत्॥३३॥

शीतं शुण्ठीस्थिरोदीच्यदुःस्पर्शान्यतमोदकम्।

स ०-श्लेष्माधिकं मदात्ययं वमनोपवासाभ्यां जयेत्। शुण्ठ्याद्यन्यतमोदकं शीतकषायं पिबेत्।

निरामं क्षुधितं काले पाययेद्बहुमाक्षिकम्॥३४॥

शार्करं मधु वा जीर्णमरिष्टं सीधुमेव वा।

रूक्षतर्पणसंयुक्तं यवानीनागरान्वितम्॥३५॥

स ०-ततो निरामं जातक्षुधं सन्तं, काले-यतोचिते, शार्करं बहुमाक्षिकं-बहुक्षौद्रं, पाययेत्। मधु-मार्द्वीकं, वा बहुक्षौद्रम्। द्वयमप्येतत् पुराणम्। तथा, अरिष्टं-अभयादिकृतं, पाययेत्। सीधुं वा पाययेत्। किम्भूतम्? रूक्षाये तर्पणास्तैः संयुक्तं [तथा] यवानीशुण्ठीभ्यां संयुक्तम्।

यूषेण यवगोधूमं तनुनाऽल्पेन भोजयेत्।

उष्णाम्लकटुतिक्तेन कौलत्थेनाल्पसर्पिषा॥३६॥

शुष्कमूलकजैश्छागै रसैर्वा धन्वचारिणाम्।

साम्लवेतसवृक्षाम्लपटोलीव्योषदाडिमैः॥३७॥

स० -तथा कौलत्थेन यूषेण यवगोधूमं भोजयेत्। किम्भूतेन ? तनुना-स्वच्छेन। तथा, अल्पेनोष्णाम्लकटुतिक्तेनाल्पघृतेन। अथवा, शुष्कमूलकजै रसैश्छागैरेवा रसैर्धन्वचारिणां वा रसैर्भोजयेत्। किम्भूतैः ? सहाम्लवेतसतित्तिडीकपटोलपत्रत्रिकटुकदाडिमैः।

प्रभूतशुण्ठीमरिचहरितार्द्रकपेशिकम्।

बीजपूररसाद्यम्लभृष्टनीरसर्वतितम्॥ ३८॥

करीरकरमर्दादि रोचिष्णु बहुशालनम्।

प्रव्यक्ताष्टाङ्गलवणं विकल्पितनिमर्दकम्॥ ३९॥

यथाग्नि भक्षयन् मांसं माधवं निगदं पिबेत्।

स० -मांसं यथाग्नि-अन्यनतिक्रमेण, भक्ष्यन् माधवं निगदंपुराणं, पिबेत्। किम्भूतं मांसम् ? विविधैः प्रकारैः कल्पितोनिष्पादितो, निमर्दको येन मांसेन तद्विकल्पितनिमर्दकम्। तदेव विविधप्रकारत्वं निमर्दकस्याह-प्रभूताः-उत्कटाः, शुण्ठी मरीचहरितार्द्रकपेशयो यस्मिंस्तदेवम्। हरितार्द्रकस्य शस्त्रकृता दीर्घाकारा अवयवाः पेशय उच्यन्ते। बीजपूररसादिभिरम्लस्तथा भृष्टो-यथायथं स्नेहादिना, नीरसः-शुष्कप्रायो, वर्तितोव्यञ्जनप्रकारो, यत्र तदेवम्। करीरादि रोचिष्णु-रोचनशीलं, बहु-प्रभूतं, शालनं-हरितकं, यस्मिन्। तथा, प्रकर्षेण व्यक्तं स्पष्टं, वक्ष्यमाणमष्टाङ्गलवणं यत्र। तदेवं विविधं कल्पनं कृतम्। क्रियाविशेषणान्येतानि।

सितासौवर्चलाजाजीतित्तिडीकाम्लवेतसम्॥ ४०॥

त्वगेलामरिचार्धांशमष्टाङ्गलवणं हितम्।

स्रोतोविशुद्ध्यग्निकरं कफप्राये मदात्यये॥ ४१॥

स० -सिताद्यैरष्टाङ्गलवणमन्वर्थसंज्ञं मदात्यये हितम्। स्रोतःशुद्धिकृदग्निदीपनं च।

रूक्षोष्णोद्वर्तनोद्वर्षस्नानभोजनलङ्घनैः।

सकामाभिः सह स्त्रीभिर्युक्त्या जागरणेन च॥४२॥

मदात्ययः कफप्रायः शीघ्रं समुपशाम्यति।

स० -रूक्षोष्णैरुद्वर्तनादिभिर्लङ्घनेन तथा युक्त्या-देशकालाद्यपेक्षिण्या, सकामाभिर्दयिताभिः सह यज्जागरणं तेन च कफाधिको मदात्ययो द्रागेव शमं याति।

यदिदं कर्म निर्दिष्टं पृथग्दोषबलं प्रति॥४३॥

सन्निपाते दशविधे तच्छेषेऽपि विकल्पयेत्।

स० -"तत्र वातोल्बणे मद्यं" (श्लो. १२) इत्यादि। "पित्तोलबणे बहुजलं" (श्लो १९) इत्यादि, तथा "उल्लेखनोपवासाभ्यां जयेच्छ्लेष्मोल्बणं" (श्लो ३३) इत्यादि च त्रिविधं सन्निपातं पृथग्दोषबलं प्रति लक्षीकृत्य कर्म निर्दिष्टं कर्मदमुक्तम्। न केवलमत्र त्रिविधे सन्निपाते, शेषेऽपि दशविधे सन्निपाते विकल्पयेत्-विविधं कृत्वा कल्पयेत्, -कुर्याट्, वैद्य इति शेषः। एतदुक्तं भवति,-वातोल्बणे मदात्ययजे सन्निपाते यत्कर्म निर्दिष्टं तथा पित्तोल्बणे मदात्ययजे सन्निपाते यत्कर्म निर्दिष्टं तदेव वातपित्तोल्बणे कुर्यात्। एवं दोषबलमपेक्ष्य सर्वस्मिन् मदात्यये चिकित्सितं कुर्याट्। स दशविधः सन्निपातः शिष्यहिताय पद्येन प्रदर्श्यते,-"उत्कर्षेण त्वेको मद्येन द्वौ तदाऽऽदिमः। उत्कर्षेण यदा द्वौ तु मध्येनैको द्वितीयकः॥ एको मध्येन दोषः स्याद् द्वावल्पेन तृतीयकः। उत्कर्षेणैक एव स्यादल्पेन द्वौ चतुर्थकः॥ उत्कर्षेण यदा द्वौ तु अल्पेनैकश्च पञ्चमः। एकोऽल्पेन तु मध्येन द्वौ दोषाविति षष्ठकः॥ उत्कर्षेण समस्ताः स्युरेवं भवति सप्तमः। मध्येन सर्वेऽपि यदा तदा भवति चाष्टमः॥ अल्पेन सर्वेऽपि यदा तदा तु नवमः स्मृतः। अल्पेनेको मध्येनैकस्तदा त्वन्त्य इति स्फुटाः॥ सन्निपातस्य मुनिना दश भेदाः प्रकीर्तिताः।" इति।

त्वङ्नागपुष्पमगधामरिचाजाजिधान्यकैः॥४४॥

परुषकमधूकैलासुराह्वैश्च सितान्वितैः।

सकपित्थरसं हृद्यं पानकं शशिबोवितम्॥४५॥

मदात्ययेषु सर्वेषु पेयं रुच्यग्निदीपनम्।

स ० -त्वगादिभिः शर्करान्वितैः कपित्थरसयुक्तं कर्पूरकृताधिवासं पानकं सर्वेषु मदात्ययेषु पातव्यं रुच्यग्निवृद्धिकरम्।

नाविक्षोभ्य मनो मद्यं शरीरमविहन्य वा॥४६॥

कुर्यान्मदात्ययं तस्मादिष्यत हर्षणी क्रिया।

स० -मद्यं यस्मान्मानसं नाविक्षोभ्य-अपि तु मनसः प्रक्षोभणं कृत्वा, न च शरीरस्य विहननमकृत्वा, एवमेव यथा कथञ्चिन्मदात्ययं कुर्यात्। यतश्चैवं तस्माद्धेतोर्हर्षोत्पादिका क्रिया एष्टव्या। नाक्षोभ्येत्ययं पाठो न श्रेयान्, ल्यबादेशस्यात्र दुर्लभत्वात्।

संशुद्धिशमनाद्येषु मददोषः कृतेष्वपि॥४७॥

न चेच्छाम्येत्कफे क्षीणे जाते दौर्वल्यलाघवे।

तस्य मद्यविदग्धस्य वातपित्ताधिकस्य च॥४८॥

ग्रीष्मोपतप्तस्य तरोर्यथा वर्षं तथा पयः।

स० -संशुद्धिशमनाद्येषूपक्रमेषु कृतेष्वपि यदि मददोषोमद्योत्थो व्याधिः, न शाम्येत्, तस्य मद्येन विदग्धस्यात एव च कफे सौ-यधातौ क्षीणेऽत एव जाते दौर्बल्यलाघवे-अल्पप्रमाणत्वे कार्श्ये च सति, तदानीं सामर्थ्याद्वातपित्तयोरतिरिक्तता, वातपित्तधिकस्य च क्षीणौजस्त्वात्तथा पयः पथ्यम्। यथा ग्रीष्मोपतप्तस्य तरोर्वर्षम्। वर्षमिति कृद्विधौ "भयादीनामुपसङ्ख्यानम्" इत्यच्।

मद्यक्षीणस्य हि क्षीणं क्षीरमाश्वेव पुष्यति॥४९॥

ओजस्तुल्यं गुणैः सर्वैर्विपरीतं च मद्यतः।

स० -हि-यस्मात्, तस्य-तुल्यं गुणैः सर्वैः-गुर्वादिभिरोजसः क्षीरं, मद्याच्च विपरीतं गुणैः। तथा च मुनिः (च. सू. अ. २७/२१७)-"स्वादु शीतं मृदु स्निग्धं बहलं श्लक्ष्णपिच्छिलम्। गुरु मन्दं प्रसन्नं च गव्यं दशगुणं पयः॥ तदेवंगुणमेवौजः सामान्यादभिवर्धयेत्।" इति। यतश्चैवं तस्मान्मद्यक्षीणस्व क्षीणमोजः क्षीरमाश्चेव पुष्यति-वृद्धि प्रापयति, न त्वपरं, द्रव्यं, यथोक्तहेत्वभावात्।

पयसा विहते रोगे बले जाते निवर्तयेत्॥५०॥

क्षीरप्रयोगं, मद्यं च क्रमेणाल्पाल्पमाचरेत्।

न विक्षयध्वंसकोत्थैः स्पृशेतोपद्रवैर्यथा॥५१॥

स० -पयसा रोगे-मदात्ययाख्ये, निवर्तिते बले जाते सति मद्योचितः पुमान् क्षीरप्रयोगं निवर्तयेत्। मद्यं चाल्पाल्पं क्रमेणोपयुञ्जीत। यथा विक्षयध्वंसकोद्भवैरुपद्रवैरसौ न स्पृशेत। विक्षयोद्भवा विकाराः-कायशिरोरोगाद्याः (ह्.नि.अ.६/२२) , ध्वंसकोपद्रवाः-श्लेष्मनिष्ठीवादयः (ह्.नि.अ.६/२२)।

तयोस्तु स्याद्घृ क्षीरं बस्तयो बृंहणाः शिवाः।

अभ्यङ्गोद्वर्तनस्नानान्यन्नपानं च वातजित्॥५२॥

स० -तयोर्विक्षयध्वंसकयोर्घृतं क्षीरं च चिकित्सितं स्यात्। तथा बस्तयो बृंहणाः शिवाः-निरपायाः। तथा, आब्याङ्गादीनि यच्च वातजिदन्नपानं तच्च स्यात्।

युक्तमद्यस्य मद्योत्थो न व्याधिरुपाजायते।

अतोऽस्य वक्ष्यते योगो यः सुखायैव केवलम्॥५३॥

स० -युक्तमद्यस्य पुंसो मद्योत्थो व्याधिर्नोपजायते, युक्तमद्यत्वात्। अतः-अस्माद्धेतोः, अस्य-मद्यस्य, संयोगो वक्ष्यते। यः केवलं सुखायैव स्यात्।

अधुना सुरां सम्पन्नामाह-

आश्विनं या महत्तेजो बलं सारस्वतं च या।
दधात्यैन्द्रं च या वीर्यं प्रभावं वैष्णवं च या॥५४॥
अस्त्रं मकरकेतोर्या पुरुषार्थो बलस्य या।
सौत्रामण्यां द्विजमुखे या हुताशे च हूयते॥५५॥
या सर्वौषधिसम्पूर्णान्मथ्यमानात्सुरासुरैः।
महोदधेः समुद्भूता श्रीशशाङ्कामृतैः सह॥५६॥
मधुमाधवमैरेयसीधुगौडासवादिभिः।
मदशक्तिमनुज्झन्ती या रूपैर्बहुभिः स्थिता॥५७॥
यामास्वाद्य विलासिन्यो यथार्थं नाम बिभ्रति।
कुलाङ्गनाऽपि यां पीत्वा नयत्युद्धतमानसा॥५८॥
अनङ्गालिङ्गितैरङ्गैः क्वापि चेतो मुनेरपि।
तरङ्गभङ्गभ्रुकुटीतर्जनैर्मानिनीमनः॥५९॥
एकं प्रसाद्य कुरुते या द्वयोरपि निर्वृतिम्।
यथाकामं भटावाप्तिपरिहृष्टाप्सरोगणे॥६०॥
तृणवत्पुरुषा युद्धे यामास्वाद्य त्यजन्त्यसून्।
यां शीलयित्वाऽपि चिरं बहुधा बहुविग्रहाम्॥६१॥
नित्यं हर्षातिवेगेन तत्पूर्वमिव सेवते।
शोकोद्वेगारतिभयैर्यां दृष्ट्वा नाभिभूयते॥६२॥
गोष्ठीमहोत्सवोद्यानं न यस्याः शोभते विना।
स्मृत्वा स्मृत्वा च बहुशो वियुक्तः शोचते यया॥६३॥
अप्रसन्नाऽपि या प्रीत्यै प्रसन्ना स्वर्ग एव या।

अपीन्द्रं मन्यते दुःस्थं हृदयस्थितया यया॥ ६४॥

अनिर्देश्यसुखास्वादा स्वयंवेद्यैव या परम्।

इति चित्रास्ववस्थासु प्रियामनुकरोति या॥ ६५॥

प्रियाऽतिप्रियतां याति यत्प्रियस्य विशेषतः।

या प्रीतिर्या रतिर्वा वाग्या पुष्टिरिति च स्तुता॥ ६६॥

देवदानवगन्धर्वयक्षराक्षसमानुषैः।

पानप्रवृत्तौ सत्यां तु तां सुरां विधिना पिबेत्॥ ६७॥

स० -या-सुरा, अश्विनं महत्तेजो-दीप्तं, दधाति। आश्विनमित्यश्विनोरिदमित्यण्, "नस्तद्धिते" इति टिलोपे प्राप्ते "इनण्यनपत्ये" इति प्रकृतिभावः। या च सुरा सारस्वतं बलं उत्साहं, ऐन्द्रं च वीर्यं-शक्ति, वैष्णवं च प्रभावं-माहात्म्यं, दधाति। या च मदनस्यास्त्रं-प्रहरणं, बलभद्रस्य या पुरुषाथः-परं प्रयोजनम्। या च सौत्रामाण्यां यज्ञे द्विजास्ये हुताशे च हूयते। या च महोदधेः सर्वौषधिसम्पूर्णाद्देवदानवैर्विलोड्यमानात् लक्ष्म्यादिभिः सहोत्पन्ना। या च सुरा मदशक्तिमत्यजन्ती बहुभिर्मध्वादिभिराकारैः स्थिता। यां सुरां पीत्वा विलासिन्यो मृगलोचनाः, यथार्थं-अन्वर्थं, नाम बिभ्रति विलासो विद्यते यासामिति। या पीत्वा कुलवामलोचनाऽप्युद्धतमानसा सत्यनङ्गालिङ्गितैरङ्गैर्मुनेरपि चेतः क्वापि नयति। तरङ्गभङ्गा-कुटिला, भ्रुकुटिस्तया तर्जनानि-प्रणयकलहविशेषाः, तैर्मानित्या मानसमेकं प्रसाद्य द्वयोरपि-स्त्रीपुंसयोः, निर्वृतिं-सौख्यं, या सुरा करोति। यां सुरामास्वाद्य नराः समरे तृणमिव प्राणांस्त्यजन्ति। कीदृषि युद्धे ? यथेच्छं भटस्य-शूरपुरुषस्य, याऽवाप्तिस्तया परिहृष्टो-मुदितः, अप्सरःसङ्घो यस्मिन्नाहवे तस्मिन्। यांसुरां, बहुभिः प्रकारैः-आहारादिमध्यावसानलक्षणैः, तथा यां बहुविग्रहां-मधुमाधवादिभिरनेकशरीरां, शीलयित्वाऽपि नित्यं हर्षस्यातिवेगेन तत्पूर्वमिव-तत्प्रथममिव, सेवते। यां दृष्ट्वा उपलभ्यास्वादादिना, शोकादिभिर्नाभिभूयते। यस्याः सुराया ऋते गोष्ठ्यादिर्न शोभते। यया च वियुक्तः शोचते। शोचत इति नङिभ्यस्तङ्। या चाप्रसन्ना-कलुषाऽपि प्रीत्यै, प्रसन्नास्वच्छा सती, स्वर्ग एव स्यात्। यया चान्तःस्थितयेन्द्रमपि दुःस्थितं मन्यते। अनिर्देश्यं-अभणनीयं सुखं यस्मिन्नास्वादे स तथाविध आस्वादो यस्याः सैवम्। या केवलमात्मनैव वेद्या। इति-पूर्वोक्तेन प्रकारेण, चित्रासु-नानाविधास्ववस्थासु, प्रियांवल्लभां, अनुकरोति-अनुहरति। प्रियापक्षे नर्माथः-प्रणयकलहार्थः। अप्रसन्ना-कुपिता। प्रसन्ना-त्यक्तकोपा। अनिर्देश्यः सुखास्वादः-सुखोपलम्भो, यस्या इति

योज्यम्। एवं "यां शीलयित्वा" इत्यादिः सर्वोऽपि ग्रन्थः प्रियायामपि योज्यः। तथा, यत्-यस्मात्, सुरा प्रिया-इष्टा, अतिप्रियतां-सुष्ठु वल्लभत्वं, याति। यत्प्रियस्य-प्रकृतत्वात्सुराप्रियस्य, विशेषेण प्रियतां याति। या सुरा प्रीतिरिति या वागिति या पुष्टिरिति या च देवादिभिः स्तुता। पानप्रवृत्तौ सत्यां येषां पानाधिकारोऽस्ति धर्मशास्त्रेष्वनिषिद्धत्वात् तां पूर्वोक्तगुणां सुरां विधिना-वक्ष्यमाणेन (श्लो. ७५), पिबेत्।

सम्भवन्ति न ते रोगा मेदोनिलकफोद्भवाः।
विधियुक्तादृते मद्याद्ये न सिध्यन्ति दारुणाः॥६८॥

स०-ते मेदोनिलकफोद्भवा रोगा न सम्भवन्ति। दारुणाः दुःसहाः। ये विधियुक्तान्मद्यादृते न सिध्यन्ति। विधियुक्तेन मद्येन सर्वे मेदोनिलकफजा रोगाः सिध्यन्तीति भावः।

अस्ति देहस्य साऽवस्था यस्यां पानं निवार्यते।
अन्यत्र मद्यान्निगदाद्विविधौषधसंस्कृतात्॥६९॥

स०-देहस्य साऽवस्था-प्रक्लिन्नदेहमेहादिका (ह्.सू.अ.८/५४) अस्ति, यस्यां पानं निवार्यते, मद्यादन्यत्र। किम्भूतात्? निगदात्, तथा विविधौषधसंस्कृतात्। मद्यमेवंविधं वर्जयित्वा पानं निषिध्यत इत्यर्थः।

आनूपं जाङ्गलं मांसं विधिनाऽप्युपकल्पितम्।
मद्यं सहायमप्राप्य सम्यक् परिणमेत्कथम्॥७०॥

स०-आनूपं जाङ्गलं मांसं विधानेनाप्युपकल्पितं मद्यं विनो पयुक्तं कथं सम्यक् परिणमति ?

पुनरपि मद्यमेव श्लाघयन्नाह-

सुतीव्रमारुतव्याधिघातिनो लशुनस्य च।
मद्यमांसवियुक्तस्य प्रयोगे स्यात्कियान् गुणः॥७१॥

स०-लशुनस्य च दारुणतरवातव्याधिविनाशिनः मद्यमांसरहितस्य प्रयोगे कियान् गुणः स्यात्? अल्प एवेत्यर्थः।

निगूढशल्याहरणे शस्त्रक्षाराग्निकर्मणि।
पीतमद्यो विषहते सुखं वैद्यविकत्थनाम्॥७२॥

स०-तथा निगूढम्य-अत्यर्थं प्रणष्टस्य, शल्यस्याहरणे आकर्षणे, तथा शस्त्रादिकर्मणि पीतमद्यो नरः सुखं-अक्लेशेन, वैद्यविकत्थनां-कदर्थनां, सहते।

अनलोत्तेजनं रुच्यं शोकश्रमविनोदकम्।
न चातः परमस्त्यन्यदारोग्यबलपुष्टिकृत्॥७३॥

स०-तथा, अनलस्य-अग्नेः उत्तेजनं शोकादिघ्नम्। न च कदाचित् त(अ)स्मान्मद्यात् परं-अन्यत्, श्रेष्ठमस्त्यारोग्यादिकृत्।

रक्षता जीवितं तस्मात्पेयमात्मवता सदा।
आश्रितोपाश्रितहितं परमं धर्मसाधनम्॥७४॥

स०-यत एवं महागुणं मद्यम्, तस्माज्जिवितं रक्षता नरेण तथाऽऽत्मवता-सुधीमता, सदा पेयम्। आश्रितानामुपाश्रितानां च हितम्। परमं धर्मसाधनं-धर्मोपायः।

अथास्य पाने विधिनाह-

स्नातः प्रणम्य सुरविप्रगुरून् यथास्वं
वृत्तिं विधाय च समस्तपरिग्रहस्य।
आपानभूमिमथ गन्धजलाभिषीक्ता-
माहारमण्डपसमीपगतां श्रयेत॥ ७५॥

स्वास्तृतेऽथ शयने कमनीये
मित्रभृत्यरमणीसमवेतः।
स्वं यशः कथकचारणसङ्घै
रुद्धतं निशमयन्नतिलोकम्॥ ७६॥

विलासिनीनां च विलासशोभि
गीतं सनृत्यं कलतूर्यघोषैः।
काञ्चीकलापैश्चलकिङ्किणीकैः
क्रीडाविहङ्गैश्च कृतानुनादम्॥ ७७॥

मणिकनकसमुत्थैरावनेयैर्विचित्रैः
सजलविविधलेखक्षो-मवस्त्रावृताङ्गैः।
अपि मुनिजनचित्तक्षोभसम्पादिनीभि-
श्चकितहरिणलोलप्रेक्षणीभिः प्रियाभिः॥ ७८॥

स्तननितम्बकृतादतिगौरवा-
दलसमाकुलमीश्वरसम्भ्रमात्।
इति गतं दधतीभिरसंस्थितं
तरुणचित्तविलोभनकार्मणम्॥ ७९॥

यौवनासवमत्ताभिर्विलासाधिष्ठितात्मभिः।
सञ्चार्यमाणं युगपत्तन्वङ्गीभिरितस्ततः॥ ८०॥

तालवृन्तनलिनीदलानिलैः
शीतलीकृतमतीव शीतलैः।
दर्शनेऽपि विदधद्वशानुगं
स्वादितं किमुत चित्तजन्मनः॥ ८१॥

चूतरसेन्दुमृगैः कृतवासं
मल्लिकयोज्ज्वलया च सनाथम्।
स्फाटिकशुक्तिगतं सतरङ्गं
कान्तमनङ्गमिवोद्वहदङ्गम्॥ ८२॥

तालीसाद्यं चूर्णमेलादिकं वा
हृद्यं प्राश्य प्राग्वयःस्थापनं वा।
तत्प्रार्थिभ्यो भूमिभागे सुमृष्टे
तोयोन्मिश्रं दापयित्वा ततश्च॥ ८३॥

घृतिमान् स्मृतिमान्नित्यमनूनाधिकमाचरन्।
उचितेनोपचारेण सर्वमेवोपपादयन्॥ ८४॥

जितविकसितासितसरो
जनयनसङ्क्रान्तिवर्धितश्रीकम्।
कान्टमुखमिव सौरभ-
हृतमधुपगणं पिबेन्मद्यम्॥ ८५॥

स०-स्नातो नरः सुरादीन् प्रणम्य यथास्वं-यथायोग्यं, समस्तस्य परिकरस्य वृत्तिं कृत्वा, अथ पानभूमिं गन्धजलेन-कर्पूरोशीरादिना वा सिरेनाम्बुना, आभिषिक्तामाश्रयेत्। कीदृशीम्? आहारमण्डपस्य निकटस्थिताम्। पीतमद्यस्य दूरं व्रजत आयासादि स्यात्। वसन्ततिलकं वृत्तम्।

अथ-भूमिश्रयणादनन्तरं, शयनीये स्थितो मद्यं पिबेदिति वक्ष्यमाणेन सम्बन्धः। किम्भूते? सुष्ठु आस्तृते-प्रदत्तप्रच्छदपटे। तथा, कमनीये-रम्ये। मित्रादिसहितः। स्वं यश इत्यादि। किं कुर्वन्? स्वं-आत्मीयं, यशः कथकादिसङ्गैर्निशमयन्-श्रावयन्। कीदृशम्? उद्धतं तथाऽतिलोकं-अद्भुतरुपम्। स्वागतावृत्तम्।

तथा विलासिनीनां सम्बन्धि गीतं निशमयन्। किम्भूतम्? सह नृत्येन सनृत्यम्। द्वयमपि बिलसशोभि। विलासलक्षणं चोक्तम्-"स्थानासनयमनानां हर्षभ्रूनेत्रकर्मणां चैव। उत्पद्यते विशेषो यः श्लिष्टः स तु विलासः स्यात्॥" इति। तथा तद्गीतं मधुरतूर्यशब्दैस्तथा कञ्चीकलापैः स्फुटास्तथा स्फुरन्त्यः किङ्किण्यः-सूक्ष्मघण्टिकाः, येषां तैस्तथाविधैस्तथा क्रीडाविहङ्गैः-सारसादिभिश्च, कृतानुनादम्। उपजातिवृत्तम्।

आवनेयैः-डोलङ्गकैः, तन्वङ्गीभिर्युगपदितस्ततः सञ्चार्यमाणम्। एवं ह्युनुभूयमानं रामणीयकं धत्ते। किम्भूतैरावनेयैः? मणिकनकसमुत्थैः, तथा विचित्रैः-नानाविधैः, तथा सजलं नानाप्रकारलेखं यत् क्षौ-वस्त्रं तेनावृत्तमङ्गं येषां तैः। किम्भूताभिस्तन्वङ्गीभिः? मुनिजनचित्तक्षोभसम्पादिनीभिः। तथा, चकितः-त्रस्तो, यो हरिणस्तद्वन्नेत्रैः साधु प्रेक्षन्ते यास्ताभिः। बाहुलकात् कर्तरि ल्युट्। तथा, बल्लभाभिः। मालिनीवृत्तम्।

तथा, गतमिति। असंस्थितं-अनवस्थितस्वरूपं, दधतीभिः। यतः स्तनाभ्यां नितम्बेन च कृतादधिकं गौरवादलसम्। तथा, ईश्वरस्य-प्रभोः, यः सम्भ्रमो-भयं, तस्मादाकुलं [गतं-]। अत एव च तरुणचित्तानां विलोभने कार्मणंवशीकरणम्।" द्रुतविलम्बितमाह नभौ भरौ।"

तथा, तन्वङ्गीभिरितस्ततो युगपत्सञ्चार्यमाणम्। किम्भूताभिः ? यौवनासवाभ्यां मत्ताभिः। तथा विलासेनाधिष्ठित आत्मा-चित्तं, यासां ताभिः। तथा च कीदृशं मद्यम् ? तालवृन्तादिभिरतिशीतैः शीतलीकृतम्। दर्शनेऽप्येवंरूपं मद्यं कामस्य वशानुगं जनं विदधत् कन्दर्पोद्दीपनत्वात्। किमुत-किंपुनः, पीतं सत्कामवशं जनं कुर्यात्। "रान्नरौ लगयुता रथोद्धता।".

तथा, चूतरसादिभिः कृताधिवासं-सुगन्धीकृतम्। तथा, मल्लिकया-पुष्पविशेषेण, उज्ज्वलया-विकसितया, सनाथंयुक्तम्। तथा, स्फटिकस्य विकारा स्फाटिकी, स्फाटिकी चासौ शुक्तिश्च, तस्यां गतं-स्थितम्। स्फटिकस्येयं स्फाटिकीति व्युत्पत्तौ पुंवद्भावो दुर्निवारः स्यात्। तथा, सतरङ्गम्। एवं च कान्तं-रम्यं, अङ्गमुद्वहन्। उत्प्रेक्षते। अनङ्गं [इव]-पञ्चशरमिव, चारुतरत्वेन कामोत्पादकत्वात्। दोधकवृत्तम्।

प्राक्-पूर्वं, तालीसाद्यं चूर्णमेलादिकं वा हृद्यमथव वयः-स्थापनं-रसायनोक्तं, प्राश्य-भक्षयित्वा। तथा, सुमृष्टे-उपलिप्ते तत्प्रार्थिभ्यो-मद्यपानाधिकृतेभ्यो देवदानवकूषमाण्डादिभ्यः, तोयोन्मिश्रं मद्यं दापयित्वा पश्चाज्जलं दापयित्व्यमित्यर्थः। ततश्च-अनन्तरं, पिबेत्। शालिनीवृत्तम्।

किं कुर्वन् ? अनूनाधिकं-पूर्वोक्तं, नित्यमाचरन्। धृतिमान् स्मृतिमांश्च सन् उचितेन-योग्येन, उपचारेण सर्वमेवोपपादयेत्(यन्)।

किम्भूतं मद्यम् ? विकसितं च तत् असितं सरोजं च विकसितासितसरोजम्। जितं-न्यक्कृतं, विकसितासितसरोजं याभ्यां नयनाभ्यां ते तथाविधे, तयोः सङ्क्रान्तिः-प्रतिबिम्बत्वं, तया संवर्धिता श्रीर्यस्य सरकस्य तदेवम्। तथा, सौरभेण हृतो रम्यगतित्वाद् भ्रमरसार्थो येन तदेवम्। सुरमेर्भावः सौरभम्, "इगन्ताच्च लघुपूर्वात्" इत्यण्। तच्च कान्तामुखमिव। यतो जितविकसितासितसरोजनयनयोर्या सङ्क्रान्तिः-सञ्चारः सकटाक्षेक्षितादिना. तया संवर्धिता श्रीः-शोभा, यस्य तदेवम्। सकटाक्षेक्षितं हि मुखं नितरां राजते। तथा, उत्तमस्त्रीणां मुखं सुगन्धि भवतीति सौरभहृतमधुपगणम्। "विपुला तु याऽन्यथा पादभाक्।"

पीत्वैवं चषकद्वयं परिजनं सन्मान्य सर्वं ततो

गत्वाऽऽहारभुवं पुरः सुभिषजो भुञ्जीत भूयोऽत्र च।

मांसापूपघृतार्द्रकादिहरितैर्युक्तं ससौवर्चलै-

र्द्विस्त्रिर्वा निशि चाल्पमेव वनितासंवल्गनार्थं पिबेत्

स० -एवं-अनेन प्रकारेण, चषकद्वयं पीत्वा तत-अनन्तरं, परिजनं सर्वं-वेश्यादिकमपि, सन्मान्य तथाऽऽहारभुवं गत्वा सुभिषजः-शोभनवैद्यस्य, पुरः-अग्रे, भुञ्जीत। अत्रे च-आहारभुवि, मांसापूपादिभिर्युक्तं द्विस्त्रिर्वा सरकं पिबेत्। मांसापूरेति केचित् पेठुः। निशि तु कान्तायाः संवल्गनार्थं-रञ्जनार्थं, अल्पमेव पिबेत्-न तु बहु। शार्दुलविक्रीडितम्।

कान्तारञ्जनपानं श्लाघयन्नाह-

रहसि दयितामङ्के कृत्वा भुजान्तरपीडना-

त्पुलकिततनुं जातस्वेदां सकम्पपयोधराम्।

यदि सरभसं शीधोर्वारं न पाययते कृती

किमनुभवति क्लेशाप्यं ततो गृहतन्त्रताम्॥८७॥

स ० -कृती-प्रवीणो, यदि प्रियां मधोः सरकं न पाययते, ततः किं-कस्मात्, गृहतन्त्रतां-गृहोपकरणसम्पादनक्लेशं, अनुभवति? किं कृत्वा? रहस्यङ्के-उत्सङ्गे, दयितां कृत्वा। किभूताम्? भुजान्तरपीडनात् पुलकितशरीराम्, तथा जातस्वेदाम्, तथा सवेपथुकुचाम्। रोमाञ्चस्वेदकम्पाः सात्विका भावाः शृङ्गारस्याविर्भाविकाः। दयितामिति "गतिबुद्धि" इत्यादिना कर्मत्वम्। पाययते इति "निगरणचलनार्थेभ्यश्च" इति परस्मैपदे प्राप्ते "न पादम्य" इत्यादिना निषिद्धे च स्वेत्याद्यात्मनेपदम्। "भवति हरिणी व्सौ म्रौ स्लौ गोरसोदधिसप्तिभिः।"

वरतनुवक्त्रसङ्गतिसुगन्धितरं सरकं

द्रुतमिव पद्मरागमणिमासवरूपधरम्।

भवति रतिश्रमेण च मदः पिबतोऽल्पमपि

क्षयमत ओजसः परिहरन् स शयीत परम्॥८८॥

स०-किम्भूतं मद्यम्? वरतनुवदनसङ्गत्या सुरभितरम्। तथा पद्मरागमणिं-द्रवत्वमिव, प्राप्तमासवरूपधरम्। यतश्च रतिश्रमेणाल्पमपि मद्यं पिबतो मदो भवति, ततो मद्यमोजसश्च क्षयहेतुः। आत ओजःक्षयं परिहरन् सः-मद्यपायी, पानानन्तरं शयीत-स्वप्यात्। "नजभजजा लगौ च यदि नर्कुटकं तु तदा।"

इत्थं युक्त्या पिबन्मद्यं न त्रिवर्गाद्विहीयते।

असारसंसारसुखं परमं चाधिगच्छति॥८९॥

एश्वर्यस्योपभोगोऽयं स्पृहणीयः सुरैरपि।

स०-इत्थं-एवंप्रकारया, युक्त्या मद्यं पिबन् पुरुषस्त्रिवर्गात्-धर्मार्थकामलक्षणात्, यस्मान्न हीयते। हीयत इति कर्मकर्तरि तङ्। असारसंसारस्य परमं सुखं चाधिगच्छतिप्राप्नोति। अयं-मद्यपानलक्षणः, एश्च्यस्योपभोगः सुरैरपि स्पृहणीयः।

अन्यथा हि विपत्सु स्यात्पश्चात्तापेन्धनं धनम्॥९०॥

उपभोगेन रहितो भोगावानिति निन्द्यते।

निर्मितोऽतिकदर्योऽयं विधिना निधिपालकः॥९१॥

तस्माद्यावस्थया पानं पानस्य सततं हितम्।

जित्वा विषयलुब्धानामिन्द्रियाणां स्वतन्त्रताम्॥९२॥

स० -अन्यथा-एवमपि भोगमकुर्वतो, हि विपत्सु सतीषु धनं-द्रव्यं, पश्चात्तापेन्धनं स्यात्। स ह्येवं विपदि चिन्तयति,-किं मया धनं प्राप्योपभोगोऽस्मिन् कृतः? उपभोगं विनाभोगवानिति सोल्लुण्ठमुच्यमानो गर्ह्यते। निन्दितत्वमेवास्य प्रकटयति-निर्मित इत्यादि। अयमतिकदर्यः-कुस्वामी, विधिना निधिपालको निर्मितः-कृतः। यत एवं तस्मात् पानस्य-मद्यस्य, व्यवस्थया नियमेन पानं हितम्। ननु, कथं निसर्गतो विषयलुब्धेष्विन्द्रियेषु व्यवस्था पालयितुं शक्यते? इत्याह-जित्वेत्यादि। विषयाभिलाषिणामिन्द्रियाणां स्वातन्त्र्यं जित्वा नियमेन व्यवस्थया पानं कर्तुं शक्यत इत्यर्थः।

विधिर्वसुमतामेष भविष्यद्वसवस्तु ये।
यथोपपत्ति तैर्मद्यं पातव्यं मात्रया हितम्॥९३॥

स० -वसुमतां-धनिनां, एष विधिः। ये तु भविष्यद्वसवस्तेषां च तैर्यथोपपत्ति-यथायुक्ति, हितं मद्यं मात्रया पातव्यम्।

यावद् दृष्टेर्न सम्भ्रान्तिर्यावन्न क्षोभते मनः।
तावदेव विरन्तव्यं मद्यादात्मवता सदा॥१४॥

स० -यावदेव दृष्टेर्न सम्भ्रान्तिर्यावदेव मनो न क्षोभं याति, तावदेव मद्यात् धीमता सर्वदा विरन्तव्यं-निवृत्तिः कार्या। एष एव समयोगः। एतदतिक्रमोऽतियोगः। यथोक्तात्समयोगाद्धीनस्वलक्षणो हीनयोगः। दोषदेशप्रकृत्यादीनपरीक्षय मिथ्यायोगः।

अभ्यङ्गोद्वर्तनस्नानवासधूपानुलेपनैः।
स्निग्धोष्णैर्भावितश्चान्नैः पानं वातोत्तरः पिबेत्॥१५॥

स० -वाताधिको नरोऽभ्यङ्गोद्वर्तनादिभिः स्निग्धोष्णैर्भावितोऽन्नैश्च मद्यं पिबेत्।

शीतोपचारैर्विविधैर्मधुरस्निग्धशीतलैः।

पैत्तिको भवितश्चान्नैः पिबन्मद्यं न सीदति॥ १६॥

स० -पैत्तिको विविधैः शीतोपचारैः-चन्दनानुलेपनादिभिः, मधुरस्निग्धशीतलैश्चान्नैः सह मद्यं पिबन् न सीदति।

उपचारैरशिशिरैर्यवगोधूमभुक् पिबेत्।

श्लैष्मिको धन्वजैर्मांसैर्मद्यं मारिचिकैः सह॥ १७॥

स० -श्लैष्मिको यवगोधूमभुक् सन् मद्यमशिशिरैरुपचारैस्तथा मांसैर्धन्वोद्भवैर्मरिचसंस्कृतैः सह पिबेत्।

तत्र वाते हितं मद्यं प्रायः पैष्टिकगौडिकम्।

पित्ते साम्भोमधु, काफे मार्द्वीकारिष्टमधवम्॥ १८॥

स० -तत्र-तेषु मद्येषु मध्ये, वाताधिके नरे प्रायो-बाहुल्येन, मद्यं पैष्टिकं गौडिकं च हितम्। पित्ते सजलं समाक्षिकं च मद्यं हितम्। कफे मार्द्वीकारिष्टमाधवं हितम्।

प्राक् पिबेच्छ्लैष्मिको मद्यं, भुक्तस्योपरि पैत्तिकः।

वातिकस्तु पिबेन्मध्ये, समदोषो यथेच्छया॥ १९॥

इति मदात्ययचिकित्सितम्।

स० - श्लैष्मिकः प्राग्भक्तं मद्यं पिबेत्। पिबेत् भक्तं भुक्त्वा पिबेत्। वातोत्तरः पुनर्मध्ये भक्तस्य पिबेत्। समदोषो यथेच्छया-भक्तस्य पूर्वं मध्येऽन्ते वा, पिबेत्।

अथ मदमूर्च्छायचिकित्सितम्।

मदेषु वातपित्तघ्नं प्रायो मूर्च्छासु चेष्यते।

सर्वत्रापि विशेषेण पित्तमेवोपलक्षयेत्॥ १००॥

स० -मदेषु प्रायेण वातपित्तघ्नं चिकित्सितम्, मूर्च्छासु-मूर्च्छायेषु चेष्यते। सर्वत्रैव-मदे मूर्च्छाये च, पित्तमेवाधिकं जानीयात्।

आ० र०- अथ मदादिचिकित्सितम्। तत्र मदमूर्च्छयोराह-मदेष्विति। सर्वत्रापि-कफजादिष्वपि। वातपित्तघ्नेऽपि पित्तघ्नं विशेषतः।

अत एव तेषामुपक्रमः-

शीताः प्रदेहा मणयः सेका व्यजनमारुताः।

सिता द्राक्षेक्षुखर्जूरकाश्मर्यस्वरसाः पयः॥ १०१॥

सिद्धं मधुरवर्गेण रसा यूषाः सदाडिमाः।

षष्टिकाः शालयो रक्ता यवाः सर्पिश्च जीवनम्॥ १०२॥

कल्याणकं महातिक्तं षड्लं पयसाऽग्निकः।

पिप्पल्यो वा शिलाह्वं वा रसायनविधानतः॥ १०३॥

त्रिफला वा प्रयोक्तव्या सघृतक्षौद्रशर्करा।

स ० -शीताः प्रदेहाः। पयो मधुरवर्गेण-द्राक्षादिना, सिद्धम्। तथा,रसाः-मांसरसादयः। यूषाश्च दाडिमान्विताः। तथा, शालयो-रक्तशालय इत्यर्थः। षष्टिकादयश्च। तथा, घृतं कल्याणकादिकम्। [कल्याणकं-] उन्मादप्रतिषेधोक्तम् (ह्.उ.अ.)। महातिक्तं-कुष्टचिकित्सितोक्तम् (ह्.उ.अ.६/२६)। महातिक्तं-कुष्ठचिकित्सितोक्तम् (ह्.चि.अ.१९/८)। षड्लं-राजयक्ष्मचिकित्सितोक्तम् (ह्.चि.अ.५/२२)। तथा, क्षीरेण चित्रकम्। तथा, पिप्पल्यो

रसायनविधानेन। अथवा, शिलाजतु रसायनविधानेन। अथवा, त्रिफला सघृतक्षौद्रशर्करा प्रयोक्तव्या।

आ० र० - तदेव प्रपञ्चयति-प्रदेहा इति। जीवनादीनि चत्वाइ सर्पिषि। अग्निकादीनि चत्वारि रसायनानि। अग्निकः-चित्रकः। तत्र त्रीणि पयसा। त्रिफला घृतादिभिः।

प्रसक्तवेगेषु हितं मुखनासावरोधनम्॥ १०४॥

पिबेद्वा मानुषीक्षीरं तेन दद्याच्च नावनम्।

मृणालबिसकृष्णा वा लिह्यात्क्षौद्रेण साभयाः॥ १०५॥

दुरालभां वा मुस्तं वा शीतेन सलिलेन वा।

पिबेन्मरिचकोलास्थिमज्जोशीराहिकेसरम्॥ १०६॥

धात्रीफलरसे सिद्धं पथ्याक्काथेन वा घृतम्।

स० -प्रसक्तवेगेषु मदादिषु मुखस्य नासायाश्च पाण्यादिनाऽवरोधनं हितम्। मानुष्या वा क्षीरं पिबेत्। तेन च मानुषीक्षीरेण, नस्यं दद्यात्। मृणालादीन् सहरीतकीन् माक्षिकेण वा लिह्यात्। अतवा धन्वयवासं मुस्तं वा मधुना लिह्यात्। अथवा शीतेन जलेन मरिचादीन् पिबेत्। अहिकेसरं-नागकेसरम्। अथवा, आमलकरसे सिद्धं घृतं हरीत कीक्काथेन वा सिद्धं पिबेत्।

आ० र० - प्रसक्तवेगेषु विशेषमाह-प्रसक्तवेगेष्विति। मरिचादिचतुष्कं शीतोदकेन पिबेत्। वङ्गसेने (मूर्च्छाधिकारे श्लो. ३२)-"महौषधामृताक्षुद्रापौष्करग्रन्थिकोद्भवम्। पिबेत्कणायुतं क्काथं मूर्च्छासु स मदेषु च॥ स्विन्नमामलकं पिष्ट्वा द्राक्षया सह संसृजन्। विश्वभेषजसंयुक्तं मधुना सह लेहयेत्। तेनास्य शाम्यते मूर्च्छा कासः श्वासस्तथैव च॥ पञ्चमूलीकषायं च मधुना सितयाऽपि वा। यथास्वं च ज्वरघ्नानि कशायाणि प्रयोजयेत्॥ रक्तजायां तु मूर्च्छायां हितः शीतक्रियाविधिः। मद्यजायां पिबेन्मद्यं निद्रां सेवेत वा सुखम्॥ त्रिफलायाः प्रयोगो वा प्रयोगः पयसोऽपि वा। रसायनानां कौम्भस्य सर्पिषो वा प्रशस्यते॥ अञ्जनान्यवपीडाश्च धूमाः प्रधमनानि च। पिबेद्दुरालभाक्काथं सघृतं भ्रमशान्तये॥ कृष्णाशताह्वाशुण्ठीनां प्रत्येकं तु पलं पलम्। गुडात्पलानि चत्वारि गुटिकां भ्रमनाशिनीम्॥ कृष्णाशताह्वाशुण्ठीनामभयानां पलं पलम्। गुडस्य षट्पलान्येषा गुटिका भ्रमनाशिनी॥' इति। योगरत्ने-"मधुना हन्त्युपयुक्ता

त्रिफला रात्रौ गुडार्द्रकं प्रातः। सप्ताहात्पथ्यभुजो मदमूर्च्छा[कास]कामलोन्मादान्॥ शीतेन तोयेन पिबेन्मृणालं क्षौद्रेण कृष्णां सितया च पथ्याम्।" इति।

कुर्यात्क्रियां यथोक्तां च यथादोषबलोदयम्॥१०७॥

स० -यथोक्तां च क्रियां दोषबलोदयानुसारेण कुर्यात्।

आ० र० - विशेषचिकित्सामाह-कुर्यात्क्रियामिति। सामान्यशक्तिं विचार्य विशेषं प्रयुञ्जीत।

पञ्चकर्माणि चेष्टानि सेचनं शोणितस्य च।

स० -पञ्चकर्माणी-वमनविरेकास्थापनाव्वाससननस्याख्यानि, चेष्टानि रक्तमोक्षश्च।

आ० र० - शोधनमाह-पञ्चकर्माणि चेति।

सत्त्वस्यालम्बनं ज्ञानमगृद्धिर्विषयेषु च॥१०८॥

स० -सत्त्वस्यालम्बनं-आश्रयणम्। तथा, ज्ञानं-महाभूतेन्द्रियतन्मात्रमनो-बुध्यहङ्कारपुरुषादीनाम्। विषयेष्वगृद्धिः अनभिलाषः।

आ० र० - सत्त्वावजयमाह-सत्त्वस्यालम्बनमिति।

मदेष्वतिप्रवृद्धेषु मूर्च्छायेषु च योजयेत्।
तीक्ष्णं सन्न्यासविहितं।

स० -मदेषु मूर्च्छायेषु अतिप्रवृद्धेषु तीक्ष्णं नस्यादि सन्न्या सोक्तं योजयेत्।

आ० र० - अतिप्रवृद्धानामौषधमाह-मदेष्वतिप्रवृद्धेष्विति।

विषघ्नं विषजेषु च॥ १०९॥

इति मदमूर्च्छायचिकित्सितम्।

स० -तथा विषजेषु मदेषु विषघ्नं चिकित्सितं योजयेत्।

आ० र० - विषजानामौषधमाह-विषघ्नं विषजेषु चेति।

अथ सन्न्यासचिकित्सितम्।

आशु प्रयोज्यं सन्न्यासे सुतीक्ष्णं नस्यमञ्जनम्।

धूमः प्रधमनं तोदः सूचीभिश्च नखान्तरे॥ ११०॥

केशानां लुञ्चनं दाहो दंशो दशनवृश्चिकैः।

कट्वम्लगालनं वक्रे कपिकच्छ्ववघर्षणम्॥ १११॥

उत्थितो लब्धसंज्ञश्च लशुनस्वरसं पिबेत्।

खादेत्सव्योषलवणं बीजपूरककेसरम्॥ ११२॥

लघ्वन्नप्रति तीक्ष्णोष्णमद्यात्स्रोतोविशुद्धये।

स० -सन्न्यासे शीघ्रं सुष्ठु नस्यमञ्जनं धूमः प्रधमनं च प्रयोज्यम्। सूचीतोदादिकं च नखमध्ये। तथा, वक्रे कटूनां मरीचादीनां, अम्लानां-मातुलुङ्गादीनां, च गालनं प्रयोज्यम्। तथा। कपिकच्छ्ववघर्षणम्। एवमुपक्रान्तः समुत्थितो लब्धचेतनश्च सन् लशुनस्वरसं पिबेत्। तथा, बीजपूरककेसरं सव्योषलवणं भक्षयेत्। स्रोतोविशोधनार्थं लघ्वन्नप्रति भुञ्जीत। कीदृशम्? तीक्ष्णोष्णम्। लघ्वन्नप्रतीति अल्पलघ्वन्नम्। "सुप्प्रतिना मात्रार्थे" इति समासः।

आ० र० - सन्नयासस्यौषधमाह-आशु प्रयोज्यमिति।

विस्मापनैः संस्मरणैः प्रियश्रवणदर्शनैः॥ ११३॥

पटुभिर्गीतवादित्रशब्दैर्व्यायामशीलनैः।

स्रंसनोल्लेखनैर्धूमैः शोणितस्यावसेचनैः॥ ११४॥

उपाचरेत्तं प्रततमनुबन्धभयात्पुनः।

तस्य संरक्षितव्यं च मनः प्रलयहेतुतः॥११५॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचिता-यामष्टाङ्गहृदयसईहितायां चतुर्थे चिकित्सित-स्थाने मदात्ययादिचिकित्सितं नामसप्तमोऽध्यायः॥७॥

स० -तं-मदादिमन्तं, उपाचरेत्। कैः ? संस्मरणैः। विस्मापनैः-विस्मयकारिभिः। विपूर्वात् स्मिङो णिचि "नित्यं स्मयतेः" इत्यात्वे पुकि ल्युटि च विस्मापनैरिति रूपम्। तथा, प्रियस्य श्रवणेन दर्शनेन च गीतवादित्रशब्दैः पटुभिः-मनोहरैः। तथा, व्यायामशीलनैः। तथा वमनविरेचनाभ्यां धूमेन शोणितस्रावेण चानुबन्धभयाच्च कारणात् तस्य-आतुरस्य, प्रलेयहेतुतो मनः सम्यग्रक्षितव्यं-तत इदं कार्यमिति।

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टाङ्गहृदयटी-कायां सर्वाङ्गसुन्दराख्यायां चतुर्थे चिकित्सितस्थाने मदा-त्ययादिचिकित्सितं नाम सप्तमोऽध्यायः समाप्तः॥७॥

इति हेमाद्रिटीकायामायुर्वेदरसायने।

मदमूर्च्छायसत्र्यासाः सामस्त्येन निरूपिताः॥७॥

****

अष्टमोऽध्यायः।

अस्मादनन्तरमर्शश्चिकित्सितमारभ्यते। सम्बन्धश्चास्य निदान एवोक्तः।

अथतोऽर्शसां चिकित्सितं व्याख्यास्यामः।

इति ह स्माहुरात्रेयादयो महर्षयः।

(गद्यसूत्रे॥२॥)

काले साधारणे व्याभ्रे नातिदुर्बलमर्शसम्।
विशुद्धकोष्ठं लघ्वल्पमनुलोमनमाशितम्॥१॥
शुचि कृतस्वस्त्ययनं मुक्तविण्मूत्रमव्यथम्।
शयने फलके वाऽन्यनरोत्सङ्गे व्यपाश्रितम्॥२॥
पूर्वेण कायेनोत्तानं प्रत्यादित्यगुदं समम्।
समुन्नतकटीदेशमथ यन्त्रणवाससा॥३॥
सक्थ्नोः शिरोधरायां च परिक्षिप्तमृजु स्थितम्।
आलम्बितं परिचरैः सर्पिषाऽभ्यक्तपायवे॥४॥
ततोऽस्मै सर्पिषाऽयक्तं निदध्यादृजु यन्त्रकम्।
शनैरनुसुखं पायौ, ततो दृष्ट्वा प्रवाहणात्॥५॥
यन्त्रे प्रविष्टं दुर्नाम स्रोतगुण्ठितयाऽनु च।
शलाकयोत्पीड्य भिषक् यथोक्तविधिना दहेत्॥६॥
क्षारेणैवार्द्रमितरत्क्षारेण ज्वलनेन वा।
महद्वा वलिनश्छत्त्वा वीतयन्त्रमथातुरम्॥७॥
स्वभ्यक्तपायुजघनमवगाहे निधापयेत्।
निर्वातमन्दिरस्थस्य ततोऽस्याचारमदिशेत्॥८॥

एकैकमिति सप्ताहात्सप्ताहात्समुपाचरेत्।

स०-साधारणे-शरद्वसन्तादिके काले, तथा व्यभ्रे-विगताब्दे। तथा नातिदुर्बलमर्शसं-अपि तु किञ्चित्सप्राणम्। अत्र योग्यपरत्वात् कृत्वेत्यध्याहृत्य सम्बन्धः कार्यः। तथा विशुद्धकोष्ठादिकं कृत्वा ततोऽस्मै-अर्शसाय, यन्त्रं निदध्यादिति। सङ्ग्रहे चोक्तम् (चि.अ.१०)-"अथ खलु बलवन्तमर्शोभिरुपद्रुतं यथार्हस्नेहोपस्निग्धस्विन्नमनिलवेदनावृद्धिशमनार्थं स्निग्धमुष्णमल्पमन्नं द्रवप्रायं भुक्तवन्तं शुचि कृतस्वस्त्ययनं मुक्तविण्मूत्रमव्यथं समे शुचौ विविक्ते देशे साधारणेव्यभ्रे काले समे फलके शय्यायां वा प्रत्यादित्यगुदमन्यस्योत्सङ्गे निषण्णपूर्वकायमुत्तानमुन्नतकटीकं यन्त्रणशाटकेन परिक्षेप्तग्रीवासक्थिसन्धिदेशमलज्जार्हैराप्तपरिचारकैः सुपरिगृहीतं कृत्वा ततोऽस्मै घृताभ्यक्तं यन्त्रकं निध्यात्।" इति। अर्शसमिति अर्शांसि विद्यन्ते यस्येत्यर्थः, अर्शआदित्वादच्। किम्भूतम्? विशुद्धो-वमनविरेचनादिना, कोष्ठो यस्य तम्। तथा, अन्नमाशितं कृत्वा। किम्भूतम्? लघु-स्वभावात्, अल्पं चमात्रया। तथा, अनुलोमनं-वातवर्चसां प्रायेण प्रवर्तकम्। तथा, शुचिं-मृज्जलाभ्यां कृत्वा। तथा, कृतं स्वस्त्ययनं यस्य तम्। तथा, मुक्ते-विसृष्टे, विण्मूत्रे येन तम्। तथा, अत्यथंव्यथारहितमन्येन व्याधिनाऽपीडितम्। तथा, शयने व्यपाश्रितं-शय्यामाश्रित्य स्थितम्। अथवा, फलके-आसनविशेषे, व्यपाश्रितम्। अथवा, अन्यनरोत्सङ्गे व्यपाश्रितम्। उत्सङ्गविशेषात्स्थानकविशेषः। नरोत्सङ्गे व्यपाश्रितमित्येवं सिद्धेऽन्यग्रहणं वैद्यस्य निरासार्थम्। अन्योत्सङ्गे व्यपाश्रितमिति कथं कृत्वा? पूर्वेण कायेनोत्तानं कृत्वा-नाधरेण। तथा, प्रत्यादित्यगुदम्। प्रति-आभिमुख्येन, आदित्यं प्रत्यादित्यं गुदं यस्य तम्। यस्यां दिश्यादित्यो गतः तस्यां दिश्यर्शसेन सम्मुखं गुदं कृत्वा स्थातव्यमित्यर्थः, समं च। तथा, सम्यगुन्नतः कटिदेशोयस्य तम्। अथ-समुन्नतकटिदेशकरणादनन्तरं, अर्शसं सक्थ्योस्तथा शिरोधरायां परिक्षिप्तं-समन्तात्क्षिप्तमाक्रान्तं कृत्वा। केन? यन्त्रणवाससा। यन्त्रणार्थं वासः-कार्पासादिमयं, यन्त्रणवाससस्तेन। ऋजु-स्पष्टं कृत्वा, स्थितम्। तथा, तमातुरं परिचारकैरलम्बितं-निश्चलं कृत्वाऽवष्टभ्य सम्यक् स्थापितम्। ततः-अनन्तरं, अस्मै-दुर्नामवते, सर्पिषाऽभ्यक्तपायवे घृताभ्याक्तं यन्त्रकमृजु-अनुसुखं कृत्वा, शनैर्निर्दध्यात्-प्रणयेत्। ततः-अनन्तरं गुदप्रणिहितयन्त्रान्ते, प्रवाहणात्-प्रवाहणेनहेतुना, यन्त्रे प्रविष्टं दुर्नाम दृष्ट्वा। अथ(नु) [च]-पश्चाच्च, शलाकया चैलखण्डप्रावृतदेहयोत्पीड्य-प्रकृतत्वाद्दुर्नाम ऊर्ध्वं पीडयित्वा। वैद्यो यथोक्तविधिना-सूत्रस्थानोदितेन, क्षारेणार्द्रमर्शो दहेत्। एवेत्यवधारणे। क्षारेणैव नाग्निना। इतरत्शुष्कं दुर्नाम, क्षारेण ज्वलनेन वा दहेत्।

यथोक्तविधिनेत्यत्रापि योज्यम्। महद्वेति। बहुदुर्नाम तु बलवतः पुंसः छित्त्वा वा शस्त्रेण क्षाराग्निभ्यां यथायोगं दहेत्। अथ-अनन्तरं, आतुरं वीतयन्त्रं विधाय स्वभ्यक्तपायुजघनमवगाहे निधापयेत्-तत्र निहितं विदध्यादित्यर्थः। ततः-अनन्तरं, अस्याचारं-"उष्णोदकोपचारी स्यात्" (ह.सू.अ. १६/२६) इत्यादिकं, आदिशेत्। एकैकं दुर्नाम इति-अनेन पूर्वोक्तेन प्रकारेण, सप्ताहात्समुपाचरेत्-न तुल्यकालं सर्वाणि।

अथैषां कर्मादिक्रमं दर्शयितुमाह-

प्राग्दक्षिणं ततो वाममर्शः पृष्टाग्रजं ततः॥९॥

बह्वर्शसः

स०-बह्वर्शसः प्राक्-पूर्वं, दक्षिणदेशस्थमर्श उपाचरेत्। अनन्तरं वामं, ततः पृष्टाग्रे जातमुपाचरेत्।

सुदग्धस्य स्याद्वायोरनुलोमता।

रुचिरन्नेऽग्निपटुता स्वास्थ्यं वर्णबलोदयः॥१०॥

स०-सुदग्धस्यार्शसो वातस्यानुलोमनं स्यात्। तथा, अन्नेऽभिलाषः, अग्नेः पाटवं तथा स्वास्थ्यं बलवर्णयोरुद्भूतिश्च।

बस्तिशूले त्वधो नाभेर्लेपयेच्छूलक्षणकल्कितैः।

वर्षाभूकुष्ठसुरभिमिशिलोहामराह्वयैः॥११॥

स०-बस्ति शूले सति पुनर्नाभेरधः वर्षाभ्वादिभिः सुपिष्टैर्लेपयेत्।

शकृन्मूत्रप्रतीघाते परिषेकावगाहयोः।

वरणालम्बुषैरण्डगोकण्टकपुनर्नवैः॥१२॥

सुषवीसुरभीभ्यां च क्वाथमुष्णं प्रयोजयेत्।

सस्नेहमथवा क्षीरं तैलं वा वातनाशनम्॥ १३॥

युञ्जीतान्नं शकृद्भेदि स्नेहान् वातघ्नदीपनान्।

स०-शकृतो मूत्रस्य च प्रतीघाते-विबन्धे सति, वरणादिभिः क्वाथं परिषेकावगाहयोरुष्णं सस्नेहं प्रयोजयेत्। अथवा, क्षीरं वातनाशनम्। बलातैलदिकं तैलं वा परिषेकावगाहयोः प्रयोजयेत्। अन्नं च यवादिकं शकृद्विबन्धघ्नं तथा स्नेहान् वातघ्नान् दीपनांश्च प्रयोजयेत्।

अथाप्रयोज्यदाहस्य निर्गतान् कफवातजान्॥ १४॥

सस्तम्भकण्डूरुक्शोफानभ्यज्य गुदकीलकान्।

बिल्वमूलाग्निकक्षारकुष्ठैः सिद्धेन सेचयेत्॥ १५॥

तैलेनाहिबिडालोष्त्रवराहवसयाऽथवा।

[कासीसं सैन्धवं रास्ना शुण्ठी कुष्ठं च लाङ्गली।

शिलाभ्रकाश्वमारं च जन्तुहृद्दन्तिचित्रकौ॥ १॥

हरितालं तथा स्वर्णक्षीरी तैश्च पचेत्समैः।

तैलं सुधार्कपयसी गवां मूत्रे चतुर्गुणे॥ २॥

एतदभ्यङ्गतोऽर्शांसि क्षारवत्पातयेद्द्रुतम्।

क्षारकर्मकरं ह्येतन्न च दूषयते वलिम्॥ ३॥]

स्वेदयेदनु पिण्डेन द्रवस्वेदेन वा पुनः॥ १६॥

सक्तूनां पिण्डिकाभिर्वा स्निग्धानां तैलसर्पिषा।

रास्नाया हपुषाया वा पिण्डैर्वा काष्ण्यगन्धिकैः॥ १७॥

स०-न प्रयोज्यो-निषिद्धो, दाहो यस्यासावप्रयोज्यदाहो,-दाहानर्हः, तस्य, निर्गतान्-बहिर्भूतान्, तथा कफवातजान् गुदकीलकान्-अर्शांसि, अभ्यज्य बिल्वादिसिद्धेन तैलेन

सेचयेत्। किम्भूतान्? सस्तम्भकण्डूरुक्शोफान्, एवंभूतान्-नान्यलक्षणान्। अथवा, बुझङ्गादिवसया सेचयेत्। अनुसेकाभ्यङ्गाभ्यां पश्चात्, पिण्डेन-पिण्डस्वेदेन, स्वेदयेत्। पिण्डस्वेदो मुनिनोक्तः। यथा (च. सू. अ. १४/२५)- "तिलमाषकुलत्थान्नघृततैलामिषौदनैः। पायसैः कृशरैर्मांसैः पिण्डस्वेदान् प्रयोजयेत्॥" इति योज्यम्। अथवा, द्रवस्वेदेन-स्वेदविध्युक्तेन, स्वेदयेत्। पुनः शब्दोऽत्र लौकिक्या उक्त्या प्रयुक्तः। यथा-"इदं सारमिदं पुनरसारम्" इति। पिण्डस्वेदेनाथवा सक्तूनां तैलसर्पिषा स्निग्धानां पिण्डिकाभिः स्वेदयेत्। अथवा, रास्नाया हपुषाया वा पिण्डैः काश्ण्र्यगन्धिकर्वा स्वेदयेत्। तैलसर्पिषा स्निग्धैरित्यत्रानुवर्तनीयम्। कृष्णगन्धाया इमे काष्ण्र्यगन्धिकास्तैः। अध्यात्मादित्वाठञ्।

अर्कमूलं शमीपत्रं नृकेशाः सर्पकञ्चुकम्।
मार्जारचर्म सर्पिश्च धूपनं हितमर्शसाम्॥ १८॥
तथाऽश्वगन्धा सुरसा बृहती पिप्पली घृतम्।

स०-अर्कमूलदि चर्मसर्पिरन्तं धूपनं हितम्। तथा, अश्वगन्धादिकं पृथगेव धूपनं हितम्।

धान्याम्लपिष्टैर्जीमूतबीजैस्तज्जालकं मृदु॥ १९॥
लेपितं छायया शुष्कं वर्तिर्गुदजशातनी।

स०-काञ्जिकेन पिष्टैर्जीमूतस्य-इक्ष्वाकोः, बीजैस्तथा तस्य जीमूतफलस्य, जालकं तज्जालकं-जालकाकरं(रः)फलवहिर्भागो, मृदु-अकर्कशं, लेपितं छायाशुष्कमित्येषा वर्तिर्गुदजशातनी।

सजालमूलजीमूतलेहे वा क्षारसंयुते॥ २०॥
गुञ्जासूरणकूष्माण्डबीजैर्वर्तिस्तथागुणा।

स०-सजालमूलजीमूतेन कृतो यो लेहस्तस्मिल्लेहे क्षारसंयुते कृते सति गुञ्जादिबीजैः कृत वर्तिस्तथागुणा-गुदजशातनी।

स्नुक्क्षीरार्द्रनिशालेपस्तथा, गोमूत्रकल्कितैः॥ २१॥
कृकवाकुशकृत्कृष्णानिशागुञ्जाफलैस्तथा।

स०-स्नुक्षीरेणार्द्रा-आर्द्रीकृता, निशा-हरिद्रा, तया लेपः स्नुक्क्षीरार्द्रनिशालेपः। तथा-पूर्वगुणः। गोमूत्रेण कल्कितैः-पिष्टैः, कुक्कुटशकृदादिभिर्लेपः पूर्वगुणः।

स्नुक्क्षीरपिष्टैः षड्ग्रन्थाहलिनीवारणास्थिभिः॥ २२॥
कुलीरशृङ्गिविजयाकुष्ठारुष्करतुत्थकैः।
शिग्रुमूलकजैर्बीजैः पत्रैरश्वघ्ननिम्बजैः॥ २३॥
पीलुमूलेन बिल्वेन हिङ्गुना च समन्वितैः।

स०-सुधाक्षीरपिष्टैः षड्ग्रन्थादिभिर्लेपो हितः। पीलम्लेन बिल्वेन हिङ्गुना च युक्तैर्लेपो हितः।

कुष्ठं शिरीषबीजानि पिप्पल्यः सैन्धवं गुडः॥ २४॥
अर्कक्षीरं सुधाक्षीरं त्रिफला च प्रलेपनम्।

स०-कुष्टदित्रिफलान्तं प्रलेपनं पूर्वगुणम्।

आर्कं पयः सुधाकाण्डम् कटुकालाबुपल्लवाः॥ २५॥
करञ्जो बस्तमूत्रं च लेपनं श्रेष्ठमर्शसाम्।

सं-अर्कक्षीरादिबस्तमूत्रान्तं प्रलेपनमर्शसां श्रेष्ठं स्यात्।

आनुवासनिकैर्लेपः पिप्पल्याद्यैश्च पूजितः॥२६॥

स०-आनुवासनिकैरिति अनुवासने भवान्यनुवासनिकानि, अध्यात्मादित्वात् ठञ्। तैर्द्रव्यैः "पिप्पलीं मदनं" (श्लो ८९) इत्यादिभिर्वक्ष्यमाणैर्लेपोऽर्शःसु पूजितः।

एभिरेवौषधैः कुर्यात्तैलान्यभ्यञ्जनाय च।

स०-एभिरेव पूर्वोक्तैर्लेपनद्रव्यैरभ्यञ्जनानि तैलानि च कुर्यात्।

धूपनालेपनाभ्यङ्गैः प्रस्रवन्ति गुदाङ्कराः॥२७॥
सञ्चितं दुष्टरुधिरं, ततः सम्पद्यते सुखी।

स०-धूपनादिभिर्गुदाङ्कराः सञ्चितं दुष्टं रुधिरं प्रस्रवन्ति। ततः-तेन स्रुतेन, सुखी रुजाविरहात् सम्पद्यते।

अवर्तमानमुच्छ्रूनकठिनेभ्यो हरेदसृक्॥२८॥
अर्शोभ्यो जलजाशस्त्रसूचीकूर्चैः पुनः पुनः।

स०-अर्शोभ्य उच्छ्रूनकठिनेभ्यो रुधिरमवर्तमानं जलौकशस्त्रादिभिरसकृद्धरेत्।

शीतोष्णादिरुपक्रमः कस्मादत्र न क्रियते ? इत्याह -

शीष्णस्निग्धरूक्षैर्हि न व्याधिरुपशाम्यति॥ २९॥

रक्ते दुष्टे भिषक् तस्माद्रक्तमेवावसेचयेत्।

स०-यस्मात् शीतादिभिरुपक्रमैरुपक्रान्तोऽर्शोव्याधिर्न शाम्यति रक्ते दुष्टे सति, तस्माद्धेतो रक्तमेवावसेचयेत्-न तु शीतादिर्योज्यः।

यो जातो गोरसः क्षीराद्वह्निचूर्णावचूर्णितात्॥ ३०॥

पिबंस्तमेव तेनैव भुञ्जानो गुदजान् जयेत्।

स०-यो गोरसः क्षीराज्जातः-उत्पन्नः। किम्भुतात् ? वह्निचूर्णावचूर्णितात्-चित्रकचूर्णावकीर्णात्। तमेव-गोरसं, पिबन्नरस्तेनैव च-गोरसेन, भुञ्जानो गुदजान् जयेत्। 'बहुमूलावचूर्णितात्' इति क्व(के)चित् पठन्ति। बहुमूला-शतावरी।

कोविदारस्य मूलानां मथितेन रजः पिबन्॥ ३१॥

अश्नन् जीर्णे च पथ्यानि मुच्यते हतनामभिः।

स०-कोविदारमूलचूर्णं मथितेन पिबन् जीर्णे च तस्मिन् पथ्यान्यश्नन् दुर्नामभिर्मुच्यते-नश्यन्ति तान्यस्येत्यर्थः।

गुदभ्रंशयथुशूलार्थो मन्दाग्निर्गौल्मिकान् पिबेत्॥ ३२॥

हिङ्वादीननुतक्रं वा खादेद्गुडहरीतकीम्।

तक्रेण वा पिबेत्पथ्यावेल्लाग्निकुटजत्वचः॥ ३३॥

कलिङ्गमगधाज्योतिःसूरणान् वांऽशवर्धितान्।

कोष्णाम्बुना वा त्रिपटुव्योषहिङ्गुप्लवेतसम्॥ ३४॥

स०-गुदे श्वयथुशूलार्थो मन्दाग्निर्नरो गौल्मिकान्-गुल्मचिकित्साभवान्, हिङ्वादीन् चूर्णान् (हृ. चि. अ. १४।३९) पिबेत्। इह द्रवानिर्देशादनन्तरं च मथितशब्दश्रवणात् अर्शोविकारे च हिङ्वादीन् चूर्णान् तक्रेण वा पिबेदिति योज्यम्। अनुतक्रं वा-तकनुपानात्, गुडहरीतकीं भक्षयेत्। अथवा, पथ्यादींस्तक्रेण पिबेत्। अथवा, कलिङ्गादीन् अंशवर्धितान् मूलद्रव्यापेक्षया भागेन यथोत्तरं वर्धितान्, तक्रेण पिबेत्। ज्योतिः-चित्रकः। अथवा, उष्णजलेन त्रिपद्वादि पिबेत्।

युक्तं बिल्वकपित्थाभ्यां महौषधबिडेन वा।

अरुष्करैर्यवान्या वा प्रदद्यात्तक्रतर्पणम्॥ ३५॥

दद्याद्वा हपुषाहिङ्गुचित्रकं तक्रसंयुतम्।

मासं तक्रानुपानानि खादेत्पीलुफलानि वा॥ ३६॥

पिबेदहरहस्तक्रं निरन्नो वा प्रकामतः।

स०-तक्रेण तर्पणं-यवसक्तून्, दद्यात्। किम्भूतम्? बिल्वकपित्थाभ्यां युक्तमथवा महौषधबिडेन युक्तं भल्लातकैर्वा युक्तमथवा यवान्या वा युक्तं प्रदद्यात्। तक्रतर्पणमेव बिल्वादिभिर्यथोक्तैः सह भुञ्जीत। नान्यत्किञ्चिदिति सूचयितुं प्रशब्दोऽत्र न्यस्तः। अथवा, हपुषादिकं तक्रान्वितं दद्यात्। मासं पीलुफलानि तक्रानुपानानि वा खादेत्। अथवा, इच्छयाऽहरहरनन्नाशी तक्रं पिबेत्।

अत्यर्थं मन्दकायाग्नेस्तक्रमेवावचारयेत्॥ ३७॥

स०-अत्यर्थं मन्दकायाग्नेर्नरस्य सायं प्रातर्वा तक्रमेवावचारयेद्वैद्यो-नत्वन्नम्, अत एवैवकारोऽत्र निर्दिष्टः।

सप्ताहं वा दशाहं वा मासार्धं मासमेव वा।

बलकालविकारज्ञो भिषक् तक्रं प्रयोजयेत्॥ ३८॥

सायं वा लाजसक्तूनां दद्यात्तक्रावलेहिकाम्।

जीर्णे तक्रे प्रदद्याद्वा तक्रपेयां ससैन्धवम्॥३९॥

तक्रानुपानं सस्नेहं तक्रौदनमतः परम्।

यूशै रसैर्वा तक्राड्यैः शालीन् भुञ्जीत मात्रया॥४०॥

स०-सप्ताहं दशाहं मासार्धं मासं वा यावत् बलादिविद्वैद्यो मथितं योजयेत्। अथवा, केवलेन तक्रेणाशितुमशक्तस्तदा सायं-दिनान्ते, लाजसक्तूनां सम्बन्धिनीं तक्रावलेहिकां दद्यात्। अथवा, तक्रे जीर्णे तक्रसिद्धां पेयां सैन्धवान्वितां दद्यात्। सैन्धवशब्दस्यान्ते श्रुतत्वादुभयोरप्यवलेहिकापेययोः सैन्धवेनयोगो वेद्यः। अतः परं-अवलेहिकापेयातोऽनन्तरं, तक्रेण सहौदनमीषत्स्नेहं तक्रानुपनं दद्यात्। अथवा, यूषै रसैर्वा तक्रभूयिष्टैः शालीन् मात्रया भुञ्जीत। कार्ये भक्तादौ कारणत्वेनोपचारात् शालीन्-भक्तत्वेन परिणतान्, दद्यादिति वेद्यम्।

सर्वथाऽत्र तक्रप्रयोगः प्रायेण पूजित इत्यत एवाह-

रूक्षमर्धोद्धृतस्नेहं यतश्चानुद्धृतं घृतम्।

तक्रं दोषाग्निबलवित्रिविस्त्रिविधं तत्प्रयोजयेत्॥४१॥

स०-यथायोगं कदाचिद्रूक्षं-निःशेषमुद्धृतस्नेहं, अथवाऽर्धोद्धृतस्नेहं, कदाचिदनुद्धृतं यस्माद्धृतम्, कारणे नवनीते कार्योपचारादेवमुक्तम्, तत्-एतत्रिविधिं, तक्रं दोषादिवित् प्रयोजयेत्।

तक्रप्रयोगे कृते को गुणः ? इत्याह-

न विरोहन्ति गुदजाः पुनस्तक्रसमाहताः।

निषिक्तं तद्धि दहति भूमावपि तृणोलुपम्॥४२॥

स०-तक्रेण समाहताः-उन्मूलिताः, गुदजाः पुनर्न प्ररोहन्ति, समूला नश्यन्तीत्यर्थः। कथमेतदवगम्यते ? इत्याशङ्क्याह-हि-यस्मात्, तत्-तक्रं, भूमावपि निषिक्तं तृणोलुपं विशेषेण दहत्यपुनरुत्पादनात्। भूमावपीत्यपिशब्दो न केवलं शरीरे, बाह्यायामपि भुवीति सन्दर्शनार्थः। सृणोलुपं कठिनं यद्दहति तदवश्यमशर्सासि मृदूनि मांसप्रायाणि दहत्येव।

स्रोतःसु तक्रशुद्धेषु रसो धातूनुपैति यः।
तेन पुष्टिर्बलं वर्णः परं तुष्टिश्च जायते॥४३॥
वातश्लेष्मविकाराणां शतं च विनिवर्तते।

स०-वातश्लेष्मावृतेषु स्रोतःसु तक्रेण शुद्धेषु सत्सु यो रसः-आहाररसो, धातून् उपैति-सम्प्राप्नोति, तेन-रसेन प्राप्तेन, पुष्ट्यादयो जायन्ते। तथा, वातश्लेष्मविकाराणां शतं विनिवर्तते-शाम्यति।

मथितं भाजने क्षुद्रबृहतीफललेपिते॥४४॥
निशां पर्युषितं पेयमिच्छद्भिर्गुदजक्षयम्।

स०-कण्टकारिकाफललेपिते भाजने मथितं निशां स्थित गुदजक्षयमिच्छुभिः पेयम्।

धान्योपकुञ्चिकाजाजीहपुषापिप्पलीद्वयैः॥४५॥
कारवीग्रन्थिकशठीयवान्यग्नियवानकैः।
चूर्णितैर्घृतपात्रस्थं नात्यम्लं तक्रमासुतम्॥४६॥
तक्रारिष्टं पिबेज्जातं व्यक्ताम्लकटु कामितः।
दीपनं रोचनं वर्ण्यं कफवातानुलोमनम्॥४७॥
गुदश्वयथुकण्डूर्तिनाशनं बलवर्धनम्।

स०-धान्योपकुञ्चिकादिभिश्चूर्णितैर्घृतपात्रस्थं नात्यम्लं तक्रमासुतं कृत्वाऽनन्तरं व्यक्तावम्लकटू यस्य तद् व्यक्ताम्लकटु, जातं सत्तक्रारिष्टं कामतः पिबेत्। तच्च पीतं दीपनादिगुणं स्यात्। अत्र च तक्रे पलशतमात्रे धान्यकादीनि पालिकानि देयानीति वृद्धवैद्यव्यवहारः।

त्वचं चित्रकमूलस्य पिष्ट्वा कुम्भं प्रलेपयेत्॥४८॥

तक्रं वा दधि वा तत्र जातमर्शोहरं पिबेत्।

स०-चित्रकमूलस्य त्वचं जलेन पिष्ट्वा कुम्भं प्रलेपयेत्। तक्रं तत्र जातमथवा दधि जातमर्शोहरं पिबेत्।

भार्ग्यास्फोतामृतापञ्चकोलेष्वप्येष संविधिः॥४९॥

स०-भर्ग्यादिष्वप्येष संविधिः-एतत्त्वगादिभाजनलेपनादिकं कार्यमित्यर्थः।

पिष्टैर्गजकणापाठाकारवीपञ्चकोलकैः।

तुम्बर्वजाजीधनिकाबिल्वमध्यैश्च कल्पयेत्॥५०॥

फलाम्लान् यमकस्नेहान् पेयायूषरसादिकान्।

एभिरेवौषधैः साध्यं वारि सर्पिश्च दीपनम्॥५१॥

स०-हस्तिपिप्पल्यादिभिः पिष्टैः-कल्कितैः, तथा फलः-बीजपूरादिभिः, अम्लान् यमकस्नेहांस्तथा पेयादिकान् कुर्यात्। एभिरेव-हस्तिपिप्पल्यादिभिः, वारि साध्यं-श्रपणीयम्, सर्पिश्च साध्यम्, तच्च द्वयं वह्नेर्दीपनं स्यात्।

क्रमोऽयं भिन्नशकृतां

स०-अयं-पूर्वोक्तः, क्रमो भिन्नशकृताम्।

वक्ष्यते गाढवर्चसाम्।

स०-कठिनपुरीषाणां तु वक्ष्यते-भणिष्यते।

तमेवाह-

स्नेहाड्यैः सक्तुभिर्युक्तां लवणां वारुणीं पिबेत्॥५२॥

लवणा एव वा तक्रसीधुधान्याम्लवारुणीः।

स०-स्नेहाड्यैः-बहुस्नेहसम्पृक्तैः, सक्तुभिर्युक्तां लवणां वारुणीं पिबेत्। तक्रादीन् वा लवणान् पृथक् पृथक् यथायोगं पिबेत्। एवशब्दोऽत्र केवलानेवैतान् सक्तुरहितान् पिबेदिति द्योतयति।

प्राग्भक्तान् यमके भृष्टान् सक्तुभिश्चावचूर्णितान्॥५३॥

करञ्जपल्लवान् खादेद्वातवर्चोनुलोमनान्।

स०-तथा, करञ्जपल्लवान् भक्षयेत्। किम्भूतान्? प्राग्भक्तान्, -भक्तात् प्राक्, मयूरव्यंसकादित्वात्समासः, करञ्जपल्लवान् भुक्तव्यमित्यर्थः। किम्भूतान्? यमकेस्नेहद्वये, भृष्टान्-पक्कान्, तथा सक्तुभिः सुष्ठु चूर्णितान् तांश्च भुक्त्वा वातवर्चोनुलोमनान्।

सगुडं नागरं पाठां गुडक्षारघृतानि वा॥५४॥

गोमूत्राध्युषितामद्यात्सगुडां वा हरीतकीम्।

स०-तथा, गुडेन सह शुण्ठीं पाठां वाऽश्नीयात्। अथवा, गुडयवक्षारसर्पीष्यद्यात्। गुडेन वा सह हरीतकीमद्यात्। किम्भूताम्? गोमूत्रेऽध्युषिताम्।

पथ्याशतद्वयान्मूत्रद्रोणेनामूत्रसङ्क्षात्॥५५॥

पक्वात् खादेत्समधुनी द्वे द्वे हन्ति कफोद्भवान्।

दुर्नामकुष्ठश्वयथुगुल्ममेहोदरकृमीन्॥५६॥

ग्रन्थ्यर्बुदापचीस्थौल्यपाण्डुरोगाड्यमारुतान्।

स०-पथ्यानां शतद्वयं पथ्याशतद्वयम्, तस्माद्गोमूत्रद्रोणेन मूत्रसङ्क्षं यावत्-मूत्रक्षयावधि, पक्वात् द्वे द्वे-पथ्याख्ये फले, खादेत्। किम्भूते? समधुनी-माक्षिकयुक्ते। पथ्याशतद्वयं चोपयुक्तं कफोद्वानामयान् दुर्नामादीन् हन्ति।

अजशृङ्गीजटाकल्कमजामूत्रेण यः पिबेत्॥५७॥

गुडवार्ताकभुक् तस्य नश्यन्त्याशु गुदाङ्कुराः।

स०-अजशृङ्गीमूलकल्कं यः पुरुषोऽजमूत्रेण पिबेत्। किम्भूतः? गुडवार्ताकभुक्-एतदाहारः, तस्य-पुरुषस्य, द्राक् दुर्नामानि नश्यन्ति।

श्रेष्ठारसेन त्रिवृतां पथ्यां तक्रेण वा सह॥५८॥

पथ्यां वा पिप्पलीयुक्तां घृतभृष्टां गुडान्विताम्।

अथवा सत्रिवृद्दन्तीं भक्षयेदनुलोमनीम्॥५९॥

हते गुदाश्रये दोषे गुदजा यान्ति सङ्क्षम्।

स०-श्रेष्ठारसेन-त्रिफलाक्काथेन, त्रिवृतामद्यात्। अभयां वा तक्रेण सहाद्यात्। पथ्यां वा पिप्पलीयुक्तां घृतभृष्टां गुडयुक्तां भुञ्जीत। अथवा पथ्यां त्रिवृद्दन्तीभ्यां सहानुलोमकृतां भक्षयेत्। गुदाश्रये दोषे हते सति गुदजाः सङ्क्षयं य़ान्ति, आश्रयाभाव आश्रितानुपपत्तेः। तस्मदनुलोमनमर्शःसु हितमित्यर्थः।

दाडिमस्वरसाजाजीयवानीगुडनागरैः॥६०॥

पाठया वा युतं तक्रं वातवर्चोनुलोमनम्।

सिधुं वा गौडमथवा सचित्रकमहौषधम्॥६१॥

पिबेत्सुरां वा हपुषापाठासौवर्चलान्विताम्।

स०-दाडिमादिभिर्युक्तं तक्रं पाठया वातवर्चोनुलोमनं स्याट्। अथवा, सीधुं चित्रकशुण्ठीयुतं पिबेत्। गौडं वा चित्रकशुण्ठीयुतं पिबेत्। अथवा, सुरां हपुषादियुक्तां पिबेत्।

दशादिदशकैर्वृद्धाः पिप्पलीर्द्विपिचुं तिलान्॥६२॥

पीत्वा क्षीरेण लभते बलं देहहुताशयोः।

स०-दशादिदशकैर्वृद्धाः पिप्पलीस्तथा तिलान् द्विपिचुं पीत्वा देहस्य वह्नेश्च बलं प्राप्नोति। दशपिप्पल्य आदि-प्रथमं दिनं, येषां दशकानां त एवम्। दशदयश्च ते दशकाश्च दशादिदशकाः, तैर्वृद्धाः। प्रथमे दिने दशपिप्पलीस्तिलकर्षद्वयं च क्षीरेण पेयाः, अनन्तरं प्रतिदिनं दशदश पिप्पलीः पिप्पलीवर्धमान्यायेन वृद्धति(द्धास्ति)लकर्षद्वयेन सह क्षीरेण पीत्वा देहस्याग्नेश्च बलं लभते। अत्र कालस्यानिर्दिष्टत्वादेहाग्नयोर्बलमिच्छता यथेष्टकालः प्रयोगः कार्यः। क्षीरस्य चात्र प्रमाणानुक्तेः सामान्यपरिभाषया "पेष्यस्य कर्षमालोड्यं तद्द्रवस्य पलत्रये।" (ह्.क.अ.६११३) इति परिमाणं कल्प्यम्।

दुःस्पर्शकेन बिल्वेन यवान्या नागरेण वा॥६३॥

एकैकेनापि संयुक्ता पाठा हन्त्यर्शसां रुजम्।

स०-धन्वयवासकेन बिल्वेन यवान्या शुण्ठ्या वैकैकेनाप्येवं पाठा युक्ता दुर्नाम्नां रुजं हन्ति। एकैकेनापीत्यपिशब्दात् द्वाभ्यां त्रिभिश्चतुर्भिश्च। एकैकेनेत्येकशब्दस्य "एकं बहुव्रीहिवत्" इति द्वित्वबहुव्रीहिवद्भावात्सुपो लुक्।

सलिलस्य वहे पत्त्वा प्रस्थार्धमभयात्वचाम्॥ ६४॥

प्रस्थं धात्र्या दशपलं कपित्थानां ततोऽर्धतः।

विशालां रोध्नमरिचकृष्णावेल्लैलवालुकम्॥ ६५॥

द्विपलांशं पृथक्पादशेषे पूते गुडात्तुले।

दत्त्वा प्रस्थं च धातक्याः स्थापयेद्घृतभाजने॥ ६६॥

पक्षात्स शीलितोऽरिष्टः करोत्यग्निं, निहन्ति च।

गुदजग्रहणीपाण्डुकुष्ठोदरगरज्वरान्॥ ६७॥

श्वयथुप्लीहहृद्रोगगुल्मयक्ष्मवमिकृमीन्।

स०-सलिलस्य वहे-द्रोणचतुष्टये, पत्त्वा हरीतकीत्वचां प्रस्थार्ध-आष्टपलानि, आमलकदलानां प्रस्थं, कपित्थस्य पलानिदश, ततः-कपित्थात्, अर्धेन विशालं पञ्चपलां, रोध्राधिकं द्विपलांशं पृथक्पृथगेतत्सर्वं पत्त्वा तस्मिन् पादशेषे-द्रोणशेषे, पूते गालिते चास्मिन् गुडात्तुले द्वे दत्त्वा धातक्याः प्रस्थं च ततो घृतरूढे भाजने स्थापयेत्। पक्षादूर्ध्वं शीलितः सः-अभयारिष्टसंज्ञः, अग्निं करोति-दीपयति, गुदजादींश्च हन्ति।

जलद्रोणे पचेद्दन्तीदशमूलवराग्निकान्॥ ६८॥

पालिकान् पादशेषे तु क्षिपेद्गुडतुलां परम्।

पूर्ववत्सर्वमस्य स्यादनुलोमितरस्त्वयम्॥ ६९॥

स०-जलस्य द्रोणे दन्त्यादीन् प्रत्येकं पालिकान् पचेत्। पादशेषे चास्मिन् गुडात्तुलां क्षिपेत्। परं-अन्यत्, सर्वमस्य-दन्त्यरिष्टस्य, पूर्ववत्-अभयारिष्टतुल्यं

धातकीपरिमाणघृतभाजनस्थापनपक्षोत्तरकालपानादि, स्यात्। आनुलोमीत्यादि। आनुलोमीवातविबन्धनुत् अभयारिष्टः। आयं पुनस्ततोऽप्यानुलोमितरः।

पचेहुरालभाप्रस्थं द्रोणेऽपां प्रासृतैः सह।

दन्तीपाठाग्निविजयावासामलकनागरैः॥७०॥

तस्मिन् सिताशतं दद्यात्पादस्थेऽन्यच्च पूर्ववत्।

लिम्पेत्कुम्भं तु फलिनीकृष्णाचव्याज्यमाक्षिकैः॥७१॥

स०-अपां द्रोणे धन्वयासप्रस्थं दन्त्यादिभिः द्विपलिकैः सह पचेत्। तस्मिन्-पादस्थे क्वाथे, सितायाः शतं क्षिपेत्। अन्यत्-धातकीपरिमाणादिकं, पूर्ववत्-अभयारिष्टवत्, कार्यम्। लिम्पेदित्यादि। तुर्विशेषे। विशेषस्तु फलिन्यादिभिः कुम्भं लिम्पेत्, यत्रायं निक्षिप्यते दुरालभारिष्ट इति।

प्राग्भक्तमानुलोम्याय फलाम्लं वा पिबेद्धृतम्।

चव्यचित्रकसिद्धं वा यवक्षारगुडान्वितम्॥७२॥

पिप्पलीमूलसिद्धं वा सगुडक्षारनागरम्।

स०-प्राग्भक्तं-भक्तात् पूर्वं, घृतं फलैः-मातुलुङ्गादिभिरनुलोमनप्रायैः, अम्लं तैः पक्वं पिबेत्। चव्यचित्रकाभ्यां सिद्धं पक्वं यवक्षारगुडाभ्यां युक्तं घृतं पिबेत्। अथवा, पिप्पलीमूलसिद्धं गुडयवक्षारनागरसहितं पिबेत्।

पिप्पलीपिप्पलीमूलधानकादाडिमैर्घृतम्॥७३॥

दध्ना च साधितं वातशकृन्मूत्रविबन्धनुत्।

स०-पिप्पल्यादिभिर्दधिसहितैः साधितं घृतं वातशकृन्मूत्रविबन्धजित्।

पलाशक्षारतोयेन त्रिगुणेन पचेद्घृतम्॥७४॥

वत्सकादिप्रतीवापमर्शोघ्नं दीपनं परम्।

स०-पलाशक्षारस्य जलेन त्रिगुणेन वत्सकादिप्रतीवापं घृतं पचेत्। तच्चार्शोघ्नं परं दीपनं च।

पञ्चकोलाभयाक्षारयवानीबिडसैन्धवैः॥७५॥

सपाठाधान्यमरिचैः सविल्वैर्दधिमद्धृतम्।

साधयेत् तज्जयत्याशु गुदवङ्क्षणवेदनाम्॥७६॥

प्रवाहिकां गुदभ्रंशं मूत्रकृच्छ्रं परिस्रवम्।

स०-पञ्चकोलादिभिर्दधिसहितं घृतं पचेत्। तच्च गुदादि वेदनादीन् जयति।

पाठाजमोदधनिकाश्वदंष्ट्रापञ्चकोलकैः॥७७॥

सविल्वैर्दध्नि चाङ्गेरीस्वरसे च चतुर्गुणे।

हन्त्याज्यं सिद्धमानाहं सूत्रकृच्छ्रं प्रवाहिकाम्॥७८॥

गुदभ्रंशार्तिगुदजग्रहणीगदमारुतान्।

स०-पाठादिभिश्चाङ्गेरीस्वरसे दध्नि च चतुर्गुणे घृतं पक्वं चाङ्गेरीघृतम्। एतदानाहादीन् हन्ति।

शिखितित्तिरिलावानां रसानह्यान् सुसंस्कृतान्॥

दक्षाणां वर्तकानां वा दद्याद्विड्वातसङ्ग्रहे।

स०-मयुरतित्तिर्यादीनां सुसम्स्कृतानह्लान् मांसरसान् विड्वातसङ्ग्रहनिवृत्त्यर्थं दद्यात्।

वस्तुकाग्निंत्रिवृद्दन्तीपाठाह्लीकादिपल्लवान्॥८०॥

अन्यच्च कफवातघ्नं शाकं च लघुमेदि च।

सहिङ्गं यमके भृष्टं सिद्धं दधिसरैः सह॥८१॥

दह्निकापञ्चकोलाभ्यां पिष्टाभ्यां दाडिमाम्बुना।

आद्रिकायाः किसलयैः शकलैराद्रकस्य च॥८२॥

युक्तमङ्गारधूपेन हृद्येन सुरभीकृतम्।

सजीरकं समरिचं बिडसौवर्चलोत्कटम्॥८३॥

वातोत्तरस्य रूक्षस्य मन्दाग्नेर्वद्धवर्चसः।

कल्पयेद्रक्तशाल्यन्नव्यञ्जनं शाकवद्रसान्॥८४॥

गोगोधाछगरोष्ट्राणां विशेषात्क्रव्यभोजिनाम्।

स०-वास्तुकादीनांशाकं तथाऽपरमपि शाकं यत्कफवातघ्नं कोशातकादिकं, लघु मेदि च। तच्च सहिङ्गु च तथा यमके भृष्टं-सन्तलितम्। तथा, दधिसरेण ढनिकापञ्चकोलाभ्यां पिष्टाभ्यां दाडिमाम्बुना च सिद्धम्। तथा, आर्द्रिकायाः-धनिकायाः, किसलयैः-पल्लवैः, युक्तम्। तथा, आर्द्रकस्य शकलैर्युक्तम्। तथा, हृद्येन-मनःप्रियेण, अङ्गारधूपेन-अङ्गारैर्यो धूपो हिङ्ग्वादिना प्रसिद्धस्तेन, सुरभीकृतम्। तथा, सजीरकं समरिचं बिडसौवर्चलललवणाभ्यामुत्कटं-अधिकं, वातोत्तरस्य पवन्फ़ाधिकस्य पुरुषस्य, तथा रूक्षस्य तथा मन्दाग्नेस्तथा वद्धवर्चसः कल्पयेत्। रक्तशालिभक्तस्य व्यञ्जनं-तेमनाख्यं, शाकवत्कल्पयेत्-शाकसंस्कारेण कुर्यादित्यर्थः। व्यञ्जनानिति पाठे पुंस्त्वं चिन्त्यम्। तथा, रसान्। केषां रसान्? गोगोधादीनाम्, विशेषेण क्रव्यभोजिनां-मांसभक्षिणाम्।

तदेवमाहारं निरुप्य पानं निरुपयन्नाह-

मदिरां शाकरं गौडं सीधुं तक्रं तुषोदकम्॥८५॥

अरिष्टं मस्तु पानीयं, पानीयं वाऽल्पकं श्रृतम्।

धान्येन धान्यशुण्ठीभ्यां कण्टकारिकयाऽथवा॥ ८६॥

अन्ते भक्तस्य मध्ये वा वातवर्चोनुलोमनम्।

स०-मदिरादि पानीयं-पातव्यम्। अथवा, पानीयं-जलं, अतिशयेनाल्पं-अल्पकं, श्रृतं यथायोगं कदाचिद्धान्येन कदाचिद्धान्यशुण्ठीभ्यां कदाचित्कण्टकारिकया श्रृतं कदचित्भक्तम्यान्ते कदाचिन्मध्ये, योग्यतावशाद्येषां मारुताविष्टदिरुपत्वं तेषां भक्तस्य मध्ये अन्येशान्मन्ते, मदिरादिपानं वातवर्चोनुलोमनम्,-तयोरप्रवर्तनोपारुढयार्यथामाग-प्रवर्तनमित्यर्थः। वातस्यानुलोमनं च यत्तत्कफपित्तयोरप्यनुलोमनम्। पवनो हि क्रियावानक्रियावतां देहगतानां भावानामनुलोमनः सम्भाव्यते। तथा च प्रागभ्यधायि (ह्.सू.अ. १९/८६)-"विश्लेष्मपित्तादिमलोच्यानां विक्षेपसंहारकरः स यस्मात्।" इत्यादि।

अर्शःसु चानुलोमनं कार्यमिति दर्शयितुमाह-

विड्वातकफपित्तानामानुलोम्ये हि निर्मले॥ ८७॥

गुदे शाम्यन्ति गुदजाः पावकश्चाभिवर्धते।

स०-यस्माद्विड्वातादीनामानुलोम्ये सति गुदं निर्मलं भवति। गुदे च निर्मले गुदजाः शाम्यन्ति। पावकः-कायाग्निश्च, अभिवर्धते यतस्तस्मादर्शसां विड्वातकफपित्तानुलोमनं भेषाजान्नपानादि यत्तद्देयमिति भावः।

उदावर्तपरीता ये ये चात्यर्थं विरूक्षिताः॥ ८८॥

विलोमवाताः शूलार्तास्तेष्विष्टमनुवासनम्।

स०-ये पुरुषा उदावर्तयुक्ता ये चातिशयेन विरुक्षितास्तथा विगुणपवनाः शूलपीडिताश्च तेष्वनुवासनमिष्टम्, तन्त्रकृतामिति शेषः।

तदेवानुवासनमाह-

पिप्पलीं मदनं बिल्वं शताह्वां मधुकं वचाम्॥८९।

कुष्ठं शठीं पुष्कराख्यं म्चित्रकं देवदारु च।

पिष्ट्वातैलं विपक्तव्यं द्विगुणक्षीरसंयुतम्॥९०॥

अर्शसां मूढवातानां तच्छ्रेष्ठमनुवासनम्।

गुदनिःसरणं शूलं मूत्रकृच्छ्रं प्रवाहिकाम्॥९१॥

कट्यूरुपृष्टदौर्वल्यमानाहं वङ्क्षणाश्रयम्।

पिच्छास्रावं गुदे शोफं वातवर्चोविनिग्रहम्॥९२॥

उत्थानं बहुशो यच्च जयेत्तच्चानुवासनात्।

स०-पिप्पल्यादीनि पिष्ट्वा जलेन तैलं द्विगुणक्षीरेण संयुक्तं पक्तव्यम्। जलस्यात्रानुक्तस्यापि चतुर्गुणोऽशः प्रकल्प्यः। एवं हि द्रव्याणि सम्यक् मुक्तरसानि स्युः। तन्त्रान्तरे चोक्तम् "स्नेहे सक्षीरमांसाद्यैः पाको यत्रेतिरः कचित्। जलं चतुर्गुणं तत्र बीजादानार्थमावपेत्॥ न मुञ्चति रसं द्रव्यं क्षीरादिभिरुपस्कृतम्। सम्यक्पाकोप् न जायेत तस्मात्तोय विनिक्षिपेत्॥" इति। तच्च-तैलं, विगुणपवनानामर्शसां श्रेष्ठं-हितम्। अनुवा सनाच्च तत्-तैलं, गुदनिःसारणादीन् जयेत्।

निरुहं वा प्रयुञ्जीत सक्षीरं पाञ्चमूलिकम्॥९३॥

समूत्रस्नेहलवणं कल्कैर्युक्तं फलादिभिः।

स०-अथवा निरुहं पाञ्चमूलिकं समानक्षीरं मूत्रस्नेहलवणान्वितं फलादिभिः-पूर्वोक्तैः, कल्कैर्युक्तं प्रयुञ्जीत। स च पूर्वोक्तगुणः। समानं क्षीरं यस्मिन् तत्सक्षीरम्। "समानस्य छन्दसि" इति योगविभागात् सभावः। सह मूत्रस्नेहलवणैर्वर्तते समूत्रस्नेहलवणस्तम्। "वोपसर्जनस्य" इति सभावः। सहशब्दश्चेषच्छब्दार्थः।

अर्शसां शुष्कार्द्रत्वेन द्वैविध्यम्। तत्र शुष्कार्शसां चिकित्सितमुक्त्वा, अधुना आर्द्राणां रक्तार्शसामाह-

अथ रक्तार्शसां वीक्ष्य मारुतस्य कफस्य वा॥१४॥

अनुबन्धं ततः स्निग्धं रूक्षं वा योजयेद्भिषम्।

स०-रक्तार्शसामधिकारे पित्तस्य सर्वदाऽव्यभिचारित्वाट् कदाचिन्मारुतानुबन्धं कदाचित्कफानुबन्धं स्वलिङ्गतो वीक्ष्य उपलभ्य, स्निग्धं रूक्षं वा पानान्नौषधं योजयेत्। एतच्चोभयमपि शीतं-न तूष्णम्, पित्तस्यात्र नित्यं सन्निहितत्वात्। वातानुबन्धं वीक्ष्य स्निग्धं, कफानुबन्धं वीक्ष्य रूक्षं, चिकित्सितं योज्यम्।

वातानुबन्धकफानुबन्धयोर्लक्षणमाह-

शकृच्छयावं खरं रूक्षमधो निर्याति नानिलः॥९५॥

कट्यूरुगुदशूलं च हेतुर्यदि च रूक्षणम्।

तत्रानुबन्धो वातस्य श्लेष्मणो यदि विट् श्लथा॥९६॥

श्वेता पीता गुरुःस्निग्धा, सपिच्छः स्तिमितो गुदः।

हेतुः स्निग्धगुरुर्विद्याद्यथास्वं चास्रलक्षणात्॥९७॥

स०-शकृच्छ्यावादिशूलपर्यन्तं लक्षणं यदा स्यात् तत्रानुबन्धो वातस्येत्यवबोध्यम्। हेतुर्यदि रूक्षणं-रूक्षणं चेद्धेतुरासेवितः शकृच्छ्यावादिलक्षणं चोत्पन्नं तदा वातानुबन्धत्वं ज्ञेयम्। तथैव विड्श्लथादिलक्षणं स्निग्धगुरुणा च सेवितेन हेतुना सहितं श्लेष्मणोऽनुबन्धस्यानुमापकम्। अस्रस्य लक्षणाच्च-सिराव्यधविध्युक्तात् "वाताच्छ्यावारुणं" (ह.सू.अ.३७/४०) इत्यादिकाच्च लक्षणात्, वातस्यानुबन्धं विद्यात्। "कफात् स्निग्धं" (ह.सू.अ. ३७/४१) इत्यादिकाल्लक्षणात् कफस्यानुबन्धं विद्यात्।

दुष्टेऽस्रे शोधनं कार्यं लङ्घनं च यथाबलम्।

स०-दुष्टे-वातादिदूषिते, अस्रे यथाबलं-बलानतिक्रमेण, कदाचिल्लङ्घनं शोधनं च कार्यम्। बहुदोषस्य शोधनं, इतरस्य लङ्घनं-उपवासलक्षणं, कार्यम्।

यावच्च दोषैः कालुष्यं स्रुतेस्तावदुपेक्षणम्॥९८॥

स०-यावच्च दोषेणास्रस्य कालुष्यं-अनैर्मल्यं सामदोषदुष्टत्वात्, तावत्स्रुतेः प्रकृतत्वादस्रस्योपेक्षणं कार्यम्,-तथाभूताया रक्तस्रुतेः सङ्ग्रहणाय यत्नो न कार्य इत्यर्थः।

दोषाणां पाचनर्थं च वह्निसन्धुक्षणाय च।
सङ्ग्रहाय च रक्तस्य परं तिक्तैरुपाचरेत्॥९९॥

स०-कालुष्यरहिताया रक्तस्रुतेः परं-अनन्तरं, दोषाणां सामानां पक्त्यर्थं तथा वह्नेः सन्धुक्षणाय तथा रक्तस्य सङ्ग्रहणार्थं तिक्तैः-तिक्तरसाघ्रातैद्रव्यैः, तमर्शसमुपाचरेत्, इति सामान्योपक्रमो रक्तार्शोविकारशान्त्यर्थमुपदिष्टः।

यत्तु प्रक्षीणदोषस्य रक्तं वातोल्बणस्य वा।
स्नेहैस्तत्साधयेद्युक्तैः पानाभ्यञ्जनबस्तिषु॥१००॥

स०-यत्पुनः प्रक्षीणदोषस्य निरामयस्य रक्तं स्रवेत्, वाताधिकस्य वा पुरुषस्य यद्रक्तं स्रवेत्, तत्स्नेहैः पानादियुक्तैः-दत्तैः, चिकित्सेत्।

यत्तु पित्तोल्बणं रक्तं घर्मकाले प्रवर्तते।
स्तम्भनीयं तदेकान्तान्न चेद्वातकफानुगम्॥१०१॥

स०-यत्पुनः पित्तोल्बणं रक्तं ग्रीष्मतौ प्रवर्तते तदेकान्तेन-अवश्यं, स्तम्भनीयं-नोपेक्षणीयम्, शीघ्रकारित्वात्। किं सर्वमेव घर्मतौ रक्तं स्तम्भनीयम्? नेत्याह-न चेद्वातकफानुगम्,-वातकफानुबद्धं तु लङ्घनादिभिरेव चिकित्सेत।

सकफेऽस्रे पिबेत्पाक्यं शुण्ठीकुटजवल्कम्।
किराततिक्तकं शुण्ठीं धन्वयासं कुचन्दनम्॥ १०२॥
दार्वीत्वङ्निम्बसेव्यानि त्वचं वा दाडिमोद्भवाम्।

स०-कफानुगते रक्ते शुण्ठीकुटजबल्कलं क्वथितं पिबेत्। किराततिक्तकादिना(कं) वा क्वथितं पिबेत्। अथवा, दाडिमजां त्वचं पिबेत्।

कुटजत्वक्फलं तार्क्ष्यं माक्षिकं घुणवल्लभाम्॥ १०३॥
पिबेत्तण्डुलतोयेन कल्कितं वा मयूरकम्।

स०-कुटजत्वचमिन्द्रयवान् रसाञ्जनादींश्च तण्डुलजलेन पिबेत्। घुणपिर्यां(वल्लभां)-अतिविषाम्। अथवा, तेनैव तण्डुलजलेन पिष्टमपामार्गं पिबेत्।

तुलां दिव्याम्भसि पचेदार्द्रायाः कुटजत्वचः॥ १०४॥
नीरसायां त्वचि क्वाथे दद्यात्सूक्ष्मरजीकृतान्।
समङ्गाफलिनीमोचरसान् मुष्ट्यंशकान्समान्॥ १०५॥
तैश्च शक्रयवान् पूते ततो दर्वीप्रलेपनम्।
पक्त्वाऽवलेहं लीढ्वा च तं यथाग्निवलं पिबेत्॥ १०६॥
पेयां मण्डं पयस्छागं गव्यं वा छागदुग्धभुक्।
लेहोऽयं शमयत्याशु रक्तातीसारपायुजान्॥ १०७॥
बलवद्रक्तपित्तं च स्रवदूर्ध्वमधोऽपि वा।

स०-कुटजत्वच आर्द्रायास्तुलां दिव्ये-आन्तरिक्षे जले, पचेत्। दिवि भवं दिव्यम्, दिगादित्वाद्यत्। एतच्च द्रव्यं सामान्यपरिभाषापरिमाणकल्पनयैव क्वाथसामान्यपरिमाणेन च क्वथितमेकत्वं प्राप्तमिति तदपवादार्थमाह-नीरसायामित्यादि। तावत्पचेद्यावदेषा कुटजस्य त्वक् नीरसा स्यात्। नीरसत्वं च प्रायेणाष्टांशशेषे क्वाथे भवति। तस्यां च नीरसायां सत्यां यत्परिमाणः क्वाथोऽवशिष्यते तस्मिन् क्वाथे श्लक्ष्णचूर्णीकृतान् समङ्गादीन् सुष्ठ्वंशकान्-पलपरिमाणान्, दद्यात्। तैश्च समङ्गादिभिः सर्वैः समानिन्द्रयवान् दद्यात्। ततः-अनन्तरं, पूतं,दर्वीप्रलेपनं पक्त्वा लीढ्वा च तं-अवलेहं, अनन्तरं यथाग्निबलंबलानुसारेण, पेयादिकं पिबेत्। किम्भूतः सन्? छागदुग्धभोजनः। अयं लेहो रक्तातीसारं रकार्शांसि च शमयति। रक्तपित्तं च प्रवृद्धमूर्ध्वमधो वा स्रवत् जयेत्।

कुटजत्वक् तुलां द्रोणे पचेदष्टांशशोषितम्॥ १०८॥

कल्कीकृत्य क्षिपेत्तत्र ताक्ष्यशैलं कटुत्रयम्।

रोध्रद्वयं मोचरसं बलां दाडिमजां त्वचम्॥ १०९॥

बिल्वकर्कटिकां मुस्तं समङ्गां धातकीफलम्।

पलोन्मितं दशपलं कुटजस्यैव च त्वचः॥ ११०॥

त्रिंशत्पलानि गुडतो घृतात्पूते च विंशतिः।

तत्पक्वं लेहतां यातं धान्ये पक्षस्थितं लिहन्॥ १११॥

सर्वार्शोग्रहणीदोषश्वासकासान्नियच्छति।

स०-वत्सकत्वक् तुलां जलद्रोणे पचेदष्टांशशेषितं यावच्च। तत्र-आष्टांशशेषिते क्वाथे पूते सति, कल्कयित्वा ताक्ष्यशैलादीन् पलप्रमाणान् क्षिपेत्। एवं त्रिकटूनि। बिल्वकर्कटिका लघूनि बिल्वफालानी। कुटजत्वचश्च दशपलानि। गुडपलानि त्रीम्शत्। घृतस्य पलानि विंशतिः। एतत्सर्वं लेहतां यातं पक्वं सत् धान्यराशिमध्ये मासार्धं स्थितं तं लिहन् सर्वानर्शःप्रमृतीन् जयेत्।

रोध्रं तिलान्मोचरसं समङ्गां चन्दनोत्पलम्॥ ११२॥

पाययित्वाऽऽजदुग्धेन शालींस्तेनैव भोजयेत्।

स०-रोध्रादिनजादुग्धेन पाययित्वाऽऽतुरं शालीस्तेनाजक्षीरेण भोजयेत्। एतच्चोपयुक्तं पूर्वगुणम्।

यष्ट्याह्वपद्मकानन्तापयस्याक्षीरमोरटम्॥ ११३॥

ससितामधु पातव्यं शीततोयेन तेन वा।

स०-यष्ट्याह्वादि सशर्करामाक्षिकं शीतजलेन तेनाजपयसा वा पातव्यम्। क्षीरमोरटा-मधुरस्त्रवा।

रोध्रकट्वङ्गकुटजसमङ्गाशाल्मलीत्वचम्॥ ११४॥

हिमकेसरयष्ट्याह्वसेव्यं वा तण्डुलाम्बुना।

स०-लोध्रादिकं तण्डुलाम्बुना रक्तार्शःसु पातव्यम्। अथवा, चन्दननागकेसरमधुकोशीरं तण्डुलाम्बसा पात्वयं पूर्वोक्तनुगुणम्।

यवानीन्द्रयवाः पाठा बिल्वं शुण्ठी रसाञ्जनम्॥ ११५॥

चूर्णश्चले हितः शूले प्रवृत्ते चाति शोणिते।

दुग्धिकाकण्टकारीभ्यां सिद्धं सर्पिः प्रशस्यते॥ ११६॥

अथवा धातकीरोधन्कुटजत्वक्फलोत्पलैः।

सकेसरैर्यवक्षारदाडिमस्वरसेन वा॥ ११७॥

स०-यवान्यादीनां चूर्णो जलेन पीतो वाते शूले प्रवृत्ते चातिशयेन रक्ते हितः। दुग्धिकाकण्टकारीभ्यां पक्वं सर्पिरस्मिन्विषये प्रशस्यते। अथवा, धातक्यादिभिः सिद्धं घृतं हितम्। यवक्षारदाडिमस्वरसेन वा सिद्धं घृतं हितम्।

शर्कराम्भोजकिञ्जिल्कसहितं सह वा तिलैः।
अभ्यस्तं रक्तगुदजान् नवनीतं नियच्छति॥ ११८॥

स०-शर्करापद्मकेसरसहितमभ्यस्तं-बहून्यहानि भुक्तं, नवनीतं रक्तार्शांसि शमयति। तिलैर्वा सहाभ्वस्तं नवनीतं रक्तार्शांसि शमयति।

छागानि नवनीताज्यक्षीरमांसानि, जाङ्गलः।
अनम्लो वा कदम्लो वा सवास्तुकरसो रसः॥ ११९॥
रक्तशालिः सरो दध्नः षष्टिकस्तरुणी सुरा।
तरुणश्च सुरामण्डः शोणितस्यौषधं परम्॥ १२०॥

स०-छागसम्बन्धीनि नवनीतादीन तथा जाङ्गलरसादीनि रक्तस्य परमौषधम्। जाङ्गलो वा रसः स-वास्तुकरसेन वर्तत इति सवास्तुकरसः, अनम्लः-अम्लरहितः, कदम्लः-ईषदम्लो वा, आम्यस्तो रक्तगुदजान्नियच्छति। रक्तशालिः-तज्जो भक्त इत्यर्थः। दध्नः सरो-दप्युत्तरः। षष्टिको व्रीहिः। तरुणी सञ्जातमधुरप्राया सुरा, [तरुणो सुरा]मण्डश्च। एतद्रक्तज्ञाल्यादि शोणितस्य परमौषधम्।

पेयायूषरसाद्येषु पलाण्डुः केवलोऽपि वा।
स जयत्युल्बणं रक्तं मारुतं च प्रयोजितः॥ १२१॥

स०-पेयादिषु प्रयोजितः पलाण्डुः, केवलो वा रक्तमत्युल्बणं वातं च जयति।

वातोल्बणानि प्रायेण भवन्त्यस्रेऽतिनिःसृते।

अर्शांसि तस्मादधिकं तज्जये यत्नमाचरेत्॥ १२२॥

स०-प्रायेणरक्तेऽतिस्रुते वाताधिकानि दुर्नामानि मतो भवन्ति, तस्माद्धेतोस्तज्जये-पवनये, यत्नं कुर्यात्।

दृष्ट्वाऽस्रपित्तं प्रबलमबलौ च कफानिलौ।

शीतोपचारः कर्तव्यः सर्वथा तत्प्रशान्तये॥ १२३॥

स०-रक्तपित्तं प्रवृद्धं दृष्ट्वा कफनिलौ चाबलावुपलभ्य तत्प्रशान्तयर्थं शीतोपचारः कर्तव्यः।

न चेदेवं शमस्तस्य स्निग्धोष्णैस्तर्पयेत्ततः।

रसैः, कोष्णैश्च सर्पिर्भिरवापीडकयोजितैः॥ १२४॥

सेचयेत्तं कवोष्णैश्च कामं तैलपयोघृतैः।

स०-यद्येवं शमो न स्यात्तदा रसैस्तर्पयेत्। "रस इत्यविशेषोक्तौ योज्यो मांसभवो रसः।" किम्भूतैः? स्निग्धोष्णैः। तथा, कोष्णैर्घृतैश्च पुनस्तर्पयेत्। किम्भूतैः? अवपीडकेनरोगानुत्पादनीयोक्तेन (हृ. सू. अ. ४१६), प्रयोजितैः। तं च कवोष्णैर्यथायोगं तैलपयोघृतैः सेचयेत्।

यवासकुशकाशानां मूलं पुष्पं च शाल्मलेः॥ १२५॥

न्यग्रोधोदुम्बराश्वत्थशुङ्गाश्च द्विपलोन्मिताः।

त्रिप्रस्थे सलिलस्यैतत्क्षीरप्रस्थे च साधयेत्॥ १२६॥

क्षीरशेषे कषाये च तस्मिन् पूते विमिश्रयेत्।

कल्कीकृतं मोचरसं समङ्गा चन्दनोत्पलम्॥ १२७॥

प्रियङ्गुं कौटजं बीजं कमलस्य च केसरम्।

पिच्छाबस्तिरयं सिद्धः सघृतक्षौद्रशर्करः॥ १२८॥

प्रवाहिकागुदभ्रं शरक्तस्रावज्वरापहः।

स०-यवासादीनां मूलं शाल्मलेः पुष्पं तथा न्यग्रोधादीनां च शुङ्गा एतद् द्रव्यकदम्बकं प्रत्येकं द्विपलप्रमाणं जलप्रस्थत्रये क्षीरप्रस्थे च पाचयेत्। क्षीरशेषे च कषाये तस्मिन् पूते सति कल्कीकृतं मोचरसादि मिश्रयेत्। मोचरसादयोऽत्र सत्रिभागमात्रशाणकर्षमात्रा ग्राह्या. (?), बस्तिकल्पे कोशातकादौ निरुहे (हृ. क. अ. ४/१७) विंशतिपलप्रमाणे कार्षिकाणामेव द्रव्याणामभ्यनुज्ञानात्। अयं पिच्छाबस्तिः सिद्धो घृतमाक्षिकशर्करान्वितः प्रवाहिकादिहरः। अल्पया मात्रया निरुहो बस्तिरेव पिच्छाबस्तिरुच्यते।

यष्ट्याह्वपुण्डरीकेण तथा मोचरसादिभिः॥ १२९॥

क्षीरद्विगुणितः पक्को देयः स्नेहोऽनुवासनम्।

स०-मधुयष्टिकया प्रपौण्डरीकेण तथा मोचरसादिभिः-पूर्वोक्तैः (श्लो.१२७) कल्कीकृतैः, क्षीरद्विगुणितः पक्वः सन् स्नेहोऽनुवासनं देयः।

मधुकोत्पलरोध्राम्बु समङ्गा बिल्वचन्दनम्॥ १३०॥

चविकाऽतिविषा मुस्तं पाठा क्षारो यवाग्रजः।

दार्वीत्वङ्नागरं मांसी चित्रको देवदारु च॥ १३१॥

चाङ्गेरीस्वरसे सर्पिः साधितं तैस्त्रिदोषजित्।

अर्शोतिसारग्रहणीपाण्डुरोगज्वरारुचौ॥ १३२॥

मूत्रकृच्छ्रे गुदभ्रंशे बस्त्यानाहे प्रवाहणे।

पिच्छास्रावेऽर्शसां शूले देयं तत्परमौषधम्॥ १३३॥

स०-मधुकादिद्रव्यैः स्नेहचतुर्थभागप्रमाणैश्चाङ्गेरीस्वरसे घृताच्चतुर्गुणे घृतं साधितं त्रिदोषजित्। अर्शःप्रभृतिष्वेतद् घृतं देयम्। यतः परमौषधम्।

व्यात्यासान्मधुराम्लानि शीतोष्णानि च योजयेत्।
नित्यमग्निबलापेक्षी जयत्यर्शःकृतान् गदान्॥ १३४॥

स०-व्यत्यासेन-विपर्ययेण, मधुराण्यम्लानि च शीतान्युष्णानि च नित्यमग्निबलापेक्षी योजयेत्। एवं चार्शःकृतामतिशयिनीं रुजं जयति।

उदावर्तार्तमभ्यज्य तैलैः शीतज्वरापहैः।
सुस्निग्धैः स्वेदयेत्पिण्डैर्वर्तिमस्मै गुदे ततः॥ १३५॥
अभ्यक्तां तत्कराङ्गुष्ठसन्निभामनुलोमनीम्।
दद्याच्छ्यामात्रिवृद्दन्तीपिप्पलीनीफलैः॥ १३६॥
विचूर्णितैर्द्विलवणैर्गुडगोमूत्रसंयुतैः।
तद्वन्मागधिकाराठगृहधूमैः ससर्षपैः॥ १३७॥

स०-उदावर्तेनातं नरं तैलैः शीतज्वरापहैः-तगरागुरुकुङ्कुमादिद्रव्यसाधितैः, अभ्यज्य सुस्निग्धैः पिण्डैः स्वेदयेत्। ततः-स्वेदादनन्तरम्, अस्मै-उदावर्तवते, गुदेऽभ्यक्तेऽभ्यक्तां वर्तिं दद्यात्। तत्कराङ्गुष्ठसन्निभां-आतुरहस्ताङ्गुष्ठसदृशीम्। तथा, अनुलिमकरीं दद्यात्-क्षिपेत्। कैः कृतां वर्तिम्? इत्याह श्यामेत्यादि। श्यामादिभिः सैन्धवाक्षलवणयुक्तैः सूक्ष्मरजीकृतैर्गुडगोमूत्रसंयुक्तैः कृतां वर्तिं क्षिपेत्। तथैव मागधिकामदनफलगृहधूमसर्षपैर्गुडगोमूत्रान्वितैर्वर्तिं क्षिपेत्।

एतेषामेव वा चूर्णं गुदे नाड्या विनिर्धमेत्।

स०-अथवा, एतेषामेव-पूर्वोक्तानां, चूर्णं नाद्या गुदे विनिर्धमेत्।

तद्विघाते सुतीक्ष्णं तु बस्तिं स्निग्धं प्रपीडयेत्॥ १३८॥

ऋजू कुर्या-दशिराविण्मूत्रमरुतोऽस्य सः।

भूयाऽनुबन्धे वातघ्नैर्विरिच्यः स्नेहरेचनैः॥ १३९॥

अनुवास्यश्च रौक्ष्याद्धि सङ्गो मारुतवर्चसोः।

स०-तद्विवाते-कार्यं कर्तुमशक्ते तस्मिंश्चूर्णे, बस्ति स्निग्धं स्नेहबस्तिं, सुतीक्ष्णं दद्यात्। सः-बस्तिः, अस्य-आतुरस्य, गुदशिराविण्मूत्रवातानानुलोमयेत्। पुनरनुबन्धे सति स्नेहरेचनैर्विरिचनीयश्चानुवासनीयश्च। हि-यस्मात्, रौक्ष्याद्धेतोर्मरुतस्य पुरीषस्य च सङ्गो भवति।

त्रिपटुचिकटुश्रेष्ठादन्त्यरुष्करचित्रकम्॥ १४०॥

जर्जरं स्नेहमूत्राक्तमन्तर्धूमं विपाचयेत्।

शरावसन्धौ मृल्लिप्ते क्षारः कल्याणकाह्वयः॥ १४१॥

स पीतः सर्पिषा युक्तो भक्ते वा स्निग्धभोजिना।

उदावर्तविबन्धार्शोगुल्मपाण्डूदरकृमीन्॥ १४२॥

मूत्रसङ्गाश्मरीशोफहृद्रोगग्रहणीगदान्।

मेहप्लीहरुजानाहश्वासकासांश्च नाशयेत्॥ १४३॥

स०-त्रिपट्वादि जर्जरीकृतं-सूक्ष्मीकृतं, स्नेहमूत्राभ्यामक्त मन्तर्धूमं कृत्वा विपाचयेच्छरावसम्पुटे। अत एवाह-शरावसन्धौ मृल्लिप्त इति। अयं च कल्याणको नाम क्षारः सर्पिषा पीतः स्नेहभोजिना वा भक्ते युक्तः सन्नुदावर्तादीन् नाशयेत्।

सर्वं च कुर्याद्यत्प्रोक्तमर्शसां गाढवर्चसाम्।

स०-यच्च गाढवर्चसामर्शसां प्रोक्तं तच्च सर्वं कुर्यात्।

द्रोणेऽपां पूतिवल्कद्वितुलमथ पचे-
त्पादशेषे च तस्मिन्
देयाऽशीतिरुगुडस्य प्रतनुकरजसो
व्योषतोऽष्टौ पलानि।
एतन्मासेन जातं जनयति परमा-
मूष्मणः पक्तिशक्तिं
शुक्तं कृत्वाऽऽनुलोम्यं प्रजयति गुदज-
प्लीहगुल्मोदराणि॥ १४४॥

स०-द्वयोस्तुलयोः समाहरो द्वितुलम्। पूतिकरञ्जस्य त्वचस्तुलाद्वयं-पलशतद्वयं, जलद्रोणे पचेत्। तस्मिंश्च पादशेषे सति गुडस्याशीतिः पलानि क्षेप्तव्यानि। त्रिकटुकस्य सूक्ष्मचूर्णस्याष्टौ पलानि देयानि। एतत्सर्वं मासेन शुक्तं जातं प्रबलमग्निं कुरुते। आनुलोम्यं कृत्वा गुदजादिण् जयति। स्रग्धरावृत्तम्।

पचेत्तुलां पूतिकरञ्जवल्काद्
द्वे मूलतश्चित्रककण्टकार्योः।
द्रोणत्रयऽपां चरणावशेषे
पूते शतं तत्र गुडस्य दद्यात्॥ १४५॥
पलिकं च सूचिर्णितं त्रिजात
त्रिकटुग्रन्थिकदाडिमाश्मभेदम्॥

पुरपुष्करमूलधान्यचव्यं

हपुषामाद्रकमम्लवेतसं च॥ १४६॥

शीतीभुतं क्षौद्रविंशत्युपेत-

मार्द्रद्राक्षाबीजपूराद्रकैश्च।

युक्तं कामं गण्डिकाभिस्तथेक्षोः

सर्पिःपात्रे मासमात्रेण जातम्॥ १४७॥

चुक्रं क्रकचमिवेदं दुर्दाम्नां वह्निदीपनं परमम्।

पाण्डुगरोदरगुल्मप्लीहानाहाश्मकृच्छ्रघ्नम्॥ १४८॥

स०-पूतिकरञ्जत्वचस्तुलामेकां द्वे च तुले चित्रककण्टकारीमूलयोर्जलद्रोणत्रये पचेत्। पादशेषे च तस्मिन् पूते गुडस्य पलशतं दद्यात्। उपजातिवृत्तम्। त्रिजातकादि सूक्ष्मरजीकृतं प्रत्येकं पलप्रमाणं निःक्षिपेत्। एतत्सर्वं चूर्णितं श्लक्ष्णपिष्टं दद्यात्। औपच्छन्दसिकं वृत्तम्। एतच्च शीतीभुतं सत् क्षौद्रविंशत्योपेतमार्द्रद्राक्षादिभिश्चोपेतमिक्षुगण्डिकाभिश्च यथेच्छं युक्तं सर्पिःपात्रे मासमात्रेण जातं चुक्रमिति वक्ष्यमाणेन सम्बन्धः। शुक्तमिदमर्शसां क्रकचमिव-करपत्रतुल्यं, कर्तनशक्तिसामार्थ्यात्। तथा परं वह्निदीपनं पाण्ड्वादिघ्नं च। शालिनीवृत्तम्, आर्या च।

द्रोणं पीलुरसस्य वस्त्रगलितं न्यस्तं हविर्भाजने

युञ्जीत द्विपलैर्मदामधुफलाखर्जूरधात्रीफलैः।

पाठामाद्रिदुरालभाम्लविदुलव्योषत्वगेलोल्लकैः

स्पृक्काकोललवङ्गवेल्लचपलामूलाग्निकैः पालिकैः॥

गुडपलशतरोजितं निवाते

निहितमिदं प्रपिबंश्च पक्षमात्रात्।

निशमयति गुदाङ्कुरान् सुगुल्मा-

ननलबलं प्रबलं करोति चाशु॥ १५०॥

स०-पीलुफलानां रसस्य द्रोणं वस्त्रपूतं सर्पिर्भाण्डे न्यस्तं मदादिभिर्द्विपलप्रमाणैः पाठादिभिश्च पालिकैर्युञ्जीत। मदाधातकी। मधुफला-द्राक्षा। माद्री-रेणुका। विदुलो-वेतसः। शार्दूलविक्रीडितम्। तथा गुडपलशतेन योजितं निवाते धृतं पक्षमात्रादनन्तरं प्रपिबन्नर इदमर्शांसि गुल्मं च शमयति। द्रागग्निबलं च प्रकृष्टं विधत्ते। पुष्पिताग्रा।

कैकशो दशपले दशमूलकुम्भ
पाठाद्वयार्कघुणवल्लुभकद्वलनाम्।
दग्धे स्रुतेऽनु कलशेन जलेन पक्के
पादास्थते गुडतुलां, पलपञ्चकं च॥ १५१॥

वह्निर्मुष्टी द्वे यवक्षारतश्च।
दर्वीमालिम्पन् हन्ति लीढो गुडोऽयं
गुल्मप्लीहार्शःकुष्ठमेहाग्निसादान्॥ १५२॥

स०-दशमूलादीनां प्रत्येकं दशपले दग्धे जलद्रोणेन स्रुते जले पक्के पादशेषे चास्मिन् गुडतुलां व्योषादीनां च प्रत्येकं पलपञ्चकं दद्यात्। चित्रकस्य पलद्वयं यवक्षारस्य च पलद्वयं दद्यात्। दर्वीमालिम्पन् दर्वीलेपी सन्नयं गुडो लीढो-भक्षितो, गुल्मादीन् पराकरोति। वसन्ततिलकं वैश्वदेवीयं वृत्तं च।

तोयद्रोणे चित्रकमूलतुलार्धं
साध्यं यावत्पाददलस्थमथेदम्।
अष्टौ दत्वा जीर्णगुडस्य पलानि
क्वाथ्यं भुयः सान्द्रतया सममेतत्॥ १५३॥

त्रिकटुकमिसिपथ्याकुष्टमुस्तावराङ्ग

कृमिरिपुदहनैलाचूर्णकीर्णोऽवलेहः।

जयति गुदजकुष्ठप्लीहगुल्मोदराणि

प्रबलयति हुताशं शश्वदभ्यस्यमानः॥ १५४॥

स०-तोयस्य द्रोणे चित्रकमूलस्य तुलार्धं साध्यं यावदष्टांशशेषमिदं स्यात्। ततः पुराणगुदपलान्यष्तौ दत्त्वा पुनरपि क्वाथ्यं यावत्सान्द्रत्वं गतम्। "म्तौ ज्यो भद्रा वेदवसू च विरामः।" त्रिकटुकादिचूर्णयुक्तोऽयं लेहो नित्यमभ्यस्यमानो दारुण(दुर्नाम) कुष्ठादीनि जयति। अग्निं च प्रकृष्टं कुरुते। मालिनीवृत्तम्।

गुडव्योषवरावेल्लतिलारुष्करचित्रकैः।

अर्शांसि हन्ति गुलिका त्वग्विकारं च शीलिता॥ १५५॥

स०-गुडादिभिर्गुलिका कृताऽभ्यस्ता दुर्नामानि हन्ति त्वग्विकारं च।

मृल्लिप्तं सौरणं कन्दं पक्त्वाऽग्नौ पुटपाकवत्।

अद्याद्घृतैलल्वणं द्रुनामविनिवृत्तये॥ १५६॥

स०-सौरणं कन्दं मृदा लिप्तमग्नौ पुटपाकवत् पक्वं तैलल्वणान्वितमश्नीयाद् दुर्नामोपशमाय।

मरिचपिप्पलिनागरचित्रकान्

क्रमविवर्धितभागसमाहृतान्।

शिखिचतुर्गुणसूतणयोजितान्

कुरु गुडेन गुडान् गुदजच्छिदः॥ १५७॥

स०-मरिचादीन् क्रमवर्धितभागान् चित्रकचतुर्गुणसूरणयोजितान् गुडान् गुडेन कुरु गुदाङ्कुरच्छिदः। द्रुतविलम्बितम्।

चूर्णिकृताः षोडश सूरणस्य
भागास्ततोऽर्धेन च चित्रकस्य।
महौषधाद्वौ मरिचस्य चैको
गुडेन दुर्नामजयाय पिण्डी॥ १५८॥

स०-सूक्ष्मरजीकृताः सूरणभागाः षोडश, चित्रकभागा अष्टौ, नागरस्य द्वौ, मरिचस्य चैको, गुडेनैषां पिण्डी *कृता दुर्नामजयाय स्यात्। उपजातिवृत्तम्।

पथ्यानागरकृष्णाकरञ्जवेल्लाग्निभिः सितातुल्यैः।
वडवामुख इव जरयति बहुगुर्वपि भोजनं चूर्णः॥ १५९॥

स०-पथ्यादिभिः सितातुल्यैश्चूर्णो बहु गुरु च भोजनं वडवामुख इव जरयति। "आर्यायाः पूर्वार्धे यथोक्तमात्रादतोमया लक्ष्म। गीतिं [तत्र] विधिविदो वदन्ति संवीक्ष्य तदितरत्रापि॥".

कलिङ्गलाङ्गलीकृष्णावह्न्यपामार्गतण्डुलैः।
भूनिम्बसैन्धवगुडैर्गुडा गुदजनाशनाः॥ १६०॥

स०-कलिङ्गकादिभिर्गुडाः-वटिकाः, अर्शोघ्नाः।

लवणोत्तमवह्निकलिङ्गयवां-
श्चिरिबिल्वमहापिचुमन्दयुतान्।
पिबि सप्तदिनं मथितालुडितान्
यदि मर्दितुमिच्छास पायुरुहाम्॥ १६१॥

स०-सैन्धवादीनि तक्रालोडितानि पिब यद्यर्शांसि जिघांससि। "अथ तोटकमब्धिसकारचितम्।"

शुष्केषु भल्लातकमग्र्यमुक्तं
भैषज्यमार्द्रेषु तु वत्सकत्वक्।
सर्वेषु सर्वर्तुषु कालशेय-
मर्शःसु बल्यं च मलापहं च॥ १६२॥

स०-शुष्केष्वर्शःसु भल्लातकं भैषज्यं अग्र्यं-प्रधानमुदितम्। आद्रेषु पुनरर्शःसु कुटजत्वग्भैषज्यमग्र्यं कथितम्। सर्वेष्वर्शःसु-शुष्कष्वार्द्रेषु च, सर्वर्तुषु-सर्वकालं, कालशेयं-मथैतं, अग्र्यं बल्यं-बलावहं, मलापहं-दोषापहं च। इन्द्रवज्रावृत्तम्।

भित्त्वा विबन्धाननुलोमनाय
यन्मारुतस्याग्निबलाय यच्च।
तदन्नपानौशधमर्शसेन
सेव्यं, विवर्ज्यं विपरीतमस्मात्॥ १६३॥

स०-विबन्धान्-स्त्यानकफादिरुपान्, भित्त्वा यत्-अन्नपानौषधमासेवितं, मारुत-स्यानुलोमनाय-स्ववर्त्मप्रवर्तनाय, तथा यच्चाग्निबलाय-अग्निवर्धनाय सम्पद्यते, तदेवान्नपानौषधं दुर्नामवता सेव्यम्। अस्मात्-यथोक्तात्, विपरीतं-यदन्नपानौषधं मारुतस्य विबन्धकरमग्निसादनं च तत्, तेन विवर्ज्य-न से-व्यम्। उपजातिवृत्तम्।

अर्शोतिसारग्रहणीविकाराः
प्रायेण चान्योन्यनिदानभूताः।
सन्नेऽनले सन्ति, न सन्ति दीप्ते,
रक्षेदतस्तेषु विशेषतोऽग्निम्॥ १६४॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां चतुर्थे चिकित्सित-ऽस्थानेऽर्शश्चिकित्सितं नामाष्टमोऽध्यायः॥८॥

स०-अर्शोतिसारग्रहण्योन्यनिदानभूताः-परस्परं हेतुभूताः, प्रायेण-बाहुल्येन, अनले च सन्न एते रोगा भवन्ति। दीप्ते त्वग्नौ न सन्ति, यतस्ततः-अस्मात्कारणात्, तेषु विशेषाग्नि रक्षेदिति। इन्द्रवज्रावृत्तम्।

इति श्रीमृगाङ्कदत्तपुत्र श्रीमदरुणदत्तविरचितायामष्टाङ्गहृदयटी-कायां सर्वाङ्गसुन्दरा-ख्यायां चतुर्थे चिकित्सितस्थानेऽर्श-श्चिकित्सितं नामाष्टमोऽध्यायः समाप्तः॥८॥

****

नवमोऽध्यायः।

अस्मादनन्तरमतिसारचिकित्सितं प्रारभ्यते, अर्शोतिसारयोः परस्परं निदानभूतत्वेन चिकित्सासामान्यात्। अत एवाह-

अथातोऽतीसारचिकित्सितं व्याख्यास्यामः।

इति ह स्माहुरात्रेयादयो महर्षयः।

(गद्यसूत्रे॥२॥)

अतीसारो हि भूयिष्ठं भवत्यामाशयान्वयः।

हत्वाऽग्निं वातजेऽप्यस्मात्प्राक् तस्मिंल्लङ्घनं हितम्॥१॥

स०-हि-यस्मात्, बाहुल्येनाग्निं हत्वा-मन्दीकृत्य, आमाशयान्वयो भवत्यतीसारः। अस्मात्कारणादस्मिन्-अतीसाराख्येव्याधौ, वातजेऽपि पूर्वं लङ्घनं हितम्। आमाशयोऽन्वयोजन्मभूरुत्पत्तिः यस्य स आमाशयान्वयः। अपिशब्दात्कचित्कफादिजे सुतरां लङ्घनं हितमिति द्योतयति। लङ्घनशब्देन चोपवास एवेह गृह्यते, शोधनादीनां लङ्घनानामवस्थावशादुच्यमानत्वात्। भूयिष्ठग्रहणेन क्वचिद्भयजादावतीसारे व्यभिचारः, नासावामाशयान्वयः। प्राग्ग्रहणेन नोत्तरकाले लङ्घनं हितम्। तदा हि रोगस्वभावाद्धात्वपचयोऽवश्यंभावी। लङ्घनमपि धात्वपचयहेतुः, अतस्तत्रायुक्तम्।

शूलानाहप्रसेकार्तं वामयेदतिसारिणम्।

स०-शूलादिभिरार्तमतीसारिणं वामयेत्, न तत्र प्राग् लङ्घनं हितम्। वमनं चैतत्सामान्यं पित्तजादिष्वप्येवंरूपेषु चिकित्सितं बोध्यम्, न केवलं वातजे।

दोषाः सन्निचिता ये च विदग्धाहारमुर्च्छिताः॥२॥

अतीसाराय कल्पन्ते तेषूपेक्षैव भेषजम्।

भृषोत्क्लेशप्रवृत्तेषु स्वयमेव चलात्मसु॥३॥

स०-ये च दोषाः सन्निचिताः-अतिशयेन वृद्धिं गताः, तथा विदग्धेन-पक्वापक्वरूपेण, आहारेण मूर्च्छिताः-एकतां प्राप्ताः, अतीसाराय कल्पन्ते-सम्पद्यन्ते। तेषु तथोत्क्लेशनं-उत्क्लेशाख्यविकारकरणं प्रत्युन्मुखताबीजस्याङ्कुरोत्पत्तावुच्छ्रूनावस्थेव, अतिशयेनोत्क्लेशो भृशोत्क्लेशस्तेन प्रवृत्ताः-अतीसारकरणं प्रति समुद्यतास्तेषु, तथा स्वयमेव-यत्नं विना, चलात्मसु-चलस्वभावेषु, तेषु-तथाभूतेषु, उपेक्षा-पथ्याशित्वेन सम्यक् प्रवर्तनमेव भेषजम्, न तु पाचनादिक्रियेत्यर्थः।

सङ्ग्रहणौषधं कुटजत्वगादिकं व्याधिप्रतिपक्षभूतं कस्मादत्र न प्रयुज्यते? अपि चाम्यसङ्ग्रहे पठिष्यति (हृ. उ. अ. ४०/४९) -"कुटतोऽतीसारे" इति। तस्मादत्र सङ्ग्राहौषधं दातुमुचितमिति यो मन्यते तं प्रत्याह-

न तु सङ्ग्रहणं योज्यं पूर्वमामातिसारिणि।

स०-सङ्ग्रहणं भेषजं पूर्वमामातिसारिणि पुरुषे न योज्यम्। तुशब्दोऽवधारणार्थः। अत्र पूर्वग्रहणं पश्चादीषदामातिसारिणिदीयमानं युज्यत एवेति द्योतयति। सामे दोषेऽतीसारकारिणि प्रथममपि भेदनमौषधं दातुं(दत्तं) विशिष्टायामवस्थायां समानकार्यमपि कदाचिदतीसारिणो गुणाय सम्पद्यते नातीसारप्रतिपक्षभूतमपि च सङ्ग्रहणमौषधमिति कृत्वा।

अपि चाध्मानगुरुताशूलस्तैमित्यकारिणि॥४॥

प्राणदा प्राणदा दोषे विबद्धे सम्प्रवर्तिनी।

स०-विबद्धे-अल्पाल्पं कृत्वा प्रवर्तमाने, दोषेऽत एव विबन्धत्वादाध्मानादिकारिणि तथाभूतेऽस्मिन्दोषेऽसङ्ग्रहणमपथ्यमपि प्राणदा-हरीतकी, प्राणान् ददातीति-प्राणदा, भवतीति। एवं बहुदोषाणामतीसारिणां प्रायेणैष उपक्रमो बोध्यः।

मध्यदोषाल्पदोषयोस्त्वाह-

पिबेत्प्रक्थैतास्तोये मध्यदोषो विशोषयन्॥५॥

भूतीकपिप्पलीशुण्ठीवचाधान्यहरीतकीः।

अथवा बिल्वधनिकामुस्तनागरवालकम्॥६॥

बिडपाठावचापथ्याकृमिजिन्नागराणि वा।

शुण्ठीघनवचामाद्रीबिल्ववत्सकहिङ्गु वा॥७॥

स०-मध्यदोषोऽतीसारी भूतीकादीः पिबेत्। किम्भूतास्ताः ? तोये प्रक्थिताः। ननु, क्थिता इत्येतावदेवास्तु, किं प्रशब्देन ? ब्रूमः। प्रकर्षेण क्थिताः प्रमथ्यारूपेण श्रृताः प्रक्थिता इत्यस्यार्थस्य प्रतिपादनार्थं प्रशब्दोकारि। प्रमथ्यायाश्च तन्त्रान्तरे लक्षणमुक्तम्। तथा-"श्रृतः कषायो निर्यूहः क्काथो यूषोऽकृतश्च सः। कृतयूषः प्रमथ्या च द्रव्यात्कल्कीकृताच्छ्रुतः॥" इति। तदेवं द्रव्यं कल्कीकृत्य पिष्ट्वा यत्क्रियते स कृतयूषो भण्यते। स एव च प्रमथ्याशब्दवाच्यः। तस्मान्मध्यदोषोऽतीसारी भूतीकादीनि पिष्ट्वा प्रकर्षेण क्काथयित्वा प्रमथ्यारूपेण पिबेदित्यवतिष्ठते। मुनिनाऽप्युक्तम्(च. चि. अ. १९/२ २)-"प्रमथ्यां मध्यदोषेभ्यो दद्याद्दीपनपाचनीम्।" इति। किं कुर्वन् पिबेत् ? विशोषयन्, -लङ्घयन्, प्रकृतत्वादात्मानमेव। अथवा, बिल्वधनिकादीनि पिबेत्। अथवा, बिडादीनि शुण्ठ्यादीनि वा पिबेत्।

शस्यते त्वल्पदोषाणामुपवासोऽतिसारिणाम्।

स०-अल्पदोषाणामतिसारिणामुपवासः शस्यते। तुशब्दोऽवधारणार्थः। अत्रोपवास एवाल्पदोषाणां शस्यते न बहुदोषमध्यदोषोक्तोऽपर उपक्रमः, स न तथा तेषां शस्य इति। सर्वमतीसारिणं दोषदेशाद्यनुरोधेन कदाचिलङ्घयेत्।

वचाप्रतिविषाभ्यां वा मुस्तापर्पटकेन वा॥८॥

ह्रीबेरनागराभ्यां वा विपक्वं पाययेज्जलम्।

स०-तृषि सञ्जातायां दोषदेशाद्यनुरोधेन कदाचिद्वचाप्रतिविषाभ्यां विपक्वं जलं पाययेत् कदाचिन्मुस्तापर्पटकेन कदाचिद्वालकनागराभ्याम्। पाययेदित्यत्र कर्त्रभिप्राये क्रियाफले परस्मैपदम्, अन्यथा "अन्यथा "न पादभ्य" इत्यादिना परस्मैपदनिषेधः स्यात्।

युक्तेऽन्नकाले क्षुत्क्षामं लघ्वन्नप्रति भोजयेत्॥९॥

तथा स शीघ्रं प्राप्नोति रुचिमग्निबलं बलम्।

स०-युक्ते-योग्ये, अन्नकाले क्षुत्क्षाममतिसारिणं लघ्वन्नप्रतिभोजयेत्, नापरव्याध्यार्तमिव लङ्घनोचितं सम्यग्लङ्घनादनन्तरमेव भोजयेत्। अपि तु सम्यग्लङ्घितलक्षणोत्पन्नमप्यतीसारिणं किञ्चित्कालप्रतीक्षणं कृत्वा भोजयेदिति क्षामशब्देन द्योतयति। अल्पं लघ्वन्नं लघ्वन्नप्रति, "सुप्रतिना मात्रार्थे" इति समासोऽव्ययीभावः। एवं क्रियमाणे सः-अतिसारी, द्रोगेव रुचिं प्राप्नोति, तथा वह्निबलं देहबलम् [च]।

एवं च भुञ्जानस्य पानमुपदिश्यते-

तक्रेणावन्तिसोमेन यवाग्वा तर्पणेन वा॥१०॥

सुरया मधुना वाऽथ यथासात्म्यमुपाचरेत्।

स०-कदाचित्तक्रेण कदाचित्काञ्जिकेन कदाचित्पेयया कदाचित्तर्पणेन कदाचित्सुरया। कदाचिन्माद्वीकेणेति यथासात्म्यमुपाचरेत्।

भोज्यानि कल्पयेदूर्ध्वं ग्राहिदीपनपाचनैः॥११॥

बालबिल्वशठीधान्यहिङ्गुवृक्षाम्लदाडिमैः।

पलाशहपुषाजाजीयवानीबिडसैन्धवैः॥१२॥

लघुना पञ्चमूलेन पञ्चकोलेन पाठया।

स०-अस्मात्क्रमादूर्ध्वं-अनन्तरं, भोज्यानि-भोक्तव्यानि,कल्पयेदतीसारिणे। ग्राहिदीपनपाचनैरेव सङ्ग्रहणानि दीपनानि पाचनानि च यानि द्रव्याणि तानि सर्वाण्यतीसारिणे पथ्यानीति। एवं सङ्क्षेपेण सामान्येन चिकित्सितमुक्तम्।

तदेव दिङ्मात्रं दर्शयति-बालेत्यादि। बलबिल्वादिभिर्भोज्यानि कल्पयेत्।

शालिपर्णीबलाबिल्वैः पृश्निपर्ण्या च साधिता॥ १३॥
दाडिमाम्ला हिता पेया कफपित्ते समुल्बणे।

स०-शालिपर्ण्यादिभिः साधिता दाडिमाम्ला पेया कफपित्ताधिके हिता।

अभयापिप्पलीमूलबिल्वैर्वातानुलोमनी॥ १४॥

स०-अभयादिभिः पेया वातानुलोमनी।

विबद्धं दोषबहुलो दीप्ताग्निर्योऽतिसार्यते।
कृष्णाविडङ्गत्रिफलाकषायैस्तं विरेचयेत्॥ १५॥
पेयां युञ्जयाद्विरिक्तस्य वातघ्नैर्दीपनैः कृताम्।

स०-यो बहुदोषो विबद्धं-अल्पाल्पं कृत्वा, अतिसार्यते स कृष्णादिकषायैर्विरेचयेत्। विरिक्तस्य च तस्य सतः पेयां वातघ्नैर्दीपनैश्च द्रव्यैः कृतां युञ्ज्यात्।

आमे परिणते यस्तु दीप्तेऽग्नावुपवेश्यते॥ १६॥
सफेनपिच्छम् सरुजं सविबन्धं पुनः पुनः।
अल्पाल्पमल्पशमलं निर्विड्वा सप्रवाहिकम्॥ १७॥

दधितैलघृतक्षीरैः स शुण्ठीं सगुडां पिबेत्॥

स्विन्नानि गुडतैलेन भक्ष्येद्बदराणी वा॥ १८॥

गाधविङ्विहितैः शाकैर्बहुस्नेहैस्तथा रसैः।

क्षुधितं भोजयेदेनं दधिदाडिमसाधितैः॥ १९॥

शाल्योदनं तिलैर्माषैर्मुद्गैर्वा साधु साधितम्।

शठ्या मूलकपोतायाः पाठायाः स्वस्तिकस्य वा॥ २०॥

सूषायवानीकर्कारुक्षीरिणीचिर्भटस्य वा।

उपोदकाया जीवन्त्या बाकुच्या वास्तुकस्य वा॥ २१॥

सुवर्चलायाश्चुञ्चोर्वा लोणीकाया रसैरपि।

कूर्मवर्तकलोपाकशिखितित्तिरिकौक्कुटैः॥ २२॥

स०-यः-अतीसारी, आमे परिणते दीप्तेऽग्नौ सत्युपवेश्यते सफेनपिच्छं तथा सरुजं तथा सविबन्धं पुनः पुनस्तथाऽल्पमल्पं तथाऽल्पपुरीषं निर्विङ्वा-पुरीषरहितम्, तथा सप्रवाहिकंमिस्तानिकासहितम्। "स्रुते रक्ते पुरीषे च वायुना विड्विवर्जितम्। प्रवाहितेति विख्यातं यत् फेनाभं प्रवर्तते॥" इति प्रवाहिकालक्षणम्। य एवंविधोऽतीसारी स दधितैलघृतक्षीरैः समुदितैः शुण्ठीं सगुडां पिबेत्। अथवा, स्विन्नानि बदराणि गुडतैलेनाश्नीयाट्। एवं दोषादिवशाच्छुण्ठीं पाययित्वा कदाचित् पूर्वोक्तानि बदराणि भक्षयित्वाऽनन्तरं क्षुधितं-अतिसञ्जातबुभुक्षं, एनं-अतीसारिणं, गाधविङ्विहितैः-वास्तुकादिभिः, शाकैस्तथा मांसरसैर्बहुस्नेहैर्दधिदाडिमसंस्कृतैः शाल्योदनं भोजयेत्। अथवा तिलैर्माषैर्मुद्गैर्वा साधु-शोभनं कृत्वा, साधितं शाल्योदनं भोजयेत्। मूलकपोता-लघुमूलकं पोतिकासंज्ञं देशान्तरे प्रसिद्धं कुरुक्षेत्रादौ देशे। अत्र भाष्यं कियत् त्यक्तम्।

बिल्वमुस्ताक्षिभैषज्यधाकीपुष्पनागरैः।

पकातीसारजित्तक्रे यवागूर्दाधिकी तथा॥ २३॥

कपित्थकच्छुराफञ्जीयूथिकावटशोलुजैः।

दाडिमीशणकार्पासीशाल्मलीनां च पल्लवैः॥ २४॥

स०-बिल्वादिभिस्तके सिद्धा यवागूः पक्वातीसारजित्। दाधिकीति। कपित्थादिजैः पल्लवैर्दाडिमादीनां च पल्लवैर्दध्नि सिद्धा दाधिकी यवागूः। तथा-पक्वातीसारजित्।

कल्को बिल्वशलाटूनां तिलकल्कश्च तत्समः।
दध्नः सरोऽम्लः सस्नेहः खलो हन्ति प्रवाहिकाम्॥

स०-तथा बिल्वशलाटूनां-स्तोककालजातानां लघूनां बिल्वानां, कल्कः। तथा तिलकल्कस्तत्समो-बिल्वशलाटुसमः। तथा दध्नः सरोऽम्लो-न मधुरः, सस्नेहो-देशाद्यनुरोधाद्धतादिना स्नेहेन यथायथं युक्तः। अयं खलः सिद्धः प्रवाहिकां हन्ति।

मरिचं धनिकाऽजाजी तित्तिडीकं शठी बिडम्।
दाडिमं धातकी पाठा त्रिफला पञ्चकोलकम्॥ २६॥
यावशूकं कपित्थाम्रजम्बूमध्यं सदीप्यकम्।
पिष्टैः षड्गुणबिल्वैस्तैर्दध्नि मुद्गरसे गुडे॥ २७॥
स्नेहे च यमके सिद्धः खलोऽयमपराजितः।
दीपनः पाचनो ग्राही रुच्यो बिम्बिशिनाशनः॥ २८॥

स०-मरिचादिभिः पिष्टैः षड्गुणं बिल्वं-बिल्वमज्जा, येषां मरिचादीनां तैः सिद्धः। तथा परिपक्वश्च दध्नि तथा मुद्गरसे गुडे तथा यमके च स्नेहे। खलोऽयमपराजितो नाम दीपनादिगुणः। बिम्बिशिनाशनः-प्रवाहिकाघ्नः।

कोलानां बालबिल्वानां कल्कैः शालियवस्य च।
मुद्गमाषतिलानां च धान्ययूषं प्रकल्पयेत्॥ २९॥
एकेध्यं यमके भृष्टं द-दाडिमसारिकम्।
वर्चःक्षये शुष्कमुखं शाल्यन्नं तेन भोजयेत्॥ ३०॥

दध्नः सरं वा यमके भृष्टं सगुडनागरम्।

सुरां वा यमके भृष्टां व्यञ्जनार्थं प्रयोजयेत्॥ ३१॥

फलाम्लं यमके भृष्टं यूषं गृञ्जनकस्य वा।

भृष्टान्वा यमके सक्तुन् स्वादेद्योषावचूर्णितान्॥ ३२॥

माषान् सुसिद्धांस्तद्वद्वा घृतमण्डोपसेवनान्।

रसं सुसिद्धपूतं वा छागमेषान्तराधिजम्॥ ३३॥

पचेद्दाडिमसाराम्लं सधान्यस्नेहनागरम्।

रक्तशाल्योदनं तेन भुञ्जानः प्रपिबंश्च तम्॥ ३४॥

वर्चःक्षयकृतैराशु विकारैः परिमुच्यते।

स०-कोलादीनां कल्कैः शालेर्यवस्य च कल्कैर्मुद्गादीनां चकल्कैरेकध्यं-व्यतिमिश्रं, धान्ययूषं प्रकल्पयेत्। किम्भूतम्? यमके भृष्टं तथा दधिदाडिमसारिकम्। वर्चःक्षये-पुरीषक्षये सति, शुष्कमुखं-मुखशोषोपद्रवान्वितमतीसारिणं, तेन-यूषेण, शाल्यन्नं भोजयेत्। शालिग्रहणेन रक्तशाल्यादिनां ग्रहणम्। अथवा, दध्नः सरं यमके पक्वं गुडनागरसहितं व्यञ्जनार्थं प्रकल्पयेत्। अथवा, यमके भृष्टां सुरां व्यञ्जनार्थं प्रकल्पयेत्। अथवा गृञ्जनकस्य-हरितकविशेषस्य, यूषं फलैः-दाडिमादिभिरम्लैः, अम्लं-अम्लीकृतं, व्यञ्जनार्थं प्रकल्पयेत्। यमके स्नेहद्वये, वा सक्तून् भृष्टन् व्योषावचूर्णितान् भक्षयेत्। तथैव माषान् सुस्विन्नान् घृतमण्डोपसेवनान् खादेत्। अथवा, छागमेषयोरन्तराधिजं रसं सुसिद्धपूतं शोभनं कृत्वा पूर्वं सिद्धं पश्चात्पूतं-निर्मलीकृतं, तथा दाडिमसारेणाम्लं धान्यकस्नेहशुण्ठीयुतं व्यञ्जनार्थं पचेत्। तेन रसेन रक्तशाल्यन्नं भुञ्जानस्तमेवमांसरसं प्रपिबन् वर्चःक्षयकृतैर्विकारैः-"पुरीषे वायुरन्त्राणि" (हृ. सू. अ. ११/२१) इत्यादिभिः शुत्रस्थानोदितैः, मुच्यते। प्रवाहिका वर्चःक्षये सति स्यात्। तस्मात्तयऽपि मुच्यते।

बालबिल्वं गुडं तैलं पिप्पलीं विश्वभेषजम्॥ ३५॥

लिह्याद्वाते प्रतिहते सशूलः सप्रवाहिकः।

स०-वाते प्रतिहते प्रवाहिकाशूलवान् बालबिल्वादिकं लिह्यात्।

वल्कलं शाबरं पुष्पं धातक्याबदरीदलम्॥ ३६॥

पिबेद्दधिसरक्षौद्रकपित्थस्वरसाप्लुतम्।

स०-रोध्रत्वक् धातकीपुष्पं बदरीपत्रमेतत् दधिसरादिभिराप्लुतं-आलोडितं, पिबेत्।

विबद्धवातवर्चास्तु बहुशूलप्रवाहिकः॥ ३७॥

सरक्तपिच्छस्तृष्णार्तः क्षीरसौहित्यमर्हति।

यमकस्योपरि क्षीरं धारोष्णं वा प्रयोजयेत्॥ ३८॥

श्रृतमेरण्डमूलेन बालबिल्वेन वा पुनः।

स०-विबद्धे वातवर्चसी यस्य, तथा प्रभुते शूलप्रवाहिके यस्य, तथा सहरक्तेन पिच्छया च यो वर्तते, तथा तृष्णयाऽऽर्तः, एवंविधो नरः क्षीरसौहित्यं-दुग्धतृप्तिं, अर्हति। अथवा, यमकं पीत्वाऽनु धारोष्णं क्षीरं प्रयोजयेत्। एरण्डमूलेन वा श्रृतं बालबिल्वेन वा श्रृतं क्षीरं प्रयोजयेत्।

पयस्युत्काथ्य मुस्तानां विंशतिं त्रिगुणेऽम्भसि॥ ३९॥

क्षीरावशिष्टं तत्पीतं हन्यादामं सवेदनम्।

स०-क्षीरे त्रिगुणेऽम्भसि मुस्ताविंशतिं प्रक्काथ्य क्षीरावशिष्टं पीतमामं सरुजं हन्यात्। अत्र च विंशतिभिर्मुस्तैः प्रायेण पलं भवति। सामान्यकल्पनया च मुस्तापलं षोडशभिर्द्रवपलैरुत्काथ्य चत्वाति पलानि चतुर्भागावशेषतया कार्याणि। तदेवं क्षीरपलानि चत्वारि पानीयप्लानि द्वादश मुस्ताविंशति दत्वा क्षीरावशिष्टं पेयमित्ययमत्र क्काथक्रमो वेद्यः।

पिप्पल्याः पिबतः सूक्ष्मं रजो मरिचजन्म वा॥ ४०॥

चिरकालानुषक्ताऽपि नश्यत्याशु प्रवाहिका।

स०-पिप्पल्याः सूक्ष्मं चूर्णं जलेन पिबतो मरिचस्य वा सूक्ष्मं चूर्णं जलेन पिबतो बहुकालानुषक्ताऽपि प्रवाहिका नश्यति।

निरामरूपं शूलार्तं लङ्घनाद्यैश्च कर्षितम्॥४१॥
रूक्षकोष्ठमपेक्ष्याग्निं सक्षारं पाययेद् घृतम्।

स०-निरामरूपं तथा शूलेन पीडितं लङ्घनाद्यैः कर्षितं तथा रूक्षकोष्ठं वह्निमपेक्ष्य क्षारसहितं घृतं पाययेत्।

सिद्धं दधिसुरामण्डे दशमूलस्य चाम्भसि॥४२॥
सिन्धूत्थपञ्चकोलाभ्यां तैलं सद्योर्तिनाशनम्।

स०-दधिसुरामण्दे दशमूलक्काथे च सैन्धवपञ्चकोलकल्केन तैलं सिद्धं सद्यो रुजापहम्।

षड्भिः शुण्ठ्याः पलैर्द्वाभ्यां द्वाभ्यां ग्रन्थ्यग्निसैन्धवात्
तैलप्रस्थं पचेद्दध्ना निःसारकरुजापहम्।

स०-शुण्ठीपलैः षड्भिः पिप्पलीमूलपलद्वयेन चित्रकपलद्वयेन सैन्धवपलद्वयेन च तैलप्रस्थं दध्ना पचेत्। तन्निःसारकरुजापहम्।

एकतो मांसदुग्धाज्यं पुरीषग्रहशूलजित्॥४४॥
पानानुवासनाभ्यङ्गप्रयुक्तं तैलमेकतः।
तद्धि वातजितामम्यं शूलं च विगुणोऽनिलः॥४५॥

स०-एकतः-एकस्मिन् पुरीषग्रहशूलजित्त्वपक्षे, मांसदुग्धाज्यं त्रयमेतत् प्रयुक्तं पुरीषग्रहशूलजित्। एकतः-एकस्मिन् शूलजित्त्वपक्षे, पानानुवासनाभ्यङ्गैः प्रयुक्तं तैलं पुरीषग्रहशूलजित् 'सम्पद्यते' इति वाक्यशेषः। कथमेवम्? इत्याह-तद्धीत्यादि। तत्-तैलं, यस्मात्सर्वेषां वातजितामभ्यं-प्रधानम्। शूलं च विगुणोऽनिलः-प्रकुपितः पवनो, नापरः कश्चित्। शूलानिलयोः कार्यकारणभावाद्व्यतिरेके सत्यपि शूलस्य वातकार्यस्य वातप्रकोपे सत्यविनाभावित्वं सूचयितुं शूलं च विगुणोऽनिल इत्येवमुक्तम्। कुपितश्चेद्वायुरुत्पन्नमेव शूलमित्यर्थः।

वायोर्वैगुण्ये कोपे धातुक्षय एवात्र हेतुः। अत एवाह-

धात्वन्तरोपमर्देद्वश्चलो व्यापी स्वधामगः।
तैलं मन्दानलस्यापि युक्त्या शर्मकरं परम्॥४६॥
वाय्वाशये सतैले हि बिम्बिसी नावतिष्ठते।

स०-वायुमपेक्ष्यान्ये पित्तश्लेष्मादयो-धात्वन्तराः, तेषामुपमर्दः-अन्यथाभावः, तेन इद्धः-उद्धतः, चलो-वाय्वाख्यः, स व्यापी-सकलशरीरव्यापनशीलोऽपि, स्वधामगः-पक्वाशयस्थः, तत्राधिक्येन तस्य वृत्तेः, अस्यामवस्थायामस्यातीसारिणस्तैलं मन्दानलस्यापि युक्त्या-योगविशेषेण, परं-अतिशयेन, शर्मकरम्, रोगस्य दुःखहेतोः शमनात्। अपिशब्दात्किमुदीप्ताग्नेरतीसारिणो न सुखकरं भवति? अत्रैव हेतुमाह-वाय्वाशये-पक्वाशयाख्ये, सतैले बिम्बिसी-प्रवाहिका, नावतिष्ठतेस्थितिं न प्राप्नोति।

क्षीने मले स्वायतनच्युतेषु
दोषान्तरेष्वीरण एकवीरे।
को निष्टनन्प्राणिति कोष्ठशूली
मान्तर्वहिस्तैलपरो यदि स्यात्॥४७॥

स०-मले-पुरीषाख्ये, क्षीणे तथा दोषान्तरेषु-वातविवर्जितेषु पित्तकफादिषु, आयतनच्युतेषु-स्वाधारभष्टेषु, व्यक्त्यपेक्षया बहुवचनम्, ईरणे-वायौ, एकवीरे-एकनायके, शेषदोषाणां स्वस्थानभ्रष्टत्वात्कोऽतीसारी निष्टनन्-प्रवाहिकां कुर्वन्, प्राणीति ?-न कश्चिज्जीवति। यदि नान्तर्बहिः-उभयत्र, पानानुवासनाभ्यङ्गैः, तैलपरः-अतिशयेन तैलसैवी, न स्यात्। आक्रन्दनपूर्वं सशूलमुपवेशनं-निष्टनन्नुच्यते। इन्द्रवज्रावृत्तम्।

गुदरुग्भ्रंशयोर्युञ्ज्यात्सक्षीरं साधितं हविः॥४८॥
रसे कोलाम्लचाङ्गेर्योर्दध्नि पिष्टे च नागरे।

स०-गुदरुजि गुदभ्रंशे च घृतं सक्षीरं कोलादिरसे दध्नि नागरे च कल्किते पक्वं युञ्ज्यात्। अत्र च क्षीरं सर्पिःप्रमाणं घृतात्कोलादिरसादिकं चतुर्गुणं शुण्ठीतश्चतुर्गुणं घृतमिति पाकक्रमः।

तैरेव चाम्लैः संयोज्य सिद्धं सुश्लक्ष्णकल्कितैः॥४९॥
धान्योषणबिडाजाजीपञ्चकोलकदाडिमैः।

स०-तैरेव-पूर्वोक्तैः कोलादिभिरम्लैः, संयोज्य सूक्ष्मरजीकृतैश्च धान्यकादिभिः सिद्धं घृतं पूर्वगुणम्।

योजयेत्स्नेहबस्तिं वा दशमूलेन साधितम्॥५०॥
शठीशताह्वाकुष्ठैर्वा वचया चित्रकेण वा।

स०-गुदशूली च दशमूलेन साधितं हविः-घृतं, स्नेहबस्तिं वा योजयेत्। शठ्यादिभिर्वा साधितं वचया वा साधितं चित्रकेण वा साधितं योजयेत्। तच्च पूर्वगुणम्।

प्रवाहणे गुदभ्रंशे मूत्राघाते कटिग्रहे॥५१॥

मधुराम्लैः श्रृतं तैलं घृतं वाऽप्यनुवासनम्।

स०-प्रवाहणादिषु मधुराम्लैः श्रृतं तैलं घृतं वाऽनुवासनं यौजयेत्।

प्रवेशयेद्गुदं ध्वस्तमभ्यक्तं स्वेदितं मृदु॥५२॥

कुर्याच्च गोःफणाबन्धं मध्यच्छिद्रेण चर्मणा।

स०-गुदं ध्वस्तं सधभ्यक्तं स्वेदितं च मृदु कृत्वाऽन्तः प्रवेशयेत्। गोःफणाबन्धं चर्मणा मध्यच्छिद्रवता कुर्यात्।

पञ्चमूलस्य महतः क्काथं क्षीरे विपाचयेत्॥५३॥

उन्दुरं चान्त्ररहितं तेन वातघ्नकल्कवत्।

तैलं पचेद्गुदभ्रंशं पानाभ्यङ्गेन तज्जयेत्॥५४॥

स०-महतः पञ्चमूलस्य-बिल्वादेः क्काथं तैलसमं कृत्वा क्षीरे विपाचयेत्। उन्दुरुं चान्त्ररहितं तस्मिन्नेव क्षीरे विपाचयेत्। तेनैव क्षीरेण् तैरेण तैलं पचेत्। किम्भूतम्? वातघ्नकल्कवत्। वातघ्नानां-रास्नैरण्डादीनां कल्कः, स यस्यास्ति वातघ्नकल्कवत्। उन्दुरोत्र रास्नाद्यघृतानुसारेणप्रमेणं निरुप्य कार्यम्। तत्रैवं पठ्यते (चरके चि.अ.१८/४२)-"तुलार्धं चाजमांसस्य" इति। एवं मायुरादिष्वपि घृतेषु (ह्र.उ.अ.२४/४७) मयूरादीनां प्रमाणं चिन्त्यम्। तेन तैलं पचेदिति वचनाच्च क्षीरं तैलाच्चतुर्गुणं कायम्। अत्र द्रवस्यापरस्याभावात्तैलाच्च द्रवं चतुर्गुणं कार्यमिति पाकक्रमः। तस्मान्नान्यस्नेहवदत्र क्षीरं ग्राह्यम्। अन्यत्र ह्येवमधीतम्-"द्रव्याच्चतुर्गुणः स्नेहः स्नेहात्क्काथश्चतुर्गुणः। क्षीरं स्नेहसमं" इति। बहुक्षीरत्वेन वातकार्यस्य गुदभ्रंशाख्यस्य शीघ्रं शमं करोति, इति चतुर्गुणमेवात्र क्षीरं न्याय्यम्।

पैत्ते तु सामे तीक्ष्णोष्णवर्ज्यं प्रागिव लङ्घनम्।

स०-पैत्ते त्वतीसारे सामे प्रागिव-यथा वातातीसारे पूर्वं लङ्घनं शरीरलाघवं कर्तुं यत्कर्म द्रव्यं वा निर्दिष्टं तत्सर्वं, तीक्ष्णोष्णवर्ज्यं 'अस्मिन् कार्यम्' इति शेषः।

तृड्वान् पिबेत् षडङ्गाम्बु सभूनिम्बं ससारिवम्॥५५॥

पेयादि क्षुधितस्यान्नमग्निसन्धुक्षणं हितम्।

बृहत्यादिगणाभीरुद्विबलाशूर्पपर्णिभिः॥५६॥

स०- स पित्तातीसारी तृड्वान् षडङ्गाम्बु-ज्वरचिकित्सितोक्तं (हृ. चि. अ. १/१५), भूनिम्बसारिवाभ्यां सहितं पिबेत्, अर्धमष्टाङ्गजलं तेन पेयमित्यवतिष्ठते। क्षुधितस्य-अतिशयेन बुभुक्षितस्य, पेयाद्यन्नमग्निसन्धुक्षणं हितम्। [किम्भूतम्?] बृहत्यादिना गणेनाभीरुणा तथा बलाद्वयेन शूर्पपर्णीद्वयेन च साधितम्।

पाययेदनुबन्धे तु सक्षौद्रं तण्डुलाम्भसा।

कटुजस्य फलं पिष्टं सवल्कं सघुणप्रियम्॥५७॥

पाठावत्सकबीजत्वग्दार्वीग्रन्थिकषुण्ठि वा।

क्वाथं वाऽतिविषाबिल्ववत्सकोदीच्यमुस्तजम्॥५८॥

अथवाऽतिविषामूर्वानिशेन्द्रयवताक्ष्र्यजम्।

समध्वतिविषाशुण्ठीमुस्तेन्द्रयवकङ्कलम्॥५९॥

स० -एवं लङ्घनपेयादिके कृतेऽप्यनुबन्धेऽतीसारस्य सति, तमतीसारिणं कुटजस्य फलं-शक्रयवाख्यं, पिष्टं सवल्कं-प्रकृत्त्वात्तस्यैव कुटजस्य त्वचा युक्तं, तथा सघुणप्रियं तथा सक्षौद्रं तण्डुलाम्भसा पाययेत्। अथवा, पाठादिपिष्टं तण्डुलाम्भसा सक्षौद्रं तमतीसारिणं

पाययेत्। अथवा, क्वाथमतिविषादिजं तं पाययेत्। अथवा, अतिविषामूर्वादिजं पाययेत्। तार्क्ष्य-रसाञ्जनम्। समध्विस्यादि। समाक्षिकमतिविषादिकं क्वाथीकृतं वा पाययेत्।

पलं वत्सकबीजस्य श्रपयित्वा रसं पिबेत्।

यो रसाशी जयेच्छीघ्रं स पैत्तं जठरामयम्॥६०॥

मुस्ताकषायमेवं वा पिबेन्मधुसमायुतम्।

सक्षौद्रं शाल्मलीवृन्तकषायं वा हिमाह्वयम्॥६१॥

स० -वत्सकबीजस्य वा पलं जलेन क्वाथयित्वा तद्रसं यो मांसरसाशी सन् पिबेत् स पित्तजमतीसारं जयेत्। एवं प्राग्वत्, मुस्ताकषायं-मुस्तानां पलं श्रपयित्वा, मधुसमायुतं रसाशी सन् क्वाथं पिबेत् स पैत्तं जठरामयं जयेत्। शाल्मलीवृन्तकषायं वा हिमाह्वयं-शीतकषायं, सक्षौद्रं वा पिबेत्।

किराततिक्तकं मुस्तं वत्सकं सरसाञ्जनम्।

कटङ्कटेरी ह्रीबेरं बिल्वमध्यं दुरालभा॥६२॥

तिला मोचरसं रोध्रं समङ्गा कमलोत्पलम्।

नागरं धातकीपुष्पं दाडिमस्य त्वगुत्पलम्॥६३॥

अर्धश्लोकैः स्मृता योगाः सक्षौद्रास्तण्डुलाम्बुना।

स ० -किराततिक्तादयश्चत्वारो योगा अर्धश्लोकैः स्मृताः समाक्षिकास्तण्डुलजलेन योज्याः।

निशेन्द्रयवरोध्रैलाक्वाथः पक्वातिसारजित्॥६४॥

स० -निशादिक्वाथः पक्वातीसारजित्।

रोध्राम्बष्ठाप्रियङ्ग्वादिगणांस्तद्वत् पृथक् पिबेत्।

स० -रोध्रादीन् गणान् पृथक् [तद्वत् -] समाक्षिकांस्तथैव तण्डुलाम्भसा, पिबेत्।

कट्वङ्गवल्कयष्ट्याह्वफलिनीदाडिमाङ्कुरैः॥ ६५॥

पेयाविलेपीखलकान् कुर्यात्सदधिदाडिमान्।

तद्वद्दधित्थबिल्वाम्रजम्बुमध्यैः प्रकल्पयेत्॥ ६६॥

स ० -कट्वङ्गत्वगादिभिः पेयादीन् सदधिदाडिमान् कुर्यात्। तथैव दधित्थादिभिः पेयादीन् सदधिदाडिमान् कल्पयेत्। दधित्थः-कपित्थः।

अजापयः प्रयोक्तव्यं निरामे, तेन चेच्छमः।

दोषाधिक्यान्न जायेत बलिनं तं विरेचयेत्॥ ६७॥

स० -अजापयः पथ्यं निरामे स्मृतम्। तेन-अजाक्षीरेण, यदि दोषाधिक्याद्धेतोः शमो न भवेत् तदा तं बलवन्तं विरेचयेत्-न दुर्बलम्।

व्यत्यासेन शकृद्रक्तमुपवेश्येत योऽपि वा।

पलाशफलनिर्यूहं युक्तं वा पयसा पिबेत्॥ ६८॥

ततोऽनु कोष्णं पातव्यं क्षीरमेव यथाबलम्।

प्रवाहिते तेन मले प्रशाम्यत्युदरमयः॥ ६९॥

स० -व्यत्यासः-परस्परक्षेपणम्, शकृद्रक्तं क्षिपति रक्तं शकृत्क्षिपत्येवं व्यत्यासः, तेन य उपवेश्येत स पलाशफलक्काथं केवलं पिबेदथवा पयसा युक्तम्। ततः-तत्कषायं

पीत्वाऽनन्तरं, कोष्णं क्षीरमेव यथा-बलं-बलानतिक्रमेण, पेयम्। तेनक्षीरेण, मले प्रवाहिते-निःसारिते सति, अतीसारः शाम्यति।

पलाशवत्प्रयोज्या वा त्रायमणा विशोधनी।

स० -पलाशं यथा तथा त्रायमाणा विशोधनाय प्रयोज्या।

संसर्ग्यां क्रियमाणायां शूलं यद्यनुवर्तते॥ ७०॥
स्रुतदोषस्य तं शीघ्रं यथावह्न्यनुवासयेत्।

स० -स्रुतदोषस्य-अपचितमलस्यातीसारिणः, संसर्ग्यां क्रियमाणायां-पेयादिके क्रमे विधीयमाने, यदि शूलमनुवर्ततेनिर्वृत्तिं न याति, तं-आतुरं, आशु यथावह्नि-अग्न्यनतिक्रमेण, अनुवासयेत्।

तदेवानुवासनघृतमाह-

शतपुष्फवरीभ्यां च बिल्वेन मधुकेन च॥ ७१॥
तैलपादं पयोयुक्तं पक्कमन्वासनं घृतम्।

स० -शतपुष्पादिभिस्तैलपादं क्षीरयुतं घृतं पक्कमनुवासनं स्यात्।

अशान्तावित्यतीसारे पिच्छाबस्तिः परं हितः॥ ७२॥

स ० -इति-अनेन प्रकारेण कृतेन, अतीसारस्याशान्तौ सत्यां परं-अनन्तरं, पिच्छाबस्तिः-वक्ष्यमाणो, हितः। अल्पया मात्रया निरुहाख्यो बस्तिः-पिच्छाबस्तिः।

परिवेष्ट्य कुशैराद्रैरार्द्रवृन्तानि शाल्मलेः।

कृष्णमृत्तिकयाऽऽलिप्य स्वेदयेद्गोमयाग्निना॥७३॥

मृच्छोषे तानि सङ्कृत्य तत्पिण्डं मुष्टिसम्मितम्।

मर्दयेत्पयसः प्रस्थे पूतेनास्थापयेत्ततः॥७४॥

नतयष्ट्याह्वकल्काज्यक्षौद्रतैलवताऽनु च।

स्नातो भुञ्जीत पयसा जाङ्गलेन रसेन वा॥७५॥

पित्तातिसारज्वरशोफगुल्म

समीरणास्रग्रहणीविकारान्।

जयत्ययं शीघ्रमतिप्रवृत्तिं

विरेचनास्थापनयोश्च बस्तिः॥७६॥

स ० -आर्द्रैः-अशुष्कैर्दर्भैः, शाल्मलेरार्द्रवृन्तानि-कुसुमबन्धनानि, परिवेष्ट्य ततः कृष्णमृत्तिकयाऽऽलिप्य गोमयाग्निना स्वेदयेत्। मृच्छोषे सति तानि सञ्चूर्ण्य, तं पिण्डं मुष्टिसम्मितं-पलप्रमाणं, पयसः प्रस्थे मर्दयेत्। तेन च पूतेनानन्तरं नतादिमताऽऽस्थापयेत्। नतं-तगरम्। पुटपाकानां च सर्वेषामयमेव विधिः। आस्थापितश्च पश्चात्। स्नातः पयसा भुञ्जीत, सात्म्यादिवशाज्जाङ्गलरसेन वा। अयं-बस्तिः प्रयुक्तं, पित्तातीसारादीन् विरेचनास्थापनयोश्चातिप्रवृत्तिं-दोषाणामतियोगं, जयति। एतदुक्तं भवति,-बहुदोषस्य या प्रवृत्तिर्विरेचनविषये आस्थापनविषये वा तां च प्रयुक्ताऽयं जयति। उपजातिः।

फाणितं कुटजोत्थं च सर्वातीसारनाशनम्।

वत्सकादिसमायुक्तं साम्बष्ठादि समाक्षिकम्॥७७॥

स० -कुटजोत्थं च फाणितं वत्सकादियुक्तमम्बष्ठादिसहितं माक्षीकयुक्तं सर्वातीसारः-आमातीसारः पक्वातीसारश्च, तस्य नाशनं स्यात्।

नीरुङ्निरामं दीप्ताग्नेरपि सास्रं चिरोत्थितम्।

नानावर्णमतीसारं पुटपाकैरुपाचरेत्॥७८॥

स० -नीरुक् चासौ निरामश्च नीरुङ्निरामस्तमतीसारं, अपि सास्रं-अपिशब्दात्किमुत निरस्रम्?, तं तथाभूतं चोरोत्थितं, तथा नानावर्णं-अनेकवर्णं, दीप्ताग्नेः पुटपाकैरुपाचरेत्।

त्वक्पिण्डाद्दीर्घवृन्तस्य श्रीपर्णीपत्रसंवृतात्।

मृल्लिप्तादग्निना स्विन्नाद्रसं निष्पीडितं हिमम्॥७९॥

अतीसारी पिबेद्युक्तं मधुना सितयाऽथवा।

स ०-त्वचः पिण्डस्त्वक्पिण्डः, दीर्घवृन्तस्य त्वक्पिण्डः, तस्मात्, काश्मर्यपत्रसञ्छादितात् मृल्लिप्तात् सामान्योक्तावपि कृष्णमृत्तिकया लिप्तादिति वेद्यम्। प्रागुक्तं हि (श्लो.७३)-"कृष्णमृत्तिकयाऽऽलिप्य" इति। अनन्तरमग्निना स्विन्नाद्रसं निष्पीडितं शीतं कृत्वाऽतीसारी मधुना युक्तमथवा सितया युक्तं पिबेत्। दीर्घवृन्तः-श्योनाकः।

एवं क्षीरिद्रुमत्वग्भिस्तत्प्ररोहैश्च कल्पयेत्॥८०॥

कट्वङ्गत्वग्घृतयुता स्वेदिता सलिलोष्मणा।

सक्षौद्रा हन्त्यतीसारं बलवन्तमपि द्रुतम्॥८१॥

स ०-एवं-अनेन प्रकारेण, क्षीरिद्रुमाणां त्वग्भिस्तत्प्ररोहैः-कोमलैर्विगतमूलैश्च, कल्पयेत्। प्ररोहाः-अङ्कुरा इत्यन्ये। श्योनाकत्वक् घृतयुता तथोष्णसलिलोष्मणा स्वेदिता माक्षिकयुक्ताऽतीसारं बलवन्तमपि शीघ्रं हन्ति।

पित्तातिसारी सेवेत पित्तलान्येव यः पुनः।

रक्तातिसारं कुरुते तस्य पित्तं सतृड्ज्वरम्॥८२॥

दारुणं गुदपाकं च तत्र छागं पयो हितम्।

पद्मोत्पलसमङ्गाभिः श्रृतं मोचरसेन च॥८३॥

सारिवायष्टिरोध्रैर्वा प्रसवैर्वा वटादिजैः।

सक्षौद्रशर्करं पाने भोजने गुदसेचने॥८४॥

स०-पित्तातीसारी पित्तलान्येवान्नपानानि यः सेवते, तस्य पित्तं कर्तृ रक्तातीसारं कुरुते। किम्भूतम्? तृष्णाज्वरयुतम्। तथा दारुणं गुदपाकं करोति। तत्र-एवंविधेऽतीसारे, छागं क्षीरं पद्मादिभिर्मोचरसेन च श्रृतं हितम्। अथवा, सारिवादिभिः श्रृतं छागं क्षीरं हितम् अथवा, वटादिजैः पल्लवैः श्रृतं क्षौद्रशर्करान्वितं पाने भोजने गुदसेके च छागं पयो हितम्।

तद्वद्रसादयोऽनम्लाः साज्याः पानान्नयोर्हिताः।

काश्मर्यफलयूषश्च किञ्चिदम्लः सशर्करः॥८५॥

स०-तथैव रसयूषादयोऽनम्लाः सघृताः पानान्नयोर्हिताः। काश्मर्यफलयूषश्च किञ्चिदम्लः सशर्करो हितः।

पयस्यर्धोदके छागे ह्रीवेरोत्पलनागरैः।

पेया रक्तातिसारघ्नी पृश्निपर्णीरसान्विता॥८६॥

प्राग्भक्तं नवनीतं वा लिह्यन्मधुसितायुतम्।

स०-छागे पयस्यर्धोदके वालकोत्पलनागरैः पृश्निपर्णीक्काथेन च युक्ता पेया रक्तातीसारं हन्ति। अथवा नवनीतं प्राग्भक्तं मधुशर्करान्वितं लिह्यात्।

बलिन्यस्रेऽस्रमेवाजं मार्गं वा घृतभर्जितम्॥८७॥

क्षीरानुपानं क्षीराशी त्र्यहं क्षीरोद्भवं घृतम्।

कपिञ्जलरसाशी वा लिहन्नारोग्यमश्नुते॥८८॥

स०-प्रवृद्धे रक्ते छागं रक्तमथवा मागं-मृगसम्बन्धि रक्तं, घृतभर्जितं भुञ्जीत, एवकारान्न त्वपरं किञ्चिदजस्य मृगस्य चेति गम्यते। उभयमपि क्षीरानुपानं क्षीराशी च सन् भुञ्जीत। अथवा, घृतं त्र्यहं लिहन् कपिञ्जलरसाशनो नर आरोग्यं प्राप्नोति।

पीत्वा शतावरीकल्कं क्षीरेण क्षीरभोजनः।
रक्तातिसारं हन्त्याशु तया वा साधितं घृतम्॥८९॥

स०-शतावरीकल्कं क्षीरेण पीत्वा क्षीराशी सन् रक्तासारं द्रागेव पराकरोति। अथवा, तया-शतावर्या, पक्वं घृतं रक्ता तीसारं हन्ति।

लाक्षानागरवैदेहीकटुकादार्विवल्कलैः।
सर्पिः सेन्द्रयवैः सिद्धं पेयामण्डावचारितम्॥९०॥
अतीसारं जयेच्छीघ्रं त्रिदोषमपि दारुणम्।

स०-लाक्षादिभिः सिद्धं घृतं पेयामण्डेनावचारितं शीघ्रं त्रिदोषमप्यतीसारं घोरं जयति। अपिशब्दाद्रक्तातीसारमपि।

कृष्णमृच्छङ्खयष्ट्याह्वक्षौद्रासृक्तण्डुलोदकम्॥९१॥
जयत्यस्रं प्रियङ्गुश्च तण्डुलाम्बुमधुप्लुता।

स०-कृष्णमृदादिकं तण्डुलजलालोडितं रक्तं जयति। तथा, तण्डुलाम्बुमधुयुक्ता प्रियङ्गू रक्तं जयति।

कल्कस्तिलानां कृष्णानां शर्करापाञ्चभागिकः॥९२॥

ओजेन पयसा पीतः सद्यो रक्तं नियच्छति।

स०-पञ्चमो भागः पञ्चभागः, स यस्यास्ति स पाञ्चभागिकः। कोऽसौ? कृष्णातिलानां कल्कः, शर्करायाः पाञ्चभागिकः कृष्णातिलानां कल्कः छगलीक्षीरेण पीतः सन् सद्यो रक्तं नियच्छति।

पीत्वा सशर्कराक्षौद्रं चन्दनं तण्डुलाम्बुना॥९३॥

दाहतृष्णाप्रमोहेभ्यो रक्तस्रावाच्च मुच्यते।

स०-तण्डुलजलेन चन्दनं शर्करामाक्षिकान्वितं पीत्वा दाहादिभ्यो मुच्यते। मुच्यत इति कर्मकर्तरि तङ्।

गुदस्य दाहे पाके वा सेकलेपा हिता हिमाः॥९४॥

स०-गुदस्य दाहे पाके च सति सेकलेपा हिमा हिताः।

अल्पाल्पं बहुशो रक्तं सशूलमुपवेश्यते।

यदा विबद्धो वायुश्च कृच्छ्राच्चरति वा न वा॥९५॥

पिच्छाबस्तिं तदा तस्य पूर्वोक्तमुपकल्पयेत्।

स०-अल्पमल्पं पुनः पुनः शूलेन सह यश्च बहुशो रक्तमुपवेश्यते। वायुश्च यद विबद्धो-नानुलोमगः, अत एव कृच्छ्रेण चरति न वा चरति तदा तस्य-पुरुषस्य, पूर्वोक्तं-"त्वक्पिण्डात्" (श्लो.७९) इत्यादिकं पिच्छाबस्तिमुपकल्पयेत्।

पल्लवान् जर्जरीकृत्य शिंशिपाकोविदारयोः॥९६॥

पचेद्यवांश्च स क्काथो घृतक्षीरसमन्वितः।

पिच्छास्रुतौ गुदभ्रंशे प्रवाहणरुजासु च॥९७॥

पिच्छाबस्तिः प्रयोक्तव्यः क्षतक्षीणबलावहः।

स ०-शिंशिपाकोविदारयोः पल्लवान् जर्जरीकृत्य यवांश्च पचेत्। स क्काथो घृतक्षीरसंयुक्तः पिच्छास्रुत्यादिषु पिच्छाबस्तिः प्रयोक्तव्यः। स च क्षतक्षीणानां बलप्रदः।

प्रपौण्डरीकसिद्धेन सर्पिषा चानुवासनम्॥९८॥

स० -प्रपौण्डरीकपक्केन घृतेनानुवासनं च प्रयोक्तव्यम्।

रक्तं विड्वहितं पूर्वं पश्चाद्वा योऽतिसार्यते।

शतावरीघृतं तस्य लेहार्थमुपकल्पयेत्॥९९॥

स ०-रक्तं विशा सहितमथवा पूर्वं पश्चाद्वा योऽतिसार्यते तस्य लेहार्थं शतावरीघृतकल्पयेत्।

शर्करार्धांशकं लीढं नवनीतं नवोद्धृतम्।

क्षौद्रपादं जयेच्छीघ्रं तं विकारं हिताशिनः॥१००॥

स ०-नवनीतं नवं शर्कराया आर्धभागेन युक्तं माक्षिकचतुर्थप्रमाणं माक्षिकस्य चतुर्थभगेनान्वितं लीढं तं-पूर्वोक्तं, विकारं हिताहारस्य जयेत्।

न्यग्रोधोदुम्बराश्वत्थशुङ्गानापोथ्य वासयेत्।

अहोरात्रं जले तप्ते घृतं तेनाम्भसा पचेत्॥ १०१॥

तदर्धशर्करायुक्तं लेहयेत्क्षौद्रपादिकम्।

अधो वा यदि वाऽयूर्ध्वं यस्य रक्तं प्रवर्तते॥ १०२॥

स०-अधो वा ऊर्ध्वं वा यस्य रक्तं प्रवर्तते, स न्यग्रोधादीनां शुङ्गान् आपोथ्य-जर्जरीकृत्य, तप्ते जलेऽहोरात्रं वासयेत्। तेनाम्बुना घृतं पचेत्। तच्च-घृतं, शर्कराया अर्धभागेन युक्तं माक्षिकचतुर्थांशकं लेहयेत्। पूर्वगुणम्।

श्लेष्मातिसारे वातोक्तं विशेषादामपाचनम्।

कर्तव्यमनुबन्धेऽस्य पिबेत्पक्त्वाऽग्निदीपनम्॥ १०३॥

बिल्वकर्कटिकामुस्तप्राणदाविश्वभेषजम्।

वचाविडङ्गभूतीकधानकामरदारु वा॥ १०४॥

अथवा पिप्पलीमूलपिप्पलीद्वयचित्रकम्।

स०-श्लेष्मतीसारे वातातीसारोक्तं यदामपाचनं तद्विशेषातत्र कर्तव्यम्, न तथा वातातीसारोक्तोऽन्य उपक्रमः कार्य इति विशेषशब्दस्यार्थः। अस्य-अतीसारस्य, अनुबन्धे-चिकित्सायां सम्यक् कृतायामप्यशमे सति, बिल्वकर्कटिकादिकं पक्त्वा पानमग्निदीपनं पिबेत्। अथवा, वचादीनि पिबेत्। अथवा, पिप्पलीमूलादिकं पक्त्वाऽग्निदीपनं पिबेत्।

पाठाग्निवत्सकग्रन्थितिक्ताशुण्ठीवचाभयाः॥ १०५॥

क्वथिता यदि वा पिष्टाः श्लेष्मातीसारभेषजम्।

स०-एते पाठादयः क्वथिताः पाचनन्यायेन, चूर्णिता वा श्लेष्मातीसारमेषजमिति। अत्रापि वक्ष्यमाणं सिंहावलोकनन्यायेन 'कोष्णवारिणा इत्येतत्सम्बध्यते।

सौवर्चलवचाव्योषहिङ्गुप्रतिविषाभयाः॥१०६॥

पिबेच्छ्लेष्मातिसारार्तश्चूर्णिताः कोष्णवारिणा।

स० -सौवर्चलादींश्चूर्णितान् कोष्णजलेन श्लेष्मतीसारार्तः पिबेत्।

मध्यं लीढ्वा कपित्थस्य सव्योषक्षौद्रशर्करम्॥१०७॥

कट्फलं मधुयुक्तं वा मुच्यते जठरामयात्।

स० -कपित्थस्य मध्यं सव्योषमाक्षिकशर्करं लीढ्वा, अथवा कट्फलं माक्षिकान्वितं लीढ्वा, जठररोगान्मुच्यते।

कणां मधुयुतां लीढ्वा तक्रं पीत्वा सचित्रकम्॥१०८॥

भुक्त्वा वा बालबिल्वानि व्यपोहत्युदरामयम्।

स० -कणां माक्षिकान्वितां लीढ्वा तक्रं च सचित्रिकं पीत्वा बालबिल्वानि वा भुक्त्वा जठररोगं व्यपोहति। "उपसर्गादस्यत्यूह्योर्वा वचनम् (र्वेति बाट्यम्)" इति वाऽतङ्।

पाठामोचरसाम्भोदधातकीबिल्वनागरम्॥१०९॥

सुकृच्छ्रमप्यतीसारं गुडतक्रेण नाशयेत्।

स० -पाठादि गुडतक्रेण पीत्वाऽतीसारं सुकृच्छ्रमपि नाशयेत्। श्लेष्मातीसारे प्रकृतेऽतीसारग्रहणमन्यस्यापि निरामस्य तन्नाशनमिति द्योतनार्थम्।

यवानीपिप्पलीमूलचातुर्जातकनागरैः॥११०॥

मरीचाग्निजलाजाजीधान्यसौवर्चलैः *समैः।

*वृषाम्लधातकीकृष्णाबिल्वदाडिमदीप्यकैः॥ १११॥

त्रिगुणैः षड्गुणसितैः *कपित्थाष्टगुणैः कृतः।

चूर्णोऽतीसारग्रहणीक्षयगुल्मगलामयान्॥ ११२॥

कासश्वासाग्निसादार्शःपीनसारोचकान् जयेत्।

स० -यवान्यादिभिर्द्रव्यैः समैर्वृक्षाम्लादिभिस्त्रिगुणैर्मूलद्रव्यापिक्षया। किम्भूतैरैतैः ? षड्गुणा सिता येषां वृक्षाम्लादीनां त एवं तैः। षड्गुणसितैश्चूर्णः कृत इति योज्यम्। एवं शर्कराभागानां शतमष्टाधिकं भवति। क्व(कैः) कृतश्चूर्णः ? मूलद्रव्यापेक्षयाऽष्टागुणैः कपित्थैः कपित्थैः। केचित्त्वेवं पठन्ति-'षड्गुणसिते कपित्थेऽष्टगुणे' इति। तत्र चेदं व्याख्यानम्-मूलद्रव्यापेक्षया कपित्थेऽष्टगुणे। तथा च किम्भुते ? षड्गुणसिता यस्मात्तथा तस्मिन्, एवं शर्कराभागा अष्टचत्वारिंशत्स्युरिति। अयं चूर्णोऽतीसारादिन् जयेत्।

कर्षोन्मिता तवक्षीरी चातुर्जातं द्विकार्षिकम्॥ ११३॥

यवानीधान्यकाजाजीग्रन्थिव्योषं पलांशकम्।

पलानि दाडिमादष्टौ सितायाश्चैकतः कृतः॥ ११४॥

गुणैः कपित्थाष्टकवच्चूर्णोऽयं दाडिमाष्टकः।

भोज्यो वातातिसारोक्तैर्यथावस्थं खलादिभिः॥ ११५॥

स० -तुगाक्षीरी चतुर्जातं च कर्षोन्मितं-कर्षप्रमाणम्। यवानी च धान्यकं चाजाजी च यवानीचान्यकाजाजि द्विकार्षिकम्। ग्रन्थिश्च व्योषं च तत्पलांशकं-पलभागिकम्। पलानि दाडिमादष्टौ, चशब्दात्सिताया अप्यष्टौ पलानि। एवमयमेकतः-एकस्मिन्, कृतश्चूर्णो दाडिमाष्टकः-एतत्संज्ञः। तेन चतुर्जातकमेकमेवास्य समुदायाद्यथोक्त एक एव भागः। व्योषमप्येकमेवास्यापि समुदायाद्यथोक्त एक एव भागः। एवं द्रव्य समुदायस्यैकत्वे कल्पनाऽप्यत्राप्याचार्यस्याभिमतैव। यथा (हृ. चि. अ. १९/४३)-"त्रिकट्वुत्तमातिलरुष्कराज्यमाक्षिकसितोपलाविहिता। गुलिका रसायनं कुष्ठजिच्च वृष्या च सप्तसमा॥" इति। सप्तचेति तुगाक्षीर्येका, चतुर्जातं द्वितीयम्, यवानी तृतीया, धान्यकं चतुर्थम्, अजाजी पञ्चमी, पिप्पली-मूलं षष्ठम्, व्योषं सप्तमम्, दाडिममष्टममिति। अन्ये त्वेवं

व्याचक्षते,-पलमिति प्रकृतम्। दाडिममष्टकं-अष्टपलप्रमाणं, यस्मिन् चूर्णे स दाडिमाष्टक इति। यथा चाक्षिरोगे (हृ.उ.अ. १६/५)-"सितमरिचभागमेकं चतुर्मनोह्वं" इत्यत्र। तच्चूर्णं वातातीसारोक्तैरवस्थावशात् खलपेयादिभिः सह भोजनीयम्।

सविडङ्गः समरिचः सकपित्थः सनागरः।

चाङ्गेरीतक्रकोलाम्लः खलः श्लेष्मातिसारजित्॥ ११६॥

स० -खलः श्लेष्मातीसारजित्। किम्भूतः ? विडङ्गादियुतः चाङ्गेरीतक्रकोलैरम्लः।

क्षीणे श्लेष्मणि पूर्वोक्तमम्लं लाक्षादि षट्पलम्।

पुराणं वा घृतं दद्याद्यवागूमण्डमिश्रितम्॥ ११७॥

स० -क्षीणे श्लेष्मणि पूर्वोक्तमम्लं घृतं-"गुदरुग्भ्रंशयोर्युञ्जयात् सक्षीरं साधितं हविः।" (श्लो.४८) इत्यादि, तथा लाक्षादि-"लाक्षानागरवैदेही" (श्लो. ९०) इत्यादि, षट्पलं-यक्ष्मोक्तम् (हृ. चि. अ. ५/२२), पुराणं वा घृतं यवागूमण्डमिश्रितं, दद्यात्।

वातश्लेष्मविबन्धे वा स्रवत्यति कफेऽपि वा।

शूले प्रवाहिकायां वा पिच्छाबस्तिः प्रशस्यते॥ ११८॥

वचाबिल्वकणाकुष्ठशताह्वलवणान्वितः।

स० -वातकफविबन्धे, वाऽतिशयेन कफे स्रवति, तथा शूले सति, प्रवाहिकायां वा सत्यां, पिच्छाबस्तिः-पूर्वोक्त एव "पल्लवान् जर्जरीकृत्य" (श्लो. ९६) इत्यादिको, वचादिभिर्युक्तः प्रशस्यते।

बिल्वतैलेन तैलेन वचाद्यैः साधितेन वा॥ ११९॥

बहुशः कफवातार्ते कोष्णेनान्वासनं हितम्।

स० -बिल्वमज्जभ्य उत्पन्नं तैलं बिल्वतैलम्। तेन वचाद्यैः पक्केन, अथवा तैलेन-तिलतैलेन वचाद्यैः साधितेन, उभयेनाप्युष्णेन बहुशोऽनुवासनं कफवातार्ते हितम्।

क्षीणे कफे गुदे दीर्घकालातीसारदुर्बले॥ १२०॥

अनिलः प्रबलोऽवश्यं स्वस्थानस्थः प्रजायते।

स बली सहसा हन्यात्तस्मात्तं त्वरया जयेत्॥ १२१॥

वायोरनन्तरं पित्तं पित्तस्यानन्तरं कफम्।

जयेत्पूर्वं त्रयाणां वा भवेद्यो बलवत्तमः॥ १२२॥

स० -कफे क्षीणे गुदे च दीर्घकालो योऽतीसारस्तेन दुर्बले-बलहीने सति, अनिलः स्वस्थानस्थितः-पायुस्थितः, अवश्यं प्रबलो जायते। सः-वायुः, बलवान् सहसा-झटित्येव, व्यापादयेत्। तस्मात्तं-वायुं, शीघ्रं जयेत्। तं वायुं जित्वाऽनन्तरं पित्तं जयेत्। पित्तस्यानन्तरं कफं जयेत्। अथवा, त्रयाणां मध्ये यो बलवत्तमो दोषस्तमेव पूर्वं जयेत्।

भीशोकाभ्यामपि चलः शीघ्रं कुप्यत्यतस्तयोः।

कार्या क्रिया वातहरा हर्षणाश्वासनानि च॥ १२३॥

स० -भयशोकाभ्यामप्यनिलो यस्मात् कुप्यति, अतस्तयोः-भयशोकातीसारयोः, वातहर क्रिया कार्या। न केवलं वातहरा, हर्षणाश्वासनानि च कार्याणि, भयशोकनिवृत्तये।

यस्योच्चाराद्विना मूत्रं पवनो वा प्रवर्तते।

दीप्ताग्नेर्लघुकोष्ठस्य शान्तस्तस्योदरामयः॥ १२४॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां चतुर्थे चिकित्सित-स्थानेऽतीसारचिकित्सितं नाम नवमोऽध्यायः॥ ९॥

स ० -यस्य-अतीसारिणः पुरुषस्य, उच्चारात्-मलप्रवृत्तेः, विना मूत्रमथवा वातः प्रवर्तते दीप्ताग्नेर्लघुकोष्ठस्य सतः, तस्य जठररोगः शान्त इति।

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टाङ्गहृदय-टीकायां सर्वाङ्गसुन्दराख्यायां चतुर्थे चिकित्सितस्थानेऽतीसारचिकित्सितं नाम नवमोऽध्यायः समाप्तः ॥९॥

****

दशमोऽध्यायः।

अतीसारचिकित्सितादनन्तरं ग्रहणीदोषचिकित्सितमुच्यते, निदानसामान्यात्। तथा च प्रागुक्तम् (हृ. चि. अ. ८/१६४)-"अर्शोतिसारग्रहणीविकाराः" इत्यादि, अत आह-

अथातो ग्रहणीदोषचिकित्सितं व्याख्यास्यमः।

इति ह स्माहुरात्रेयादयो महर्षयः॥

(गद्यसूत्रे॥२॥)

स०-ग्रहण्यामाश्रितो दोषो ग्रहणीदोषः,-तदाश्रितस्थानोदितकारी वाताद्यन्यतमः, तस्य चिकित्सितं ग्रहणीदोषचिकित्सितम्। शेषं पूर्ववत्।

ग्रहणीमाश्रितं दोषमजीर्णवदुपाचरेत्।

अतीसारोक्तविधिना तस्यामं च विपाचयेत्॥१॥

स०-ग्रहणिमाश्रितं दोषमजीर्णवदुपाचरेत्-तत्तुल्यसाधनेन लङ्घनो(नाद्यु)-क्तोपचारादिनोपक्रमेत्। अतीसारोक्तविधिना तस्य-ग्रहणिदोषवतः पुंसो, यथादोषमां विपाचयेत्।

अन्नकाले यवाग्वादि पञ्चकोलादिभिर्युतम्।

वितरेत्पटुलघ्वन्नं पुनर्योगांश्च दीपनान्॥२॥

स०-अन्नकाले-सम्यग् जातायं क्षुधि, यवाग्वाद्यन्नं-पेयाविलेप्योदनलक्षणं, वितरेत्-दद्यात्। किम्भूतम्? पञ्चकोलादिभिर्युतम्। आदिशब्देनान्यैरप्येवंप्रकारैर्द्रव्यैर्दीपनादिगुणयुक्तैर्युक्तम्।

तथा, पटु-लवणम्, लघु-उभयथा मात्रया प्रकृत्या च। पुनः-भूयो, दीपनान् षाडवादीन् योगान् वितरेत्।

दद्यात्सातिविषां पेयामामे साम्लां सनागराम्।
पानेऽतीसारविहितं वारि तक्रं सुरादि च॥३॥

स०-तथा, आमे सति पेयां दद्यात्। किम्भूताम्? नागरातिविषायुताम्। तथा, साम्लां-ईषदम्लाम्। पानेऽतीसारविहितंवारि तक्रं सुरादि च सात्म्यादिवशाद् यथायोग्यं तस्मै दद्यात्।

ग्रहणीदोषिणां तक्रं दीपनग्राहिलाघवात्।
पथ्यं, मधुरपाकित्वान्न च पित्तप्रदूषणम्॥४॥
कषायोष्णविकाशित्वाद्रूक्षत्वाच्च कफे हितम्।
वाते स्वाद्वम्लसान्द्रत्वात्सद्यस्कमविदाहि तत्॥५॥

स०-ग्रहणिदोषिणां तक्रं पथ्यम्। कस्मात्? दीपनग्राहिलाघवात्। दीपनग्राहिशब्दयोरत्र भावप्रधानयोर्निर्देशः, यथा "ह्येकयोर्द्विवचनैकवचने" इत्यत्र। अत एवैतौ भावप्रत्यान्तेन लाघवशब्देन सह निर्दिष्टौ। भाष्यकारस्त्वाह-"द्वन्द्वात्परो यः श्रूयते स सर्वैः सम्बध्यते।" इति। तेन दीपनग्राहिशब्दयोरपि भवप्रत्ययार्थसम्बन्धो भवतीति। मधुरपाकित्वात् पित्तप्रदूषणं च न भवति। नचपदेन प्रकर्षदूषणं पित्तस्य तक्रं निषिध्यते। तेनार्थात् किञ्चित् पित्तकरमित्युक्तं भवति। कषायोष्णविकाशित्वाद्रूक्षत्वाच्च कफे हितम्। तक्रं रूक्षत्वाच्चेति पृथङ्निर्देशाद्रूक्षत्वस्य तक्रगतस्य यथा कफे हितत्वं द्रव्यस्वभावान्न तथा कषायादीनामेतद् द्योतयति। वाते स्वाद्वम्लसान्द्रत्वात्तक्रं पथ्यम्। किम्भूतम्? सद्यस्कं-सद्योविलोडितम्, अत एव न विदाहि। ननु, ग्रहणीदोषिणां तक्रं पथ्यमित्येतावदस्तु। किं हे तु निर्दे शे न? अत्रोच्यते। लघ्वादिगुणेभ्यः प्राङ्निरूपित्तेभ्योऽधिकान् विकाशित्वमधुरपाकादीनभिधातुं दीपनादयोऽपि तत्प्रसङ्गान्निर्दिष्टाः। अपि च, ग्रहणीदोषिणां तक्रं पथ्यम् यथा दीपनादिगुणयोगात्तथान्यदपि यद्द्रव्यमेवंगुणं ग्रहणीदोषचिकित्सिते नोक्तं

तदपि ग्रहणीदोषिणां पथ्यमिति हेतुनिर्देशेन द्योत्यते। द्रव्यस्वभावात्तु विशेषेण ग्रहणीदोषिणां तक्रं पथ्यमिति। एष च न्यायोऽनत्रापि सहेतुकद्रव्यकथने योज्यः। किञ्च यत्तदोर्नित्याभिसम्बन्धादेवंनिर्देशाच्चायमर्थोऽवतिष्ठते, -यदेवंविधं तक्रं तद् ग्रहणीदोषिणां पथ्यम्, नान्याद्रुशं यदनुद्धृतस्नेहमथवाऽर्धोद्धृतस्नेहं तथाऽतिजातत्वादम्लं तथाऽसद्यस्कं विदाहि च, तत्सर्वं ग्रहणीदोषिणामपथ्यमेव। तक्रे च रूक्षस्वाद्वम्लादयो गुणाः परस्परविरुद्धा आपि द्रव्यप्रभावात् कफविजयित्वं वातविजयित्वं च यथायोगं कुर्वन्त्येव स्वं स्वं कर्म, यथा सत्वरजस्तमःसंज्ञा गुणाः।

चतुर्णां प्रस्थमम्लानां त्र्यूषणाच्च पलत्रयम्।

लवणानां च चत्वारि शर्करायाः पलाष्टकम्॥ ६॥

तच्चूर्णं शाकसूपान्नरागादिष्ववचारयेत्।

कासाजीर्णारुचिश्वासहृत्पाण्डुप्लीहगुल्मनुत्॥ ७॥

स ०-अम्लानां चतुर्णां-कोलदाडिमवृक्षाम्लचुक्रिकाणां, प्रस्थम्। केचित्तु वृक्षाम्लाम्लवेतसदाडिमबदराणामित्याहुः। त्रिकटुकात् पलत्रयम्। लवणानां च चत्वारि पलानि। शरकरायाः पलान्यष्टौ। तदेतच्चूर्णं शाकादिष्ववचारयेत्-मिश्रयेत्। तच्च कासादिजित्।

नागरातिविषामुस्तं पाक्यमामहरं पिबेत्।

उष्णाम्बुना वा तत्कल्कं नागरं वाऽथवाऽभयाम्॥ ८॥

ससैन्धवम् वचादिं वा तद्वन्मदिरयाऽथवा।

स ०-नागरादि पाक्यं क्काथयित्वाऽऽमघ्नं पिबेत्। अथवा, तेषां-नागरादीनां, कल्कमुष्णाम्बुना पिबेत्। अथवा, शुण्ठीमुष्णाम्बुना पिबेत् हरीतकीं व। वचादिगणं वा सैन्धवान्वितं तद्वत्-उष्नम्बुना, पिबेत्। वचादिमेव मदिरया वा पिबेत्।

वर्चस्यामे सप्रवाहे पिबेद्वा दाडिमाम्बुना॥९॥

बिडेन लवणं पिष्टं बिल्वचित्रकनागरम्।

सामे कफानिले कोष्ठरुक्करे कोष्णवारिणा॥१०॥

स० -पुरीष आमे तथा सप्रवाहे बिडेनोपलक्षितं लवणं बिडलवणं पिष्टं दाडिमाम्बुना वा पिबेत्। सामे वातकफे कोष्ठरुजाकरे बिल्वादीनि कोष्णवारिणा पिबेत्।

कलिङ्गहिङ्गतिविषावचासौवर्चलाभयम्।

छर्दिहृद्रोगशूलेषु पेयमुष्णेन वारिणा॥११॥

पथ्यासौवर्चलाजाजीचूर्णं मरिचसंयुतम्।

स ० -छर्द्यादिषु कलिङ्गादिकं कोष्णेन वारिणा पेयम्। पथ्यादिकं चूर्णं समरिचमुष्णजलेन पिबेत्। पूर्वगुणम्।

पिप्पलीं नागरं पाठां सारिवां बृहतीद्वयम्॥१२॥

चित्रकं कौटजं क्षारं तथा लवणपञ्चकम्।

चूर्णीकृतं दधिसुरातन्मण्डोष्णाबुकाञ्जिकैः॥१३॥

पिबेदग्निविवृद्ध्यर्थं कोष्ठवातहरं परम्।

स ० -पिप्पल्यादिकं सूक्ष्मरजीकृतं दध्यादिभिरग्निदीप्त्यर्थं पिबेत्। तस्याः सुराया मण्डस्तन्मण्डः। कोष्ठवातहरं चैतच्चूर्णं स्यात्।

पटुनि पञ्च द्वौ क्षारौ मरिचं पञ्चकोलकम्॥१४॥

दीप्यकं हिङ्गुगुलिका बीजपूररसे कृता।

कोलदाडिमतोये वा परं पाचनदीपनी॥१५॥

स० -लवणपञ्चकादिभिर्गुटिका बीजपूररसे कृता कोलदाडिमजले वा कृताऽतिशयेन पाचनी दीपनी च स्यात्।

तालीसपत्रचविकामरिचानां पलं पलम्।
कृष्णातन्मूलयोर्द्वे द्वे पले शुण्ठी पलत्रयम्॥ १६॥
चतुर्जातमुशीरं च कर्षांशं श्लक्ष्णचूर्णितम्।
गुडेन वटकान् कृत्वा त्रिगुणेन सदा भजेत्॥ १७॥
मद्ययूषरसारिष्टमस्तुपेयापयोनुपः।
वातश्लेष्मात्मनां छर्दिग्रहणीपार्श्वहृद्रुजाम्॥ १८॥
ज्वरश्वयथुपाण्डुत्वगुल्मपानात्ययार्शसाम्।
प्रसेकपीनसश्वासकासानां च निवृत्तये॥ १९॥
अभयां नागरस्थाने दद्यात्तत्रैव विघ्नहे।
छर्द्यादिषु च पैत्तेषु चतुर्गुणसितान्विताः॥ २०॥
पक्केन वटकाः कार्या गुडेन सितयाऽपि वा।
परं हि वह्निसम्पर्काल्लघिमानं भजन्ति ते॥ २१॥

स० -तालीसपत्रादीनां प्रत्येकं पलम्। पिप्पली पले द्वे। पिप्पलीमूलस्य द्वे। शुण्ठी पलत्रयम्। चतुर्जातमुशीरं च पृथक् कर्षभागम्। गुडेन त्रिगुणेन वटकान् कृत्वा मद्यादीन् पिबन् सदा भजेत्। किमर्थमित्याह-वातकफात्मकच्छर्द्यादीनां शान्त्यर्थम्। तत्र च (त्रैव)-एतेष्वेव च वटकेषु, विघ्नहे-विघ्नबन्धे सति, आभयां नागरस्थाने दद्यात्। छर्द्यादिषु पूर्वोक्तेषु पित्तोद्भवेषु सत्सु गुडवर्जं चतुर्गुणसितया युक्ता वटकाः कार्याः। वटकानां विधानमाह-पक्केन गुडेन वटकाः कार्याः, सितया वा पक्वया कार्याः। किमिति पक्केन क्रियन्ते? इत्याह-यस्मात्कारणादग्निसम्पर्कात् ते-पटकाः, परं लघुत्वं भजन्ति। लघोर्भावो लघिमा, "पृथ्वादिभ्य इमनिच्।" "टे" इति टिलोपः।

सामचिकित्सामुक्त्वा निरामचिकित्सां विशेषेणाह-

अथैनं परिक्कामं मारुतग्रहणीगदम्।
दीपनीययुतं सर्पिः पाययेदल्पशो भिषक्॥ २२॥
किञ्चित्सन्धुक्षिते त्वग्नौ सक्तविण्मूत्रमारुतम्।
ह्यहं त्र्यहं वा संस्नेह्य स्विन्नाभ्यक्तं नुरूहयेत्॥ २३॥
तत एरण्डतैलेन सर्पिषा तैल्वकेन वा।
सक्षारेणानिले शान्ते स्रस्तदोषं विरेचयेत्॥ २४॥

स०-मारुतग्रहणीगदा विद्यन्ते यस्येति "अर्शआदित्वात्(भ्योऽ)अच्"। एनं-मारुतग्रहणीगदवन्तं, दीपनीयौषधयुतं-पञ्चकोलप्रायद्रव्यान्वितं, वह्निसन्धुक्षणार्थमल्पमात्रया घृतं पाययेत्। किञ्चित्सन्धुक्षिते-मनाक् सन्दीपते, त्वग्नौ सति सत्कविण्मूत्रपवनं नरं द्वे दिने त्रीणि वा सस्नेह्य-स्नेहयित्वा, अनन्तरं स्विन्नाभ्यक्तं कृत्वा निरुहयेत्। ततो-निरुहादनन्तरं, मारुते शान्ते सत्येरण्डतैलेनाथवा तैल्वकेन (ह्र.चि.अ.२९।३२) घृतेन सक्षारेण स्रस्तदोषं-प्रच्युतदोषं, विरेचयेत्।

शुद्धरूक्षाशयं बद्धवर्चस्कं चानुवासयेत्।
दीपनीयाम्लवातघ्नसिद्धतैलेन तं ततः॥ २५॥
निरूढं च विरिक्तं च सम्यक्काप्यनुवासितम्।
लघ्वन्नप्रतिसंयुक्तं सर्पिरभ्यासयेत्पुनः॥ २६॥

स०-शुद्धो रूक्ष आशयो यस्य स एवम्, तथा बद्धं वर्चः-पुरीषं यस्य तम्, शुद्धरूक्षाशयमितिहेतौ प्रथमा, शुद्धरूक्षाशयत्वेन बद्धवर्चस्कमित्यर्थः। तथाविधं नरमनुवासयेत्। केन? दीपनीयानि-नागरादीनि, अम्लनि-वृक्षाम्लमातुलुङ्गदाडिमादीनि, वातघ्नानि-कुष्ठरास्नैरण्डादीनि, तैर्दीपनीयाम्लवातघ्नैः सिद्धतैलेन। निरुढं विरिक्तं च विधिना चानुवासितं मात्रयेत्यर्थः, सम्यक् चाप्यनुवासितं लघ्वन्नप्रतिसंयुक्तं पुनः सर्पिः शीलयेत्।

पञ्चमूलाभयाव्योषपिप्पलीमूलसैन्धवैः।

रास्नाक्षारद्वयाजाजीविडाङ्गशठिभिर्घृतम्॥२७॥

शुक्तेन मातुलुङ्गस्य स्वरसेनार्द्रकस्य च।

शुष्कमूलककोलाम्लचुक्रिकादाडिमस्य च॥२८॥

तक्रमस्तुसुरामण्डसौवीरकतुषोदकैः।

काञ्जिकेन च तत्पक्वमग्निदीप्तिकरं परम्॥२९॥

शूलगुल्मोदरश्वासकासानिलकफापहम्।

स० -पञ्चमूलादिभिः कल्कैर्द्रव्यैः शुक्तादिभिर्द्रवद्रव्यैः सामान्यपरिभाषया घृतं पचेत्। पञ्चमूलमिह महद्राह्यम्, सुतरां वातघ्नत्वात्। एतच्च घृतं परमग्निदीप्तिकरं शूलादिघ्नम्।

सबीजपूरकरसं सिद्धं वा पाययेद्घृतम्॥३०॥

स० -बीजपूरकरसेन सह सिद्धं वा घृतं पाययेत्।

तैलमभ्यञ्जनार्थं च सिद्धमेभिश्चलापहम्।

स० -एभिः पञ्चमूलादिभिर्घृतौषधैः सिद्धं तैलं वाऽभ्यञ्जनार्थं हितम्।

एतेषामौषधानां वा पिबेच्चूर्णं सुखाम्बुना॥३१॥

वाते श्लिष्मावृते सामे कफे वा वायुनोद्धते।

स ०-एतेषामौषधानां पञ्चमूलादीनां चूर्णमुष्णाम्बुना वा पिबेत्। कस्यामवस्थायामित्याह-वाते। किम्भूते? श्लेष्मावृते, तथा सामे कफे वा, वातेनोद्धते सामे वा।

अधुना पित्तग्रहणीरोगचिकित्सामाह-

अग्न्निर्वापकं पित्तं रेकेण वमनेन वा॥ ३२॥
हत्वा तिक्तलघुग्राहिदीपनैरविदाहिभिः।
अन्नैः सन्धुक्षयेदग्निं चूर्णैः स्नेहैश्च तिक्तकैः॥ ३३॥

स० -अग्निपित्तयोर्ग्रहण्याश्रयत्वाद् द्रवत्वाच्च यदग्नेः प्लावकं पित्तमूर्ध्वाधः प्रपन्नं तद्यथासन्नदेशं वमनेन विरेकेण वा हत्वा, आनन्तरं तमग्निमन्नैस्तिक्तलघुग्राहिदीपनैः सन्धुक्षयेत्। किम्भूतैः ? अविदाहिभिः,-न तु सामान्येन दीपनैः। न केवलमेवंविधैरन्नैरग्निं सन्धुक्षयेत्, तथा च चूर्णैः स्नेहैश्च तं सन्धुक्षयेत्। किम्भूतैः ? तिक्तकैः-तिक्तद्रव्यभूयिष्ठैश्चूर्णैस्तिक्तद्रव्यसाधितैः स्नेहैश्च।

"चूर्णैरग्निं सन्धुक्षयेत्" इत्युक्तम्। अतश्चूर्णान्याह-

पटोलनिम्बत्रायन्तीतिक्तातिक्तकपर्पटम्।
कुटजत्वक्फलं मूर्वा मधुशिग्रुफलं वचा॥ ३४॥
दावीत्वक्पद्मकोशीरयवानीमुस्तचन्दनम्।
सौराष्ट्र्यतिविषाव्योषत्वगेलापत्रदातु च॥ ३५॥
चूर्णितं मधुना लेह्यं पेयं मद्यैर्जलेन वा।
हृत्पाण्डुग्रहणीरोगगुल्मशूलारुचिज्वरान्॥ ३६॥
कामलां सन्निपातं च मुखरोगांश्च नाशयेत्।

स० -मधुशिग्रुः-सोभाञ्जनकविशेषः, तस्य फलं श्वेतमरिचाख्यम्। एतत्पटोलादिकं चूर्णितं मधुना लेह्यमथव जलेन पेयं मद्यैर्वा। तच्च हृद्रोगादीन् नाशयेत्।

भूनिम्बकटुकामुस्तात्र्यूषणेन्द्रयवान् समान्॥ ३७॥

द्वौ चित्रकाद्वत्सकत्वग्भागान् षोडश चूर्णयेत्।

गुडशीताम्बुना पीतं ग्रहणीदोषगुल्मनुत्॥ ३८॥

कामलाज्वरपाण्डुत्वमेहारुच्यतिसारजित्।

स ० -भूनिम्बाद्यान् समभागान् चित्रकात् द्वौ कुटजत्वचां षोडश भागांश्चूर्णयेत्। तदेतच्चूर्णं गुडयुतेन शीताम्बुना पीतं ग्रहणीरोगादिहरम्।

नागरातिविषामुस्तापाठाबिल्वं रसाञ्जनम्॥ ३९॥

कुटजत्वक्फलं तिक्ता धातकी च कृतं रजः।

क्षौद्रतण्डुलवारिभ्यां पैत्तिके ग्रहणीगदे॥ ४०॥

प्रवाहिकार्शोगुदरुग्रक्तोत्थानेषु चेष्यते।

स ० -नागरादिद्रव्यं चूर्णितं क्षौद्रतण्डुलजलाभ्यां सह पैत्तिकग्रहणीरोग इष्यते, प्रवाहिकादिषु च।

चन्दनं पद्मकोशीरं पाठां मूर्वां कुटन्नटम्॥ ४१॥

षड्ग्रन्थासारिवास्फोतासप्तपर्णाटारूषकान्।

पटोलोदुम्बराश्वत्थवटप्लक्षकपीतनान्॥ ४२॥

कटुकां रोहिणीं मुस्तां निम्बं च द्विपलांशकान्।

द्रोणेऽपां साधयेत्तेन पचेत्सर्पिः पिचून्मितैः॥ ४३॥

किराततिक्तेन्द्रयववीरामागधिकोत्पलैः।

पित्तग्रहण्यां तत्पेयं कुष्ठोक्तं तिक्तकं च यत्॥ ४४॥

स० -चन्दनादिद्रव्यं प्रत्येकं द्विपलांशकमपां द्रोणे पचेत्। तेन क्काथेन पिचुप्रमाणैश्च किराततिक्तादिभिः कल्कैः सर्पिः पचेत्। कुटन्नटः-श्योनाकः। आस्फोता-उत्पलसारिवा। कपीतनो-वानीरः। अत्र च सर्पिःप्रमाणं क्काथापेक्षया द्वात्रिंशत्पलानि कल्प्यानि, न तु कल्कापेक्षया पञ्च पलानि। क्काथादिद्रवद्रव्यस्य स्नेहपाके प्राधान्यात्। यतः क्काथादिद्रवमन्तरेण स्नेहपाकोऽपि नोपपद्यते, न तु तथा कल्कं विना। तस्मात् क्काथस्य प्राधान्यात् क्काथापेक्षयैव सर्पिर्ग्राह्यम्। तत्-एतद्धृतं, पित्तग्रहण्यां पेयम्। यच्च कुष्ठचिकित्सिते (चि. अ. १९/२) गदितं तिक्तकं घृतं तच्च पेयम्। चशब्दो महातिक्तकस्यापि ग्रहणार्थः।

श्लेष्मग्रहणीचिकित्सार्थमाह-

ग्रहण्यां श्लेष्मदुष्टायां तीक्ष्णैः प्रच्छर्दने कृते।
कट्वम्लवणक्षारैः क्रमादग्निं विवर्धयेत्॥४५॥

स ० -श्लेष्मदुष्टायां ग्रहण्यां तीक्ष्णैर्द्रव्यैः प्रच्छर्दने-वमने, कृते सति प्रथमं कट्वम्लवणक्षरैरग्निं विवर्धयेत्।

पञ्चकोलाभयाधान्यपाठागन्धपलाशकैः।
बीजपूरप्रगाढैश्च सिद्धैः पेयादि कल्पयेत्॥४६॥

स० -पञ्चकोलादिभिः सिद्धैः-क्थितैः, पेयादिकं कल्पयेत्। गन्धपलाशं-गन्धपत्रम्।

द्रोणं मधूकपुष्पाणां विडङ्गं च ततोऽर्धतः।
चित्रकस्य ततोऽर्धं च तथा भल्लातकाढकम्॥४७॥
मञ्जिष्ठाऽपलं चहितज्जलद्रोणत्रये पचेत्।
द्रोणशेषं श्रृतं शीतं मध्वर्धाढकसंयुतम्॥४८॥

एलामृणालागुरुभिश्चन्दनेन च रूषिते।

कुम्भे मासं स्थितं जातमासवं तं प्रयोजयेत्॥४९॥

ग्रहणीं दीपयत्येष बृंहणः पित्तरक्तनुत्।

शोषकुष्ठकिलासानां प्रमेहाणां च नाशनः॥५०॥

स ० -मधूककुसुमानां द्रोणम्। ततो-मधूकपुष्पेभ्यः, अर्धेन विडङ्गम्। ततो-विडङ्गात्, चित्रकस्यार्धम्। भल्लातकस्य चाढकम्। मञ्जिष्ठायाः पलान्यष्टौ। एतत्सर्वं पानीयद्रोणत्रये पचेत्। एतच्च द्रोणशेषं श्रृतं शीतं मधुनोऽर्धाढकेन संयुक्तमेलादिभिः कुम्भे रूषिते-लिप्ते, मासं स्थितं तं-एवंविधं जातं, आसवं प्रयोजयेत्। एषः-आसवो, ग्रहणीं बृहणो रक्तपित्तादिनाशनः।

मधूकपुष्पस्वरसं श्रृतमधक्षयीकृतम्।

क्षौद्रपादयुतं शीतं पूर्ववत्सन्निधापयेत्॥५१॥

तत्पिबन् ग्रहणीदोषान् जयेत्सर्वान् हिताशनः।

स ० -मधूकपुष्पाणां कुडवस्वरसं च क्वथितमर्धक्षयीकृतं-अर्धावशेषं, शीतं माक्षिकचतुर्थभगयुतं पूर्ववत्-पूर्वेण तुल्यमेलादिरूषिते भाण्डे मासं यावत्, सन्निधापयेत्-सम्यक् स्थापयेत्। "मधूकपुष्पकुडवं" इत्यादि योऽयं परिमाणनिर्देशः स इह मात्रादिक्प्रदर्शनपरः। अनया दिशाऽयं सन्धातव्यो बहुः, व त्वेतावान्। अन्यथा ह्यल्पसम्भ्रुतत्वादयमासवो न शोभनः स्याट्। अन्यत्र त्वासवारिष्टलेहादौ परिपूर्णत्वात् यथानिर्दिष्टैव मात्रा यथोक्तगुणकलापं करोति, न न्यूनाधिकेति वेद्यम्। तत् एअतत्, पिबन्नातुरो हितभोजी सन् सर्वान् ग्रहणीदोषान् जयति।

तद्वद्राक्षेक्षुखर्जूरस्वरसानासुतान् पिबेत्॥५२॥

स० -[तद्वत्-] यथैव मधूकपुष्पक्काथ आसुतस्तथैव, द्राक्षादिस्वरसानासुतान् पिबेत्। यथा च मधूकपुष्पाणां क्काथ आदिष्टो ग्रनथकृता तथैव द्राक्षादीनां स्वरसाभवे क्काथो ग्राह्याः, तस्य दिक्प्रदर्शनपरत्वात्।

हिङ्गुतिक्तावचामाद्रीपाठेन्द्रयवतोक्षुरम्।

पञ्चकोलं च कर्षांशं पलांशं पटुपञ्चकम्॥५३॥

घृततैलद्विकुडवे दध्नः प्रस्थद्वये च तत्।

ओपोथ्य क्काथयेदग्नौ मृदावनुगते रसे॥५४॥

अन्तर्धूमं ततो दग्ध्वा चूर्णीकृत्य घृताप्लुतम्।

पिबेत्पाणितलं तस्मिन् जीर्णे स्यान्मधुराशनः॥५५॥

वातश्लेष्मामयान् सर्वान् हन्याद्विषगरांश्च सः।

स० -हिङ्वादि कर्षप्रमाणं लवणानि पञ्च पलप्रमाणानि। तदेतद्धततैलयोः कुडवद्वये दधिप्रस्थद्वये चापोथ्य-सङ्कुद्य, मृदावग्नौ क्काथयेत्। रसे चानुगते-प्रविष्टे सति, अनन्तरमन्तर्धूमं कलशे दग्ध्वा ततश्चूर्णिकृत्य कर्षमात्रं घृतालोडितं पिबेत्। तस्मिन् जीर्णे मधुरभोजी स्यात्। स च-क्षारो, वातकफरोगादीन् हन्ति।

भूनिम्बं रोहिणीं तिक्तां पटोलं निम्बपर्पटम्॥५६॥

दग्ध्वा माहिषमूत्रेण पिबेदग्निविवर्धनम्।

स० -भुनिम्बादीनि दग्ध्वा माहिषमूत्रेण पिबेत्। तच्च पीतं वह्निं वर्धयति।

द्वे हरिद्रे वचा कुष्ठं चित्रकः कटुरोहिणी॥५७॥

मुस्ता चह् छागमूत्रेण सिद्धः क्षारोऽग्निवर्धनः।

स० -कटुरोहिणी-कटुका। हरिद्राद्वयादेश्छागमूत्रेण सिद्धः पूर्ववदग्निवृद्धिकृत् क्षारः।

चतुष्पलं सुधाकाण्डात्रिपलं लवणत्रयात्॥५८॥

वाताककुडवं चार्कादष्टौ द्वे चित्रकात्पले।

दग्ध्वा रसेन वार्ताकाह्गुटिका भोजनोत्तराः॥५९॥

भुक्तमन्नं पचन्त्याशु कासश्वासार्शसां हिताः।

विसूचिकाप्रतिश्यायहृद्रोगशमनाश्च ताः॥६०॥

स० -सुधास्तम्भाच्चत्वारि पलानि, लवणत्रयात्रीणि पलानि, पक्वशुष्कवार्ताककुडवम्, अर्कादष्टौ पलानि, चित्रकपले द्वे, एतत्सर्वं दग्ध्वा, ततो वार्ताकानां रसेन कृता गुलिका भुक्तं उपयुक्तं, भोजनं पचन्त्याशु। कासादिभ्यो हिताः। विसूचिकादिघ्न्यश्च स्मृताः।

मातुलुङ्गशठीरास्नाकटुत्रयहरीतकि।

स्वर्जिकायावशूकाख्यौ क्षारौ पञ्चपटूनि च॥६१॥

सुखाम्बुपीतं तच्चूर्णं बलवर्णाग्निवर्धनम्।

स० -मातुलुङ्गादिकं चूर्णमुष्णोदकेन पीतं बलादिवर्धनम्।

श्लैष्मिके ग्रहणीदोषे सवाते तैर्घृतं पचेत्॥६२॥

धान्वन्तरं षट्पलं च भल्लातकघृताभयम्।

स०-श्लैष्मिके ग्रहणीदोषे वातान्विते तैः-मातुलुङ्गादिभिः, घृतं पचेत्। अथवा, धान्वन्तरं घृतं-प्रमेहचिकित्सिते "दशमूलशठी" (चि. अ. १२/१९) इत्यादिकम्। षट्पलं-राजयक्ष्मचिकित्सिते "पञ्चकोलयवक्षार" (चि. अ. ५/२२) इत्यादिकम्। भल्लातकघृतं-गुल्मोक्तं "भल्लातकानां द्विपलं"

(चि. अ. १४/८०) इत्यादिकम्। अभयाघृतं-उदरचिकित्सिते "हरीतकीसूक्ष्मरजः" (चि. अ. १५/२८) इत्यादिकम्।

बिडकाचोषलवणस्वर्जिकायावशूकजान्॥ ६३॥

सप्तलां कण्टकारीं च चित्रकं चैकतो दहेत्।

सप्तकृत्वः स्रुतस्यास्य क्षारस्यार्धाढके पचेत्॥ ६४॥

आढकं सर्पिषः पेयं तदग्निबलवृद्धये।

स ० -बिडलवणं काचलवणं-कृष्णलवणं, क्षारलवणं स्वर्जिकादींश्चैकस्मिन् कृत्वा दहेत्। सप्तवारानस्य क्षारस्य स्रुतस्य चार्धाढके सर्पिष आढकं पचेत्। तद्धृतमग्निबलादिवृद्धये पेयम्।

निचये पञ्चकर्माणि युञ्जयाच्चैतद्यथाबलम्॥ ६५॥

स ० -निचये-सन्निपातजे ग्रहणीदोषे, पञ्चकर्माणि-वमनविरेचनास्थापनानुवाससननस्यानि, यथाबलं युञ्ज्यात्। यद्यपि शिरोविरेचनाख्यस्य कर्मणो बाहुल्येन ग्रहणीदोषे प्रयोजनं न तथा दृश्यते यथा वमनादीनाम्, तथाऽपि भूयस्त्वमुररीकृत्य पञ्चकर्माणीत्युक्तम्। चशब्दाद्यदेतद्ग्रहणीत्रये प्रतिदोषमाश्रित्योक्तं कर्म तदपि निचयोत्थे ग्रहणीदोषे युज्यात्।

इति ग्रहणिदोषस्य चतुर्विधस्य चिकित्सामाभिधायेदानीं प्रतिपुरुषं प्रतिदोषं मन्दाग्नित्वमाश्रित्य यथावस्थं चिकित्सितं निर्दिशन्नाह-

प्रसेके श्लैष्मिकेऽल्पाग्नेर्दीपनं रूक्षतिक्तकम्।

योज्यं कृशस्य व्यत्यासात्स्निग्धरूक्षं कफोदये॥ ६६॥

क्षीणक्षामशरीरस्य दीपनं स्नेहसंयुतम्।

दीपनं बहुपित्तस्य तिक्तं मधुरकैर्युतम्॥ ६७॥

स्नेहोऽम्लवणैर्युक्तो बहुवातस्य शस्यते।

स० -प्रसेको द्विविधः-वातिकः श्लैष्मिकश्च। तत्र मन्दाग्नेः श्लैष्मप्रकोपजे प्रसेके दीपनं रूक्षतिक्तं यद् द्रव्यं तत्प्रयोज्यम्, न घृतं नापि मधुराम्लवणादिकम्। श्लेष्मजप्रसेकस्य च लक्षणम् (ह्. चि. अ. ५१६३)-"श्लेष्मणोऽतिप्रसेकेन वायुः श्लेष्माणमस्यति।" इत्यादि। कृशस्य पुनर्मन्दाग्नेः कफोदये सति व्यत्यासात् पर्यायेण व्यतिकर्मव्यवहारार्थः। व्यत्यासात् स्निग्धरूक्षं योज्यम्,-स्निग्धं योजयित्वा रूक्षं योज्यं रूक्षं योजयित्वा स्निग्धं योज्यमित्यर्थः। यदि हि कृशे बहुकफे रूक्षे च नरे रूक्षमेव युञ्ज्यात्, ततो रूक्षे केवले युज्यमाने कार्श्यस्य वृद्धिः स्यात्। अथ स्नेहमेव युञ्जयात्, ततः स्नेहे केवले युज्यमाने कफवृद्धिः स्यात्। इति व्यत्यासेन स्निग्धरूक्षमुपयोज्यम्। क्षीणक्षामशरीरस्य तु कफोदये दीपनं द्रव्यं-पञ्चकोलादिकं, स्नेहैः-घृतादिभिः, संयुतं स्नेहसंयुक्तं युञ्ज्यात्। बहुपित्तस्य मन्दाग्नेस्तिक्तं मधुरकैर्द्रव्यैर्युक्तं दीपनं योज्यम्। बहुवातसय् मन्दाग्नेर्नरस्य स्नेहोऽम्लवणैर्युक्तः प्रायेण शस्यते।

स्नेहस्य मन्दाग्निविषयेभ्योऽन्यद्रव्येभ्यः प्रायेण प्राधान्यं सर्वपुरुषं प्रति द्योतयितुमिदं ब्रूते-

स्नेहमेव परं विद्याद्दुर्बलानलदीपनम्॥६८॥

नालं स्नेहसमिद्धस्य शमायान्नं सुगुर्वपि।

स० -एवेत्यवधारणे। परं-प्रधानं, स्नेहमेव मन्दाग्नेर्विद्यात्, न ततोऽन्यद् द्रव्यम्। तस्मान्मदाग्नेर्दोषप्रतिपक्षभुतैरौषधैर्युक्तः स्नेहो बाहुल्येन पथ्यः। अत एवेदं कारणं निर्दिशन्नाह-नालमित्यादि। यस्मात् स्नेहोद्दीपितस्याग्नेः सुष्ठु गुर्वप्यन्नं शमाय नालं-पर्याप्तम्। तस्मात् स्नेह एव दुर्बलानलदीपनाय श्रेष्ठः।

योऽऽल्पाग्नित्वात्कफे क्षीणे वर्चः पक्वमपि श्लथम्॥६९॥

मुञ्चेत्पद्वौषधयुतं स पिबेदल्पशो घृतम्।

तेन स्वमार्गमानीतः स्वकर्मणि नियोजितः॥७०॥

समानो दीपयत्यग्निमग्नेः सन्धुक्षको हि सः।

स० -यः-नरः, अल्पाग्नित्वात्कफे क्षीणे सति पुरीषं पक्वमपि शिथिलं मुञ्चेत्, सः-नरः, अल्पमल्पं घृतं पिबेत्। किम्भुतम्? पट्वौषधयुतं-सैन्धवशुण्ठीयुक्तम्। तेन-सर्पिषा, समानः स्वमार्गमानीय स्वकर्मणि-अन्नपचनाख्ये, नियोजितोऽग्निं सन्दीपयति। यतोऽसौ-समानः, अग्ने सन्धुक्षकः।

पुरीषं यश्च कृच्छ्रेण कठिनत्वाद्विमुञ्चति॥७१॥
स घृतं लवणैर्युक्तं नरोऽन्नावग्रहं पिबेत्।

स० -यश्च-पुरुषः, पुरीषं काठिन्यात्-संहतत्वाद्धेतोः,कृच्छ्रेण मुञ्चति। सः-नरः, लवणैः पञ्चभिर्युक्तं घृतं पिबेत्। किम्भूतम्? अन्नावग्रहं,-अन्नेनावग्रहः सहसोर्ध्वकायगनमप्रतिबन्धोऽवष्टम्भो यस्य तदेवम्। घृतं पीत्वाऽन्नं भोक्तव्यमित्यर्थः।

रौक्ष्यान्मन्देऽनले सर्पिस्तैलं वा दीपनैः पिबेत्॥७२॥

स० -रौक्ष्याद्धेतोर्मन्देऽग्नौ सति सर्पिरथवा तैलं दीपनीयैर्युतं पिबेत्।

क्षारचूर्णासवारिष्टान् मन्दे स्नेहातिपानतः।

स० -स्नेहातिपानाद्धेतोर्मन्देऽग्नौ सति क्षारादीन् पिबेत्।

उदावर्ताक्तु योक्तव्या निरूहस्नेहबस्तयः॥७३॥

स० -उदावर्तात्पुनर्मन्देऽग्नौ सति निरूहस्नेहबस्तयः प्रयोक्तव्याः।

दोषातिवृध्द्या मन्देऽग्नौ संशुद्धोऽन्नविधिं चरेत्।

स ० -दोषाऽतिवृद्धया मन्देऽग्नौ सति वमनविरेचनादिभिर्ह तदोषः कृतसंशुद्धिरन्नविधिं-पेयादिक्रमं, आचरेत्।

व्याधिमुक्तस्य मन्देऽग्नौ सर्पिरेव तु दीपनम्॥७४॥

स० -व्याधिमुक्तस्य मन्देऽग्नौ सर्पिरेव दीपनं स्यात्, नान्यत्तथद्रव्यम्।

अध्वोपवासक्षमत्वैर्यवाग्वा पाययेद्धृतम्।

अन्नावपीडितं बल्यं दीपनं बृहणं च तत्॥७५॥

स ० -अध्वोपवासक्षामत्वैर्मन्देऽग्नौ यवाग्वा सह घृतं पाययेत्, वैद्य इति शेषः। किम्भूतम्? अन्नेनावपीडितमन्नावपीडितम्, मध्यभक्तं घृतमित्यर्थः। एवं पीतं बल्यं बृहणं दीपनं च तद्भवति।

दीर्घकालप्रसङ्गात्तु क्षामक्षीणकृशान्नरान्।

प्रसहानां रसैः साम्लैर्भोजयेत्पिशिताशिनाम्॥७६॥

लघूष्णकटुशोधित्वाद् दीपयन्त्याशु तेऽनलम्।

मांसोपचितमांसत्वात्परं च बलवर्धनाः॥७७॥

स ० -दीर्घकालप्रसङ्गात्तु मन्देऽग्नौ सत्यसम्यगाहाररसपरिणत्या हेतुभूतया क्षामक्षीण-कृशान्नरान् पिशिताशिनां-प्रसहादीनां, रसैः साम्लैर्भोजयेत्। कस्मात्तानेतान् भोजयेत्? इत्याह-लघूष्णेत्यादि। लघुत्वादुष्णत्वात्कटुत्वाच्छोघनत्वाच्च ते रसाः शीघ्रमग्निं दीपयन्ति। भावप्रधाननिर्देशः पूर्ववच्चात्र योज्यः। ननु, प्रागभ्यधायि (हृ. सू. अ. ६/६१)

-"गुरुष्णस्निग्धमधुरा वर्गाश्चातो यथोत्तरम्।" इति। इह च प्रसानां लघुत्वमुच्यते। तदिमे वचसी परस्परं व्याघ्नाते। अत्र ब्रूमः। लाघवशब्दोऽत्र क्रियाविशेषार्थः। धावनप्लवनलङ्घनादिका चेष्टा, तस्याः पाटवविशेषो लाघवम्। यथा च प्रागध्यगीष्ट (हृ. सू. अ. २/१०)-"लाघवं कर्मसामर्थ्य" इति। एवं चात्राविरोधः। हेतुनिर्देशादन्येऽप्येवंप्राया ये मं सरसास्तानप्येतान् भोजयेदिति। ते च-प्रसहाः, मांसोपचितमांसत्वाद्धेतोः सुष्ठु बलं वर्धयन्ति।

स्नेहासवसुरारिष्टचूर्णक्काथाहिताशनैः।

सम्यक् प्रयुक्तैर्देहस्य बलमग्नेश्च वर्धते॥७८॥

स० -स्नेहादिभिः सम्यक् प्रयुक्तैः शरीरस्याग्नेश्च बलं वर्धते। तस्मात् स्नेहादयो यथावस्थं प्रयोज्या इति भावः।

अधुना स्नेहस्याग्निवृद्धिकरत्वं दृष्टान्तेन दर्शयति-

दीप्तो यथैव स्थाणुश्च बाह्योऽग्निः सारदारुभिः।

सस्नेहैर्जायते तद्वदाहारैः कोष्ठगोऽनलः॥७९॥

स० -यथा-येन प्रकारेण, सारदारुभिः-शमीखदिरादिभिः, सस्नेहैर्बाह्योऽग्निर्दीप्तः स्थाणुः-स्थिरश्च, जायते। तथैव कोष्ठगोऽग्निः सस्नेहैः पथ्यरूपैराहारैः पटुतरः स्थिरश्च सम्पद्यते।

नाभोजनेन कायाग्निर्दीप्यते नातिभोजनात्।

यथा निरिन्धनो वह्निरल्पो वाऽतीन्धनावृतः॥८०॥

स० -नाभोजनेन कायाग्निर्दीप्यते। न चातिभोजनेन। अत्रैव दृष्टन्तमाह-यथा बाह्योऽग्निर्निरिन्धनो न दीप्यते नश्यति। अल्पोऽग्निर्बाह्योऽतीन्धनेन-बहुभिर्दारुभिः, आवृतो नश्यति,-न दीप्यते। एवं कोष्ठाग्निरप्यभोजनातिभोजनाभ्यां नश्यति,-न दीप्यत इत्यर्थः।

यदा क्षीणे कफे पित्तं स्वस्थाने पवनानुगम्।

प्रवृद्धं वर्धयत्यग्निं तदाऽसौ सानिलोऽनलः॥८१॥

पक्त्वाऽन्नमाशु धातूंश्च सर्वानोजश्च सङ्क्षिपन्।

मारयेत्स्यात्स ना स्वस्थो भुक्ते जीर्णे तु ताम्यति॥८२॥

स० -यस्मिन् काले कफे क्षीणे-क्षयं याते, अत एव स्वस्थाने-आमाशयाख्ये, पित्तं वृद्धम्। किम्भूतम्? पवनानुगम्। मारुतेन घमनस्वभवेन पश्चाद्युक्तम्। अत एव तत्पित्तमग्निं वर्धयति। तदा-तस्मिन्काले, असावनलो-जाठराग्निः, सानिलः-पवनसहितो, अन्नं पक्त्वाऽनन्तरं पक्तव्याभावात् सर्वान् धातून् पक्त्वा, आशु पुरुषं मारयेत्। किं कुर्वन्? ओजश्च सङ्क्षिपन्-संहरन्, विनाशयन्नित्यर्थः। ननु, पित्तानिलयोर्द्वयोः प्रकृतत्वात् सपित्तानिलोऽनल इति वक्तुं युक्तं स्यात्। मैवम्। "पित्तं वह्निर्वह्निजं वा" (ह्. शा. अ. ३/९०) इति कृत्वा तदानीं जठराग्निना सहैकतां प्राप्तं पित्तमिति सानिलोऽनल इति निर्दिष्टम्। सः-अत्यग्निपीडितो, नापुरुषो, भुक्ते स्वस्थः स्यात्। जीर्णे तु ताम्यति-उपतप्यते। अनेकार्थत्वाद्धातूनामुप तापार्थस्ताम्यतिः। तमकलक्षणेऽपि प्रागध्यगीष्ट।

अथास्योपद्रवान् वक्ति-

तृड्श्वासदाहमूर्च्छाद्या व्याधयोऽत्यग्निसम्भवाः।

स० -तृष्णादयो रोगा अत्यग्नेः सम्भवन्ति।

तमत्यग्निं गुरुस्निग्धमन्दसान्द्रहिमस्थिरैः॥८३॥

अन्नपानैर्नयेच्छान्तिं दीप्तमग्निमिवाम्बुभिः।

स०-तमत्यग्निं-भस्मकाख्यं, गुरुस्निग्धादिभिरन्नपानैः शान्ति नयेत्। कमिव? दीप्तं-इद्दमग्निं बाह्यं, यथा जलैः।

मुहुर्मुहुरजीर्णेऽपि भोज्यान्यस्योपहारयेत्॥८४॥

निरिन्धनोऽन्तरं लब्ध्वा यथैनं न विपादयेत्।

स०-मुहुर्मुहुः-क्षणेक्षणे, अजीर्णेऽपि भोज्यनि-कृशरादीनि, उपहारयेत्-आहारार्थं प्रकल्पयेत्। अजीर्णेऽपीत्यपिशब्दात् किमुत जीर्णे भोज्यानुपहारयेदिति। किमित्येवं क्रियते? इत्याह-यस्मात्तस्मात्तथा तेन प्रकारेणाजीर्णेऽपि पुनः पुनराहा रोपयोगेन निरिन्धनोऽग्निरन्तरं-अवकाशं, लब्ध्वा यथा एनं न विपादयेत्।

कानि भोज्यानि? इत्याह-

कृशरां पायसं स्निग्धं पैष्टिकं गुडवैकृतम्॥८५॥

अश्नीयादौदकानूपपिशितानि भृतानि च।

मत्स्यान् विशेषतः श्लक्ष्णान् स्थिरतोयचराश्च ये॥८६॥

स०-कृशरामित्यादीनि भुञ्जीत। गुडवैकृतमिति। विकृतमेव वैकृतम्, प्रज्ञादित्वादण्। तथैदकानां-मत्स्यकच्छपादीनां पिशितानि, तथाऽऽनूपानि-वराहादीनाम्, भृतानि-मेदुराणी, भक्षयेत्। विशेषेण मत्स्यान्। श्लक्ष्णान्-अपरुषान्। चशब्दाद्ये च स्थिरतोयचराः-अवहज्जलाश्रिताः, तानप्यश्नीयात्।

आविकं सुभृतं मांसमद्यादत्यग्निवारणम्।

स० -आविकं मांसं सुभ्रुतं-अतीवमेदुरं, अत्यग्निवारणमद्यात्।

पयः सहमधूच्छिष्टं घृतं वा तृषितः पिबेत्॥८७॥

गोधूमचूर्णं पयसा बहुसर्पिःपरिप्लुतम्।

आनूपरसयुक्तान् वा स्नेहांस्तैलविवर्जितान्॥८८॥

श्यामात्रिवृद्विपक्वं वा पयो दद्याद्विरेचनम्।

असकृत्पित्तहरणं पायसप्रतिभोजनम्॥८९॥

स० -तथा, तृषितः सन् पयः पिबेत्। किम्भुतम्? सहमधूच्छिष्टं-समदनं, सर्पिर्वा एवंभुतं पिबेत्। गोधूमचूर्णं बहुघृतं क्षीरेणालोडितं पिबेत्। अथवा, आनुपमांसरसान्वितान् स्नेहान् पिबेत्। किम्भूतान्? तैलविवर्जितान्। तैलस्य पित्तकृत्त्वान्निषेधः। अथवा, श्यामात्रिवृन्द्यां विपक्वं क्षीरं विरेचनं दद्यात्। तथा, पुनः पुनः पित्तस्य हरणं पायसस्य प्रतिभोजनं हितम्।

अधुना सङ्क्षेपेण चिकित्सामाह-

यत्किञ्चिद्गुरु मेद्यं च श्लेष्मकारि च भोजनम्।

सर्वं तद्यग्निहितं भुक्त्वा च स्वपनं दिवा॥९०॥

स० -यत्किञ्चिद्गुरु भोजनं यन्मेदस्करं च, तदत्यग्नये हितम्। भुक्त्वा च यद्दिवा स्वपनं तच्च हितम्।

ननु, किमिति गुर्वादिभोजनमत्यग्नये दीयते ? इत्याह-

आहारमग्निः पचति दोषानाहारवर्जितः।
धातून् क्षीणेशु दोषेषु जीवितं धातुसञ्क्षये॥९१॥

स० -अग्निः पूर्वमाहारं पचति। आहाररहितस्त्वग्निर्दोषान् पचति। तदभावाद्धातून् पचति। धातुसङ्क्षये सति जीवितं पचति-नाशयतीत्यर्थः।

एतत्प्रकृत्यैव विरुद्धमन्नं
संयोगसंस्कारवशेन चेदम्।
इत्याद्यविज्ञाय यथेष्टचेष्टा-
श्चरन्ति यत्साऽग्निबलस्य शक्तिः॥९२॥
तस्मादग्निं पालयेत्सर्वयत्नै
स्तस्मिन्नष्टे याति ना नाशमेव।
दोषैर्ग्रस्ते ग्रस्यते रोगसङ्घै-
र्युक्ते तु स्यान्नीरुजो दीर्घजीवी॥९३॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचिता-यामष्टाङ्गहृदयसंहितायां चतुर्थे चिकित्सित-स्थाने ग्रहणिदोषचिकित्सितं नाम दशमोऽध्यायः॥१०॥

स ०-एतदन्नं प्रकृत्या[एव]-स्वभावेनैव, विरुद्धमपथ्यम् यथा-करमर्दकदधिसर्षप-शाकफाणितशुष्कमांसविरूढकाममूल-कलकुचादिकम्। संयोगविरुद्धं यथा-क्षीरमम्लेन सह, आनूपमामिषं माषैः सह, इत्यादि। संस्कारविरुद्धं यथा-हारीतमांसं हारिद्रशूलप्रोतं हारिद्रवह्निना पाचितमित्यादि। एवमिदं प्रकृत्या दिविरुद्धं संयोगस्य संस्कारस्य च वशेन-

सामर्थ्येन, चेदं विरुद्धम्। आदिग्रहणान्मात्राकालादिपरिग्रहः। तत्र मात्राविरुद्धं यथा-मधुघृतं समांशम्। कालवशेनेदं यथा-रात्रिपर्युषिता काकमाची। पात्रवशेनेदं यथा-कांस्ये दशाहमुषितम् सर्पिः। इत्याद्यविज्ञाय-अबुद्धाऽपर्यालोच्य, यथेष्टचेष्टाः-यथाभिलाषमाहारमासेवमानाः, यच्चरन्ति साऽग्निबलस्य शक्तिः-सामर्थ्यम्। यत एवं तस्मादग्निं पालयेत्, सर्वयत्नैः-अखिलक्रियानुष्ठानैः, तस्मिन्-अग्नौ, नष्टे-क्षीणे, ना-पुरुषो, नाशं याति। दोषैर्प्रस्ते वह्नौ ना-पुरुषो, रोगसङ्घैर्ग्रस्यते-पीड्यते। युक्ते-स्वस्थे, पुनरग्नौ नीरुजो दीर्घजीवी च भवेदिति। उपजातिशालिन्यौ वृत्ते।

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टाङ्गहृदयटीकायां सर्वाङ्गसुन्दराख्यायां चतुर्थे चिकित्सितस्थाने ग्रहणीदोषचिकित्सितं नाम दशमोऽध्यायः समाप्तः॥ १०॥

****

एकादशोऽध्यायः।

ग्रहणीदोषचिकित्सितादनन्तरं मूत्राघातचिकित्सितमारभ्यते। सम्बन्धश्चास्य समसम्बन्धनत्वात्। तथा च प्रागध्यैष्ट (हृ. नि. अ. ९।१) -"बस्तिबस्तिशिरो-मेढ्रकटीवृषणपायवः। एकसम्बन्धनाः प्रओक्ता गुदास्थिविवराश्रयाः॥" इति। तेनेदमाह-

अथातो मूत्राघातचिकित्सितं व्याख्यास्यामः।
इति ह स्माहुरात्रेयादयो महर्षयः। (गद्यसूत्रे॥२॥)

कृच्छ्रे वातघ्नतैलाक्तमधोनामेः समीरजे।
सुस्निग्धैः स्वेदयेदङ्गं पिण्डसेकावगाहनैः॥१॥

स०-कृच्छ्रे-मूत्रकृच्छ्रे, आदिपदलोपं कृत्वा निर्दिष्टम्। यथा-मांसरसे रस इति। मूत्रकृच्छ्रे वातोत्थे, अङ्गं-शरीरं, वातघ्नतैलेन-बलातैलादिना, अभ्यक्तमधो नामेः समन्तात् स्वेदैः पिण्डादिभिः सुष्ठु स्निग्धैः-न रूक्षैः, स्वेदयेत्।

दशमूलबलैरण्डयवाभीरुपुनर्नवैः।
कुलत्थकोलपत्तूरवृश्चीवोपलभेदकैः॥२॥
तैलसर्पिर्वराहर्क्षवसाः क्वथितकल्कितैः।
सपञ्चलवणाः सिद्धाः पीताः शूलहराः परम्॥३॥

स०-दशमूलादिभिः क्वथितकल्कितैस्तैलसर्पिर्वराहर्क्षवसाः सिद्धाः-पक्काः, सह पञ्चलवणिअर्वर्तन्त इति सपञ्चलवणाः पीताः प्रं-सुष्ठु, शूलहराः।

द्रव्याण्येतानि पानान्ने तथा पिण्डोपनाहने।

सह तैलफलैर्युञ्ज्यात्साम्लानि स्नेहवन्ति च॥४॥

स०-एतानि-दशमूलादीनि, द्रव्याणि पानान्ने तद्विजयाय, तथा पिण्डो[अनाहाख्यं स्वेदद्वयं तैलफलैः सह युञ्ज्यात्। तैलार्थानि फलानि नालिकेराक्षोडादीनि तैलफलानि, यथा-यूपाय दारु, तैः सह। केचितु तैलफलानि तिलानाहुः। किम्भूतानि? साम्लानि, सहाम्लैः-तक्रारनालादिभिः, वर्तन्त इति साम्लानि। तथा, स्नेहवन्ति-बहुस्नेहानि। "भूम्नि मतुप्"।

सौवर्चलाढ्यां मदिरां पिबेन्मूत्ररुजापहाम्।

स०-तथा मदिरां बहुसौवर्चलां मूत्ररुजापहां पिबेत्।

पैत्ते युञ्जीत शिशिरं सेकलेपावगाहनम्॥५॥

स०-पैत्ते मूत्रकृच्छ्रे शीतलं सेकलेपावगाहनं युञ्जीत।

पिबेद्वरीं गोक्षुरकं विदारीं सकसेरुकाम्।

तृणाख्यं पञ्चमूलं च पाक्यं समधुशर्करम्॥६॥

स०-तथा शतावर्यादिकं पाक्यं कृत्वा समधुशर्करं पिबेत्।

वृषकं त्रपुसैर्वारुलद्वाबीजानि कुङ्कुमम्।

द्राक्षाम्भोभिः पिबन् सर्वान् मूत्राघातानपोहति॥७॥

स०-वृषकादिकं कल्कीकृत्य द्राक्षाजलेन पिबन् सर्वान् मूत्राघातान् पराकरोति। अपोहतीति "उपसर्गादस्यत्यूह्योर्वा वचनम्" इति परस्मैपदम्। वृषकः-पाषाणभेदकः। लङ्वाबीजं-कुसुम्भबीजम्।

एर्वारुबीजयष्ट्याह्वदार्वीर्वा तण्डुलाम्बुना।
तोयेन कल्कं द्राक्षायाः पिबेत्पर्युषितेन वा॥८॥

स०-एर्वारुबीजादिकं वा तण्डुलाम्भसा पिबेत् पूर्वगुणम्। पर्युषितेन वा जलेन द्राक्षाकल्कं पिबेत्।

कफजे वमनं स्वेदं तीक्ष्णोष्णकटुभोजनम्।
यवानां विकृतीः क्षारं कालशेयं च शीलयेत्॥९॥

स०-कफजे मूत्रकृच्छ्रे वमनादीनि शीलयेत्।

पिबेन्मद्येन सूक्ष्मैलां धात्रीफलरसेन वा।
*सारसास्थिश्वदंष्ट्रैलाव्योषं वा मधुमूत्रवत्॥१०॥
स्वरसं कण्टकार्या वा पाययेन्माक्षिकान्वितम्।
शितिवारकबीजं वा तक्रेण श्लक्ष्णचूर्णितम्॥११॥
धवसप्ताह्वकुटगुडूचीचतुरङ्गुलम्।
केम्बुकैलाकरञ्जं च पाक्यं समधु साधितम्॥१२॥
तैर्वा पेयां प्रवालं वा चूर्णितं तण्डुलाम्बुना।
सतैलं पाटलाक्षारं सप्तकृत्त्वोऽथवा स्रुतम्॥१३॥

स०-तथा मद्येन सूक्ष्मैलां पिबेत्। आमलकरसेन वा सूक्ष्मैलां पिबेत्। [अथवा,] शितिवारकस्य-करञ्जस्य, बीजं श्लक्ष्णपिष्टं तक्रेण सह पाययेत्। धवादिभिः कृतं पाक्यं-क्काथं, वा समधु पाययेत्। तैर्वा-धवादिभिः, साधितां पेयां पाययेत्। प्रवालं-विद्रुमं, रजीकृतं तण्डुलाम्भसा [वा] पाययेत्। पाटलायाः क्षारं सप्तवारान् स्रुतं तैलेन वा पाययेत्।

पाटलीयावशूकाभ्यां पारिभद्रात्तिलादपि।

क्षारोदकेन मदिरां त्वगेलोषकसंयुताम्॥ १४॥

पिबेद्गुडोपदंशान्वा लिह्यादेतान् *पृथक् पृथक्।

स०-पाटलीयवक्षाराभ्यां क्षारोदकेन तथा पारिभद्रतिलक्षारोदकेन मदिरां त्वगेलोषकसंयुक्तां पिबेत्। ऊषकः-कल्लरः। गुडोपदंशान्वेति। अथवा गुडमुपदंश्य एतान्-त्वगादीन्, पृथक् पृथक् लिह्यात्।

सन्निपातात्मके सर्वं यथावस्थमिदं हितम्॥ १५॥

अश्मन्यप्यचिरोत्थाने वारबस्त्यादिकेषु च।

स०-सन्निपातात्मके मूत्रकृच्छ्रे सर्वमिदं-पूर्वोक्तं पृथग्दोषात्मकमूत्रकृच्छ्रनिर्दिष्टं, यथावस्थं-अवस्थामपेक्ष्य, हितम्। न केवलं सन्निपातात्मके कृच्छ्रे प्राङ् निर्दिष्टं पृथग्दोषात्मकमूत्रकृच्छ्रचिकित्सकं हितम्। यावदश्मर्यामप्यचिरोत्थाने, अचिरकालं उत्थानं-जन्म, यस्य तस्मिन् हितम्। चशब्दाद्घातबस्त्यादिकेषु मूत्राघातेषु हितम्। आदिशब्देन वातकुण्डलिकादयो गृह्यन्ते।

अश्मरी दारुणो व्याधिरन्तकप्रतिमो मतः॥ १६॥

तरुणो भेषजैः साध्यः प्रवृद्धश्छेदमर्हति।

स०-अश्मरी दारुणो व्याधिरन्तकप्रतिमः-तत्तुल्यो मतः, शीघ्रं प्राणहारित्वात्। स चाश्मरी तरुणः-अचिरोत्पन्नः, औषधैः साध्यः-साधयितुं शक्यः। प्रवृद्धः पुनश्छेदनं-पाटनं, शस्त्रेणार्हति।

तस्य पूर्वेषु रूपेषु स्नेहादिक्रम इष्यते॥ १७॥

स०-तस्य-आश्मर्याख्यस्य व्याधेः, प्राग्रूपेषु स्नेहादिक्रम इष्यते। आदिशब्दः स्वेदनवमनादीनां ग्रहाय।

अथ स्नेहमाह-

पाषाणभेदो वसुको वशिरोऽश्मन्तको वरी।
कपोतवङ्कातिबलाभल्लूकोशीरकच्छकम्॥ १८॥
वृक्षादनी शाकफलं व्याघ्र्यौ गुण्ठस्त्रिकण्टकः।
यवाः कुलात्थाः कोलानि वरुणः कतकात्फलम्॥ १९॥
ऊषकादिप्रतीवापमेषां क्वाथे श्रृतं घृतम्।
भिनत्ति वातसम्भूतां तत्पीतं शीघ्रमश्मरीम्॥ २०॥

स०-पाषाणभेदादीनां क्वाथे घृतं श्रृतमूषकादिगणोक्तद्रव्यप्रतिवापं-तत्कल्कं सत्, पीतं वातजामश्मरीं भिनत्ति। वसुअः-ईश्वरमल्लिका। वशिरं-सामुद्रलवणम्। अश्मन्तको-मालुकपर्णः। कपोतवङ्का-सुवर्चला। भल्लूकः-श्योनाकः।

गन्धर्वहस्तबृहतीव्याघ्रीगोक्षुरकेक्षुरात्।
मूलकल्कं पिबेद्दध्ना मधुरेणाश्मभेदनम्॥ २१॥

स०-गन्धर्वहस्तादीनां समाहारद्वन्द्वः, अनित्यमागमशासनमिति तु प्रकृतम्। एरण्डादीनां द्रव्याणां यन्मूलं तत्कल्कीकृत्य मधुरेण दध्ना पिबेदश्मभेदनम्,-प्रकृतत्वाद्वाताश्मरीभेदनं गम्यते।

कुशः काशः शरो गुण्ठ इत्कटो मोरटोऽश्मभित्।

दर्भो विदारी वाराही शालिमूलं त्रिकण्टकः॥२२॥

भल्लूकः पाटली पाठा पत्तूरः सकुरण्टकः।

पुनर्नवे शिरीषश्च तेषां क्काथे पचेद्घृतम्॥२३॥

पिष्टेन त्रपुसादीनां बीजेनेन्दीवरेण च।

मधुकेन शिलाजेन तत्पित्ताश्मरिभेदनम्॥२४॥

स०-कुशादीनां क्काथे त्रपुसादीनां-पूर्वोक्तानां (श्लो. ७) त्रपिसैर्वारुलद्वानां, बीजेन नीलोत्पलबीजेन मधुकेन च पिष्टेन शिलाजतुना च घृतं पचेत्। तत्पित्ताश्मरीभेदनं भवति। शोधनादिगणसङ्ग्रहोक्तास्तु (ह्. सू. अ. १५।१) त्रपुसादयोऽत्र न गृह्यन्ते, तदन्तःपातिनां पित्तविरोधिनां सर्पिरा(सर्षपा)दीनां द्रव्याणां तत्र पाठात्।

वरुणादिः समीरघ्नौ गणावेलाहरेणुका।

गुग्गुलुर्मरिचं कुष्ठं चित्रकः ससुराह्वयः॥२५॥

तैः कल्कितैः कृतावापमूषकादिगणेन च।

भिनत्ति कफजामाशु साधितं घृतमश्मरीम्॥२६॥

स०-"वरुणसैर्यक" (ह्. सू. अ. १५।२१) इत्यादिर्वरुणादिर्गणः, समीरघ्नौ गणौ-"वीरतरादिः (ह्. सू. अ. १५।२४). तथा विदार्यादिः (ह्. सू. अ. १५।९), एतैर्वरुणादिभिर्द्रव्यैः कल्ककृतैस्तथोषकादिगणेन-"ऊषकस्तुत्थकं" (ह्. सू. अ. १५।२३) इत्यादिना, कृतावापं-कल्कवत्कृत्वा, घृतं साधितमाशु कफजामश्मरीं हन्ति।

क्षारक्षीरयवाग्वादि द्रव्यैः स्वैः स्वैश्च कल्पयेत्।

स०-क्षारादि च स्वैः स्वैः-तद्योग्यैर्द्रवैः कल्पयेत्।

पिचुकाङ्कोल्लकतशाकेन्दीवरजैः फलैः॥ २७॥
पीतमुष्णाम्बु सगुडं शर्करापातनं परम्।

स०-पिचुकादिभिरुष्णाम्बु सगुडं पीतं शर्करायाः परं शातनम्। पिचुकः-शितिवारकः।

क्रौञ्चोष्ट्रारासभास्थीनि श्वदंष्ट्रा तालपत्रिका॥ २८॥
अजमोदा कदम्बस्य मूलं विश्वस्य चौषधम्।
पीतानि शर्करां भिन्द्युः सुरयोष्णोदकेन वा॥ २९॥

स०-क्रौञ्चास्थ्यादीनि पीतानि सुरयोष्णजलेन वा शर्करां हन्युः।

नृत्यकुण्दकबीजानां चूर्णं माक्षिकसंयुतम्।
अविक्षीरेण सप्ताहं पीतमश्मरिपातनम्॥ ३०॥

स०-तुम्बरीबीजानां चूर्णं माक्षिकान्वितमविक्षीरेण सप्ताहं पीतमश्मरिपातनम्। अत्राश्मरीशब्दस्य "ढ्यापोः संज्ञाछन्दसोः" इति ह्रस्वः।

क्काथश्च शिग्रुमूलोत्थः कदुष्णोऽश्मरीपातनः।

स०-सोभाञ्जनकमूलक्काथश्च कोष्णः पीतोऽश्मरिपातनः।

तिलापामार्गकदलीपलाशयवसम्भवः॥ ३१॥

क्षारः पेयोऽविमूत्रेण शर्करास्वश्मरीषु च।

स०-तिलादिसम्भवः क्षारोऽविमूत्रेण शर्करास्वश्मरीषु च विषये पेयः।

कपोतवङ्कामूलं वा प्वेदकं सुरादिभिः॥ ३२॥

तत्सिद्धं वा पिबेत्क्षीरं वेदनाभिरुपद्रुतः।

हरीतक्यस्थिसिद्धं वा साधितं वा पुनर्नवैः॥ ३३॥

क्षीरान्नभुग्बर्हिशिखामूलं वा तण्डुलाम्बुना।

स०-कपोतवङ्काया, सिद्धं-श्रृतं, वा क्षीरं वेदनोपद्रुतः पिबेत्। हरीतक्यस्थिभिः सिद्धं वा क्षीरमथवा पुनर्नवपक्वं क्षीरं पिबेत्। मयूरशिखामूलं तण्डुलाम्भसा पिबेत्। किम्भूतः? क्षीरान्नाशी सन्।

मुत्राघातेषु विभजेदतः शेषेष्वपि क्रियाम्॥ ३४॥

स०-अतः-अस्मात्पूर्वोक्ताच्चिकित्सितात्, यथायोगं शेषेष्वपि मूत्राघातेषु-मूत्रातीतादिष्वपि, क्रियां विभजेत्-निरूप्य कुर्यात्।

बृहत्यादिगणे सिद्धं द्विगुणीकृतगोक्षुरे।

तोयं पयो वा सर्पिर्वा सर्वमूत्रविकारजित्॥ ३५॥

स०-बृहत्यादिगणे द्विगुणीकृतगोक्षुरे जलं पक्वं क्षीरं वा सर्पिर्वा सर्वान् मूत्रविकारान् जयति।

देवदारुं घनं मूर्वां यष्टीमधु हरीतकीम्।

मूत्रघातेषु सर्वेषु सुराक्षीरजलैः पिबेत्॥ ३६॥

स०-देवदार्वादीन् सुरादीनामन्यतमेन सर्वेषु मूत्राघातेषु पिबेत्।

रसं वा धन्वयासस्य कषायं कुकुभस्य वा।

सुखाम्भसा वा त्रिफलां पिष्टां सैन्धवसंयुताम्॥ ३७॥

व्याघ्रीगोक्षुरकक्काथे यवागूं वा सफाणिताम्।

क्काथे वीरतरादेर्वा ताम्रचूडरसेऽपि वा॥ ३८॥

अद्याद्वीरतराद्येन भावितं वा शिलाजतु।

स०-धन्वयवासकस्य रसं वा ककुभस्य क्काथं वा त्रिफलामुष्णोदकेन पिष्टां सैन्धवान्वितां वा पिबेत्। कण्टकारिकागोक्षुरक्काथसिद्धां वा यवागूं सफाणितां पिबेत्। वीरतरादेः क्काथे वा सिद्धां पेयां पिबेत्। अथवा, ताम्रचूडस्य-कुक्कुटस्य, मांसरसे सिद्धां पेयां पिबेत्। शिलाजतु वीरतराद्येन वा गणेन भावितमद्यात्।

मद्यं वा निगदं पीत्वा रथेनाश्वेन वा व्रजेत्॥ ३९॥

शीघ्रवेगेन सङ्क्षोभात्तथाऽस्य च्यवतेऽश्मरी।

स०-अथवा, पुराणं मद्यं पीत्वा रथेन वाऽश्वेन वा शीघ्रवेगेन गच्छेत्। तथा-तेन प्रकारेण, सङ्क्षोभितस्यतस्य्नाश्मरी च्यवते।

सर्वथा चोपयोक्तव्यो वर्गो वीरतरादिकः॥ ४०॥

रेकार्थं तैल्वकं सर्पिर्बस्तिकर्म च शीलयेत्।

विशेषादुत्तरान् बस्तीन्

स०-[सर्वथा-] सर्वेण च प्रकारेण क्वाथपेयाजलादिषु, वीरतरादिको योज्यः। विरेचनार्थं तैल्वकं-"शम्याकेन" (ह्. चि. अ. ३।१५२) इत्यादिना साधितं सर्पिरुपयोक्तव्यम्। तथा, बस्तिकर्म-"प्राक् स्नेह एकः" (ह्. सू. अ. १९।६३) इत्यादिकं शीलयेत्। विशेषेणोत्तरबस्तीनभ्यसेत्।

.....शुक्राश्मर्यां तु शोधिते॥४१॥

तैर्मूत्रमार्गे बलवान् शुक्राशयविशुद्धये।

पुमान् सतृप्तो वृष्याणां मांसानां कुक्कुटस्य च॥४२॥

कामं सकामाः सेवेत प्रमदा मददायिनीः।

स०-शुक्राश्मर्यां च तैः-उत्तरबस्तिभिः, मूत्रमार्गे शोधिते सति पुमान् वृष्याणां द्रव्याणां कुक्कुटस्य मांसानां च सुहितः सन् यथेच्छं मददायिनीः प्रमदाः सेवेत शुक्राशयविशुद्धये। कुक्कुटस्य वृष्यत्वेनैव सिद्धे ग्रहणेऽतिशयेन कुक्कुटस्यात्र पथ्यत्वमिति ज्ञापनार्थं [पुनः] उपादानम्।

सिद्धैरुपक्रमैरेभिर्न चेच्छान्तिस्तदा भिषक्॥४३॥

इति राजानमापृच्छ्य शस्त्रं साध्ववचारयेत्।

स०-एभिः-पूर्वोक्तैः, उपक्रमैः सिद्धैः-अश्मरीहरैः, यदि शमो न स्यात्, तदेति राजानमापृच्छ्याश्मर्याहरणं शस्त्रं साध्ववचारयेत्।

किमापृच्छ्य ? इत्याह-

अक्रियायां ध्रुवो मृत्युः क्रियायां संशयो भवेत्॥४४॥

निश्चितस्यापि वैद्यस्य बहुशः सिद्धकर्मणः।

स०-हे नृपते जातव्याधावक्रियायां-चिकित्सां विना, ध्रुवः-आवश्यं, मृत्युः स्यात्। अपरं च क्रियायां-चिकित्सायां क्रियमाणायां, निश्चितस्यापि-शास्त्रार्थविदोऽपि, वैद्यस्य तथा बहुशः-अनेकशः, सिद्धकर्मणो-नोष्पन्नक्रियाक्रमस्यापि, संशयो भवेत्-कदाचिज्जीवति न वा, एवंप्रकारेण राजानमापृच्छय।

अथातुरमुपस्निग्धशुद्धमीषच्च कर्शितम्॥४५॥

अभ्यक्तस्विन्नवपुषमभुक्तं कृतमङ्गलम्।

आजानुफलकस्थस्य नरस्याङ्गके व्यापाश्रितम्॥४६॥

पूर्वेण कायेनोत्तानं निषण्णं वस्त्रचुम्भले।

ततोऽस्याकुञ्चिते जानुकूपरे वाससा दृढम्॥४७॥

सहाश्रयमनुष्येण बद्धस्याश्वासितस्य च।

नाभेः समन्तादभ्यज्यादधस्तस्याश्च वामतः॥४८॥

मृदित्वा मुष्टिनाऽऽक्रामेद्यावदश्मर्यधोगता।

तैलाक्ते वर्धितनखे तर्जनीमध्यमे ततः॥४९॥

अदक्षिणे गुदेऽङ्गुल्यौ प्रणिधायानुसेवनि।

आसाद्य बलयत्ताभ्यामश्मरीं गुदमेड्रयोः॥५०॥

कृत्वाऽन्तरे तथा बस्तिं निर्वलीकमनायतम्।

उत्पीडयेदङ्गुलिभ्यां यावद्ग्रन्थिरिवोन्नतम्॥५१॥

शल्यं स्यात्सेवनीं मुक्त्वा यवमात्रेण पाटमात्रेण पाटयेत्।

अश्ममानेन न यथा भिद्यते सा तथाऽऽहरेत्॥५२॥

समग्रं सर्पवक्त्रेण, स्त्रीणां बस्तिस्तु पार्श्वगः।

गर्भाशयाश्रयस्तासां शस्त्रमुत्सङ्गवत्ततः॥५३॥

न्यसेदतोऽन्यथा ह्यासां मूत्रस्रावी व्रणो भवेत्।

मूत्रप्रसेकक्षणनान्नरस्याप्यपि चैकधा॥५४॥

बस्तिभेदोऽश्मरीहेतुः सिद्धिं याति न तु द्विधा।

स०-अथ-राजपृच्छनादनन्तरम्, आतुरमुपस्निग्धादिरूपं कृत्वा ततोऽस्य नाभेरधोऽभ्यज्यात्। पूर्वमुपस्निग्धः पश्चाच्छुद्धस्तमुपस्निग्धशुद्धम्। तथा, अभुक्तं-अकृताहारम्। तथा, कृतमङ्गलं-विहितस्वस्त्ययनम्। तथा, नरस्यान्यस्यान्यस्याङ्कमाश्रितम्। किम्भूतस्य? आजानुफलकस्थस्य। फलकः-आसनविशेषः, आजानुजानुप्रमाणो यः फलकस्तस्मिन् स्थितस्य। तथा, पूर्वेण कायेनोत्तानम्। तथा, वस्त्रचुम्भले निषण्णम्। चुम्भलः-तृणमयो घटादीनां चलनरक्षणार्थमाधारविशेषो यः क्रियते स उच्यते, तथारूपो वस्त्रमयचुम्भलो वस्त्रचुम्भलः,-वस्त्रं वेषयित्वा कृत आसनविशेषः, तस्मिन्नुपविष्टम्। [ततोऽस्य-] तथाभूतस्यानन्तरं, आकुञ्चिते-ईषत्कुटिलीकृते, जानुकूपरे सति। जानुनी च कपूरे च जानुकूपरं, तस्मिन्। तथा, आश्रयमनुष्येण सह वाससा सूत्रैर्वा बद्धस्य-दृढं कृत्वा एवंयन्त्रितस्य, आश्रयश्चासौ मनुष्यश्च। कस्याश्रयः ? प्रकृतत्वादातुरस्य, तमाश्रित्यातुरस्य स्थितत्वात्। तथा, आश्वासितस्य-निरामयो भवस्त्रीत्येवंप्रायाभिर्वाग्भिः शीतपवनादिभिश्च सान्त्वितस्य। ततो नाभेरधः समन्तात्-परितः, अभ्यज्यात्। तस्याश्च-नाभेः, वामतो-वामपार्श्वे, मृदित्वा मुष्टिनाऽऽक्रामेत्-पीडयेत्, तावद्यावदश्मर्यधो गता-अधः प्रतिपन्ना। ततः-अनन्तरं, अदक्षिणे-वामे, तर्जनीमध्याङ्गुल्यौ वर्धिनस्वे तथा तैलाभ्यक्ते कृत्वा गुदे प्रणिधायानुसेवनि। अनन्तरं बलयवाभ्यां आसाद्य-अश्मरीं प्राप्य, गुदमेढ्रयोरन्तरे-मध्ये कृत्वा, कथम्? कृत्वा-तत्र नीत्वा, तथा बस्तिं निर्वलिकं कृत्वा, तथा तमनायतं-अविस्तीर्णं सन्निवेश्य, अनन्तरमङ्गुलिभ्यां-वामहस्ततर्जनीमध्यमाभ्यां, प्रकृतत्वादश्मरीमुत्पीडयेत्। तावद्यावच्छल्यं-अश्मर्याख्यं, ग्रन्थिरिवोन्नतं स्यात्। अनन्तरं सेवन्या वामपार्श्वे सेवनीं यवमात्रेण त्य(मु)त्त्वा-वर्जयित्वा, पाटयेच्छस्त्रेण। कियन्मात्रम्? अश्ममानेन,-अश्मरीप्रमाणेन, न तु ततोऽधिकमूनं वा। व्रणं च कृत्वाऽश्मरीं समग्रं-निरवशेषं यथा भवत्येवं, सर्पफणवदग्रवक्रेण यन्त्रेणाहरेत्,-तथा चाकर्षेद्यथा सा ह्रियमाणा न भिद्यते। भिन्ना हि पुनर्वृद्धिमियात्। स्त्रीणां तु बस्तिः पार्श्वतो भवन् गर्भाशयाश्रयो यस्मात्तत उत्सङ्गवदधः शस्त्रं न्यसेत्-पातयेत्। अतः-अस्माच्छस्त्रपातनविधानात्, अन्यथाऽश्मर्याहरणार्थं शस्त्रपातनेन मूत्रस्रावी व्रणो भवेत्। न केवलं स्त्रीणां मूत्रप्रसेकक्षणनान्मूत्रस्रावी व्रणो भवेत्। यावद् दीर्घकालानुबन्धी मूत्रप्रसेकक्षणनान्नरस्यापि। अपि च-अन्यच्च, एकधा-एकतो, बस्तिभेदोऽश्मरीहेतुः-तन्निमित्तः, सिध्यति क्रियाभ्यासान्नित्यमतिवृद्धत्वाच्च शल्यस्येति, न तु सहसा शस्त्राद्यभिघातहेतुज एकतो भिन्नोऽपि बस्तिः सिध्यति। मर्मविभागेऽप्यवादीत् (हृ. शा. अ. ४।१०)-"धनुर्वक्रो बस्तिः सद्यो निहन्ति" इति। अश्मरीहेतुरपि यो बस्तिभेदो द्विधा-उभयतः, सोऽपि म सिध्यति, व्रणस्वभावात्।

विशल्यमुष्णपानीयद्रोण्यां तमवगाहयेत्॥५५॥

तथा न पूर्यतेऽस्त्रेण बस्तिः, पूर्णे तु पीडयेत्।

मेढ्रान्तः क्षीरिवृक्षाम्बु

स०-विशल्यं-निर्गताश्मरीकं, उष्णपानीयद्रोण्यां तं-आतुरं, अवगाहयेत्। तथा-तेनवगाहनेन, बस्तिरस्त्रेण न पूर्यते। एवमपि कृते दैवदस्त्रेण तु पूर्णे बस्तौ क्षीरिवृक्षाम्बु मेढ्रान्तः-मेढ्रे, पीडयेत्। क्षीरिवृक्षकषायेणोत्तरबस्तिं दद्यादित्यर्थः। न्यग्रोधोदुम्बराश्वत्थकपीतनप्लक्षाः-क्षीरिणः।

.....मूत्रसंशुद्धये ततः॥५६॥

कुर्याट्टगुडस्य सौहित्यं मध्वाज्यात्तव्रणः पिबेत्।

द्वौ कालौ सघृतां कोष्णां यवागूं मूत्रशोधनैः॥५७॥

त्र्यहं, दशाहं पयसा गुडाढ्येनाल्पमोदनम्।

भुञ्जीतोर्ध्वं फलाम्लैश्च रसैर्जाङ्गलचारिणाम्॥५८॥

स०-ततः-अनन्तरं, मूत्रस्य संशुद्ध्यर्थं गुडस्य सौहित्यं-तृप्तिं, कुर्यात्। ततो मध्वाज्यात्तव्रणो नरो द्वौ कालौ [मूत्रशोधनैः-] त्रपुसैर्वारुकूष्माण्डगोक्षुरादिभिः कृतां, यवागूं सघृतां कोष्णां त्र्यहं पिबेत्। अनन्तरं दशाहं गुडाढ्येन-बहुगुडेन, क्षीरेणाल्पमोदनमद्यात्। उर्ध्वं-दशाहादनन्तरं, जाङ्गलचारिणां प्राणिनां रसैर्मांसरसौदनं च मात्राया भुञ्जीत। फलामलिरिति कोलदाडिमाद्यम्लैः, न तु मस्तुकाञ्जिकाद्यम्लैरित्यर्थः।

क्षीरिवृक्षकषायेण व्रणं प्रक्षाल्य लेपयेत्।

प्रपौण्डरीकमञ्जिष्ठायष्ट्याह्वनयनौषधैः॥५९॥

व्रणाभ्यङ्गे पचेत्तैलमेभिरेव निशान्वितैः।

स०-क्षीरिवृक्षकषायेण व्रणं प्रक्षाल्य प्रपौण्डरीकादिभिर्लेपयेत्। नयनौषधं-पाट्टिकारोध्रम्। एभिरेव-प्रपौण्डरीकादिभिः, हरिद्रान्वितैर्व्रणाभ्यङ्गविषये तैलं पचेत्।

दशाहं स्वेदयेच्चैनं, स्वमार्गं सप्तरात्रतः॥ ६०॥

मूत्रे त्वगच्छति दहेदश्मरीव्रणमग्निना।

स्वमार्गप्रतिपत्तौ तु स्वादुप्रायैरुपाचरेत्॥ ६१॥

तं बस्तिभिः

स०-एनं व्रणं दशाहं स्वेदयेत्। स्वेदनादनन्तरं तु- पुनः, सप्तरात्रेण स्वमार्गं मूत्रेऽगच्छति सत्यश्मरीव्रणमग्निना दहेद्वैद्य इति। मूत्रस्य स्वमार्गप्रतिपत्तौ सत्यां तं-आतुरं, स्वादुप्रायैः-मधुरभूयिष्ठद्रव्यसाधितैः, बस्तिभिः-उत्तरबस्त्यादिभेदभिन्नैः, उपचारेत्-उअपक्रमेत्।

न चारोहेद्वर्षं रूढव्रणोऽपि सः।

नगनागाश्ववृक्षस्त्रीरथान्नाप्सु प्लवेत च॥ ६२॥

स०-रूढव्रणोऽपि [सः-] अश्मर्यातुरो, वर्षं यावन्नगादीन्नारोहेत्। अप्सु च न प्लवेत।

मूत्रशुक्रवहौ बस्तिवृषणौ सेवनीं गुदम्।

मूत्रप्रसेकं योनिं च शस्त्रेणाष्टौ विवर्जयेत्॥ ६३॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां चतुर्थे चिकित्सितस्थाने मूत्राघातचिकित्सितं नामैकादशोऽध्यायः॥ ११॥

****

स०-अश्मरीव्रणावसरे तदर्थमन्यार्थमपि मूत्रवहादीनि [अष्टौ] मर्माणि शस्त्रेण वर्जयेत्। तत्र मूत्रवहस्रोतश्छेदान्मूत्रपूर्णबस्तेर्मरणं स्यात्, शुक्रवहस्रोतश्छेदानमरणं क्लैव्यं वा, बस्तिगुदच्छेदात्सद्यो मरणम्, वृषणस्रोतश्छेदात् ध्वजभङ्गः, सेवनीयोनिच्छेदाद्रुजाप्रादुर्भावः, मूत्रप्रसेकस्रोतश्छेदान्मूत्रप्रस्रवणमिति।

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टाङ्गहृदयटीकायां सर्वाङ्गसुन्दराख्यायां चतुर्थे चिकित्सितस्थाने मूत्राघातचिकित्सितं नामैकादशोऽध्यायः समाप्तः॥ ११॥

****

द्वादशोऽध्यायः।

मूत्राघातचिकित्सितादनन्तरम् प्रमेहचिकित्सितव्याख्यानमुपक्रम्यते।

अथातः प्रमेहचिकित्सितं व्याख्यास्यामः।

इति ह स्माहुरात्रेयादयो महर्षयः।

(गद्यसूत्रे॥२॥)

स०-सम्बन्धश्चास्य पूर्ववद्बोध्यः।

मोहिनो बलिनः कुर्यादादौ वमनरेचने।
स्निग्धस्य सर्षपारिष्टनिकुम्भाक्षकरञ्जजैः॥१॥
तैलैस्त्रिकण्टकाद्येन यथास्वं साधितेन वा।
स्नेहेन मुस्तदेवाह्वनागरप्रतिपावत्॥२॥
सुरसादिकषायेण दद्यादास्थापनं ततः।
न्यग्रोधादेस्तु पित्तार्तं रसैः शुद्धं च तर्पयेत्॥३॥

स०-बलवतो मेहिनः पुसोऽपरेभ्य उपक्रमेभ्यस्तत्तद्योग्येभ्यः प्रथमं वमनविरेचने कुर्यान्मेहक्लेदप्रशमनाय। किम्भूतस्य? सर्षपादिजैस्तैलैः स्निग्धस्य, त्रिकण्टकाद्येन वा स्नेहेनस्निग्धस्य, "त्रिकण्टकनिशारोध्र" (श्लो. १ ७) इत्यादिस्नेहो वक्ष्यमाणः, यथास्वं दोषसात्म्यादिवशाद्द्रव्यैः साधितेन वा स्नेहेन स्निग्धस्य। ततो-वमनविरेचनकरणादनन्तरं जातबलाय मेहिने, "सुरसयुग" (ह. सू. अ. १५।३०) इत्यादेः सम्बन्धिना कषायेणास्थापनं दद्यात्। किम्भूतम्? मुस्तादिप्रतिवापवत्। स प्रतिवापो विद्यते यस्य तदेवम्। पित्तले पुनः

"न्यग्रोधपिप्पल" (ह्. सू. अ. १५।४१) इत्यादेः कषायेणास्थापनं दद्यात्। प्रतिवापान्तरानिर्देशादत्र पूर्वोक्त एव प्रतिवापो योज्यः। अनन्तरं शुद्धं प्रमेहिणं रसैस्तर्पयेत्। यद्यपि रसैरिति सामान्यनिर्देशात्त्रिविधदेशसञ्जातप्राणिमांसरसैस्तर्पणं प्राप्तं तथाऽपि योग्यतावशात् जाङ्गलप्राणिमांसरसैस्तर्पयेदिति बोध्यम्, न त्वानूपादिमांसरसैरिति। तेषां मेदोमूत्रकफावहत्वेन व्याधिवर्धनहेतुत्वात्।

मूत्रग्रहरुजागुल्मक्षयाद्यास्त्वपतर्पणात्।
ततोऽनुबन्धरक्षार्थं शमनानि प्रयोजयेत्॥४॥

स०-यतोऽपतर्पणान्मूत्रग्रहादीनि जायन्ते ततो हेतोरनुबन्धरक्षार्थं शमनानि प्रयोजयेत्। अन्यथा प्रमेह उपशान्तोऽपि निदानलेशमासाद्य पुनः प्रादुर्भवेत्। ननु, मूत्रग्रहादीन्येतावदस्तु शेषा आदिशब्देनैव ग्रहीष्यन्ते। किं मूत्रग्रहरुजागुल्मक्षयाद्या इति? सत्यम्। मूत्रग्रहरुजागुल्मक्षया यथाऽवश्यमपतर्पणात् प्रमेहिणो जायन्ते तथा नापरे तज्जातीया इति।

असंशोध्यस्य तान्येव सर्वमेहेषु पाययेत्।

स०-असंशोध्यो-वमने गर्भिण्यादिः, विरेके नवज्वरादिः, एतस्यासंशोध्यस्य तान्येव-शमनानि, सर्वेषु प्रमेहेषु पाययेत्। एवेत्यवधारणे, न तु शोधनादिरूपमित्यर्थः।

तान्येवाह-

धात्रीरसप्लुतां प्राह्णे हरिद्रां माक्षिकान्विताम्॥५॥
दार्वीसुराह्वत्रिफलामुस्ता वा क्वथिता जले।
चित्रकत्रिफलादार्वीकलिङ्गान् वा समाक्षिकान्॥६॥
मधुयुक्तं गुडूच्या वा रसमामलकस्य वा।

स०- आमलकीरसालोडितां हरिद्रां समाक्षिकां प्रभाते पाययेत्। दार्वीदेवदारुवरामुस्ता जले क्वथिता वा पाययेत्। चित्रकादीन् वा क्वथितान् समाक्षिकान् पाययेत्। समाक्षिकं गुडूचीरसं धात्रीरसं वा।

रोध्राभयातोयदकट्फलानां
पाठाविडङ्गार्जुनधन्वनानाम्।
गायत्रिदार्वीकृमिहृद्भवानां
कफे त्रयः क्षौद्रयुताः कषायाः॥७॥

उशीररोध्रार्जुनचन्दनानां
पटोलनिम्बामलकामृतानाम्।
रोध्राम्बुकाली यकधातकीनां
पित्ते त्रयः क्षौद्रयुताः कषायाः॥८॥

स०-रोध्रादीनां श्लोकपादोक्तानां कषायाः क्षौद्रयुतास्त्रयः कफे हिताः। एवमुशीरादीनां माक्षिकान्विताः कषायास्त्रयः पित्ते हिताः। उपजातिवृत्ते।

यथास्वमेभिः पानान्नं यवगोधूमभावनाः॥९॥

स०-एभी रोध्रादिभिर्यथायोगं पानमन्नं च कल्पयेत्। यवगोधूमभावनाश्च कल्पयेत्।

वातोल्बणेषु स्नेहांश्च प्रमेहेषु प्रकल्पयेत्।

स०-वाताधिकेषु प्रमेहेषु स्नेहांश्च तैरेव कल्पयेत्। न केवलमन्नभावनाः।

अपूपसक्तुवाट्यादिर्यवानां विकृतिर्हिता॥१०॥

गजाश्वगुदमुक्तानामथवा वेणुजन्मनाम्।

तृणधान्यानि मुद्गाद्याः शालिर्जीर्णः सषष्टिकः॥११॥

श्रीकुक्कुटोऽम्लः खलकस्तिलसर्षपकिट्टजः।

कपित्थं तिन्दुकं जम्बूस्तत्कृता रागषाडवाः॥१२॥

तिक्तं शाकं मधु श्रेष्ठा भक्ष्याः शुष्काः ससक्तवः।

धन्वमांसानि शूल्यानि परिशुष्काण्ययस्कृतिः॥१३॥

मध्वरिष्टासवा जीर्णाः सीधुः पक्करसोद्भवः।

तथाऽसनादिसाराम्बु दर्भाम्भो माक्षिकोदकम्॥१४॥

स०-यवानां विकृतिरपूपादिः प्रमेहे हिता। अथवा, यवानां गजाश्वगुदमुक्तानामपूपादिविकृतिर्हिता। वेणुजानां वा यवानां विकृतिर्हिता। तृणधान्यानि-नीवारश्यामाकादीनि, तथा मुद्गाद्यास्तथा पुराणशालिः षष्टिकश्चेति हितानि। श्रीकुक्कुटसंज्ञोऽम्लः खलको हितः। किम्भूतः ? तिलसर्षपकिट्टजः, -तिलसर्षपपिण्याकजन्मा तदुपादानकारणो न मुद्गाद्युपादानकारणः, स च मालवकेषु प्रसिद्धः, आर्द्रकशकलनिस्तुषगोधूमादिना च क्रियते। तथा, कपित्थादयो हिताः। तैः-कपित्थादिभिः, कृता रागाः षाडवाश्च हिताः। तिक्तशाकादीनि च हितानि। श्रेष्ठा-त्रिफला। शूल्यानीति शूले पक्वानि। "शूलात्पाके" ("शूलोखाद्यत्") इति यत्। तानि च सुपक्वत्वात् परिशुष्काणि। तथा, अयस्कृतिः-वक्ष्यमाणा (श्लो. २९)। तथा, मध्वादयः पुराणाः। पक्करसजः सीधुः। तथा, असनादिसारवर्गस्याम्भो (ह. सू. अ. १५।१९) दर्भजलं माक्षिकोदकं च हितम्।

वासितेषु वराक्वाथे शर्वरीं शोषितेष्वहः।

यवेषु सुकृतान् सक्तून् सक्षौद्रान् सीधुना पिबेत्॥१५॥

स०-तथा, यवेषु सुकृतान् सक्तून् कृत्वा सक्षौद्रान् सीधुना आलोड्य पिबेत्। पक्करसोद्भवेन तस्य योगतः स न स्यात्(?)। यवेष्विति निमित्तसप्तमी। किम्भूतेषु यवेषु ? वराक्वाथे-

त्रिफलाकषाये, शर्वरीं-सकलां रात्रिं, वासितेषु-अभिषुतेषु, अनन्तरमहः शोषितेषु। तत्रात्यन्तसंयोगे द्वितीया।

शालसप्ताह्वकम्पिल्लवृक्षकाक्षकपित्थजम्।
रोहीतकं च कुसुमं मधुनाऽद्यात्सुचूर्णितम्॥ १६॥
कफपित्तप्रमेहेषु पिबेद्धात्रीरसेन वा।

स०-शालादिजं पुष्पं सूक्ष्मरजीकृतं मधुनाऽद्यात्। कफपित्तप्रमेहेषु धात्रीरसेन वा पिबेत्।

त्रिकण्टकनिशारोध्रसोमवल्कवचार्जुनैः॥ १७॥
पद्मकाश्मन्तकारिष्टचन्दनागुरुदीप्यकैः।
पटोलमुस्तमञ्जिष्ठामाद्रीभल्लातकैः पचेत्॥ १८॥
तैलं वातकफे पित्ते घृतं मिश्रेषु मिश्रकम्।

स०-त्रिकण्टकादिभिस्तैलं पचेद्वातकफजे प्रमेहे। पित्तजे एभिरेव घृतं पचेत्। मिश्रेषु दोषेषु मिश्रकं-घृततैलं, पचेत्।

दशमूलशठीदन्तीसुराह्वं द्विपुनर्नवम्॥ १९॥
मूलं स्नुगर्कयोः पथ्यां भूकदम्बमरुष्करम्।
करञ्जौ वरुणान्मूलं पिप्पल्याः पौष्करं च यत्॥ २०॥
पृथग् दशपलं प्रस्थान् यवकोलकुलत्थतः।
त्रींश्चाष्टगुणिते तोये विपचेत्पादवर्तिना॥ २१॥
तेन द्विपिप्पलीचव्यवचानिचुलरोहिषैः।
त्रिवृद्विडङ्गकम्पिल्लभार्गीविश्वैश्च साधयेत्॥ २२॥

प्रस्थं घृताज्जयेत्सर्वांस्तन्मेहान् पिटिका विषम्।

पाण्डुविद्रधिगुल्मार्शःशोषशोफगरोदरम्॥२३॥

श्वासं कासं वमिं वृद्धिं प्लीहानं वातशोणितम्।

कुष्ठोन्मादावपस्मारं धान्वन्तरमिदं घृतम्॥२४॥

स०-स्नुगर्कमूलम्, करञ्जमूलम्, पिप्पलीमूलम्, पौष्करं च यदिति पुष्करमूलं चेत्यर्थः। दशमूलादिकं पृथक्-प्रत्येकं, दशपलप्रमाणं यवकोलकुलत्थांस्त्रीन् प्रस्थांश्चाष्टगुणिते जले च विपचेत्। तेन-जलेन, पादवर्तिना-पादशेषेण, द्विपिप्पल्यादिमिश्र [कल्कीकृतैः] सामान्यपरिभाषोक्तप्रमाणाद्धृतात्प्रस्थं पचेत्। तद्धृतं सर्वान् प्रमेहान् पिटिकादींश्च जयेत्।

रोध्रमूर्वाशठीवेल्लभार्गीनतनखप्लवान्।

कलिङ्गकुष्ठकमुकप्रियङ्गुतिविषाग्निकान्॥२५॥

द्वे विशाले चतुर्जातं भूनिम्बं कटुरोहिणीम्।

यवानीं पौष्करं पाठां ग्रन्थिं चव्यं फलत्रयम्॥२६॥

कर्षांशमम्बुकलशे पादशेषे स्रुते हिमे।

द्वौ प्रस्थौ माक्षिकात्क्षिप्त्वा रक्षेत्पक्षमुपेक्षया॥२७॥

रोध्रासवोऽयं मेहर्शःश्वित्रकुष्ठारुचिकृमीन्।

पाण्डुत्वं ग्रहणीदोषं स्थूलतां च नियच्छति॥२८॥

स०-रोध्रादि प्रत्येकं कर्षप्रमाणं जलकलशे पादशेषे स्रुते शीते च माक्षिकात् द्वौ प्रस्थौ क्षिप्त्वा पक्षमात्रमचलं कृत्वा रक्षेत्। अयं रोध्रासवो मेहादीन्नाशयेत्।

साधयेदसनादीनां पलानां विंशतिं पृथक्।

द्विवहेऽपां क्षिपेत्तत्र पादस्थे द्वे शते गुडात्॥२९॥

क्षौद्राढकार्धं पलिकं वत्सकादिं च कल्कितम्।

तत्क्षौद्रपिप्पलीचूर्णप्रदिग्धे घृतभाजने॥३०॥

स्थितं दृढे जतुसृते यवराशौ निधापयेत्।

खदिराङ्गारतप्तानि बहुशोऽत्र निमज्जयेत्॥३१॥

तनूनि तीक्ष्णलोहस्य पत्राण्यालोहसङ्क्षयात्।

अयस्कृतिः स्थिता पीता पूर्वस्मादधिका गुणैः॥३२॥

स०-असनादीनां-"असनतिनिश" (हृ. सू. अ. १५।१९) इत्यादिगणोक्तानां द्रव्याणां, पृथक्-प्रत्येकं, पलानां विंशतिं-विंशतिपलानि, अपां द्विवहे-जलद्रोणाष्टके, साधयेत्। तत्र-तस्मिन्, पादशेषे श्रृते शीते च सति गुडस्य द्वे शते क्षिपेत्। माक्षिकस्यार्धाढकम्। "वत्सकमूर्वा' (हृ. सू. अ. १५।३३) इत्यादिकं च पृथक् पालिकं कल्कितं कृत्वा क्षिपेत्। अनन्तरमन्तर्माक्षिकपिप्पलीचूर्णप्रलिप्ते घृतभाजने दृढे जतुलिप्ते स्थितं यवराशौ स्थापयेत्। अनन्तरं खदिराङ्गारतप्तानि तीक्ष्णलोहपत्राणि तनूनि पुनःपुनरत्र निमज्जयेत्। यावत्सङ्क्षयं-विलीनवृत्तित्वमायान्ति। अयस्कृतिरियं स्थिता-सम्पन्ना, पीता पूर्वस्मात्-रोध्रासवात्, गुणैरधिका। अत्र च सङ्ग्रहोक्ताद्दशमूलारिष्टादयसः परिमाणं कल्प्यं प्रायोऽत्र प्रस्थमात्रम्। एवमन्यत्रापि द्रवद्रव्यमपेक्ष्य नारसिंहघृतादौ (हृ. उ. अ. ३९।१७०) अनयैव दिशाऽयसः परिमाणं कल्पनीयम्।

रूक्षमुद्वर्तनं गाढं व्यायामो निशि जागरः।

यच्चान्यच्छ्लेष्ममेदोघ्नं बहिरन्तश्च तद्धितम्॥३३॥

स०-तस्मिन्प्रमेह उद्वर्तनं रूक्षं तथा गाढं-न तु शिथिलं, हितम्। तथा व्यायामरात्रिजागरौ च। अपरमपि यदेवंप्रायं श्लेष्ममेदोहरं बहिरन्तश्च, तच्च प्रमेहिणे हितम्।

सुभावितां सारजलैस्तुलां पीत्वा शिलोद्भवात्।

साराम्बुनैव भुञ्जानः शालीन् जाङ्गलजै रसैः॥३४॥

सर्वानभिभवेन्मेहान् सुबहूपद्रवानपि।

गण्डमालार्बुदग्रन्थिस्थौल्यकुष्ठभगन्दरान्॥ ३५॥

कृमिश्लीपदशोफांश्च परं चैतद्रसायनम्।

स०-साराः-असनखदिरादयः, तेषां जलैः-क्काथैः, शिलाह्वयात्तुलां सुभावितां पीत्वा साराम्बुनैव जाङ्गलप्राणिमांसजै रसैः शालीनदन् सर्वान्मेहान् सुबहूपद्रवानपि जयेत्, गण्डमालादींश्च। इदं चोत्कृष्टम् रसायनम्।

अधनश्छत्रपादत्ररहितो मुनिवर्तनः॥ ३६॥

योजनानां शतं यायात्खनेद्वा सलिलाशयान्।

गोशकृन्मूत्रवृत्तिर्वा गोभिरेव सह भ्रमेत्॥ ३७॥

स०-धनरहितः प्रमेही छत्रपादत्ररहितो मुनिवृत्तिः सन् योजनानां शतं यायात्। अथवा, सलिलाशयान् खनेत्। अथवा, गोशकृन्मूत्रवर्तनो गोभिरेव सह भ्रमेत्।

बृंहयेदौषधाहारैरमेदोमूत्रलैः कृशम्।

स०-कृशं नरमौषधयुक्तैराहारैर्बृंहयेत्। किम्भूतैः अमेदोमूत्रकरैः।

शराविकाद्याः पिटिकाः शोफवत्समुपाचरेत्॥ ३८॥

अपक्का व्रणवत्पक्काः

स०-"शराविका कच्छपिका" (हृ. नि. अ. १०।२५) इत्याद्याः पिटिका अपक्काः सतीः शोफवदुपक्रमेत्। पक्काः पुनर्व्रणवदुपाचरेत्।

तासां प्राग्रूप एव च।

क्षीरिवृक्षाम्बु पानायवस्तमूत्रं च शस्यते॥ ३९॥

तीक्ष्णं च शोधनं, प्रायो दुर्विरेच्या हि मेहिनः।

स०-तासां च पूर्वरूपावस्थायामेव क्षीरिवृक्षाम्बु पानाय शस्यते छागमूत्रं च। तथा, शोधनं-विरेचनं, तीक्ष्णं शस्यते। कुतः ? इत्याह-यस्मात् प्रमेहिणो दुःखेन विरेचयितुं शक्याः।

तैलमेलादिना कुर्याद्गणेन व्रणरोपणम्॥ ४०॥

उद्वर्तने कषायं तु वर्गेणारग्वधादिना।

परिषेकोऽसनाद्येन पानान्ने वत्सकादिना॥ ४१॥

स०-"एलायुग्म" (हृ. सू. अ. १५।४३) इत्यादिना गणेन तैलं व्रणरोपणं कुर्यात्। उद्वर्तने "आरग्वधेन्द्रयव" (हृ. सू. अ. १५।१७) इत्यादिना गणेन कषायं कुर्यात्। "असनतिनिश" (हृ. सू. अ. १५।१९) इत्यादिना परिषेकहृ स्यात्। पानमन्नं च "वत्सकमूर्वा' (हृ. सू. अ. १५।३३) इत्यादिना संस्कृतं कुर्यात्।

पाठाचित्रकशार्ङ्गेष्टासारिवाकण्टकारिकाः।

सप्ताह्वं कौटजं मूलं सोमवल्कं नृपद्रुमम्॥ ४२॥

सञ्चूर्ण्य मधुना लिह्यात्तद्वच्चूर्णं नवायसम्।

स०-पाठादीन् सञ्चूर्ण्य मधुनाऽवलेहयेत्। नवायसं चूर्णं तद्वत्-माक्षिकेण लिह्यात्।

मधुमेहित्वमापन्नो भिषग्भिः परिवर्जितः॥ ४३॥

शिलाजतुतुलामद्यात्प्रमेहार्तः पुनर्नवः॥ ४३ १/२॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां चतुर्थे चिकित्सितस्थाने प्रमेहचिकित्सितं नाम द्वादशोऽध्यायः॥१२॥

****

स०-मधुमेहित्वमपि प्राप्तो भिषग्भिश्च परिवर्जितो मेही शिलाजतुपलशतं [अद्यात्-] सेवनं कुर्यात्। कृतशिलाजतुतुलश्चासौ पुनर्नवो भवति। खारणादे च विशेषोपक्रमा उक्ताः। यथा-"अश्वत्थचन्दनागरुपाठाक्काथो जलाभमेहे तु। इक्षुरसाभे पाठाकृमिहन्तृसम्बन्धनः क्काथः॥सान्द्राकारे मेहे हिताऽऽढकी कर्णिकारो वा। क्काथस्तथाऽर्जुनस्य पातव्यो वारुणीमेहे॥ पिष्टे ससिता रजनी पातव्या शिशिरतोयेन। निम्बश्च शुक्रमेहे तप्तजलेनाथवा सुरया॥ सिकतामेहे चित्रकबाह्लीककुष्ठनिःक्काथः। शीतलमेहे क्काथः पिचुमन्दकृतश्च पातव्यः॥ पाषाणभित्तु सुरया कथितः शस्तः शनैर्मेहे। गोक्षुरकस्य कषायो लालामेहे फलत्रिकेण सह॥ शल्लक्युशीरसैन्धववचा हिताः क्षारमेहिनः पिष्टाः। कथिताश्च नीलमेहे रोध्रसमङ्गाकदम्बाः स्युः॥क्काथो बिभीतकस्य तु कल्कोऽपि वा निशामेहे॥माञ्जिष्टे स्युस्त्रिफला जलदं जलपद्मकं रोध्रम्। लोहितमेहे युञ्ज्यात्त्रिफलाक्काथेन संयुतं गिरिजम्॥वालकं त्रिवृता धात्री मुस्तं च सरसाञ्जनम्। कटुकातिविषारोध्रं खादिरेणाम्भसा पिबेत्॥प्रायः शोधनमेतद्धि प्रधानं समुदाहृतम्।" इति।

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टाङ्गहृदयटीकायां सर्वाङ्गसुन्दराख्यायां चतुर्थे चिकित्सितस्थाने प्रमेहचिकित्सितं नाम द्वादशोऽध्यायः समाप्तः॥१२॥

****

त्रयोदशोऽध्यायः।

अस्मादनन्तरं विद्रधिवृद्धिचिकित्सितमारभ्यते, प्रमेहोपद्रवभूतत्वाद्विद्रधेः। इत्याह-

अथातो विद्रधिवृद्धिचिकित्सितं व्याख्यास्यामः।
इति ह स्माहुरात्रेयादयो महर्षयः। (गद्यसूत्रे॥२॥)

विद्रधिं सर्वमेवामं शोफवत्समुपाचरेत्।
प्रततं च हरेद्रक्तं पक्वे तु व्रणवत्क्रिया॥१॥

स०-आमं सर्वमेव विद्रधिं शोफवदुपक्रमेत्। अनवरतं च रक्तमाहरेत्। अनन्तरं पक्वे सति व्रणवत्क्रिया।

विशेषेण विकित्सितमाह-

पञ्चमूलजलैर्धौतं वातिकं लवणोत्तरैः।
भद्रादिवर्गयष्ट्याह्वतिलैरालेपयेद्व्रणम्॥२॥
वैरेचनिकयुक्तेन त्रैवृतेन विशोध्य च।
विदारीवर्गसिद्धेन त्रैवृतेनैव रोपयेत्॥३॥

स०-वातिकं व्रणं-वातविद्रधावर्थाज्ञातं, पञ्चमूलजलैः प्रक्षालितं "भद्रदारु नतं" (ह्र. सू. अ. १५।५) इत्यादिना मधुयष्टिकया तिलैश्च लवणाद्यै(धिकै)र्लेपयेत्। वैरेचनिकयुक्तेन-"निकुम्भकुम्भ" (ह्र. सू. अ. १५।२) इत्यादिवर्गोक्तेन युक्तेन, त्रैवृतेन-

त्रैवृताख्येन स्नेहेन, विशोध्य-शोधयित्वा, ततो "विदारिपञ्चाङ्गुल" (हृ. सू. अ. १५।९) इत्यादिद्रव्यसिद्धेन त्रैवृतेनैव स्नेहेन व्रणं रोपयेत्।

क्षालितं क्षीरितोयेन लिम्पेद्यष्ट्यमृतातिलैः।

पैत्तं घृतेन सिद्धेन मञ्जिष्ठोशीरपद्मकैः॥४॥

पयस्याद्विनिशाश्रेष्ठायष्टीदुग्धैश्च रोपयेत्।

न्यग्रोधादिप्रवालत्वक्फलैर्वा

स०-पैत्तं व्रणं क्षीरितोयेन धौतम्। क्षीरिणो-नग्रोधादयः। मधुयष्टकागुडूचीतिलैर्लिम्पेद्वहिः। घृतेनेत्यादि। मञ्जिष्ठादिभिर्घृतेन सिद्धेन रोपयेत्। सामान्यपरिभाषोक्तप्रमाणेन (हृ. क. अ. ६। १५) द्रव्यं घृतं जलं समक्षीरं [चतुर्गुणविवर्धितं] इत्यत्र पाकक्रमः। न्यग्रोधेत्यादि। प्रवालश्च त्वक् च फलं च प्रवालत्वक्फलानि। न्यग्रोधादीनां (हृ. सू. अ. १५।४९) प्रवालत्वक्फलैः सिद्धेन वा घृतेन रोपयेत्।

कफजं पुनः॥५॥

आरग्वधादिना धौतं सक्तुकुम्मनिशातिलैः।

लिम्पेत्कुलत्थिकादन्तीत्रिवृच्छयामाग्नितिल्वकैः॥६॥

ससैन्धवैः सगोमूत्रैस्तैलं कुर्वीत रोपणम्।

स०-कफजं तु व्रणमारग्वधादिना (हृ. सू. अ. १५।१७) धौतं सत्त्वादिभिर्लिम्पेत्। कुलत्थिकादिभिर्द्रव्यैस्तैलं रोपणं कुर्वीत।

रक्तागन्तूद्भवे कार्या पित्तविद्रधिवत्क्रिया॥७॥

स०-रक्तोद्भवे तथाऽऽगन्तुजे क्षतोद्भवे च विद्रधौ पित्तविद्रधितुल्या क्रिया कार्या।

वरुणादिगणक्काथमपक्केऽभ्यन्तरोत्थिते।

ऊशकादिप्रतीवापं पूर्वाह्णे विद्रधौ पिबेत्॥८॥

स०-आन्तरे विद्रधौ वरुणादि (हृ. सू. अ. १५।२९)गणक्काथमूषकादि (हृ. सू. अ. १५।२३) प्रतीवापं पूर्वाह्णे पिबेत्।

घृतं विरेचनद्रव्यैः सिद्धं ताभ्यां च पाययेत्।

निरूहं स्नेहबस्तिं च ताभ्यामेव प्रकल्पयेत्॥९॥

स०-विरेचनद्रव्यैर्यथादोषं च घृतं सिद्धं तथा ताभ्यां-वरुणादिगणोषकादिगणाभ्यां, सिद्धं घृतमपक्काभ्यन्तरोत्थिते विद्रधौ पाययेत्। ताभ्यामेव गणाभ्यां निरूहान्वासने निरूपयितव्ये।

पानभोजनलेपेषु मधुशिग्रु प्रयोजितः।

दत्तावापो यथादोषमपक्वं हन्ति विद्रधिम्॥१०॥

स०-पानादिषु मधुशिग्रुः प्रयोजितो दत्तावापो-वितीर्णकल्कः, सामर्थ्यात्तत्काथः पक्वं विद्रधिं हन्ति।

त्रायन्तीत्रिफलानिम्बकटुकामधुकं समम्।

त्रिवृत्पटोमूलाभ्यां चत्वारोंऽशाः पृथक् पृथक्॥११॥

मसूरान्निस्तुषादष्टौ तत्काथः सघृतो जयेत्।

विद्रधीगुल्मवीसर्पदाहमोहमदज्वरान्॥१२॥

तृण्मूर्च्छाच्छर्दिहृद्रोगपित्तासृक्कुष्ठकामलाः।

स०-त्रायन्त्यादिकं समं-समांशं, त्रिवृतायाश्चत्वारोंऽशाः पटोलमूलाच्च, निस्तुषमसूरादष्टावित्येतैः क्काथो घृतसहितो विद्रध्यादीन् पराकुर्यात्।

कुडवं त्रायमाणायाः साध्यमष्टगुणेऽम्भसि॥ १३॥

कुडवं तद्रसाद्धात्रीस्वरसात्क्षीरतो घृतात्।

कर्षांशं कल्कितं तिक्तात्रायन्तीधन्वयासकम्॥ १४॥

मस्तातामलकीवीराजीवन्तीचन्दनोत्पलम्।

पचेदेकत्र संयोज्य तद्घृतं पूर्ववद्गुणैः॥ १५॥

स०-त्रायमाणायाः कुडवमष्टगुणे जले साध्यम्। तद्रसात्-त्रयामाणायाः क्काथात्कुडवं, धात्रीस्वरसात् क्षीराद्घृताच्च प्रत्येकं कुडवं, कर्षांशं प्रत्येकं कल्कीकृतं तिक्तादि, एकत्र मिश्रयित्वा पचेत्। तदेतद् घृतं पूर्वगुणम्।

द्राक्षा मधूकं खर्जूरं विदारी सशतावरी।

परूषकाणि त्रिफला तत्क्काथे पाचयेद्घृतम्॥ १६॥

क्षीरेक्षुधात्रीनिर्यासप्राणदाकल्कसंयुतम्।

तच्छीतं सर्खराक्षौद्रपादिकं पूर्ववद्गुणैः॥ १७॥

स०-द्राक्षादिभिः क्काथे क्षीरं इक्षुरसे धात्रीरसे हरीतकीकल्कयुतं घृतं सामान्यपरिभाषया पचेत्। तद्घृतं शीतं सच्छर्कराक्षौद्रपादयुतं पूर्वगुणम्। शर्कराक्षौद्रपादिकमिति "अत इनिठनौ" इति ठन्।

हरेच्छृङ्गादिभिर्सृक् सिरया वा यथान्तिकम्।

स०-शृङ्गादिभी रक्तं हरेत्। सिरया वा यथासमीपमस्त्रं हरेत्।

विद्रधिं पच्यमानं कोष्ठस्थं बहिरुन्नतम्॥१८॥

ज्ञात्वोपनाहयेत्

स०-विद्रधिं कोष्ठस्थं कोष्ठगतं बहिरुन्नतं पच्यमानं बुद्ध्वोपनाहयेत्-उअपनद्धं कुर्यात्।

शूले स्थिते तत्रैव पिण्डिते।

तत्पार्श्वपीडनात्सुप्तौ दाहादिष्वल्पकेषु च॥१९॥

पक्वः स्याद्विद्रधिं भित्त्वा व्रणवत्तमुपाचरेत्।

स०-तत्रैव शूले पिण्डिते स्थिते यं दोषमाश्रित्योन्नद्धस्तिष्ठति तथा तत्पार्श्वे पीडनेन सुप्तौ-स्वपने, तथा दाहादिष्वल्पकेषु, आदिशब्देनोषादयो गृह्यन्ते, एतेषु सत्सु पक्वो विद्रधिः स्यात्। तं भित्वा-सञ्छेद्य, व्रणवदुपक्रमेत्।

अन्तर्भागस्य चाप्येतच्चिह्नं पक्वस्य विद्रधेः॥२०॥

स०-अन्तर्भागस्य च विद्रधेरेतदेव चिह्नम्।

पक्वः स्रोतांसि सम्पूर्य स यात्यूर्ध्वमधोऽथवा।

स्वयं प्रवृत्तं तं दोषमुपेक्षेत हिताशिनः॥२१॥

दशाहं द्वादशाहं वा रक्षन् भिषगुपद्रवान्।

असम्यग्वहति क्लेदे वरुणादिं सुखाम्भसा॥२२॥

पाययेन्मधुशिग्रुं वा यवागूं तेन वा कृताम्।

स०-तदाऽसौ पक्वः सन् स्रोतांसि क्लेदयित्वोर्ध्वं प्रयात्यधो वा, तं दोषं स्वयं प्रवृत्तं-पतन्तं, हिताशिन उपेक्षेत-न किञ्चिदुपक्रमान्तरं कुर्वीत। दशाहं द्वादशाहं वा वैद्य उपद्रवान्रक्षेत्। क्लेदे च

यथावदवहति सति वरुणादिमुष्णाम्बुना पाययेत्, वैद्य इति शेषः। दशाहमिति दशानामह्नां समाहार इति समासे "राजाहःसखिभ्यष्टच्" इति टच्। "न सङ्ख्यादेः समाहारे" इत्यह्नादेशनिषेधः। " नस्तद्धिते" इति टिलोपः। "स नपुंसकम्" इति नपुंसकत्वम्। "कलाध्वनोः" इति द्वितीया। अथवा मधुशिग्रुं पाययेत्। तेन वा-मधुशिग्रुणा, कृतां पेयां पाययेत्।

यवकोलकुलत्थोत्थयूषैरन्नं च शस्यते॥२३॥

स०-यवादिजैर्यूषैः सहान्नं च शस्यते।

ऊर्ध्वं दशाहात्त्रायन्तीसर्पिषा तैल्वकेन वा।
शोधयेद्बलतः, शुद्धः सक्षौद्रं तिक्तकं पिबेत्॥२४॥

स०-दशाहादनन्तरं त्रायन्तीघृतेन-"कुडवं त्रायमाणायाः" (श्लो. १३) इत्यादिना, अथवा तैल्वकेन-"शम्याकेन त्रिवृतया" (ह्. चि. अ. ३।१५२) इत्यादिना, शोधयेद्यथाबलम्। शुद्धः सन् क्षौद्रेण सह तिक्तकं पिबेत्।

सर्वशो गुल्मवच्चैनं यथादोषमुपाचरेत्।

स०-सर्वेण प्रकारेणगुल्मवदेनं-विद्रधिं, यथादोषमुपक्रमेत्।

सर्वावस्थासु सर्वासु गुग्गुलुं विद्रधीषु च॥२५॥
कषायैर्यौगिकैर्युञ्ज्यात्स्वैःस्वैस्तद्वच्छिलाजतु।

स०-विद्रधीषु सर्वासु सर्वावस्थास्वेवं गुग्गुलुं यौगिकैः स्वैःस्वैर्योग्यैः कषायैर्युञ्ज्यात्। तद्वत्-तथैव कषायैः सह, शिलाजतु युञ्ज्यात्।

पाकं च वारयेद्यन्तात्सिद्धिः पक्के हि दैवेकी॥ २६॥

अपि चाशु विदाहित्वाद्विद्रधिः सोऽभिधीयते।

स०-पाकं च यत्नेन वारयेत्। हि-यस्मात्, पक्के सति दैविकी सिद्धिः-न तु भिषग्वशानुगेत्यर्थः। आशु च विदाहित्वात् सः-अयं रोगो, विद्रधिरित्युच्यते। तस्मात्तस्य पाकरक्षायां यतितव्यमित्यर्थः।

सति चालोचयेन्मेहे प्रमेहाणां चिकित्सितम्॥ २७॥

स०-मेहे च सति प्रमेहाणां चिकित्सितमालोचयेत्। चशब्दाद्विद्रधिचिकित्सितोक्तमपि कुर्यात्।

स्तनजे व्रणवत्सर्वं न त्वेनमुपनाहयेत्।

पाटयेत्पालयन् स्तन्यवाहिनीः कृष्णचूचुकौ॥ २८॥

सर्वास्वामाद्यवस्थासु निर्दुहीत च तत्स्तनम्।

इति विद्रधिचिकित्सितम्।

स०-स्तनजे विद्रधावुपनाहं वर्जयित्वा सर्वमेव व्रणक्रियाक्रमं कुर्यात्। विद्रधिशब्दः पुंस्त्रीलिङ्गः। स्तनविद्रधिं च पाटयेद्वैद्यः। स्तन्यवाहिनीः सिराः कृष्णचूचुकौ च पालयन्। सर्वासु चामाद्यवस्थासु तस्य-विद्रधेः सम्बन्धिनं, स्तनं निर्दुहीत। आदिशब्दः पच्यमानपाकावस्थयोर्ग्रहणार्थः।

इति विद्रधिचिकित्सितमुक्त्वा वृद्धिचिकित्सितमाह-

अथ वृद्धिचिकित्सितम्।

शोधयेत्त्रिवृता स्निग्धं वृद्धौ स्नेहैश्चलात्मके॥ २९॥

कौशाम्रतिल्वकैरण्डसुकुमारकमिश्रकैः।

स०-चलात्मके वृद्धौ सति वृद्ध्यामयिनं त्रिवृताख्येन स्नेहेनासमन्तात् स्निग्धं सन्तं शोधयेत्। अत्र च सामान्योक्तावप्यपक्वस्य त्रैवृतस्य न तथा प्रयोगः प्रशस्यत इति पूर्वोक्तया रीत्या (श्लो. ३) विदारिवर्गसिद्धस्योपयोगः कार्य इति केचिन्मन्यन्ते। कैः स्नेहैः ? कौशाम्रादिभिः सिद्धैः। सुकुमारकं-अत्रैव वक्ष्यमाणम् (श्लो. ४१), मिश्रकं च-गुल्मचिकित्सिते (श्लो. ८९।९०)।

ततोऽनिलघ्ननिर्यूहकल्कस्नेहैर्निरूहयेत्॥ ३०॥

रसेन भोजितं यष्टितैलेनान्वासयेदनु।

स्वेदप्रलोपा वातघ्नाः पक्वे भित्त्वा व्रणक्रियाम्॥ ३१॥

स०-ततः-शोधनादनन्तरं, वातघ्नकषायकल्कस्नेहैर्निरूहयेत्। अनु-निरूहस्य पश्चात्, मांसरसेन भोजितं सन्तं मधुयष्टिकातैलेनानुवासयेत्। स्वेदाः प्रलेपाश्च वातघ्ना हिताः। पक्वे वृद्धौ भित्त्वा-पाटयित्वा, व्रणक्रियां कुर्यात्।

पित्तरक्तोद्भवे वृद्धावामपक्वे यथायथम्।

शोफव्रणक्रियां कुर्यात् प्रततं च हरेदसृक्॥ ३२॥

स०-पित्तरक्तोत्थिते वृद्धावामे पक्वे च [यथायथं-] यथास्वं, आमे शोफक्रियां कुर्यात्, पक्वे व्रणक्रियां कुर्यात्। सततं च रक्तमाकर्षेत्।

गोमूत्रेण पिबेत्कल्कं श्लैष्मिके पीतदारुजम्।

विस्रापनादृते चास्य श्लेष्मग्रन्थिक्रमो हितः॥३३॥

पक्के च पाटिते तैलमिष्यते व्रणशोधनम्।

सुमनोरुष्कराङ्कोल्लसप्तपर्णेषु साधितम्॥३४॥

पटोलनिम्बरजनीविडङ्गकुटजेषु च।

स०-श्लैष्मिके वृद्धौ दार्वीकल्कं गोमूत्रेण पिबेत्। अस्य च-श्लैष्मिकवृद्धेः, विस्रापनमन्तरेण श्लेष्मग्रन्थिचिकित्सितं हितम्। विस्रापनं-तस्तैर्मर्दनोपायैर्विमर्दनम्। पक्के पाटिते सति सुमनोरुष्करादिभिः कुटजान्तैः साधितं तैलं व्रणशोधनमिष्यते।

मेदोजं मूत्रपिष्टेन सुस्विन्नं सुरसादिना॥३५॥

शिरोविरेकद्रव्यैर्वा वर्जयन् फलसेवनीम्।

दारयेद्वृद्धिपत्रेण सम्यङ्मेदसि सूद्धते॥३६॥

व्रणं माक्षिककासीससैन्धवप्रतिसारितम्।

सीव्येदभ्यञ्जनं चास्य योज्यं मेदोविशुद्धये॥३७॥

मनःशिलैलासुमनोग्रन्थिभल्लातकैः कृतम्।

तैलमाव्रणसन्धानात्स्नेहस्वेदौ च शीलयेत्॥३८॥

स०-मेदोजं वृद्धिरोगं गोमूत्रपिष्टेन सुरसादिना गणेन (ह्. सू. अ. १५।३०) सुखिन्नं शिरोविरेकद्रव्यैर्वा सुखिन्नं वृद्धिपत्रेण सम्यक् कृत्वा दारयेत्। किं कुर्वन्? फलसेवनीं वर्जयन्-परिहरन्। अनन्तरं मेदसि सूद्धते सति माक्षिकादिभिः प्रतिसारितं व्रणं सीव्येत्। अनन्तरमस्याभ्यञ्जनं तैलं मनःशिलादिभिः कृतं-सिद्धं, मेदोविशुद्धये योज्यम्। व्रणसन्धानं यावत् स्नेहं स्वेदं च शीलयेत्।

मूत्रजं स्वेदितं स्निग्धैर्वस्त्रपट्टेन वेष्टितम्।

विध्येदधस्तात्सेवन्याः स्रावयेच्च यथोदरम्॥३९॥

व्रणं च स्थगिकाबद्धं रोपयेत्

स०-मूत्रजं वृद्धिं सेवन्या अधस्तात् स्निग्धैः स्वेदितं तथा वस्त्रपट्टेण वेष्टितं विध्येत्। जलोदरवच्च स्रावयेत्। द्विद्वारनलिकया पिच्छनलिकया वा क्रमेण व्रणं च स्थगिकाख्येन बन्धविशेषेण बद्धं रोपयेत्।

अन्त्रहेतुके।

फलकोशमसम्प्राप्ते चिकित्सा वातवृद्धिवत्॥४०॥

स०-अन्त्रजे वृद्धौ फलकोशमसम्प्राप्ते सति वातवृद्धिसदृशीं चिकित्सां कुर्यात्।

पचेत्पुनर्नवतुलां तथा दशपलाः पृथक्।

दशमूलपयस्याश्वगन्धैरण्डशतावरीः॥४१॥

द्विदर्भशरकाशेक्षुमूलपोटगलान्विताः।

वहेऽपामष्टभागस्थे तत्र त्रिंशत्पलं गुडात्॥४२॥

प्रस्थमेरण्डतैलस्य द्वौ घृतात्पयसस्तथा।

आवपेद् द्विपलांशं च कृष्णातन्मूलसैन्धवम्॥४३॥

यष्टीमधु(चित्र)कमृद्वीकायवानीनागराणि च (क्षारनागरम्)।

तत्सिद्धं सुकुमाराख्यं सुकुमारं रसायनम्॥४४॥

वातातपाध्वयानादिपरिहार्येष्वयन्त्रणम्।

प्रयोज्यं सुकुमाराणामीश्वराणं सुखात्मनाम्॥४५॥

नृणां स्त्रीवृन्दभर्तृणामलक्ष्मीकलिनाशनम्।

सर्वकालोपयोगेन कान्तिलावण्यपुष्टिदम्॥४६॥

वर्ध्मविद्रधिगुल्मार्शोयोनिमेढ्रानिलार्तिषु।

शोफोदरखुडप्लीहविड्विबन्धेषु चोत्तमम्॥४७॥

स०-पुनर्नवस्य तुलां जलस्य वहे पचेत्। तथा दशमूलादीनि पृथग्दशपलप्रमाणानि। पोटगलो-नलः। अष्टभागशेषे च तस्मिन् गुडात्त्रिंशत्पलान्येरण्डतैलात् प्रस्थं घृतस्य प्रस्थौ द्वौ क्षीरप्रस्थौ द्वौ क्षिपेत्। द्विपलप्रमाणं पिप्पल्यादिकम्। तदेतत्पक्वं सुकुमारसंज्ञं घृतं रसायनं सुकुमारम्। अत एव वातातपादिष्वयन्त्रणम्। सुकुमाराणामीश्वरादीनां प्रयोज्यम्। अलक्ष्मीकलिघ्नं सर्वकालोपयोगात् कान्त्यादिदं वर्ध्माद्यार्तिषु श्रेष्ठम्।

यायाद्वर्ध्म न चेच्छान्तिं स्नेहरेकानुवासनैः।

बस्तिकर्म पुरः कृत्वा वङ्क्षणस्थं ततो दहेत्॥४८॥

अग्निना मार्गरोधार्थं मरुतः

स०-यदि स्नेहादिभिर्वर्ध्म शान्तिं न गच्छेत् ततो बस्तिकर्म कृत्वा वङ्क्षणस्थितं वर्ध्म मरुतो मार्गरोधार्थमग्निना दहेत्।

अर्धेन्दुवक्त्रया।

अङ्गुष्ठस्योपरि स्राव पीतं तन्तुसमं च यत्॥४९॥

उत्क्षीप्य सूच्या तत्तिर्यग्दहेच्छित्त्वा यतो गदः।

ततोऽन्यपार्श्वेऽन्ये त्वाहुर्दहेद्वाऽनामिकाङ्गुलेः॥५०॥

गुल्मेऽन्यैर्वातकफजे प्लीहि चायं विधिः स्मृतः।

कानिष्ठिकानामिकयोर्विश्वाच्यां च यतो गदः॥५१॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां चतुर्थे चिकित्सितस्थाने विद्रधिवृद्धिचिकित्सितं नाम त्रयोदशोऽध्यायः॥ १३॥

****

स०-यतो-यस्मिन्पार्श्वे, गदो विद्यते तत्पार्श्वस्थस्याङ्गुष्ठस्योपरि पृष्ठे स्नाव पीतं यत्तन्तुतुल्यम्। तत् स्नावोत्क्षिप्यार्धेन्दुवक्रया सूच्या तिर्यक् छित्त्वाऽनन्तरं तद्दहेदित्येके वदन्ति। अन्य आचार्या एवमाहुः। ततः पार्श्वात् यतोऽसौ गदस्तिष्ठति ततो यदन्यत्पार्श्वं तस्मिन् पार्श्वेऽङ्गुष्ठस्योपरि यत्स्नाव तथाविधं यत्तत्पूर्ववत् दहेदेति। अन्ये त्वेवं वदन्ति,-अनामिकाया अङ्गुलेरुपरि यत्स्नाव तथारूपं तत्पूर्ववद्दहेदिति। अन्यैराचार्यैर्वातकफजे गुल्मे प्लीह्नि च एषः (अयं) एव-अनन्तरोक्तो, विधिः स्मृतः। तथा विश्वाच्यां-वातव्याधिविशेषे, यतो यस्मिन् पार्श्वेऽसौ गदस्तस्मिन् पार्श्वे कनिष्ठिकानामिकयोरुपरि यत्स्नाव पीतं तन्तुसमं तदुत्क्षिप्य तिर्यक् छित्त्वा दहेदेति।

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टाङ्गहृदयटीकायां सर्वाङ्गसुन्दराख्यायां चतुर्थे चिकित्सितस्थाने विद्रधिवृद्धिचिकित्सितं नाम त्रयोदशोऽध्यायः समाप्तः॥ १३॥

****

चतुर्दशोऽध्यायः।

अस्मादनन्तरं गुल्मचिकित्सितमारभ्यते। सम्बन्धश्चास्य प्रायेणैकयोगक्षेमत्वम्, वातकारणत्वात्।

अथातो गुल्मचिकित्सितं व्याख्यास्यामः।

इति ह स्माहुरात्रेयादयो महर्षयः। (गद्यसूत्रे॥२॥)

गुल्मं बद्धशकृद्वातं वातिकं तीव्रवेदनम्।

रूक्षशीतोद्भवं तैलैः साधयेद्वातरोगिकैः॥१॥

पानान्नान्वासनाभ्यङ्गैः स्निग्धस्य स्वेदमाचरेत्।

आनाहवेदनास्तम्भविबन्धेषु विशेषतः॥२॥

स्रोतसां मार्दवं कृत्वा जित्वा मारुतमुल्बणम्।

भित्वा विबन्धं स्निग्धस्य स्वेदो गुल्ममपोहति॥३॥

स०-[वातिकं गुल्मं तीव्ररुजं पुरीषवातग्रहं रूक्षशीतोद्भूतं वातचिकित्सितोक्तैस्तैलैः साधयेत्। पानान्नान्वासनाभ्यङ्गैः स्निग्धस्य गुल्मिनः स्वेदमाचरेत्।] पानशब्देन स्नेहपानं वेद्यम्, स्निग्धस्येति वचनात्। आनाहादिषु विशेषेण स्वेदमाचरेत्। यस्मात्स्वेदः स्निग्धस्य पुंसः स्रोतोमृदुत्वं विधाय मारुतमुल्बणं च जित्वा तथा विबन्धं भित्त्वा गुल्ममपोहति।

स्नेहपानं हितं गुल्मे विशेषेणोर्ध्वनाभिजे।

पक्वाशयगते बस्तिरुभयं जठराश्रये॥४॥

स०-गुल्मे स्नेहपानं हितम्। ऊर्ध्वनाभिजे गुल्मे विशेषेण स्नेहपानं हितम्। पक्वाशयगते बस्तिर्हितः। जठराश्रित उभयं-स्नेहपानबस्त्याख्यं, हितम्।

दीप्तेऽग्नौ वातिके गुल्मे विबन्धेऽनिलवर्चसोः।
बृंहणान्यन्नपानानि स्निग्धोष्णानि प्रदापयेत्॥५॥
पुनःपुनः स्नेहपानं निरूहाः सानुवासनाः।
प्रयोज्या वातजे गुल्मे कफपित्तानुरक्षिणः॥६॥

स०-वातिके गुल्मे वह्नौ समिद्धे सति वातशकृतोश्च विबन्धे सति बृंहणान्यन्नादीनि स्निग्धोष्णानि च प्रयोजयेत्। तथा, पुनःपुनः स्नेहपानं प्रदापयेत्। निरूहाश्च सहानुवासना वातिके गुल्मे कफपित्तानरक्षिणो नरस्य प्रयोह्याः।

बस्तिकर्म परं विद्याद्गुल्मघ्नं, तद्धि मारुतम्।
स्वस्थाने प्रथमं जित्वा सद्यो गुल्ममपोहति॥७॥
तस्मादभीक्ष्णशो गुल्मा निरूहैः सानुवासनैः।
प्रयुज्यमानैः शाम्यन्ति वातपित्तकफात्मकाः॥८॥

स०-बस्तिकर्म परं-अतिशयेन, गुल्मघ्नं विद्यात्। यस्मातत्-बस्तिकर्म, स्वस्थाने-पक्वाशयाख्ये, प्रथमं पवनं जित्वा सद्यः-शीघ्रं, गुल्मं जयति। यत एवं तस्मात्कारणान्नित्यं गुल्मा निरूहैः सानुवासनैः प्रयुज्यमानैः शाम्यन्ति वातपित्तकफोत्थाः।

हिङ्गुसौवर्चलव्योषबिडदामदीप्यकैः।
पुष्करार्जाजिधान्याम्लवेतसक्षारचित्रकैः॥९॥
शठीवचागन्धैलासुरसैर्दधिसंयुतैः।
शूलानाहहरं सर्पिः साधयेद्वातगुल्मिनाम्॥१०॥

स०-हिङ्वादिभिर्दधियुक्तैर्घृतं साधयेत्। तच्च पीतं वातगुल्मवतां शूलादिजित्। द्रव्येभ्यश्चतुर्गुणं घृतम्, घृतसमं दधि, घृताच्चतुर्गुणं जलम्, इत्यत्र पाकक्रमः।

हपुषोषणपृथ्वीकापञ्चकोलकदीप्यकैः।
साजाजीसैन्धवैर्दध्ना दुग्धेन च रसेन च॥ ११॥
दाडिमान्मूलकात्कोलात्पचेत्सर्पिर्निहन्ति तत्।
वातगुल्मोदरानाहपार्श्वहृत्कोष्ठवेदनाः॥ १२॥
योन्यर्शोग्रहणीदोषकासश्वासारुचिज्वरान्।

स०-हपुषादिभिर्घृताच्चतुर्थांशैर्द्रव्यैःर्दधिदुग्धाभ्यां दाडिममूलकबदररसैः समैः सर्पिः पचेत्। तच्च वातगुल्मादीन् पराकुर्यात्।

दशमूलं बलां कालां सुषवीं द्वौ पुनर्नवौ॥ १३॥
पौष्करैरण्डरास्नाश्वगन्धाभार्ग्यमृताशठीः।
पचेद्गन्धपलाशं च द्रोणेऽपां द्विपलोन्मितम्॥ १४॥
यवैः कोलैः कुलत्थैश्च माषैश्च प्रास्थिकैः सह।
क्काथेऽस्मिन्दधिपात्त्व् च घृतप्रस्थं विपाचयेत्॥ १५॥
स्वरसैर्दाडिमाम्रातमातुलुङ्गोद्भवैर्युतम्।
तथा तुषाम्बुधान्याम्लशुक्तैः श्लक्ष्णैश्च कल्कितैः॥ १६॥
भार्गीतुम्बुरुषड्ग्रन्थाग्रन्थिरास्नाग्निधान्यकैः।
यवानकयवान्यम्लवेतसासितजीरकैः॥ १७॥
अजाजीहिङ्गुहपुषाकारवीवृषकोषकैः।
निकुम्भकुम्भमूर्वेभपिप्पलीवेल्लदाडिमैः॥ १८॥

श्वदंष्ट्रात्रपुसैर्वारुबीजहिंस्राश्मभेदकैः।

मिसिद्विक्षारसुरससारिवानीलिनीफलैः॥१९॥

त्रिकटुत्रिपटूपेतैर्दाधिकं तद्व्यपोहति।

रोगानाशुतरान् पूर्वान् कष्टानपि च शीलितम्॥२०॥

अपस्मारगदोन्मादमूत्राघातानिलामयान्।

स०-दशमूलादीन् पृथग् द्विपलप्रमाणान् यवादिभिः प्रस्थप्रमाणैः सह जलद्रोणे पचेत्। काला-नीलिनी। सुषवी-स्थूलजीरकः। गन्धपलाशो-गन्धपत्रम्। अस्मिन् क्वाथे सामान्यपरिभाषया कृते दधिपात्रे च घृतप्रस्थं विपाचयेत्। किम्भूतम्? दाडिमादिजैश्च स्वरसैस्तथा तुषाम्ब्वादिभिश्च सर्पिःसमैर्युतम्। तथा भार्ग्यादिभिः कल्कीकृतैरुपेतम्। यवानको-यवानीभेदः। कारवी-अजमोदा। वृषको-वासकः। ऊषकः-कल्लरः। इभपिप्पली-गजपिप्पली। अश्मभेदः-पाषाणभेदः। तत्-एतत्, दाधिकं नाम घृतं पूर्वोक्तानामयान् द्राक्तारं हन्ति। अपस्मारादींश्च कृच्छ्रानप्यभ्यस्तं हन्ति। यदि चात्र स्वरसालाभस्तदा तन्त्रान्तरोक्ता कल्पना कार्या। तन्त्रान्तरे चोक्तम्-"प्रस्थं गृहीत्वा चूर्णस्य तोयस्य प्रस्थमापवेत्। अहोरात्रस्थितं पूतं तत्स्यात्स्वरसवद्गुणैः॥" मुनिरप्यूचे (च. चि. अ. १ पादः २।१२)-"स्वरसानामलाभे त्वयं विधिः,-चूर्णानामाढकमाढकमुदकस्याहोरात्रस्थितं मृदितपूतमापवेत् तत्स्वरसवत् प्रयोज्यम्।" इति।

त्र्यूषणात्रिफलाधान्यचविकावेल्लचित्रकैः॥२१॥

कल्कीकृतैर्घृतं पक्वं सक्षीरं वातगुल्मनुत्।

स०-त्र्यूषणादिभिः कल्कीकृतैर्घृतं समानक्षीरं चतुर्गुणजलपक्वं वातगुल्मं नुदति।

तुलां लशुनकन्दानां पृथक्पञ्चपलांशकम्॥२२॥

पञ्चमूलं महच्चाम्बुभारार्धे तद्विपाचयेत्।

पादशेषं तदर्धेन दाडिमस्वरसं सुराम्॥२३॥

धान्याम्लं दधि चादाय पिष्टांश्चार्धपलांशकान्।

त्र्यूषणत्रिफलाहिङ्गुयवानीचव्यदीप्यकान्॥२४॥

साम्लवेतससिन्धूत्थदेवदारून् पचेद्धृतात्।

तैः प्रस्थं तत्परं सर्ववातगुल्मविकारजित्॥२५॥

स०-लशुनमूलतुलां पलशतं महत् पञ्चमूलं च प्रत्येकं पञ्चपलदग्नम्। तदेतत्तोयाद्दशशते पादशेषं विपाचयेत्। पादशेषादर्धेन दाडिमस्वरसं सुरां धान्याम्लं दधि च गृहीत्वा त्र्यूषणादींश्च द्विकार्षिकानादाय तैर्घृतात् प्रस्थं पचेत्। तत्-घृतं, सर्ववातगुल्मविकारजित्।

षड्पलं वा पिबेत् सर्पिर्यदुक्तं राजयक्ष्मणि।

प्रसन्नया वा क्षीरार्थः सुरया दाडिमेन वा॥२६॥

घृते मारुतगुल्मघ्नः कार्यो दध्नः सरेण वा।

स०-राजयक्ष्मचिकित्सिते (श्लो. २२) यदुक्तं षड्पलं घृतं तद्वा पिबेत्। राजयक्ष्मणि विशेषणं स्पष्टार्थम्। घृते षड्पलाख्ये क्षीरार्थः प्रसन्नया वा कार्यः। अथवा सुरया दाडिमेन वा। दधिसारेण वा। एवं क्षीरं हित्वा प्रसन्नाद्यन्यतमेन साधितं घृतं षड्पलं वातगुल्मजित्स्यात्।

वातगुल्मे कफो वृद्धो हत्वाऽग्निमरुचिं यदि॥२७॥

हृल्लासं गौरवं तन्द्रां जनयेदुल्लिखेत्तु तम्।

स०-वातजे गुल्मे श्लेष्मा वृद्धः सन्नग्निं हत्वा यद्यरुच्यादीन् जनयेत्तदा तं-कफं, उल्लिखेत्-उद्वमेत्।

शूलानाहविबन्धेषु ज्ञात्वा सस्नेहमाशयम्॥२८॥

निर्यूहचूर्णवटकाः प्रयोज्या घृतभेषजैः।

स०-शूलादिषु सत्सु सस्नेहमाशयं ज्ञात्वा घृतोक्तैरौषधैः (घृतभेषजैः)-अनन्तरिक्तानां घृतानामौषधैः, क्काथचूर्णगुटिका वा सह प्रयोज्याः।

कोलदाडिमघर्माम्बुतक्रमद्याम्लकाञ्जिकैः॥ २९॥

मण्डेन वा पिबेत्प्रातश्चूर्णान्यन्नस्य वा पुरः।

स०-कोलाद्यम्बुभिस्तक्रादिभिर्वा प्रातश्चूर्णानि-घृतौषधीनां सम्बन्धीनि, मण्डेन सह पिबेत्। अथवा अन्नस्य-आहारस्य, पुरः-पूर्वं, पिबेत्।

चूर्णानि मातुलुङ्गस्य भावितान्यसकृद्रसे॥ ३०॥

कुर्वीत कार्मुकतरान् वटकान् कफवातयः।

स०-चूर्णानि मातुलुङ्गरसेन मुहुर्मुहुर्भावितानि वटकान् कर्मकरणसमर्थान् कुर्वीत। कफवातयोः-कफवातिके गुल्म इत्यर्थः।

हिङ्गुवचाविजयापशुगन्धा-
दाडिमदीप्यकधान्यकपाठाः।
पुष्करमूलशठीहपुषाग्नि-
क्षारयुगत्रिपटुत्रिकटूनि॥ ३१॥
साजाजिचव्यं सहतित्तिडीकं
सवेतसाम्लं विनिहन्ति चूर्णम्।
हृत्पार्श्वबस्तित्रिकयोनिपायु-
शूलानि वाय्वामकफोद्भवानि॥ ३२॥
कृच्छ्रान् गुल्मान् वातविण्मूत्रसङ्गं
कण्ठे बन्धं हृद्ग्रहं पाण्डुरोगम्।
अन्नाश्रद्धाप्लीहदुर्नामहिध्मा-
वर्ध्माध्मानश्वासकासाग्निसादान्॥ ३३॥

स०-हिङ्वादिकमेतच्चूर्णं हृच्छूलादीन्निहन्ति तथा कृच्छ्रगुल्मादींश्च। दोधकोपजातिशालिन्यः।

लवणयवानीदीप्यक-

कणनागरमुत्तरोत्तरं वृद्धम्।

सर्वसमांशहरीतकी-

चूर्णं वैश्वानरः साक्षात्॥३४॥

स०-लवणादिकं क्रमेणोत्तरं भागवृद्धं सर्वसमभागा हरितकीति चूर्णमेतत्साक्षाद्वैश्वानरः, दीपनगुणसामान्यात्। आर्यावृतम्।

त्रिकटुकमजमोदा सैन्धवं जीरके द्वे

समधरणधृतानामष्टमो हिङ्गुभागः।

प्रथमकवलभोज्यः सर्पिषा संप्रयुक्तो

जनयति जठराग्निं वातगुल्मं निहन्ति॥३५॥

स०-त्रिकटुकादीनां सप्तानां समधरणधृतानां-समप्रमाणस्थापितानां, हिङ्गुभागोऽष्टमो 'देयः' इत्यध्याहार्यम्। केचित्त्वेवं व्याख्यानयन्ति। धरणशब्देन पलस्य दशमो भाग उच्यते। धरणे धृता धरणधृताः, समाश्च ते धरणधृताश्च, तेषां समधरणधृतानां त्रिकटुकादीनामष्टमो हिङ्गुभागो देयः। स च प्रथमकवले भोज्यो-भक्षणीयः। सर्पिषा सम्यक् प्रयुक्तो-मिश्रितो, जठराग्निं जनयति, वातगुल्मं च हन्ति। मालिनीवृत्तम्।

हिङ्ग्वाबिडशुण्ठ्यजाजिविजयावाट्याभिधानामयै-

श्चूर्णः कुम्भनिकुम्भमूलसहितैर्भागोत्तरं वर्धितैः।

पीतः कोष्णजलेन कोष्ठजरुजो गुल्मोदरादीनयं

शार्दूलः प्रसभं प्रमथ्य हरति व्याधीन् मृगौघानिव॥३६॥

स०-हिङ्ग्वेत्यादिभिर्भागोत्तरमंशाधिकं वर्धितैश्चूर्णः कोष्णजलेन पीतो जठररुजादीन् पराकरोति। अयं शार्दूलाख्यश्चूर्णो हठात् प्रमथ्य व्याधीन् मृगौघानिव शार्दूलः-सिंहः। अप्यत एव श्लेष्मोपमाऽयमलङ्कारः। तथा भीमशब्देन शार्दूलविक्रीडितं वृत्तमुपलक्ष्यते। यथा भीमशब्देन भीमसेन इति। शार्दूलविक्रीडितं वृत्तम्।

सिन्धूत्थपथ्याकणदीप्यकानां
चूर्णानि तोयैः पिबतां कवोष्णैः।
प्रयाति नाशं कफवातजन्मा
नाराचनिर्भिन्न इवामयौघः॥३७॥

स०-सिन्धूत्थादीनां चूर्णानि कोष्णैस्तोयैः पिबतां कफवातजो रोगसङ्घो नाशं याति। क इव ? नाराचेन निर्भिन्न इवेत्युपमा। उपजातिवृत्तम्।

पूतिकपत्रगजचिर्भटचव्यवह्नि-
व्योषं च संस्तरचितं लवणोपधानम्।
दग्ध्वा विचूर्ण्य दधिमस्तुयुतं प्रयोज्यं
गुल्मोदरश्वयथुपाण्डुगुदोद्भवेषु॥३८॥

स०-पूतिकादिद्रव्यं संस्तरचितं यथाक्रमनिर्दिष्टमुपर्युपरिभावेन संस्तीर्णं तथा लवणोपधनं लवणं सर्वोपर्युपधानं दत्त्वाऽनन्तरं दग्ध्वा सञ्चूर्ण्य ततो दधिमस्तुना युतं गुल्मादिषु प्रयोज्यम्। वसन्ततिलकावृत्तम्।

हिङ्गुत्रिगुणं सैन्धवमस्मात्त्रिगुणं च तैलमैरण्डम्॥३९॥
तत्त्रिगुणरसोनरसं गुल्मोदरवर्ध्मशूलघ्नम्।

स०-सैन्धवं हिङ्गुतस्त्रिगुणम्। अस्माच्च-सैन्धवात्, ऐरण्डतैलं त्रिगुणम्। तस्माच्च-ऐरण्डतैलात्, त्रिगुणं रसोनस्य रसम्। तदेतद्गुल्मादिघ्नम्। आर्यावृत्तम्।

मातुलिङ्गरसो हिङ्गु दाडिमं बिडसैन्धवम्॥४०॥

सुरामण्डेन पातव्यं वातगुल्मरुजापहम्।

मातुलुङ्गरसादिकं सुरामण्डेन पातव्यं वातगुल्मपीडाहरम्।

शुण्ठ्याः कर्षं गुडस्य द्वौ धौतात्कृष्णतिलात्पलम्॥४१॥

खादन्नेकत्र सञ्चूर्ण्य कोष्णक्षीरानुपो जयेत्।

वातहृद्रोगगुल्मार्शोयोनिशूलशकृद्ग्रहान्॥४२॥

स०-शुण्ठ्याः कर्षौ गुडस्य द्वौ कर्षौ लुञ्चितकृष्णतिलात्पलमित्येकत्र मिश्रयित्वा खादन् कोष्णक्षीरापुनः सन् वातहृद्रोगादीन् जयेत्।

पिबेदेरण्डतैलं तु वातगुल्मी प्रसन्नया।

श्लेष्मण्यनुबले वायौ, पित्ते तु पयसा सह॥४३॥

स०-वातकफानुगे सत्येरण्डतैलं प्रसन्नया सह्स् गुल्मवान् पिबेत्। पित्ते त्वनुगते पयसा सहैरण्डतैलं पिबेत्।

विवृद्धं यदि वा पित्तं सन्तापं वातगुल्मिनः।

कुर्याद्विरेचनीयोऽसौ सस्नेहैरानुलोमिकैः॥४४॥

तापानुवृत्तावेवं च रक्तं तस्यावसेचयेत्।

स०-वातगुल्मिनः पित्तं विवृद्धं यदि सन्तापं कुर्यात्, तदाऽसौ-वातगुल्मी, विरेचनीयो-विरेचनार्हः। ऐः ? आनुलोमिकैर्द्रव्यैः स्नेहयुतैः। एवं [च]-विरक्तस्यापि, तापानुवर्तने सति तस्य रक्तस्रावं कुर्यात्।

साधयेच्छुद्धशुष्कस्य लशुनस्य चतुष्पलम्॥४५॥
क्षीरोदकेऽष्टगुणिते क्षीरशेषं च पाचयेत्।
वातगुल्ममुदावर्तं गृध्रसीं विषमज्वरम्॥४६॥
हृद्रोगं विद्रधिं शोषं साधयत्याशु तत्पयः।

स०-क्षीरं चोदकं च क्षीरोदकम्। तस्मिन् लशुनादष्टगुणे शुद्धशुष्कस्य लशुनस्य चतुष्पलं साधयेत्। ततः क्षीरशेषं विपाचयेत्। तच्च क्षीरशेषं वातगुल्मादीन्य(न)भिभवति।

तैलं प्रसन्ना गोमूत्रमारनालं यवाग्रजः॥४७॥
गुल्मं जठरमानाहं पीतमेकत्र साधयेत्।

स०-तैलादिकमेकत्र-मिलितं, पीतं गुल्मादीन् हन्ति।

चित्रकग्रन्थिकैरण्डशुण्ठीक्काथः परं हितः॥४८॥
शूलानाहविबन्धेशु सहिङ्गुबिडसैन्धवः।

स०-चित्रकादिक्काथो हिङ्गादियुतः परं शूलादिषु हितः।

पुष्करैरण्डयोर्मूलं यवधन्वयवासकम्॥४९॥
जलेन क्वथितं पीतं कोष्ठदाहरुजापहम्।

स०-पुष्करैरण्डमूलादिकं जलेन क्वथितं पीतं कोष्ठदाहादिजित्।

वाट्याह्वैरण्डदर्भाणां मूलं दारु महौषधम्॥५०॥
पीतं निःक्काथ्य तोयेन कोष्ठपृष्ठांसशूलजित्।

स०-वाट्याह्वादीनां मूलं देवदार्वादि च तोयक्वथितं पीतं कोष्ठादिशूलजित्।

शिलाजं पयसाऽनल्पपञ्चमूलश्रृतेन वा॥५१॥
वातगुल्मी पिबेत्

स०-शिलाजतु वा महत्पञ्चमूलक्वथितेन क्षीरेण सह वातगुल्मी पिबेत्।

वाट्यमुद्रावर्ते तु भोजयेत्।
स्निग्धं पैप्पलिकैर्यूषैर्मूलकानां रसेन वा॥५२॥

स०-उदावर्ते सति वाट्यं स्निग्धं-सस्नेहं, पिप्पलीसंस्कृतैर्यूषैः सह भोजयेत्। अथवा, मूलकरसेनाश्नीयात्।

बद्धविण्मारुतोऽश्नीयात्क्षीरेणोष्णेन यावकम्।
कुल्माषान् वा बहुस्नेहान् भक्षयेल्लवणोत्तरान्॥५३॥

स०-बद्धविण्मारुत उष्णेन क्षीरेण यावकमश्नीयात्। अथवा, कुल्माषान् बहुस्नेहान् लवणप्रधानान् भक्षयेत्।

नीलिनीत्रिवृतादन्तीपथ्याकम्पिल्लकैः सह।

समलाय घृतं देयं सबिडक्षारनागरम्॥५४॥

स०-नीलिन्यादिभिः सह सदोषाय नराय बिडादियुतं घृतं देयम्।

नीलिनीं त्रिफलां रास्नां बलां कटुकरोहिणीम्।

पचेद्विडङ्गं व्याघ्रीं च पालिकानि जलाढके॥५५॥

रसेऽष्टभागशेषे तु घृतप्रस्थं विपाचयेत्।

दध्नः प्रस्थेन संयोज्य सुधाक्षीरपलेन च॥५६॥

ततो घृतपलं दद्याद्यवागूमण्डमिश्रितम्।

जीर्णे सम्यग्विरिक्तं च भोजयेद्रसभोजनम्॥५७॥

गुल्मकुष्ठोदरव्यङ्गशोफपाण्ड्वामयज्वरान्।

श्वित्रं प्लीहानमुन्मादं हन्त्येतन्नीलिनीघृतम्॥५८॥

स०-नीलिन्यादीन् पलिकान् जलाढके पचेत्। अष्टभागशेषे च रसे दधिप्रस्थेन सुधाक्षीरपलेन च मिश्रयित्वा घृतप्रस्थं विपाचयेत्। ततो घृतपलं यवागूमण्डमिश्रितं दद्यात्। जीर्णे च घृते सम्यग्विरिक्तं नरं रसयुतं भोजनं भोजयेत्। एतच्च नीलिनीघृतं गुल्मादीन् हन्ति।

कुक्कुटाच्च मयूराश्च तित्तिरिक्रौञ्चवर्तकाः।

शालयो मदिरा सर्पिर्वातगुल्मचिकित्सितम्॥५९॥

स०-कुक्कुटादयो वातगुल्मे विकित्सितं-उपक्रमः।

मितमुष्णं द्रवं स्निग्धं भोजनं वातगुल्मिनाम्।

समण्डावारुणी पानं तप्तं वा धान्यकैर्जलम्॥६०॥

स०-वातगुल्मिनां च भोजनं मितमुष्णं द्रवं स्निग्धं च स्यात्। वारुणी समण्डा धान्यकैः श्रृतं जलं वा पानं स्यात्।

स्निग्धोष्णेनोदिते गुल्मे पैत्तिके स्रंसनं हितम्।

स०-पैत्तिके गुल्मे स्निग्धोष्णेनोत्थिते सति स्रंसनं हितम्।

तदेव विरेचनमाह-

द्राक्षाभयागुडरसं कम्पिल्लं वा मधुद्रुतम्॥६१॥

कल्पोत्कं रक्तपित्तोक्तं

स०-द्राक्षाभयागुडरसं स्रंसनं हितम्। अथवा, मधुद्रुतं कम्पिल्लं स्रंसनं हितम्। कल्पोक्तं विरेचनं-विरेचनकल्पविहितं, (हृ. क. अ. २), अक्तपित्तोक्तं-"त्रिवृता त्रिफला" (हृ. चि. अ. २।१०) इत्यादिकं, हितम्।

गुल्मे रूक्षोष्णजे पुनः।

परं संशमनं सर्पिस्तिक्तं वासाघृतं श्रृतम्॥६२॥

तृणाख्यपञ्चाक्काथे जीवनीयगणेन वा।

श्रृतं तेनैव वा क्षीरं न्यग्रोधादिगणेन वा॥६३॥

स०-रूक्षोष्णजे पैत्तिके गुल्मे सर्पिस्तिक्तं-कुष्ठचिकित्सितोक्तं (हृ. चि. अ. १९।२), तथा वासाघृतं (हृ. चि. अ. २।४२) संशमनं श्रेष्ठम्। तृणाख्यं पञ्चकं-"दर्भकासेक्षु" (हृ. सू. अ. ६। १७१) इत्यादि, तस्य क्काथे श्रृतं घृतं हितम्। अथवा, जीवनीयगणेन श्रृतं घृतं हितम्। तेनैव-जीवनीयगणेन, श्रृतं क्षीरं हितम्। न्यग्रोधादिगणेन वा श्रृतं क्षीरं हितम्।

तत्रापि स्रंसनं युञ्ज्याच्छीघ्रमात्ययिके भिषक्।

स०-तत्रापि-न केवलं स्निग्धोष्णजे रूक्षोष्णजेऽपि पैत्तिके सामान्यतो वा समुत्पन्ने गुल्मे, आत्ययिके शीघ्रं स्रंसनं युञ्ज्यात्।

केन ? इत्याह-

वैरेचनिकसिद्धेन सर्पिषा पयसाऽपि वा॥ ६४॥

स०-विरेचनविहितद्रव्यसिद्धेन सर्पिषा क्षीरेण वा।

रसेनामलकेक्षूणां घृतप्रस्थं विपाचयेत्।
पथ्यापादं पिबेत्सर्पिस्तत्सिद्धं पित्तगुल्मनुत्॥ ६५॥
पिबेद्वा तैल्वकं सर्पिर्यच्चोक्तं पित्तविद्रधौ।

स०-आमलकस्येक्षोश्च रसेन घृताच्चतुर्गुणितेनाढकमानेन पथ्यापादं घृतप्रस्थं विपाचयेत्। तच्च सिद्धं पित्तगुल्मं हन्ति। तैल्वकमथवा सर्पिः (हृ. चि. अ. २१।३२) पिबेत्। यच्च पित्तविद्रधावुक्तं घृतं (हृ. चि. अ. १३।४) तच्च पिबेत्।

द्राक्षां पयस्यां मधुकं चन्दनं पद्मकं मधु॥ ६६॥
पिबेत्तण्डुलतोयेन पित्तगुल्मोपशान्तये।

स०-द्राक्षादि तण्डुलजलेन सह पित्तगुल्मशान्तये पिबेत्।

द्विपलं त्रायमाणाया जलद्विप्रस्थसाधितम्॥ ६७॥

अष्टभागस्थितं पूतं कोष्णं क्षीरसमं पिबेत्।

पिबेदुपरि तस्योष्णं क्षीरमेव यथाबलम्॥६८॥

तेन निर्हृतदोषस्य गुल्मः शाम्यति पैत्तिकः।

स०-त्रायन्त्या द्विपलं जलद्विप्रस्थसाधितमष्टभागावशेषं पटेन पूतं क्षीरसमं पिबेत्। तस्योपरि कोष्णं क्षीरमेव यथाशक्ति पिबेत्-नान्यत्किञ्चित्। तेन-क्षीरेण, अपहृतदोषस्य गुल्मः पैत्तिकः शाम्यति।

दाहेऽभ्यङ्गो घृतैः शीतैः साज्यैर्लेपो हिमौषधैः॥६९॥

स्पर्शः सरोरुहां पत्रैः पात्रैश्च प्रचलज्जलैः।

स०-पैत्तिके गुल्मे दाहे सति घृतैः शीतैः-शीतवीर्यसाधितैः स्पर्शतश्च शीतैः, अभ्यङ्गस्तथा लेपः शीतवीर्यौषधैः सघृतैः स्यात्। पद्मपत्रैः पात्रैश्च प्रचलज्जलैः स्पर्शः।

विदाहपूर्वरूपेषु शूले वह्नेश्च मार्दवे॥७०॥

बहुशोऽपहरेद्रक्तं पित्तगुल्मे विशेषतः।

स०-विदाहपूर्वरूपेषु गुल्मेषु तथा शूले वह्निमान्द्ये च सति बहून् वारान् रक्तं हरेत्। पित्तगुल्मे विशेषेणास्रं हरेत्।

छिन्नमूला विदह्यन्ते न गुल्मा यान्ति च क्षयम्॥७१॥

रक्तं हि व्यम्लतां याति, तच्च नास्ति न चास्ति रुक्।

स०-छिन्नमूला गुल्मा न विदह्यन्ते-न पाकं यान्ति। च-पुनः, क्षयं यान्ति। हि-यस्मात्, रक्तमन्तःस्थितं व्यम्लीभावं याति। तच्च-रक्तं, नास्ति ततस्तदुत्था रुगपि नास्ति।

हृतदोषं परिम्लानं जाङ्गलैस्तर्पितं रसैः॥७२॥

समाश्वस्तं सशोषार्तिं सर्पिरभ्यासयेत्पुनः।

स०-हृतदोषं परिम्लानं नरं जाङ्गलमांसरसैस्तर्पितं समाश्वस्तं सन्तं सशेषार्तिं सर्पिरभ्यासयेत्।

रक्तपित्तातिवृद्धत्वात्क्रियामनुपलभ्य वा॥७३॥

गुल्मे पाकोन्मुखे सर्वा पित्तविद्रधिवत्क्रिया।

स०-रक्तपित्तातिवृद्धत्वाद्धेतोः क्रियां वाऽनुपलभ्य-अनासाद्य, गुल्मे पाकोन्मुखे सति सर्वा पित्तविद्रधितुल्या क्रिया स्यात्।

शालिर्गव्याजपयसी पटोली जाङ्गलं घृतम्॥७४॥

धात्री परूषकं द्राक्षा खर्जूरं दाडिमं सिता।

भोज्यं, पानेऽम्बु बलया हृहत्यद्यैश्च साधितम्॥७५॥

स०-शाल्यागि भोज्यम्। पाने बलया साधितं जलं बृहत्यादिना वा।

श्लेष्मजे वामयेत्पूर्वमवम्यमुपवासयेत्।

तिक्तोष्णकटुसंसर्ग्या वह्निं सन्धुक्षयेत्ततः॥७६॥

हिङ्ग्वादिभिश्च द्विगुणक्षारहिङ्गुल्लवेतसैः।

स०-श्लेष्मजे गुल्मे पूर्वं वामयेत्। अवमनाह तु लङ्घयेत्। कृतीपवासस्य तिक्तोष्णकटुद्रव्ययुतया संसर्ग्या वह्निं दीपयेत्। तथा हिङ्ग्वादिभिरग्निं सन्धुक्षयेत्। किम्भूतैः? द्विगुणानि क्षारहिङ्गुल्लवेतसानि येषु तैः।

निगूढं यदि वोन्नद्धं स्तिमितं कठिनं स्थिरम्॥७७॥

आनाहादियुतं गुल्मं संस्वेद्य विनयेदनु।

घृतं सक्षारकटुकं पातव्यं कफगुल्मिनाम्॥७८॥

स०-निगूढादिधर्मयुक्तं गुल्मं संशोध्य(संस्वेद्य) विनयेत्-उपशमयेत्। पश्चात् कफगुल्मिनां घृतं क्षारकटुकयुतं पातव्यम्।

सव्योषक्षारलवणं सहिङ्गुबिडदाडिमम्।

कफगुल्मं जयत्याशु दशमूलश्रृतं घृतम्॥७९॥

स०-व्योषादियुतं दशमूलपक्वं सर्पिः कफगुल्मं शीघ्रमेव हन्ति।

भल्लातकानां द्विपलं पञ्चमूलं पलोन्मितम्।

अल्पं तोयाढके साध्यं पादशेषेण तेन च॥८०॥

तुल्यं घृतं तुल्यपयो विपचेदक्षसम्मितैः।

विडङ्गहिङ्गुसिन्धूत्थयावशूकशठीबिडैः॥८१॥

सद्वीपिरास्नायष्ट्याह्वषड्ग्रन्थाकणनागरैः।

एतद्भल्लातकघृतं कफगुल्महरं परम्॥८२॥

प्लीहपाण्ड्वामयश्वासग्रहणीरोगकासजित्।

स०-भल्लातकानां द्विपलं अल्पं-ह्रस्वं, पञ्चमूलं पृथक् पलप्रमाणं तोयाढके साधनीयम्। पादशेषेण च तेन क्वाथेन समं सर्पिस्तुल्यक्षीरं विडङ्गादिभिः कल्कीभूतैः कार्षिकैर्विपाचयेत्। एतच्च भल्लातकघृतं परं-सुष्ठु, कफगुल्महरं प्लीहादिजिच्च।

ततोऽस्य गुल्मे देहे च समस्ते स्वेदमाचरेत्॥८३॥

स०-ततो-घृतपानादनन्तरं, गुल्मे देहे चास्य समस्ते स्वेदमाचरेत्।

सर्वत्र गुल्मे प्रथमं स्नेहस्वेदोपपादिते।

या क्रिया क्रियते याति सा सिद्धिं न विरूक्षिते॥८४॥

स०-[सर्वत्र-] सर्वस्मिन्नष्टविधे च, गुल्मे प्रथमं-आदौ, स्नेहस्वेदाभ्यामुपपादिते सति या क्रिया क्रियते सा सिद्धिं याति। या तु विरूक्षिते सति क्रिया सा सिद्धिं न याति।

स्निग्धस्विन्नशरीरस्य गुल्मे शैथिल्यमागते।

यथोक्तां घटिकां न्यस्येद्गृहीतेऽपनयेच्च ताम्॥८५॥

वस्त्रान्तरं ततः कृत्वा छिन्द्याद्गुल्मं प्रमाणवित्।

विमार्गाजपदादर्शैर्यथालाभं प्रपीडयेत्॥८६॥

प्रमृज्याद्गुल्ममेवैकं न त्वन्त्रहृदयं स्पृशेत्।

स०-स्निग्धस्विन्नशरीरस्य गुल्मे शैथिल्यं याते सति यन्त्रविध्युदितां घटिकां योजयेत्। गृहीते च गुल्मे तामपसारयेत्। अनन्तरं वस्त्रव्यवहितं गुल्मं कृत्वा प्रमाणवित् विमार्गादिभिर्यथालाभं भिन्द्यात्-विदारयेत् सूचिकादिना। विमार्गो-दारुमयः शस्त्रकृतिर्वस्तुविशेषश्चर्मकारसम्बन्धी। तथा, गुल्ममेव केवलं प्रपीडयेत् प्रमृज्याच्च। न पुनरन्त्रं हृदयं [च] स्पृशेत्।

तिलैरण्डातसीबीजसर्षपैः परिलिप्य च॥८७॥

श्लेष्मगुल्ममयस्पात्रैः सुखोष्णैः स्वेदयेत्ततः।

स०-अथवा कफगुल्मं तिलादिभिः परिलिप्यानन्तरं लोहभाजनैः सुखोष्णैः स्वेदयेत्। अयस्पात्रैरिति "अतःकृकमि" इत्यादिना सादेशः।

एवं च विसृतं स्थानात् कफगुल्मं विरेचनैः॥८८॥

सस्नेहैर्बस्तिभिश्चैनं शोधयेद्दाशमूलिकैः।

स०-एवं-अस्मिन् प्रकारे कृते सति, स्थानाच्चलितं कफगुल्मं स्नेहयुक्तैर्विरेचनैर्बस्तिभिश्च दाशमूलिकैः (हृ. क. अ. ४।४) शोधयेत्।

पिप्पल्यामलकद्राक्षाश्यामाद्यैः पालिकैः पचेत्॥८९॥

एरण्डतैलहविषोः प्रस्थौ पयसि षड्गुणे।

सिद्धोऽयं मिश्रकः स्नेहो गुल्मिनां स्रंसनं हितम्॥९०॥

वृद्धिविद्रधिशूलेषु वातव्याधिषु चामृतम्।

स०-पिप्पल्यादिभिः पलोन्मितैरण्डतैलसर्पिषोः प्रस्थौ द्वौ षड्गुणे क्षीरे पचेत्। अयं मिश्रकाख्यः स्नेहो गुल्मिनां परं स्रंसनं वृद्ध्यादिषु चामृततुल्यम्।

पिबेद्वा नीलिनीसर्पिर्मात्रया द्विपलीनया॥९१॥

तथैव सुकुमाराख्यं घृतान्यौदरिकाणि वा।

स०-अथवा नीलिनीघृतं-प्रागुक्तं (श्लो. ५५), स्रंसनं द्विपलमात्रया पिबेत्। तथैव द्विपलमात्रया सुकुमाराख्यं घृतं-विद्रध्युक्तं (हृ. चि. १३।४१), स्रंसनार्थं पिबेत्। उदरचिकित्सितोक्तानि वा घृतानि पिबेत्।

द्रोणेऽम्भसः पचेद्दन्त्याः पलानां पञ्चविंशतिम्॥९२॥

चित्रकस्य तथा पथ्यास्तावतीस्तद्रसे स्रुते।

द्विप्रस्थे साधयेत्पूते क्षिपेद्दन्तीसमं गुडम्॥९३॥

तैलात्पलानि चत्वारि त्रिवृतायाश्च चूर्णतः।

कणाकर्षौ तथा शुण्ठ्याः सिद्धे लेहे तु शीतले॥९४॥

मधु तैलसमं दद्याच्चतुर्जाताच्चतुर्थिकाम्।

अतो हरीतकीमेकां सावलेहपलामदन्॥९५॥

सुखं विरीच्यते स्निग्धो दोषप्रस्थमनामयः।

गुल्महृद्रोगदुर्नामशोफानाहगरोदरान्॥९६॥

कुष्ठोत्क्लेशारुचिप्लीहग्रहणीविषमज्वरान्।

घ्नन्ति दन्तीहरीतक्यः पाण्डुतां च सकामलाम्॥९७॥

स०-जलद्रोणे दन्तीपलानां पञ्चविंशतिं, [तथा] चित्रकस्य पलानां पञ्चविंशतिं, [तथा] हरितकीस्तावतीः-पञ्चविंशतिं, पचेत्। तद्रसे स्रुतेद्विप्रस्थदघ्ने पूते पथ्यासहिते दन्तीतुल्यं गुडं क्षिपेत्। तैलपलानि चत्वारि, त्रिवृत्पलानि च चत्वारि। कणायाः कर्षौ द्वौ शुण्ठ्याश्च। सिद्धे चास्मिन् लेहे तु सुशीते तैलतुल्यं माक्षिकं दद्यात्। चतुर्जातात् समुदिताच्चतुर्थिकां-पलापरसंज्ञां, दद्यात्। अतो-लेहात्, पथ्यामेकां सावलेहपलयुतां भक्षयेत्। स्निग्धो नरः सुखं दोषप्रस्थं विरिच्यते निरामयः। एता दन्तीहरीतक्यः प्लीहा(गुल्मा)दीन् घ्नन्ति।

सुधाक्षीरद्रवं चूर्णं त्रिवृतायाः सुभावितम्।

कार्षिकं मधुसर्पिर्भ्यां लीढ्वा साधु विरिच्यते॥९८॥

स०-सुधाक्षीरेण द्रवं त्रिवृतायाश्चूर्णं प्रकृतत्वात्सुधाक्षीरेणैव सुभावितं कर्षप्रमाणं मधुसर्पिर्भ्यां लीढ्वा सम्यग्विरिच्यते।

कुष्ठश्यामात्रिवृद्दन्तीविजयाक्षारगुग्गुलून्।

गोमूत्रेण पिबेदकं तेन गुग्गुलुमेव वा॥९९॥

स०-कुष्ठादीन् गोमूत्रेण पिबेत्। अथवा, तेन-गोमूत्रेण, गुग्गुलुमेकमेव पिबेत्।

निरूहान् कल्पसिध्युक्तान् योजयेद्गुल्मनाशनान्।

स०-कल्पसिध्युक्तान्निरूहान् गुल्मनाशनान् योजयेत्।

कृतमूलं महावास्तुं कठिनं स्तिमितं गुरुम्॥ १००॥

गूढमांसं जयेद्गुल्मं क्षारारिष्टाग्निकर्मभिः।

एकान्तरं द्व्यन्तरं वा विश्रमय्याथ वा त्र्यहम्॥ १०१॥

शरीरदोषबलयोर्वर्धनक्षपणोद्यतः।

स०-कृतमूलादिधर्मयुक्तं गुल्मं क्षारादिभिर्जयेत्। एकान्तरं द्व्यन्तरं वा त्र्यहं वा विश्रमय्य शरीरदोषबलयोर्यथाक्रमं वर्धनक्षपणयोरुद्यतः सन्।

अर्शोऽश्मरीग्रहण्युक्ताः क्षारा योज्याः कफोल्बणे॥ १०२॥

स०-कफाधिके गुल्मेऽर्शोऽश्मरीग्रहणीषूक्ता ये क्षारास्ते योज्याः।

देवदारुत्रिवृद्दन्तीकटुकापञ्चकोलकम्।

स्वर्जिकायावशूकाख्यौ श्रेष्ठापाठोपकुञ्चकम्॥ १०३॥

कुष्ठं सर्पसुगन्धां च द्व्यक्षांशं पटुपञ्चकम्।

पालिकं चूर्णितं तैलवसादधिघृताप्लुतम्॥ १०४॥

घतस्यान्तः पचेत्पक्कमग्निवर्णे घटे च तम्।

क्षारं गृहीत्वा क्षीराज्यतक्रमद्यादिभिः पिबेत्॥ १०५॥

गुल्मोदावर्तवर्ध्मार्शोजठरग्रहणीकृमीन्।

अपस्मारगरोन्मादयोनिशुक्रामयाश्मरीः॥ १०६॥

क्षारागदोऽयं शमयेद्विषं चाखुभुजङ्गजम्।

स०-देवदार्वादिसर्पसुगन्धापर्यन्तं द्विकार्षिकं लवणपञ्चकं पालिकमेतत्समस्तं चूर्णीकृतं तैलवसादधिघृतैराप्लुतं-आलोडितं, घटस्य मध्येऽन्तर्धूमं पचेत्। सर्पसुगन्धा-नाकुली। अग्निवर्णे

च घटे सति पक्वं तं क्षारं गृहीत्वा यथादोषं क्षीरादिभिः पिबेत्। गुल्मादीन् जयेत् अयं क्षारागद आखुजं भुजङ्गजं च विषं द्राक् शमयेत्।

श्लेष्माणं मधुरं स्निग्धं रसक्षीरघृताशिनः॥ १०७॥

छित्त्वा भित्त्वाऽऽशयात् क्षारः क्षरत्वात्क्षारयत्यधः।

स०-श्लेष्माणं मधुरं स्निग्धं मांसरसाद्याशिनः क्षारः क्षा(क्ष)रत्वादाशयं(यात्) छित्त्वा भित्त्वाऽधस्तात् पातयति।

मन्देऽन्नावरुचौ सात्म्यैर्मद्यैः सस्नेहमश्नताम्॥ १०८॥

योजयेदासवारिष्टान्निगदान् मार्गशुद्धये।

मन्देऽन्नावरुचौ च सत्यां मद्यैः सात्म्यैः सहस्नेहमाहारमश्नतामासवादीन् मार्गशुद्धये योजयेत्।

अधुनाऽन्नपानमाह-

शालयः षष्टिका जीर्णाः कुलत्था जाङ्गलं फलम्॥ १०९॥

चिरिबिल्वाग्नितर्कारीयवानीवरुणाङ्कुराः।

शिग्रुस्तरुणबिल्वानि बालं शुष्कं च मूलकम्॥ ११०॥

बीजपूरकहिङ्गुम्लवेतसक्षारदाडिमम्।

व्योषं तक्रं घृतं तैलं भक्तं, पानं तु वारुणी॥ १११॥

धान्याम्लं मस्तु तक्रं च यवानीबिडचूर्णितम्।

पञ्चमूलश्रृतं वारि जीर्णं मार्द्वीकमेव वा॥ ११२॥

स०-शालय इत्यादि भक्तान्तं भक्तम्। पानं तु वारुण्यादि मार्द्वीकान्तम्।

पिप्पलीपिप्पलीमूलचित्रकाजाजिसैन्धवैः।

सुरा गुल्मं जयत्याशु जगलश्च विमिश्रितः॥११३॥

स०-पिप्यल्यादिभिः सह सुरा शीघ्रमेव गुल्मं जयति। जगलश्च पिप्पल्यादिभिर्विमिश्रितो गुल्मं जयति।

वमनैर्लङ्घनैः स्वेदैः सार्पिःपानैर्विरेचनैः।

बस्तिक्षारासवारिष्टगुलिकापथ्यभोजनैः॥११४॥

श्लैष्मिको बद्धमूलत्वाद्यदि गुल्मो न शाम्यति।

तस्य दाहं हृते रक्ते कुर्यादन्ते शरादिभिः॥११५॥

स०-वमनादिभिः प्रयुक्तैः श्लैष्मिको गुल्मो बद्धमूलत्वाद्यदि न शाम्यति, तस्य-गुल्मस्य, हृते रक्तेऽन्ते दाहं शरादिभिः कुर्यात्।

अथ दाहविधानं प्रस्तूयते-

अथ गुल्मं सपर्यन्तं वाससाऽन्तरितं भिषक्।

नाभिबस्त्यन्त्रहृदयं रोमराजीं च वर्जयन्॥११६॥

नातिगाढं परिमृशेच्छरेण ज्वलताऽथवा।

लोहेनारणिकोत्थेन दारुणा तैन्दुकेन वा॥११७॥

ततोऽग्निवेगे शमिते शीतैर्व्रण इव क्रिया।

स०-गुल्मं पर्यन्तैः सह वस्त्रेणान्तरितं-आच्छादितं, नाभ्यादि वर्जयन्नातिशयेन परामृशेद्वैद्यः। शरेण लोहेन वा ज्वलता। किम्भूतेन? आरणिकोत्थेन। अथवा, तैन्दुकेन काष्ठेन। अनन्तरमग्निवेगे शमिते सति शीतैः प्रदेहादिभिर्व्रण इव क्रिया स्यात्।

आमान्वये तु पेयाद्यैः सन्धुष्याग्निं विलङ्घिते॥११८॥

स्वं स्वं कुर्यात्क्रमं मिश्रं मिश्रदोषे च कालवित्।

आमान्वये च सति वह्निं पेयाद्यैः सन्धुक्ष्य विलङ्घिते सति स्वं स्वं क्रमं-यथादोषं, कुर्यात्। मिश्रदोषे मिश्रं क्रमं कुर्यात्। कालवित्-वैद्यः।

गतप्रसवकालायै नार्यै गुल्मेऽस्रसम्भवे॥११९॥

स्निग्धस्विन्नशरीरायै दद्यात्स्नेहविरेचनम्।

स०-नार्यै अस्रसम्भवे गुल्मे सति स्नेहविरेचनं दद्यात्। किम्भूतायै? गतः प्रसवकालो यस्यास्तस्यै इति। एवं हि पुराणत्वे सुखसाध्यता रक्तगुल्मस्य स्यात् सुनिश्चितत्वं च। तथा स्निग्धं स्विन्नं शरीरं यस्यास्तस्यै।

तिलक्काथो घृतगुडव्योषभार्गीरजोन्वितः॥१२०॥

पानं रक्तभवे गुल्मे नष्टे पुष्पे च योषितः।

स०-रक्तोत्थे गुल्मे तिलक्काथो घृतादियुक्तः पानं योषितः। पुष्पे च नष्टे पानं भवेत्।

भार्गीकृष्णाकरञ्जत्वग्ग्रन्थिकामरदारुजम्॥१२१॥

चूर्णं तिलानां क्काथेन पीतं गुल्मरुजापहम्।

स०-भार्ग्यादिजं चूर्णं तिलक्काथेन पीतं गुल्मरुजाहृत्।

पलाशक्षारपात्रे द्वे द्वे पात्रे तैलसर्पिषोः॥१२२॥

गुल्मशैथिल्यजननीं पक्त्वा मात्रां प्रयोजयेत्।

स०-पलाशक्षारपात्रे द्वे तैलसर्पिषोर्द्वे पात्रे पक्त्वा गुल्मशैथिल्यजननीं मात्रां प्रयोजयेत्। स्नेहाच्चतुर्गुणं तोयमत्र क्षेप्तव्यम्।

न प्रभिद्येत यद्येवं दद्याद्योनिविरेचनम्॥ १२३॥

स०-एवं कृते सति यदि न प्रभिद्येत रक्तगुल्मस्तदा योनिविरेचनं दद्यात्।

तदाह-

क्षारेण युक्तं पललं सुधाक्षीरेण वा ततः।
ताभ्यां वा भावितान्दद्याद्योनौ कटुकमत्स्यकान्॥ १२४॥
वराहमत्स्यपित्ताभ्यां नक्तकान् वा सुभावितान्।
किण्वं वा सगुडक्षारं दद्याद्योनौ विशुद्धये॥ १२५॥
रक्तपित्तहरं क्षारं लेहयेन्मधुसर्पिषा।
लशुनं मदिरां तीक्ष्णां मत्स्यांश्चास्यै प्रयोजयेत्॥ १२६॥
बस्तिं सक्षीरगोमूत्रं सक्षारं दाशमूलिकम्।

स०-क्षारयुक्तं भृष्टतिलचूर्णं ततस्तस्या योनौ दद्यात्। सुधाक्षीरेण वाऽन्वितं पललं दद्यात्। ताभ्यां-क्षारसुधाक्षीराभ्यां, भावितान् कटुकमत्स्यकान् योनौ दद्यात्। वराहमत्स्ययोः पित्ताभ्यां कटुकमत्स्यकान् सुभावितान् नक्तकान् वा सुभावितान् योनौ दद्यात्। अथवा, किण्वं गुडक्षारान्वितं योनिविशुध्यर्थं योनौ दद्यात्। रक्तपित्तहरं क्षारं मधुसर्पिषा लेहयेत्। लशुनं मदिरां तीक्ष्णां मत्स्यांश्चास्यै प्रयोजयेत्। दाशमूलिकं बस्तिं-कल्पोक्तं (हृ. क. अ. ४।४), क्षीरगोमूत्रसहितं क्षारान्वितमस्यै दद्यात्।

अवर्तमाने रुधिरे हितं गुल्मप्रभेदनम्॥ १२७॥

स०-रक्तेऽप्रवर्तमाने सति गुल्मप्रभेदनं हितम्।

यमकाभ्यक्तदेहायाः प्रवृत्ते समुपेक्षणम्।
रसौदनस्तथाऽऽहारः पानं च तरुणी सुरा॥ १२८॥

स०-प्रवृत्ते रक्ते सति यमकाभ्यक्तगात्रायाः समुपेक्षणं-सम्यगुपेक्षणं हितम्। तथा, आहारो रसौदनो हितः। तरुणी सुरा च पानम्।

रुधिरेऽतिप्रवृत्ते तु रक्तपित्तहराः क्रियाः।
कार्या वातरुगार्तायाः सर्वा वातहराः पुनः॥ १२९॥
आनाहादावुदावर्तबलासन्घ्यो यथायथम्॥ १२९ १/२॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां चतुर्थे चिकित्सितस्थाने गुल्मचिकित्सितं नाम चतुर्दशोऽध्यायः॥ १४॥

****

स०-रुधिरेऽतिप्रवृत्ते पुना रक्तपित्तहराः क्रियाः कार्याः। वातरुगार्तायाः पुनः सर्वा वातहराः क्रियाः कार्याः। आनाहादौ सत्युदावर्तबलासजितः क्रियाः कार्या इति।

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टाङ्गहृदयटीकायां सर्वाङ्गसुन्दराख्यायां चतुर्थे चिकित्सितस्थाने गुल्मचिकित्सितं नाम चतुर्दशोऽध्यायः समाप्तः॥ १४॥

****

पञ्चदशोऽध्यायः।

अस्मादनन्तरमुदरचिकित्सितं प्रक्रम्यते। सम्बन्धश्चास्य गुल्मोत्पत्तौ किल यथा वायुः प्रधानं कारणं प्रायः, तथा स एवोदराणामपि, इत्याह-

अथात उदरचिकित्सितं व्याख्यास्यामः।
इति ह स्माहुरात्रेयादयो महर्षयः। (गद्यसूत्रे॥२॥)

दोषातिमात्रोपचयात्स्रोतोमार्गनिरोधनात्।
सम्भवत्युदरं तस्मान्नित्यमेनं विरेचयेत्॥१॥

स०-दोषाणामतिमात्रमुपचयो-वृद्धिः, तस्मात् स्रोतसां मार्गाः-मुखरूपाणि छिद्राणि, तेषां निरोधाच्च भवत्युदरं यतः, तस्मादेनं-उदरिणं, अभीक्ष्णं विरेचयेत्।

प्रायेण वातप्रधानत्वादस्य व्याधेः स्निग्धं विरेचनमाह-

पाययेत्तैलमैरण्डं समूत्रं सपयोऽपि वा।
मांसं द्वौ वाऽथवा गव्यं मूत्रं माहिषमेव वा॥२॥
पिबेद्गोक्षीरभुक् स्याद्वा करभीक्षीरवर्तनः।
दाहानाहातितृण्मूर्च्छापरीतस्तु विशेषतः॥३॥

स०-तैलमैरण्डं गोमूत्रान्वितं क्षीरयुतं वा मासमेकमथवा द्वौ मासौ पाययेत्। दोषादिवशाद् गव्यं मूत्रं माहिषं वा मूत्रं पिबेत्। अथवा गोक्षीरभुग्भवेत्। करभीक्षीरवर्तनो वा स्यात्। दाहादियुतस्तु विशेषेणैवंवृत्तिः स्यात्।

रूक्षाणां बहुवातानां दोषसंशुद्धिकाङ्क्षिणाम्।

स्नेहनीयानि सर्पींषि जठरघ्नानि योजयेत्॥४॥

स०-रूक्षादीनां स्नेहनीयानि सर्पींष्युदरहन्तृणि योजयेत्।

षट्पलं दशमूलाम्बुमस्तुह्याढकसाधितम्।

स०-"पञ्चकोलयवक्षार" (ह्. चि. अ. ५।२२) इति षट्पलं दशमूलाम्बुना मस्तुनो ह्याढकेन च संधितं घृतप्रस्थं षट्पलोपलक्षणलक्षितं योजयेत्।

नागरत्रिपलं प्रस्थं घृततैलात्तथाऽऽढकम्॥५॥

मस्तुनः साधयित्वैतत्पिबेत्सर्वोदरापहम्।

कफमारुतसम्भूते गुल्मे च परमं हितम्॥६॥

स०-शुण्ठ्याः पलत्रयं, प्रस्थं घृततैलात्, मस्तुन आढकमेतत्साधयित्वा सर्वोदरापहं पिबेत्। कफमारुतोत्थे च गुल्मे सुष्ठु हितमेतत्।

चतुर्गुणे जले मूत्रे द्विगुणे चित्रकात्पले।

कल्के सिद्धं घृतप्रस्थं सक्षारं जठरी पिबेत्॥७॥

स०-सर्पिषः प्रस्थं तदपेक्षया चतुर्गुणे जले गोमूत्रे द्विगुणे चित्रकपले कल्के सिद्धं सयवक्षारमुदरी पिबेत्।

यवकोलकुलत्थानां पञ्चमूलस्य चाम्भसा।

सुरासौवीरकाभ्यां च सिद्धं वा पाययेद्घृतम्॥८॥

स०-यवादिक्काथेन सुराकाञ्जिकाभ्यां सिद्धं वा घृतं पाययेत्।

एभिः स्निग्धाय सञ्जाते बले शान्ते च मारुते।
स्रस्ते दोषाशये दद्यात्कल्पदृष्टं विरेचनम्॥९॥

स०-एभिः स्नेहैः स्निग्धाय नराय बले च सञ्जाते सति पवने च शान्ते स्रस्ते दोषाशये सति कल्पोक्तं विरेचनं दद्यात्।

पटोलमूलं त्रिफलां निशां वेल्लं च कार्षिकम्।
कम्पिल्लनीलिनीकुम्भभागान् द्वित्रिचतुर्गुणान्॥१०॥
पिबेत्सञ्चूर्ण्य मूत्रेण पेयापूर्वं ततो रसैः।
विरिक्तो जाङ्गलैरद्यात्ततः षड्विवसं पयः॥११॥
श्रृतं पिबेद्योषयुतं पीतमेवं पुनःपुनः।
हन्ति सर्वोदराण्येतच्चूर्णं जातोदकान्यपि॥१२॥

स०-पटोलमूलादि कार्षिकं कम्पिल्लादीनां भागान् क्रमेण द्वित्रिचतुर्गुणान् सञ्चूर्ण्य गोमूत्रेण पिबेत्। अनन्तरं विरिक्तः सन् पेयां भुक्त्वा जाङ्गलमांसरसैः शाल्यादिकमद्यात्। ततः-अनन्तरं, षड्विवसानि क्वथितं क्षीरं त्रिकटुयुतं पिबेत्। एवं पुनःपुनरेतत्पीतं सर्वोदराणि जातसलिलान्यपि हन्ति।

गवाक्षीं शङ्खिनीं दन्तीं तिल्वकस्य त्वचं वचाम्।
पिबेत्कर्कन्धुमृद्वीकाकोलाम्भोमूत्रसीधुभिः॥१३॥

स०-गवाक्ष्यादिकं चूर्णं कर्कन्ध्वादिजलमूत्रस्त्रीध्वन्यतमेन पिबेत्।

यवानि हपुषा धान्यं शतपुष्पोपकुञ्चिका।

कारवी पिप्पलीमूलमजगन्धा शठी वचा॥ १४॥

चित्रकोऽजाजिकं व्योषं स्वर्णक्षीरी फलत्रयम्।

द्वौ क्षारौ पौष्करं मूलं कुष्ठं लवणपञ्चकम्॥ १५॥

विडङ्गं च समांशानि दन्त्या भागत्रयं तथा।

त्रिवृद्विशाले द्विगुणे सातला च चतुर्गुणा॥ १६॥

एष नारायणो नाम चूर्णो रोगगणापहः।

नैनं प्राप्याभिवर्धन्ते रोगा विष्णुमिवासुराः॥ १७॥

तक्रेणोदरिभिः पेयो गुल्मिभिर्बदराम्बुना।

आनाहवाते सुरया वातरोगे प्रसन्नया॥ १८॥

दधिमण्डेन विड्भङ्गे दाडिमाम्भोभिरर्शसैः।

परिकर्ते सवृक्षाम्लैरुष्णाम्बुभिरजीर्णके॥ १९॥

भगन्दरे पाण्डुरोगे कासे श्वासे गलग्रहे।

हृद्रोगे ग्रहणीदोषे कुष्ठे मन्देऽनले ज्वरे॥ २०॥

दंष्ट्राविषे मूलविषे सगरे कृत्रिमे विषे।

यथार्हं स्निग्धकोष्ठेन पेयमेतद्विरेचनम्॥ २१॥

स०-यवान्यादीनि विडङ्गपर्यन्तानि समांशानि। दन्त्या भागास्त्रयः। त्रिवृद्विशालयोर्द्वौ द्वौ भागौ। सातलायाश्च चत्वारः। एष चूर्णो नारायणो नाम रोगगणापहः। एनं चूर्णं प्राप्य रोगा नाभिवर्धन्ते। कं क[इव] ? यथा विष्णुमिवासुराः। उदरिभिरेष तक्रेण पेयः। गुल्म्यादिभिर्बदराम्ब्वादिभिः पेयः। भगन्दरादिष्वेतद्यथार्हं स्नेहपीतेन विरेचनं पेयम्।

हपुषां काञ्चनक्षीरीं त्रिफलां नीलिनीफलम्।

त्रायन्तीं रोहिणीं तिक्तां सातलां त्रिवृतां वचाम्॥ २२॥

सैन्धवं काललवणं पिप्पलीं चेति चूर्णयेत्।

दाडिमत्रिफलामांसरसमूत्रसुखोदकैः॥२३॥

पेयोऽयं सर्वगुल्मेषु प्लीह्नि सर्वोदरेषु च।

श्वित्रे कुष्ठेष्वजरके सदने विषमेऽनले॥२४॥

शोफार्शःपाण्डुरोगेषु कामलायां हलीमके।

वातपित्तकफांश्चाशु विरेकेण प्रसाधयेत्॥२५॥

स०-हपुषादिकमेतचूर्णं दाडिमादिरसैः पेयम्। गुल्मादिषु विरेकेण चैतदाशु वातपित्तकफान् सम्प्रसाधयेत्। काललवणं-कृष्णलवणम्।

नीलिनीं निचुलं व्योषं क्षारौ लवणपञ्चकम्।

चित्रकं च पिबेच्चूर्णं सर्पिषोदरगुल्मनुत्॥२६॥

स०-नीलिन्यादिकं चूर्णं सर्षिषा पिबेत्। उदरगुल्मघ्नम्।

पूर्ववच्च पिबेद्दुग्धं क्षामः शुद्धोऽन्तराऽन्तरा।

कारभं गव्यमाजं वा

स०-पूर्ववच्च-यथा पटोलमूलादिके चूर्णे (श्लो. १०) कथितं, तथैव शुद्धः क्षामः सन् जाङ्गलरसादनन्तरमन्तराऽन्तरा-मध्ये मध्ये, दुग्धं पिबेत्। कारभं गव्यं छागं वा क्षीरम्।

दद्यादात्ययिके गदे॥२७॥

स्नेहानेव विरेकार्थं दुर्बलेभ्यो विशेषतः।

स०-आत्ययिके रोगे विरेकार्थं स्नेहानेव दद्यात्। दुर्बलेभ्यो वा विशेषेण।

हरीतकीसूक्ष्मरजःप्रस्थयुक्तं घृताढकम्॥ २८॥

अग्नौ विलाप्य मथितं खजेन यवपल्लके।

निधापयेत्ततो मासादुद्धृतं गालितं पचेत्॥ २९॥

हरीतकीनां क्काथेन दध्ना चाम्लेन संयुतम्।

उदरं गरमष्ठीलामानाहं गुल्मविद्रधी॥ ३०॥

हन्त्येतत्कुष्ठमुन्मादमपस्मारं च पानतः।

स०-हरीतकीसूक्ष्मचूर्णप्रस्थयुक्तं घृतस्याढकमग्नौ विलाप्य खजेनालोडितं यवपल्लके-यवराशिमध्ये, निधापयेत्। ततो मासादनन्तरमुद्धृतं गालितं हरीतकीनां क्काथेन-सामान्यपरिभाषोक्तप्रमाणेन, अम्लेन दध्ना संयुतं च पचेत्। एतच्च पानेनोदरादीन् हन्ति।

स्नुकॅऽक्षीरयुक्ताद्गोक्षीराच्छृतशीतात् खजेनाहतात्॥ ३१॥

यज्जातमाज्यं स्नुकॅऽक्षीरसिद्धं तच्च तथागुणम्।

स०-स्नुक्षीरमिश्रिताद्गोक्षीराच्छृतशीतात् खजेनाहतात् यज्जातं सर्पिस्तत्स्नुक्क्षीरपक्वं पूर्वगुणम्।

क्षीरद्रोणं सुधाक्षीरप्रस्थार्धसहितं दधि॥ ३२॥

जातं मथित्वा तत्सर्पिस्त्रिवृत्सिद्धं च तद्गुणम्।

स०-क्षीरद्रोणं स्नुक्क्षीरप्रस्थार्धेन युतं दधि जातं मथित्वा तत्सर्पिस्त्रिवृतापक्वं पूर्वगुणम्।

तथा सिद्धं घृतप्रस्थं पयस्यष्टगुणे पिबेत्॥ ३३॥

स्नुक्क्षीरपलकल्केन त्रिवृताषट्पलेन च।

स०-तथा सिद्धं-पूर्ववत्पक्वं, घृतप्रस्थं क्षीरेऽष्टगुणे स्नुक्षीरपलकल्केन त्रिवृताषट्पलेन च सिद्धं पिबेत्।

एषां चानु पिबेत्पेयां रसं स्वादु पयोऽथवा॥ ३४॥

स०-एषां च घृतादीनां पश्चात् पेयादीन् पिबेत्।

घृते जीर्णे विरिक्तश्च कोष्णं नागरसाधितम्।
पिबेदम्बु ततः पेयां ततो यूषं कुलत्थजम्॥ ३५॥

स०-घृते जीर्णे विरिक्तश्च सन् कोष्णं शूण्ठीसाधितं जलं पिबेत्। अनन्तरं पेयां पिबेत्। कुलत्थयूषं च पिबेत्।

पिबेद्रूक्षस्त्र्यहं त्वेवं भूयो वा प्रतिभोजितः।
पुनःपुनः पिबेत्सर्पिरानुपूर्व्याऽनयैव च॥ ३६॥

स०-एवं त्र्यहं रूक्षः सन् पुनरपि प्रतिभोजितः पुनःपुनरनेनैव क्रमेण सर्पिः पिबेत्।

घृतान्येतानि सिद्धानि विदध्यात्कुशलो भिषक्।
गुल्मानां गरदोषाणामुदराणां च शान्तये॥ ३७॥

स०-एतानि-प्रागुक्तानि, सिद्धानि घृतानि कुशलो वैद्यः कुर्वीत गुल्मादीनां शान्तये।

पीलुकल्कोपसिद्धं वा घृतमानाहमेदनम्।
तैल्वकं नीलिनीसर्पिः स्नेहं वा मिश्रकं पिबेत्॥ ३८॥

स०-पीलुकल्कपक्वं घृतमानाहभेदनं पिबेत्। तैल्वकं (हृ. चि. अ. २१।३२) वा नीलिनीघृतं (हृ. चि. अ. १४।५५) मिश्रकं (हृ. चि. अ. १४।८९) वा स्नेहं पिबेत्।

हृतदोषः क्रमादश्नन् लघुशाल्योदनप्रति।

स०-हृतदोषः क्रमेण शाल्योदनमतिलघुगुणयुक्तमल्पं स्वादेत्। एवं संसर्जनक्रम आदरितव्यः।

उपयुञ्जीत जठरी दोषशेषनिवृत्तये॥ ३९॥

हरीतकीसहस्रं वा गोमूत्रेण पयोनुपः।

सहस्रं पिप्पलीनां वा स्नुक्क्षीरेण सुभावितम्॥ ४०॥

पिप्पलीवर्धमानं वा क्षीराशी वा शिलाजतु।

तद्वद्वा गुग्गुलुं क्षीरं तुल्यार्द्रकरसं तथा॥ ४१॥

स०-जठरी दोषशेषस्य निवृत्तये हरीतकीसहस्रं गोमूत्रेणासकृद्भावितं पयोनुपः सन् खादेत्। अथवा, स्नुहीदुग्धेनासकृद्भावितं पिप्पली सहस्रमुपयुञ्जीत। पिप्पलीवर्धमानं वा रसायनविधानेनोपयुञ्जीत। अथवा, दुग्धाशनः सन्नद्रिजमुपयुञ्जीत। तथैव गुग्गुलुं प्रयुञ्जीत। तथा, तुल्यार्द्रकरसं क्षीरमुपयुञ्जीत।

चित्रकामरदारुभ्यां कल्कं क्षीरेण वा पिबेत्।

मासं युक्तस्तथा हस्तिपिप्पलीविश्वभेषजम्॥ ४२॥

स०-अथवा, चित्रकदेवदारुणोः कल्कं क्षीरेण पिबेत्। तथा, मासं हस्तिपिप्पलीविश्वभेषजकल्कं युक्तो-नियतः सन्, क्षीरेण पिबेत्।

विडङ्गं चित्रको दन्ति चव्यं व्योषं च तै पयः।

कल्कैः कोलसमैः पीत्वा प्रवृद्धमुदरं जयेत्॥४३॥

स०-विडङ्गादिभिः कल्कैः कोलप्रमाणैरालोडितं पयः पीत्वा प्रवृद्धमुदरं जयेत्।

भोज्यं भुञ्जीत वा मासं स्नुहीक्षीरघृतान्वितम्।

उत्कारिकां वा स्नुक्क्षीरपीतपथ्याकणाकृताम्॥४४॥

स०-स्नुक्क्षीरघृतान्वितं भोज्यं-आहारं, मासं वा भुञ्जीत। स्नुक्क्षीरसिद्धं घृतं स्नुक्क्षीरघृतम्, स्नुक्क्षीरयुतं वा घृतं स्नुक्क्षीरघृतम्। उत्कारिकां वा स्नुक्क्षीरयुतां भुञ्जीत। उत्कारिकां-रोटिकाम्।

पार्श्वशूलमुपस्तम्भं हृद्ग्रहं च समीरणः।

यदि कुर्यात् ततस्तैलं बिल्वक्षारान्वितं पिबेत्॥४५॥

पक्वं वा टिण्टुकबलापलाशतिलनालजैः।

क्षारैः कदल्यपमार्गतर्कारीजैः पृथक्कृतैः॥४६॥

स०-समीरणः पार्श्वशूलादिकं यदि कुर्यात् ततस्तैलं बिल्वादियुतं पिबेत्। अथवा, मयूरजङ्घादिजैः क्षारैः कदल्यपामार्गतर्कारीजैः पृथक्कृतैः पक्वं तैलं पिबेत्।

कफे वातेन पित्ते वा ताभ्यां वाऽप्यावृतेऽनिले।

बलिनः स्वौषधयुतं तैलमेरण्डजं हितम्॥४७॥

स०-कफे वातेनावृते, ताभ्यां-कफपित्ताभ्यां वाऽऽवृतेऽनिले सति, बलिनो नरस्य स्वौषधयुतमेरण्डतैलं हितम्।

देवदारुपलाशार्कहस्तिपिप्पलिशिग्रुकैः।
साश्वकर्णैः सगोमूत्रैः प्रदिह्यादुदरं बहिः॥४८॥

स०-देवदार्वादिभिर्गोमूत्रसहितैरुदरं बाह्यतः प्रलिम्पेत्।

वृश्चिकालीवचाशुण्ठीपञ्चमूलपुनर्नवात्।
वर्षाभूधान्यकुष्ठाच्च क्काथैर्मूत्रैश्च सेचयेत्॥४९॥

स०-वृश्चिकाल्यादीनां क्काथैर्मूत्रैश्च जठरं सेचयेत्।

विरिक्तस्नानमुदरं स्वेदितं साल्वणादिभिः।
वाससा वेष्टयेदेवं वायुर्नाध्मापयेत्पुनः॥५०॥

स०-उदरं विरिक्तस्नानं साल्वणादिभिः स्वेदितं ततो वस्त्रेण वेष्टयेत्। एवं कृते सति वायुर्न पुनराध्मापयेत्।

सुविरिक्तस्य यस्य स्यादाध्मानं पुनरेव तम्।
सुस्निग्धैरम्लवणैर्निरूहैः समुपाचरेत्॥५१॥

स०-सुविरिक्तस्य नरस्य यस्य पुनराध्मानं स्यात्, तं-उदारिणं नरं, पुनरेव निरूहैः सुस्निग्धैरम्लवणैश्चोपाचरेत्।

सोपस्तम्भोऽपि वा वायुराध्मापयति यं नरम्।
तीक्ष्णाः सक्षारगोमूत्राः शस्यन्ते तस्य बस्तयः॥५२॥

स०-सहोपस्तम्भेन-कफाद्याधारकेण, वर्तते सोपस्तम्भो वायुर्यं नरमाध्मापयति, तस्य तीक्ष्णा बस्तयः क्षारगोमूत्राभ्यां सह शस्यन्ते।

इति सामान्यतः प्रोक्ताः सिद्धा जठरिणां क्रियाः।

स०-इति-एवं, सामान्येनोदरिणां क्रियाः सिद्धाः प्रोक्ताः।

वातोदरेऽथ बलिनं विदार्यादिश्रृतं घृतम्॥५३॥

पाययेत ततः स्निग्धं स्वेदिताङ्गं विरेचयेत्।

बहुशस्तैल्वकेनैनं सर्पिषा मिश्रकेण वा॥५४॥

स०-वातोदरे सति बलवन्तं पुरुषं विदार्यादिगणेन पक्वं घृतं पाययेत्। अनन्तरं स्निग्धं स्वेदितशरीरमेनं बहुशस्तैल्वकेन घृतेन (हृ. चि. अ. २१।३२) विरेचयेत्। मिश्रकेण (हृ. चि. अ. १४।८९) वा घृतेन विरेचयेत्।

कृते संसर्जने क्षीरं बलार्थमवचारयेत्।

प्रागुत्क्लेशान्निवर्त्यं च बले लब्धे क्रमात्पयः॥५५॥

स०-कृते संसर्जने सति क्षीरं बलदानाय दद्यात्। उत्क्लेशात् प्राक्-प्रायेण कफोपचितेरुत्क्लेशं दृष्ट्वाऽनन्तरं, बले लब्धे सति क्रमेण क्षीरं निवर्तयेत्-न सहसैव।

यूषै रसैर्वा मन्दाम्ललवणैरधितानलम्।

सोदावर्तं पुनः स्निग्धस्विन्नमास्थापयेत्ततः॥५६॥

तीक्ष्णाधोभागयुक्तेन दाशमूलिकबस्तिना।

स०-ततः-अनन्तरमुदीरिणं यूषादिभिः समिद्धाग्निमुदावर्तवन्तं पुनरपि स्निग्धस्विन्नं दाशमूलिकबस्तिना निरूहयेत्। दाशमूलिको बस्तिः-"द्विपञ्चमूलत्रिफलाफलबिल्वानि पाचयेत्।" (हृ. क. अ. ४।३४) इत्यादिः कल्पोक्तः। तेन किम्भूतेन ? तीक्ष्णाधोभागयुक्तेन। अधोभागो-अधस्ताच्छरीरे, युक्तो-योग्यः। तीक्ष्णाश्चासावधोभागयुक्तश्च, तेन।

तिलोरुबूकतैलेन वातघ्नाम्लश्रृतेन च॥५७॥

स्फुरणाक्षेपसन्ध्यस्थिपार्श्वपृष्ठत्रिकार्तिषु।

रूक्षं बद्धशकृद्वातं दीप्ताग्निमनुवासयेत्॥५८॥

अविरेच्यस्य शमना बस्तिक्षीरघृतादयः।

स०-रूक्षं बद्धशकृद्वातं दीप्तानलं तिलैरण्डतैलेन वातघ्नैर्द्रव्यैरम्लैश्च श्रृतेनानुवासयेत्। स्फुरणादिसद्भावे सत्यविरेच्यस्योदरिणो नरस्य शमना बस्त्यादयः प्रयोज्याः। [अविरेच्याः-] "न तु रेच्यो नवज्वरी " (हृ. सू. अ. १८।१०) इत्यादयो विरेचनविधावुक्ताः।

बलिनं स्वादुसिद्धेन पैत्ते संस्नेह्य सर्पिषा॥५९॥

श्यामात्रिभण्डीत्रिफलाविपक्केन विरेचयेत्।

सितामधुघृताढ्येन निरूहोऽस्य ततो हितः॥६०॥

न्यग्रोधादिकषायेण स्नेहबस्तिश्च तच्छृतः।

स०-बलवन्तं पुरुषं पैत्ते जठरे सति मधुरवर्गसिद्धेन घृतेन संस्नेह्य श्यामादिभिर्विपक्केन सर्पिषा विरेचयेत्। श्यामा-मालविका त्रिवृत्। त्रिभण्डी-काशी त्रिवृत्। अनन्तरं शर्करामाक्षिकघृतबहुलेन न्यग्रोधादिकषायेणास्य-आतुरस्य, निरूहो हितः। [तथा,] तेनैव-न्यग्रोधादिना, [श्रृतो-] विपक्वः, स्नेहबस्तिः-अनुवासनो, हितः। ननु, बलिनमित्ययुक्तम्। यतः प्रागभ्यधायि (हृ. नि. अ. १२।४)-"नष्टचेष्टाबलाहाराः" इति। अत्रोच्यते। भेषजवेगसहिष्णुमात्रत्वमत्र बलवत्त्वं परिकल्प्य बलिनमित्युक्तम्, न तु प्रकृष्टबलवन्तमित्यदोषः।

दुर्बलं त्वनुवास्यादौ शोधयेत्क्षीरबस्तिभिः॥ ६१॥

स०-दुर्बलं तु नरं प्रागनुवास्य क्षीरबस्तिभिः शोधयेत्।

जाते चाग्निबले स्निग्धं भूयो भूयो विरेचयेत्।
क्षीरेण सत्रिवृत्कल्केनोरुबूकश्रृतेन वा॥ ६२॥
सातलात्रायमाणाभ्यां श्रृतेनारग्वधेन वा।
सकफे वा समूत्रेण सतिक्ताज्येन सानिले॥ ६३॥
पयसाऽन्यतमेनैषां विदार्यादिश्रृतेन वा।
भुञ्जीत जठरं चास्य पायसेनोपनाहयेत्॥ ६४॥

स०-अग्निबले च जाते स्निग्धं सन्तं पुनःपुनर्विरेचयेत्। केन? क्षीरेण। त्रिवृच्चूर्णयुतेनैरण्डश्रृतेन वा क्षीरेण सातलात्रायन्तीभ्यां वा श्रृतेन कर्णिकारेण वा श्रृतेन। पित्तोदरिणः सुतरां बलापेक्षित्वाद्दुर्बलमित्युक्तम्। कफयुते पित्ते समूत्रेण क्षीरेणैषामन्यतमेन श्रृतेन, सानिले पित्ते तिक्ताज्येन सह पयसा पूर्वोक्तद्रव्याणामन्यतमेन श्रृतेन विरेचयेत्। तिक्तद्रव्ययुतमाज्यं तिक्ताज्यम्, कुष्ठोक्तं तिक्तघृतं वा। विदार्यादिश्रृतेन वा पयसा भुञ्जीत-भोजनं कुर्वीत। जठरं चास्य पायसेनोपनाहयेत्।

पुनः क्षीरं पुनर्बस्तिं पुनरेव विरेचनम्।
क्रमेण ध्रुवमातिष्ठन् यत्तः पित्तोदरं जयेत्॥ ६५॥

स०-पुनः क्षीरं पुनर्बस्तिं पुनरेव विरेचनं क्रमेण ध्रुवमातिष्ठन्-आचरन्, यत्तो-यत्नवान् सन्, पित्तोदरं जयेत्। पुनः क्षीरमित्यादिषु पुनःशब्दो वीप्सार्थः। एतच्च क्रमेण ध्रुवमातिष्ठन्नित्यतो लब्धम्।

वत्सकादिविपक्केन कफे संस्नेह्य सर्पिषा।

स्विन्नं स्नुक्षीरसिद्धेन बलवन्तं विरेचितम्॥६६॥

संसर्जयेत्कटुक्षारयुक्तैरन्नैः कफापहैः।

स०-कफे-कफोदरे, वत्सकादिविपक्केन सर्पिषा संस्नेह्य स्विन्नं सन्तं स्नुक्षीरसिद्धेन घृतेन बलिनं विरेचितं सन्तं संसर्जयेत्-पेयाद्यन्नैरुपक्रमेत्। किम्भूतैः ? कटुक्षारद्रव्ययुतैरन्नैः कफघ्नैः। कटुक्षारयुतानां कफघ्नत्वेऽपि कफघ्नैरित्युक्तमतिशयार्थम्।

मूत्रत्र्यूषणतैलाढ्यो निरूहोऽस्य ततो हितः॥६७॥

मुष्ककादिकषायेण स्नेहबस्तिश्च तच्छृतः।

भोजनं व्योषदुग्धेन कौलत्थेन रसेन वा॥६८॥

स०-ततः-संसर्जनादनन्तरं, निरूहो गोमूत्रत्रिकटुकतैलबहुलो मुष्ककादिवर्गक्काथेनास्य-कफोदरिणो, हितः। स्नेहबस्तिः-अनुवासनम्, तेनैव श्रृतो हितः। भोजनं व्योषयुक्तेन दुग्धेन सह हितं कुलत्थरसेन वा।

स्तैमित्यारुचिहृल्लासे मन्देऽग्नौ मद्यपाय च।

दद्यादरिष्टान् क्षारांश्च कफस्त्यानस्थिरोदरे॥६९॥

स०-मद्यपाय नराय मन्देऽग्नौ स्तैमित्यादौ च सत्यरिष्टान् क्षारांश्च दद्यात्। कफेन स्त्यानं जठरं यस्य तस्मिन्निदं कार्यम्।

हिङ्गपकुल्ये त्रिफलां देवदारु निशाद्वयम्।

भल्लातकं शिग्रुफलं कटुकां तिक्तकं वचाम्॥७०॥

शुण्ठीं माद्रीं घनं कुष्ठं सरलं पटुपञ्चकम्।

दाहयेज्जर्जरीकृत्य दधिस्नेहचतुष्कवत्॥७१॥

अन्तर्धूमं ततः क्षाराद्विडालपदकं पिबेत्।

मदिरादधिमण्डोष्णजलारिष्टसुरासवैः॥७२॥

उदरं गुल्ममष्ठीलां तून्यौ शोफं विसूचिकाम्।

प्लीहहृद्रोगगुदजानुदावर्तं च नाशयेत्॥७३॥

स०-हिङ्ग्वादिकं जर्जरीकृत्य दधिस्नेहचतुष्कयुतमन्तर्धूमं दाहयेत्। तस्मात् क्षाराद्विडालपदकं मदिरादिभिः पिबेत्। एष च क्षार उदरगुल्मादीन् नाशयेत्।

जयेदरिष्टगोमूत्रचूर्णायस्कृतिपानतः।

सक्षारतैलपानैश्च दुर्बलस्य कफोदरम्॥७४॥

स०-दुर्बलस्य नरस्य कफोदरमरिष्टादिपानेन जयेत्। अयस्कृतिः-प्रमेहचिकित्सिते (अ. १२। २९) प्रोक्ता, क्षारयुततैलपानैश्च जयेत्।

उपनाह्यं ससिद्धार्थकिण्वैर्बीजैश्च मूलकात्।

कल्कितैरुदरं स्वेदमभीक्ष्णं चात्र योजयेत्॥७५॥

स०-तथा, उपनाह्यं जठरमस्यैतैः मूलकबीजैः कल्कितैः ससर्षकिण्वैः। तथा, नित्यं स्वेदमत्र योजयेत्।

सन्निपातोदरे कुर्यान्नातिक्षीणबलानले।

दोषोद्रेकानुरोधेन प्रत्याख्याय क्रियामिमाम्॥७६॥

स०-सन्निपातोद्रे-अर्थात्सन्निपातोद्रवति नरे, नातिक्षीणबलानलेऽधिदोषानुरोधेन-तद्वशेनैव, क्रियामिमां-अनन्तरोक्तां, कुर्यात्। किं कृत्वा? प्रत्याख्याय,-एतदुदरमशक्य-प्रतीकारमित्येवमुक्त्वा।

अथोपक्रममाह-

दन्तीद्रवन्तीफलजं तैलं पाने च शस्यते।

स०-दन्त्यादितैलं पाने च शस्यते।

क्रियानिवृत्ते जठरे त्रिदोषे तु विशेषतः॥७७॥
दद्यादापृच्छ्य तज्ज्ञातीन् पातुं मद्येन कल्कितम्।
मूलं काकादनीगुञ्जाकरवीरकसम्भवम्॥७८॥

स०-क्रियामतिक्रान्ते जठरे विशेषेण त्रिदोषजे तस्य-उदरिणो बन्धून्, पृष्ट्वा-यथैतद्विषं विषमं किं जीवयत्युत मारयतीति सन्देह इत्याद्युक्त्वा, प्रयोज्यं वक्ष्यमाणं चैतत्। पातुमित्यादि। काकादन्यादिजं मूलं कल्कितं मद्येन पातुं दद्यात्। ककादनी-काकणन्तिका।

पानभोजनसंयुक्तं दद्याद्वा स्थावरं विषम्।
यस्मिन् वा कुपितः सर्पो विमुञ्चति फले विषम्॥७९॥
तेनास्य दोषसङ्घातः स्थिरो लीनो विमार्गगः।
बहिः प्रवर्तते भिन्नो विषेणाशु प्रमाथिना॥८०॥
तथा व्रजत्यगदतां शरीरान्तरमेव वा।

स०-अथवा पानभोजनसंयुक्तं स्थावरं विषं दद्यात्। तेन यस्मिन् फले सर्पः कुपितो विषं मुञ्चति तद्वा दद्यात्। तेन-विषेण प्रमाथिना, अस्य दोषसङ्घातो भिन्नो बहिः प्रवर्तते। किम्भूतः ? स्थिरस्तथा लीनो धात्वादिषु तथा उन्मार्गगामी। तथा-तेन प्रकारेणानुष्ठितेन, उदर्यगदतां-निर्व्याधितां, व्रजति। शरीरान्तरं वा याति-म्रियत इत्यर्थः।

हृतदोषं तु शीताम्बुस्नातं तं पाययेत्पयः॥८१॥

पेयां वा त्रिवृतः शाकं मण्डूक्या वास्तुकस्य वा।

कालशाकं यवाख्यं वा खादेत्स्वरससाधितम्॥८२॥

निरम्ललवणस्नेहं स्विन्नास्विन्नमनन्नभुक्।

मासमेकं ततश्चैव तृषितः स्वरसं पिबेत्॥८३॥

स०-हृतदोषं च तं शीतजलेन स्नातं सन्तं पयः शीतं पाययेत्। पेयामथवा त्रिवृच्छाकं मण्डूकीशाकं वास्तुकशाकं कालशाकं यवशाकं वा खादेत्। किम्भूतम् ? स्वरसेन साधितम्, तथाऽम्ललवणस्नेहवर्जितम्, तथा स्विन्नास्विन्नम्। अनन्नभोजी सन्, स्विन्नास्विन्नमिति "क्तेन नञ्विशिष्टेन" इति समासः, मासमेकं यावदेतदश्नीयात्। तृषितः सन् स्वरसं-प्रकृतत्वात्तच्छाकस्य, पिबेत्।

एवं विनिर्हृते शाकैर्दोषे मासात् परं ततः।

दुर्बलाय प्रयुञ्जीत प्राणभृत्कारभं पयः॥८४॥

स०-एवं शाकविशेषेण दोषे निर्हृते-प्रायेण जलाख्ये, ततः-अनन्तरं, मासात् परं दुरलाय पुरुषाय कारभं क्षीरं प्राणकरं प्रयुञ्जीत।

प्लीहोदरे यथादोष स्निग्धस्य स्वेदितस्य च।

सिरां भुक्तवतो दध्ना वामबाहौ विमोक्षयेत्॥८५॥

स०-प्लीहोदरे दोषानुसारेण स्निग्धस्य स्वेदितस्य च दध्ना भुक्तवतः सिरां वामे बाहौ विमोक्षयेत्।

लब्धे बले च भूयोऽपि स्नेहपीतं विशोधितम्।
समुद्रशुक्तिजं क्षारं पयसा पाययेत्तथा॥८६॥
अम्लस्रुतं बिडकणाचूर्णाढ्यं नक्तमालजम्।
सौभाञ्जनस्य वा क्वाथं सैन्धवाग्निकणान्वितम्॥८७॥
हिङ्ग्वादिचूर्णं क्षाराज्यं युञ्जीत च यथाबलम्।

स०-बले च जाते पुनरपि स्नेहपीतं विशोधितं सन्तं क्षारं समुद्रशुक्तयुत्थं पयसा पाययेत्। तथा करञ्जजं क्षारमम्लैः-काञ्जिकादिभिः स्रुतं, बिडकणाचूर्णभूयिष्ठं पाययेत्। अथवा, सौभाञ्जनस्य क्वाथम् सैन्धवादियुतं पिबेत्। हिङ्ग्वादिजं चूर्णं क्षारं तथा घृतं-षट्पलादि, यथाबलं प्रयुञ्जीत। ननु, यथाबलं इहोच्यते। प्राक् चाभ्यधायि (हृ. नि. अ. १२।४)-"नष्टचेष्टाबलाहाराः" इति। तदिमे वाक्ये परस्परं व्याघ्नाते। ब्रूमः। बलशब्देनेह भेषजबलं सोढुं शक्तं यद्बलमात्रं तदिह परिकल्पितम्। पूर्वं च प्रकृष्टं यद्बलं तद्विवक्षितमिति नात्र पूर्वापरव्याहतत्वम्।

पिप्पलीनागरं दन्तीसमांशं द्विगुणाभयम्॥८८॥
बिडार्धांशयुतं चूर्णमिदमुष्णाम्बुना पिबेत्।

स०-पिप्पलीनागरयोर्द्वावंशौ, दन्त्या द्वौ भागौ, हरीतक्याश्च द्वौ भागौ, बिडलवणस्यार्धभागः, इत्येवं चूर्णमुष्णाम्बुना पिबेत्।

विडङ्गं चित्रकं सक्तून् सघृतान् सैन्धवं वचाम्॥८९॥
दग्ध्वा कपाले पयसा गुल्मप्लीहापहं पिबेत्।

स०-विडङ्गादिकं कपाले-कपरे, दग्ध्वा क्षीरेण गुल्मप्लीहघ्नं पिबेत्।

तैलोन्मिश्रैर्बदरकपत्रैः सम्मार्दितैः समुपनद्धः॥९०॥

मुसलेन पीडितोऽनु च याति प्लीहा पयोभुजो नाशम्।

स०-बदरकस्य पत्रैस्तैलमिश्रितैः सुष्ठु मर्दितैः समुपनद्धः, अनु-पश्चाच्च, मुसलेन पीडितः प्लीहा क्षीराशिनो नाशं व्रजति। उपगीतिः।

रोहितकलताः क्लम्नाः खण्डशः साभया जले॥९१॥

मूत्रे वाऽऽसुनुयात्तच्च सप्तरात्रस्थितं पिबेत्।

कामलाप्लीहगुल्मार्शः कृमिमेहोदरापहम्॥९२॥

स०-रोहितकलताः लताः खण्डं क्लम्नाः सहरीतकीर्जले मूत्रे वाऽऽसुनुयात्। तच्च सप्तरात्रं स्थितं जलं मूत्रं वा पिबेत्। हरीतक्यश्च लेहवद्भक्षीत। तत्पीतं कामलादिघ्नम्।

रोहितकत्वचः कृत्वा पलानां पञ्चविंशतीम्।

कोलद्विप्रस्थसंयुक्तं कषायमुपकल्पयेत्॥९३॥

पालिकैः पञ्चकोलैस्तु तैः समस्तैश्च तुल्यया।

रोहितकत्वचा पिष्टैर्घृतप्रस्थं विपाचयेत्॥९४॥

प्लीहाभिवृद्धिं शमयत्येतदाशु प्रयोजितम्।

स०-रोहितकत्वचः पलानां पञ्चविंशतिं कृत्वा बदरप्रस्थद्वयसंयुक्तं कषायमवतारयेत्। पञ्चकोलैः पालिकैस्तैः समस्तैः पञ्चकोलैः रोहीतकत्वचा तुल्यया पिष्टैर्घृतप्रस्थं विपाचयेत्। एतद्धृतं प्रयोजितं प्लीहाभिवृद्धिं द्रागेव शमयति।

कदल्यास्तिलनालानां क्षारेण क्षुरकस्य च॥९५॥

तैलं पक्वं जयेत्पानात्प्लीहानं कफवातजम्।

स०-कदल्यादीनां क्षारेण तैलं पक्वं पानेन कफवातोत्थं प्लीहानं पराकरोति।

अशान्तौ गुल्मविधिना योजयेदग्निकर्म च॥९६॥

अप्राप्तपिच्छासलिले प्लीह्नि वातकफोल्बणे।

स०-एवमप्यनुपशान्तौ वातकफोत्थे प्लीह्न्यसञ्जातपिच्छोदके गुल्मविधानेनाग्निकर्म योजयेत्।

पैत्तिके जीवनीयानि सर्पींषि क्षीरबस्तयः॥९७॥

रक्तावसेकः संशुद्धिः क्षीरपानं च शस्यते।

स०-पैत्तिके-पित्तेल्बणे, प्लीह्नि जीवनीयगणसाधितानि सर्पींषि तथा क्षीरबस्तिरक्तावसेकादि च शस्यते। "सिरां भुक्तवतो दध्ना वामबाहौ विमोक्षयेत्।" (श्लो. ८५) इत्यनेनैव रक्तावसेकस्योक्तत्वात् पुनर्वचनं प्रकर्षार्थम्। पित्ताधिक्ये हि रक्तातिवृद्धिः। तस्मादतिरक्तस्रावो योज्य इति प्रतिपादनार्थमेतदुक्तम्।

यकृति प्लीहवत्कर्म दक्षिणे तु भुजे सिराम्॥९८॥

स०-यकृति प्लीहवत् कर्म कार्यम्। सिरां पुनर्दक्षिणे बाहौ दद्यात्।

स्विन्नाय बद्धोदरिणे मूत्रतीक्ष्णौषधान्वितम्।

सतैललवणं दद्यान्निरूहं सानुवासनम्॥९९॥

परीस्रंसीनि चान्नानि तीक्ष्णं चास्मै विरेचनम्।

उदावर्तहरं कर्म कार्यं यच्चानिलापहम्॥ १००॥

स०-बद्धोदरिणे पुरुषाय स्विन्नाय गोमूत्रतीक्ष्णौषधयुतं तैलसैन्धवाभ्यां सह निरूहं दद्यात्, सानुवासनं-पूर्वमनुवासनं पश्चाच्चेत्यर्थः। उदरीणः स्वेदनिषेधाद्बद्धोदरिणः स्वेदानुज्ञानमपवाद इति नैतत्पूर्वापरव्याहतम्। परिस्रंसीनि-अनुलोमकारण्यन्नानि, अस्मै च-जठरिणे, तीक्ष्णं च विरेचनं दद्यात्। उदावर्तहरं कर्म कार्यम्। यच्च वातघ्नं तच्च कार्यम्।

छिद्रोदरमृते स्वेदाच्छ्लेष्मोदरवदाचरेत्।

जातं जातं जलं स्राव्यमेवं तद्यापयेद्भिषक्॥ १०१॥

स०-छिद्रोदरं स्वेदमन्तरेण श्लेष्मोदरवदुपक्रमेत्। यदा तु कथञ्चिद्रसश्छिद्रेभ्यः परिस्रवन् जठरमापूरयित्वा जलं भवेत्तदा तज्जातं सलिलं स्राव्यम्। न च सकृदेव स्राव्यमिति प्रतिपादनार्थं वीप्सा, जातं जातं जलं स्राव्यमिति। कियन्तं कालं स्राव्यम्? इत्याह-एवमित्यादि। एवं-अनेन प्रकारेण, तत्-बद्धोदरं, यापयेत्। स्वास्थ्यमिति योग्यतयाऽत्र सम्बध्यते, तेनैव स्वास्थ्यं प्रापयेदिति बोध्यम्। न तु याप्यं विदध्यादिति व्याख्येयम्, न हि याप्यमुदरमस्ति।

अपां दोषहराण्यादौ योजयेदुदकोदरे।

मूत्रयुक्तानि तीक्ष्णानि विविधक्षारवन्ति च॥ १०२॥

दीपनीयैः कफघ्नैश्च तमाहारैरुपाचरेत्।

स०-उदकोदरे पूर्वमपां दोषहराणि योजयेत्। तानि सर्वाणि गोमूत्रयुक्तानि तथा तीक्ष्णानि तथा विविधाः क्षारा विद्यन्ते येषु तानि विविधक्षारवन्ति, अनेकक्षारयुक्तानीत्यर्थः। ननु, अपामित्यनर्थकम्, "योजयेदुदकोदरे" इत्यनेनैवोदकहरत्वस्य सिद्धत्वात्। अत्रोच्यते। अपां च हर्णानि यश्च तत्र संसृष्टो दोषोऽद्भितस्य च हरणानि जलसंसृष्टदोषहरणानीति प्रतिपादयितुमुक्तम्। आदाविति निर्देशात् पश्चाद्वातादिदोषानुसारेण चोपक्रमः कार्य इति द्योतयति। तथा भोजनैर्दीपनीयैः कफापहैश्चोपाचरेत्।

क्षारं छागकरीषाणां स्रुतं मूत्रेऽग्निना पचेत्॥ १०३॥

घनीभवति तस्मिंश्च कर्षांशं चूर्णितं क्षिपेत्।

पिप्पली पिप्पलीमूलं शुण्ठी लवणपञ्चकम्॥ १०४॥

निकुम्भकुम्भत्रिफलास्वर्णक्षीरीविषाणिकाः।

स्वर्जिकाक्षारषड्ग्रन्थासातलायवशूकजम्॥ १०५॥

कोलाभा गुटिकाः कृत्वा ततः सौवीरकाप्लुताः।

पिबेदजरके शोफे प्रवृद्धे चोदकोदरे॥ १०६॥

स०-क्षारं छागकरीषाणां मूत्रे स्रुतं चाग्निना पचेत्। अस्मिंश्च क्षारजले घनीभवति सति कर्षांशं रजीकृतं पिप्पल्यादिकं क्षिपेत्। ततः-तस्मात्क्षारात्, गुलिकाः कोलाभाः कृत्वा सौवीरकालोडिता अजरकादौ पिबेत्।

इत्यौषधैरप्रशमे त्रिषु बद्धोदरादिषु।

प्रयुञ्जीत भिषक् शस्त्रमार्तबन्धुनृपार्थितः॥ १०७॥

स०-इति-एवं, औषधैरशान्तौ सत्यां त्रिषु बद्धच्छिद्रोदकोदरेषु वैद्य आर्तज्ञातिभिर्नृपेण चाभ्यार्थितः सन् शस्त्रं प्रयुञ्जीत।

स्निग्धस्विन्नतनोर्नाभेरधो बद्धक्षतान्त्रयोः।

पाटयेदुदरं मुक्त्वा वामतश्चतुरङ्गुलात्॥ १०८॥

चतुरङ्गुलमानं तु निष्कास्यान्त्राणि तेन च।

निरीक्ष्यापनयेद्वालमललेपोपलादिकम्॥ १०९॥

छिद्रे तु शल्यमुद्धृत्य विशोध्यान्त्रपरिस्रवम्।

मर्कोटैर्दंशयेच्छिद्रं तेषु लग्नेषु चाहरेत्॥ ११०॥

कायं मूर्ध्नोऽनु चान्त्राणि यथास्थानं निवेशयेत्।

अक्तानि मधुसर्पिर्भ्यामथ सीव्येद्बहिर्व्रणम्॥ १११॥

ततः कृष्णमृदाऽऽलिप्य बध्नीयाद्यष्टिमिश्रया।

निवातस्थः पयोवृत्तिः स्नेहद्रोण्यां वसेत्ततः॥ ११२॥

स०-बद्धक्षतान्त्रयोः-बद्धोदरे छिद्रोदरे च, स्निग्धस्विन्नशरीरस्य नाभेरध उदरं चतुरङ्गुलाद्वामेन मुक्त्वा चतुरङ्गुलप्रमाणं पाटयेत्। तेन च-छिद्रेण, अन्त्राणि बहिर्निष्कास्य बालमललेपोपलादिकमपनयेदिति बद्धोदरोपक्रमः। छिद्रोदरोपक्रममाह-छिद्रे तु परीस्रावि णि शल्यमुद्धृत्य परिस्रवमात्रं विशोध्यानन्तरं मर्कोटैश्छिद्रं दंशयेत्। तेषु च-मर्कोटेषु, भक्षयितुं लग्नेषु मूर्ध्नः-शिरसोऽपरं, कायं मर्कोटानामाकर्षेत्। अनु [च]-पश्चाच्च, अन्त्राणि मधुसर्पिर्भ्यामक्तानि यथास्थानं स्थापयेत्। [अथ-] अनन्तरं, बहिर्व्रणं सीव्येत्। बहिःशब्दनिर्देशादाभ्यन्तरगतं न सीव्येदिति गम्यते। ततः-अनन्तरं, कृष्णमृदा मधुयष्टिकामिश्रयाऽऽलिप्य बध्नीयात्। अनन्तरं निवातस्थः क्षीरवृत्तिः सन् स्नेहद्रोण्यां वसेत्।

अधुना जलोदरस्यान्येषामपि जातजलानां जठराणां चिकित्सार्थमाह-

सजले जठरे तैलैरभ्यक्तस्यानिलापहैः।

स्विन्नस्योष्णाम्बुनाऽऽकक्षमुदरे पट्टवेष्टिते॥ ११३॥

बद्धच्छिद्रोदितस्थाने विध्येदङ्गुलमात्रकम्।

निधाय तस्मिन्नाडीं च स्रावयेदर्धमम्भसः॥ ११४॥

अथास्य नाडीमाकृष्य तैलेन लवणेन च।

व्रणमभ्यज्य बध्वा च वेष्टयेद्वाससोदरम्॥ ११५॥

तृतीयेऽह्नि चतुर्थे वा यावदाषोडशं दिनम्।

तस्य विश्रम्य विश्रम्य स्रावयेदल्पशो जलम्॥ ११६॥

विवेष्टयेद्गाढतरं जठरं वाससा श्लथम्।

निःस्रुते लङ्घितः पेयामस्नेहलवणां पिबेत्॥ ११७॥

स०-सजले जठरिणो जठरे तैलैः-तिलानां तैलैः सर्षपैरण्डतैलादिभिश्च, अनिलघ्नैरभ्यक्तस्य तथोष्णाम्बुना स्विन्नस्याकक्षं-कक्षान्तं यावत्, उदरे पट्टेन-वस्त्रेण वेष्टिते, तदुदरं वस्त्रेणैव वेष्टयित्वा बद्धच्छिद्रोदरयोर्यत्कथितं स्थानं तस्मिन् स्थानेऽङ्गुलप्रमाणं विध्येत्। तस्मिंश्च छिद्रे नाडीं निधाय जलस्योदरस्थस्यार्धं स्रावयेत्। जलस्रावादनन्तरमस्य-उदरिणो, नाडीमाकृष्य सलवणेन तैलेन व्रणमभ्यज्य बद्धा च वाससा जठरं वेष्टयेत्। तृतीये दिवसेऽथवा चतुर्थे यावदाषोडशं दिनं तस्य-उदरिणो, विश्रम्य विश्रम्याल्पशः-अल्पमल्पं कृत्वा, जलं-दोषं, स्रावयेत्। सहसा हि प्रचुरजलस्रावणादपायः स्यात्। तस्मात् स्रुतिदिवसादनन्तरं तृतीये चतुर्थे पञ्चमादौ वा दिने शरीरबलाबलमपेक्ष्य षोडशदिनं मर्यादीकृत्य जलस्रावणं कार्यम्। जठरं च शिथिलं वाससा गाढतरं विवेष्टयेत्। निःश्रुते च जलेऽसौ जठरी लङ्घितः सन् पेयामस्नेहलवणां< पिबेत्। नञत्र ईषदर्थः। ईषत् स्नेहलवणं क्लेदरक्षार्थं वातकोपरक्षार्थं च। अन्यथा हि 'रूक्षां निर्लवणां पिबेत्' इत्येवं निर्देशमाचार्यः कुर्यात्।

स्यात्क्षीरवृत्तिः षण्मासांस्त्रीन् पेयां पयसा पिबेत्।

त्रींश्चान्यान् पयसैवाद्यात् फलाम्लेन रसेन वा॥ ११८॥

अल्पशोऽस्नेहलवणं जीर्णं श्यामाककोद्रवम्।

प्रयतो वत्सरेणैवं विजयेत जलोदरम्॥ ११९॥

स०-षण्मासान् क्षीरवृत्तिः स्यात्। त्रीन् मासान् क्षीरपेयां पिबेत्। त्रींश्चान्यान् मासान् पयसैव जीर्णं श्यामाककोद्रवमद्यात्। फलाम्लेन वा मांसरसेन। कथम्? अल्पमल्पम्। तथा, ईषत् स्नेहलवणम्। [एवं-] अनेन प्रकारेण, प्रयतः सलिलोदरं वत्सरेण विजयेत्।

वर्ज्येषु यन्त्रितो दिष्टे नात्यदिष्टे जितेन्द्रियः।

स०-वर्ज्येष्वाहारविहारादिष्वत्यर्थोष्णाम्ललवणादिषु (श्लो. १२५) यन्त्रित उदरी स्यात्। दिष्टे-कथितेऽन्नपानादौ, नातियन्त्रितः स्यात्। अदिष्टे-अकथिते पुनरन्नपानादौ, जितेन्द्रियः स्यात्-अलोलुपेन तत्र भवितव्यमित्यर्थः।

जलोदरचिकित्साप्रसङ्गेन सर्वोदरचिकित्सामाह-

सर्वमेवोदरं प्रायो दोषसङ्घातजं यतः॥ १२०॥

अतो वातादिशमनी क्रिया सर्वत्र शस्यते।

स०-सर्वमेवोदरं बाहुल्येन दोषसङ्घातोत्थं यस्मात्तस्मात् सर्वत्रोदरे वातादिशमनी क्रिया प्रशस्यते। प्रायोग्रहणं किञ्चित् प्राक्तनकर्मनिमित्तमुदरं नावश्यं दोषसङ्घातजमिति।

वह्निर्मन्दत्वमायाति दोषैः कुक्षौ प्रपूरिते॥ १२१॥

तस्माद्भोज्यानि भोज्यानि दीपनानि लघूनि च।

सपञ्चमूलान्यल्पाम्लपटुस्नेहकटूनि च॥ १२२॥

स०-वह्निर्मन्दत्वं यत आगच्छति दोषैरुदरे प्रपूरिते सति तस्मात्कारणात् भोज्यानि-आहाराः, भोज्यानि-भक्षयितव्यानि, जठरिभिर्दीपनानि लघूनि च। तथा सह पञ्चमूलेन तथाऽल्पाम्लादयो येषु तानि।

भावितानां गवां मूत्रे षष्टिकानां च तण्डुलैः।

यवागूं पयसा सिद्धां प्रकामं भोजयेन्नरम्॥ १२३॥

पिबेदिक्षुरसं चानु जठराणां निवृत्तये।

स्वं स्वं स्थानं व्रजन्त्येषां वातपित्तकफास्तथा॥ १२४॥

स०-गोमूत्रे भावितानां षष्टिकानां तण्डुलैर्यवागूं क्षीरेण सिद्धां प्रकामं-इच्छया, नरं भोजयेत्। अनु-पश्चात्, इक्षुरसं च पिबेदुदराणां शान्त्यर्थम्। तथा वातपित्तकफाश्चैषां-उदरिणां, स्वं स्वं स्थानं व्रजन्ति।

अत्यर्थोष्णाम्ललवणं रूक्षं ग्राहि हिमं गुरु।
गुडं तैलकृतं शाकं वारि पानावगाहयोः॥ १२५॥
आयासाध्वदिवास्वप्नयानानि च परित्यजेत्।

स०-अत्यर्थोष्णाम्ललवणादिकं जठरी त्यजेत्।

वारि पानावगाहयोर्यदि त्यजेत् तर्हि किं पेयम् ? इत्याह-

नात्यच्छसान्द्रमधुरं तक्रं पाने प्रशस्यते॥ १२६॥
सकणालवणं वाते, पित्ते सोषणशर्करम्।
यवानीसैन्धवाजाजीमधुव्योषैः कफोदरे॥ १२७॥
त्र्यूषणक्षारलवणैः संयुतं निचयोदरे।
मधुतैलवचाशुण्ठीशतह्वाकुष्ठसैन्धवैः॥ १२८॥
प्लीह्नि, बद्धे तु हपुषायवानीपद्मजाजिभिः।
सकृष्णामाक्षिकं छिद्रे, व्योषवत्सलिलोदरे॥ १२९॥

स०-तक्रमीषदच्छसान्द्रमधुरं पाने प्रशस्यते। तच्च पवने सपिप्पलीसैन्धवं श्रेष्ठम्। पित्ते समरिचशर्करम्। यवान्यादिभिः सह्स् कफोदरे हितम्। त्रिकटुकादिभिः संयुक्तं सन्निपातोदरे। मधुतैलादिभिः प्लीहोदरे। हपुषादिभिर्युतं बद्धोदरे। पिप्पलीमधुयुतं छिद्रोदरे। जलोदरे व्योषयुतं श्रेष्ठम्।

गौरवारोचकानाहमन्दह्न्यतिसारिणाम्।
तक्रं वातकफार्तानाममृतत्वाय कल्पते॥ १३०॥

स०-वातकफार्तानां गौरवारोचकादियुतानां तक्रममृतत्वाय कल्पते-सम्पद्यते। एतच्च ब्रुवन् वातकफयोः शुद्धावपि देयमिति द्योतयति।

प्रयोगाणां च सर्वेषामनु क्षीरं प्रयोजयेत्।
स्थैर्यकृत्सर्वधातूनां बल्यं दोषानुबन्धहृत्॥ १३१॥

स०-सर्वेषां च प्रयोगाणामनु क्षीरं प्रयोजयेत्। तच्च क्षीरं सर्वधातूनां स्थिरत्वं करोति। तथा बल्यं स्याद्दोषानुबन्धत्वं हरति।

भेषजापचिताङ्गानां क्षीरमेवामृतायते॥ १३१ १/२॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां चतुर्थे चिकित्सितस्थाने उदरचिकित्सितं नाम पञ्चदशोऽध्यायः॥ १५॥

****

स०-भेषजेनापचितं शरीरं येषां तेषां क्षीरमेवामृतत्वाय सम्पद्यत इति।

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टाङ्गहृदयटीकायां सर्वाङ्गसुन्दराख्यायां चतुर्थे चिकित्सितस्थाने उदरचिकित्सितं नाम पञ्चदशोऽध्यायः समाप्तः॥ १५॥

****

षोडशोऽध्यायः।

अस्मादनन्तरं पाण्डुरोगचिकित्सितं व्याख्यातुमुपक्रम्यते। सम्बन्धश्चास्य निदान एवोक्तः।

अथातः पाण्डुरोगचिकित्सितं व्याख्यास्यामः।

इति ह स्माहुरात्रेयादयो महर्षयः। (गद्यसूत्रे॥२॥)

पाण्ड्वामयी पिबेत्सर्पिरादौ कल्याणकाह्वयम्।

पञ्चगव्यं महातिक्तं श्रृतं वाऽऽरग्वधादिना॥१॥

स०-पाण्ड्वातुरः कल्याणकाख्यं (हृ. उ. अ. ६।२७) , सर्पिरादौ पिबेत्। आदावित्यनेनैतद्गमयति,-अस्मिन् व्याधौ प्राधान्येन पित्तचिकित्सा कार्या, तदनु वातकफयोः। तथा च पित्तस्यैवैतद्व्याधिकर्तृत्वे प्राधान्यम्। अत एव च निदानेऽध्यगीष्ट (हृ. नि. अ. १३।१) -"पित्तपधानाः कुपिताः" इत्यादि। तस्मात् पित्तस्योपशान्त्यै सर्पिःपानं युक्तम्। पञ्चगव्यं घृतं-अपस्मारप्रतिषेधोक्तम् (हृ. उ. अ. ७।२०)। महातिक्तं-कुष्ठचिकित्सितोक्तम् (हृ. चि. अ. १९।८)। आरग्वधादिगणेन (हृ. सू. अ. १५।१७) वा पक्वं घृतं पिबेत्।

दाडिमात्कुडवो धान्यात्कुडवार्धं पलं पलम्।

चित्रकाच्छृङ्गबेराच्च पिप्पल्यर्धपलं च तैः॥२॥

कल्कितैर्विंशतिपलं घृतस्य सलिलाढके।

सिद्धं हृत्पाण्डुगुल्मार्शःप्लीहवातकफार्तिनुत्॥३॥

दीपनं श्वासकासघ्नं मूढवातानुलोमनम्।

दुःखप्रसविनीनां च बन्ध्यानां च प्रशस्यते॥४॥

स०-दाडिमस्य कुडवम्, धान्यकात्कुडवार्धम्, चित्रकशुण्ठ्योः प्रत्येकं पलम्, पिप्पल्या द्वौ कर्षौ, तैः पिष्टैर्घृतस्य पलानि विंशतिं तोयाढके पचेत्। तच्च सिद्धं हृदयाद्यर्तिजित्, दीपनादिगुणयुक्तं च। दुःखप्रसविनीनां स्त्रीणां वन्ध्यानां-अप्रसविनीनां च, शस्यते।

स्नेहितं वामयेत्तीक्ष्णैः पुनः स्निग्धं च शोधयेत्।
पयसा मूत्रयुक्तेन बहुशः केवलेन वा॥५॥

स०-स्नेहितं पाण्डुरोगिणं तीक्ष्णैर्वामयेत्। पुनरपि स्निग्धं च बहुशः क्षीरेण शोधयेत्। केवलेन वा पयसा शोधयेत्।

दन्तीफलरसे कोष्णे काश्मर्याञ्जलिमासुतम्।
द्राक्षाञ्जलिं वा मृदितं तत् पिबेत् पाण्डुरोगजित्॥६॥
मूत्रेण पिष्टां पथ्यां वा तत्सिद्धं वा फलत्रयम्।

स०-दन्तीफलरसे कोष्णे काश्मर्याञ्जलिमासुतं पिबेत्, तदेतदुभयमपि पाण्डुरोगघ्नम्। गोमूत्रेण पिष्टां हरितकीं वा पिबेत्। तेन-गोमूत्रेण, सिद्धं-क्वथितं, फलत्रयं वा पिबेत्।

स्वर्णक्षीरीत्रिवृच्छ्यामाभद्रदारुमहौषधम्॥७॥
गोमूत्राञ्जलिना पिष्टं श्रृतं तेनैव वा पिबेत्।
साधितं क्षीरमेभिर्वा पिबेद्दोषानुलोमनम्॥८॥

स०-स्वर्णक्षीर्यादिकं गोमूत्राञ्जलिना पिष्टमथवा तेनैव-गोमूत्रेण, श्रृतं पिबेत्। एभिर्वा स्वर्णक्षीर्यादिभिर्द्रव्यैः क्षीरं साधितं दोषानुलोमकरं पिबेत्।

मूत्रे स्थितं वा सप्ताहं पयसाऽयोरजः पिबेत्।
जीर्णे क्षीरेण भुञ्जीत रसेन मधुरेण वा॥९॥

स०-गोमूत्रे सप्ताहं स्थितं लोहचूर्णं क्षीरेण पिबेत्। जीर्णे तस्मिन् दुग्धेन सहान्नं भुञ्जीत। मांसरसेन वा मधुरेण-न त्वम्लेन।

शुद्धश्चोभयतो लिह्यात्पथ्यां मधुघृतद्रुताम्।

स०-शुद्धश्चोभयतः-पायुतो मूर्घतश्च, हरीतकीं मधुघृतद्रुतां लिह्यात्।

विशालाकटुकामुस्ताकुष्ठदारुकलिङ्गकाः॥१०॥
कर्षांशा द्विपिचुर्मूर्वा कर्षार्धांशा घुणप्रिया।
पीत्वा तच्चूर्णमम्भोभिः सुखैर्लिह्यात्ततो मधु॥११॥
पाण्डुरोगं ज्वरं दाहं कासं श्वासमरोचकम्।
गुल्मानाहामवातांश्च रक्तपित्तं च तज्जयेत्॥१२॥

स०-विशालादय, षट् कर्षमात्राः, मूर्वा द्विकर्षप्रमाणा, अर्धकर्षदग्नी अतिविषा तदेतच्चूर्णं कोष्णाम्बुना पीत्वा माक्षिकं लिह्यात्। एतच्च पाण्डुरोगादीन् हन्ति।

वासागुडूचीत्रिफलाकट्वीभूनिम्बनिम्बहः।
क्काथः क्षौद्रयुतो हन्ति पाण्डुपित्तास्रकामलाः॥१३॥

स०-वासादिक्काथो मधुयुतः पाण्ड्वादीन् हन्ति।

व्योषाग्निवेल्लत्रिफलामुस्तैस्तुल्यमयोरजः।

चूर्णितं तक्रमध्वाज्यकोष्णाम्भोभिः प्रयोजितम्॥ १४॥

कामलापाण्डुहृद्रोगकुष्ठार्शोमेहनाशनम्।

स०-व्योषादिभिस्तुल्यमयोरजश्चूर्णितं तक्रादिभिरुपयोजितं कामलादिनाशनम्।

गुडनागरमण्डूरतिलांशान् मानतः समान्॥ १५॥

पिप्पलीद्विगुणान् दद्याद्गुटिकां पाण्डुरोगिणे।

स०-गुडादिकान् समभागान् पिप्पलीद्विगुणानिमां गुटिकां पाण्डुरोगिणे दद्यात्।

ताप्यं दार्व्यास्त्वचं चव्यं ग्रन्थिकं देवदारु च॥ १६॥

व्योषादिनवकं चैतच्चूर्णयेद् द्विगुणं ततः।

मण्डूरं चाञ्जननिभं सर्वतोऽष्टगुणेऽथ तत्॥ १७॥

पृथग्विपक्के गोमूत्रे वटकीकरणक्षमे।

प्रक्षिप्य वटकान् कुर्यात्तान् खादेत्तक्रभोजनः॥ १८॥

एते मण्डूरवटकाः प्राणदाः पाण्डुरोगिणां।

कुष्ठान्यजरकं शोफमूरुस्तम्भरोचकम्॥ १९॥

अर्शांसि कामलां मेहान् प्लीहानं शमयन्ति च।

स०-ताप्यादिकं व्योषादिनवकं च-पूर्वोक्तं, चूर्णयेत्। ततः-तेभ्यो, द्विगुणं मण्डूरमञ्जनसदृशं सर्वेभ्योऽष्टगुणे मूत्रे पृथक् विपक्के च वटकीकरणक्षमे-घने सति, प्रक्षिप्य वटकान् कुर्यात्। तांश्च तक्रप्रधानभोजनः सन् प्राश्नीयात्। एते मण्डूरवटकाः पाण्ड्वामयिनां प्राणादास्तथा कुष्ठादीन् घ्नन्ति।

ताप्याद्रिजतुरौप्यायोमलाः पञ्चपलाः पृथक्॥२०॥

चित्रकत्रिफलाव्योषविडङ्गैः पालिकैः सह।

शर्कराष्टपलोन्मिश्राश्चूर्णिता मधुना द्रुताः॥२१॥

पाण्डुरोगं विषं कासं यक्ष्माणं विषमं ज्वरम्।

कुष्ठान्यजरकं मेहं शोफं श्वासमरोचकम्॥२२॥

विशेषाद्धन्त्यपस्मारं कामलां गुदजानि च।

स०-ताप्यादयः पृथक् पञ्चपलाश्चित्रकादिभिः पालिकैः सह शर्कराष्टपलयुताश्चूर्णीकृता मधुना द्रवीकृताः पाण्डुरोगादीन् घ्नन्ति। विशेषेणापस्मारादींश्च।

कौटजत्रिफलानिम्बपटोलघननागरैः॥२३॥

भावितानि दशाहानि रसैर्द्वित्रिगुणानि वा।

शिलाजतुपलान्यष्टौ तावती सितशर्करा॥२४॥

त्वक्क्षीरीपिप्पलीधात्रीकर्कटाख्याः पलोन्मिताः।

निदिग्ध्याः फलमूलाभ्यां पलं युक्त्या त्रिजातकम्॥२५॥

मधुत्रिपलसंयुक्तान् कुर्यादक्षसमान् गुडान्।

दाडिमाम्बुपयः पक्षिरसतोयसुरासवान्॥२६॥

तान् भक्षयित्वाऽनु पिबेन्निरन्नो भुक्त एव वा।

पाण्डुकुष्ठज्वरश्लीहतमकार्शोभगन्दरम्॥२७॥

हृन्मूत्रपूतिशुक्राग्निदोषशोषगरोदरम्।

कासासृग्दरपित्तासृक्शोफगुल्मगलामयान्॥२८॥

मेहवर्ध्मभ्रमान् हन्युः सर्वदोषहराः शिवाः।

स०-काटजादिभिर्द्रव्यै रसैः-रसतां गतः, क्काथीकृतैरित्यर्थः। शिलाजतुपलान्यष्टौ दशाहानि द्विगुणानि त्रिगुणानि वा भावितानि। अहःशब्दो वारोपलक्षणार्थः। तदयमात्रार्थोऽवतिष्ठते,-शिलाजतुपलाष्टकं केवलं जलधौतं कौटजादिकं तत्तुल्यमष्टगुणिते जले क्कथितं ततोऽष्टभागावशेषरसं गृहीत्वा तेन रसेन दश वारान् द्विगुणान् त्रिगुणान् वा भावयेदिति। तावती-अष्टपलप्रमाणा सितशर्करा, त्वक्क्षीर्यादिकं पलोन्मितं कण्टकार्याः फलमूलयोः पलम्। त्रिजातकं युक्त्या-यावता त्रिजातकेनातिसौगन्ध्यं हीनसौगन्ध्यं वा न स्यात्, एवं न हीनमात्रमत्रैतद्देयमव्यापकत्वात्, न वाऽतिमात्रमप्यतिव्यापकत्वेनायोगार्हत्वात्। मधुनस्त्रिभिः पलैः संयुक्तान् कार्षिकान् गुडान् विदध्यात्। तान् गुडान् भक्षयित्वाऽनु-पश्चात्, दाडिमजलादीनि यथायोगं पिबेत् निरन्नः कृताहारो वा। ते च वटकाः पाण्ड्वादीन् हन्युः। सर्वदोषहराः शिवाश्च स्युः।

द्राक्षाप्रस्थं कणाप्रस्थं शर्करार्धतुलां तथा॥ २९॥

द्विपलं मधुकं शुण्ठीं त्वक्षीरीं च विचूर्णितम्।

धात्रीफलरसद्रोणे तक्षित्वा लेहवत्पचेत्॥ ३०॥

शीतान्मधुप्रस्थयुताद् लिह्यात्पाणितलं ततः।

हलीमकं पाण्डुरोगं कामलां च नियच्छति॥ ३१॥

स०-द्राक्षायाः षोडशपलानि पिप्पल्याश्च। शर्करायाः पलानि पञ्चशत्। यष्ट्यादिकं रजीकृतं द्विपलप्रमाणम्। धात्रीफलरसस्य द्रोणे सर्वमेतत्क्षित्वा लेहमिव पचेत्। तस्माल्लेहाच्छीतात्सतो मधुनः प्रस्थयुतात् पाणितलं-कर्षमात्रं, लिह्यात्। स च लेहो हलीमकादीन्नियच्छति-पराकरोति।

कनीयःपञ्चमूलाम्बु शस्यते पानभोजने।

पाण्डूनां, कामलार्तानां मृद्वीकामलकाद्रसः॥ ३२॥

स०-पाने भोजने च शस्यते ह्रस्वपञ्चमूलजम्। मृद्वीकारस आमलकरसश्च पाण्डुरोगिणां कामलार्तानां च शस्यते।

इति सामान्यतः प्रोक्तं पाण्डुरोगे भिषग्जितम्।

विकल्प्य योज्यं विदुषा पृथग्दोषबलं प्रति॥ ३३॥

स०-इति-एवं, पाण्डुरोगे सामान्येन भिषगजितं-औषधं, प्रोक्तम्। भिषज्धातुः कण्ड्वादौ भिषज्यते स्मक्तः भिषग्जतम्। तदभिज्ञेन वैद्येन विकल्प्य-निरूप्य, पृथग्दोषबलं लक्षणीकृत्य योज्यम्।

स्नेहप्रायं पवनजे तिक्तशीतं तु पैत्तिके।

श्लैष्मिके कटुरूक्षोष्णं विमिश्रं सान्निपातिके॥ ३४॥

स०-पवनजे पाण्डौ स्नेहप्रायं-स्नेहभूयिष्ठं, भेषजम्। तिक्तशीतप्रायं तु पैत्तिके। श्लैष्मिके तु कटुरूक्षोष्णभूयिष्ठम्। सन्निपातिके विमिश्रं चिकित्सितम्।

मृदं निर्यापयेत्कायात्तीक्ष्णैः संशोधनैः पुरः।

बलाधानानि सर्पींषि शुद्धे कोष्ठे तु योजयेत्॥ ३५॥

स०-कायात्-शरीरात्, मृदं-शल्यभूतस्थितां, तीक्ष्णैः संशोधनैः-स्नुहीक्षीरादिभिः, निर्हरेत् पुरः-पूर्वम्। शुद्धे तु कोष्ठे बलाधानानि घृतानि योजयेत्।

तान्येवाह-

व्योषबिल्वद्विरजनीत्रिफलाद्विपुनर्नवम्।

मुस्तान्ययोरजः पाठा विडङ्गं देवदारु च॥ ३६॥

वृश्चिकाली च भार्गी च सक्षीरेस्तैः श्रृतं घृतम्।

सर्वान् प्रशमयत्याशु विकारान् मृत्तिकाकृतान्॥ ३७॥

स०-व्योषादिभिर्घृताच्चतुर्थांशैर्हृ श्रृतानि समेन क्षीरेण तच्चतुर्गुणजलेन घृतं सर्वान् विकारान् मृत्तिकाकृतान् शमयति।

तद्वत्केसरयष्ट्याह्वपिप्पलीक्षीरशाङ्वलैः।

स०-केसरादिभिः पक्वं सर्पिस्तद्वत्-पूर्वगुणम्।

मृद्वेषणाय तल्लोल्ये वितरेद्भावितां मृदम्॥ ३८॥
वेल्लाग्निनिम्बप्रसवैः पाठया मूर्वयाऽथवा।

स०-मृद्वेषणार्थं तस्यां मृदि लौल्ये-लोलुपत्वे सति, वेल्लादिभिर्भावितां मृदं दद्यात्।

मृद्भेदभिन्नदोषानुगमाद्योज्यं च भेषजम्॥ ३९॥

स०-मृदो भेदो-विशेषः कृष्णपाण्डुरादिः, तेन भिन्नो-विशेषितो, यो दोषस्तस्य वातादेर्ज्ञानात्। "मृत्कषायाऽनिलं पित्तमूषरा मधुरा कफम्। दूषयित्वा" (हृ. नि. अ. १३।१३) एवं लक्षणाद्दोषानुगमद्भेषजं योज्यम्। नैवमेव मृद्भक्षणमात्रविज्ञानेन मृन्निर्हरणौषधं चैतद्धेतुविपरीतमेवेत्यवेहि। यतो मृदा हेतुभूतया यः पाण्डुरोग उदभूत तस्य मृन्निर्हरणं विपरीतमेव।

कामलायां तु पित्तघ्नं पाण्डुरोगाविरोधि यत्।

स०-कामलायां पित्तहरमौषधं यत् पाण्डुरोगाविरोधि तद्देयम्।

पथ्याशतरसे पथ्यावृन्तार्धशतकल्कितः॥४०॥

प्रस्थः सिद्धो घृताद्गुल्मकामलापाण्डुरोगनुत्।

स०-पथ्याशतक्काथे पथ्यावृन्तञ्चाशत्कल्कीकृतो घृतप्रस्थः पक्वः कामलादिघ्नः।

आरग्वधं रसेनेक्षोर्विदार्यामलकस्य वा॥४१॥

सत्र्यूषणं बिल्वमात्रं पाययेत्कामलापहम्।

स०-इक्षो रसेन विदार्या रसेनामलकरसेन वा सहत्रिकटुकं पलप्रमाणमारग्वधं कामलापहं पाययेत्।

पिबेन्निकुम्भकल्कं वा द्विगुडं शीतवारिणा॥४२॥

कुम्भस्य चूर्णं सक्षौद्रं त्रैफलेन रसेन वा।

स०-निकुम्भकल्कं वा पलद्वयप्रमाणं शिशिरजलेन पिबेत्। कुम्भचूर्णं क्षौद्रसहितं वा त्रैफलेन क्काथेन पिबेत्।

त्रिफलाया गुडूच्या वा दार्व्या निम्बस्य वा रसम्॥४३॥

प्रातः प्रातर्मधुयुतं कामलार्ताय योजयेत्।

स०-त्रिफलाद्यन्यतमरसं मधुयुतं प्रातः कामलिने योजयेत्।

निशागैरिकधात्रीभिः कामलापहमञ्जनम्॥४४॥

स०-निशादिभिरञ्जनं कामलाहृत्।

तिलपिष्टनिभं यस्तु कामलावान् सृजेन्मलम्।
कफरुद्धपथं तस्य पित्तं कफहरैर्जयेत्॥४५॥

स०-यः पुनः कामलावान् मलं तिलपिष्टसदृशं मुञ्चेत् तस्य कफरुद्धमार्गं तस्यातुरस्य कफघ्नैर्द्रव्यैः पित्तं जयेत्।

रूक्षशीतगुरुस्वादुव्यायामबलनिग्रहैः।
कफसम्मूर्च्छितो वायुर्यदा पित्तं बहिः क्षिपेत्॥४६॥
हारिद्रनेत्रमूत्रत्वक्श्वेतवर्चस्तदा नरः।
भवेत्साटोपविष्टम्भो गुरुणा हृदयेन च॥४७॥
दौर्बल्याल्पाग्निपार्श्वार्तिहिध्माश्वासारुचिज्वरैः।
क्रमेणाल्पेऽनुषज्येत पित्ते शाखासमाश्रिते॥४८॥
रसैस्तं रूक्षकट्वम्लिः शिखितित्तिरिदक्षजैः।
शुष्कमूलकजैर्यूषैः कुलत्थोत्थैश्च भोजयेत्॥४९॥
भृशाम्लतीक्ष्णकटुकलवणोष्णं च शस्यते।
सबीजपूरकरसं लिह्याद्योषं तथाऽऽशयम्॥५०॥
स्वं पित्तमेति तेनास्य शकृदप्यनुरज्यते।
वायुश्च याति प्रशमं सहाटोपाद्युपद्रवैः॥५१॥
निवृत्तोपद्रवस्यास्य कार्यः कामलिको विधिः।

स०-रूक्षादिभिः पवनः कुपितः कफेन मिश्रितो यदा पित्तं बहिः क्षिपेत् तदा हारिद्रनेत्रादिः पुरुषो भवेत् आटोपादिमांश्च। हृदयेन च गुरुणा युक्तः। दौर्बल्यादिभिः क्रमेण कुपितो वायुरल्पे पित्ते शाखासमाश्रितेऽनुषज्येत। अनुषज्येतेति कर्मकर्तरि। तं-तादृशं नरं, रसै रूक्षकद्वह्लैर्मयूरादिमांसजैस्तथा शुष्कमूलकोद्भवैर्यूषैस्तथा कुलत्थोत्थैर्भोजयेत्। भृशाम्लादिकं च भोजनं शस्यते। तथा बीजपूरकरससहितं व्योषं लिह्यात्। एवं कृते सत्यस्य पित्तं स्वमाशयमेति, शकृच्चानुरज्यते, वायुश्च प्रशमं यात्याटोपान्त्रकूजनादिभिरुपद्रवैः सह। अस्य-आतुरस्य, अपगतोपद्रवस्य सतः कामलाविहितो विधिः कार्यः।

गोमूत्रेण पिबेत्कुम्भकामलायां शिलाजतु॥५२॥
मासं माक्षिकधातुं वा किट्टं वाऽथ हिरण्यजम्।

स०-कुम्भकामलायां गोमूत्रेणालोडितं शिलाजतु पिबेत्। धातुमाक्षिकं वा गोमूत्रेण आसं यावत् पिबेत्। हिरण्यजं [किट्टं]-रूप्योत्थं मलं वा, गोमूत्रेण पिबेत्।

गुडूचीस्वरसक्षीरसाधितेन हलीमकी॥५३॥
महिषीहविषा स्निग्धः पिबेद्धात्रीरएन तु।
त्रिवृतां तद्विरिक्तोऽद्यात्स्वादु पित्तानिलापहम्॥५४॥
द्राक्षालेहं च पूर्वोक्तं सर्पींषि मधुराणि च।
यापनान् क्षीरबस्तींश्च शीलयेत्सानुवासनान्॥५५॥
मार्द्वीकारिष्टयोगांश्च पिबेद्युक्त्याऽग्निवृद्धये।
कासिकं चाभयालेहं पिप्पलीं मधुकं बलाम्॥५६॥
पयसा च प्रयुञ्जीत यथा दोषं यथा बलम्।

स०-हलीमकवान् गुडूचीस्वरसक्षीरपक्केन महिषीघृतेन स्निग्धः सन् त्रिवृतां धात्रीरसेन पिबेत्। गुडूचीस्वरसोऽत्र घृताच्चतुर्गुणः क्षीरं घृतसममिति पाकक्रमः। तया-त्रिवृतया, विरिक्ते सति मधुरं वातपित्तघ्नं चाद्यात्। प्रागुक्तं च द्राक्षालेहं (श्लो. २९) भक्षयेत्। मधुरद्रव्यसाधितानि

घृतानि चाद्यात्। यापनान्-प्राणकारिणः (ह्. क. अ. ४।३७) , क्षीरवस्तींश्च शीलयेदनुवासनसहितान्। मार्द्वीकारिष्टयोगांश्च युक्त्या वह्निवृद्धये पिबेत्। अभयालेहं च- आगस्त्यं कासचिकित्सितोक्तं "प्रस्थोन्मिते यवक्काथे विंशतिर्विजयाः" इत्यादि, शीलयेत्। क्षीरेण च पिप्पलीं मधुयष्टिकां बलां च प्रयुञ्जीत यथादोषाद्बलाच्च।

पाण्डुरोगेषु कुशलः शोफोक्तं च क्रियाक्रमम्॥५७॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां चतुर्थे चिकित्सितस्थाने पाण्डुरोगचिकित्सितं नाम षोडशोऽध्यायः॥१६॥

****

स०-पाण्डुरोगेषु शोफचिकित्सितं(तोक्तं) च क्रियाक्रमं सुधीः प्रयुञ्जीत।

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टाङ्गहृदयटीकायां सर्वाङ्गसुन्दराख्यायां चतुर्थे चिकित्सितस्थाने पाण्डुरोगचिकित्सितं नाम षोडशोऽध्यायः समाप्तः॥१६॥

****

सप्तदशोऽध्यायः।

पाण्डुरोगचिकित्सितादनन्तरं शोफचिकित्सितं व्याख्यातुं प्रक्रम्यते। सम्बन्धश्चास्य निदान एवोक्त इत्याह-

अथातः श्वयथुचिकित्सितं व्याख्यास्यामः।

इति ह स्माहुरात्रेयादयो महर्षयः।

(गद्यसूत्रे॥२॥)

सर्वत्र सर्वाङ्गसरे दोषजे श्वयथौ पुरा।

सामे विशोषितो भुक्त्वा लघु कोष्णाम्भसा पिबेत्॥१॥

नागरातिविषादारुविडङ्गेन्द्रयवोषणम्।

अथवा विजयाशोण्ठीदेवदारुपुनर्नवम्॥२॥

नवायसं वा दोषाढ्यः शुद्ध्यै मूत्रहरीतकीः।

वराक्काथेन कटुकाकुम्भायस्त्र्यूषणानि वा॥३॥

अथवा गुग्गुलुं तद्वज्जतु वा शैलसम्भवम्।

स०-सर्वत्र दोषजे श्वयथौ सर्वाङ्गजे तथा सामे विशोषितः सन् लघु भुक्त्वा कोष्णेन जलेन नागरादि पिबेत्। विशोषणमत्रोपवासः। अथवा, विजयादीन् कोष्णाम्भसा पिबेत्। दोषबहुलो नवायसं-पाण्डुरोगोक्तं (हृ. चि. १६।१४), पिबेत्। शुध्यर्थं गोमूत्रेण हरीतकीः शीलयेत्। त्रिफलाक्काथेन सह कटुकात्रिवृतालोहचूर्णकटुकाणि शीलयेत्। गुग्गुलुं वा शिलाजतु वा त्रिफलाक्काथेनैव शीलयेत्।

मन्दाग्निः शीलयेदामगुरुभिन्नविबद्धविट्॥४॥

तक्रं सौवर्चलव्योषक्षौद्रयुक्तं गुडाभयाम्।

तक्रानुपानमथवा तद्वद्वा गुडनागरम्॥५॥

स०-मन्दाग्निरामगुरुभिन्नविबद्धविट् सन् तक्रं सौवर्चलादियुतं शीलयेत्। गुडयुतामभयां तक्रानुपानां वा। तथैव गुडनागरं तक्रानुपानं शीलयेत्।

आर्द्रकं वा समगुडं प्रकुञ्चार्धविवर्धितम्।

परं पञ्चपलं मासं यूषक्षीररसाशनः॥६॥

गुल्मोदरार्शःश्वयथुप्रमेहान्

श्वासप्रतिश्यालसकाविपाकान्।

सकामलाशोषमनोविकारान्

कासं कफं चैव जयेत्प्रयोगः॥७॥

स०-आर्द्रकं वा तुल्यगुडं पलार्धेन प्रतिदिनं वर्धितं परं पञ्चपलं यावत्। एकस्मिन्नेव दिने पलपञ्चकप्रमाणं स्यात्, पुनरपि ह्रासयेदर्धपलं यावत्। एवं मासं यावदेष प्रयोगः। यथोचितं कफपित्तवाताधिको यूषादिभोजी स्यात्। एष च प्रयोगो गुल्मादींश्चतुर्दश कफान्तान् जयेत्।

घृतमार्द्रकनागरस्य कल्क-

स्वरसाभ्यां पयसा च साधयित्वा।

श्वयथुक्षवथूदराग्निसादै-

रभिभूतोऽपि पिबन् भवत्यरोगः॥८॥

स०-घृतमार्द्रकनागरस्य कल्कस्वरसाभ्यां पयसा च साधयित्वा-पक्त्वा, पिबन् शोफादिभिरभिभूतोऽपि निरामयः स्यात्। आर्द्रकनागरमार्द्रकमुच्यते। उपजात्यौपच्छन्दसिके वृत्ते।

निरामो बद्धशमलः पिबेच्छ्वयथुपीडितः।

त्रिकटुत्रिवृतादन्तीचित्रकैः साधितं पयः॥९॥

मूत्रं गोर्वा महिष्या वा सक्षीरं क्षीरभोजनः।

सप्ताहं मासमथवा स्यादुष्ट्रक्षीरवर्तनः॥१०॥

स०-निरामो बद्धपुरीषः शोफार्तः सन् त्रिवृता (त्रिकत्वा)-दिभिः साधितं पयः पिबेत्। गोर्महिष्या वा सम्बन्धि मूत्रं स[क्षीरं] क्षीरभोजनः सन् पिबेत्। तथा, उष्ट्रक्षीरभोजनः पानाहाराभ्यां विना सप्ताहमथवा मासं स्यात्। उष्ट्रक्षीरवर्तन इत्यत्र "कुक्कुठ्यादीनामण्डादिषु" पुंवद्भावो वक्तव्य इत्युष्ट्रीशब्दस्य पुंवद्भावः। केचिदुष्ट्रीक्षीरेति जगुः।

यवानकं यवक्षारं यवानीं पञ्चकोलकम्।

मरिचं दाडिमं पाठां धानकामम्लवेतसम्॥११॥

बालबिल्वं च कर्षांशं साधयेत्सलिलाढके।

तेन पक्वो घृतप्रस्थः शोफार्गोगुल्ममेहहा॥१२॥

स०-यवानकादि कर्षांशं जलाढके पचेत्। तेन-क्काथेन, घृतप्रस्थः पक्वः शोफादिहा स्यात्। ब्रह्मादिशब्दस्य प्रायिकत्वाच्छोफादिशब्दोत्तरादपि हन्तेः क्विप्।

दध्नश्चित्रकमूलाद्वा घृतं तत्तक्रसंयुतम्।

पक्वं सचित्रकं तद्वद्व्रणैः

स०-चित्रकगर्भाद्दध्नः-चित्रकचूर्णमिश्रितात्क्षीराद्यज्जातं दधि तस्मान्मथ्यमानात्, तत्तक्रेण-चित्रकतक्रेण, संयुक्तं पक्वं तद्वत्-यवानकादिघृतसदृशं, गुणैः।

युञ्ज्याच्च कालवित्॥ १३॥

धान्वन्तरं महातिक्तं कल्याणमभयाघृतम्।

स०-कालवित्-अवस्थादोषादिवित्, धान्वन्तरं (हृ. चि. अ. १२।१९), महातिक्तं (हृ. चि. अ. १५।२८) युञ्ज्यात्।

दशमूलकषायस्य कंसे पथ्याशतं पचेत्॥ १४॥

दत्त्वा गुडतुलां तस्मिन् लेहे दद्याद्विचूर्णितम्।

त्रिजातकं त्रिकटुकं किञ्चिच्च यवशूकजम्॥ १५॥

प्रस्थार्धं च हिमे क्षौद्रात्तन्निहन्त्युपयोजितम्।

प्रवृद्धशोफज्वरमेहगुल्म-

काश्यर्यामवाताम्लकरक्तपित्तम्।

वैवर्ण्यमूत्रानिलशुक्रदोष-

श्वासारिचिप्लीहगरोदरं च॥ १६॥

स०-दशमूलकषायस्याढके पथ्याशतं पचेत्। अत्र च सामान्यपरिभाषया क्काथ्यद्रव्यस्य च दशमूलस्य द्वात्रिंशत् पलानि भवन्ति। एवं च तन्त्रान्तरे विरोधः। तथा च तत्रैवं कथ्यते, (च. चि. अ. १२।५०)-"द्विपञ्चमूलस्य तुलाकषाये कंसेऽभयानां च शतं गुडाच्च।" इति। तदेवं विरोधं पश्यन्तो व्याख्यामेवंविधां विद्वांसो विदधति,-दशमूलस्य तुला, तस्याः कषायो दशमूलकषाय इति। मयूरव्यंसकादित्वादुत्तरपदलोपि समासः। एवं दशमूलस्य पलशतं तत्क्काथस्याढके पथ्याशतं पचेत्। गुडतुलां दत्त्वा तस्मिन् लेहे विचूर्णितं त्रिजातकादि दद्यात्। एतेषां च प्रमाणं वासिष्ठलेहवेत् (हृ. चि. अ. ३।१३३) कल्प्यम्। यवक्षारस्य कर्षमात्रं देयम्। तन्त्रान्तरे ह्युक्तम्-"व्योषाच्चतुष्पलं दद्यात्त्रिपलं त्रिसुगन्धतः। कर्षमात्रं यवक्षारात्" इति। शीते

च सति माक्षिकात् प्रस्थार्धं देयम्। तत्-एतत्, उपयोजितं प्रवृद्धशोफादीन् हन्ति। खरनादस्तु जगाद-"दशमूलाढकमभयाशतसंहितं पाचयेदपां द्रोणे। अवशेषितचतुरंशे तस्मिन् पुनः प्रक्षिपेत् पथ्याः॥" इति। उपजातिवृत्तम्।

पुराणयवशाल्यन्नं दशमूलाम्बुसाधितम्॥१७॥

अल्पमल्पपटुस्नेहं भोजनं श्वयथोर्हितम्।

क्षारव्योषान्वितैर्मौद्गैः कौलत्थैः सकणै रसैः॥१८॥

तथा जाङ्गलजैः कूर्मगोधाशल्यकजैरपि।

अनह्नं मथितं पाने मद्यान्यौषधवन्ति च॥१९॥

स०-श्वयथोः पुराणयवादि दशमूलाक्काथसाधितमल्पं तथाऽल्पलवणस्नेहं भोजनं हितम्। कैः स ह? मौद्गै रसैः। किम्भूतैः? क्षारत्र्यूषणयुक्तैः। तथा कौलत्थै रसैः। किम्भूतैः? सपिप्पलीकैः। तथा च मुनिः (च. चि. अ. १२।६२)-"कुलत्थयूषस्तु सपिप्पलीको मौद्गस्तु सत्र्यूषणयावशूकः। रसस्तथा जाङ्गलविष्कराणां सकूर्मगोधाशिखिशल्लकानाम्॥" इति। अत्र च शिखिनो जाङ्गलविष्किरत्वेन गृहीता अपि पथ्यतरत्वप्रतिपादनार्थं पुनरुपात्ताः। तथाऽयमेव तन्त्रकृदष्टाङ्गावतारेऽध्यगीष्ट (?)-"दशमूलाम्भसा सिद्धैर्व्योषक्षाररजोन्वितैः। रसैर्जाङ्गलजैर्मौद्गैः कौलत्थैर्मौलकैरपि॥" इति। तथेत्यादि। तथा जाङ्गलमांसजैस्तथा कच्छपादिजैश्च। पाने मथितमनह्नं मद्यानि च सौषधानि हितानि।

अजाजीशठीजीवन्तीकारवीपौष्करान्निकैः।

बिल्वमध्ययवक्षारवृक्षाम्लैर्बदरोन्मितैः॥२०॥

कृता पेयाऽऽज्यतैलाभ्यां युक्तिभृष्टा परं हिता।

शोफातिसारहृद्रोगगुल्मार्शोल्पाग्निमेहिनाम्॥२१॥

स०-अजाजीप्रभृतिभिः पेया घृततैलाभ्यां युक्त्या भृष्टाऽतिशयेन शोफादिमतां हिता।

गुणैस्तद्वच्च पाठायाः पञ्चकोलेन साधिता।

स०-पञ्चकोलेन साधिता पेया गुणैस्तद्वच्च-पूर्वोक्तगुणा। तथैव पाठायाः साधिता पेया स्यात्।

शैलेयकुष्ठस्थौणेयरेणुकागुरुपद्मकैः॥२२॥
श्रीवेष्टकनखस्पृक्कादेवदारुप्रियङ्गुभिः।
मांसीमागाधिकावन्यधान्यध्यामकवालकैः॥२३॥
चतुर्जातकतालीसमुस्तागन्धपलाशकैः।
कुर्यादभ्यञ्जनं तैलं लेपं स्नानाय तूदकम्॥२४॥

स०-तथा शैलेयादिभिरभ्यञ्जनं तैलं लेपं स्नानार्थमुदकं च कुर्यात्।

स्नानं वा निम्ववर्षाभूनक्तमालार्कवारिणा।

स०-निम्बादिवारिणा च (वा) स्नानं कुर्यात्।

एकाङ्गशोफे वर्षाभूकरवीरककिंशुकैः॥२५॥
विशालात्रिफलारोध्रनलिकादेवदारुभिः।
हिंस्राकोशातकीमाद्रीतालपर्णीजयन्तिभिः॥२६॥
स्थूलकाकादनीशालनाकुलीवृषपर्णिभिः।
वृध्द्यार्द्धिहस्तिकर्णैश्च सुखोष्णैर्लेपनं हितम्॥२७॥

स०-एकाङ्गजे शोफे पुनर्नवादिभिर्जलपिष्टैः सुखोष्णैर्लेपो हितः। इति सामान्येन श्वयथोरुपक्रमः।

अथानिलोत्थे श्वयथौ मासार्धं त्रिवृतं पिबेत्।

तैलमेरण्डजं वातविड्बिबन्धे तदेव तु॥२८॥

प्राग्भक्तं पयसा युक्तं रसैर्वा कारयेत्तथा।

स्वेदाभ्यङ्गान् समीरघ्नान् लेपमेकाङ्गगे पुनः॥२९॥

मातुलुङ्गाग्निमन्थेन शुण्ठीहिंस्रमराह्वयैः।

स०-अनिलजे शोफे पक्षं यावत्त्रिवृतं तथैरण्डतैलं पिबेत्। वातविड्बिबन्धे सति तदेव-पूर्वोक्तमौषधं, प्राग्भक्तं क्षीरेण मांसरसेन वा [युक्तं] पिबेत्। तथा, स्वेदाभ्यङ्गान् वातघ्नान् कारयेत्, 'वैद्यः' इति शेषः। तथा, अनिलोत्थ एकाङ्गगे शोफे मातुलुङ्गादिभिर्लेपं कारयेत्। हिंस्रा-सिंही।

पैत्ते तिक्तं पिबेत्सर्पिर्न्यग्रोधाद्येन वा श्रृतम्॥३०॥

क्षीरं तृड्दाहमोहेषु लेपाभ्यङ्गाश्च शीतलाः।

स०-पित्तश्वयथौ तिक्तकाख्यं घृतं पिबेत्। न्यग्रोधादिगणेन (ह्र. सू. अ. १५।४१) वा श्रृतं पिबेत्। तथा, तृडादिषु क्षीरं पिबेत्। तथा, लेपाभ्यङ्गाः शीता हिताः।

पटोलमूलत्रायन्तीयष्ट्याह्वकटुकाभयाः॥३१॥

दारु दार्वी हिमं दन्ती विशाला निचुलं कणा।

तैः क्काथः सघृतः पीतो हन्त्यन्तस्तापतृड्भ्रमान्॥३२॥

ससन्निपातवीसर्पशोफदाहविषज्वरान्।

स०-पटोलादीनां क्काथो घृतसहितः पीतोऽन्तस्तापतृष्णादीन् हन्ति।

आरग्वधादिना सिद्धं तैलं श्लेष्मोद्भवे पिबेत्॥ ३३॥

स०-कफोद्भवे शोफे आरग्वधादिना सिद्धं तैलं पिबेत्।

स्रोतोविबन्धे मन्देऽग्नावरुचौ स्तिमिताशयः।
क्षारचूर्णासवारिष्टमूत्रतक्राणि शीलयेत्॥ ३४॥

स०-स्रोतोविबन्धे सति वह्नौ च मन्देऽरोचके च सति स्तिमिताशयः सन् क्षारादीन् शीलयेत्।

कृष्णापुराणपिण्याकशिग्रुत्वक्सिकतातसीः।
प्रलेपोन्मर्दने युञ्ज्यात्सुखोष्णा मूत्रकल्किताः॥ ३५॥

स०-कृष्णादीन् कोष्णान् प्रलेन उन्मर्दने च मूत्रकल्कितान् युञ्जीत।

स्नानं मूत्राम्भसी सिद्धे कुष्ठतर्कारिचित्रकैः।
कुलत्थनागराभ्यां वा चण्डाऽगुरु विलेपने॥ ३६॥

स०-मूत्रजले कुष्ठादिभिः सिद्धे स्नानाय हिते। कुलत्थशुण्ठीभ्यां वा क्वथिते गोमूत्रजले हिते। विलेपने चण्डागुरुणी हिते।

कालाजशृङ्गीसरलबस्तगन्धाहयाह्वयाः।
एकैषिका च लेपः स्याच्छ्वयथावेकगात्रगे॥ ३७॥

स०-कालाजश्रृङ्ग्यादय एकाङ्गगे शोफे लेपः स्यात्। काला-नीलिनी। बस्तगन्धा-कारवी। एकैषिका-त्रिवृता।

यथादोषं यथासन्नं शुद्धिं रक्तावसेचनम्।
कुर्वीत, मिश्रदोषे तु दोषोद्रेकबलात्क्रियाम्॥ ३८॥

स०-यथादोषं-दोषानुसारेण, शुद्धिं तथा रक्तावसेचनं यथासन्नं कुर्वीत। संसर्गजे तु यथाभ्यधिकदोषानुसारेण क्रियां कुर्यात्।

अजाजिपाथाघनपञ्चकोल-
व्याघ्रारजन्यः सुखतोयपीताः।
शोफं त्रिदोषं चिरजं प्रवृद्धं
निघ्नन्ति भूनिम्बमहौषधे च॥ ३९॥

स०-अजाज्यादयः कोष्णजलपीताः शोफं त्रिदोषोत्थं चिरकालोत्पन्नं वृद्धिं गतं निघ्नन्ति। भूनिम्बनागरे च 'हतः' इति वचनविपरिणामेन सम्बन्धः। उपजातिवृत्तम्।

अमृताद्वितयं सिवाटिका
सुरकाष्ठं सपुरं सगोजलम्।
श्वयथूदरकुष्ठपाण्डुता-
कृमिमेहोर्ध्वकफानिलापहम्॥ ४०॥

स०-अमृतायुगलादिकं गुग्गुलुसहितं गोमूत्रेण पीतं शोफादीन् हन्ति। वैतालीयम्। "षड्विषमेऽष्टौ समे कलास्ताश्च समे स्युर्नो निरन्तराः। न समाऽत्र पराश्रिता कला वैतालीयेऽन्ते रलौ गुरुः।" (वृ. र. अ. २।१२)।

इति निजमधिकृत्य पथ्यमुक्तं

क्षतजनिते क्षतजं विशोधनीयम्।

स्रुतिहिमघृतलेपसेकरेकै-

र्विषजनिते विषजिच्च शोफ इष्टम्॥४१॥

स०-इति-पूर्वोक्तेन प्रकारेण, निजं शोफं-दोषजमधिकृत्य, [पथ्यं-] चिकित्सितमुक्तम्। क्षतोत्थे शोफे क्षतजं-असृक्, विशोध्यम्। कैः? रक्तस्रावादिभिः। विषजनिते शोफे विषहरमिष्टम्। पुष्पिताग्रा।

ग्राम्याब्जानूपं पिशितमबलं शुषशाकं तिलान्नं

गौडं पिष्टान्नं दधि सलवणं विज्जलं मद्यमम्लम्।

धाना वल्लूरं समशनमथो गुर्वसात्म्यं विदाहि

स्वप्नं चारात्रौ सयथुगदवान् वर्जयेन्मैथुनं च॥४२॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां चतुर्थे चिकित्सितस्थाने श्वयथुचिकित्सितं नाम सप्तदशोऽध्यायः॥१७॥

****

स०-ग्राम्यादिमंसादि शोफी वर्जयेत्। "म्तौ न्यौ यौ ज्ञेया कुसुमितलतावेल्लिताऽक्षर्तुलोकैः।"

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टाङ्गहृदयटीकायां सर्वाङ्गसुन्दराख्यायां चतुर्थे चिकित्सितस्थाने श्वयथुचिकित्सितं नाम सप्तदशोऽध्यायः समाप्तः॥१७॥

****

अष्टादशोऽध्यायः।

अस्मादनन्तरं विसर्पचिकित्सितमुत्सेधसामान्याच्चिकित्सासादृश्याच्च व्याख्यायते-

अथातो विसर्पचिकित्सितं व्याख्यास्यामः।
इति ह स्माहुरात्रेयादयो महर्षयः। (गद्यसूत्रे॥२॥)

आदावेव विसर्पेषु हितं लङ्घनरूक्षणम्।
रक्तावसेको वमनं विरेकः, स्नेहनं न तु॥१॥

स०-विसर्पेषु पुर्वमेव लङ्घनादि हितम्। स्नेहनं तु न हितम्।

प्रच्छर्दनं विसर्पघ्नं सयष्टीन्द्रयवं फलम्।
पटोलपिप्पलीनिम्बपल्लवैर्वा समन्वितम्॥२॥

स०-वमनं विसर्पघ्नं मदनफलं मधुयष्टिकेन्द्रयवान्वितं हितम्। पटोलादिभिर्युतं वा मदनफलं हितम्।

रसेन युक्तं त्रायन्त्या द्राक्षायास्त्रैफलेन वा।
विरेचनं त्रिवृच्चूर्णं पयसा सर्पिषाऽथवा॥३॥
योज्यं, कोष्ठगते दोषे विशेषेण विशोधनम्।

स०-त्रिवृच्चूर्णं त्रायन्त्या रसेन युक्तं द्राक्षारसेन वा त्रिफलारसेन वा विरेचनं योज्यम्, क्षीरेण घृतेन वा त्रिवृच्चूर्णं युक्तम्। कोष्ठगते दोषे विशेषेण शोधनं योज्यम्।

अविशोधस्य दोषेऽल्पे शमनं चन्दनोल्पम्॥४॥

मुस्तनिम्बपटोलं वा पटोलादिकमेव वा।

सारिवामलकोशीरमुस्तं वा क्वथितं जले॥५॥

स०-अशोधनार्हस्य पुंसोऽल्पे दोषे शमनं चन्दनोत्पलं योज्यम्। मुस्तनिम्बपटोलं वा योज्यम्। 'पटोलकटुरोहिणी' (हृ. सू. अ. १५।१५)इत्यादिकं वा योज्यम्। सारिवादिकं वा जले क्वथितम्।

दुरालभां पर्पटकं गुडूचीं विश्वभेषजम्।

पाक्यं शीतकषायं वा तूष्णावीसर्पवान् पिबेत्॥६॥

दार्वीपटोलकटुकामसुरत्रिफलास्तथा।

सनिम्बयष्टीत्रायन्तीः क्वथिता घृतमूर्च्छिताः॥७॥

स०-दुरालभादिकं क्वथितं शीतकषाय वा तृष्णादिमान् पिबेत्। तथा दार्व्यादीन् निम्बादिभिः सह क्वथितान् सर्पिर्विमिश्रितान् पिबेत्।

शाखादुष्टे तु रुधिरे रक्तमेवादितो हरेत्।

त्वङ्मांसस्नायुसंक्लेदो रक्तक्लेदाद्धि जायते॥८॥

स०-रक्ते च शाखादुष्टे सति प्रथमं रुधिरमेव हरेत्। कुतः ? इत्याह-त्वङ्मांसेत्यादि। यस्मात् त्वगादिक्लेदो रक्तक्लेदाज्जायते, [तस्माद्रक्तं निर्हरेत्।]

निरामे श्लेष्मणि क्षीणे वातपित्तोत्तरे हितम्।

घृतं तिक्तं महातिक्तं शृतं वा त्रायमाणया॥९॥

स०-निरामे पुंसि तथा वातपित्ताधिके कफे च क्षीणे घृतं तिक्तकादिकं हितम्। पूर्वं सामान्येन विसर्पिणः स्नेहनं निषिद्धम्, अवस्थाविशेषेण च स्नेहनमिदमुक्तम्, इति पूर्वापरव्याहतत्वमत्र नाशङ्कनीयम्।

निर्हृतेऽस्रे विशुद्धेऽन्तर्दोषे त्वङ्मांससन्धिगे।

बहिःक्रियाः प्रदेहाद्याः सद्यो वीसर्पशान्तये ॥१०॥

स०-रक्ते निर्हृतेऽन्तर्विशुद्धे दोषे त्वङ्मांसाश्रिते सति प्रलेपसेकाद्या बहिःक्रियाः-परिमार्जने विधेयाः, शीघ्रमेव विसर्पशान्तये स्युः।

शताह्वमस्तवाराहीवंशार्तगलधान्यकम्।

सुराह्वा कृष्णगन्धा च कुष्ठं चालेपनं चले॥११॥

स०-शतपुष्पादिकं चले-वातविसर्पे, प्रलेपनं हितम्। आर्तगलो-नीलः सहचरः।

न्यग्रोधादिगणः पित्ते तथा पद्मोत्पलादिकम्।

स०-न्यग्रोधादिगणः (ह्र. सू. अ. १५।४९) पित्तविसर्पे प्रलेपो हितः। तथा पित्तविसर्पे पद्मोत्पलादिकं-दशाग्रन्थ्याख्यं (सङ्ग्रहाख्य) तन्त्रदवधार्यम्। यथा, -षड्वरणाख्यो योगः (सं. चि. अ. २ १)। सङ्ग्रहे चैवं पठ्यते (चि. अ. २ ०)-"पद्मोत्पलशैवालप-ङ्कदूर्वामृणालश्रृङ्गाटककसेरुकशर्कराह्रीबेरचन्दनमुक्तामणिगैरिकपयस्याप्रपौण्डरीकमधुकपद्मक घृतक्षीराणि।" इति।

न्यग्रोधपादास्तरुणाः कदलीगर्भसंयुताः॥ १२॥

बिसग्रन्थिश्च लेपः स्याच्छतधौतघृताप्लुतः।

पद्मिनीकर्दमः शीतः पिष्टं मौक्तिकमेव वा॥ १३॥

शङ्खः प्रवालं शुक्तिर्वा गैरिकं वा घृतान्वितम्।

स०-न्यग्रोधस्य पादास्तरुणाः-अभिनवाः, कदलीगर्भान्विता बिसग्रन्थिश्च लेपोऽयं शतधौतघृतालोडितः। तथा, पद्मिनीपङ्कः शिशिरः, मौक्तिकं वा जलपिष्टम्, शङ्खो वा पिष्टो विद्रुमो वा शुक्तिर्वा, अथवा गैरिकं घृतयुक्तं, लेपो हितः।

त्रिफलापद्मकोशीरसमङ्गाकरवीरकम्॥ १४॥

नलमूलान्यनन्ता च लेपः श्लेष्मविसर्पहा।

स०-त्रिफलादिभिर्लेपः श्लेष्मविसर्पहृत्।

धवसप्ताह्वखदिरदेवदारुकुरण्टकम्॥ १५॥

समुस्तारग्वधं लेपो वर्गो वा वरुणादिकः।

आरग्वधस्य पत्राणि त्वचः श्लेष्मातकोद्भवाः॥ १६॥

इन्द्राणिशाकं काकाह्वा शिरीषकुसुमानि च।

स०-धवादिकं "वरुणसैर्यक" (ह. सू. अ. १५।२१) इत्यादिर्वा कर्णिकारस्य वा पत्राणि श्लेष्मातकत्वचो वा इन्द्राण्यादयो वा लेपः।

सेकव्रणाभ्यङ्गहविर्लेपचूर्णान् यथायथम्॥ १७॥

एतैरेवौषधैः कुर्याद्व्यायौ लेपा घृताधिकाः।

स०-एभिरेव श्लेष्मविसर्पलेपौषधैः सेकादीन् कुर्यात्। व्रणाभ्याङ्गाय हविरिति 'अश्वघासवत्' समासः। वायौ ये लेपा उक्तास्ते घृताधिकाः कार्याः। अधिकशब्दनिर्देशाच्चेदं गमयति,- अन्यत्रापि पित्तविसर्पे कफविसर्पे च ये लेपा उक्तास्तेऽपि स घृताः कार्याः, न त्वघृता इत्यर्थः।

कफस्थानगते सामे पित्तस्थानगतेऽथवा॥ १८॥

अशीतोष्णा हिता रूक्षा रक्तपित्ते घृतान्विताः।

अत्यर्थशीतास्तनवस्तनुवस्त्रान्तरास्थिताः॥ १९॥

योज्याः क्षणे क्षणेऽन्ये मन्दवीर्यास्त एव च।

स०-कफस्थानगते सामे वायौ किञ्चिच्छीतोष्णरूक्षाश्च प्रलेपा हिताः, पित्तस्थानगते च। रक्तपित्ते तु घृतान्विता अत्यन्तशीतास्तनवस्तथा तनुवस्त्रान्तरास्थिताः क्षणे क्षणेऽपरेऽपरे योज्याः। च-शब्दो यस्मादर्थे। यस्मात्त एव पुनः पुनः प्रयुज्यमाना मन्दवीर्याः स्युः।

संसृष्टदोषे संसृष्टमेतत्कर्म प्रशस्यते॥ २०॥

स०-संसृष्टदोषे विसर्पे-उभयरूपे च संसर्गाख्ये सन्निपाताख्ये च, एतत्कर्म-इदं चिकित्सितम्, यत्प्रतिदोषमुक्तं तदेव यथायथं संसृष्टं कृत्वा तत्र प्रशस्यते।

इति सामान्येन संसृष्टदोषचिकित्सितमुक्त्वा वातपित्तजादिष्वग्निविसर्पादिषूपक्रममाह-

शतधौतघृतेनाग्निं प्रदिह्यात्केवलेन वा।

सेचयेद्धृतमण्डेन शीतेन मधुकाम्बुना॥ २१॥

सिताम्भसाऽम्भोदजलैः क्षीरेणेक्षुरसेन वा।

पानलेपनसेकेषु महातिक्तं परं हितम्॥ २२॥

स०-अग्निशब्देनाग्निविसर्प उपलक्ष्यते। तस्य च लक्षणम् (हृ. नि. अ. १३।५०) -"वातपित्ताज्ज्वर" इत्यादि यावत् "दुष्प्रबोधोऽश्नुते निद्रां सोऽग्निवीसर्प उच्यते।" इति। तमग्निविसर्पं शतधौतघृतेन प्रलेपयेत्। सेचयेदित्यादि। अथवा केवलेन घृतमण्डेन सेचयेत्। शिशिरेण मधुयष्टीजलेन वा सेचयेत्। एवं शर्कराजलेन मुस्तजलेन क्षीरेणेक्षुरसेन वेति योज्यम्। पानादिषु महातिक्तं (हृ. चि. अ. १९।८) सुष्ठु हितम्।

ग्रन्थ्याख्ये रक्तपित्तघ्नं कृत्वा सम्यग्यथोदितम्।
कफानिलघ्नं कर्मेष्टं पिण्डस्वेदोपनाहनम्॥२३॥

स०-ग्रन्थविसर्पे रक्तपित्तघ्नं कर्म कृत्वा ततः कफानिलघ्नं कर्म पिण्डस्वेदादिकमिष्टम्।

ग्रन्थिवीसर्पशूले तु तैलेनोष्णेन सेचयेत्।
दशमूलविपक्वेन तद्वन्मूत्रैर्जलेन वा॥२४॥

स०-ग्रन्थिवीसर्पशूले सति दशमूलविपक्वेनोष्णेन तैलेन सेचयेत्। तथैव मूत्रैर्दशमूलविपक्वैरिति वचनविपरिणामेन सम्बन्धः। जलेन वा दशमूलक्वथितेन सेचयेत्।

सुखोष्णया प्रदिह्याद्वा पिष्टया कृष्णगन्धया।
नक्तमालत्वचा शुष्कमूलकैः कलिनाऽथवा॥२५॥

स०-अथवा, कृष्णगन्धया पिष्टया सुखोष्णया प्रदिह्यात्। अथवा, नक्तमालत्वचा पिष्टया सुखोष्णया प्रदिह्यात्। शुष्कमूलकैः पिष्टैः सुखोष्णैरथवा कलिना-बिभीतकेन, सुखोष्णेन लेपयेत्।

दन्ती चित्रकमूलत्वक् सौधार्कपयसी गुडः।

भल्लातकास्थि कासीसं लेपो भिन्द्याच्छिलामपि॥ २६॥

बहिर्मार्गाश्रितं ग्रन्थिं किं पुनः कफसम्भवम्।

दीर्घकालस्थितं ग्रन्थिमेभिर्भिन्द्याच्च भेषजैः॥ २७॥

स०-दन्त्यादिभिर्द्रव्यैर्लेपः शिलामपि भिन्द्यात्। किमुत कफजं बाह्यमार्गाश्रितं ग्रन्थिं लेपो न भिन्द्यात्। चिरकालावस्थितं ग्रन्थिमेभिरेव-पूर्वोक्तैरौषधैः, भिन्द्यात्।

मूलकानां कुलत्थानां यूषैः सक्षारदाडिमैः।

गोधूमान्नैर्यवान्नैर्वा ससीधुमधुशार्करैः॥ २८॥

सक्षौद्रैर्वारुणीमण्डैर्मातुलुङ्गरसान्वितैः।

त्रिफलायाः प्रयोगैश्च पिप्पल्याः क्षौद्रसंयुतैः॥ २९॥

देवदारुगुडूच्योश्च प्रयोगैर्गिरिजस्य च।

मस्तभल्लातसक्तूनां प्रयोगैर्माक्षिकस्य च॥ ३०॥

धूमैर्विरेकैः शिरसः पूर्वोक्तैर्गुल्मभेदनैः।

तप्तायोहेमलवणपाषाणादिप्रपीडनैः॥ ३१॥

स०-मूलकादियूषादिभिः सक्षारदाडिमैर्गोधूमादिभोजनैस्तथा पानैः ससीधुमधुश(शा)र्करैस्तथा सक्षौद्रैर्वारुणीमण्डैर्मातुलुङ्गरसान्वितैस्तथा "त्रिफलायाः प्रयोगैः" इत्यारभ्य यावत् "तप्तायोहेमलवणपाषाणादिप्रपीडनैः।" "दीर्घकालस्थितं ग्रन्थिं भिन्द्यात्" इत्यनुवर्त्य योज्यम्।

आभिः क्रियाभिः सिद्धाभिर्विविधाभिर्बले स्थितः।

ग्रन्थिः पाषाणकठिनो यदि नैवोपशाम्यति॥ ३२॥

अथास्य दाहः क्षारेण शरैर्हेम्नाऽपि वा हितः।

पाकिभिः पाचयित्वा वा पाटयित्वा तमुद्धरेत्॥ ३३॥

स०-आभिः-पूर्वोक्ताभिः, क्रियाभिः सिद्धाभिः-सिद्धर्षिप्रणीतत्वादसंवादिनीभिः, तथा विविधाभिः-अनेकप्रकाराभिः प्रयुक्ताभिः, बले स्थितो ग्रन्थिर्दीर्घकालानुबन्धत्वादतिप्रबृद्धः अत एव पाषाणकठिनो यदि नैवोपशाम्यति। अथ-अनन्तरं, अस्य दाहः क्षारेण हितः, अग्निना शरैर्हेम्नाऽपि वा हितः। अथवा, पाकिभिरौषधैः-बाह्यान्तः शोधनैः, पाचयित्वा पाटयित्वा तं-ग्रन्थिं, उद्वरेत्।

मोक्षयेद्बहुशश्चास्य रक्तमुत्क्लेशमागतम्।
पुनश्चापहृते रक्ते वातश्लेष्मजिदौषधम्॥ ३४॥

स०-अस्य-ग्रन्थेर्ग्रन्थिविसर्पवतो, रक्तमुत्क्लेशमागतं-विकारकारणं प्रत्युन्मुखतां प्राप्तं, बहुशो मोक्षयेत्। पुनश्च रक्तेऽपहृते चातश्लेष्मजिदौषधं तत्र हितम्।

प्रक्लिन्ने दाहपाकाभ्यां बाह्यान्तर्व्रणवत्क्रिया।
दार्वीविडङ्गकम्पिल्लैः सिद्धं तैलं व्रणे हितम्॥ ३५॥
दूर्वास्वरससिद्धं तु कफपित्तोत्तरे घृतम्।

स०-प्रक्लिन्ने सर्वस्मिन् विसर्पे दाहपाकाभ्यां चोपलक्षिते बाह्यान्तर्व्रणवत्क्रिया स्यात्। तथा, दार्व्यादिभिः सिद्धं तैलं व्रणे हितम्। वातप्रधाने विसर्प इत्यर्थाद्गम्यते। तथा, कफपित्तोत्तरे विसर्पे दूर्वास्वरसेन पक्वं घृतं हितम्।

एकतः सर्वकर्माणि रक्तमोक्षणमेकतः॥ ३६॥

स०-एकतः-एकस्मिंश्चिकित्सापक्षे, सर्वकर्माणि-यथानिर्दिष्टानि, रक्तमोक्षणमेकतः-एकस्मिन् पक्षे। एवं विसर्पोद्दिष्टया सर्वचिकित्सया रक्तमोक्षणस्य च विसर्पशमने तुल्यत्वात्।

ननु, कथमेतत्स्यात् ? इत्याह-

विसर्पो न ह्यसंसृष्टः सोऽस्रपित्तेन जायते।

रक्तमेवाश्रयश्चास्य बहुशोऽस्रं हरेदतः॥ ३७॥

स०-यस्माद्विसर्पः सर्वो रक्तपित्तेनासंसृष्टः-असम्बद्धो, न जायते, न कदाचिद्रक्त-पित्ताभ्यामन्तरेणोत्पद्यत इत्यर्थः। अस्य च-विसर्पस्य, रक्तमेवाश्रयो नान्यः। अतः-अस्मात्, बहुशो-बहून्, रक्तमेव हरेत्।

न घृतं बहुदोषाय देयं यन्न विरेचनम्।

तेन दोषो ह्युपस्तब्धस्त्वग्रक्तपिशितं पचेत्॥ ३८॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां चतुर्थे चिकित्सितस्थाने विसर्पचिकित्सितं नामाष्टादशोऽध्यायः॥ १८॥

****

स०-बहुदोषाय विसर्पिणे तद्धृतं न देयं यद्विरेचनं न भवति। पित्तं हि विसर्पे प्राधान्येन चिकित्स्यम्। पित्तस्य च विरेचनमुपक्रमप्रधानमिति। तेन-घृतेन अविरेचनेन, यस्मादुपस्तब्धः-स्तम्भितो दोषः, त्वग्रक्तमांसानि पचेत्। तस्माद्विरेचनकरमेव घृतं योज्यमिति।

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टाङ्गहृदयटीकायां सर्वाङ्गसुन्दराख्यायां चतुर्थे चिकित्सितस्थाने विसर्पचिकित्सितं नामाष्टादशोऽध्यायः समाप्तः॥ १८॥

****

एकोनविंशोऽध्यायः।

अस्मादनन्तरं कुष्ठचिकित्सितमारभ्यते। सम्बन्धश्चास्य निदान एवोक्त इत्याह-

अथातः कुष्ठचिकित्सितं व्याख्यास्यामः।
इति ह स्माहुरात्रेयादयो महर्षयः। (गद्यसूत्रे॥२॥)

त्वग्रक्तमांसादिदूषणात्तत्स्रवणादामयस्वभावाच्च कायकाश्यं कुष्ठिनः प्रायेणावश्यं भावि। अनेनैवानुसारेण वक्ष्यति (श्लो. १६)-"स्नेहैराप्याययेच्चैनं कुष्ठघ्नैरन्तराऽन्तरा।" इत्याह-

कुष्ठिनं स्नेहपानेन पूर्वं सर्वमुपाचरेत्।

स०-कुष्ठवन्तं नरं सर्वमेव स्नेहपानैरुपक्रमेत्-शरीराप्यायनार्थं पूर्वमस्य स्नेहोपयोगो युक्त इत्यर्थः।

तत्र वातोत्तरे तैलं घृतं वा साधितम् हितम्॥१॥
दशमूलामृतैरण्डशार्ङ्गेष्टामेषश्रृङ्गिभिः।

स०-तस्मिन् वातोत्तरे कुष्ठे दशमूलादिभिः पक्वं तैलं घृतं वा हितम्।

पटोलनिम्बकटुकादार्वीपाठादुरालभाः॥२॥
पर्पटं त्रायमाणां च पलांशं पाचयेदपाम्।
द्व्याढकेऽष्टांशशेषेण तेन कर्षोन्मितैस्तथा॥३॥

त्रायन्तीमुस्तभूनिम्बकलिङ्गकणचन्दनैः।

सर्पिषो द्वादशपलं पचेत्तत्तिक्तकं जयेत्॥४॥

पित्तकुष्ठपरीसर्पपिटिकादाहतृड्भ्रमान्।

कण्डुपाण्ड्वामयान् गण्डान् दुष्टनाडीव्रणापचीः॥५॥

विस्फोटविद्रधीगुल्मशोफोन्मादमदानपि।

हृद्रोगतिमिरव्यङ्गग्रहणीश्वित्रकामलाः॥६॥

भगन्दरमपस्मारमुदरं गरम्।

अर्शोऽस्रपित्तमन्यांश्च सुकृच्छ्रान् पित्तजान् गदान्॥७॥

स०-पटोलादि पलांशं द्व्याढके पाचयेत्। तेनाष्टभागशेषेण क्काथेन तथा कर्षमात्रैस्त्रायन्त्यिद्भिर्घृतस्य पलानि द्वादश पचेत्। तदेवं तिक्तकाख्यं सर्पिः पित्तकुष्ठादीन् जयेत्। अपरानपि पित्तजानामयान् हन्ति। एतैश्च द्वादशपलमात्रं पक्कं प्रकृष्टगुणं स्यादिति दृष्टं तत्त्वदर्शिभिर्महर्षिभिः।

सप्तच्छदः पर्पटकः शम्याकः कटुका वचा।

त्रिफला पद्मकं पाठा रजन्यौ सारिवे कणे॥८॥

निम्बचन्दनयष्ट्याह्वविशालेन्द्रयवामृताः।

किराततिक्तकं सेव्यं वृषो मूर्वा शतावरी॥९॥

पटोलातिविषामुस्तात्रायन्तीधन्वयासकम्।

तैर्जलेऽष्टगुणे सर्पिर्द्विगुणामलकीरसे॥१०॥

सिद्धं तिक्तान्महातिक्तं गुणैरभ्यधिकं मतम्।

स०-सप्तच्छदादिभिः कल्कैर्घृतादष्टगुणे जले द्विगुणामलकरसे सर्पिः पक्कं महातिक्तसंज्ञं गुणैश्चाभ्यधिकं तिक्तान्मतम्, मुनीनामिति शेषः।

कफोत्तरे घृतं सिद्धं निम्बसप्ताह्वचित्रकैः॥११॥

कुष्ठोषणवचाशालप्रियालचतुरङ्गुलैः।

स०-कफोत्तरे निम्बादिभिः कल्कीकृतैः पक्वं घृतं पिबेत्।

सर्वेषु चारुष्करजं तौवरं सार्षपं पिबेत्॥१२॥

स्नेहं घृतं वा कृमिजित्पथ्याभल्लातकैः श्रृतम्।

स०-सर्वेषु च कुष्ठेषु भल्लातकोत्थं तुवरजं सर्षरजं वा स्नेहमथवा घृतं कृमिजिदादिभिः साधितं पिबेत्।

आरग्वधस्य मूलेन शतकृत्वः श्रृतं घृतम्॥१३॥

पिबेन् कुष्ठं जयत्याशु भजन् सखदिरं जलम्।

स०-कर्णिकारस्य मूलेन शतवारान् घृतं पक्वं पिबन् कुष्ठं जयति खदिरयुतं पानीयं सेवमानः।

एभिरेव यथास्वं च स्नेहैरभ्यञ्जनं हितम्॥१४॥

स०-एभिरेव पूर्वोक्तैः स्नेहैर्यथायोगमभ्यञ्जनं हितम्।

स्निग्धस्य शोधनं योज्यं विसर्पे यदुदाहृतम्।

स०-स्निग्धस्य कुष्ठिनः शोधनं योज्यं यद्विसर्पे कथितम्। तत्र चोक्तम् (हृ. चि. अ. १८।३) -"रसेन युक्तं त्रायन्त्या द्राक्षायाः" इत्यादि।

ललातहस्तपादेषु शिराश्चास्य विमोक्षयेत्॥ १५॥

प्रच्छानमल्पके कुष्ठे शृङ्गाद्याश्च यथायथम्।

स०-ललाटादिष्टु चास्यातुरस्य बलापेक्षी वैद्यो शिरां विमोक्षयेत्। अत्यल्पे कुष्ठे प्रच्छानं स्यात्। यथायथं-यथास्वं, शृङ्गद्याश्च स्युः।

स्नेहैराप्याययेच्चैनं कुष्ठघ्नैरन्तराऽन्तरा॥ १६॥

मुक्तरक्तविरिक्तस्य रिक्तकोष्ठस्य कुष्ठिनः।

प्रभञ्जनस्तथा ह्यस्य न स्याद्देप्रभञ्जनः॥ १७॥

स०-अन्तराऽन्तरा स्रुतरक्तं कृतविरेकं च कुष्ठघ्नैः स्नेहैरेनं-कुष्ठिनं, आप्याययेत्। एवं कृते सत्यस्य-कुष्ठिनो, मुक्तरक्तस्य तथा विरिक्तस्यात एव रिक्तकोष्ठस्य प्रभञ्जनो देहस्य प्रभञ्जनो-विघातको, न स्यात्।

वासामृतानिम्ववरापटोल-

व्याघ्रीकरञ्जोदकल्कपक्वम्।

सर्पिर्विसर्पज्वरकामलास्र-

कुष्ठापहं वज्रकमामनन्ति॥ १८॥

स०-वासादिभिः सिद्धं सर्पिर्विसर्पादिघ्नम्। एतच्च वज्रकसंज्ञं घृतं वदन्ति। इन्द्रवज्रावृत्तम्।

त्रिफलात्रिकटुद्विकण्टकारी-

कटुकाकुम्भनिकुम्भराजवृक्षैः।

सवचातिविषाग्निकैः सपाठैः

पिचुभागैर्नववज्रदुग्धमुष्ट्या॥ १९॥

पिष्टैः सिद्धं सर्पिषः प्रस्थमेभिः

क्रूरे कोष्ठे स्नेहनं रेचनं च।

कुष्ठश्वित्रप्लीहवर्ध्माश्मगुल्मान्

हन्त्यात्कृच्छ्रांस्तन्महावज्रकाख्यम्॥२०॥

स०-त्रिफलादिभिः कार्षिकैः प्रत्यग्रस्नुहीक्षीरपलेन सह पिष्टैरेभिरौषधैर्घृतप्रस्थं चतुर्गुणजलसिद्धं क्रूरकोष्ठे स्नेहनं स्यात् रेचनं च। तथा, कुष्ठादीन् दारुणान् हन्यात्। तच्च महावज्रकं नाम। औपच्छन्दसिकशालिन्यौ वृत्ते।

दन्त्याढकमपां द्रोणे पक्त्वा तेन घृतं पचेत्।

धामार्गवपले पीतं तदूर्ध्वाधो विशुद्धिकृत्॥२१॥

स०-दन्त्याश्चतुःषष्टिपलानि जलद्रोणे पचेत्। तेन क्काथेन राजकोशातकीपले घृतं पचेत्। तत्पीतमूर्ध्वाधो विशुद्धिकरम्।

आवर्तकीतुलां द्रोणे पचेदष्टांशशेषितम्।

तन्मूलैस्तत्र निर्यूहे घृतप्रस्थं विपाचयेत्॥२२॥

पीत्वा तदेकदिवसान्तरितं सुजीर्णे

भुञ्जीत कोद्रवमसंस्कृतकाञ्जिकेन।

कुष्ठं किलासमपचीं च विजेतुमिच्छन्

इच्छन् प्रजां च विपुलां ग्रहणं स्मृतिं च॥२३॥

स०-आवर्तक्याः शतं द्रोणेऽपामष्टांशशेषितं पचेत्। त्वक्काथे, तस्या मूलैः कल्कीकृतैर्घृतप्रस्थं विपाचयेत्। तद्धृतमेकदिवसान्तरितं पीत्वा सुष्ठु जीर्णे च घृते कोद्रवमसंस्कृतेन काञ्जिकेन सह

भुञ्जीत। कुष्ठादीन् विजिगीषुः, प्रजां च विस्तीर्णामिच्छन्, ग्रहणं स्मृतिं चाभिलषन्। वसन्ततिलकावृत्तम्।

यतेर्लेलीतकवसा क्षौद्रजातीरसान्विता।
कुष्ठघ्नी समसर्पिर्वा सगायर्यसनोदका॥२४॥

स०-यतेः-ब्रह्मचर्यास्थितस्य, लेलीतकवसा माक्षिकजातीरसयुता कुष्ठघ्नी स्यात्। लेलीतकवसा-सौवर्चललवणतैलम्, गन्धकमेके। जातीरसो-बोलः। अथवा, समघृता खदिरासनोदकसहिता कुष्ठघ्नी स्यात्।

शालयो यवगोधूमाः कोरदूषाः प्रियङ्गवः।
मुद्गा मसूरास्तुवरी तिक्तशाकानि जाङ्गलम्॥२५॥
वरापटोलखदिरनिम्बारुष्करयोजितम्।
मद्यान्यौषधगर्भाणि मथितं चेन्दुराजिमत्॥२६॥
अन्नपानं हितं कुष्ठे, न त्वम्ललवणोषणम्।
दधिदुग्धगुडानूपतिलमाषांस्त्यजेत्तराम्॥२७॥

स०-शाल्यादिकमन्नपानं च वरादिभिर्योजितं कुष्ठे हितम्। इन्दुराजिः-बाकुची। अम्लादिकमनपानं न हितं कुष्ठे स्यात्। तथा दध्यादीनतिशयेन वर्जयेत्। प्रतिरोगं च यन्निदानवर्जनं तच्चिकित्सितमेवेत्यवगन्तव्यम्।

पटोलमूलत्रिफलाविशालाः
पृथक्त्रिभागापचितात्रिशाणाः।
स्युस्त्रायमाणा कटुरोहिणी च।
भागार्धिके नागरपादयुक्ते॥२८॥

एतत्पलं जर्जरितं विपक्वं

जले पिबेद्दोषविशोधनाय।

जीर्णे रसैर्धन्वमृगद्विजानां

पुराणशाल्योदनमाददीत॥२९॥

कुष्ठं किलासं ग्रहणीप्रदोष-

मर्शांसि कृच्छ्राणि हलीमकं च।

षड्रात्रयोगेन निहन्ति चैतद्

हृद्वस्तिशूलं विषमज्वरं च॥३०॥

स०-पृथक्-प्रत्येकं, त्रिभागोनापचितो-न्यूनः, तृतीयः शाणो येषां ते पटोलादयः पञ्च पृथक्त्रिभागापचितत्रिशाणाः। लोकेऽपि चैवं प्रयुक्ता एव। यथा,-त्रिभागोनास्त्रयो द्रम्मा देया इति। अत्र हि द्वौ द्रम्मौ तृतीयश्च द्रम्मस्त्रिभागेन हीन इति गम्यते। तदेवं पटोलस्य शाणौ द्वौ धानकाश्च चतस्रो भवन्ति। षड्वानको हि शाणः। एवं पटोलमूलादिद्रव्याणां पञ्चानां प्रत्येकं षोडशधानकाः स्युः। स्यत्त्रायमाणा कटुरोहिणी च भागार्धिके। किम्भूते ? नागरपादयुक्ते सत्यौ, न तु केवले। तदयमर्थः,-त्रायन्त्या धानकाः षट्, कटुकाया धानकाः षट्, नागरस्य धानकाश्चतस्रः। षोडशधानका ह्यत्र मूलद्रव्यभागः। तदेवं पटोलादीनां पञ्चानामशीतिर्धानकाः, त्रायन्तीकटुकयोः शुण्ठीपादयुतयोः षोडशधानकाः, इति षण्णवतिधानकाभिः पलं भवति। तदिदं पलं जर्जरितं किञ्चिच्चूर्णितं जले विपक्वं दोषविशुद्ध्यर्थं पिबेत्। जीर्णे सत्यौषधे जाङ्गलमृगपक्षिणां मांसरसैः सह पुराणशाल्योदनमश्नीयात्। उपजाती वृत्ते। एतच्च पीतं षड्रात्रयोगेन-षड्दिनान्युपयुक्तं, कुष्ठादीन् हन्ति। इन्द्रवज्रावृत्तम्।

विडङ्गसारामलकाभयानां

पलत्रयं, त्रीणि पलानि कुम्भात्।

गुडस्य च द्वादश, मासमेष

जितात्मनां हन्त्युपयुज्यमानः॥३१॥

कुष्ठश्वित्रश्वासकासोदरार्शो-

मेहप्लीहग्रन्थिरुगजन्तुगुल्मान्।

सिद्धं योगं प्राह यक्षो मुमुक्षो-

र्भिक्षोः प्राणान् माणिभद्रः किलेमम्॥ ३२॥

स०-विडङ्गसारादीनां समुदितानां पलत्रयम्, त्रीणि पलानि कुम्भात्-त्रिवृतायास्त्रीणि पलानि, गुडस्य च द्वादशपलानि। एष प्रयोगो जितेन्द्रियाणां मासमुपयुज्यमानो वक्ष्यमाणान् गदान् हन्ति। "उपेन्द्रवज्रा तु जतौ जगौ गः।" मासशब्दोपादानाच्च प्रत्यहमस्माद्योगादर्धपलं धानकानवरक्तिकात्रयसहितमभ्यवहरणीयत्वेनात्रावतिष्ठते। अन्यत्रापि प्रदेशे य एवंविधो निर्देशस्तत्र परिमाणकल्पनायामयमेव न्यायोऽनुमन्तव्यः। मनिभद्राख्यो यक्षो भिक्षोः प्राणान् मुमुक्षोः-जीवितं जिहासोः, इमं सिद्धं योगं प्राणकरं प्राह,-जगादेत्यर्थः। अत्र भूते काले प्राहेति, तथा साधु किलेत्यागमिकत्वं च सूचयति। शालिनीवृत्तम्।

भूनिम्बनिम्बत्रिफलापद्मकातिविषाकणाः।

मूर्वापटोलीद्विनिशापाठातिक्तेन्द्रवारुणीः॥ ३३॥

सकलिङ्गवचास्तुल्या द्विगुणाश्च यथोत्तरम्।

लिह्याद्दन्तीत्रिवृद्ब्राह्मीश्चूर्णिता मधुसर्पिषा॥ ३४॥

कुष्ठमेहप्रसुप्तीनां परमं स्यात्तदौषधम्।

स०-भूनिम्बादयस्तुल्या दन्त्यादयश्च यथोत्तरं द्विगुणाश्चूर्णिता मधुसर्पिषा लिह्यात्। कुष्ठादीनामेतत् परमं भेषजम्।

वराविडङ्गकृष्णा वा लिह्यात्तैलाज्यमाक्षिकैः॥ ३५॥

स०-त्रिफलादीन् वा तैलघृतमाक्षिकैर्लिह्यात्।

काकोदुम्बरिकावेल्लनिम्बाब्दव्योषकल्कवान्।

हन्ति वृक्षकनिर्यूहः पानात्सर्वांस्त्वगामयान्॥ ३६॥

स०-काकोदुम्बरिकादिकल्कवान् वृक्षकक्काथः पानात्सर्वान् त्वग्रोगान् हन्ति। काकोदुम्बरिका-फल्गुः। वृक्षको-वत्सकः।

कुटजाग्निनिम्बनृपतरुखदिरासनसप्तपर्णनिर्यूहे।

सिद्धा मधुघृतयुक्ताः कुष्ठघ्नीर्भक्षयेदभयाः॥ ३७॥

स०-कुटजादिक्काथे सिद्धाः पक्का हरीतकीर्मधुघृतसंयुक्ताः कुष्ठनुदो भक्षयेत्। आर्यावृत्तम्।

दार्वीखदिरनिम्बानां त्वक्क्काथः कुष्ठसूदनः॥ ३७ १/२॥

स०-दार्व्यादीनां त्वक्क्काथः कुष्ठनाशनः स्यात्।

निशोत्तमानिम्बपटोलमूल-
तिक्तावचालोहितयष्टिकाभिः।
कृतः कषायः कफपित्तकुष्ठं
सुसेवितो धर्म इवोच्छिनत्ति॥ ३८॥
एभिरेव च श्रृतं घृतमुख्यं
भेष्जैर्जयति मारुतकुष्ठम्।
कल्पयेत्खदिरनिम्बगुडूची-
देवदारुरजनीः पृथगेवम्॥ ३९॥

स०-निशादिभिः कषायः कृतः कफपित्तजं कुष्ठमुद्दलयति। सुष्ठु सेवितो यथा धर्मः। एभिरेव-पूर्वोक्तैरौषधैः, पक्वं वरं घृतं वातकुष्ठं जयति। एवं-अनयैव कल्पनया, पृथक् खदिरादीन् कल्पयेत्। उपजातिस्वागते वृत्ते।

पाठादार्वीवह्निघुणेष्टाकटुकाभि-
मूत्रं युक्तं शक्रयवैश्चोष्णजलं वा।
कुष्ठी पीत्वा मासमरुक् स्याद्वुदकीली
मेहीशोफी पाण्डुरजीर्णी कृमीमांश्च॥४०॥

स०-पाठादिभिरिन्द्रयवैश्च गोमूत्रं युक्तमथवोष्णजलं मासं पीत्वा कुष्ठी नीरुक् स्यात्। अर्शसादिश्च। "वेदै रन्ध्रैर्मतौ यसगा मत्तमयूरम्।" (वृ. र. अ. ३।७२)।

लाक्षादन्तीमधुरसवराद्वीपिपाठाविडङ्ग-
प्रत्यक्पुष्पीत्रिकटुरजनीसप्तपर्णाटरूषम्।
रक्ता निम्बं सुरतरु कृतं पञ्चमूल्यौ च चूर्णं
पीत्वा मासं जयति हितभुग्गव्यमूत्रेण कुष्ठम्॥४१॥

स०-लाक्षादिचूर्णं गोमूत्रेण मासं पीत्वा हितभोजी सन् कुष्ठं जयति। रक्ता-मञ्जिष्ठा। सुरतरुशब्दस्य नपुंसकत्वमौषधवाचित्वाल्लोकाश्रयत्वाल्लिङ्गस्येतिवा। पञ्चमूल्यौ-देशमूलमित्यर्थः। "मन्दाक्रान्ता मभनततगा गः समुद्रर्तुलोकैः।"

निशाकणानागरवेल्लतौवरं
सवह्निताप्यं क्रमशो विवर्धितम्।
गवाम्बुपीतं वटकीकृतं तथा
निहन्ति कुष्ठानि सुदारुणान्यपि॥४२॥

स०-निशादिकं क्रमेण विवर्धितं गोमूत्रेण पीतमथवा वटकीकृतं कुष्ठानि सुकृच्छ्राण्यपि निहन्ति। "उशन्ति वंशस्थमिदं जतौ जरौ।"

त्रिकटूत्तमातिलारु-

ष्करा ज्यमाक्षिकसितोपलाविहिता।

गुलिका रसायनं कु-

ष्ठजिच्च वृष्या च सप्तसमा॥४३॥

स०-त्रिकटुकादिभिर्गुलिका विहिता रसायनं कुष्ठह्रद् वृष्या च स्यात्। एवं च सप्तसमाख्या। त्रिकटुकत्रिफले ह्यत्र समुदायरूपत्वाद् द्वे एव कल्पिते। "आर्या विपुला तु याऽन्यथा पादभाक्।"

चान्द्रशकलाग्निरजनी-

विडङ्गतुवरास्थ्यरुष्करत्रिफलाभिः।

वटका गुडांशक्लृप्ताः

समस्तकुष्ठानि नाशयन्त्यभ्यस्ताः॥४४॥

स०-चन्द्रशकलादिभिर्वटका गुडांशेन क्लृप्ताः-शीलिताः, निःशेषकुष्ठानि घ्नन्ति। चन्द्रशकला-बाकुची। आर्यागीतिः।

विडङ्गभल्लातकबाकुचीनां

सद्वीपिवाराहिहरीतकीनाम्।

सलाङ्गलीकृष्णतिलोपकुल्या

गुडेन पिण्डी विनिहन्ति कुष्ठम्॥४५॥

स०-विडङ्गादीनां चूर्णेन गुडेन पिण्डी लाङ्गलिकाद्यन्विता कुष्ठं विजयते।

शशाङ्कलेखा सविडङ्गसारा

अपिप्पलीका सहुताशमूला।

सायोमला सामलका अतैला

कुष्ठानि कृच्छ्राणि निहन्ति लीढा॥४६॥

स०-शशाङ्कलेखा विडङ्गादिभिः सह तैलेन लीढा कृच्छ्राणि कुष्ठानि विनाशयति। उपजातिवृत्तम्(त्ते)।

पथ्यातिलगुडैः पिण्डी कुष्ठं सारुष्करैर्जयेत्।

गुडारुष्करजन्तुघ्नसोमराजीकृताऽथवा॥४७॥

स०-पथ्यादिभिः सभल्लातकैः पिण्डी कुष्ठं जयेत्। गुडादिभिर्वा कृता पिण्डी कुष्ठं हन्ति।

विडङ्गाद्रिजतुक्षौद्रसर्पिष्मत्खादिरं रजः।

किटिभश्चित्रदद्रुघ्नं खादेन्मितहिताशनः॥४८॥

स०-खदिरचूर्णं विडङ्गादियुतं मितहितभोजनः किटिभादिघ्नं खादेत्।

सितातैलकृमिघ्नानि धात्र्ययोमलपिप्पलीः।

लिहानः सर्वकुष्ठानि जयत्यतिगुरूण्यपि॥४९॥

स०-सितादीनि लिहानोऽशेषकुष्ठानि कृच्छ्राण्यपि जयति।

मुस्तं व्योषं त्रिफला मञ्जिष्ठा दारु पञ्चमूले द्वे।

सप्तच्छदनिम्बत्वक् सविशाला चित्रको मूर्वा॥५०॥

चूर्णं तर्पणभागैर्नवभिः संयोजितं समध्वंशम्।

नित्यं कुष्ठनिबर्हणमेतत्प्रायोगिकं खादन्॥५१॥

श्वयथुं सपाण्डुरोगं श्वित्रं ग्रहणीप्रदोषमर्शांसि।

वर्धभगन्दरपिडकाकण्डूकोठापचीर्हन्ति॥५२॥

स०-मुस्तादिकं समभागं सक्तुभागैर्नवभिः संयोजितं मध्वंशेन युतमेतच्चूर्णं प्रायोगिकं-प्रयोगयोग्यं, कुष्ठघ्नं सततं खादेत्। आर्यास्तिस्रः।

रसायनप्रयोगेण तुवरास्थीनि शीलयेत्।

भल्लातकं बाकुचिकां वह्निमूलं शिलाह्वयम्॥५३॥

स०-रसायनोक्तेन विधिना तुवरास्थीनि (हृ. ऊ. अ. ३९।८४), शीलयेत्। भल्लातकं वा (हृ. उ. अ. ३९।७५), सोमराजीं वा (हृ. उ. अ. ३९।१०७), चित्रकमूलं वा (हृ. उ. अ. ३९।६३) , शिलाजतु वा (हृ. उ. अ. ३९।१३७)।

इति दोषे विजितेऽन्तस्-

त्वक्स्थे शमनं बहिः प्रलेपादि हितम्।

तीक्ष्णालेपोत्क्लिष्टं

कुष्ठं हि विवृद्धिमेति मलिने देहे॥५४॥

स०-इति-एवंप्रकारेण, अन्तर्विजिते दोषेऽत एव त्वक्स्थे बहिः प्रलेपादि हितम्। आदिशब्देन स्नानादिपरिग्रहः। ननु, बहिर्भागस्थं कुष्ठं किमिति पूर्वमेव प्रलेपादिना न जीयते ? इत्याह-

तीक्ष्णेत्यादि। यस्मात्तीक्ष्णेन लेपेनोत्क्लिष्टं-उत्क्लेशं प्रापितं, कुष्ठं मलिने-सदोषे, काये विवृद्धिं याति। तस्मादन्तःशुद्धे काये प्रलेपादिकं हितम्। आर्यागीतिः।

स्थिरकठिनमण्डलानां कुष्ठानां पोटलैर्हितः स्वेदः।

स्विन्नोत्सनं कुष्ठं शस्त्रैर्लिखितं प्रलेपनैर्लिम्पेत्॥५५॥

स०-स्थिराणि कठिनानि च मण्डलानि येषां कुष्ठानां तेषां पोटलैः स्वेदो हितः। स्विन्नोत्सन्नं कुष्ठं शस्त्रैर्लिखितं प्रलेपैर्लिम्पेत्। गीतिरार्या।

येषु न शस्त्रं क्रमते स्पर्शेन्द्रियनाशनेषु कुष्ठेषु।

तेषु निपात्यः क्षारो रक्तं दोषं च विस्राव्य॥५६॥

स०-येषु कुष्ठेषु स्पशन्द्रियनाशनेषु शस्त्रं न क्रमते, तेषु रक्तं दोषं च विस्राव्य क्षारो निपातनीयः। क्रमत इति "वृत्तिसर्ग" इत्यादिना तड्।

लेपोऽतिकठिनपुरुषे सुप्ते कुष्ठे स्थिरे पुराणे च।

पीतागदस्य कार्यो विषैः समन्त्रोऽगदैश्चानु॥५७॥

स०-पाषाणवत्कठिने तथा पुरुषस्पर्शे तथा सुप्ते स्थिरीभूते तथा पुराणे च कुष्ठे सत्यातुरस्योपयुक्तागदस्य विषैर्मन्त्रसहितैर्ले(तो ले)पः कार्यः। अनु-पश्चात्, अगदैश्च लेपः।

स्तब्धानि सुप्तसुप्तान्यस्वेदनकण्डुलानि कुष्ठानि।

घृष्टानि शुष्कगोमयफेनकशस्त्रैः प्रदेह्यानि॥५८॥

स०-कुष्ठानि स्तब्धानि तथाऽतिसुप्तानि तथाऽस्वेदनानि कण्डूवन्ति च शुष्कगोमयादिभिघृष्टान्यनन्तरं प्रलेप्यानि।

मुस्ता त्रिफला मदनं करञ्ज आरग्वधः कलिङ्गयवाः।
सप्ताह्वकुष्ठफलिनीदार्व्यः सिद्धार्थकं स्नानम्॥५९॥
एष कषायो वमनं विरेचनं वर्णकस्तथोद्वर्षः।
त्वग्दोषकुष्ठशोफप्रबाधनः पाण्डुरोगघ्नः॥६०॥

स०-मुस्तादयः स्नानं स्यात्। एष एव कषायो वमनं [विरेचनं] वर्णकरस्तथोद्वर्षस्त्वग्दोषादिप्रबाधनः पाण्डुरोगहृच्च स्यात्।

करवीरनिम्बकुटजाच्छम्याकाचित्रकाच्च मूलानाम्।
मूत्रे दर्वीलेपी क्काथो लेपेन कुष्ठघ्नः॥६१॥

स०-करवीरमूलादिना चतुर्गुणे गोमूत्रे क्वथिते दर्वीलेपी क्काथो लेपेन कुष्ठघ्नः-कुष्ठापहः।

श्वेतकरवीमूलं कुटजकरञ्जात्फलं त्वचो दार्व्याः।
सुमनःप्रवालयुक्तो लेपः कुष्ठापहः सिद्धः॥६२॥

स०-सितकरवीरमूलादयः सुमनःपल्लवयुतो लेपो निश्चितं कुष्ठघ्नः।

शैरीषी त्वक् पुष्पं कार्पास्या राजवृक्षपत्राणि।
पिष्टा च काकमाची चतुर्विधः कुष्ठहा लेपः॥६३॥
स०-शिरीषत्वगादिलेपश्चतुःप्रकारः कुष्ठजित्। आर्या अष्टौ।

व्योषसर्षपनिशागृहधूमै-

र्यावशूकपटुचित्रककुष्ठैः।

कोलमात्रगुटिकाऽर्धविषांशा

श्चित्रकुष्ठहरणो वरलेपः॥६४॥

स०-व्योषादिभिर्द्रव्यैः समांशैस्तदर्धविषोपेतैः कोलप्रमाणावटिका लेपतः श्वित्रं कुष्ठं हन्ति। [स्वागतावृत्तम्।]

निम्बं हरिद्रे सुरसं पटोलं

कुष्ठाश्वगन्धे सुरदारु शिग्रुः।

ससर्षपं तुम्बरुधान्यवन्यं

चण्डा च चूर्णानि समानि कुर्यात्॥६५॥

तैस्तक्रपिष्टैः प्रथमं शरीरं

तैलाक्तमुद्वर्तयितुं यतेत।

तथाऽस्य कण्डूः पिटिकाः सकोठाः

कुष्ठानि शोफाश्च शमं व्रजन्ति॥६६॥

स०-पूर्वं तैलाब्यक्तं शरीरं निम्बादिभिः समभागेन चूर्णीकृतैरुद्वर्तनार्थं यत्नं कुर्यात्। तथा-एवं कृते, अस्य-आतुरस्य, कण्ड्वादयः शाम्यन्ति। उस्वर्तनानन्तरमुष्णजलस्नानं कार्यम्।

मुस्तामृतासङ्गकटङ्कटेरी-

कासीसकम्पिल्लककुष्ठरोध्राः।

गन्धोपलः सर्जरसो विडङ्गं

मनःशिलाले करवीरकत्वक्॥६७॥

तैलाक्तगात्रस्य कृतानि चूर्णा-

न्येतानि दद्यादवचूर्णनार्थम्।

दद्रूः सकण्डूः किटिभानि पामा

विचर्चिका चेति तथा न सन्ति॥६८॥

स०-मुस्तादीनि समान्येतानि चूर्णानि कृतानि तैलभ्यक्तदेहस्यावचूर्णनार्थं दद्यात्। तथा-एवमवचूर्णिते सति, दद्रुरित्यादयो नश्यान्ति। चत्वार्येतान्युपजातिसंज्ञानि वृत्तानि।

स्नुग्गण्डे सर्षपात्कल्कः कुकूलानलपाचितः।

लेपाद्विचर्चिकां हन्ति रागवेग इव त्रपाम्॥६९॥

मनःशिलाले मरिचानि तैल-

मार्कं पयः कुष्ठहरः प्रदेहः।

तथा करञ्जप्रपुनाटबीजं

कुष्ठान्वितं गोसलिलेन पिष्टम्॥७०॥

स०-सर्षपाणां कल्कः स्नुह्या गण्डे कुकूलाग्नौ पाचितो लेपेन विचर्चिकां हन्ति, रागवेगो लज्जां यथा। मनःशिलादयः प्रलेपात् कुष्ठहृतः। तद्वदेव करञ्जादि गोमूत्रपिष्टम्। उपजातिवृत्तम्।

गुग्गुलुमरिचविडङ्गैः सर्षपकासीससर्जरसमुस्तैः।

श्रीवेष्टकालगन्धैर्मनःशिलाकुष्ठकम्पिल्लैः॥७१॥

उभयहरिद्रासहितैश्चाक्रिकतैलेन मिश्रितैरेभिः।

दिनकरकराभितप्तैः कुष्ठं घृष्टं च नष्टं च॥७२॥

स०-गुग्गुल्वादिभिरेतैश्चक्रजतैलेन मिश्रितैः सूर्यरश्मितप्तैर्घृष्टं कुष्ठं द्राक् नश्यति। चाक्रिकं तैलं-सद्यःपीडितं चक्रस्थमेवोष्णं तैलम्। केचित्तु बहुकालकृततैलपीडनात् कोल्लु(ह्व) ककाष्ठाद्देवदारुकाष्ठवत् खण्डशः पाटिताद्युक्त्या यत्तैलं गृह्यते तच्चक्रतैलमित्याहुः।

मरिचं तमालपत्रं कुष्ठं समनःशिलं सकासीसम्।

तैलेन युक्तमुषितं सप्ताहं भाजने ताम्रे॥७३॥

तेनालिप्तं सिध्मं सप्ताहाद् घर्मसेविनोऽपैति।

मासान्नवं किलासं स्नानेन विना विशुद्धस्य॥७४॥

स०-मरिचादिकं तैलेन युक्तं सप्तदिनानि ताम्रभाजने स्थितं तेन च-मरिचादिना, सिध्ममालिप्तं घर्मसेविनो नरस्य सप्ताहेनापैति। मासाद्यत्सद्योत्थितं श्वित्रं तन्नश्यति। स्नानेन विना विशुद्धस्य नरस्य। चतस्र आर्याः, आर्याश्च जघनचपलाः।

मयूरकक्षारजले सप्तकृत्वः परिस्रते।

सिद्धं ज्योतिष्मतीतैलमभ्यङ्गात्सिध्मनाशनम्॥७५॥

स०-अपामार्गक्षारोदके सप्तवारान् परिस्रुते सुवर्णलतातैलं पक्वमभ्यङ्गेन सिध्मं नाशयति।

वायसजङ्घामूलं वमनीपत्राणि मूलकाद्बीजम्।

तक्रेण भौमवारे लेपः सिध्मापहः सिद्धः॥७६॥

स०-काकजङ्घामूलं वमन्याः पत्राणि मूलकबीजं च तक्रेणाङ्गारकदिने लेपः सिध्मघ्नः सिद्धः।

जीवन्ती मञ्जिष्ठा दार्वी कम्पिल्लकं पयस्तुत्थम्।

एष घृततैलपाकः सिद्धः सिद्धे च सर्जरसः॥७७॥

देयः समधूच्छिष्टो विपादिका तेन नश्यति ह्यक्ता।

चर्मैककुष्ठकिटिभं कुष्ठं शाम्यत्यलसकं च॥७८॥

स०-एष घृततैलपाकः घृततैलाभ्यां पाको यस्य योगस्य स घृततैलपाकः, गमकत्वात्समासः। सिद्धो-निष्पन्नः। सिद्धेऽस्मिन् पाके सर्जरसो मदनेन सह देयः। तेन-सिद्धेन योगेन, विपादिकाऽभ्यक्ता नश्यति। तथा, चर्मैककुष्ठादिकं च शाम्यति। क्षीरमत्रार्कं ग्राह्यम्, यौगिकत्वाद्बुद्धवैद्यव्यवहाराच्च। आर्यास्तिस्रः।

मूलं सप्ताह्वात्त्वक् शिरीषाश्वमारा-

दर्कान्मालत्याश्चित्रकास्फोतनिम्बात्।

बीजं कारञ्जं सार्षपं प्रापुनाटं

श्रेष्ठा जन्तुघ्नं त्र्यूषणं द्वे हरिद्रे॥७९॥

तैलं तैलं साधितं तैः समूत्रै-

स्त्वग्दोषाणां दुष्टनाडीव्रणानाम्।

अभ्यङ्गेन श्लेष्मवातोद्भवानां

नाशायालं वज्रकं वज्रतुल्यम्॥८०॥

स०-सप्तपर्णमूलं शिरीषादीनां त्वक् करञ्जादीनां बीजं तथा त्रिफलादयः, एतैर्गोमूत्रसहितैस्तिलतैलं पक्त्वा वातकफोद्भवानां त्वग्दोषाणां तथा दुष्टनाडीव्रणानामभ्यङ्गेन नाशाय वज्रकसंज्ञमेतद्लं-समर्थम्। तथा वज्रतुल्यम्, अव्याहतशक्तित्वात्। [वैश्वदेवी शालिनी च।]

एरण्डताक्ष्यघननीपकदम्बभार्गी-

कम्पिल्लवेल्लफलिनीसुरवारुणीभिः।

निर्गुण्ड्यरुष्करसुराह्वसुवर्णदुग्धा-

श्रीवेष्टगुग्गुलुशिलापटुतालविश्वैः॥८१॥

तुल्यस्नुगर्कदुग्धं सिद्धं तैलं स्मृतं महावज्रम्।

अतिशयितवज्रकगुणं श्वित्रार्शोग्रन्थिमालाघ्नम्॥८२॥

स०-एरण्डादिभिस्तुल्यस्नुगर्कदुग्धं तैलं पक्वं महावज्रसंज्ञं स्मृतम्। अतिशयेन वज्रकगुणं श्वित्रादिघ्नम्। वसन्ततिलकं आर्या च।

कुष्ठाश्वमारभृङ्गार्कमूत्रस्नुक्क्षीरसैन्धवैः।

तैलं सिद्धं विषावापमभ्यङ्गात् कुष्ठजित्परम्॥८३॥

स०-कुष्ठादिभिः सिद्धं तैलं विषावापमभ्यङ्गात् परं कुष्ठहृत्।

सिद्धं सिक्थकसिन्दूरपुरतुत्थकताक्ष्यजैः।

कच्छूं विचर्चिकां चाशु कटुतैलं निबर्हति॥८४॥

स०-सिक्थकादिभिः पक्वं सर्षपतैलं कच्छ्वादीन्निहन्ति।

लाक्षा व्योषं प्रापुनाटं च बीजं

सश्रीवेष्टं कुष्ठसिद्धार्थकाश्च।

तक्रोन्मिश्रः स्याद्धरिद्रा च लेपो

दद्रूषूक्तो मूलकोत्थं च बीजम्॥८५॥

स०-लाक्षादयो निशा च तक्रोन्मिश्रो दद्रूषु लेप उक्तः। मूलकबीजं च तक्रमिश्रं तद्वत्। शालिनीवृत्तम्।

चित्रकसोभाञ्जनकौ, गुडूच्यपामार्गदेवदारूणि।

खदिरो धवश्च लेपः, श्यामा दन्ती द्रवन्ती च॥८६॥

लाक्षारसाञ्जनैलाः, पुनर्नवा चेति कुष्ठिनां लेपाः।

दधिमण्डयुताः पादैः षट् प्रोक्ता मारुतकफघ्नाः॥८७॥

स०-चित्रकादयो दधिमण्डान्विताः पादैः षट् वातश्लेष्मकुष्ठघ्ना गदिताः। तत्र चित्रकसोभाञ्जनकावित्येको लेपः, गुडूच्यपामार्गदेवदारूणीति द्वितीयः, एवमन्येऽपि वेद्याः। आर्ये।

जलवाप्यलोहकेसरपत्रप्लवचन्दनमृणालानि।

भागोत्तराणि सिद्धं प्रलेपनं पित्तकफकुष्ठे॥८८॥

स०-जलादीनि भागोत्तराणि सिद्धः पित्तकफकुष्ठे प्रलेपः। जलं-वालकम्। वाप्यं-कुष्ठम्। जघनचपलाऽऽर्या।

तिक्तघृतैर्धौतघृतैरभ्यङ्गो दह्यमानकुष्ठेषु।

तैलैश्चन्दनमधुकप्रपौण्डरीकोत्पलयुतैश्च॥८९॥

क्लेदे प्रपतति चाङ्गे दाहे विस्फोटके च चर्मदले।

शीताः प्रदेहसेका व्यधनविरेकौ घृतं तिक्तम्॥९०॥

स०-तिक्तद्रव्यसाधितैर्घृतैस्तथा जलेन धौतैर्घृतैरभ्यङ्गोदाहयुक्तेषु कुष्ठेषु हितः। क्लेदे च प्रकर्षेण पतति सति तैलैश्चन्दनादियुक्तैरभ्यङ्गः, चशब्दाद्धृतैश्च, प्रकृतत्वाद्धितः। अङ्गे दाहादिमति शीतप्रदेहाद्यास्तिक्तकं च घृतं हितम्। व्यधनं-सिराव्यधः।

खदिरवृषनिम्बकुटजाःश्रेष्ठाकृमिजित्पटोलमधुपर्ण्यः

अन्तर्बहिः प्रयुक्ताः कृमिकुष्ठनुदः सगोमूत्राः॥९१॥

स०-खदिरादयो गोमूत्रान्विता अभ्यन्तरं बाह्यातश्च प्रयुक्ताः कृमियुतकुष्ठहृतः।

वातोत्तरेषु सर्पिर्वमनं श्लेष्मोत्तरेषु कुष्ठेषु।

पित्तोत्तरेषु मोक्षो रक्तस्य विरेचनं चाग्रे॥९२॥

स०-वाताधिकेषु कुष्ठेषु घृतमग्रे-पूर्वं, हितम्। श्लेष्माधिकेषु च वमनम्। पित्तोत्तरेषु रक्तमोक्षो विरेचनं चाग्रे हितम्।

ये लेपाः कुष्ठानां युज्यन्ते निर्ह्यर्तास्रदोषाणाम्।

संशोधिताशयानां सद्यः सिद्धिर्भवति तेषां॥९३॥

स०-निर्हतास्रदोषाणां तथा संसोधितसयानां कुष्ठानां ये लेपा युज्यन्ते, तेषां सद्यः-शीघ्रमेव, सिद्धिः-आमयनिवृत्तिः, भवति।

अत एवेदमाह-

दोषे हृतेऽपनीते रक्ते बाह्यान्तरे कृते शमने।

स्नेहे च कालयुक्ते न कुष्ठमतिवर्तते साध्यम्॥९४॥

स०-दोषे-वातादौ, हृते रक्तेऽपनीते बाह्येऽभ्यन्तरे शमने कृते स्नेहे कृते च काले युक्ते कुष्ठं साध्यं नातिवर्तते। अपि तूपशाम्यति। आर्याः षट्, अन्यत्र जघनचपलाः (?)।

बहुदोषः संशोध्यः कुष्ठी बहुशोऽनुरक्षता प्राणान्।

दोषे ह्यतिमात्रहृते वायुर्हन्यादबलमाशु॥९५॥

स०-बहुदोषः कुष्ठी प्राणान् रक्षता भिषजा पुनःपुनः संशोध्यः। एकवेलयैव कस्मान्न शोध्यते ? इत्याह-यस्माद्दोषेऽतिमात्रहृते सत्यबलं नरं वातो द्रागेव हन्यात्। आर्या।

पक्षात्पक्षाच्छर्दनान्यभ्युपेया-

न्मासान्मासाच्छोधनान्यप्यधस्तात्।

शुद्धिर्मूर्ध्नि स्यात्त्रिरात्रात्त्रिरात्रात्

षष्ठे षष्ठे मास्यसृङ्मोक्षणं च॥९६॥

स०-असौ कुष्ठी पक्षेण वमनानि सेवेत। मासान्मासादधःशोधनानि भजेत्। शिरसि त्रिरात्रे त्रिरात्रे शुद्धिः स्यात्। षष्ठे षष्ठे रक्तमोक्षश्च स्यात्।

यो दुर्वान्तो दुर्विरिक्तोऽथवा स्यात्

कुष्ठी दोषैरुद्धतैर्व्याप्यतेऽसौ।

निःसन्देहं यात्यसाध्यत्वमेवं

तस्मात् कृत्स्नान्निर्हरेदस्य दोषान्॥९७॥

स०-यः कुष्ठी कृतासम्यग्वमनविरेचनः स्यात्, असावुद्धतैर्दोषैर्व्याप्यते। एवं निश्चयेनासाध्यत्वं याति। तस्माद्धेतोरस्य-कुष्ठिनः, कृत्स्नान्-निखिलान्, दोषान्निर्हरेत्। शालिनीवृत्तम्(त्ते)।

व्रतदमयमसेवा त्यागशीलाभियोगो

द्विजसुरगुरुपूजा सर्वसत्त्वेषु मैत्री।

शिवशिवसुतताराभास्करा राधनानि

प्रकटितमलपापं कुष्ठमुन्मूलयन्ति॥९८॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां चतुर्थे चिकित्सितस्थाने कुष्ठचिकित्सितं नामैकोनविंशोऽध्यायः॥ १९॥

****

स०-व्रतादिसेवा त्यागाद्यभ्यासो द्विजादिपूजा सर्वसत्त्वमैत्री शिवाद्याराधनानि कुष्ठं प्रकटितमलपापं नाशयन्ति। मालिनीवृत्तम्।

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टाङ्गहृदयटीकायां सर्वाङ्गसुन्दराख्यायां चतुर्थे चिकित्सितस्थाने कुष्ठचिकित्सितं नामैकोनविंशोऽध्यायः समाप्तः॥ १९॥

****

विंशोऽध्यायः।

अस्मादनन्तरं श्वित्रकृमिचिकित्सितं व्याख्यायते। चिकित्सासाम्यमित्याह-

अथातः श्वित्रकृमिचिकित्सितं व्याख्यास्यामः।
इति ह स्माहुरात्रेयादयो महर्षयः। (गद्यसूत्रे॥२॥)

कुष्ठादपि बीभत्सं यच्छीघ्रतरं च यात्यसाध्यत्वम्।
श्वित्रमतस्तच्छान्त्यै यतेत दीप्ते यथा भवने॥१॥

स०-यत्-यस्मात्, कुष्ठादपि बीभत्सं-जुगुप्सितं निन्द्यं, तथा शीघ्रतरमसाध्यत्वं श्वित्रं याति। अतः-अस्माद्धेतोः, तस्य-श्वित्रस्य शमाय, यत्नं कुर्यात्। यथा ज्वलिते गृहे। आर्या।

संशोधनं विशेषात्प्रयोजयेत्पूर्वमेव देहस्य।
श्वित्रे स्रंसनमग्र्यं मलयूरस इष्यते सगुडः॥२॥
तं पीत्वाऽभ्यक्ततनुर्यथाबलं सूर्यपादसन्तापम्।
सेवेत निरिक्ततनुस्त्र्यहं पिपासुः पिबेत्पेयाम्॥३॥

स०-प्रथममेव शरीरस्य संशोधनं विशेषेण प्रयोजयेत्। तदेवाह-श्वित्रे मलयूरसो-वाकुचीक्काथः, सह गुडया-स्रुह्या, सगुडो विरेचनमिष्यते। मुखचपला। तं-क्काथं, पीत्वाऽभ्यक्तशरीरः सन् यथाशक्ति सूर्यकिरणसन्तापं भजेत्। विरिक्तश्च सन् पिपासितः पेयां त्रीणि दिनानि पिबेत्।

श्वित्रेऽङ्गे स्फोटा जायन्ते कण्टकेन तान्भिन्द्यात्।
स्फोटेषु निःस्रुतेषु प्रातः प्रातः पिबेत् त्रिदिनम्॥४॥

मलयूमसनं प्रियङ्गूं शतपुष्पां चाम्भसा समुत्क्काथ्य।

पालाशं वा क्षारं यथाबलं फाणितोपेतम्॥५॥

स०-श्वित्रे साभ्यङ्गे ये स्फोटा उद्भवन्ति, तान्-स्फोटकान्, कण्टकेन भिन्द्यात्। स्फोटेषु निःस्रुतेषु सत्सु प्रातः प्रातस्त्रीणि दिनानि मलय्वादीनि समुत्क्काथ्य पिबेत्। पालाशं वा क्षारं फाणितयुक्तं यथाशक्ति पिबेत्। तिस्र आर्याः।

फल्गवक्षवृक्षवल्कलनिर्यूहेणेन्दुराजिकाकल्कम्।

पीत्वोष्णस्थितस्य जाते स्फोटे तक्रेण भोजनं निर्लवणम्॥६॥

स०-फल्गोरक्षेस्य च त्वचो यो निर्यूहः-क्काथः, तेन [इन्दुराजिकायाः-] बाकुच्याः, कल्कं पीत्वा उष्णे-आतपे, स्थितस्य स्फोटेषु जातेषु सत्सु तक्रेण सह भोजनं निर्लवणं हितम्। आर्या गीतिः (?)।

गव्यं मूत्रं चित्रकव्योषयुक्तं

सर्पिःकुम्भे स्थापितं क्षौद्रमिश्रम्।

पक्षादूर्ध्वं श्वित्रिणा पेयमेतत्

कार्यं चास्मै कुष्ठदृष्टं विधानम्॥७॥

स०-गोमूत्रं चित्रकादियुक्तं माक्षिकान्वितं घृतकुम्भे स्थापितं पक्षं यावत् पक्षादूर्ध्वं श्वित्रवतैतत्पेयम्। अस्मै च-श्वित्रिणे, कुष्ठोक्तं विधानम्। अस्मै इति क्रियाग्रहणात्सम्प्रदानत्वम्। [शालिनीवृत्तम्।]

मार्कवमथवा स्वादेद्भृष्टं तैलेन लोहपात्रस्थम्।

बीजकश्रृतं च दुग्धं तदनु पिबोच्छ्वित्रनाशाय॥८॥

स०-भृङ्गराजं वा तैलेन भृष्टं लोहपात्रस्थं खादेत्। भुक्त्वा च पश्चाद्बीजकथृतं क्षीरं श्वित्रशान्त्यै पिबेत्। आर्या।

पूतिकार्कव्याधिघातस्नुहीनां

मुत्रे पिष्टाः पल्लवा जातिजाश्च।

घ्नन्त्यालेपाच्छ्वित्रदुर्नामदद्रू-

पामाकोठान् दुष्टनाडीव्रणांश्च॥९॥

स०-पूतिकादीनां पल्लवा गोमूत्रे पिष्टास्तथा जातिपल्लवा गोमूत्रे पिष्टाः प्रलेपेन श्वित्रादीन् घ्नन्ति।

द्वैपं चर्म मातङ्गजं वा

श्वित्रे लेपस्तैलयुक्तो वरिष्ठः।

स०-द्वीपसम्बन्धि चर्म दग्धं हस्तिजं च चर्म दग्धं तैलान्वितो लेपः श्वित्रेऽतिशयेन वरः।

पूतिःकीटो राजवृक्षोद्भवेन

क्षारेणाक्तः श्वित्रमेकोऽपि हन्ति॥१०॥

स०-पूतिःकीटो राजवृक्षजेन क्षारेण लेपत एक एव श्वित्रं हन्ति। पूतिःकीटो-वर्षाकालोद्भवः पिलिन्दिकेति लोके प्रसिद्धः। शालिन्यौ वृत्ते।

रात्रौ गोमूत्रे वासितान् जर्जराङ्गा-

न्हि च्छायायां शोषयेत्स्फोटहेतून्।

एवं वारांस्त्रींस्तैस्ततः श्लक्ष्णपिष्टैः

स्नुह्याः क्षीरेण श्वित्रनाशाय लेपः॥११॥

स०-स्फोटहेतून्-भल्लातकान्, जर्जरीकृतान् निशि गोमूत्रे स्थितान् दिवसे छायायां शोषयेत्। एवं त्रीन् वारान् मूत्रस्थितान् शोषितांश्च। ततः-अनन्तरं, तैः स्नुहीक्षीरेण श्लक्ष्णपिष्टैः श्वित्रशान्त्यै लेपः। वैश्वदेवी।

अक्षतैलद्रुता लेपः कृष्णसर्पोद्भवा मषी।
शिखिपित्तं तथा, दग्धं ह्रीबेरं वा तदाप्लुतम्॥ १२॥

स०-कृष्णसर्पजा मषी अक्षतैलेन द्रुता लेपः। मयूरपित्तं च लेपः पूर्वगुणः। अथवा, ह्रीबेरं दग्धं तेन-अक्षतैलेनालोडितं, लेपस्तद्वत्।

कुडवोऽवल्गुजबीजाद्धरितालचतुर्थभागसम्मिश्रः।
मूत्रेण गवां पिष्टः सवर्णकरणं परं श्वित्रे॥ १३॥

स०-बाकुचीबीजं पलचतुष्टयं हरितालपलं गोमूत्रेण पिष्टं स्वित्रे सवर्णकरं स्यात्। आर्या।

क्षारे सुदग्धे गजलिण्डजे च
गजस्य मूत्रेण परिस्रुते च।
द्रोणप्रमाणे दशभागयुक्तं
दत्त्वा पचेद्बीजमवल्गुजानाम्॥ १४॥
श्वित्रं जयेच्चिक्कणतां गतेन
तेन प्रलिम्पन् बहुशः प्रघृष्टम्।
कुष्ठं मषं वा तिलकालकं वा
यद्वा व्रणे स्यादधिमांसजातम्॥ १५॥

स०-गजपुरीषजे क्षारे सुदग्धे द्रोणप्रमाणे यथाप्रमाणं गजस्य मूत्रेण क्षारविधिना परीस्रुतेऽस्मिन् बाकुचीबीजं दत्त्वा पचेत्। किम्भूतम्? दशभागयुक्तम्,-दशभिर्भागैः प्रकृतत्वात् क्षारस्य सम्बन्धिभिर्मिश्रितम्। तेन चिक्कणतां-मदनरूपतां, गतेन पुरुषो बहुशः प्रघृष्टं श्वित्रं प्रलिम्पन् जयेत्, कुष्ठादींश्च। अधिमांसरूपतो उअच्च स्यात्तच्च जयेत्। उपजाती।

भल्लातकं द्वीपिसुधार्कमूलं
गुञ्जाफलं त्र्यूषणशाङ्खचूर्णम्।
तुत्थं सकुष्ठं लवणानि पञ्च
क्षारद्वयं लाङ्गलिकां च पत्त्वा॥१६॥
स्रुगर्कदुग्धे घनमायसस्थं
शलकया तद्विदधीत लेपम्।
कुष्ठे किलासे तिलकालकेषु
मषेषु दुर्नामसु चर्मकीले॥१७॥

स०-भल्लातकादिकं स्रुगर्कयोर्दुग्धे पत्त्वा घनमायसपात्रे स्थितं तत्-एतत्, आलाकया लेपं कुष्ठादिषु विदधीत। इन्द्रवज्रोपजाती।

शुद्ध्या शोणितमोक्षैर्विरूक्षणैर्भक्षणैश्च सक्तूनाम्।
श्वित्रं कस्यचिदेव प्रशाम्यति क्षीणपापस्य॥१८॥

इति श्वित्रचिकित्सितम्।

स०-श्वित्रं कस्यचिदेव नरस्य क्षीणकल्मषस्य शुद्ध्यादिभिः शाम्यति। आर्या। इति श्वित्रचिकित्सा।

अस्मादनन्तरं कृमिचिकित्सितं व्याख्यायते, चिकित्सासामान्यात्।

अथ कृमिचिकित्सितम्।

स्निग्धस्विन्ने गुडक्षीरमत्स्याद्यैः कृमिणोदरे।
उत्क्लेशितकृमिकफे शर्वरीं तां सुखोषिते॥ १९॥
सुरसादिगणं मूत्रे क्काथयित्वाऽर्धवारिणि।
तं कषायं कणागालकृमिजित्कल्कयोजितम्॥ २०॥
सतैलस्वर्जिकाक्षारं युञ्ज्याद्बस्तिं ततोऽहनि।
तस्मिन्नेव निरूढं तं पाययेत विरेचनम्॥ २१॥
त्रिवृत्कल्कं फलकणाकषायालोडितं ततः।
ऊर्ध्वाधःशोधिते कुर्यात्पञ्चकोलयुतं क्रमम्॥ २२॥
कटुतिक्तकषायाणां कषायैः परिषेचनम्।
काले विडङ्गतैलेन ततस्तमनुवासयेत्॥ २३॥

स०-कृमिणमदुरं यस्येति पामादित्वान्नप्रत्ययः। तस्मिन् कृमिणोदरे नरे स्निग्धस्विन्ने तथा गुडादिभिरुत्क्लेशिताः-स्वस्थानाच्याविताः , कृमयः कफश्च यस्य तस्मिंस्तथाभूत उदरे तथा समुत्क्लेशितादनन्तरं तां रात्रिं सुखोषिते सति सतैलस्वर्जिकाक्षारं बस्तिं युञ्ज्यात्। कथम्? इत्याह-सुरसादिगणं (हृ. सू. अ. १५।३०) गोमूत्रेऽर्धवारिणि क्काथयित्वा ततस्तं कषायं कणादीनां कल्केन योजितं-मिश्रं कृत्वा। ततो-निरूहादनन्तरं , तस्मिन्नेवाहनि तं-निरूढं , विरेचनं त्रिवृत्कल्कं फलादिकषायालोडितं पाययेत्। ततः-अनन्तरं , ऊर्ध्वाधःशोधिते तस्मिन् पञ्चकोलयुतं क्रमं-पेयाविलेप्यादिकं , कुर्यात्। ततः कट्वादिभिः कषायैः परिषेचितं समनन्तरं यदा सन्मुक्षितोऽग्निस्तदा तस्मिन् काले विडङ्गतैलेन तमनुवासयेत्।

शिरोरोगनिषेधोक्तमाचरेन्मूर्धगेष्वनु।

उद्रिक्ततिक्तकटुकमल्पस्नेहं च भोजनम्॥२४॥

स०-शिरोरोगप्रतिषेधे यदुक्तं तन्मर्धगेषु कृमिष्वाचरेत्। अनु-पश्चात्, प्रभूततिक्तकटुकमल्पस्नेहं च भोजनमाचरेत्।

विडङ्गकृष्णामरिचपिप्पलीमूलशिग्रुभिः।

पिबेत्सस्वर्जिकाक्षारैर्यवागूं तक्रसाधितम्॥२५॥

स०-तथा विडङ्गादिभिस्तक्रसाधितां पेयां पिबेत्।

रसं शिरीषकिणिहीपारिभद्रककेम्बुकात्।

पलाशबीजपत्तरपूतिकाद्वा पृथक् पिबेत्॥२६॥

सक्षौद्रं, सुरसादीन् वा लिह्यात्क्षौद्रयुतान् पृथक्।

स०-शिरीषादिरसं पिबेत्। किणिही-गिरिकर्णिका। पलाशबीजादीनां वा रसं माक्षिकान्वितं पृथक् पिबेत्। अथवा , सुरसादीन् (ह्र. अऊ. अ. १५।३०) क्षौद्रयुतान् पृथग् लिह्यात्।

शतकृत्वोऽश्वविड्चूर्णं विडङ्गक्काथभावितम्॥२७॥

कृमिमान् मधुना लिह्याद्भावितं वा वरारसैः।

स०-अश्वपुरीषचूर्णं बहून् वारान् विडङ्गक्काथेन भावितमथवाऽश्वशकृच्चूर्णं त्रिफलाक्काथेन भावितं मधुना कृमिमान् लिह्यात्।

शिरोगतेषु कृमिषु चूर्णं प्रधमनं च तत्॥२८॥

स०-शिरोगतेषु कृमिषु तत्-शिरोरोगनिषेधोक्तं, चूर्णं प्रधमनं-नस्यं , चाचरेत्।

आखुकर्णीकिसलयैः सुपिष्टैः पिष्टमिश्रितैः।

पत्त्वा पूपलिकां खादेद्धान्याम्लं च पिबेदनु॥२९॥

सपञ्चकोलल्लवणमसान्द्र तक्रमेव वा।

स०-तथा, मूषककर्णीपल्लवैः सूक्ष्मचूर्णितैः शालिचूर्णमिश्रितैः पूपलिकां पक्त्वा खादेत्। तदनु-पश्चाच्च, धान्याम्लं पिबेत्। अथवा , तक्रं-मथितं , पञ्चकोललवणयुतं पिबेत्।

नीपमार्कवनिर्गुण्डीपल्लवेष्वप्ययं विधिः॥३०॥

विडङ्गचूर्णमिश्रैर्वा पिष्टैर्भक्ष्यान् प्रकल्पयेत्।

स०-नीपादिष्वयमेव-पूर्वोक्तो मूषककर्णीपल्लवविधिः, कल्प्यः। अथवा, पिष्टैर्विडङ्गचूर्णमिश्रितैर्भक्ष्यान् प्रकल्पयेत्।

विडङ्गतण्डुलैर्युक्तमर्धांशैरातपे स्थितम्॥३१॥

दिनमारुष्करं तैलं पाने बस्तौ च योजयेत्।

सुराह्वसरलस्नेहं पृथगेवं च कल्पयेत्॥३२॥

स०-अरुष्करजं तैलं पाने बस्तौ च योजयेत्। किम्भूतम्? अर्धभागप्रमाणैर्विडङ्गतण्डुलैर्मिश्रितं तथा दिनमातपे स्थितम्। दिनमित्यत्यन्तसंयोगे द्वितीया। देवदार्वादितैलं पृथगेवं-विडङ्गतण्डुलान्वितमातपे स्थितं , कल्पयेत्।

पुरीषजेषु सुतरां दद्याद्बस्तिंविरेचने।

स०-पुरीषजेषु कृमिषु सुतरां बस्तिं विरेचनं च दद्यात्।

शिरोविरेकं वमनं शमनं कफजन्मसु॥३३॥

कफजन्मसु कृमिषु शिरोविरेकं-नस्यं , वमनं शमनं च कुर्यात्।

रक्तजानां प्रतीकारं कुर्यात्कुष्ठचिकित्सितात्।

स०-रक्तोत्थानां कृमीणां कुष्ठचिकित्सितात् प्रतीकारं विदध्यात्। ल्यबूलोपे पञ्चमी, कुष्ठचिकित्सितोक्तपेक्ष्येत्यर्थः।

इन्द्रलुप्तविधिश्चात्र विधेयो रोमभोजिषु॥ ३४॥

स०-रोमभोजिषु कृमिष्विन्द्रलुप्तविधिः (हृ. उ. अ. २४।२८) कार्यः।

क्षीराणि मांसानि घृतं गुडं च
दधीनि शाकानि च पर्णवन्ति।
समासतोऽह्यान्मधुरान् रसांश्च
कृमीन् जिहासुः परिवर्जयेत्॥ ३५॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां चतुर्थे चिकित्सितस्थाने श्वित्रकृमिचिकित्सितं नाम विंशोऽध्यायः॥ २०॥

****

स०-कृमीन् जिहासुः क्षीरादीन् वर्जयेत्। उपजातिवृत्तम्।

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टाङ्गहृदयटीकायां सर्वाङ्गसुन्दराख्यायां चतुर्थे चिकित्सितस्थाने श्वित्रकृमिचिकित्सितं नाम विंशोऽध्यायः समाप्तः॥ २०॥

****

एकविंशोऽध्यायः।

अस्मादनन्तरं वातव्याधिचिकित्सितं व्याख्यातुमुपक्रम्यते , सर्वचिकित्साबाधितत्वात्।

अथातो वातव्याधिचिकित्सितं व्याख्यास्यामः।
इति ह स्माहुरात्रेयादयो महर्षयः। (गद्यसूत्रे॥२॥)

केवलं निरुपस्तम्भमादौ स्नेहैरुपाचरेत्।
वायुं सर्पिर्वसामज्जतैलपानैर्नरं ततः॥१॥
स्नेहक्लान्तं समाश्वास्य पयोभिः स्नेहयेत्पुनः।
यूषैर्ग्राम्योदकानूपरसैर्वा स्नेहसंयुतैः॥२॥
पायसैः कृसरैः साम्लुलवणैः सानुवासनैः।
नावनैस्तर्पणैश्चान्नैः सुस्निग्धैः स्वेदयेत्ततः॥३॥
स्वभ्यक्तं स्नेहसंयुक्तैः शङ्कराद्यैः पुनः पुनः।

स०-केवलं-शुद्धं , तथा निरुपस्तम्भं-अन्येनाधानकेन समीपसम्भविनाऽनाधारितं , ईदृशं वायुं स्नेहैरादावेवोपाचरेत्। कथम्? इत्याह-सर्पिरित्यादि। ननु, तैलस्य पवनविजये प्राधान्यादेवं निर्देशः कर्तुं युक्तः , तैलवसामज्जसर्पिःपानैरिति। युक्तमाह भवान्। किन्तु, आजन्मसात्म्यात् सर्पिः प्रधानमनवरतमिति सर्पिः प्रागुपन्यस्तम्। सर्पिःपानादिभिस्तावत् स्नेहयेत् यावत् "स्नेहोद्वेगः क्लमः " (ह. सू. अ. १६।३०) इत्यादि स्नेहलक्षणं स्यात्। स्नेहक्लान्तं च नरं पयोभिः समाश्वास्य पुनर्यूषादिभिः स्नेहान्वितैः स्नेहयेत्। तथा तर्पणैश्चान्नैः सुस्निग्धैः स्नेहयेत्। ततः-अनन्तरं , सुष्ठ्वभ्यक्तं अन्तं शङ्कराद्यैः-स्वेदैः स्वेदविधिगदितैः, पुनः पुनः स्वेदयेत्।

एव स्वेदिते सति यो गुणः स्यात्तमाह-

स्नेहाक्तं स्विन्नमङ्गं तु वक्रं स्तब्धं सवेदनम्॥४॥
यथेष्टमानामयितुं सुखमेव हि शक्यते।

स०-स्नेहाभ्यक्तं गात्रं स्विन्नं सद्वक्रं तथा स्तब्धं तथा सरुजं यथेष्टं सुखमेवानामयितुं शक्यते। "जलह्वलह्मलनमामनुपसर्गाणां वा मित्वम्।" इति नामयितुमित्यत्र न ह्रस्वत्वम्।

एतदेव दृष्टान्तद्वारेण प्रतिपादयन्नाह--

शुष्काण्यपि हि काष्ठानि स्नेहस्वेदोपपादनैः॥५॥
शक्यं कर्मण्यतां नेतुं किमु गात्राणि जीविताम्।

स०-हि-यस्मात्, शुष्काण्यपि काष्ठानि स्नेहस्वेदसंयोजनेन कर्मण्यातां नेतुं शक्यन्ते। किमुत जीवतां गात्राणि न शक्यन्ते ? शक्यन्त एवेत्यर्थः। शक्यमिति पूर्वोक्तक्रममात्रे नपुंसकत्वमेकत्वं च। यथा कालिदासस्य-"शक्यमङ्गुलिभिरुद्धृतैरधः शाखिनां पतितपुष्पकोमलैः। पत्रजर्जरशशिप्रभालवैरेभिरुत्कचयितुं तवालकान्॥" इति।

हर्षतोदरुगायामशोफस्तम्भग्रहादयः॥६॥
स्विन्नस्याशु प्रशाम्यन्ति मार्दवं चोपजायते।

स०-स्विन्नस्य पुंसो हर्षादयः शीघ्रं प्रशाम्यन्ति। मृदुत्वं च गात्रेषु जायते।

स्नेहश्च धातून् संशुष्कान् पुष्णात्याशूपयोजितः॥७॥
बलमग्निबलं पुष्टिं प्राणांश्चास्याभिवर्धयेत्।

स०-तथा, स्निग्धस्य स्नेह उपयोजितो धातून् विशुष्कान् द्रागेव पुष्णाति। तथा, अस्य-वातरोगिणो, बलादीनभिवर्धयेत्।

अस्कृत्तं पुनः स्नेहैः स्वेदैश्च प्रतिपादयेत्॥८॥

तथा स्नेहमृदौ कोष्ठे न तिष्ठन्त्यनिलामयाः।

स०-तं-आतुरं, पुनः स्नेहस्वेदाभ्यां योजयेत्। तथा-एवं कृते स्नेहमृदौ कोष्ठे सति सर्वे वातरोगा नश्यन्ति।

यद्येतेन सदोषत्वात्कर्मणा न प्रशाम्यति॥९॥

मृदुभिः स्नेहसंयुक्तैर्भेषजैस्तं विशोधयेत्।

स०-अनेन कर्मणा चेन्न प्रशाम्यति वातामयस्तदा तं-वातामयिनं, मृदुभिर्द्रव्यैः-कर्णिकारादिभिः, स्नेहान्वितैर्विशोधयेत्।

घृतं तिल्वकसिद्धं वा सातलासिद्धमेव वा॥१०॥

पयसैरण्डतैलं वा पिबेद्दोषहरं शिवम्।

स०-तिल्वकेन पक्वं सातलया वा पक्वं क्षीरेण वा सहैरण्डतैलं पिबेत्। तच्च पीतं दोषहरं शिवं च स्यात्।

ननु, किमित्यनुलोमनं क्रियते ? इत्याह-

स्निग्धाम्ललवणोष्णाद्यैराहारैर्हि मलश्चितः॥११॥

स्रोतो बद्धाऽनिलं रुन्ध्यात्तस्मात्तमनुलोमयेत्।

स०-यस्मात् स्निग्धादिभिराहारैर्मलश्चितः स्रोतांसि रुद्धा वायुं रुन्ध्यात्, तस्मान्मारुतमनुलोमयेत्।

दुर्बलो योऽविरेच्यः स्यात्तं निरूहैरुपाचरेत्॥ १२॥

दीपनैः पाचनीयैर्वा भोज्यैर्वा तद्युतैर्नरम्।

संशुद्धस्योत्थिते चाग्नौ स्नेहस्वेदौ पुनर्हितौ॥ १३॥

स०-यो नरो दुर्बलो विरेचनानर्हो भवेत् तं-नरं, निरूहैरुपाचरेत्। किम्भूतैः ? दीपनै पाचनीयैश्च। अथवा, तद्युतैः-दीपनीयपाचनीययुतैः, भोज्यैरुपाचरेत्। अनन्तरं सम्यक्शुद्धस्य वह्नौ चोत्थिते सति पुनरपि स्नेहस्वेदौ हितौ।

आमाशयगते वायौ वमितप्रतिभोजिते।

सुखाम्बुना षड्धरणं वचादिं वा प्रयोजयेत्॥ १४॥

सन्धुक्षितेऽग्नौ परतो विधिः केवलवातिकः।

स०-आमाशयगते वाते सति तथा वमितश्चासौ प्रतिभोजितश्च तस्मिन् वमितप्रतिभोजिते नर उष्णजलेन षड्धरणं वचादिगणं (ह्. सू. अ. १५।३५) वा प्रयोजयेत्। षड्धरणयोगः सङ्ग्रहादेवावगन्तव्यः। तत्रैवं पठ्यते (चि. अ. २१)-"दार्वीकलिङ्गकटुकातिविषाग्निपाठा मूत्रेण सूक्ष्मरजसो धरणप्रमाणाः। पीता जयन्ति गुदजोदरकुष्ठमेहकोष्ठानिलाढ्यपवनग्रहणीप्रदोषान्॥" इति। धरणं-पलस्य दशमो भागः। अग्नौ सन्दीपिते सति, अनन्तरं केवलवातिको विधिः, 'कार्यः' इति शेषः।

मत्स्यान्नाभिप्रदेशस्थे सिद्धान्बिल्वशलाटुभिः॥ १५॥

स०-नाभिप्रदेशस्थे वाते मत्स्यान् बिल्वशलाटुभिः सिद्धा योजयेत्।

बस्तिकर्म त्वधोनाभेः शस्यते चावपीडकः।

स०-अधोनाभेः स्थिते वातेऽवपीडकः शस्यते। चशब्दान्मत्स्याश्च।

कोष्ठगे क्षारचूर्णाद्या हिताः पाचनदीपनाः॥ १६॥

स०-कोष्ठगे वायौ क्षाराद्याः पाचना दीपणाश्च हिताः।

हृत्स्थे पयः स्थिरासिद्धम्

स०-हृदयस्थिते समीरणे क्षीरं शालिपर्ण्या श्रृतं हितम्।

शिरोबस्तिः शिरोगते।
स्नैहिकं नावनं धूमः श्रोत्रादीनां च तर्पणम्॥ १७॥

स०-शिरोगते शिरोबस्तिः शस्यते। स्नैहिकं नस्यं तथा धूमः कर्णादितर्पणं च हितम्।

स्वेदाभ्यङ्गनिवातानि हृद्यं चान्नं त्वगाश्रिते।

त्वक्स्थे मरुति स्वेदादीनि हितानि। हृदयप्रियं चान्नं हितम्।

शीताः प्रदेहा रक्तस्थे विरेको रक्तमोक्षणम्॥ १८॥

स०-रक्तस्थे वाते शीताः प्रदेहा रक्तमोक्षणं च हितम्।

विरेको मांसमेदःस्थे निरूहाः शमनानि च।

स०-मांसमेदःस्थिते वायौ विरेकस्तथा निरूहाः शमनानि च हितानि।

बाह्याभ्यन्तरतः स्नेहैरस्थिमज्जगतं जयेत्॥१९॥

स०-अस्थिमज्जस्थं मारुतं बाह्याभ्यन्तरतः स्नेहैर्जयेत्।

प्रहर्षोऽन्नं च शुक्रस्थे बलशुक्रकरं हितम्।

स०-शुक्रस्थे समीरणे प्रहर्षणं तथा बलशुक्रकारि चान्नं हितम्।

विबद्धमार्गं दृष्ट्वा तु शुक्रं दद्याद्विरेचनम्॥२०॥

विरिक्तं प्रतिभुक्तं च पूर्वोक्तां कारयेत्रियां।

स०-शुक्रं च रुद्धमार्गं दृष्ट्वा विरेकं दद्यात्। विरिक्तं प्रतिभुक्तं च नरं पूर्वोदितां क्रियां कारयेत्। "ह्क्रोरन्यतरस्याम्।" इति प्रतिभुक्तस्यापि कर्मत्वम्।

गर्भे शुष्के तु वातेन बालानां च विशुष्यताम्॥२१॥

सिताकाश्मर्यमधुकैः सिद्धमुत्थापने पयः।

स०-वातेन गर्भे शुष्के सति बालानां च विशुष्यतां शर्करादिभिः सिद्धं क्षीरमुत्थापने हितम्।

स्रावसन्धिशिराप्राप्ते स्नेहदाहोपनाहनम्॥२२॥

स०-स्रावादिप्राप्ते स्नेहदाहोपनाहनं हितम्।

तैलं सङ्कुचितेऽभ्यङ्गो माषसैन्धवसाधितम्।

स०-सङ्कुचितेऽङ्गे सति माषसैन्धवसाधितं तैलमभ्यङ्गः।

आगारधूमलवणतैलैर्लेपः स्रुतेऽसृजि॥२३॥
सुप्तेऽङ्गे वेषयुक्ते तु कर्तव्यमुपनाहनम्।

स०-रक्ते स्रुते सत्यागारधूमादिभिर्लेपः। सुप्ते गात्रे तथा वेष्टनयुक्ते चोपनाहः कार्यः।

आक्षेपकादीनां मध्यात् महात्ययत्वादपतानकस्य तावच्चिकित्सामाह-

अथापतानकेनार्तमस्रस्ताक्षमवेपनम्॥२४॥
अस्तब्धमेढ्रमस्वेदं बहिरायामवर्जितम्।
अखट्वाघातिनं चैनं त्वरितं समुपाचरेत्॥२५॥

स०-अथ-अनन्तरं, वातव्याधयः संज्ञानिर्दिष्टाः प्रस्तूयन्ते। एनं-अपतानकार्तं नरं, अस्रस्ताक्षादियुक्तं यावदखट्वाघातिनं च त्वरितं कृत्वोपक्रमेत्।

तत्र प्रागेव सुस्निग्धस्विन्नाङ्गे तीक्ष्णनावनम्।
स्रोतोविशुद्धये युञ्ज्यादच्छपानं ततो घृतम्॥२६॥
विदार्यादिगणक्काथदधिक्षीररसैः शृतम्।
नातिमात्रं तथा वायुर्व्याप्नोति सहसैव वा॥२७॥

स०-तस्मिन्नपतानकार्ते नरे, पूर्वमेव च सुष्ठु स्निग्धाङ्गे स्विन्नाङ्गे च तीक्ष्णं नस्यं-त्रिकटुकादिना, स्रोतोविशुद्धये योज्यम्। ततः-अनन्तरं, अच्छपानं घृतं युञ्जीत। कतरत्? इत्याह-विदार्यादिगणक्काथादिशृतम्। घृताद्विदार्यादिगणक्काथश्चतुर्गुणो दधिक्षीररसाः सर्पिःसमा ग्राह्याः। तथा-एवंकृते सति, मारुतोऽतिमात्रं न व्याप्नोति। सहसा-झटित्येव च, नाश्नुते।

कुलत्थयवकोलानि भद्रदार्वादिकं गणम्।

निःक्काथ्यानूपमांसं च तेनाम्लैः पयसाऽपि च॥२८॥

स्वादुस्कन्धप्रतीवापं महास्नेहं विपाचयेत्।

सेकाभ्यङ्गावगाहान्नपाननस्यानुवासनैः॥२९॥

स हन्ति वातं, ते ते च स्नेहस्वेदाः सुयोजिताः।

स०-कुलत्थादीनानूपमांसं च निःक्काथ्य तेन क्काथेनाम्लैः-धान्याम्लादिभिः, स्वादुस्कन्धकृतकल्कं महास्नेहं विपाचयेत्। सः-महास्नेहो, वातं हन्ति। ते ते च-पूर्वोक्ताः स्नेहाः स्वेदाः, अभ्यग्योजिताः वातं घ्नन्ति।

वेगान्तरेषु मूर्धानमसकृच्चास्य रेचयेत्॥३०॥

अवपीडैः प्रधमनैस्तीक्ष्णैः श्लेष्मनिबर्हणैः।

श्वसनासु विमुक्तासु तथा संज्ञां स विन्दति॥३१॥

स०-वेगान्तरेषु-वेगान्तरालेषु, मूर्धानमसकृत्-बहून् वारान्, रेचयेत्। कैः? इत्याह-अवपीडैः-"कल्काद्यैरवपीडस्तु स तीक्ष्णैर्मूर्धरेचनः।" (ह्र. सू. अ. २०।७) इत्युक्तैः। तथा प्रधमनैः-"ध्मानं विरेचनेश्चूर्णैर्युञ्ज्यात्" (ह्र. सू. अ. २०।८) इत्युक्तैः। एतैश्च तीक्ष्णैः-तीक्ष्णद्रव्यकृतैः, अत एव श्लेष्मनाशनैः। [तथा-] एवंकृते सति, श्वसनासु श्लेष्मविमुक्तासु संज्ञां-चेतनां, सः-रोगी, लभते। प्राणनाड्यो हृदाश्रिताः श्वसना इत्युच्यन्ते।

सौवर्चलाभयाव्योषसिद्धं सर्पिश्चलेऽधिके॥ ३१ १/२॥

स०-वायावधिके सौवर्चलादिभिः कल्कीकृतैः सिद्धं सर्पिर्हितम्।

पलाष्टकं तिल्वकतो वरायाः
प्रस्थं पलांशं गुरुपञ्चमूलम्।
सैरण्डसिंहीत्रिवृतं घटेऽपां
पक्त्वा पचेत्पादशृतेन तेन॥ ३२॥
दध्नः पात्रे यावशूकात्त्रिबिल्वैः
सर्पिःप्रस्थं हन्ति तत्सेव्यमानम्।
दुष्टान् वातानेकसर्वाङ्गसंस्थान्
योनिव्यापद्गुल्मवर्ध्मोदरं च॥ ३३॥

स०-तिल्वकतो-लोध्रात् पलाष्टकं, त्रिफलायाः प्रस्थं, महत्पञ्चमूलं पृथक् पलभागम्। किम्भुतं पञ्चमूलम्? एरण्डव्याघ्रीत्रिवृताभिर्युक्तम्। एतेऽपि पलांशा इत्यर्थः। जलद्रोणे पचेत्। तेन च पादावशेषेण तथा दध्न आढके यवक्षारपलैस्त्रिभिर्घृतप्रस्थं पचेत्। एतच्च घृतं सेव्यमानं दुष्टवातादीन् हन्ति। उपजातिशालिन्यौ वृत्ते।

विधिस्तिल्वकवज्ज्ञेयो रम्यकशोकयोरपि॥ ३४॥

स०-तिल्वकस्येव तिल्वकवत् महानिम्बस्याशोकस्य च विधर्ज्ञेयः।

चिकित्सितमिदं कुर्याच्छुद्धवातापतानके।
संसृष्टदोषे संसृष्टं

स०-एवमुपक्रमं शुद्धवातापतानके कुर्यात्। संसृष्टदोषे संसृष्टं-दोषद्वयोक्तं, चिकित्सितं कुर्यात्।

चूर्णयित्वा कफान्विते॥ ३५॥

तुम्बरूण्यभया हिङ्गु पौष्करं लवणत्रयम्।

यवक्काथाम्बुना पेयं हृत्पार्श्वार्त्यापतन्त्रके॥ ३६॥

हिङ्गु सौवर्चलं शुण्ठी दाडिमं साम्लवेतसम्।

पिबेद्वा श्लेष्मपवनहृद्रोगोक्तं च शस्यते॥ ३७॥

स०-कफयुक्ते तुम्बर्वादिकं चूर्णयित्वा यवक्काथजलेन पेयं हृत्पीडादिषु(के)। अथवा, हिङ्वादिकं यवक्काथाम्बुना पेयम्। श्लेष्मवातहृद्रोगे च यत्कथितं तच्च शस्यते।

आयामयोरर्दितवद्बाह्याभ्यन्तरयोः क्रिया।

तैलद्रोण्यां च शयनमान्तरोऽत्र सुदुस्तरः॥ ३८॥

स०-आयामयोर्बाह्याभ्यन्तरयोरर्दितवत्क्रिया स्यात्। तैलद्रोण्यां शयनं च। अत्र-अनयोर्मध्यात्, आन्तर आयामः सुदुस्तरः-अतिकष्टसाध्यः।

विवर्णदन्तवदनः स्रस्ताङ्गो नष्टचेतनः।

प्रस्विद्यंश्च धनुषम्भी दशरात्रं न जीवति॥ ३९॥

स०-विवर्णदन्तास्यः स्रस्ताङ्गादिः प्रस्वेदवांश्च धनुष्कम्भी दशरात्रं न जीवति।

वेगेष्वतोऽन्यथा जीवेन्मन्देषु विनतो जडः।

खञ्जः कुणिः पक्षहतः पङ्गुलो विकलोऽथवा॥ ४०॥

स०-अतोऽन्यथा-विवर्णदन्तादिविपर्ययेण, तथा मन्देषु वेगेषु सस्तु जीवेत्। जीवंश्च विनतादिगुणः स्यात्।

हनुस्रंसे हनू स्निग्धस्विन्नौ स्वस्थानमानयेत्।

उन्नामयेच्च कुशलश्चिबुकं विवृते मुखे॥४१॥

नामयेत्संवृते शेषमेकायामवदाचरेत्।

स०-हनुस्रंसे तु हनू स्निग्धस्विन्नौ सन्तौ स्वस्थानं प्रापयेत्। कुशलो भिषक् विवृते मुखे सति चिबुकमूर्ध्वं नामयेत्। संवृते तु मुखे चिबुकं नामयेत्। शेषं चिकित्सितमेकयामवदाचरेत्-अर्दितवदाचरेत्।

जिह्वास्तम्भे यथावस्थं कार्यं वातचिकित्सितम्॥४२॥

स०-जिह्वायाः स्तम्भे सति यथावस्थं वातस्योपक्रमः कार्यः स्नेहस्वेदान्वितः।

अर्दिते नावनं मूर्ध्नि तैलं श्रोत्राक्षितर्पणम्।

सशोफे वमनं, दाहरागयुक्ते सिराव्यधः॥४३॥

स०-अर्दिते नावनादि चिकित्सितम्। शोफान्विते सति वमनं कार्यम्। दाहादियुक्ते सति सिराव्यधः।

स्नेहनं स्नेहसंयुक्तं पक्षाघाते विरेचनम्।

स०-पक्षाघाते स्नेहनं तथा विरेकः कार्यः स्नेहान्वितः।

अवबाहौ हितं नस्यं स्नेहश्चोत्तरभिक्तिकः॥४४॥

स०-अवबाहौ नस्यादि हितम्। आमे तूपवास एव हित इत्युवाच सङ्ग्रहे (?)।

ऊरुस्तम्भे तु न स्नेहो न च संशोधनं हितम्।
श्लेष्माममेदोबाहुल्याद्युक्त्या तत्क्षपणान्यतः॥४५॥
कुर्याद्रूक्षोपचारश्च यवश्यामाककोद्रवाः।
शाकैरलवणैः शस्ताः किञ्चित्तैलैर्जलैः श्रृतैः॥४६॥
जाङ्गलैरघृतैर्मांसैर्मध्वम्भोरिष्टपायिनः।
वत्सकादिर्हरिद्रादिर्वचादिर्वा ससैन्धवः॥४७॥
आढ्यवाते सुखाम्भोभिः पेयः षड्वरणोऽथवा।

स०-ऊरुस्तम्भे तु स्नेहादि न हितं श्लेष्माममेदोबाहुल्यात्। [अतः-] अस्माच्च हेतोः, तयोः-आमश्लेष्मणोः, क्षपणानि-क्षयकरणानि, युञ्ज्यात्। रूक्षोपचारार्थं मध्वम्भोरिष्टपायिनो यवादयः शाकैरीषल्लवणैस्तथा जलैः श्रृतैः। तथा मांसैः सह। किम्भूतैः ? जाङ्गलैस्तथा घृतरहितैर्हिताः।

लिह्यात्क्षौद्रेण वा श्रेष्ठाचव्यतिक्ताकणाघनात्॥४८॥
कल्कं समधु वा चव्यपथ्याग्निसुरदारुजम्।
मूत्रैर्वा शीलयेत्पथ्यां गुग्गुलुं गिरिसम्भवम्॥४९॥

स०-अथवा क्षौद्रेण त्रिफलादिकं कल्कं लिह्यात्। चव्यादिकं वा कल्कं माक्षिकान्वितं लिह्यात्। अथवा, गोमूत्रेण हरीतकीमभ्यसेत्। तथा, गुग्गुलुं सिलाजतु वा शीलयेत्।

व्योषाग्निमुस्तत्रिफलाविडङ्गैर्गुग्गुलुं समम्।
खादन् सर्वान् जयेद्व्याधीन् मेदः श्लेष्मामवातजान्॥५०॥

स०-व्योषादिभिर्नवभिर्द्रव्यैर्गुग्गुलं तुल्यं भक्षयन् सर्वान् मेदःश्लेष्मामवातजान् व्याधीन् हन्ति।

शाम्यत्येवं कफाक्रान्तः समेदस्कः प्रभञ्जनः।

क्षारमूत्रान्वितान् स्वेदान् सेकानुद्वर्तनानि च॥५१॥

कुर्याद्दिह्याच्च मूत्राढ्यैः करञ्जफलसर्षपैः।

मूलैर्वाऽप्यर्कतर्कारीनिम्बजैः ससुराह्वयैः॥५२॥

सक्षौद्रसर्षपापक्वलोष्टवल्मीकमृत्तिकैः।

कफक्षयार्थं व्यायामे सह्ये चैनं प्रवर्तयेत्॥५३॥

स्थलान्युल्लङ्घयेन्नारीः शक्तितः परिशीलयेत्।

स्थिरतोयं सरः क्षेमं प्रतिस्रोतो नदीं तरेत्॥५४॥

स०-एवं-प्रागुक्ते क्रियाक्रमे कृते सति, कफावृतो मरुत् समेदस्कः शाम्यति। तथा क्षारमूत्रयुतान् स्वेदादीन् कुर्यात्। तथा, करञ्जफलसर्षपैः प्रभूतमूत्रालोडितैर्लिम्पेत्। अथवा, मूलैरर्कादिजैः क्षौद्रादियुतैर्लिम्पेत्। एनं-ऊरुस्तम्भिनं, सोढुं शक्ये व्यायामे च कफक्षयाय प्रवर्तयेत्। शक्य इति "शकिसहोश्च" इति यत्। व्यायामं शनैः कारयेदित्यर्थः। तमेव व्यायाममाह-स्थलान्युल्लङ्घयेत्। नारीर्यथाशक्ति शीलयेत्। स्थिरतोयं सरस्तरेत्। क्षेमं-ग्रहादिरहितम्। तथा नदीं तरेत्। कथम् ? प्रतिस्रोतः-स्रोतोभिमुखम्।

श्लेष्ममेदःक्षये चात्र स्नेहादीनवचारयेत्।

स०-श्लेष्ममेदःक्षये सत्यस्मिन् स्नेहादीनवचारयेत्।

स्थानदूष्यादि चालोच्य कार्या शेषेष्वपि क्रिया॥५५॥

स०-शेषेषु वातरोगेषु स्थानदूष्यादीन्निरूप्य चिकित्सितं कार्यम्।

सहचरं सुरदारुं सनागरं

क्वथितमम्भसि तैलविमिश्रितम्।

पवनपीडितदेहगतिः पिबन्

द्रुतविलम्बितगो भवतीच्छया॥५६॥

स०-सहचरादि क्वथितं तैलयुतं पिबन् मारुतार्दितशरीर इच्छया द्रुतगमनो विलम्बितगमनो वा भवति। तन्त्रकृता सुमतिनैतद्वातस्य वृत्तस्य नामापि श्लिष्टं कृत्वा विबद्धम्। द्रुतविलम्बिताख्यं ह्येतद्वृत्तम्। तस्य च लक्षणम् (वृ. र. अ. ३।४९)-"द्रुतविलम्बितमाह नभौ भरौ।" इति।

रास्नामहौषधद्वीपिप्पलीशठिपौष्करम्।

पिष्ट्वा विपाचयेत्सर्पिर्वातरोगहरं पर्म्॥५७॥

स०-रास्नादीन् पिष्ट्वा सर्पिः सामान्यपरिभाषया विपाचयेत्। तच्च सुष्ठु वातरोगहृत्।

निम्बामृतावृषपटोलनिदिग्धिकानां

भागान् पृथक् दश पलान् विपचेद्घटेऽपाम्।

अष्टांशशेषितरसेन पुनश्च तेन

प्रस्थं घृतस्य विपचेत्पिचुभागकल्कैः॥५८॥

पाठाविडङ्गसुरदारुगजोपकुल्या-

द्विक्षारनागरनिशामिशिचव्यकुष्ठैः।

तेजोवतीमरिचवत्सकदीप्यकाग्नि-

रोहिण्यरुष्करवचाकणमूलयुक्तैः॥५९॥

मञ्जिष्ठयाऽतिविषया विषया यवान्या

संशुद्धगुग्गुलुपलैरपि पञ्चसङ्ख्यैः।

तत्सेवितं विधमति प्रबलं समीरं

सन्ध्यस्थिमज्जगतमप्यथ कुष्ठमीदृक्॥ ६०॥

नाडीव्रणार्बुदभगन्दरगण्डमाला-

जत्रूर्ध्वसर्वग्दगुल्मगुदोत्थमेहान्।

यक्ष्मारुचिश्वसनपीनसकासशोफ-

हृत्पाण्डुरोगमदविद्रधिवातरक्तम्॥ ६१॥

स०-निम्बादीनां पृथक् पृथक् दशपलानम्बुद्रोणे पचेत्। तेनाष्टांशशेषेण क्काथेन पाठादिभिर्यावान्यन्तैः कल्कीकृतैः कर्षांशैः श्रेष्ठगुग्गुलुपलैश्च पञ्चभिः सर्पिषः पुनः प्रस्थं विपचेत्। तत्-सर्पिः, शीलितं वायुमतिबलं सन्ध्यादिगतमपि पराकरोति। कुष्ठमपीदृशं(क्)-सन्ध्यादिगतं, हन्ति। तथा, नाडीव्रणादीन् शमयति। वसन्ततिलकाश्चतस्रः।

बलाबिल्वश्टते क्षीरे घृतमण्डं विपाचयेत्।

तस्य शुक्तिः प्रकुञ्चो वा नस्यं वाते शिरोगते॥ ६२॥

स०-बलाबिल्वाभ्यां क्कथिते क्षीरे घृतमण्डं विपाचयेत्। तस्य-घृतमण्डस्य पक्वस्य, कर्षद्वयं पलं वा नस्यं शिरोगते वाते प्रयोक्तव्यम्।

तद्वत्सिद्धा वसा नक्रमत्स्यकूर्मचुलूकजा।

विशेषेण प्रयोक्तव्या केवले मातरिश्वानि॥ ६३॥

स०-तद्वत्-घृतमण्डवत्, नक्रादिजा वसा केवले वाते विशेषेण प्रयोज्या।

जीर्णं पिण्याकं पञ्चमूलं पृथक् च

क्काथं क्काथाभ्यामेकस्तैलमाभ्याम्।

क्षीरादष्टांशं पाचयेत्तेन पाना-

द्वाता नश्येयुः श्लेष्मयुक्ता विशेषात्॥ ६४॥

स०-पुराणं पिण्याकं पञ्चमूलं च पृथक् क्काथ्यम्। क्काथाभ्यामेताभ्यां तैलमेकतः-एकस्मिन् तैलं मिश्रितं, क्षीरादष्टांशं पाचयेत्। तेन तैलेन वाता नश्यन्ति, विशेषेण कफयुक्ताः। वैश्वदेवी।

प्रसारिणीतुलाक्काथे तैलप्रस्थं पयःसमम्।

द्विमेदामिशिमञ्जिष्ठाकुष्ठरास्नाकुचन्दनैः॥ ६५॥

जीवकर्षभकाकोलीयुगुलामरदारुभिः।

कल्कितैर्विपचेत्सर्वमारुतामयनाशनम्॥ ६६॥

स०-प्रसारिणीतुलाक्काथे तैलप्रस्थं क्षीरसमं द्विमेदादिभिः कल्कितैः सामान्यपरिभाषयोक्तकल्कप्रमाणैर्विपचेत्। तच्चाशेषवातरोगघ्नम्।

समूलशाखस्य सहाचरस्य

तुलां समेतां दशमूलतश्च।

पलानि पञ्चाशदभीरुतश्च

पादावशेषं विपचेद्वहेऽपाम्॥ ६७॥

तत्र सेव्यनखकुष्ठहिमैला-

स्पृक्प्रियङ्गुनलिकाम्बुशिलाजैः।

लोहितानलदलोहसुराह्वैः

कोपनामिशितुरुष्कनतैश्च॥ ६८॥

तुल्यक्षीरं पालिकैस्तैलपात्रं

सिद्धं कृच्छ्रान् शीलितं हन्ति वातान्।

कम्पाक्षेपस्तम्भशोषादियुक्तान्

गुल्मोन्मादौ पीनसं योनिरोगान्॥ ६९॥

स०-सहाचरस्य मूलशाखान्वितस्य तुलां समेतां दशमूलाच्च तुलां शतावर्याः पलानि पञ्चाशत् जलस्य चतुर्द्रोणे पादावशेषं विपचेत्। तस्मिन् पादावशेषे सेव्यादिभिः पालिकैस्तैलाढकं तुल्यक्षीरं सिद्धं शीलितं कृच्छ्रान् मारुतान् कम्पादियुतान् गुल्मादींश्च हन्ति। स्वागताशालिन्यौ वृत्ते।

सहाचरतुलायास्तु रसे तैलाढकं पचेत्।

मूलकल्काद्दशपलं पयो दत्त्वा चतुर्गुणम्॥ ७०॥

अथवा नतषड्ग्रन्थास्थिराकुष्ठसुराह्वयात्।

सैलानलदशैलेयशताह्वारक्तचन्दनात्॥ ७१॥

सिद्धेऽस्मिन् शर्कराचूर्णादष्टादशपलं क्षिपेत्।

भेडस्य सम्मतं तैलं तत्कृच्छ्राननिलामयान्॥ ७२॥

वातकुण्डलिकोन्मादगुल्मवर्ध्मादिकान् जयेत्।

स०-सहाचरतुलायाः क्काथे तैलाढकं पचेत्। मूलकल्काद्दशपलानि क्षीरं तैलचतुर्गुणं दद्यादित्येवं पाकः। अथवा सहाचरतुलायाः क्काथे नतादिभिः सिद्धेऽस्मिन् तैले शर्करारजसोऽष्टादशपलानि क्षिपेत्। एतच्च मेडाख्यस्य महर्षेः सम्मतं दारुणान् वातरोगान् वातरोगान् वातकुण्डलिकादींश्च जयेत्।

बलाशतं छिन्नरुहापादं रास्नाष्टभीगिकम्॥ ७३॥

जलाढकशते पक्त्वा शतभागस्थिते रसे।

दधिमस्त्विक्षुनिर्यासशुक्तैस्तैलाढकं समैः॥७४॥

पचेत्साजयोर्धांशं कल्कैरेभिः पलोन्मितैः।

शठीसरलदार्वेलामञ्जिष्ठागुरुचन्दनैः॥७५॥

पद्मकातिबलामुस्ताशूर्पपर्णीहरेणुभिः।

यष्ट्याह्वसुरसव्याघ्रनखवर्षभकजीवकैः॥७६॥

पलाशरसकस्तूरीनलिकाजातिकोशकैः।

स्पृक्काकुङ्कुमशैलेयजातीकटुफलाम्बुभिः॥७७॥

त्वक्कुन्दरुककर्पूरतरुष्कश्रीनिवासकैः।

लवङ्गनखकङ्कोलकुष्ठमांसीप्रियङ्गुभिः॥७८॥

स्थौणेयतगरध्यामवचामदनकप्लवैः।

सनागकेसरैः सिद्धे दद्याच्चात्रावतारिते॥७९॥

पत्रकल्कं ततः पूतं विधिना तत्प्रयोजितम्।

कासं श्वासं ज्वरं छर्दिं मूर्छां गुल्मक्षतक्षयान्॥८०॥

प्लीहशोषावपस्मारमलक्ष्मीं च प्रणाशयेत्।

बलातैलमिदं श्रेष्ठं वातव्याधिविनाशनम्॥८१॥

स०-बलायाः शतं, गुडूच्याः पञ्चविंशतिपलानि, रास्नायाः सार्धानि द्वादशपलानि, एतच्च जलाढकशते पक्त्वाऽऽढकमात्रस्थिते क्वाथे दध्यादिभिस्तुल्यैस्तैलाढकमजाक्षीरस्यार्धाढकं शठ्यादिभिः पलोन्मितैः पचेत्। कटुफलं-लघुकङ्कोलकम्। प्लवः-कुटन्नटः। अवतारिते चास्मिन् पत्रकल्कं दद्यात्। अनन्तरमेतत्तैलं विधिना प्रयोजितं कासादीन् हन्ति। एतद्बलातैलं श्रेष्ठं गर्भव्यापदुक्ताद्बलातैलात्। तथा वातरोगघ्नम्।

पाने नस्येऽन्वासनेऽभ्यञ्जने च

स्नेहाः काले सम्यगेते प्रयुक्ताः।

दुष्टान् वातानाशु शान्तिं नयेयु-

र्वन्ध्या नारीः पुत्रभाजश्च कुर्युः॥८२॥

स०-एते-पूर्वोक्ताः स्नेहाः, पानादिषु काले-अवसरे, प्रयुक्ता दुष्टान् वातान् द्रागेव शमयेयुः। वन्ध्याश्च नारीः पुत्रभाजो विदध्युः। शालिनीवृत्तम्।

स्नेहस्वेदैर्द्रुतः श्लेष्मा यदा पक्वाशये स्थितः।

पित्तं वा दर्शयेद्रूपं बस्तिभिस्तं विनिर्जयेत्॥८३॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां चतुर्थे चिकित्सितस्थाने वातव्याधिचिकित्सितं नाम एकविंशोऽध्यायः॥२१॥

****

स०-स्नेहस्वेदैश्च यदा कफो द्रुतो-द्रवत्वं प्राप्तः, पक्वाशयस्थो रूपं दर्शयेत्, अथवा पित्तं रूपं दर्शयेत्, तं-कफं पित्तं वा, बस्तिभिर्विनिर्जयेत्।

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टाङ्गहृदयटीकायां सर्वाङ्गसुन्दराख्यायां चतुर्थे चिकित्सितस्थाने वातव्याधिचिकित्सितं नाम एकविंशोऽध्यायः समाप्तः॥२१॥

****

द्वाविंशोऽध्यायः।

अस्मादनन्तरं वातरक्तचिकित्सितमारभ्यते। यतो वातशोणिताख्यो व्याधिः प्रायो वातव्याधिरेव। शोणितयुक्तेन वायुना कृतत्वाद्बहुवक्तव्याच्च पृथगस्योपदेशः, इत्यत आह-

अथातो वातशोणितचिकित्सितं व्याख्यास्यामः।

इति ह स्माहुरात्रेयादयो महर्षयः। (गद्यसूत्रे॥२॥)

वातशोणितिनो रक्तं स्निग्धस्य बहुशो हरेत्।

अल्पाल्पं पालयन् वायुं यथादोषं यथाबलम्॥१॥

स०-वातशोणितिनो नरस्य स्निग्धस्य सतो बहून् वारान् लोहितमल्पाल्पं हरेद्वातकोपभयात्। अत एवाह,-पालयन् वायुम्, तथा यथादोषं-दोषानतिक्रमेण, तथा बलानतिक्रमेण। यथादोषमित्युपलक्षणार्थम्, दूष्याद्यनतिक्रमेणापि रक्तं हरेत्।

रुग्रागतोददाहेषु जलौकोभिर्विनिर्हरेत्।

शृङ्गतुम्बैश्चिमिचिमाकण्डूरुग्दूयनान्वितम्॥२॥

प्रच्छानेन सिराभिर्वा देशाद्देशान्तरं व्रजत्।

स०-रुग्रागादिषु सत्सु जलौकोभी रुधिरं हरेत्। चिमिचिमाद्यन्वितं रक्तं शृङ्गतुम्बैर्हरेत्। देशाद्देशान्तरं गच्छदसृक् प्रच्छानेन सिरया वा हरेत्।

अङ्गग्लानौ तु न स्राव्यं रूक्षे वातोत्तरे च यत्॥३॥

गम्भीरं श्वयथुं स्तम्भं कम्पं स्नायुसिरामयान्।

ग्लानिमन्यांश्च वातोत्थान् कुर्याद्वायुरसृक्षयात्॥४॥

स०-अङ्गग्लानौ तु सत्यां न साध्यं स्यात्। तथा रूक्षे वातोत्तरे च यद्रक्तं तदपि न स्राव्यम्। रूक्षे सति वातचिकित्सितं सेवेत। ननु, कस्माद्रक्तस्रावो न विधीयते? इत्याह- वायुरसृक्क्षयाद्गम्भीरशोफादीन् कुर्यात्।

विरेच्यः स्नेहयित्वा तु स्नेहयुक्तैर्विरेचनैः।

स०-विरेचनयोग्यः पुरुषः स्नेहयित्वा विरेचनद्रव्यैः स्नेहयुतैर्विरेचनीयः।

वातोत्तरे वातरक्ते पुराणं पाययेद्घृतम्॥५॥

वातोत्तरे वातरक्ते पुराणं घृतं पाययेत्।

श्रावणीक्षीरकाकोलीक्षीरिणीजीवकैः समैः।

सिद्धं सर्षभकैः सर्पिः सक्षीरं वातरक्तनुत्॥६॥

स०-श्रावण्यादिभिः ऋषभयुक्तैः कल्कीकृतैः सिद्धं घृतं दुग्धयुक्तं वा वातशोणितहृत्।

द्राक्षामधूकवरिभ्यां सिद्धं वा ससितोपलम्।

घृतं पिबेत्तथा क्षीरं गुडूचीस्वरसे श्रृतम्॥७॥

तैलं पयः शर्करां च पाययेद्वा सुमूर्च्छितम्।

स०-द्राक्षामधूकयोः क्काथे सिद्धं वा घृतं सशर्करं पिबेत्। क्षीरं च गुडूचीस्वरसे क्कथितं पिबेत्। तैलादि वा सम्मिश्रितं पाययेत्।

बलाशतावरीरास्नादशमूलैः सपीलुभिः॥८॥

श्यामैरण्डस्थिराभिश्च वातार्तिघ्नं श्रृतं पयः।

स०-बलादिभिः श्रृतं पयो वातरुजानाशनं स्यात्।

धारोष्णं मूत्रयुक्तं वा क्षीरं दोषानुलोमनम्॥९॥

स०-धारोष्णं क्षीरं गोमूत्रयुक्तं वा दोषानुलोमनं स्यात्।

पैत्ते पक्त्वा वरीतिक्तापटोलत्रिफलामृताः।
पिबेद्घृतं वा क्षीरं वा स्वादुतिक्तकसाधितम्॥१०॥

स०-पैत्ते-पित्ताधिके वातशोणिते, शतावर्यादीन् पक्त्वा पिबेत्। स्वादुतिक्तद्रव्यैः साधितं घृतं क्षीरं वा पिबेत्।

क्षीरेणैरण्डतैलं च प्रयोगेण पिबेन्नरः।
बहुदोषो विरेकार्थं जीर्णे क्षीरौदनाशनः॥११॥

स०-बहुदोषो नरो विरेकार्थमेरण्डतैलं क्षीरेण पिबेत्। जीर्णे तस्मिन् क्षीरौदनाशी स्यात्।

कषायमभयानां वा पाययेद्घृतभर्जितम्।
क्षीरानुपानं त्रिवृताचूर्णं द्राक्षारसेन वा॥१२॥

स०-अथवा, हरीतकीनां क्वाथं घृतभर्जितं पाययेत्। त्रिवृतामूलचूर्णं क्षीरानुपानं द्राक्षारसेन वा पाययेत्।

निर्हरेद्वा मलं तस्य सघृतैः क्षीरबस्तिभिः।

न हि बस्तिसमं किञ्चिद्वातरक्तचिकित्सितम्॥ १३॥

विशेषात्प्युपार्श्वोरुपर्वास्थिजठरार्तिषु।

स०-अथवा तस्य-वातरक्तवतो, मलं क्षीरबस्तिभिर्घृतान्वितैर्निर्हरेत्। यस्माद्वस्तितुल्यं नान्यद्वातरक्तचिकित्सितमस्ति। विशेषेण पाथ्वादिपीडासु बस्तिर्हितः।

मुस्ताधात्रीहरिद्राणां पिबेत्क्काथं कफोल्बणे॥ १४॥

सक्षौद्रं त्रिफलाया वा गुडूचीं वा यथातथा।

स०-मुस्तादीनां क्काथं माक्षिकान्वितं कफोत्तरे वातशोणिते पिबेत्। त्रिफलायाः क्काथं वा समाक्षिकं पिबेत्। सर्वेण प्रकारेण गुडूचीं वा पिबेत्।

यथार्हस्नेहपीतं च वामितं मृदु रूक्षयेत्॥ १५॥

स०-यो यस्यार्हः स्नेहस्तं पीतवन्तं कृतवमनं च मृदु कृत्वा रूक्षयेत्।

त्रिफलाव्योषपत्रैलात्वक्क्षीरीचित्रकं वचाम्।

विडङ्ग पिप्पलीमूलं लोमशां वृषकं त्वचम्॥ १६॥

ऋद्धिं लाङ्गलिकीं चव्यं समभागानि पेषयेत्।

कल्ये लिप्त्वाऽऽयसीं पात्रीं मध्याह्ने भक्षयेदिदम्॥ १७॥

वातास्रे सर्वदोषेऽपि परं शूलान्विते हितम्।

स०-त्रिफलादीनि समांशानि जलेन पेषयेत्। पिष्ट्वा च प्रभाते लौहीं पात्रीं लिप्त्वा मध्याह्न इदं भक्षयेत्। एतच्च वातरक्ते सर्वदोषेऽपि परं शूलान्विते हितम्।

कोकिलाक्षकनिर्यूहः पीतस्तच्छाकभोजिना॥१८॥

कृपाभ्यास इव क्रोधं वातरक्तं नियच्छति।

स०-कोकिलाक्षभोजिना कोकिलाक्षककाथः पीतो वातरक्तं शमयति। कृपाभ्यासः क्रोधं यथा \

पञ्चमूलस्य धात्र्या वा रसैर्लेलीतकीं वसाम्॥१९॥

खुडं सुरूढमप्यङ्गे ब्रह्मचारी पिबन् जयेत्।

स०-पञ्चमूलस्य रसैरामलकरसैर्वा लेलीतकीं वसां ब्रह्मचारी पिबन् शरीरे खुडं सुस्थिरीभूतमपि जयेत्।

इत्याभ्यन्तरमुद्दिष्टं कर्म

स०-इति-एवं, अभ्यन्तरं कर्म-चिकित्सितमुक्तम्।

बाह्यमतः परम्॥२०॥

स०-अतः परं बाह्यं कर्मोच्यते।

आरनालाढके तैलं पादसर्जरसं श्रृतम्।

प्रभूते खजितं तोये ज्वरदाहार्तिनुत्परम्॥२१॥

स०-काञ्जिकस्याढके तैलं चतुर्थभागसर्जरसं पक्वं प्रभूते जले मथितं परं ज्वरदाहार्तिनुत्।

समधूच्छिष्टमञ्जिष्ठं ससर्जरससारिवम्।

पिण्डतैलं तदभ्यङ्गाद्वातरक्तरुजापहम्॥ २२॥

स०-पूर्वोक्तं तैलं पक्वं सह मधूच्छिष्टमञ्जिष्ठासर्जरससारिवाभिरावापरूपाभिर्वर्तते यत्तदेवभूतं सत्पिण्डतैलमुच्यते। तच्चाभ्यङ्गाद्वातरक्तरुजाहरम्।

दशमूलश्रृतं क्षीरं सद्यः शूलनिवारणम्।

परिषेकोऽनिलप्राये तद्वत्कोष्णेन सर्पिषा॥ २३॥

स०-दशमूलेन क्षीरं सिद्धं शीघ्रमेव शूलहृत्, परिषेकेणेत्यर्थादवगम्यते। अत एवाह-परिषेकोऽनिलप्राये। तथेव कोष्णेन सर्पिषा-घृतेन, हितः।

स्नेहैर्मधुरसिद्धैर्वा चतुर्भिः परिषेचयेत्।

स्तम्भाक्षेपकशूकार्तं कोष्णैर्दाहे तु शीतलैः॥ २४॥

स०-अथवा स्तम्भादिभिरार्तं नरं चतुर्भिर्मधुरद्रव्यसाधितैः स्नेहैः कोष्णैः परिषेचयेत्। दाहे पुनस्तैरेव शीतैः परिषेचयेत्।

तद्वद्रव्याविकच्छागैः क्षीरैस्तैलविमिश्रितैः।

स०-अथवा, गव्याविकच्छागैः क्षीरैस्तैलविमिश्रितैः कोष्णैः स्तम्भाक्षेपकशूलार्तं तद्वत्-प्राग्वत्, परिषेचयेत्। दाहे पुनरेतैरेव क्षीतैः परिषेचयेत्।

निःक्काथैर्जीवनीयानां पञ्चमूलस्य वा लघोः॥ २५॥

स०-जीवनीयानां द्रव्याणां निःक्काथैर्लघोर्वा पञ्चमूलस्य क्काथैः कोष्णैः स्तम्भाद्यार्तं परिषेचयेत्। दाहे तु शीतलैः।

द्राक्षेक्षुरसमद्यानि दधिमस्त्वम्लकाञ्जिकम्।

सेकार्थं तण्डुलक्षौद्रशर्कराम्भश्च शस्यते॥ २६॥

स०-दाहे द्राक्षारस इक्षुरस मद्यानि दधिमस्त्वम्लकाञ्जिकं सेकार्थं शस्यते। तथा, तण्डुलाम्भः क्षौद्राम्भः शर्कराम्भश्च सेकार्थं शस्यते।

प्रियाः प्रियंवदा नार्यश्चन्दमार्द्रकरस्तनाः।

स्पर्शशीताह् सुखस्पर्शा घ्नन्ति दाहं रुजं क्लमम्॥ २७॥

स०-नार्यः प्रियाः-वल्लभाः, प्रियवचसश्चन्दनोनार्द्राः कराः स्तनाश्च यासां तां एवंविधाः स्पर्शेन शीताः सुखस्पर्शाश्च् दाहं [रुजं] क्लमं च घ्नन्ति।

सरागे सरुजे दाहे रक्तं ह्रत्वा प्रलेपयेत्।

प्रपौण्डरीकमञ्जिष्ठादार्वीमधुकचन्दनैः॥ २८॥

सितोपलैरकासक्तुमसूरोशीरपद्मकैः।

लेपो रुग्दाहवीसर्परागशोफनिबर्हणः॥ २९॥

स०-दाहे सरागे सति रक्तं ह्रत्वा प्रपौण्डरीकादिभिर्लेपः कार्यः। स च लेपो रुग्दाहादिनिबर्हणः। दार्वी-दारुहरिद्रा। मधुकं-यष्टीमधु। सितोपला-शर्करा। एरकासक्तुः-एरकाबीजसक्तुः।

वातघ्नैः साधितः स्निग्धः कृशरो मुद्गपायसः।

तिलसर्षपपिण्डैश्च शूलघ्नमुपनाहनम्॥ ३०॥

स०-कृशरः-तिलमुद्गादिकृतो, वातघ्नैः साधितो मुद्रपायसो-मुद्रक्षीरे यो मिश्रितः, तिलसर्षपपिण्डैश्चैतदुपनाहनं शूलघ्नम्।

औदकप्रसहानूपवेसवाराः सुसंस्कृताः।

जीवनीयौषधैः स्नेहयुक्ताः स्युरुपनाहने॥ ३१॥

स्तम्भतोदरुगायामशोफाङ्गग्रहनाशनाः।

जीवनीयौषधैः सिद्धा सपयस्का वसाऽपि वा॥ ३२॥

स०-औदकाद्या जीवनीयौषधैः साधिताः स्नेहयुक्ताः सुसंस्कृता उपनाहेन स्तम्भादिनाशनाः स्युः। अथवा, औदकादीनां वसा जीवनीयौषधैः सिद्धा सपयस्का स्तम्भादिनाशना स्यात्।

घृतं सहचरान्मूलं जीवन्ती छागलं पयः।

लेपः पिष्टास्तिलास्तद्वद्भृष्टाः पयसि निवृताः॥ ३३॥

स०-सहचरजीवन्तीमूलकल्को घृतच्छागपयोमिश्रो लेप उपयोगी भवति। पिष्टास्तिला भृष्टाः-भजिताः, पयसि-क्षीरे, निवृताः-प्रक्षिप्ताः, तद्वत्-प्राग्वत् प्रलेपे योज्याः।

क्षारप्रिष्टक्षुमां लेपमेरण्डस्य फलानि वा।

कुघाच्छूलनिवृत्त्यर्थं शताह्वां वाऽनिलेऽधिके॥ ३४॥

स०-क्षुमां-अतसीं, क्षीरेण पिष्टामधिकेऽनिले शूलनिवृत्यर्थं लेपं कुर्यात्। यद्वा, एरण्डस्य फलानि क्षीरपिष्टानि शूलनिवृत्त्यर्थं लेपं कुर्यात्। यद्वा, शतपुष्पां क्षीरे पिष्ट्वा शूलनिवृत्त्यर्थं लेपं कुर्यात्।

मूत्रक्षारसुरापक्वं घृतमभ्यञ्जने हितम्।

स०-मूत्रादिभिः सिद्धं घृतमधिकेऽनिलेऽभ्यञ्जने हितम्।

सिद्धं समधु शुक्तं वा सेकाभ्यङ्गे

स०-शुक्तं-चुक्रं, सिद्धं समाक्षिकं सेके परिषेकेऽभ्यङ्गे च हितम्।

कफोत्तरे॥ ३५॥

गृहधूमो वचा कुष्ठं शताह्वा रजनीद्वयम्।

प्रलेपः शूलनुद्वातरक्ते

स०-कफोत्तरे वातरक्ते गृहधूमादिप्रलेपो हितो भवति। शताह्वा-शतपुष्पा। रजनीद्वयं-हरिद्रे द्वे।

वातकफोत्तरे॥ ३६॥

मधुशिग्रोर्हितं तद्वद्बीजं धान्याम्लसंयुतम्।

स०-वातकफोत्तरे वातरक्ते मधुशिग्रोर्बीजं काञ्जिकसंयुक्तं तद्वत्-प्रलेपे हितम्।

मुहूर्तलिप्तमम्लैश्च सिञ्चेद्वातकफोत्तरे॥ ३७॥

स०-वातकफोत्तरे वातरक्ते मुहूर्तलिप्तमर्थादेव काञ्जिकपिष्टमधुशिग्रुबीजेन लिप्तमम्लैः-शुक्तादिभिः, सिञ्चेत्।

उत्तानं लेपनाभ्यङ्गपरिषेकावगाहनैः।

स०-उत्तानं वातरक्तं लेपादिभिराचरेत्-चिकित्सेत्।

विरेकास्थापनस्नेहपानैर्गम्भीरमाचरेत्॥ ३८॥

स०-गम्भीरं वातशोणितं विरेकादिभिराचरेत्।

वातश्लेष्मोत्तरे कोष्णा लेपद्यास्तत्र शीतलैः।

विदाहशोफरुक्कण्डूविवृद्धिः स्तम्भनाद्भवेत्॥ ३९॥

स०-वातश्लेष्मोत्तर उत्ताने वातशोणिते लेपाद्याः कोष्णा हिताः। तत्र-तस्मिन् वातश्लेष्मोत्तरे, शीतलैर्लेपनैः स्तम्भनात् विदाहादीनां विवृद्धिर्भवति।

पित्तरक्तोत्तरे वातरक्ते लेपादयो हिमाः।

उष्णैः प्लोषोषरुग्रागस्वेदावदरणोद्भवः॥ ४०॥

स०-वातरक्ते पित्तरक्तोत्तरे हिमाः शीता लेपादयो हिताः। तत्र पित्तरक्तोत्तरे वातरक्त उष्णैर्लेपैः प्लेषादयो भवन्ति।

मधुयष्ट्याः पलशतं कषाये पादशेषिते।

तैलाढकं समक्षीरं पचेत्कल्कैः पलोन्मितैः॥ ४१॥

स्थिरातामलकीदूर्वापयस्याभीरुचन्दनैः।

लोहहंसपदीमांसीद्विमेदामधुपर्णिभिः॥ ४२॥

काकोलीक्षीरकाकोलीशतपुष्पर्द्धिपद्मकैः।

जीवकर्षभजीवन्तीत्वक्पत्रनखवालकैः॥ ४३॥

प्रपौण्डरीकमञ्जिष्ठासारिवैन्द्रीवितुन्नकैः।

चतुष्प्रयोगं वातसृक्पित्तदाहज्वरार्तिनुत्॥ ४४॥

स०-मधुयष्ट्याः पलशतं क्वाथकल्पनया क्वथितं तस्मिन्कषाये पादशेषिते चतुर्भागावशिष्टे तैलस्याढकं समक्षीरमाढकप्रमाणेन क्षीरेण तुल्यं स्थिरादिभिः पलोन्मितैः कल्कीकृतैर्युक्तं पचेत्। तत्तैलं चतुष्प्रयोगं-पाने नस्येऽनुवासने बस्तौ च योजितं, वातासृगादीनामर्तिनुद्भवेत्। स्थिरा-शालिपर्णी। तामलकी-भूधात्री। पयस्या-अर्कपुष्पी। अभीरुः-शतावरी। लोहं-अगरु। हंसपदी-कीटमारी। मधुपर्णी-गुडूची। ऐन्द्री-विशाला। वितुन्नकं-परिपेलवम्।

बलाकषायकल्काभ्यां तैलं क्षीरसमं पचेत्।

सहस्रशतपाकं तद्वातासृग्वातरोगनुत्॥४५॥

रसायनं मुख्यतममिन्द्रियाणां प्रसादनम्।

जीवनं बृहणं स्वर्यं शुक्रासृग्दोषनाशनम्॥४६॥

स०-बलाकषायेण कल्केन च तैलं क्षीरेण समं तुल्यं पचेत्। तत्-तैलं, सहस्रपाकं शतपाकं वा वातशोणितवातरोगहरम्। तथा, मुख्यतमं-श्रेष्ठम्, तद्रसायनमिन्द्रियाणां-चक्षुरादीनां, प्रसादनं-प्रसादजनकम्। जीवनं-प्राणधारणम्। बृंहणं-उपचयकरम्। स्वर्यं-स्वरकरम्। शुक्रासृग्दोषाणां नाशनम्।

कुपिते मार्गसंरोधान्मेदसो वा कफस्य वा।

अतिवृद्ध्याऽनिले शस्तं नादौ स्नेहनबृंहणम्॥४७॥

कृत्वा तत्राढ्यवातोक्तं वातशोणितिकं ततः।

भेषजं स्नेहनं कुर्याद्यच्च रक्तप्रसादनम्॥४८॥

स०-अनिले-वाते, मेदसोऽतिवृद्ध्या कफस्य वाऽतिवृद्ध्या मार्गसंरोधात् कारणात् कुपिते स्नेहनबृंहणमौषधमादौ न शस्तम्। तत्र-मेदसावृते कफावृते वा वाते, आढ्यवातोक्तं यच्चिकित्सितमुक्तं तत्कार्यम्। ततः-अनन्तरं, वातशोणितिकं स्नेहनं भेषजं कुर्यात्। यच्चापि रक्तस्य प्रसादनं तदपि कुर्यात्।

वातशोणितचिकित्सितमुक्त्वा प्राणादिचिकित्सामाह-

प्राणादिकोपे युगपद्यथोद्दिष्टं यथामयम्।
यथासन्नं च भैषज्यं विकल्प्यं स्याद्यथाबलम्॥४९॥

स०-प्राणादीनां पञ्चानां युगपत्-तुल्यकालं कोपे, यथोद्दिष्टं-यथोक्तवातव्याधिचिकित्सानतिक्रमेण, यथामयं-प्राणादिकोपजनितरोगाद्यपेक्षया, यथासन्नं-प्राणादीनामन्यतममासन्नमनतिक्रम्य, यस्मिन्नेव रोगे य एव प्राणादीनामन्यतम आसन्नस्तमेव चिकित्सेत्। यथाबलं-बलानतिक्रमेण, प्राणादीनामन्यतमस्य बलिनः पूर्वप्रतीकारं कुर्यात्। इत्येवमत्र भैषज्यं-औषधं, विकल्प्यं-विकल्पनीयं, स्यात्-भवेत्।

नीते निरामतां सामे स्वेदलङ्घनपाचनैः।
रूक्षैश्चालेपसेकाद्यैः कुर्यात्केवलवातनुत्॥५०॥

स०-सामे वाते स्वेदादिभिस्तथा रूक्षैः सेकलेपादिभिर्निरामतां नीते पश्चात् केवलवातनुत्-शुद्धवातचिकित्सितं, कुर्यात्।

शोषाक्षेपणसङ्कोचस्तम्भस्वपनकम्पनम्।
हनुस्रंसोऽर्दितं खाञ्ज्यं पाङ्गुल्यं खुडवातता॥५१॥
सन्धिच्युतिः पक्षवधो मेदोमज्जास्थिगा गदाः।
एते स्थानस्य गाम्भीर्यात्सिध्येयुर्यत्नतो नवाः॥५२॥
तस्माज्जयेन्नवानेतान् बलिनो निरुपद्रवान्।

स०-शोषः-अङ्गशोषः। आक्षेपणं-आयामः। सङ्कोचः-अङ्गावयवानाम्। स्तम्भो-दण्डवत् स्तब्धता। स्वपनं-अचैतन्यम्। कम्पनं-वेपथुः। हनुस्रंसो-हनुभ्रंशः। अर्दितं-वायुना वक्रीकृतं

वक्रार्धम्। खाञ्यं-खञ्जता। पाङ्गुल्यं-पङ्गुता। खुडवातो-वातशोणितम्। सन्धिच्युतिः-स्थानाद्भ्रंशः। पक्षवधः-पक्षाघातः। तथा, ये गदाः-रोगाः, मेदआदिस्थानस्था भवन्ति त एते स्थानस्य गाम्भीर्यभावेन जाता नवाः-अचिरकालोत्पन्नाः, यत्नतः सिध्येयुः, बलिनः पुंसः। तस्मादेतान् शोषादीन् निरुपद्रवान् [नवान्-] शीघ्रजन्मनो, जयेत्-चिकित्सेत्।

वायौ पित्तावृते शीतामुष्णां च बहुशः क्रियाम्॥५३॥

व्यत्यासाद्योजयेत्सर्पिर्जीवनीयं च पाययेत्।

धन्वमांसं यवाः शालिर्विरेकः क्षीरवान् मृदुः॥५४॥

स०-वायौ पित्तावृते व्यत्यासात्-पर्यायेण, शीतामुष्णां च क्रियां बःउशः-शतशो, योजयेत्। तथा, जीवनीयं सर्पिस्तमातुरं पाययेत्। अत्र च पित्तावृते वायौ धन्वमांसं-जाङ्गलं पिशितं, योज्यम्। यवाः शालयश्च, तथा क्षीरवान्-क्षीरयुक्तो, मृदुर्विरेको योज्यः।

सक्षीरा बस्तयः क्षीरं पञ्चमूलबलाश्रृतम्।

कालेऽनुवासनं तैलैर्मधुरौषधसाधितैः॥५५॥

स०-अत्रापि पित्तावृते वायौ बस्तयः सक्षीरा योज्याः। पञ्चमूलं-महत्, तेन बलासहितेन श्रृतं क्षीरं प्रयोक्तव्यम्। काले-यथावसरमनुवासनयोग्ये, मधुरौषधसाधितैस्तैलैरनुवासनं देयम्।

यष्टीमधुबलातैलघृतक्षीरैश्च सेचनम्।

पञ्चमूलकषायेण वारिणा शीतलेन वा॥५६॥

स०-मधुयष्टितैलेन बलातैलेन घृतेन क्षीरेण च सेचनं हितम्। पञ्चमूलस्य कषायेण-क्काथेन, वा शीतलेन वारिणा पित्तावृते वाते सेचनं योज्यम्।

कफावृते यवान्नानि जाङ्गला मृगपक्षिणः।

स्वेदास्तीक्ष्णा निरूहाश्च वमनं सविरेचनम्॥५७॥

पुराणसर्पिस्तैलं च तिलसर्षपजं हितम्।

स०-कफावृते यवान्नानि हितानि। जाङ्गला मृगाः पक्षिणश्च तथा स्वेदा हिताः। तीक्ष्णा निरूहाः-आस्थापनविशेषाश्च। तीक्ष्णं वमनं सविरेचनं हितम्। पुराणं च सर्पिः, तिलसर्षपजं च तैलं हितम्।

संसृष्टे कफपित्ताभ्यां पित्तमादौ विनिर्जयेत्॥५८॥

स०-कफपित्ताभ्यां द्वाभ्यां संसृष्टे वात आदावेव पित्तं विनिर्हरेत्। पश्चात् कफं वातयुक्तं जयेत्।

कारयेद्रक्तसंसृष्टे वातशोणितिकीं क्रियाम्।

स०-रक्तसंसृष्टे वाते वातशोणितिकीं क्रियां कारयेत्।

स्वेदाभ्यङ्गरसाः क्षीरं स्नेहो मांसावृते हितम्॥५९॥

स०-मांसावृते स्वेदाभ्यङ्गमांसरसाः क्षीरं स्नेहश्च यथायोगमेतद्धितम्।

प्रमेहमेदोवातघ्नमाढ्यवाते भिषग्जितम्।

स०-आढ्यवाते-मेदसाऽऽवृते वायौ, प्रमेहघ्नं मेदोघ्नं वातघ्नं च भिषग्जितं-औषधं, हितम्।

महास्नेहोऽस्थिमज्जस्थे पूर्वोक्तं रेतसाऽऽवृते॥६०॥

स०-अस्थिमज्जस्थे वाते महस्नेहो-घृतमज्जावसातैलैः सिद्धो, यद्वा नारायणादिर्हितः। रेतसाऽऽवृते पूर्वोक्तं-वातव्याधौ शुक्रस्तवातोक्तं (हृ. चि. अ. २१।२०), हितम्।

अन्नावृते पाचनीयं वमनं दीपनं लघु।

स०-अन्नेनावृते पाचनीयमौषधं वमनं हितम्। दीपनीयं-आग्नेयं, यदौषधं लघु च-प्रकृत्या, तत्सर्वं हितम्।

मूत्रावृते मूत्रलानि स्वेदाश्चोत्तरबस्तयः॥६१॥

स०-मूत्रेणावृते वाते मूत्रलानि-त्रपुसादीनि, स्वेदाश्चोत्तरबस्तयोः हिताः।

एरण्डतैलं वर्चःस्थे बस्तिस्नेहाश्च मेदिनः।

स०-वर्चसाऽऽवृते वात एरण्डतैलं बस्तयश्च स्नेहाश्च मेदिनो हिताः।

कफपित्ताविरुद्धं यच्चश्च वातानुलोमनम्॥६२॥

सर्वस्थानावृतेऽप्याशु तत्कार्यं मातरिश्वनि।

स०-सर्वस्थानावृते मातरिश्वनि-वायौ, आशु-शीघ्रमेव, यदौषधं कफपित्तयोरविरुद्धं वातस्य चानुलोमनं तत्कार्यम्।

अनभिष्यन्दि च स्निग्धं स्रोतसां शुद्धिकारणम्॥ ६३॥

यापना बस्तयः प्रायो मधुराः सानुवासनाः।

प्रसमीक्ष्य बलाधिक्यं मृदु कार्यं विरेचनम्॥ ६४॥

रसायनानां सर्वेषामुपयोगः प्रशस्यते।

शिलाह्वस्य विशेषेण पयसा शुद्धगुग्गुलोः॥ ६५॥

लेहो वा भार्गवस्तद्वदेकादशसिताशितः।

स०-तस्मिन् सर्वधात्वावृते मातरिश्वनि यदनभिष्यन्दि स्निग्धं स्रोतसां यच्छुद्धिकरं तत्सर्वमन्नपानौषधं योज्यम्। यापनसंज्ञा बस्तयो बाहुल्येन मधुराः सानुवासनाः-स्नेहबस्तयश्च, हिताः। बलस्याधिक्यं प्रसमीक्ष्य-बुद्धा, मृदु विरेचनं हितम्। सर्वेषां रसायनप्रयोगाणामुपयोगः प्रशस्यते। तथा शुद्धस्य गुग्गुलोः प्रयोगः, भार्गवो लेहो-ब्राह्मरसायनोक्तश्च्यवनप्राशो वा, तद्वदेकादशसिताशितो-ब्राह्मरसायनोक्तः (?), प्रशस्यते।

अपाने त्वावृते सर्वं दीपनं ग्राहि भेषजम्॥ ६६॥

वातानुलोमनं कार्यं मूत्राशयविशोधनम्।

स०-अपाने वायौ येनकेनचिदावृते सर्वं भेषजं दीपनं-अग्नेः, ग्राहि-सङ्ग्रहणं, वातस्यानुलोमनं मूत्राशयस्य-बस्तेः, विशोधनं तत्सर्वं कार्यम्।

इति सङ्क्षेपतः प्रओक्तमावृतानां चिकित्सितम्॥ ६७॥

प्राणादीनां भिषक्कुर्याद्वितर्क्य स्वयमेव तत्।

स०-इति-अनन्तरोक्तेन प्रकारेण, आवृतानां सङ्क्षेपतश्चिकित्सितं-औषधं, प्रोक्तम्। यत् प्राणादीनां पञ्चानामावृतानां चिकित्सितं तत्-पूर्वोक्तं, भिषक् स्वयमेव वितर्क्य-विचार्य, कुर्यात्।

उदानं योजयेदूर्ध्वमपानं चानुलोमयेत्॥६८॥

समानं शमयेद्विद्वांस्त्रिधा व्यानं तु योजयेत्।

प्राणो रक्ष्यश्चतुर्भ्योऽपि तत्स्थितौ देहसंस्थितिः॥६९॥

स्वं स्वं स्थानं नयेदेवं वृतान् वातान् विमार्गगान्।

स०-उदानाख्यं वायुमूर्ध्वमेव योजयेत्-यतोऽसौ सदैवोर्ध्वगामी, तथा प्रयतेत यथोर्ध्वगामी भवति। अपानाख्यं चानिलमनुलोमयेत्-अधोगतिर्ह्यं सदैव समीरणस्तस्मादधोगमनं यथाऽस्य सम्पद्येत तथा चिकित्सितं कार्यमित्यर्थः। समानाख्यं वायुं विद्वान् वैद्यो वातघ्नैरौषधैः शमयेत्। अयमभिप्रायो ग्रन्थकृतः-किल नास्योर्ध्वगामिता नैवाधोगामिता यथा सम्पद्यते तथा चिकित्सितं हितम्, किं तर्हि स्वस्थानप्रतिपत्तिरेवेत्येवं चिकित्सा कार्येति। व्यानाख्यं तु वायुं त्रिधा योजयेत्-ऊर्ध्वाधोमध्यगमनं यथाऽस्य शरीरे सम्पद्यते तथा चिकित्सा कार्येति। तथा, प्राणो वायुश्चतुर्भ्योऽपि-उदानापानसमानव्यानेभ्योऽपि, सर्वप्रयत्नेन रक्ष्यः-त्थोदानादिभिर्नास्य बाधा सम्पद्यते तथा चिकित्सा कार्येत्यर्थः। यतस्तस्य-प्राणस्य, स्थितौ सत्यां देहस्य-शरीरस्य, संस्थितिः-जीवनं भवति, प्राणं विना न जीवतीत्यथः। एवं-अनेन प्रकारेण, वातान् विमार्गगानावृतान् स्वं स्वं स्थानं नयेत्।

सर्वं चावरणं पित्तरक्तसंसर्गवर्जितम्॥७०॥

रसायनविधानेन लशुनो हन्ति शीलितः।

स०-सर्वमेवावरणं वातानां पित्तरक्तसंसर्गवर्जितं रसायनविधिना शीलितो लशुनो हन्ति। एतेन पित्तरक्तसंसृष्टमावरणं वर्जयित्वा सर्वावरणान्यन्यानि लशुनः केवल एव निहन्ति।

पित्तावृते पित्तहरं मरुतश्चानुलोमनम्॥७१॥

स०-पित्तावृत उदानादौ पित्तहरं पवनस्य चानुलोमनं हितम्।

रक्तावृतेऽपि तद्वच्च खुडोक्तं यच्च भेषजम्।

रक्तपित्तानिलहरं विविधं च रसायनम्॥७२॥

स०-रक्तावृते तद्वत्-पित्तहरं तथैव मारुतानुलोमनं, हितम्। यच्च खुडोक्तं-वातशोणितोक्तं, भेषजं तथा पित्तरक्तानिलहरं च हितम्, विविधं रसायनं च। विविधं-नानाप्रकारं, सर्वदोषदूष्यादिकं चालोक्य यथायोगं विधेयम्।

यथानिदानं निर्दिष्टमिति सम्यक् चिकित्सितम्।

आयुर्वेदफलं स्थानमेतत्सद्योऽर्तिनाशनात्॥७३॥

स०-इति-अनेन प्रकारेण, यथानिदानं-निदानानतिक्रमेण, यथोद्देशस्तथा निर्देशः। अनया रीत्या सर्वमेव चिकित्सितं निर्दिष्टम्। एतच्चायुर्वेदफलभूतं स्थानम्, एतदुपदेशेन सद्योऽर्तिनाशनाद्धेतोः।

चिकित्सितं हितं पथ्यं प्रायश्चित्तं भिषग्जितम्।

भेषजं शमनं शस्तं पर्यायैः स्मृतमौषधम्॥७४॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां चतुर्थे चिकित्सितस्थाने वातशोणितचिकित्सितं नाम द्वाविंशोऽध्यायः॥२२॥

****

स०-चिकित्सितादय औषधस्य पर्यायाः स्मृता इति।

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टाङ्गहृदयटीकायां सर्वाङ्गसुन्दराख्यायां चतुर्थे चिकित्सितस्थाने वातशोणितचिकित्सितं नाम द्वाविंशोऽध्यायः समाप्तः॥२२॥

****

कल्पसिद्धिस्थानम्।

प्रथमोऽध्याय:।

श्रीगणेशाय नमः। चिकित्सितस्थानादन्तरं कल्पस्थानमारभ्यते चिकित्सितस्थानस्य कल्पस्थानापेक्षत्वात्। तथा हि प्रागध्यगीष्ट (ह्र. चि. अ. १/८)- "तर्पणेन रसेनेक्षोर्मद्यैः कल्पोदितानि वा। वमनानि प्रयुञ्जीत" इति। तदेवमाद्युपदेशात् सपेक्षत्वमस्य। तस्मात् कल्पस्थानमुच्यत इत्याह--

अथातो वमनकल्पं व्याख्यास्यामः।

इति ह स्माहुरात्रेयादयो महर्षयः। (गद्यसूत्रे॥२॥)

स०-वमनं-ऊर्ध्वं मुखेन दोषहरणम्, तस्य कल्प:-कल्पनं योजनमित्यर्थ:। शेषमायुष्कामीयाध्यायवद्व्याख्येयम्।

आ० र०- श्रीगणेशायनमः। अथ कल्पस्थानारम्भः। वमनकल्पं व्याख्यातुं प्रतिजानीते- अथेति। अथ वमनकल्पः। तत्र सङ्ग्रहे (क.अ. १)-"वमन्द्रव्याणां मदनफलजीमूतकेक्ष्वाकुद्विकोशातकीकुटजफलानि श्रेष्ठानि। तेष्वपि मदनफलम्। दोषदूष्यादिवशाच्चैषामेतत्कल्पनानां च प्राधान्यम्। दोषादीनामेव चातिबह्ववस्थाभेदाद्वमनादिषु कल्पनानां व्यापदां साधनानां च यदसङ्ख्येयत्वं, अतो बुद्धिमतां विकल्पमार्गदर्शनार्थमुदाहरणमात्रं कल्पसिद्धिस्थानमुपदेक्ष्यते।" इति।

अथ मदनकल्पः।

वमने मदनं श्रेष्ठं, त्रिवृन्मूलं विरेचने।

नित्यमन्यस्य तु व्याधिविशेषेण विशिष्टता॥१॥

स०-वमनविषये नित्यं मदनं श्रेष्ठम्, निरपायित्वादन्यद्रव्यविषयेऽपि वा तस्योपयोगात् सर्वत्रानिषिद्धप्रसरत्वाच्च। लाघवमिच्छंश्च तन्त्रकृदिदमवोचत्-'त्रिवृन्मूलं विरेचने'इति। यथा मदनं वमने नित्यं श्रेष्टं, तथा त्रिवृन्मूलं विरेचने, निरपायित्वादिहेतुना। मदनं वर्जयित्वा व्याधिवशादन्यस्य-जीमूतादेः, विशिष्टता। वक्ष्यति हि (श्ल्को. १९)- "जीमूतं तु विशेषतः। प्रयोक्तव्यं ज्वरश्वासकासहिध्मादिरोगिणाम्। " इति। एवं त्रिवृन्मूलं वर्जयित्वा परस्य विरेचनद्रव्यस्य व्याधिविशेषेण विशिष्टत्वम्, न तु त्रिवृन्मूलवत्सर्वत्रानिषिद्धप्रसरत्वं निरपायित्वं च। तथा चोक्तम् (सङ्गहे सू. अ. १३)- "त्रिवृत्सुखविरेचनानाम्। " इति। तदेवं वमने मदनं श्रेष्ठं त्रिवृन्मूलं विरचने सर्वदेति स्थितम्।

आ० र०- मानत्रिवृतोः श्रेष्ठत्वमाह-वमन इति। नित्यं अव्यभिचारेण।

फलानि नातिपाण्डूनि न चातिहरितान्यपि। आदायान्हि प्रशस्तर्क्षे मध्ये ग्रीष्मवसन्तयोः॥२॥

प्रमृच्य कुशमुत्तोल्यां क्षिप्त्वा बध्वा प्रलेपयेत्। गोमयेनानु मुत्तोलीं धान्यमध्ये निधापयेत्॥३॥

मृदुभूतानि मध्विष्टगन्धानि कुशवेष्टनात्। निष्कृष्टानि गतेऽष्टाहे शोषयेत्तान्यथातपे॥४॥

तेषां ततः सुशुष्काणामुद्धृत्य फलपिप्पलीः। दधिमध्वाज्यपललैर्मृदित्वा शोषयेत्पुनः॥५॥

ततः सुगुप्तं संस्थाप्य कार्यकाले प्रयोजयेत्।

स्०-अथश्ब्दोऽत्र प्रस्तुतौ मदनस्य प्रस्तावे। मदनस्य फलानि पाण्डूनि गृहीत्वा, न त्वतिपाण्डून्यतिक्रान्तपाकत्वात्, न चातिहरितान्यामत्वात्। कदाऽऽदाय? प्रशस्तनक्षत्रे दिवसे। कस्मिन्नृतौ? मध्ये ग्रीष्मवसन्तयोः। एवमृतुसन्धौ गृहीतानि प्रमृज्य-व्यपगतमलादिदोषाणि कृत्वा, कुशमय्यां मुत्तोल्यां-मूटिकायां, क्षिप्त्वा पुनरुपरिष्टाब्दध्द्वा च ततो गोमयेन तां मुत्तोलीं लिम्पेत्। अनन्तरं धान्यमध्ये निधापयेत्-स्थापयेत्। कुशानां समुहो रचनाविशेषनिष्पादितः कुशमुत्तोलीत्युच्यते। मृदुभूतानि तानि मध्विष्टगन्धानि-कदाचिन्मधुगन्धानि कदाचिदिष्टगन्धानि,कुशवेष्टानादष्टाहेन ज्ञात्वा अनन्तरमष्टाहेऽतिक्रान्ते कुशमुत्तोल्याः निष्कृष्टानि-बहिकृतानि,अनन्तरमातपे शोषयेत्। ततः-अनन्तरं तेषां-मदनफलानां, [सुष्ठु] शुष्काणां फलपिप्पलीरुद्धृत्य दधिमध्वाज्यपललैर्मृदित्वा-सङ्गृह्य,पुनरातपे शोषयेत्। ततः-अनन्तरं, सुष्ठु गुप्तं धारयित्वा कार्यकाले-वमनावसरे, ताः प्रयोजयेत्।

आ० र०- मदनसंस्कारमाह-फलानीति। फलानि-मदनफलानि। प्रमृज्य-विशोध्य। कुशमुत्तोल्यं-कुशमयरज्जुवेष्टनिकायाम्। तां च मुत्तोलीं रज्जुभिर्बध्वा गोमयेन लेपयेत्। अनु-पश्चात्, धान्यराशौ निधापयेत्। सङ्ग्रहे तु (क.अ.१)-"यवबुसमाषशालिव्रीहिकुलत्थमुद्गान्यतमराशौ" इति। ततोऽष्टाहे गते मृदुभूतानि मधुवदिष्टगन्धानि कुशवेश्टनान्निष्कृष्य आतपे शोषयेत्। ततः सुशुष्काणां फलपिप्पलीः-मज्जानं, उद्धरेत्। ततो दध्यादिभिर्मर्दयेत्। ततः पुनः शोषयेत्। ततो गुप्तं स्थापयेत्। सङ्ग्रहे तु (क.अ. १)-"नवंकलशमरजस्कमाकण्ठं पूरयित्वा" इत्यधिकम्।

अथादाय ततो मात्रां जर्जरीकृत्य वासयेत्॥६॥

शर्वरीं मधुयष्ट्या वा कोविदारस्य वा जले।

कर्बुदारस्य बिम्ब्या वा नीपस्य विदुलस्य वा॥७॥

शणपुष्प्याः सदापुष्प्याः प्रत्यक्पुष्प्युदकेऽथवा।

ततः पिबेत्कषायं तं प्रातर्मृदितगालितम्॥८॥

सुत्रोदितेन विधिना साधु तेन तथा वमेत्।

स०-अथ-अनन्तरं, ततः-पिप्पलीभ्यो, मात्रां-परिमाणं प्रायेण देशकालादिवशाद्वा मात्रां, विकल्प्यानन्तरं तां मात्रां जर्जरीकृत्य-सञ्चूर्ण्य, मधुयष्टयादीनामन्यतमस्य जले शर्वरीं-सकलां रात्रिं, वासयेदभिषवणाय। ततः-अनन्तरं, [प्रातः] तं कषायं मृदितगालितं पूर्वं मृदितं पश्चाद्गालितं-वस्त्रपूतं कृत्वा, सुत्रोदितेन विधिना-"श्वो वम्यं" (सू. अ. १८।१२) इत्यादिग्रन्थोक्तेन, पिबेत्। [तथा-] एवं कृते सति, तेन साधु वमेत्।

आ० र०- मदनप्रयोगमाह-अथेति। ततः-फलपिप्पलीभ्यः, मात्रां-अन्तर्नखमुष्टिं, यावद्व साधु मन्येत। कोविदारः-काञ्चनारः। कर्बुदारः-श्लेष्मातकः। बिम्बी-तुण्डिकेरी। नीपः-कदम्बभेदः। विदुलो-वेतसः। शणपुष्पी-घण्टारवा। सदापुष्पी-वनकार्पासी। प्रत्यक्पुष्पी-अपामार्गः। तेन-तथाकृतेन कषायेण, साधु वमेत्। अन्यथा त्वसाधु।

श्लेष्मज्वरप्रतिश्यायगुल्मान्तर्विद्रधीषु च॥९॥

प्रच्छर्दयेद्विशेषेण यावत्पित्तस्य दर्शनम्।

स०-विशेषेण श्लेष्मज्वरादिषु वमेत्। यावत्पित्तस्य दर्शनम्।

आ० र०- श्लेष्मज्वरादौ विशेषमाह-श्लेष्मज्वरेति। श्लेष्मज्वरादिषु तु विशेषेण पुनःपुनर्वामयेदापित्तदर्शनात्।

फलपिप्पलिचूर्णं वा क्काथेन स्वेन भावितम्॥१०॥

त्रिभागत्रिफलाचूर्णं कोविदारादिवारिणा।

पिबेज्ज्वरारुचिष्ठेवग्रन्थ्यपच्यर्बुदोदरी॥११॥

स०-अथवा मदनफलपिप्पलीचूर्णं स्वेन-फलपिप्पलीक्काथेन, भावितं त्रिभागत्रिफलाचूर्णान्वितं कोविदारादिजलेन पिबेत्, ज्वरादिषूदरान्तेषु।

आ० र०- वमनान्तरमाह-फलपिप्पलीति। स्वेन-फलपिप्पलीक्काथेन। त्रिभागं-तृतीयभागतुल्यं, सम्मीलितं त्रिफलाचूर्णं यस्मिंस्तत्तथा। ज्वरादिमान् पिबेत्। ष्ठेवः-कफप्रसेकः।

पित्ते कफस्थानगते जीमूतादिजलेन तत्।

स०-पित्ते कफस्थानगते सति ग्रन्थ्या (ज्वरा) दिमान्नरस्तत्-मदनफलं, जीमूतादिजलेन पिबेत्।

आ० र०- वमनान्तरमाह-पित्त इति। कफस्थानगते पित्ते तत्-फलपिप्पलिचूर्णं, जीमुतादिजलेन पिबेत्। जीमूतादयः-श्रेष्ठेषूक्ताः।

हृद्दाहेऽधोस्रपित्ते च क्षीरं तत्पिप्पलीश्रृतम्॥१२॥

क्षौरेर्यीं वा

स०-हृदयदाहेऽधोगे रक्तपिते [च] तस्य-मदनफलस्य, पिप्पलीभिः क्वथितं क्षीरं क्षैरेयीं वा पिबेत्। तन्त्रान्तरे च क्षीरश्रपणविधिरुक्तः-"द्रव्यादष्टगुणं क्षीरं क्षीरात्तोयं चतुर्गुणम्। क्षीरावशेषः कर्तव्यः क्षीरपाके त्वयं विधिः॥" इति। अस्रपित्त इत्येतावत्युक्त ऊर्ध्वगोभयगयोरस्रपित्तयोर्वमनायोग्यत्वादेवाधोग्रहणे सिद्धे पुनरधोग्रहणं सुखतरप्रतिपत्त्यर्थम्। क्षैरेयीमिति "क्षीराड् ढञ्" इति ढञ्, "टिड् ढाण" इति ङीप्।

आ० र०- अन्यदाह-हृद्दाह इति। फलपिप्पलीश्रृतं क्षीरं क्षैरेयीं वा हृद्दाहेऽधोस्रपित्ते च पिबेत्। क्षैरेयीं-क्षीरपेयाम्। क्षीरं च-तत्पिप्पलीश्रृतमेव। सङ्ग्रहे तु (क.अ.१)-"तस्य वा पयसः शीतस्य सन्तानिकाञ्जलिं पित्ते प्रकुपिते उरःकण्ठहृदये च तनुकफोपदिग्धे।" इति।

कफच्छर्दिप्रसेकतमकेषु तु।

दध्युत्तरं वा दधि वा तच्छृतक्षीरसम्भवम्॥ १३॥

स०-कफच्छर्दिप्रसेकतमकेषु दध्युत्तरं-दधिसरमेव हितम्। अथवा दधि हितम्। उभयमपि वमने हितं तच्छृतक्षीरसम्भवम्। तच्छृतं-मदनपिप्पलीश्रृतम्।

आ० र०- अन्यदाह-कफच्छर्दीति। कफच्छर्द्यादिषु तु तच्छृतक्षीरजं दधि दध्युत्तरं बा।

फलादिक्काथकल्काभ्यां सिद्धं तत्सिद्धदुग्धजम्।

सर्पिः कफाभिभूतेऽग्नौ शुष्यद्देहे च वामनम्॥ १४॥

स०-क्काथश्च कल्कश्च क्काथकल्कौ, फलादीनां-मदनफलजीमूतकेक्ष्वादीनां क्काथकल्कौ, ताभ्यां सिद्धं-पक्वं, सर्पिः कफेनाभिभूतेऽग्नौ शुष्यच्छरीरे च वामनं हितम्। किम्भूतं सर्पिः? तत्सिद्धदुग्धजम्, -तैश्च-फलादिभिः श्रृतं(सिद्धं), तत्सिद्धं च तद्दुग्धं च तस्मादुद्धृतम्।

आ० र०- अन्यदाह-फलादीति। फलादीनि-श्रेष्ठत्वेनोक्तानि, तेषां क्काथः, तेषामेव कल्कः, तेषामेव क्षीराज्जातं सर्पिः, एकत्र सिद्धं मन्दाग्नौ कार्श्ये च पिबेत्। सङ्ग्रहे तु (क. अ. १) -"फलमज्जचूर्णमिश्रेण वाऽऽरग्वधादिद्रव्याणां गोपघोण्टाभूनिम्बबाणवर्जानां ससोमवल्कपञ्चकोलकानामन्यतमस्य निर्यूहेण साधितं लेहमुपयुञ्जीत। फलमज्जचूर्णमिश्रेण वा रेणुकैलाशताव्हाकुस्तुम्बुरुतगरकुष्ठत्वक्कोरकमरुबाकागुरुगुग्गुलुवालकश्रीवेष्टकपरिपेलवमांसी

शैलेयकस्थौणेयकसुरसा- पालेवतपूत्यशोकरोहिणीनां द्वाविंशतेरन्यतमस्य कषायेण साधितामुत्कारिकामोदनं वा भक्षयेत्। फलपिप्पलीस्वरसकषायपरिपीतैर्वा तिलशालितन्दुलपिष्टैस्तत्कषायोपसृष्टैः सुरसादिद्रव्यान्यतमनिर्यूहोपसृष्टैर्वा शष्कुलीरपूपानन्यं वा भक्ष्यं साधियित्वा भक्षयेत्।" इति।

स्वरसं फलमज्ञो वा भल्लातकविधिश्रृतम्।

आदर्वीलेपनात्सिद्धं लीढवा प्रच्छर्दयेत्सुखम्॥ १५॥

तं लेहं भक्ष्यभोज्येषु तत्कषायांश्च योजयेत्।

स०-फलमज्ञो वा स्वरसं भल्लातकविधानेन श्रृतं दर्वीलेपं यावत् पक्त्वा लीढ्वा सुखं वमेत्। तं च लेहं भक्ष्यादिषु तथा तस्य-मदनफलस्य, कषायान् योजयेत्।

आ० र०- अन्यदाह-स्वरसमिति। भल्लातकविधिः-उक्तो रसायनेषु (हृ.उ.अ. ३९१७२)।

वत्सकादिप्रतीवापः कषायः फलमज्जजः॥ १६॥

निम्बार्कान्यतरक्काथसमायुक्तो नियच्छति।

बद्धमूलानपि व्याधीन् सर्वान् सन्तर्पणोद्भवान्॥ १७॥

स०-मदनफलमज्जजो वा कषायो वत्सकादिगणप्रतीवापो (हृ. सू. अ. १५।३३) निम्बार्कान्यतरक्काथसंयुक्तो व्याधीन् समूलानपि नियच्छति। कीदृशान् ? सन्तर्पणजान्।

आ० र०- अन्यदाह-वत्सकादीति।

राठपुष्पफलश्लक्ष्णचूर्णैर्माल्यं सुरुक्षितम्।

वमेन्मण्डरसादीनां तृप्तो जिघ्रन् सुखं सुखी॥ १८॥

एवमेव फलाभावे कल्प्यं पुष्पं शलाटु वा।

इति मदनकल्पः।

स०-मदनपुष्पफलसूक्ष्मचूर्णैः सुरूक्षितं-तद्रजसाऽतिधूसरितं, पुष्पं जिघ्रन् मण्डरसादीनां तृप्तः , आदिग्रहणात् कृशराक्षीरयवागूनां परिग्रहः , तथाविधो जिघ्रन् सुखी-क्लेशमसहिष्णुः , सुखेन वमेत्। एवमेव-अनेनैव क्रमेण, फलाभावे सति पुष्पंप्रकृतत्वान्मदनस्य, कल्पनीयम्। "अथादाय ततो मात्रां जर्जरीकृत्य वासयेत्। शर्वरीं मधुयष्ट्या व कोविदारस्य वा जले॥" (श्लो. ६) इत्यादिविधिना शलाटु वा-बालमदनं अपक्वं फलं वा, एवं कल्पनीयम्।

आ० र०- अन्यदाह-राठपुष्पफलेति। राठो-मदनः। सुरुषितं-सुष्ठु अवकीर्णम्। शलाटु-बालं फलम्। सङ्ग्रहे तु (क.अ. १)-"फलपिप्पलीनां वा फलादिनिर्यूहेणैकविंशतिकृत्वः सुभावितानां कुसुमरजःसदृशेन चूर्णेनावचूर्णयेत् सरसि सरोरुहं बृहत्सायाह्ने तद्रात्रिमुषितं प्रभाते पुनरवचुर्णितमुद्दृत्य हरिद्राकृशराक्षीरयवागूनामन्यतमं सैन्धवगुडफाणितोपेतमाकण्ठं पीतवानुपजिघ्रन् सुकुमारः समुचितगन्धसम्पदुत्क्लिष्टकफपित्तो भेषजद्वेषी च तथा सुखेन छर्दयति। एतेन सर्वमाल्यगन्धप्रावरणपटा व्याख्याताः।" इति।

अथ जीमूतकल्पः।

जीमूताद्याश्च फलवत्

स०-जीमूततुम्बीकोशातक्याद्याः कुटजफलपर्यन्ताः फलवत्-मदनफलतुल्यविधिना, कल्प्याः।

आ० र०- मदनविधिं जीमूतादिष्वतिदिशति-जीमूताद्या इति।

जीमूतं तु विशेषतः॥ १९॥

प्रयोक्तव्यं ज्वरश्वासकासहिध्मादिरोगिणाम्।

स०-विशेषेण तु जीमूतो ज्वरादिषु योज्यः।

आ० र०- अथ जीमूतकल्पः। तत्र विषयमाह-जीमूतमिति। जीमूतं-देवदाली।

पयः पुष्पेऽस्य निर्वृत्ते, फले पेया पयस्कृता॥ २०॥

लोमशे क्षीरसन्तानं, दध्युत्तरमलोमशे।

श्रृते पयसि दध्यम्लं जातं हरितपाण्डुके॥ २१॥

आसुत्य वारुणीमण्डं पिबेन्मृदितगालितम्।

कफादरोचके कासे पाण्डुत्वे राजयक्ष्मणि॥ २२॥

स०-अस्य-जीमूतस्य, पुष्पे सम्पन्ने पयः-क्षीरं, जीमूतकश्रृतं प्रयोज्यम्। फलेऽस्य निष्पन्ने पयस्कृता-जीमूतश्रृतक्षीरनिष्पादिता, पेया योज्या। जीमूतफलस्य लोमशालोमशतया मृदुकठिनभेदेन द्वैविध्यम्। लोमशे तस्मिन् जीमूतफले श्रृतक्षीरस्य या सन्तानिका-शीतीभूतस्योपरिष्टाद्घनोऽवयवः , तं वमने पिबेत्। अलोमशे जीमूतफले-काठिन्यमागते, तच्चूर्णयुतं दध्युत्तरं-दधिसरं, पिबेत्। श्रृते पयसि प्रकृतत्वाज्जीमूतफलैः श्रृते। किम्भूते? हरितपाण्डुके,-लोमशालोमशयोर्मध्यमावस्थां प्राप्ते सति, दध्यम्लं जातं पिबेत्। अम्लमेव दधि-दध्यम्लम्, केचित्तु मस्तु दध्यम्लमित्याहुः। जीमूतफलेन वाऽऽसुत्य वारुणीमण्डं पिबेत्। किम्भूतम्? मृदितगालितं,-पूर्वं मृदितं खजादिना, पश्चाद् गालितं-प्रस्रुतम्। केषु? कफारोचकादिषु।

आ० र०- प्रयोगमाह-पय इति। अस्य-जीमूतस्य, पुष्पे निर्वृत्ते पुष्पसिद्धं पयः प्रयोक्तव्यम्। फले फलसिद्धक्षीरपेया। लोमशे फले तत्सिद्धक्षीरसन्तानिका। च्युतलोमनि फले तत्सिद्धक्षीरदधिसरं दधि वा। हरितपाण्डुनि फले तत्सिद्धक्षीरजमम्लं दधि क्षीरं वा। हरितपाण्डुभिर्वारुणीमण्डं आसुनुयात्-अवस्थान्तरं नयेत्। ततो मृदितगालितं कफजेष्वरो चकादिषु पिबेत्।

इयं च कल्पना कार्या तुम्बीकोशातकीष्वपि।

स०-इयं च कल्पना-'पयः पुष्पेऽस्य निर्वृत्ते' इत्यादिका 'आसुत्य वारुणीमण्डं' इतिपर्यन्ता, तुम्बीकोशातकीष्वपिकार्या।

आ० र०- जीमूतकल्पनां तुम्बीकोशातक्योरतिदिशतिइयमिति। इयं-अवस्थाभेदेन, कल्पना तुम्ब्यां कोशातकीद्वये च।

पर्यागतानां शुष्काणां फलानां वेणिजन्मनाम्॥ २३॥

चुर्णस्य पयसा शुक्तिं वातपित्तार्दितः पिबेत्।

द्वे वा त्रीण्यपि वाऽऽपोथ्य क्काथे तिक्तोत्तमस्य वा॥ २४॥

आरग्वधादिनवकादासुत्यान्यतमस्य वा।

विमृद्य पूतं तं क्काथं पित्तश्लेष्मज्वरी पिबेत्॥ २५॥

स०-पर्यागतानां-प्राप्तसम्यक्पाकानां, फलानां वेणिजन्मनां-देवदाल्युत्पन्नानां, चूर्णस्य शुक्तिं-अर्धपलं, पयसा वातपित्ताभ्यामर्दितः-आतुरः , पिबेत्। द्वे वा त्रीण्यपि वा जीमूतफलन्यापोथ्य-जर्जरीकृत्य, तिक्तोत्तमस्य-निम्बस्य, क्काथं पित्तश्लेष्मज्वरी पिबेत्। अथवा, आरग्वधादिनवकात्-आरग्वधवर्गादाद्यौषधनवकात्, अन्यतमस्य क्काथे द्वे वा त्रीण्यपि वा जीमूतफलन्यासुत्य-सन्धाय, तथा विमृद्य पूतं क्काथ पित्तश्लेष्मज्वरी पिबेत्। गरागरी च वेणी च देवदाली च जीमूतं चेति पर्यायाः।

आ० र०- अन्यदाह-पर्यागतानामिति। पर्यागतानां-पक्कानाम्। वेणी-जीमूतः। शुक्तिं-अर्धपलम्।

अन्यदाह-द्वे वेति। आपोथ्य-जर्जरीकृत्य। तिक्तोत्तमस्य-पटोलस्य। सङ्ग्रहे तु (क. अ. १)-"जीवकर्षभकेक्षुशतावरीनामन्यतमस्य स्वरसेन वा पित्तजे। अथवा पूर्ववत् घृतं सिद्धम्।" इति।

जीमूतकल्कं चूर्णं वा पिबेच्छीतेन वारिणा।

ज्वरे पैत्ते, कवोष्णेन कफवातात्कफादपि॥ २६॥

इति जीमूतकल्पः

स०-जीमूतचुर्ण-फलमपि कल्कीकृत्याथवा तच्चूर्णं पित्तजज्वरे शीतेन जलेनालोड्य पिबेत्। तस्यैव कल्कं चूर्णं वा कफवातात् कफाच्चोद्भूते ज्वरे कवोष्णेन वारिणा पिबेत्।

आ० र०- अन्यदाह-जीमूतकल्कमिति।

अथेक्ष्वाकुकल्पः।

कासश्वासविषच्छर्दिज्वरार्ते कफकर्शिते।

इक्ष्वाकुर्वमने शस्तः प्रताम्यति च मानवे॥२७॥

स०-कासाद्यार्ते कफार्दिते पुरुषे वमने-वमनविषये, इक्ष्वाकुः शस्तः। प्रताम्यति च मानवे प्रतमकाक्रान्तत्वाद्यः प्रताम्यति नरस्तस्मिंश्च, शस्तः।

आ० र०- अथेक्ष्वाकुकल्पः। तत्र विषयमाह-कासश्वासेति। इक्ष्वाकुः-कटुतुम्बी। प्रताम्यति-मूर्च्छायुक्ते।

फलपुष्पविहीनस्य प्रवालैस्तस्य साधितम्।

पित्तश्लेष्मज्वरे क्षीरं पित्तोद्रिक्ते प्रयोजयेत्॥२८॥

स०-फलपुष्पविहीनस्य-असञ्जातफलपुष्पस्य, [तस्य-] इक्ष्वाकोः, किसलयैः क्षीरं साधितं पित्तश्लेष्मज्वरे पित्तोद्रिक्ते प्रयोजयेत्। फलपुष्पविहीनस्येत्यनेन कोमलत्वं प्रतिपादयति इक्ष्वाकोस्तन्त्रकृत्। अन्यथा "प्रवालैः साधितं क्षीरं पित्तोद्रिक्ते प्रयोजयेत्।" इति ब्रूयात्।

आ० र०- प्रयोगमाह-फलपुष्पविहीनस्येति। विहीनत्वं-अनुत्पत्त्या।

इक्ष्वाकुफलस्य जरठावस्तस्य प्रयोगमाह-

हृतमध्ये फले जीर्णे स्थितं क्षीरं यदा दधि।

स्यात्तदा कफजे कासे श्वासे वम्यं च पाययेत्॥२९॥

स०-हृतमध्ये जीर्णे-सुपक्के, तस्मिन् इक्ष्वाकोः फले हृतमध्यभागत्वाच्छून्यमध्ये क्षीरं स्थितं सत् यदा दधि जातं स्यात्तदा कफाकासादिषु वमनार्थं पाययेत्।

आ० र०- अन्यदाह-हृतमध्य इति। हृतमध्ये-निष्कुलीकृते। जीर्णे-पक्के।

मस्तुना वा फलान्मध्यं पाण्डुकुष्ठविषार्दितः।
तेन तक्रं विपक्वं वा पिबेतत्समधुसैन्धवम्॥३०॥

स०-इक्षाकुफलमध्यं वा मस्तुना पाण्ड्वाद्यर्दितः पिबेत्।
तेन-इक्ष्वाकुफलमध्येन, तक्रं वा विपक्वं मधुसैन्धवयुतं पिबेत्।
समधुसैन्धवमित्युक्तं स्पष्टार्थम् वमनविधौ हि समधुसैन्धवस्य वमनस्यानुज्ञानात्।
आ० र०- अन्यदाह-मुस्तुनेति। तेन-फलमध्येन। सङ्ग्रहे तु (क.अ. १)-"तदेव वा मध्यं सगुडपललं भक्षयेत्। इक्ष्वाकुफलतैलं वा पिबेत्।" इति।

भावयित्वाऽऽजदुग्धेन बीजं तेनैव वा पिबेत्।
विषगुल्मौदरग्रन्थिगण्डेषु श्लीपदेषु च॥३१॥

स०-अजादुग्धेन तद्बीजं भावयित्वा तेनैव-छगलीक्षीरेण, विषगुल्मादिषु पिबेत्।
आ० र०- अन्यदाह-भावयित्वेति। तेनैव-आजदुग्धेन, विषादिषु षड्वु पिबेत्।

सक्तुभिर्वा पिबेन्मन्थं तुम्बीस्वरसभावितैः।
कफोद्भवे ज्वरे कासे गलरोगेष्वरोचके॥३२॥

स०-सक्तुभिः-यवसक्तुभिः, तुम्बीस्वरसभावितैर्मन्थं वा पिबेत्। कफोद्भवेषु ज्वरादिषु।
आ० र०- अन्यदाह-सक्तुभिरिति। कफजेषु ज्वरादिषु मन्थं पिबेत्।
गुल्मे ज्वरे प्रसक्ते च कल्कं मांसरसैः पिबेत्।
नरः साधु वमत्येवं न च दौर्बल्यमश्नुते॥३३॥

स०-कल्कं तुम्ब्या मांसरसैः पिबेत्। गुल्मे तथा ज्वरे प्रसक्ते-दीर्घकालानुबन्धिनि। एवं सति पुरुषः साधुकृत्वा वमति। दौर्बल्यं च न प्राप्नोति।

आ० र०- अन्यदाह-गुल्म इति। गुल्मे चिरकालज्वरे च मांसरसैः कल्कं पिबेत्।

तुम्ब्याः फलरसैः शुष्कैः सपुष्पैरवचूर्णितम्। छर्दयेन्माल्यमाघ्राय गन्धसम्पत्वसुखोचितः॥ ३४॥

इतीक्ष्वाकुकल्पः।

स०-(तुम्ब्याः फलरसैः पुष्परसैश्चावचूर्णितं शुष्कैः-शोषितैः,तुम्बिफलरसैस्तुम्बिपुष्प-चूर्णमिश्रितैरचूर्णितं माल्यामाघ्राय सुखं वमेत्। गन्धसम्पत्-गन्धसम्पत्तिमत्।)

आ० र०- अन्यदाह-तुम्ब्या इति। तुम्बीफलरसैः तुम्बीपुष्पचूर्णमिश्रितैः शोषितैरवचूर्णितं माल्यमाघ्राय सुखं वमेत्। गन्धसम्पत्-गन्धसम्पत्तिमत्। सङ्ग्रहे तु (क.अ. १) -"इक्ष्वकुफलस्वरसं वा त्रिगुणक्षीरसाधितमुतःस्थिते कफे पीनसे स्वरसादे च पिबेत्। बिल्वमूलप्रस्थक्काथेन वा तुम्बीबीजानि क्काथयेत्। ततस्तमिंस्त्रिभागघृते घृतसमानि च पिष्ट्वा तुम्बीबीजानि तदर्द्धाशिकानि च प्रत्येकं जीमूतमहाजालिनीवत्सककृतवेधनानि क्काथतुल्यमेव च त्रिकटुकमावपेत्। ततः पुनरधिश्रित्य लेहं साधयेत्। तमवलिह्य प्रमथ्यामनु पिबेत्। अयमेव च कल्पः काश्मर्यादिषु चतुर्षु महापञ्चमूलाङ्गेषु पृथक् पृथगुक्तो वेदितव्यः वातकफगुल्मप्रसक्तज्वरेषु॥" इति।

अथ धामार्गवकल्पः।

कासगुल्मोदरगरे वाते श्लेष्माशयस्थिते।

कफे च कण्ठवक्रस्थे कफसञ्चयजेषु च॥ ३५॥

धामार्गवो गदेष्विष्टः स्थिरेषु च महत्सु च।

स०-कासादिषु, तथा कफस्थानस्थे वाते, श्लेष्मणि गलस्थे मुखस्थे च तथा कफसञ्चयजेष्वरोचकदिषु तथा,स्थिरेषु-दीर्घकालप्ररुढेषु, महत्सु-चात्यन्तं प्रवृद्धेषु, रोगेषु धामार्गवः-कोशफलाख्यः,इष्टः।

आ० र०- अथ द्विकोशातकीकल्पः। तत्रादौ धामार्गवकल्पः। तत्र विषयमाह-कासगुल्मेति। धामार्गवो-राजकोशातकी।

जीवकर्षभकौ वीरा कपिकच्छूः शतावरी॥ ३६॥

काकोली श्रावाणी मेदा महामेदा मधूलिका।

तद्राजोभिः पृथग्लेहा धमार्गवरजोन्विताः॥ ३७॥

कासे हृदयदाहे च शस्ता मधुसिताद्रुताः।

स०-जीवकर्षभादीनां पृथक-प्रयेकं, तेषां रजोभिश्चूर्णैर्मधुसिताभ्यामत्यन्तं द्रुताः_द्रवीकृताः, धामार्गवरजोन्विताः_तश्चूर्णमिश्राः, लेहाः कासे हृदयदाहे च शस्ताः। मधूलिकामधुयष्टिः।

आ० र०- प्रयोगमाह-जीवकर्षभकाविति। वीरा-विदारी। श्रावणी-मुण्डी। मधूलिका-जलजं यष्टीमधु। पाकं विनाऽपि मधुसितायोगेनैव लेहत्वम्।

ते सुखाम्भोनुपानाः स्युः पित्तोष्मसहिते कफे॥ ३८॥

स०-त एव-पूर्वोक्ता लेहाः, उष्णोदकानुपाना वमनाया भवेयुः। कफे पित्तोष्मसहिते सति-पित्तेन तथा पित्तकार्येणोष्मणा युक्ते।

आ० र०- ते-जीवकादिलेहाः। सुखाम्भः-कोष्णमुदकम्। पित्तोष्मा-पित्तजस्तापः। सङ्गहे तु (क. अ. १)-"जीवनीयान्यतमचुर्णसंयुक्तान् समधुशर्करांस्तत्कषायैर्लेहान् पित्तोपसर्जने श्लेष्मणि विदध्यात्।" इति।

धान्यतुम्बरुयूषेण कल्कस्तस्य विषापहः।

स०-तस्य-धामार्गवस्य, कल्को धान्यतुम्बरुभ्यां यूषेणक्काथेन,उपयुक्तो विषघ्नः स्यात्।

आ० र०- अन्यदाह-धान्येति। धान्यं-कुस्तुम्बरी। यूषः-क्काथः।

बिम्याः पुनर्नवाया वा कासमर्दस्य वा रसे॥ ३९॥

एकं धामार्गवं द्वे वा मानसे मृदितं पिबेत्।

तच्छृतक्षीरजं सर्पिः साधितं वा फलादिभिः॥ ४०॥

इति धामार्गवकल्पः।

स०-बिम्ब्यादीनामन्यतमस्य रसे-क्काथे, धामार्गवफलमेकं मृदितं कृत्वा, अथवा द्वे फले, मानसे-मानोविकारे, वमनं (नार्थं) पिबेत्। अथवा, तच्छृतक्षीरजं सर्पिः-धमार्गवफलसाधितं क्षीरोद्भवं [घृतं] , फलादिभिः सधितं-मदनफलजीमूतकेक्ष्वाकुधामार्गवकोशातकीकुटजैः षड्भिः पक्वं,मानसे वमनार्थं पिबेत्।

आ० र०- अन्यदह-बिम्ब्या इति। फलादिभिः-षड्भिःश्रेष्ठैः । सङ्ग्हे तु (क. अ. १)-"सुमनः सौमनस्यायनीहरिद्राचोरकहैमवतीमहासहाक्षुद्रसहावृश्चीवबिम्बीपुनर्नवाकासमर्दान्यतमकषाये ण धामार्गवमेकं द्वे वा मनोविकारेषु।" इति।

अथ क्ष्वेडकल्पः।

क्ष्वेडोऽतिकटुतिक्ष्णोष्णः प्रगाढेषु प्रशस्यते।

कुष्ठपाण्ड्वामयप्लीहशोफगुल्मगरादिषु॥ ४१॥

स०-क्ष्वेडः-तिक्तकोशातकी, अतितीक्ष्णोष्णकटुकत्वात् कुष्ठादिषु प्रगाढेषु-अत्यन्तचिरकालजत्वाद् दृढेषु प्ररुढेषु,प्रशस्यते।

आ० र०- अथ क्ष्वेडकल्पः। तत्र विषयमाह-क्ष्वेड इति। क्ष्वेडः-कोशातकी।

पृथक् फलादिषड्कस्य क्काथे मांसमनूपजम्।

कोशातक्या समं सिद्धं तद्रसं लवणं पिबेत्॥ ४२॥

स०-पृथक् फालादिषड्कस्य-,मदनफलेक्ष्वाकादिकस्य, क्काथे मांसमनूपजं कोशातक्या समं-तया तुल्यं, सिद्धं-पक्कं,तद्रसं तस्य मांसस्य रसं, लवणान्वितं पिबेत्।

आ० र०- प्रयोगमाह-पृथगिति।

फलादिपिप्पलीतुल्यं सिद्धं क्ष्वेडरसेऽथवा।

स०-फलादिपिप्पल्यो -मदनफलजीमूतेक्ष्वाकुफलमध्यबीजानि, ताभिस्तुल्यमानूपं मांसं समक्ष्वेडरसेन सिद्धं वा पिबेत्।

आ० र०- अन्यदाह-फलादीति। पिप्पल्यो-बीजानि, तैस्तुल्यमानूपमांसम्।

क्ष्वेडक्काथं पिबेतत्सिद्धं मिश्रमिक्षुरसेन वा॥४३॥

इति क्ष्वेडकल्पः।

स०-यद्वा, इक्षुरसेन मिश्रं क्षेडक्काथे सिद्धमानूपजं मांसरसं सलवणं पिबेत्।

आ० र०- अन्यदाह-क्ष्वेडक्काथमिति।

अथ कुटजफलकल्पः।

कौटजं सुकुमारेषु पित्तरक्तकफोदये।

ज्वरे विसर्पे हृद्रोगे खुडे कुष्ठे च पूजितम्॥४४॥

स०-कुटजं सुकुमारेषु-अत्यन्तवमनासहिष्णुषु, पित्तरक्तकफोदये-अतिशयेनाधिके तस्मिन्, तथा ज्वरादिषु, वमने श्रेष्ठम्।

आ० र०- अथ कुटजकल्पः। तत्र विषयमाह-कौटजमिति।

सर्षपाणां मधूकानां तोयेन लवणस्य वा।

पाययेत्कौटजं बीजं युक्तं कृशरयाऽथवा॥४५॥

सप्ताहं वाऽर्कदुग्धाक्तं तच्चूर्णं पाययेत्पृथक्।

फलजीमूतकेक्ष्वाकुजीवन्तीजीवकोदकैः ॥४६॥

इति कुटजफलकल्पः ।

स०-सर्षपादीनां पृथक् तोयेन-क्काथेन, सैन्धवस्य च जलेन, कुटजबीजं पाययेत्। अथवा,कृशरया सह कौटजं पाययेत्। अथवा, सप्ताहमर्कदुग्धाक्तं कुटजबीजचूर्णं पृथक् मदनफलाद्युदकैः पाययेत्।

आ० र०- प्रयोगमाह-सर्षपाणामिति।

वमनौषधमुख्यानामिति कल्पदिगीरिता।

बीजेनानेन मतिमानन्यान्यपि च कल्पयेत्॥४७॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां पञ्चमे कल्पसिद्धिस्थाने वमनकल्पो नाम प्रथमोऽध्यायः॥१॥

स०- वमनौषधमुख्यानां-छर्दिषि प्राधनानामौषधानां,इति एवं प्रकारेण, कल्पस्य दिक्-गतिः,ईरिता-कल्पमार्ग उदितः। अनेन बीजेन-अनया दिशा, सुमतिरन्यान्यपि वमनौषधानि कल्पयेदिति।

इति श्रीमृगाङ्कदत्तपुत्रश्रीविरचितायामष्टाङ्गहृदयटीकायां सर्वाङ्गसुन्दराख्यायां पञ्चमे कल्पसिद्दिस्थाने वमनकल्पो नाम् प्रथमोऽध्यायः समाप्तः ॥१॥

आ० र०- वमनयोगानुपसंहरति-वमनौषधेति।

इति हेमाद्रिटीकायामायुर्वेदरसायने।

वान्त्यौषधप्रकरणं सामस्त्येन निरूपितम्॥१॥

****

द्वितीयोऽध्यायः।

वमनादनन्तरं विरेचनस्योपयोग इति वमनकल्पादनन्तरं विरेचनकल्पः प्रक्रम्यत इत्याह-

अथतो विरेचनकल्पं व्याख्यास्यामः।

इति ह स्माहुरात्रेयादयो महर्षयः।

(गद्यसूत्रे॥२॥)

स०-कल्पनं कल्पो-योजना। विरेचनं-अधोभगेन दोषनिर्हरणम्, तस्य कल्पो-विरेचनकल्पः, तं व्याख्यास्यामः। शेषं पूर्ववत्। दन्तीद्रवन्त्यादिभ्यः सर्वेभ्योऽपि विरेचनद्रव्येभ्यो निरपायित्वाद्विरेचनसाध्ये व्याधावनिषिद्धप्रसरत्वात्[च] पूर्वं त्रिवृताया उपन्यासः।

आ० र०- विरेचनकल्पं व्याख्यातुं प्रतिजानीते-अथेति। अथ विरेचनकल्पः। तत्र सङ्ग्रहे। (क. अ. २)-"विरेचनद्रव्याणां मूलेषु त्रिवृत्, त्वक्षु तिल्वकः, क्षीरेषु स्निही, फ़लेषि हरीतकी, प्रधानानि।" इति।

अथ त्रिवृच्छ्यामयोः कल्पः।

कषायमधुरा रूक्षाविपाके कटुका त्रिवृत्।

कफपित्तप्रशमनी रौक्ष्याच्चानिलकोपनी॥१॥

स० - अनेनास्याः स्वरूपकथनम्।

आ० र०- त्रिवृद्गुणानाह-कषायमधुरेति।

सेदानीमौषधैर्युक्ता वातपित्तकफापहैः।

कल्पवैशेष्यमासाद्य जायते सर्वरोगजित्॥२॥

स० -सा-एवंगुणा त्रिवृत्, अधुना वातपित्तकफघ्नैरौषधैर्युक्ता कल्पविशेषत्वं प्राप्य विरेचनसाध्यव्याधिविषये सर्वरोगजिज्जायते।

आ० र०- संयोगादिकृतान् गुणानाह-सेगनीमिति।

द्विधा ख्यातं च तन्मूलं श्यामं श्यामाऽरुणं त्रिवृत्।

स० -तस्याः-त्रिवृतो, मूलं द्विप्रकारम्,-एकं श्याममपरमरुणम्। श्यामं मूलं श्यामा, त्रिवृदरुणामिति व्याख्यं द्विसंज्ञम्।

आ० र०- भेदद्वयमाह-द्विधेति। श्याम-श्यामाख्यम्। अरुणं-त्रिवृदाख्यम्।

त्रिवृदाख्यं वरतरं निरपायं सुखं तयोः॥३॥

सुकुमारे शिशौ वृद्धे मृदुकोष्ठे च तद्धितम्।

स० -तयोः-श्यामारुणयोः, यदरुणं मूलं तद्वरतरम्। सामर्थ्यात् श्यामं वरम्। अरुणं यन्मूलं तन्निरपायत्वात् सुकुमारादिषु हितम्, न श्यामं सापायत्वात्।

आ० र०- अरुणस्य विषयमाह-त्रिवृदाख्यामिति।

सापायत्वे विशेषेण हेतुमाह-

मूर्च्छासम्मोहहृत्कण्ठकषणक्षणनप्रदम्॥४॥

श्यामं तीक्ष्णाशुकारित्वादतस्तदपि शस्यते।

क्रूरे कोष्ठे बहौ दोषे क्लेशक्षमिणि चातुरे॥५॥

स ० -श्यामं मूलं मूर्च्छादिहृत्कण्ठकषणक्षणनप्रदम्। तत्तीक्ष्णत्वादाशुकारित्वाच्च सापायत्वमस्य। तदेवंरूपमपि श्यामं शस्यते क्रूरकोष्ठादिविषये।

आ० र०- श्यामस्य विषयमाह-मूर्च्छेति। मुर्च्छासम्मोहयोर्ज्ञानभ्रंशे तुल्ये देहपातापाताभ्यां भेदः। कषणं-विलेखनं हृदयस्य। क्षणनं-क्षतं कण्ठस्य।

गम्भीरानुगतं श्लक्ष्णमतिर्यग्विसृतं च यत्।

गृहीत्वा विसृजेत्काष्ठं त्वचं शुष्कां निधापयेत्॥ ६॥

स ० -गम्भीरानुगतं-गूढं कृत्वा भूमावन्तःप्रविष्टम्, तथा श्लक्ष्णं-अपरुषम्, तथाऽतिर्यग्यातं(विसृतं)-स्पष्टं कृत्वा भूमौगतम्, एवम्विधं त्रिवृताया मूलं गृहीत्वा तत्काष्ठं विसृजेत्। त्वचं शुष्कां कृत्वा निधापयेत्-स्थापयेत्।

आ० र०- ग्रहणविधिमाह-गम्भीरानुगतमिति। गम्भीरानुगतं-दूरमधोयातम्। अतिर्यग्विसृतं-बहुषु तथाभूतेषु मध्यमम्।

अथ काले ततश्चूर्णं किञ्चिन्नागरसैन्धवम्।

वातामये पिबेदक्षैः

स ० -अथ-अनन्तरम्, काले-विरेचनप्रस्तावे, ततः-मूलत्वचः, चूर्णमीषन्नागरसैन्धवमक्षैः-काञ्जिकादिभिः, वातविकारे पिबेत्।

आ० र०- वाते विरेच्चनमाह-अथेति। किञ्चिन्नागरसैन्धवं-नागरसैन्धवयोर्मिथस्तुल्यांशयोश्चूर्णेन चतुर्थांशतुल्येन युक्तं,अक्षैः पिबेत्। सङ्ग्रहे तु (क. अ. २)-"मांसरसेनवा।" इति।

पैत्ते साज्यसितामधु॥ ७॥

क्षीरद्राक्षेक्षुकाश्मर्यस्वादुस्कन्धवरारसैः।

स० -पैत्ते विकारे सहघृतशर्करामधु तच्चूर्णं क्षीरेण द्राक्षादिरसैर्वा पिबेत्।

आ० र०- पित्ते विरेचनमाह-पित्ते इति। वरा-त्रिफ़ला। रसाशब्दो द्राक्षादिभिः प्रत्येकं सम्बध्यते।

कफामये पीलुरसमूत्रमद्याम्लकाञ्जिकैः॥८॥

पञ्चकोलादिचूर्णैश्च युक्त्या युक्तं कफापहैः।

स० -कफविकारे तच्चूर्णं पीलुरसादिभिः पिबेत्। पञ्चकोलादिभिश्चूर्णैश्च कफघ्नैर्युक्तम्। कथम्? युक्त्या,-पञ्चकोलादिचूर्णानां योगे नातिव्याप्तिर्न वाऽव्याप्तिः, पञ्चकोलादिचूर्णेन त्रिवृताचूर्णस्य सम्यग्योगः स्यादित्यर्थः। अदिशब्देनान्येषां पाचनदीपनानां पञ्चकोलसदृशानां चित्रका(मरिचा)दीनां ग्रहणम्।

आ० र०- कफ़े विरेचनमाह-कफ़ामय इति। पीलुःतीक्ष्णतरुः। सङ्ग्रहे तु (क. अ. २)-"एभिरेव च द्रव्यैर्यथास्वं घृतशर्कराद्राक्षाक्षोडतवक्षीरीमधुराणि मातुलुङ्गदाडिमामलककोलकरमर्दकक-पित्थरसतक्राम्लानि सैन्धवलवणानि व्योषतीक्ष्णानि विविधवेसवारपूरितानि सहकारासत्रिजातकनागकेसरकर्पूरसुरभीणि लेहगुटिकामोदकभक्ष्यभोजान्युपकल्पयेत्।" इति।

त्रिवृत्कल्ककषायाभ्यां साधितः ससितो हिमः॥९॥

मधुत्रिजातसंयुक्तो लेहो हृद्यं विरेचनम्।

स० -त्रिवृतः कल्केन कषायेण च साधितः सशर्करो लेहः शीतो मधुत्रिजातसंयुक्तो हृद्यं विरेचनं स्यात्। अत्र च कासचिकित्सितोक्तकण्टकारिकालेहवत् (ह्र. चि. अ. ३/६३) प्रमाणं निरूपयितव्यम्।

आ० र०- हृद्यं विरेचनमाह-त्रिवृदिति।

अजगन्धा तवक्षीरी विदारी शर्करा त्रिवृत्॥१०॥

चूर्णितं मधुसर्पिर्भ्यां लीढ्वा साधु विरिच्यते।

सन्निपातज्वरस्तम्भपिपासादाहपीडितः॥११॥

स० -अजगन्धादिचूर्णं मधुसर्पिर्भ्यां लीढ्वा साधु विरिच्यते। सन्निपातज्वरादिपीडितः सन्।

आ० र०- सन्निपातादौ विरेचनमाह-अजदन्धेति।

लिम्पेदन्तस्त्रिवृतया द्विधाकृत्वेक्षुगण्डिकाम्।

एकीकृत्य च तत्स्विन्नं पुटपाकेन भक्षयेत्॥ १२॥

स ० -इक्षुगण्डिकां द्विधाकृत्य(त्वा)-पाटयित्वा, त्रिवृतयाऽन्तर्लिम्पेत्। अनन्तरमेकीकृत्य पुटपाकेन स्विन्नं भक्षयेत्।

आ० र०- तत्रैव विरेचनान्तरमाह-लिम्पेदिति। इक्षुगण्डिकां-इक्षुकाण्डम्।

भृङ्गैलाभ्यां समा नीली तैस्त्रिवृत्तैश्च शर्करा।

चूर्णं फलरसक्षौद्रसक्तुभिस्तर्पणं पिबेत्॥ १३॥

वातपित्तकफोत्थेषु रोगेष्वल्पानलेषु च।

नरेषु सुकुमारेषु निरपायं विरेचनम्॥ १४॥

स ० -त्वगेलाभ्यां तुल्या नीली, तैश्च तुल्या त्रिवृत्, सर्वैश्च तुल्या सिता, चूर्णं फलरसक्षौद्रसक्तुभिस्तर्पणं पिबेत्। वातपित्तकफोत्थेषु रोगेष्वल्पाग्निषु च नरेषु तथा सुकुमारेषु विरेचनमेतन्निरपायम्।

आ० र०- वातरोगादिषु विरेचनमाह-भृङ्गैलाभ्यामिति। भृङ्गं-त्वक्। नीली-कालाञ्जनी। तैः त्रिभिः। तैः-चतुर्भिः। फ़लरसो-द्राक्षादिरसः॥तर्पणं-मन्थम्। मन्थग्रहणं सक्तूनां प्राधान्यार्थम्, तेन चूर्णतुल्या यवसक्तवो मानानुक्तेश्च।

विडङ्गतण्डुलवरायावशूककणास्त्रिवृत्।

सर्वतोऽर्धेन तल्लीढं मध्वाज्येन गुडेन वा॥ १५॥

गुल्मं प्लीहोदरं कासं हलीमकमरोचकम्।

कफवातकृतांश्चान्यान् परिमार्ष्टि गदान् बहून्॥ १६॥

स० -विडङ्गतण्डुलादयः समांशाः, सर्वेभ्योऽर्धेन त्रिवृत्, तदेतच्चूर्णं मधुघृताभ्यां लीढं गुडेन वाऽऽस्वादितं गुल्मादीन् कफवातोत्थांश्चान्यानपि गदान् बहुन् परिमार्ष्टि-पराकरोति।

आ० र०- गुल्मादिषु विरेचनमाह-विडङ्गेति। विडङ्ग तन्दुलो-विडङ्गसारः। कणा-पिप्पलि। सर्वतः-विडङ्गादिभ्यः षड्भ्यः।

विडङ्गपिप्पलीमूलत्रिफलाधान्यचित्रकान्।

मरीचेन्द्रयवाजाजीपिप्पलीहस्तिपिप्पलीः॥ १७॥

दीप्यकं पञ्चलवणं चूर्णितं कार्षिकं पृथक्।

तिलतैलत्रिवृच्चूर्णभागौ चाष्टपलोन्मितौ॥ १८॥

धात्रीफलरसप्रस्थांस्त्रीन् गुडार्धतुलान्वितान्।

पक्त्वा मृद्वग्निना खादेत्ततो मात्रामयन्त्रणः॥ १९॥

कुष्ठार्शःकामलागुल्ममेहोदरभगन्दरान्।

ग्रहणिपाण्डुरोगांश्च हन्ति पुंसवनश्च सः॥ २०॥

गुडः कल्याणको नाम सर्वेष्वृतुषु यौगिकः।

स ०-विडङ्गादीनि कार्षिकाणी, त्रिवृताचूर्णतिलतैले पृथगष्टपलप्रमाणे, आमलकफलरसप्रस्थांस्त्रीन्, गुडपलानि पञ्चाशत्, मृद्वग्निना पक्त्वा तस्मान्मात्रामयन्त्रणः-यन्त्रणारहितः सन्, भक्षयेत्। स च भक्षितः कुष्ठादीन् हन्ति पुंसवनश्च स्यात्। गुडोऽयं कल्याणकसंज्ञः सर्वेषु च ऋतुषु यौगिकः-युज्यते।

आ० र०- कल्याणकं गुडमाअ-विडङ्गपिप्पलीति।

व्योषत्रिजातकाम्मोदकृमिघ्नामलकैस्त्रिवृत्॥ २१॥

सर्वैः समा समसिता क्षौद्रेण गुटिकाः कृताः।

मूत्रकृच्छ्रज्वरच्छर्दिकासशोषभ्रमक्षये॥ २२॥

तापे पाण्डुामयेऽल्पेऽग्नौ शस्ताः सर्वविषेषु च।

अविपत्तिरयं योगः प्रशस्तः पित्तरोगिणाम्॥ २३॥

स० -व्योषादिभिः समभागैः सर्वैर्द्रव्यैस्त्रिवृत्समा, सा च त्रिवृत् तुल्यशर्करा, एवमेताः क्षौद्रेण गुटिकाः कृता मूत्रकृच्छ्रादिषु शस्यन्ते। अविपत्तिरयं योगः पित्तरोगिणां प्रशस्तः।

आ० र०- मूत्रकृच्छ्रादिषु विरेचनमाह-व्योषेति। सर्वैः नवभिः, समा-नवाभागा त्रिवृत्। समसिता-शर्कराया अपि नव भागाः।

त्रिवृता कौटजं बीजं पिप्पली विश्वभेषजम्।

क्षौद्रद्राक्षारसोपेतं वर्षाकाले विरेचनम्॥ २४॥

स० -त्रिवृतादिकं क्षौद्रद्राक्षारससंयुक्तं प्रावृषि विरेचनम्।

आ० र०- वर्षासु विरेचनमाह-त्रिवृतेति।

त्रिवृद्वुरालभामुस्तशर्करोदीच्यचन्दनम्।

द्राक्षाम्बुना सयष्ट्याह्वसातलं जलदात्यये॥ २५॥

स० -त्रिवृद्वुरालभादिकं द्राक्षाजलेन शरदि विरेचनम्।

आ० र०- शरै विरेचनमाह-त्रिवृदिति। उदीच्यं-वालकम्। सातला-सत्पला।

त्रिवृतां चित्रकं पाठामजाजीं सरलं वचाम्।

स्वर्णक्षीरीं च हेमन्ते चूर्णमुष्णाम्बुना पिबेत्॥ २६॥

स० -त्रिवृतादिकं चूर्णमुष्णाम्बुना सह हेमन्ते पिबेत्।

आ० र०- हेमन्ते विरेचनमाह-त्रिवृतामिति।

त्रिवृता शर्करातुल्या ग्रीष्मकाले विरेचनम्।

स० -त्रिवृच्छर्करासमा ग्रीष्मर्तौ विरेचनम्।

आ० र०- ग्रीष्मे विरेचनमाह-त्रिवृतेति।

त्रिवृत्त्रायन्तिहपुषासातलाकटुरोहिणीः॥ २७॥

स्वर्णक्षीरीं च सञ्चूर्ण्य गोमूत्रे भावयेत्त्र्यहम्।

एष सर्वर्तुको योगः स्निग्धानां मलदोषहृत्॥ २८॥

स० -त्रिवृदादीनि सञ्चूर्ण्य त्र्यहं गोमूत्रे भावयेत्। एष योगः सर्वर्तुष्वपि स्निग्धानां नराणां मलदोषस्य हारकः स्यात्।

आ० र०- स्निग्धानां सर्वर्तुकं विरेचनमाह-त्रिवृदिति।

श्यामात्रिवृद्दुरालम्भाहस्तिपिप्पलिवत्सकम्।

नीलिनीकटुकामुस्ताश्रेष्ठायुक्तं सुचूर्णितम्॥ २९॥

रसाज्योष्णाम्बुभिः शस्तं रूक्षाणामपि सर्वदा।

इति त्रिवृच्छ्यामयोः कल्पः।

स० -श्यामाद्यं चूर्णीकृतं मांसरसघृतोष्णाम्बुभी रूक्षाणामपि सर्वकालं शस्तम्। अपिशब्दात् स्निग्धानां शस्तमेव।

आ० र०- रूक्षाणामपि सर्वर्तुषु विरेचनमाह-श्यामेति। सङ्ग्रहे तु (?) (चरके क. अ. ७)-" व्योषत्वक्पत्रमुस्तैलविडङ्गामलकान् समान्। त्रिवृतोऽष्टगुणं भागं शर्करायाश्च षड्गुणम्॥ गुडेन गुटिकाः कुर्यात् क्षौद्रेण सह संयुताः। मुत्रकुच्छ्रेज्वरे वम्यां कासे शोषे भ्रमे क्षये॥ गुल्मे पाण्ड्वामयेऽल्पेऽग्नौ शस्ता निर्यन्त्रिताशिनः। योगः सर्वविषाणां चमतं श्रेष्ठं विरेचनम्॥" (सङ्ग्रहे क. अ. २)-"त्र्यूशणत्रिफ़लाहिङ्गु कार्षिकं त्रिवृतापलम्। सौवर्चलार्धकर्षश्च पकार्द्धं चाम्लवेतसात्॥ तच्चूर्णं शर्करातुल्यं मण्डेनाम्लेन वा पिबेत्। गुल्मपार्श्वार्तिनुत्सिद्धं जीर्णे चास्मिन् रसौदनम्॥ त्रिवृतात्रिफ़लादन्तीसातलाव्योषसैन्धवै ः॥ प्रकल्प्य चूर्णं सत्पाहं भाव्यमामलकाद्रसे॥ तद्योज्यं तर्पणे यूषे पिशिते रागयुक्तिषु॥ तुल्याम्लं त्रिवृताकल्कसिद्धं गुल्महरं घृतम्॥ श्यामात्रिवृत्कषायेण सिद्धं सर्पिःपयोऽथवा। त्रिवृन्मुष्टींस्तु सनखानष्टौ द्रोणेऽम्भसः पचेत्॥ पादशेषं कषायं तं पुतं गुडतुलायुतम्। स्निग्धे स्थाप्यं घते क्षौद्रपिप्पलीफ़लचित्रकैः॥ लित्पे मासे गते पीतं पाण्डुश्वयथुगुल्मजित्। सुरा वा त्रिवृतापादकिण्वा तत्व्काथसंयुता॥ यवैः श्यामात्रिवृत्व्काथास्विन्नैः कुल्माषमम्भसा। आसुतं षडहंपल्ले जातं सौवीरकं पिबेत्॥ भृष्टान् वा सुतषान् सिद्धान्यवाम्स्तच्चूर्णसंयुतान् आसुतानम्भसा तद्वत्पिबेज्जातं तुषोदकम्।" इति। वृन्दे तु (अ.७४१९) -"अभयापिप्पलीमूलंमरिचं विश्वभेषजम्। त्वक्पत्रपिप्पलीमुस्तविडङ्गामलकानि च॥ एतानि समभागानि दन्ती च त्रिगुणा भवेत्। त्रिवृदष्टगुणा देआ षड्गुणा चात्र शर्करा॥ मधुना मोदकान् कृत्वा चाक्षमात्रान् प्रमाणतः। एकैकं भक्षयेत्प्रातः शीतं चनु जलं पिबेत्॥ तस्माद्विरिच्यते जन्तुर्यावदुष्णं न सेवते। पानाहारविहारेषु भवेन्निर्यन्त्रणः सदा॥ पाण्डुत्वकासविषमज्वरवह्निसादान् जङ्घोरुपृष्ठजघनोदरपार्श्वशूलान्। दुर्नामकुण्डलभगन्दरशोफ़ल्मान् यक्ष्मोदरभ्रमविदाहकमुत्रकृच्छ्रान्॥ ल्पीहाक्षिरोगपवनाश्मरि-कुष्ठमेहान् हन्याद्रसायनमिदं भिषजाप्रयुक्तम्। अल्पव्ययं बहुफ़लं सततोपयोज्यमायुष्करं पलितनाशनमश्विद्दष्टम्॥" इति।

अथ राजवृक्षकल्पः।

ज्वरहृद्रोगवातासृगुदावर्तादिरोगिषु॥ ३०॥

राजवृक्षोऽधिकं पथ्यो मृदुर्मधुरशीतलः।

स० -ज्वरादिष्वन्येभ्यस्तद्विषयोक्तेभ्यो विरेचनद्रव्येभ्यो राजवृक्षोऽतिशयेन पथ्यः। किम्भूतः ? मृदुर्मधुरः शीतलश्च।

आ० र०- आरग्वधकल्पमाह-ज्वरहृद्रोगेति।

बाले वृद्धे क्षते क्षीणे सुकुमारे च मानवे॥ ३१॥

योज्यो मृद्वनपायित्वाद्विशेषाच्चतुरङ्गुलः।

स० -बालादौ मृदुत्वादनपायित्वाच्च विशेषेण चतुरङ्गुलो योज्यः।

आ० र०- बालादौ विशेषादारग्वधो योज्य इयाह-बाल इति।

फलकाले परिणतं फलं तस्य समाहरेत्॥ ३२॥

तेषां गुणवतां भारं सिकतासु विनिक्षिपेत्।

सप्तरात्रात्समुद्धृत्य शोषयेदातपे ततः॥ ३३॥

ततो मज्जानमुद्धृत्य शुचौ पात्रे निधापयेत्।

स० -तस्य-शम्याकस्य, फलकाले परिणतं-पक्वं, फलं समाहरेत्-सङ्गृह्णीयात्। तेषां-फलानां, गुणवतां-सुनिष्पन्नानां, भारं-पलशतविंशतिः, वालुकासु विनिक्षिपेत्। सप्तरात्रादूर्ध्वं सिकताभ्य उद्धृत्यानन्तरमातपे शोषयेत्। ततः-अनन्तरं, तेयः फलेभ्यो मज्जानमुद्धृत्य-गृहीत्वा, पात्रे-भाण्डे, शुचौ शुद्धे, स्थापयेत्।

आ० र०- ग्रहणविधिमाह-फ़लकाल इति। तेषां-फ़लानाम्। भारं-तुलाविंशतिः।

द्राक्षारसेन तं दद्याद्दाहोदावर्तपीडिते॥३४॥

चतुर्वर्षे सुखं बाले यावद्वादशवार्षिके।

स० -तं-मज्जानं, द्राक्षारसेन दद्यात्। दाहाद्याते नरे चतुर्वर्षे बाले सुखेनैतद्विरेचनम्, यावद्वादशवार्षिके बाले सुखं विरेचनमिदम्।

आ० र०- दाहोदावर्तयोर्विरेचनमाह-द्राक्षारसेनेति।

चतुरङ्गुलमज्ज्ञो वा कषायं पाययेद्विमम्॥३५॥

दधिमण्डसुरामण्डधात्रीफलरसैः पृथक्।

सौवीरकेण वा युक्तम् कल्केन त्रैवृतेन वा॥३६॥

स ०-अथवा राजवृक्षमज्ज्ञो हिमं [कषायं]-शीतकषायं, दधिमण्डादिभिः पृथग्युक्तमथवा काञ्जिकेनाथवा कल्केन त्रिवृतासम्बन्धिना युक्तं पाययेत्।

आ० र०- अन्यद्विरेचनपञ्चकमाह-चतुरङ्गुलेति। सौवीरकेण-काञ्जिकेन।

दन्तीकषाये तन्मज्ज्ञो गुडं जीर्णं च निक्षिपेत्।

तमरिष्टं स्थितं मासं पाययेत् पक्षमेव वा॥३७॥

इति राजवृक्षकल्पः।

स ०-दन्तीकषाये तन्मज्ज्ञः-कर्णिकारस्य मध्यानि, गुडं जीर्णं च विनिक्षिपेत्। तमरिष्टं मासं स्थितं पाययेत्। पक्षं वा स्थितम्।

आ० र०- विरेचनान्तरमाह-दन्तीकषाय इति।

अथ तिल्वककल्पः।

त्वचं तिल्वकमूलस्य त्यक्त्वाऽऽभ्यन्तरवल्कलम्।
विशोष्य चूर्णयित्वा च द्वौ भागौ गालयेत्ततः॥३८॥
रोध्रस्यैव कषायेण तृतीयं तेन भावयेत्।
कषाये दशमूलस्य तं भागं भावितं पुनः॥३९॥
शुष्कं चूर्णं पुनः कृत्वा ततः पाणितलं पिबेत्।
मुस्तुमूत्रसुरामण्डकोलधात्रीफलाम्बुभिः॥४०॥

स० -तिल्वकमूलस्य त्वचं त्यक्त्वा मध्यवल्कलं विशोष्य तथा चूर्णयित्वा ततश्चूर्णात् द्वौ भागौ रोध्रस्यैव कषायेण गालयेत्। ततः-अनन्तरम्, अवशिष्टो यस्तृतीयो भागस्ततश्चूर्णात्, तं तेन कषायेण वस्त्रगालितेन भावयेत्। अनन्तरं वस्त्रगालितकषायेण भावितं पुनः कषाये दशमूलस्य भावितमनन्तरं शुष्कचूर्णं [कृत्वा] ततश्चूर्णात् पाणितलं-कर्षं, मस्तुगोमूत्रादिकेन पिबेत्। (कोलं-बदरम्, धात्रीफलं-आमलकम्, तयोरम्बुनी स्वरसौ।) तद्भावनौषधप्रमाणं च शिलाजतुनः कल्पवत् कल्पयेत्। शिलाजतुकल्पं च वक्ष्यति (हृ. उ. अ. ३९/१३५)- "समगिरिजमष्टगुणिते निःक्काथ्यं भावनौषधं तोये।" इत्यादि। तस्मादत्र तिल्वकत्वचो भाव्यौषधस्य रोध्रश्च(ङ्गंच)भावनौषधं समं देयम्, ततोऽष्टगुणं जलं देयम्, तच्च क्कथनेनाष्टांशशेषं कार्यमिति। एवमन्यत्राप्यनिर्दिष्टप्रमाणानां भाव्यद्रव्यभावना-द्रव्यतोयावशिष्टानां परिमाणं बोध्यम्।

आ० र०- तिल्वककल्पमाह-त्वचमिति। आभ्यन्तरवल्कलं-काष्ठलग्ना त्वक्। चूर्णस्य भागत्रयं कृत्वा द्वौ भागवेकीकृत्य रोध्रकषायेण मर्दयित्वा गालयेत्। तेन द्रवेण तृतीयं भागं भवयेत्। पुनर्दशमुलकषायेण भावयेत्। पुनःशोषयेत्। पुनश्चूर्णयेत्। तस्य चूर्णस्य पाणितलं-कर्षं, मस्त्वादिभिः पिबेत्। कोलं-बदरम्, धात्रीफ़लम्-आमलकम् तयोरम्बुनी-स्वरसौ।

तिल्वकस्य कषायेण कल्केन च सशर्करः।

सघृतः साधितो लेहः स च श्रेष्ठं विरेचनम्॥४१॥

इति तिल्वककल्पः।

स० -रोध्रस्य कषायेण कल्केन च सशर्करो घृतान्वितो लेहः स्यात्। स च लेहः श्रेष्ठं विरेचनम्।

आ० र०- विरेचनान्तरमाह-तिल्वकस्येति। सङ्ग्रहे तु (क. अ. २)-" मेषशृङ्गयभयाकृष्णाचित्रकैः व्कथिते जले। मरुजान् सुनुयात्तत्र जातं सौवीरकं यदा॥भव्द्ज्ञलिना तस्य रोध्रकल्कं पिबेत्तदा। मरुजान्-यवान्। सुरां रोध्रकषायेणजातां पक्षस्थितां पिबेत्॥" इति।

अथ सुधाकल्पः।

सुधा भिनत्ति दोषाणां महान्तमपि सञ्चयम्।

आश्वेव कष्टविभ्रंशान्नैव तां कल्पयेदतः॥४२॥

मृदौ कोष्ठेऽबले बाले स्थविरे दीर्घरोगिणि।

कल्प्या गुल्मोदरगरत्वग्रोगमधुमेहिषु॥४३॥

पाण्डौ दूषीविषे शोफे दोषविभ्रान्तचेतसि।

साश्रेष्ठा कण्टकैस्तीक्ष्णैर्बहुभिश्च समाचिता॥४४॥

द्विवर्षा वा त्रिवर्षा वा शिशिरान्ते विशेषतः।

तां पाटयित्वा शस्त्रेण क्षीरमुद्धारयेत्ततः॥४५॥

बिल्वादीनां बृहत्योर्वा क्काथेन सममेकशः।

मिश्रयित्वा सुधाक्षीरं ततोऽङ्गारेषु शोषयेत्॥४६॥

पिबेत्कृत्वा तु गुटिकां मस्तुमूत्रसुरादिभिः।

स० -सुधा-गुडा, दोषाणां महान्तमपि सञ्चयं हन्ति। एवंगुणामपि तां-सुधां, भिषक् मृदुकोष्ठादिषु अतो न कल्पयेत्। शीघ्रमेव कष्टविभ्रंशादिति। कल्पयेदित्यतिसर्जने लिङ्।

तर्हि केयं प्रयोज्या ? इत्याह-कल्प्येति। गुल्मादिषु कल्प्या सास्रुक्, तीक्ष्णैर्बहुभिः कण्टकैश्चिता श्रेष्ठा स्यात्। तां-सुधां, द्विवर्षामथवा त्रिवर्षां विशेषेण शिशिरान्ते कार्यवशादन्यस्मिन्नपिऋतौ शस्त्रेण पाटयित्वा ततः-सुधातः, क्षीरमुद्धारयेत्। द्वे वर्षे प्रमाणमस्या इति ठक्। तस्य रसाल्लुगिति लुक्। ततश्च टाप्। ततः-अनन्तरं, बिल्वादीनां कण्टकारीमहोटिकयोर्वा क्काथेन एकशः-एकेनैकेन, समं मेलयित्वा सुधाक्षीरमनन्तरमङ्गारेषु तदुभयमपि शोषयेत्। ततो गुटिकां कृत्वा यथायोगं मस्त्वादिभिः पिबेत्।

आ० र०- स्नुहीकल्पमाह-सुधेति। तां-सुधाम्, मृदुकोष्ठादिषु न कल्पयेत्। कष्टविभ्रंशां-दुःसहव्यापदम्। अतः-अतियोगभयात्। गुल्मादिषु तु कल्प्या। मधुमेहः-मधुप्रमेहः। दूशीविषं-विषप्रतिषेधोक्तम्। सा-सुधा, बहुतीक्ष्णाग्रकण्टका श्रेष्ठा। बिल्वादीनां-बृहत्पञ्चमूलोक्तानाम्। समं-सममात्रम्। एकशः-एकस्यैकस्य व्काथेन क्रमान्मिश्रणं शोषणं च। वा शब्दाद्धहतीद्वयस्य भिन्नः प्रयोगः।

त्रिवृतादीन्नव वरां स्वर्णक्षीरीं ससातलाम्॥४७॥

सप्ताहं स्नुक्पयः पीतान् रसेनाज्येन वा पिबेत्।

तद्वद्व्योषोत्तमाकुम्भनिकुम्भाग्नीन् गुडाम्बुना॥४८॥

इति सुधाकल्पः।

स० -त्रिवृतादीन्नवेति 'त्रिवृच्छ्यामा राजवृक्षस्तिल्वकश्च तथा सुधा। शङ्खिनी सप्तला दन्ती द्रवन्तीति [स्मृता नव॥]' इति। तदेतान् त्रिवृतादींस्तथा त्रिपालां स्वर्णक्षीरीं सातलां च सप्त वासरान् स्नुक्पयः पीतान्-स्नुक्क्षीरभावितान्, मांसरसेन घृतेन वा पिबेत्। तथैव व्योषादीन् गुडाम्बुना पिबेत्।

आ० र०- प्रयोगान्तरमाह-त्रिवृतादीनिति। त्रिवृतादीन्नव-त्रिवृत् श्यामा आरग्वधस्तिल्वकः स्नुही शङ्खिनी सत्पला दन्ती द्रवन्ती चेति। अत्र स्नुही काण्डं, नक्षीरम्, तस्य भावनासाधनत्वात्। वरा-त्रिफ़ला। सातला-सत्पला-सत्पला, तस्याःपुनरुक्तत्वात् स्वर्णक्षीरीं ससातलामिति भिन्नः प्रयोगः। अत एव त्रिफ़लाप्रयोगोऽपि भिन्नः। रसेन-मांसरसेन। व्योषादिप्व्योगोऽपि तद्वत्। तस्य तु पानं दुडोदकेन। सङ्ग्रहे तु (क. अ. २)-" अद्याच्छामात्रिवृव्काथं स्नुक्षीघृरआणितः। कासारिरसयूषाद्यैर्युक्तं वा स्नुज्पयः पिबेत्॥

निकुम्भकुम्भशम्याकशङ्खिनीसत्पलारजः। रात्रौ मुत्रे दिवा घर्मे सत्पाहंस्थापयेदनु॥ स्नुक्क्षीरेऽपि ततस्तेन माल्यं वासोऽवचूर्णितम्। आजिघ्रन् प्रावृणानश्च मृदुकोष्ठो विरिज्यते॥" इति।

अथ शङ्खिनीसप्तलयोः कल्पः।

नातिशुष्कं फलं ग्राह्यं शङ्खिन्या निस्तुषीकृतम्।

सप्तलायास्तथा मूलं ते तु तीक्ष्णविकाषिणी॥ ४९॥

श्लेष्मामयोदरगरश्वयथ्वादिषु कल्पयेत्।

अक्षमात्रं तयोः पिण्डं मदिरालवणान्वितम्॥ ५०॥

हृद्रोगे वातकफजे तद्वद्गुल्मेऽपि योजयेत्।

इति शङ्खिनीसप्तलयोः कल्पः।

स० -शङ्खिन्याः फलं निस्तुषीकृतं नातिशुष्कं ग्राह्यम्। सप्तलायाश्च मूलं ग्राह्यम्। ते च-शङ्खिनीफलसातलामूले, तीक्ष्णविकाषिणी-तैक्ष्ण्यात् विकाशित्वाच्च, श्लेष्मामयद्येषु कल्पयेत्। तयोः-शङ्खिनीसप्तलयोः पूर्वोक्तयोः, कर्षमात्रं पिण्डं सुरालवणयुक्तं वातकफजहृद्रोगादिषु कल्पयेत्।

आ० र०- शङ्खिनीफ़लसत्पलामूअयोः कल्पमाह-नातिशुष्कमिति।

अथ दन्तीद्रवन्त्योः कल्पः।

दन्तिदन्तस्थिरं स्थूलं मूलं दन्तीद्रवन्तिजम्॥ ५१॥

आताम्रश्यावतीक्ष्णोष्णमाशुकारि विकाशि च।

गुरु प्रकोपि वातस्य पित्तश्लेष्मविलायनम्॥ ५२॥

तत्क्षौद्रपिप्पलीलिप्तं स्वेद्यं मृद्भर्भवेष्टितम्।

शोष्यं मन्दातपेऽभ्यर्कौ हतो ह्यस्य विकाशिताम्॥ ५३॥

तत्पिबेन्मस्तुमदिरातक्रपीलुरसासवैः।

अभिष्यण्णतनुर्गुल्मी प्रमेही जठरी गरी॥५४॥

गोमृगाजरसैः पाण्डुः कृमिकोष्ठी भगन्दरी।

सिद्धं तत्क्वाथकल्काभ्यां दशमूलरसेन च॥५५॥

विसर्पविद्रध्यलजीकक्षादाहान् जयेद्घृतम्।

तैलं तु गुल्ममेहार्शोविबन्धकफमारुतान्॥५६॥

महास्नेहः शकृच्छुक्रवातसङ्गानिलव्यथाः।

इति दन्तीद्रवन्त्योः कल्पः।

स० -दन्तिनो दन्तः, तद्वत्स्थिरं स्थूलं च दन्तीद्रवन्त्युद्भवं मूलं किञ्चित्ताम्रश्यावतीक्ष्णोष्णमाशुकारि विकाशि चेत्यादिना तत्स्वरूपोक्तिः। तच्च क्षौद्रपिप्पलीभ्यां लिप्तं मृद्भर्भवेष्टितं स्वेदितं पश्चान्मन्दातपे शोष्यम्। किमेवं क्रियते? इत्याह यस्मादग्न्यर्कावस्य विकाशितां हतः। तच्च मस्त्वादिभिः पिबेत्। अभिष्यण्णदेहादिः पाण्ड्वामयी कृमिकोष्ठी भगन्दरी च गोमृगाजमांसरसैः पिबेत्। तस्य मूलस्य क्वाथकल्काभ्यां दशमूलरसेन च सिद्धं घृतं विसर्पादीन् जयेत्। तैलं तु सिद्धं गुल्मादीन् जयेत्। महास्नेहः शकृतादिसङ्गादीन् जयेत्।

आ० र०- दन्तीद्रवन्त्योः कल्पमाह-दन्तीति। हतः-नाशयतः। अभीष्यण्णतनुः-[राक्लिन्नदेहः। पाण्ड्वआदिषु गवादिमांसरसैः। विसर्पादिषु तत्क्वाथादिसिद्धं घृतम्। कक्षाक्षूद्ररोगेषूक्ता (हृ. उ.अ. ३१११११)। गुल्मादिषु धृतवत्सिद्धं तैलम्। शकृत्सङ्गादिषु घृतवत्सिद्धो महास्नेहः। सङ्गहे तु (क. अ. २) -"दन्त्या रसेऽजश्रृङ्ग्याश्च गुडक्षौद्रघृतान्वितः। लेहः सिद्धो विरेकार्थे दाहन्\सन्तापमेहनुत्॥वाततर्षे ज्वरे पैत्ते स्यात्स् एवाजगन्धया। दन्तीद्रवन्त्योर्मुलानि पचेद्धात्रीरसे ततः॥त्रीनंशान् फ़ाणिताद्धौ च भृज्जेत्तैले घृते ऽथवा। श्यामादिकल्कयुक्तोऽयं लेहः सिद्धो विरेचनम्॥पथ्याक्षदशमूलानां तद्वल्लेहाः पृथग्रसैः। तयोर्बिल्वसमं वर्णं तद्रसेनैव भावितम्॥विबद्धविशि वातोत्थे गुल्मे चाम्लं युतं हितम्। मुधादिसिद्धैस्तन्मूलैर्यूषादींश्च विकल्पयेत्॥दन्तीद्रवन्तीमरिचस्वर्णक्षीरीयवानकम्। सशुण्ठ्यग्निकपृथ्वीकं चूर्णितं सत्पावासरान्॥मूत्रभाविरमाज्येन पिबेज्जीर्णे च तर्पणम्। सर्वदा सर्वरोगेषु बाले वृद्धे च तद्धितम्॥दुर्भुक्ताजीर्णपार्श्वार्त्तिगुल्मप्लीहोदरेश्गु च। गण्डमालासु वाते चपाण्डुरोगे च शस्यए॥" इति।

विरेचने मुख्यतमा नवैते त्रिवृतादयः॥५७॥

स० -एते त्रिवृतादयो विरेचने नव श्रेष्ठतमाः।

अथ हरीतकीकल्पः।

हरीतकीमपि त्रिवृद्विधानेनोपकल्पयेत्।

स० -यथा त्रिवृताया विधानमुक्तं "अथ काले ततश्चूर्णं किञ्चिन्नागरसैन्धवम्।"(श्लो.७) इत्यादि, तथैव हरीतक्या अपि विधातव्यमित्यर्थः।

आ० र०- हरीतकीकल्पमाह-हरीतकीमिति।

गुडस्याष्टपले पथ्याविंशतिः स्यात्पलं पलम्॥५८॥

दन्तीचित्रकयोः कर्षौ पिप्पलीत्रिवृतोर्दश।

प्रकल्प्य मोदकानेकं दशमे दशमेऽहनि॥५९॥

उष्णाम्भोऽनु पिबेत्खादेत्तान् सर्वान्विधिनाऽमुना।

एते निष्परिहाराः स्युः सर्वव्याधिनिबर्हणाः॥६०॥

विशेषाद्ग्रहणीपाण्डुकण्डूकोठार्शसां हिताः।

इति हरीतकीकल्पः।

स ० -गुडस्याष्टपले पथ्याविंशतिर्दन्तीचित्रकयोः पलं पलं प्रत्येकं स्यात्। पिप्पलीत्रिवृतयोः कर्षावुभौ। दश मोदकानेवं प्रकल्प्यैकमेकं मोदकं दशमे दशमे दिने योजयेत्। पश्चादुष्णाम्बु पिबेत्। अमुना विधिना सर्वान् मोदकान् भक्षयेत्। एते मोदका निष्परिहारास्तथाऽशेषव्याधिनिबर्हणाः स्युः। विशेषेण ग्रहण्यादीनां हिताः। सम्बन्धमात्रस्य विवक्षितत्वादत्र षष्ठी, अन्यथा तु हितयोगे चतुर्थी स्यात्।

आ० र०- प्रयोगान्तरमाह-गुडस्येति। पथ्याविम्शतिरिति फ़लानां विंशतिः, पलानाम्। "सङ्ख्या फ़लानां शतशोऽपला स्यात्" इति वचनात्। सर्वस्य चूर्णस्य गुड पाकेन दश मोदकान् प्रकल्प्य, दशमे दशमेऽहन्येकं खादेत्। एवं सर्वान् खादेद्दिवसव्यशीत्या। सङ्ग्रहेतु (क. अ. २) -"विशेषाद्ग्रहणीशोफ़पाम्डुमेहोदरापहाम्। पिबेत्पथ्यां ससिन्धूत्थविडङ्गोषणनागराम्॥ मूत्रेण वत्सकादेर्वा निर्यूहेण हरीतकीम्। पथ्यानागरचूर्णं वा संयुक्तं नीलिनीफ़लैः॥ गुडेन भक्षयेत्तोयं कवोष्णं प्रपिबेदनु। पथ्यात्रिवृद्भ्यां गुटिकाः कार्या द्राक्षारसप्लुताः॥ माषप्रमाणास्ताः शुष्का यक्ष्मी लिह्याद्घृतल्पुताः। पथ्यात्रिवृत्पटूष्णाम्बु सर्वश्रेष्ठं इरेचनम्॥ स्नुक्क्षीरभाविते पथ्याचीर्णे कुर्वीत मोदकान्। कोलास्थिमात्रान् शुष्कांश्च नवनीतेन लेहयेत्॥ गुल्मोदरयकृल्पीहशूलानाहविबन्धिनः। लिह्यादेरम्डतैकेन कुष्ठं त्रिकटुकान्वितम्॥ सुखोदकं चानु पिबेत् सुखमेतद्विरेचनम्।" इति।

अल्पस्यापि महार्थत्वं प्रभूतस्याल्पकर्मताम्॥ ६१॥

कुर्यात्संश्लेषविश्लेषकालसंस्कारयुक्तिभिः॥ ६१ १/२॥

त्वक्केसराम्रातकदाडिमैला-
सितोपलामाक्षिकमातुलुङ्गैः।
मद्येन तैस्तैश्च मनोनुकूलै-
र्युक्तानि देयानि विरेचनानि॥ ६२ १/२॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां पञ्चमे कल्पसिद्धिस्थानेविरेचनकल्पो नाम द्वितीयोऽध्यायः॥ २॥

स० -अल्पस्य-वीर्येण मात्रया वा कदाचिदल्पौषधयोगस्य, केनचित्तत्तद्योग्यौषधसंश्लेषेण तस्य महार्थत्वं कार्यम्। तथा कालेन-मध्याह्नादिना, तथा संस्कारेण-तद्योग्येन गुणान्तरोत्पादनेन, तथा युक्त्या-योजनाप्रकारविशेषेण, तथा वीर्येण प्रभूतस्य-मात्रयाऽथवा महार्थस्य, कदाचित् केनचिद्द्रव्येण विश्लेषं कृत्वा तस्याल्पकर्मत्वं कार्यम्। तथा कालेन प्रत्यूषादिना मन्दवीर्येण, तथा संस्कारेण-गुणान्तराधानेन, तथा युक्त्या-तादृश्या, अल्पशक्तित्वलक्षणं कर्म कार्यम्।

त्वक्केसरादिभिस्तैस्तैः-अन्यैश्च तथाविधैः, मनोनुकूलैः-मानसप्रियैः, औषधैर्युक्तानि विरेचनानि देयानि। एवं कृते सति सम्यग्योगो विरेचनस्य स्यादिति। उपजातिर्वृत्तम्।

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टाङ्गहृदयटीकायां सर्वाङ्गसुन्दराख्यायां पञ्चमे कल्पसिद्धिस्थाने विरेचनकल्पो नाम द्वितीयोऽध्यायः समाप्तः॥२॥

आ० र०- उक्तानां विरेचनकल्पानां किञ्चिद्विशेषमाह अल्पस्येति। संश्लेषः-अनुक्तस्य। विश्लेषः-उक्तस्य। कालः-अवस्थाविशेषः। संस्कारः-पाकभावनादिः। युक्तिः-मात्राल्पत्वबहुत्वादिः।

इति हेमाद्रिटीकायामायुर्वेदरसायने।
रेकौषधप्रकारणं सामस्त्येन निरूपितम्॥

****

तृतीयोऽध्यायः।

अथ वमनविरेचनकल्पाभ्यामनन्तरं तद्व्यापत्सिद्धिं ब्रूते-

अथातो वमनविरेचनव्यापत्सिद्धिं व्याख्यास्यामः।

इति ह स्माहुरात्रेदयो महर्षयः॥

(गद्यसूत्रे॥२॥)

स ० -वमनविरेचनयोर्व्यापत्-अयथाशास्त्रमनुष्ठीयमानयोर्गदोत्पत्तिः, तस्या वमनविरेचनव्यापदः सिद्धिः-साधनं चिकित्सितं, तां वर्णयिष्यामः।

आ० र०- वमनविरेचनव्यापत्सिद्धिमध्यायं व्याख्यातुं प्रतिजानीते-अथेति। व्यापदश्चोक्ताः सङ्ग्रहे (क. अ. ३)- "प्रतिकूला गतिः पक्वो ग्रथितत्वं सगौरवम्। दोषोत्क्लेशो भृशाध्मानं परिकर्तः परिस्रवः॥ प्रवाहिका हृद्ग्रहणं सर्वगात्रपरिग्रहः। सह धातुस्रवेणैता द्वादशोक्ताः ससाधनाः॥ व्यापदो योगविभ्रंशाद्विविधेऽपि विरेचने।" इति।

वमनं मृदुकोष्ठेन क्षुद्वताऽल्पकफेन वा।

अतितीक्ष्णहिमस्तोकमजीर्णे दुर्बलेन वा॥१॥

पीतं प्रयात्यधस्तस्मिन्निष्टहानिर्मलोदयः।

वामयेत्तं पुनः स्निग्धं स्मरन् पूर्वमतिक्रमम्॥२॥

स० -एवंविधेन पुरुषेणैवंविधं वमनं पीतमधः प्रयाति। तस्मिन्-वमनेऽधस्तात्प्रयाते सति, इष्टहानिः-अभिप्रेतस्य वमनकार्यस्यानिष्पत्तिः। तथा मलस्य-वमनसाध्यस्य श्लेष्मणः केवलस्यान्यदोषयुक्तस्य वा, उदयः-स्वस्थानस्थस्यैवामयकरणं प्रतिचलप्रवलके च। तं-पुरुषं पीतवमनमप्यवान्तं, पुनः स्निग्धं वामयेत्। पूर्वं स्निग्धमपीति पुनः शब्दस्यार्थः। कथं वामयेत्? स्मरन् पूर्वमतिक्रमम्, यतोऽतिक्रमात् पीतवमनोऽप्यसौ पुरुषो वमनकर्मणः फलं नाप्तवान्। तमतिक्रमं-अपराधं, स्मरन् चेतसि कुर्वाणो, न त्वेवमेव, वामयेत्।

आ० र०- वमनस्य प्रतिकूलां गतिमाह-वमनमिति। अतिशब्दस्तीक्ष्णादिभिस्त्रिभिः सम्बध्यते। तस्मिन्-वमने। इष्टहानिः-यदर्थं वमनं तस्यानिष्पतिः। मलोदयो-दोषोत्क्लेशः। तं-तथाभूतम्, स्निग्धं कृत्वा पुनर्वामयेत्, येन सा व्यापज्जाता तत्परिहरन्।

अजीर्णिनः श्लेष्मवतो व्रजत्यूर्ध्वं विरेचनम्।

अतितीक्ष्णोष्णलवणमहृद्यमतिभूरि वा॥३॥

तत्र पूर्वोदिता व्यापत्सिद्धिश्च, न तथाऽपि चेत्।

आशये तिष्ठति ततस्तृतीयं नावचारयेत्॥४॥

अन्यत्र सात्म्याद्धृद्याद्वा भेषजान्निरपायतः।

स ० -अजीर्णिनस्तथा बहुश्लेष्मिणो विरेचनमतितीक्ष्णोष्णलवणहृद्यमतिप्रभूतं च पीतमूर्ध्वं याति। तत्र-तस्मिन्नूर्ध्वं व्रजति, पूर्वोक्ता(दिता) व्यापत्-इष्टहानिर्मलोदय इति। तत्र तथैव सिद्धिः-चिकित्सितम्। तथा, अनन्तरं विरेचनस्योर्ध्वगमनादविरिक्तं पुनः स्निग्धं विरेचयेत्। तथैव पूर्वं विरेचनातिक्रमं स्मरन्नितोऽपराधात्पूर्वं विरेचने न विरिक्तस्तमतिक्रमं परिहरन् विरेचयेदित्यर्थः। तथाऽपि-एवमनुष्ठीयमाने तद्विरेचनौषधं पीतं, यद्याशये-कोष्ठलक्षणे, न तिष्ठति-तत्र स्थितिं न बध्नाति ऊर्ध्वमेव पुनरेति, ततस्तृतीयं विरेचनौषधं-आरग्वधादि, नावचारयेत्। यदि तु सात्म्यं हृद्यं निरपायं वा भेषजं तदा तृतीयमप्यवचारयेत्।

आ० र०- विरेचनस्य प्रतिकूलां गतिमाह-अजिर्णिन इति। तत्र-विरेचने। पूर्वोदिता-वमनोक्ता, व्यापत्-इष्टहानिर्मलोदय इत्येषा, सिद्धिश्च-तं स्निग्धं पुनर्विरेचयेदित्येषा। तथाऽपि-तेनापि प्रकारेण, यद्याशये विरेचनं न तिष्ठति-ऊर्ध्वं याति, ततः-अनन्तरं, तृतीयं प्रयोगं नावचारयेत्, यदि तु सात्म्यं हृद्यं निरपायं वा भेषजं तदा तृतीयमप्यवचारेयेत्।

अस्निग्धस्विन्नदेहस्य पुराणं रूक्षमौषधम्॥५॥

दोषानुत्क्लेश्य निर्हर्तुमशक्तं जनयेद्गदान्।

विभ्रंशं श्वयथुं हिध्मां तमसो दर्शनं तृषम्॥६॥

पिण्डीकोद्वेष्टनं कण्डूमूर्वोः सादं विवर्णताम्।

स्निग्धस्विन्नस्य वाऽत्यल्पं दीप्ताग्नेर्जीर्णमौषधम्॥७॥

शीतैर्वा स्तब्धमामे वा समुत्क्लेश्याहरन्मलान्।

तानेव जनयेद्रोगानयोगः सर्व एव सः॥८॥

स० -अस्निग्धस्विन्नशरीरस्य पुराणं रूक्षं विरेचनौषधमुपयुक्तं दोषानुत्क्लेश्य-प्रच्याव्य, निर्हर्तुमशक्तं विभ्रंशादिकान् गदान् जनयेत्। अथवा, स्निग्धस्विन्नस्य चौषधमत्यल्पं-मात्राहीनं, दीप्ताग्नेर्जीर्ण-परिणतं, स्यात्। शीतैर्वा स्तब्धभेषजमामे वा स्तब्धं सत् [मलान्-] दोषान्, उत्क्लेश्यानिर्हरत् पूर्वोक्तानेव रोगान् जनयेत्। सः-एवंभूतः, सर्व एवायोगः।

आ० र०- ग्रथितत्वपाकगौरवाण्याह-अस्निग्धेति। तत्र "विवर्णताम्" इत्यन्तेन ग्रथितत्वम्। "औषधम्" इत्यन्तेन पाकम्। शेषेण गौरवम्। विभ्रंशं-इष्टहानिम्। जीर्णं-पक्वम्। शीतैः-औषधपानानन्तरमन्तर्बहिर्वा सेवितैः, औषधं स्तब्धं भवति। तद्वदामे-अपक्वदोषे। तानेव-विभ्रंशादीन्। सङ्ग्रहे तु (क. अ. ३)-"स्निग्धस्विन्नस्य च वमनमकृत्वा विरेचनं पीतवतः सामस्य वा मृदु वा विरिक्तस्याधोभगेऽत्यर्थगुरुस्तब्धोदरता शूलो वातपुरीषसङ्गश्च भवति।" इत्युक्तम्।

तं तैलललवणाभ्यक्तं स्विन्नं प्रस्तरसङ्करैः।

निरूढं जाङ्गलरसैर्भोजयित्वाऽनुवासयेत्॥९॥

फलमागधिकादारुसिद्धतैलेन मात्रया।

स्निग्धं वातहरैः स्नेहैः पुनस्तीक्ष्णेन शोधयेत्॥१०॥

स० -तं-उत्क्लिष्टदोषं, तैललवणाभ्यक्तं प्रस्तरसङ्कराख्यैः स्वेदैः स्विन्नं तथा निरूढं जाङ्गलरसैर्भोजयित्वा फलादिसिद्धतैलेन मात्रयाऽनुवासयेत्। वातहरैः स्नेहैः स्निग्धं पुनस्तीक्ष्णेन विरेचनेन विशोधयेत्।

आ० र०- त्रिविधायोगिनं, निरूढं-समूत्रैस्तीक्ष्णैर्निरूहैः, सङ्ग्रहे (क्. अ. ३) तथोक्तत्वात्, मदनफलादितैलेनानुवासयेत्।

बहुदोषस्य रूक्षस्य मन्दाग्नेरल्पमौषधम्।

सोदावर्तस्य चोत्क्लेश्य दोषान् मार्गान् निरुध्य तैः॥

भृशमाध्मापयेन्नाभिं पृष्ठपार्श्वशिरोरुजम्।

श्वासं विण्मूत्रवातनां सङ्गं कुर्याच्च दारुणम्॥ १२॥

आब्यङ्गस्वेदवर्त्यादि सनिरूहानुवासनम्।

उदावर्तहरं सर्वं कर्माध्मातस्य शस्यते॥ १३॥

पञ्चमूलयवक्षारवचाभूतिकसैन्धवैः।

यवागूः सुकृता शूलविबन्धानाहनाशनी॥ १४॥

स ०-बहुदोषस्य रूक्षस्य तथा मन्दाग्नेरल्पमौषधं योजितं तथोदावर्तवतो दोषानुत्क्लेश्य मार्गान् निरुध्य तैश्च दोषैर्भृशं नाभिमाध्मापयेत्। तथा पृष्ठादिरुजादीन् कुर्यात्। आध्मातस्य नरस्याभ्यङ्गादिकं कर्म उदावर्तहरं सर्वं शस्यते। पञ्चमूलादिभिः सुकृता यवागूः शूलादिनाशनी।

आ० र०- दोषोत्क्लेशभृशाध्माने आह-बहुदोषस्येति। तत्र "उत्क्लेश्य दोषान्" इत्यन्तेन दोषोत्क्लेशम्। शेषेण भृशाध्मानम्। उक्तं हि सङ्ग्रहे (क. अ. ३)-"कफोल्बणस्यातिस्निग्धस्य गुरुकोष्ठस्य मन्दाग्नेर्वा मृदुप्रणीतमौषधं भृशमुत्क्लेश्य दोषान् जाड्यतन्द्रादौर्बल्याङ्गसादान् जनयति। तच्छीघ्रमुल्लिखेत्। लङ्घितं च सन्धुक्षिताग्निं पुनः स्निग्धं तीक्ष्णोष्णर्विशोधयेत्। सशेषान्नाय वातश्लेष्मवते रूक्षाय सोदावर्ताय मन्दाग्नये वा शीतं रूक्षं वा दत्तमौषधं भृशमाध्मानं करोति। तत्र मलसङ्गात्समुन्नह्यन्युदरमन्तःशूलं दृतिवत्पार्श्वयोरापूर्णता शिरःपृष्ठरुजा श्वासः पायुवस्तिनिस्तोदश्च भवति। तमुदावर्तानाहहराभ्यङ्गस्वेद-वर्तिदीपनचूर्नबस्तिक्रियाभिरुपाचरेत्।" इति। तैः-उत्क्लिष्टदोषैः। नाभिं-नाभिसमीपमुदरम्। पञ्चमूलादियवागूः सुकृता-त्रिकटुलवणस्नेहयुता। पञ्चमूलं-महत्। उक्तं हि वृन्देन (ज्वरातिसाराधिकार श्लो.१६) -"पञ्चमूलीति सामान्याद्ग्राह्या पित्ते कनीयसी। महती पञ्चमूली तु वातश्लेषमोत्तरे हिता॥" इति। भूतिकं-रोहिषम्। सैन्धवस्त क्काथ्यद्रव्येषूक्तावपि सिद्धायां यवाग्वां लवणस्थाने प्रयोगः। अत एव सुकृताशब्देन कृताख्यो भेद उच्यते।

पिप्पलीदाडिमक्षारहिङ्गुशुण्ठ्यम्लवेतसान्।

ससैन्धवान् पिबेन्मद्यैः सर्पिषोष्णोदकेन वा॥ १५॥

प्रवाहिकापरिस्रावववेदनापरिकर्तने।

स० -पिप्पल्यादीन् मद्येन सर्पिषोष्णाम्बुना वा पिबेत् प्रवाहिकादिषु।

आ० र०- प्रवाहिकादित्रये भेषजमाह-पिप्पलीति। पिप्पल्यादिचूर्णं मद्याद्यन्यतमेन प्रवाहिकादिषु तिसृषु व्यापत्सु पिबेत्। वेदनया परिकर्तनं-छेदनमिव। सङ्ग्रहे तु (क. अ. ३) -"क्षामेणाल्पबलेन मृदुकोष्ठाग्निना रूक्षेण स्निग्धेन वा स्विन्नेन सामेन व बलवदौषधमुपयुक्तं सपित्तमनिलं परिदूष्य परिकर्तिकामापादयति। तत्र नाभिबस्तिगुदमेढ्रे सदाहं परिकर्तनमनिलसङ्गो विष्टम्भश्च। तं कृष्णतिलमधुकमधुयुक्तैः पिच्छाबस्तिभिरास्थापयेत्। क्षीरिवृक्षश्रृतक्षीरेण वा, शीताम्बुपरिषिक्तं चैनं पयसा भुक्तवन्तं घृतमण्डेन यष्टीमधुकतैलेन वाऽनुवासयेत्। क्षामस्य च मधुरो बृंहणश्च सर्वो विधिरिष्टः। सामे दीपनो लङ्घनश्च, लघुरूक्षोष्णं चान्नपानम्। निरामीभूते चानुबन्धे लघुक्षाराम्लम्। वातेऽधिके दधि साम्लं दाडिमत्वचा युक्तं भोजने पाने च युञ्जीत। सदाडिमरसं सर्पिः पिबेत्। उष्णाम्बुना वा तिलदेवदारुकल्कम्। क्रूरकोष्ठस्य बहुदोषस्याल्पमल्पगुणं मृदुस्निग्धं वा शोधनमवचारितमुत्क्लेश्य दोषान्न निर्हरति, अल्पाल्पं च पित्तकफसंसृष्टं परिस्रवति, विष्टम्भगौरवशोफकोठकण्डूपाण्डुताङ्गसादगुदशूलानि चापादयति। तं तिनिशधवाश्वकर्णपलाशबलानिर्यूहैर्मधुयुक्तैरास्थापयेत्। उपशान्तपरिस्रवं च पुनरुपस्निग्धं तीक्ष्णैः शोधयेत्। शुद्धे च दीपनांश्चूर्णासवारिष्टादीन् योजयेत्। पीतौषधो यदा वेगमुदीरयति निगृह्णाति वा, तदा प्रवाहिकाऽस्य जायते। तस्यां सदाहशूलं सपिच्छं श्वेतं कृष्णं सरक्तं वा भृशं प्रवाहमानः कफमुपविशति। तं परिस्रवविधिनोपचरेत्।" इति।

पीतौषधस्य वेगानां निग्रहान्मारुतादयः॥ १६॥

कुपिता हृदयं गत्वा घोरं कुर्वन्ति हृद्ग्रहम्।

हिध्मापार्श्वरुजाकासदैन्यलालाक्षिविभ्रमैः॥ १७॥

जिह्वां खादति निःसंज्ञो दन्तान् कटकटाययन्।

न गच्छेद्विभ्रमं तत्र वामयेदाशु तं भिषक्॥ १८॥

मधुरैः पित्तमूर्च्छार्तं कटुभिः कफमूर्च्छितम्।

पाचनीयैस्ततश्चास्य दोषशेषं विपाचयेत्॥१९॥

कायाग्निं च बलं चास्य क्रमेणाभिप्रवर्धयेत्।

स० - पीतौषधस्य वेगानां निग्रहाद्वातादयः कुपिता हृदयं गत्वा घोरं हृद्ग्रहं कुर्वन्ति। हिध्मादियुक्तः स च हृद्ग्रहादिमान् जिह्वां खादति निःसंज्ञः सन्। तथा दन्तान् कटकटायते। तत्र तस्मिन्नवस्थाविशेषे, भिषगाश्वेव तं-रोगिणं, संशयं हित्वा वामयेत्। मधुरैः पित्तमूर्च्छार्तं वामयेत्। कफमूर्च्छितं कटुभिर्वामयेत्। वामयित्वा चास्य दोषशेषं पाचनीयैर्द्रव्यैर्विपाचयेत्। कायाग्निं बलं च क्रमेणास्याभिप्रवर्धयेत्।

आ० र०- हृद्ग्रहमाह-पीतौषधस्येति। अक्षिविभ्रमः-उत्धृताक्षत्वम्। कटकटाययन्-कटत्कटदिति कारयन्, "लोहितादिडाजूभ्यः क्यष्" इति क्यषन्ताण्णिच। सङ्ग्रहे तु (क. अ. ३) -"तस्मै भिषक् शीघ्रममुह्यन्नभ्यङ्गपूर्वं धान्यस्वेदेन परिस्वेद्य तीक्ष्णमवपीडं दद्यात्। यथादोषोच्छ्रायं च बस्तीन् वितरेत्।" इति।

पवनेनातिवमतो हृदयं यस्य पीड्यते॥२०॥

तस्मै स्निग्धाम्लवणान् दद्यातिपित्तकफेऽन्यथा।

स० -यस्यातिवमतः पवनेन हृदयं पीड्यते, तस्मै रोगिणे स्निग्धाम्लवणं दद्यात्। पित्तकफे कुपिते, अन्यथा-मधुरशीतादिकं, दद्यादित्यर्थः।

आ० र०- हृद्ग्रहविशेषे भेषजमाह-पवनेनेति। अन्यथेति रूक्षमधुरकटुतिक्तकषायान् योगान् दद्यात्।

पीतौषधस्य वेगानां निग्रहेण कफेन वा॥२१॥

रुद्धोऽति वा विशुद्धस्य गृह्णात्यङ्गानि मारुतः।

स्तम्भवेपथुनिस्तोदसादोद्वेष्टार्तिभेदनैः॥२२॥

तत्र वातहरं सर्वं स्नेहस्वेदादि शस्यते।

स० -पीतभेषजस्य वेगानां निग्रहेण कफेन वा रुद्धोऽति विशुद्धस्य वा वायुरङ्गानि गृह्णाति स्तम्भादिभिः। तत्र सर्वं वातहरं स्नेहस्वेदादि शस्यते।

आ० र०- सर्वगात्रपरिग्रहमाह-पीतौषधस्येति। सङ्ग्रहे तु (क. अ. ३) -"अस्निग्धस्विन्नेनाब्रह्मचारिणा वेगधारिणा मृदुकोष्ठेन सुकुमारेण वा रूक्षमौषधमतिमात्-रप्रयुक्तमतिविरेकाद्वायुं प्रकोपयति। तेन सर्वाङ्गप्रग्रहे विशेषात्पार्श्वपृष्ठ श्रोणिमन्यामर्मसु शूलं मूर्च्छा भ्रमः कम्पः स्तम्भो निस्तोदो भेद उद्वेष्टनं संज्ञानाशश्च स्यात्। तमभ्यज्य धान्यैः स्वेदयित्वा यष्टीमधुविपक्केन तैलेननानुवासयेत्, वातहरं चान्नपानम्।" इति।

बहुतीक्ष्णं क्षुधार्तस्य मृदुकोष्ठस्य भेषजम्॥२३॥

हृत्वाऽऽशु विद्वित्तकफान् धातूनास्रावयेद्द्रवान्।

तत्रातियोगे मधुरैः शेषमौषधमुल्लिखेत्॥२४॥

योज्योऽति वमने रेको विरेके वमनं मृदु।

परिषेकावगाहाद्यैः सुशीतैः स्तम्भयेच्च तम्॥२५॥

अञ्जनं चन्दनोशीरमजासृक्शर्करोदकम्।

लाजचूर्णैः पिबेन्मन्थवतियोगहरं परम्॥२६॥

स० -क्षुधर्तस्य मृदुकोष्ठस्य नरस्य बहुतीक्ष्णं च भेषजं विद्वित्तकफान् शीघ्रमेव हृत्वा द्रवान् धातूनास्रावयेत्। तस्मिन् विरेचनातियोगे मधुरैर्द्रव्यैः शेषं विरेचनद्रव्यमुद्धरेत्। अतिवमने सति विरेको योज्यः। अतिविरेके च मृदु वमनं योज्यम्। परिषेकादिभिश्च शीतैस्तं-विरेकं, स्तम्भयेत्। आदिशब्दो जलार्द्रशीतमारुतादिग्रहणाय। अञ्जनादिकं लाजचूर्णैः सह मन्थं परं विरेकातियोगहरं पिबेत्।

आ० र०- धातुस्त्रवमाह-बहुतीक्ष्णमिति। अजासृग्छागरुधिरम्। अञ्जनादिषट्कं लाजचून्र्णैः सह पिबेत् "सक्तवः सर्पिषाभ्यक्ताः शीतवारिपरिप्लुताः। नातिसान्द्रा न चात्यच्छा मन्थ इत्यभिधीयते॥' इत्युक्तविशेषप्राप्त्यर्थं मन्थमित्युक्तम्।

वमनस्यातियोगे तु शीताम्बुपरिषेचितः।

पिबेत्फलरसैर्मन्थं सघृतक्षौद्रशर्करम्॥२७॥

सोद्गारायां भृशं छर्द्यां मूर्वाया धान्यमुस्तयोः।

समधूकाञ्जनं चूर्णं लेहयेन्मधुसंयुतम्॥२८॥

स० -वमनस्य त्वतियोगे शीताम्बुपरिषेचितः सन् फलरसैर्मन्थं घृतादियुक्तं पिबेत्। अतिशयेन सोद्गारे वमने सति मूर्वादिचूर्णं लेहयेत्।

आ० र०- वमनातियोगे विशेषमाह-वमनस्येति। मूर्वादिपञ्चकचूर्णं मधुना लेहयेत्।

वमतोऽन्तः प्रविष्टायां जिह्वायां कवलग्रहाः।

स्निग्धाम्ललवणा हृद्या यूषमांसरसा हिताः॥२९॥

फलान्यम्लानि खादेयुस्तस्य चान्येऽग्रतो नराः।

निःसृतां तु तिलद्राक्षाकल्कलिप्तां प्रवेशयेत्॥३०॥

स ०-छर्दयतोऽभ्यन्तरे जिह्वायां प्रविष्टायां सत्यां कवलग्रहश्छागमांसरसाः स्निग्धादियुक्ता मनःप्रिया हिताः। तथा तस्य-अन्तःप्रविष्टजिह्वस्य, अग्रेऽपरे नरा अम्लानि फलानि खादेयुः। निःसृतां च रसनां तिलद्राक्षाकल्केन लिप्तामन्तः प्रवेशयेत्।

आ० र०- कवल्ग्रहाः-गण्डूषाः। ते च यूषा मांसरसा वा।

वाग्ग्रहानिलरोगेषु घृतमांसोपसाधिताम्।

यवागूं तनुकां दद्यात्स्नेहस्वेदौ च कालवित्॥३१॥

स० -वाग्ग्रहादिषु वातरोगेषु घृतमांसोपसाधितां स्वच्छां यवागूं दद्यात्। स्नेहस्वेदौ च योजयेत्।

आ० र०- तनुकां-अच्छाम्।

अतियोगाच्च भैषज्यं जीवं हरति शोणितम्।

तज्जीवादानमित्युक्तमादत्ते जीवितं यतः॥३२॥

शुने काकाय वा दद्यात्तेनान्नमसृजा सह।

भुक्तेऽभुक्ते वदेज्जीवं पित्तं वा भेषजेरितम्॥३३॥

शुक्लं वा भावितं वस्त्रमावानं कोष्णवारिणा।

प्रक्षालितं विवर्णं स्यात्पित्ते शुद्धं तु शोणिते॥३४॥

स०-अतियोगेन च यद्भेषजं जीवाख्यं शोणितं हरति तद्भैषज्यं जीवादानमिति गदितम्, यतस्तज्जीवितमादत्ते। पित्तरक्तयोर्गन्धवर्णानुवृत्तित्वसामान्यात् किमिदं रक्तमुत पित्तम्? इति संशयः। तत्परीक्षार्थमाह-शुने काकाय वेत्यादि। तेनविरेचनातियोगोद्भवेन रक्तेन, मिश्रितमन्नं शुने वायसाय वा दद्यात्। तस्मिन् रक्तमिश्रितेऽन्ने भुक्ते सति जीवं वदेत्। अभुक्ते च सति तस्मिन् विरेचनातियोगेरितं पित्तं ब्रूयात्। शुक्लं वस्त्रं तेन विरेचनातियोगोद्भवेन रक्तेन संशयरूपेण भावितं-आर्द्रीकृतं, अनन्तरमावानं-शुष्कं, कोष्णवारिणा प्रक्षालितं-प्रकर्षेण धौतं, पित्ते सति विवर्णं वस्त्रं स्यात्, न शुद्धम्। शोणिते तु सति प्रक्षालितं वस्त्रं शुद्धं स्यात्।

आ० र०- वमनभैषज्यातियोगे व्यापदमाह-अतियोगादिति। जीवशोणितं-ओजः, "ओजसु तेजो धातूनां" (ह्. सू. अ. १११३७) इत्यादिनोक्तम्। तत्-व्यापद्रूपं जीवादानसंज्ञम्। तेनासृजा-जीवशोणितेन। भावितं-द्विस्त्रिर्वा स्तिमितम्। ततः आवानं-ईषच्छुष्कम्। ततः कोष्णवारिणा प्रक्षालितम्। तद्यदि विवर्णं स्यात्तदा पितम्। यदि शुद्धं तदा जीवशोणितम्।

तृष्णामूर्च्छामदार्तस्य कुर्यादामरणात्क्रियाम्।

तक्तपित्तातिसारघ्नीं तस्याशु प्राणरक्षणीम्॥३५॥

मृगगोमहिषाजानां सद्यस्कं जीवतामसृक्।

पिबेज्जीवाभिसन्धानं जीवं तद्ध्याशु गच्छति॥३६॥

तदेव दर्भमृदितं रक्तं बस्तौ निषेचयेत्।

श्यामाकाश्मर्यमधुकदूर्वाशीरैः श्रृतं पयः॥३७॥

घृतमण्डाञ्जनयुतं बस्तिं व योजयेद्भिषम्।

पिच्छाबस्तिं सुशीतं वा घृतमण्डानुवासनम्॥३८॥

स० -तृष्णाद्यार्तस्य शोणिते स्रवत्येव तक्रपित्तातिसारघ्नीं प्राणरक्षणीं शीघ्रं क्रियां कुर्यात्, आमरणात्। अनेन च मरणतुलाधिरूढत्वं द्योतयति। संशयेऽपि चिकित्सा कार्येति प्रागभ्यधायि। तत्र मृगादीनां जीवतां सद्यस्कं-तत्क्षणोत्पन्नं, रक्तं पिबेत्। किम्भूतम्? जीवाभिसन्धानम्। जीवमभिसन्धीयतेऽत्रेति जीवाभिसन्धानम्। हि-यस्मात्, तत्-रक्तं कर्तृभूतं, जीवं कर्म आशु गच्छति-प्राप्नोति। तदेतद्रक्तं दर्भमृदितं-अभिनवप्रसूतदर्भमृदितं, बस्तौ निषेचयेत्-प्रक्षिपेत्। श्यामादिभिर्वा श्रृतं पयो घृतमण्डाञ्जनाभ्यां युक्तं बस्तिं हिमं-शीतलं, योजयेत्। अथवा पिच्छाबस्तिं-स्वल्पमनुवासनं, सुशीतं घृतमण्डेन-स्वच्छेनोर्ध्वभवेन घृतस्योपरिभागस्थितेन, देयम्।

आ० र०- तस्य-ज्ञातजीवशोणितनिर्गमस्य। सद्यस्कंगृहीतमात्रं शिराव्यधेन। जीवाभिसन्धानं-जीवशोणितन्यूनांशपुरणम्। हि-यस्मात्, तत् जीवं-जीवशोणितं, आशु गच्छति। तदेव-मृगादीनाम्, दर्भमृदितं-दर्भचूर्णेन सह भर्दितम्, बस्तौ निषेचयेत्-तेन निरूहं दद्यात्, श्यामादिक्वथितेन पयसा वा। श्यामा-प्रियङ्गुः। पिच्छाबस्तिं-अतिसारचिकित्सितोक्तम् (हृ.चि.अ. ९१७२)।

अस्यामप्यतियोगोद्भवायामवस्थायां गुदभ्रंशः सम्भाव्यत इत्याह-

गुदं भ्रष्टं कषायैश्च स्तम्भयित्वा प्रवेशयेत्।

स० -गुदं भष्टं कषायैः-कषायरसनिष्पादितैः -क्वाथैः, स्तम्भयित्वा प्रवेशयेत्।

आ० र०- गुदं भ्रष्टं कषायैः-कषायरसैर्द्रव्यैः, स्तम्भयित्वा-स्तब्धतां नीत्वा, प्रवेशयेत्।

विसंज्ञं श्रावयेत्सामवेणुगीतादिनिस्वनम्॥ ३९॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचिता- यामष्टाङ्गहृदयसंहितायां पञ्चमे कल्पसिद्धि-स्थाने वमनविरेचनव्यापत्सिद्धिर्नाम तृतीयोऽध्यायः॥ ३॥

स० -विसंज्ञं सम्पन्नं सामवेणुगीतादीनां निस्वनं श्रावयेदिति।

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टाङ्ग-हृदयटीकायां सर्वाङ्गसुन्दराख्यायां पञ्चमे कल्पसिद्धिस्थाने वमनविरेचनव्यापत्सिद्धिर्नामतृतीयोऽध्यायः समाप्तः॥३॥

आ० र०- विसंज्ञं सामादिध्वनीन् श्रावयेत्। सङ्ग्रहे तु (क. अ. ३)-"अतिमात्रमकालेऽल्पं तुल्यवीर्यैरभावितम्। असम्यक् संस्कृतं जीर्णं व्यापद्येतौषधं ध्रुवम्॥ छर्दनं न तु दुश्च्छर्दं दुर्विरेचं न रेचनम्। पाययेदौषधं भूयस्तन्निहन्ति तथा हि तौ॥ यस्योर्ध्वं कफसंसृष्टं पीतं यात्यानुलोमिकम्। वमितं कवलैः शुद्धं लङ्घितं पाययेत्तु तम्॥ विबद्धेऽल्पं चिराद्दोषे स्रवत्युष्णं पिबेज्जलम्। तेनाध्मानं वमिस्तृष्णा विबन्धश्चाशु शाम्यति॥भेषजं दोषरुद्धं चेन्नोर्ध्वं नाधः प्रवर्तते। सोद्गारं साङ्गशूलं वा स्वेदं तत्रावचारयेत्॥ सम्यग्विरिक्तस्योद्गारे भेषजं क्षिप्रमुल्लिखेत्। अजीर्णमप्रवृत्तौ तु सुशीतैः स्तम्भयेद्विषक्॥ कदाचिच्छ्लेष्मणा रुद्धं तिष्ठत्युरसि भेषजम्। क्षीणे श्लेष्मणि सायाह्ने निशि वा तत् प्रवर्त्तते॥ क्षारानाहारयेज्जीर्णे तिष्ठत्यूर्ध्वं गतेऽपि वा। वायुना भेषजे त्वन्यत् सस्नेहलवणं पिबेत्॥ तृण्मोहभ्रममूर्च्छाद्याः स्युर्जीर्यति च भेषजे। पित्तघ्नं स्वादु शीतं च भेषजं तत्र शस्यते॥लालाहृल्लासविष्टम्भरोमहर्षाः कफाधृते। भेषजं तत्र तीक्ष्णोष्णं कट्वापि कफनुद्धितम्॥" इति। तथा धातुस्रवे (सं,क.अ. ३)-"तं शतधौतघृतेनाभ्यज्य कषायस्वादुशीतैः प्रदेहपरिषेकावगाहान्नपानैः शर्करामधुमद्भिश्च लेहैः स्तम्भयेत्। विशेषेण तु विरेचनातियोगे तण्डुलाम्भसा मधुमिश्रेण वामयेत्। प्रियङ्वादिकं च तण्डुलोदकेन पिबेत्। रोध्ररसाञ्जनादाडिमत्वचो वा। कट्फलोत्पलसमङ्गापद्मकेसराणि वा। क्षौद्रशर्कारामधुकोदुम्बरत्वचो वा। शेष्वपि चासम्यक्प्रयुक्तवमनविरेचनोपद्रवेषु यथामयं दोषादीनालक्ष्य प्रतिकुर्यात्। बस्तिव्यापर्सिद्धिं चेक्षेत। एवमुभयतो भागेऽपि शोधने यथाबस्थमुत्तिष्ठेत। या तु विरेचने परिकर्तिका तद्वमने कण्ठक्षणनम्, यः परिस्रवः स कफप्रसेकः, यत् प्रवाहणं स शुष्कोद्गार इति।" इति।

इति हेमाद्रिटीकायामायौर्वेदरसायने।

शुद्धिव्यापत्प्रकरणं सामस्त्येन निरूपितम्॥३॥

****

चतुर्थोऽध्यायः।

अथ दोषहरणसामान्याद्बस्तिकल्पः प्रक्रम्यत इत्याह-

अथातो बस्तिकल्पं व्याख्यास्यामः।
इति ह स्माहुरात्रेयादयो महर्षयः॥ (गद्यसूत्रे॥२॥)

स० -कल्पनं-कल्पः। बस्तेः कल्पो बस्तिकल्पः, तम्। शेषं पूर्ववत्।

आ० र०- बस्तिकल्पमध्यायं व्याख्यातुं प्रतिजानीतेअथेति।

बलां गुडूचीं त्रिफलां सरास्नां
द्विपञ्चमूलं च पलोन्मितानि।
अष्टौ फलान्यर्धतुलां च मांसा-
च्छागात्पचेदप्सु चतुर्थशेषम्॥१॥

पूतो यवानीफलबिल्वकुष्ठ-
वचाशताह्वाघनपिप्पलीनाम्।
कल्कैर्गुडक्षौद्रघृतैः सतैलै-
र्युक्तः सुखोष्णो लवणान्वितश्च॥२॥

बस्तिः परं सर्वगदप्रमाथी
स्वस्थे हितो जीवनबृंहणश्च।
बस्तौ च यस्मिन् पठितो न कल्कः
सर्वत्र दद्यादमुमेव तत्र॥३॥

स० -बलादीनि प्रत्येकं पलोन्मितानि, तथाऽष्टौ [फलानि-] मदनफलानि प्रायेण पलं स्युः, छागमांसात् पञ्चाशत्पलानि, अप्सु चतुर्भागावशेषं पचेत्। पूतश्च क्काथो यवन्यादिभिः कल्कैस्तथा गुडादिभिर्युक्तः सुखोष्णो लवणयुतश्च बस्त्यर्थं परिकल्पितत्वाद्बस्तिः सर्वगदानामपहन्ता स्वस्थे च हितः स्वास्थ्यानुवृत्तिकृत्त्वात् जीवनो बृंहणश्च। अत्र चतुर्थशेषग्रहणमनर्थकम्। यतो वक्ष्यति (क. अ. ६/१४)-"क्काथं द्रव्यपले कुर्यात्प्रस्थार्धं पादशेषितम्।" इति। अत्रोच्यते। वक्ष्यमाणपरिभाषाप्रमाणमत्र नाश्रीयत इति प्रतिपादनाय चतुर्थशेषोपादानम्। तेन निरूहयोग्यक्काथार्थं द्रव्याच्चतुर्गुणं जलं क्षिप्त्वा चतुर्भागावशेषं ग्राह्यमितीहावतिष्ठते। एवमन्यत्रापि निरूह उपयुज्यते। ये तु तन्त्रकाराभिप्रायमविदन्तः सरलाशमुखीकास्ते सामान्यपरिभाषोक्तप्रमाणं जलं क्षिप्त्वा चतुरंशशेषं ग्राह्यामिति वदन्ति, शेषं स्थितम्। तथा यवान्यादिकल्कस्य पलद्वयमात्रं ग्राह्यम्, "स्वस्थे कल्कपलद्वयम्।" (हृ. सू. अ. १९/४४) इति वचनात्। स्नेहश्चात्र क्काथे चतुर्थांशः षष्ठांशोऽष्टमांशः क्रमेण वातपित्तकफेषु योज्यः। उक्तं च (हृ. सू. अ. १९/३९)-"ततः क्काथाच्चतुर्थांशं स्नेहं वाते प्रकल्पयेत्। पित्ते स्वस्थे च षष्ठांशमष्टमांशं कफेऽधिके॥ इति। मधुलवणे च यथा नात्यच्छता नातिलवणता च बस्तौ स्यात्तथा योजयितव्ये। उक्तं च (हृ.सू अ. १९/४१) - मधुपद्वादिशेषं च युक्त्या एव (इति)। बस्तौ च यत्र कल्को न पठितस्तत्रामुमेव कल्कं दद्यात्। उपजातिवृत्ते इन्द्रवज्रा च।

आ० र०- बस्तिकल्पो द्विविधः,-निरूहकल्पोऽनुवासनकल्पश्च। तत्रादौ निरूहकल्पः। तत्रापि वातहरः। बलादिनिरूहमाह-बलामिति षिडश पृथक् पलोन्मितानि। अप्सु-सर्वेभ्यः षोडशगुणासु।

द्विपञ्चमूलस्य रसोऽम्लयुक्तः
सच्छागमांसस्य सपूर्वपेष्यः।
त्रिस्नेहयुक्तः प्रवरो निरूहः
सर्वानिलव्याधिहरः प्रदिष्टः॥४॥

स० -दशमूलस्य छागमांससहितस्य रसः-क्वाथः, अम्लेन काञ्जिकादिना युक्तः, पूर्वैः-यवन्यादिभिः पेष्यैः सहितः, तथात्रिभिः स्नेहैः-सर्पिर्मज्जावसाख्यैरन्वितः, श्रेष्ठो निरूहः सर्वव्याधिहरो गदितः।

आ० र०- दशमूलादिनिरूहमाह-द्विपञ्चमूलस्येति। त्रयःस्नेहाः-घृततैलवसाः।

बलापटोलीलघुपञ्चमूल-
त्रायन्तिकैरण्डयवात्सुसिद्धात्।
प्रस्थो रसाच्छागरसार्धयुक्तः
साध्यः पुनः प्रस्थसमः स यावत्॥५॥

प्रियङ्गुकृष्णाघनकल्कयुक्तः
सतैलसर्पिर्मधुसैन्धवश्च।
स्याद्दीपनो मांसबलप्रदश्च
चक्षुर्बलं चोपदधाति सद्यः॥६॥

स० -बलापटोल्यादे रसात् सुसिद्धात् प्रस्थः सिद्धः, तथा छागमांसरसादर्धप्रस्थेन युक्तः पुनः साध्यः यावदसौ प्रस्थप्रमाणः स्यात्। प्रियङ्वादिभिः कल्कैर्युक्तस्तैलादिभिः सहितो बस्तिर्दीपनो मांसबलप्रदश्च स्यात्। चक्षुर्बलं च शीघ्रमेवोपदधाति।

आ० र०- बलादिनिरूमाह-बलाफटोलीति। बलादेः सुसिद्धाद्यो रसो जातः तस्मात् प्रस्थः छागरस्यार्धप्रस्थेन युक्तः। पाकेन प्रस्थ्वशेषः कार्यः।

एरण्डमूलात्त्विपलं पलाशा
त्तथा पलांशं लघुपञ्चमूलम्।
रास्नाबलाछिन्नरुहाश्वगन्धा-
पुनर्नवारग्वधदेवदारु॥७॥

फलानि चाष्टौ सलिलाढकाभ्यां
विपाचयेदष्टमशेषितेऽस्मिन्।
वचाशताह्वाहपुषाप्रियङ्गु-
यष्टीकणावत्सकबीजमुस्तम्॥८॥

दद्यात्सुपिष्टं सहतार्क्ष्यशैल-
मक्षप्रमाणं लवणांशयुक्तम्।
समाक्षिकस्तैलयुतः समूत्रो
बस्तिर्जयेल्लेखनदीपनोऽसौ॥९॥

जङ्घोरुपादत्रिकपृष्ठकोष्ठ-
हृद्ग्रह्यशूलं गुरुतां विबन्धम्।
गुल्माश्मवर्ध्मग्रहणीगुदोत्थां-
स्तास्तांश्च रोगान् कफवातजातान्॥१०॥

स० -एरण्डमूलस्य त्रीणि पलानि, पलाशात्-किंशुकाच्च पलानि त्रीणि, ह्रस्वं पञ्चमूलं पालिकं, रास्नादीनि प्रत्येकं पालिकानि, अष्टौ मदनफलानि च जलाढकद्वये विपाचयेत्। अष्टांशशेषिते चास्मिन् वचादिकमक्षप्रमाणं सुपिष्टं दद्यात्। लवणकर्षचतुर्थांशयुक्तं माक्षिकतैलमूत्रान्वितोऽयं बस्तिर्लेखनो दीपनो जङ्घादिशूलादींस्तांस्तान्-बहुविधानपि, वातश्लेष्मोत्थान् रोगान् जयति। षड्डपजातय इन्द्रवज्रा च।

आ० र०- एरण्डादिनिरूहमाह-एरण्डमूलादिति। पलाशात् तथा-त्रिपलम्। तार्क्ष्यशैलं-रसाञ्जनम्।

यष्ट्याह्वरोध्राभयचन्दनैश्च
श्रृतं पयोऽग्र्यं कमलोत्पलैश्च।
सशर्कराक्षौद्रघृतं सुशीतं
पित्तामयान् हन्ति सजीवनीयम्॥ ११॥

स० -यष्ट्याह्वादिभिः श्रृतं पयोऽग्र्यं-श्रेष्ठं, स्यात्। शर्कराक्षौद्रघृतयुक्तं सुशीतलं जीवनीयसहितं पित्तामयान् हन्ति। अभयं-उशीरम्।

आ० र०- अथ पित्तहरनिरूहाः। तत्र उअष्ट्यादिनिरूहमाह-यष्ट्याह्वेति। अभयं-उशीरम्। अग्र्यं-गव्यम्। सजीवनीयं-जीवन्त्यादिगणकल्कयुक्तम्।

रास्नां वृषं लोहितिकामनन्तां
बलां कनीयस्तृणपञ्चमूल्यौ।
गोपाङ्गनाचन्दनपद्मकर्द्धि-
यष्ट्याह्वरोध्राणि पलार्धकानि॥ १२॥
निःक्काथ्य तोयेन रसेन तेन
श्रृतं पयोऽर्धाढकमम्बुहीनम्।
जीवन्तिमेदर्ध्दिवरीविदारी-
वीराद्विकाकोलिकसेरुकाभिः॥ १३॥
सितोपलाजीवकपद्मरेणु-
प्रपौण्डरीकोत्पलपुण्डरीकैः।
रोध्रात्मगुप्तामधुयष्टिकाभि-
र्नागाह्वमुञ्जातकचन्दनैश्च॥ १४॥
पिष्टैर्घृतक्षौद्रयुतैर्निरूहं
ससैन्धवं शीतलमेव दद्यात्।

प्रत्यागते धन्वरसेन शालीन्
क्षीरेण वाऽद्यात्परिषिक्तगात्रः॥ १५॥
दाहातिसारप्रदरास्रपित्त-
हृत्पाण्डुरोगान् विषमज्वरं च।
सगुल्ममूत्रग्रहकामलादीन्
सर्वामयान् पित्तकृतान्निहन्ति॥ १६॥

स० -रास्नादीन्यर्धपलप्रमाणानि तोयेन निःक्काथ्य तेन रसेन पयः श्रृतमर्धाढकमात्रं जलहीनं जीवन्त्यादिभिः सुपिष्टैर्घृतक्षौद्रयुतैर्निरूहं सैन्धवान्वितं शीतलमेव दद्यात्। तस्मिन्निरूहे प्रत्यागते-निर्गते, परिषिक्ताङ्गो धन्वमांसरसेन शालीनद्यात्। सात्म्यादिवशाद्वा क्षीरेणाद्यात्। स च दाहादीन् हन्ति। पञ्चोपजातय इन्द्रवज्रा च।

आ० र०- रास्नादिनिरूहमाह-रास्नामिति। वृषं-रास्नानिरूहमाह-सार्नामिति। वृषं-वासाम्। लोहितिकां-मञ्जिष्ठाम्। अनन्तां-दूर्वाम्। कनीयः-बृहत्यादि। तृणं-दर्भादि। गोपाङ्गना-सारिवा रास्नादीन्येक विंशतिः पलार्धकानि। तोयेन श्गोडशगुणेन पादशेषः व्काथो द्विचत्वारिंशत्पलानि, तेन पयसश्चतुःषष्टिपलानि पचेदम्बुहीनं-व्काथहीनं यावद्भवति, क्षीरावशेषमित्यर्थः। वीरा-क्षीरविदारी। पद्मोरेणुः-पद्मकेशरम्। पुण्डरीकं-श्वेतपद्मम्। नागह्वं-नादकेसरम्। प्रदरं-रजोतिप्रवृत्तिः। सङ्ग्रहे तु (क. अ. ४) - "गोपाङ्गनाचन्दन-शीतपाकीद्राक्षार्धिश्मर्यमधूकसेव्यैः। पयः श्रृतं श्रावणिमुद्गपर्णीतुगास्वगुत्पामधु-यश्ःटिकल्कैः॥ गोधूमचूर्णैश्च पिचुप्रमाणैरिक्षोर्विदार्याश्च रसेन युक्तः। तैलेन यष्टीमधुसाधितेन सितोपलाक्षौद्रघृतैश्च स्जीतः॥ बस्तिः प्रशस्तः स समसदेहदाहे सशूलेऽवयवाश्रिते वा। गुल्मातिसारभ्रममुत्रकृछ्रक्षीणे क्षतौजोबलसङ्क्षये च॥ चतुष्पले तैलघृतस्य भृष्टः छागाच्छतार्धो दधिदाडिमाम्लः। रसः सपेष्यो बलवर्णमांसरे-तोग्नितैर्मिर्यशिरुजीष्टः॥ यष्याह्वयस्याष्टपलेन सिद्धं पयः शताह्वाफलपिप्पलीभिः। युक्तं ससर्पिर्मधु वातरक्तविसर्पवैस्वर्यहितो निरूहः॥" इति।

कोशातकारग्वधदेवदारु-
मूर्वाश्वदंष्ट्राकुटजार्कपाठाः।
पक्त्वा कुलत्थान् बृहतीं च तोये
रसस्य तस्य प्रसृता दश स्युः॥१७॥

तान् सर्षपैलामदनैः सकुष्ठै-
रक्षप्रमाणैः प्रसृतैश्च युक्तान्।
क्षौद्रस्य तैलस्य फलाह्वयस्य
क्षारस्य तैलस्य च सार्षपस्य॥१८॥

दद्यान्निरूहं कफरोगिताय
मन्दाग्नये चाशनविद्विषे च।

स०-कोशातकादीन् जले पक्त्वा तस्य रसस्य-क्काथस्य, दश प्रसृताः स्युः। तान् सर्षपादिभिरक्षप्रमाणैर्युक्तान्, क्षौद्रादीनां प्रत्येकं प्रसृतेन युक्तान्, फलाह्वयं तैलं-यन्मदनफलकल्केनाम्लैश्च पक्वं तैलम्, तदेतत्संयोज्य कफरोगार्तादिभ्यो निरूहं दद्यात्। अत्र कोशातकादीनां द्रव्याणां परिमाणमनुक्तमपि सामान्यपरिभाषया तत्परिमाणं कल्पनीयम्। यत्परिमाणेभ्यो द्रव्येभ्यः षोडशगुणं जलं दत्त्वा चतुर्भागावशेषं यथा दश प्रसृताः सम्पद्यन्ते तत्परिमाणानि कोशातक्यादीन्यत्र परिकल्पनीयानीति बोध्यम्।

आ० र०- अथ कफहरनिरूहाः। तत्र कोशातकादिनिरूहमाहकोशातकेति। फलाह्वयं तैलं-फलतैलम्। क्षारस्ययवक्षारस्य। सङ्ग्रहे तु (क. अ. ४) - "पुनर्नवैरण्डवृषाश्म-भेदवृश्चीवभूतीकबलापलाशाः। द्विपञ्चमूलं च पलांशकानि क्षुण्णानि धौतानि फलानि चाष्टौ॥ बिल्वं यवाङ्कोलकुत्थधान्यफलानि च स्युः प्रसृतोन्मितानि। पयो जलव्याढकसाधितं तत् क्षीरावशिष्टं शुचिवस्त्रपूतम्॥ वचाशताह्वामरदारुकुष्ठयष्ट्याह्वसिद्धार्थकपिप्पलीनाम्। कल्कैर्यवान्या मदनैश्च युक्तं नात्युष्णशीतं गुडसैन्धावाक्तम्॥ क्षौद्रस्य तैलस्य च सर्षपश्च नास्य युक्तं प्रसृतत्रयेण। दद्यान्निरूहं विधिना विधिज्ञस्तं सर्वसंसर्गकृतामयन्घ्नम्॥ अर्धार्धविहितान्

बस्तीनतश्चित्रान् प्रवक्ष्यते। कोशातकीद्वयेक्ष्वाकुफलजीमुतवत्सकाः॥श्यामात्रिवृतयोर्मूलं तथा दन्तीद्रवन्तिजम्। प्रकीर्या चोदकीर्या च क्षीरिणी नीलिनी फलम्॥सत्पला शङ्खिनी रोध्रंफलं कम्पिल्लकस्य च। सकल्कसैन्धवयुताः पक्वाशयविशोधनाः॥धातकीपुष्प-तर्कारीजीवन्तीमूलवत्सकाः॥प्रग्रहः

खदिरः कुष्ठं शमी पिण्डीतको यवाः॥प्रियङ्गुः रक्तमूली च तरुणीजातियूथिकाः। वटाद्याः किंशुको रोध्रमिति सङ्ग्रहिका मताः॥ग्रही प्रियङ्गम्बष्ठादिक्काथकल्कैः ऋमेण तु। ऊषकादिप्रतीवापो लेखनस्त्रिफलारसः॥मधुरक्काथकल्केन सरसाज्येन बृंहणः । बदर्यैरावणीशेलूशाल्मलीधन्वनाङ्कुराः॥समाक्षिकाः क्षीरयुताः सास्रुजः पिच्छिलाः स्मृताः। कोलङ्कतककाण्डेक्षुदर्भपौण्डेक्षुवालुभिः॥दाहन्घः सघृतक्षीरोद्वितीयश्चोत्पलादिभिः। मुष्टिह् शाल्मलिवृन्तानां क्षीरसिद्धो हतान्वितः॥हितः प्रवाहणे तद्वद्वृन्तैः शाल्मलिकस्य च। कर्बुदाराढकीनीपविदुलैः क्षीरसाधितैः॥परिकर्ते तथा वृन्तैः। श्रीपर्णीकोविदारजैः। परिस्रवे पयः सिद्धं सवृश्छीवपुनर्नवम्॥आखुकर्णिकया तद्वत्तन्दुलीयकयुक्तया। अश्वावरोहकः काकनासाराजकसेरुकाः॥सिद्धाः क्षीरेऽति योगे स्युः क्षौद्राञ्जनघृतैर्युताः। न्यग्रोधाद्यैश्चतुर्भिश्च तेनैव विधिनाऽपरः॥बृहती क्षीरकाकोली पृश्निपर्णी शतावरी। काश्मर्यबदरीमूर्वास्तथो शीरप्रियङ्गव।\ जीवादाने श्रृते क्षीरे द्वौ घृताञ्जनसंयुतौ। बस्ती प्रदेयौ भिषजा शितौ समधुशर्करौ॥गोव्यजामहिषीक्षीरैर्जीवनियुतैरपि। शशैणदक्षमार्जारमहिष्यव्यजशोणितैः॥ सद्यस्कैर्मृदितैर्बस्तिर्जीवादाने प्रशस्यते॥" इति।

वक्ष्ये मृदून् स्नेहकृतो निरूहान्
सुखोचितानां प्रसृतैः पृथक् तु॥१९॥

स०-तुशब्दो भिन्नक्रमः। सुखोचितानां पुनः सुकुमाराणां तु निरूहान् पृथक् प्रसृतैर्वक्ष्ये-भणिष्यामि। किम्भूतान्? मृदून्-अतीक्ष्णान्, तथा स्नेहकृतः-कृतस्नेहान्। केचित्त्वसमग्रं वृत्तं चोक्तम(त्त्वाऽ)नुष्टुभा संगृह्णते, तच्चासम्यक्, एवं हि वृत्तस्यास्य खण्डना स्यात्, तस्मादयमेव पाठः श्रेयान्। प्रसृतैश्च निष्पादितत्वादेते वक्ष्यमाणा बस्तयः प्रसृतसंज्ञाः [ज्ञेयाः]। उपजातीन्द्रवज्रोपजातयः।

अथेमान् सुकुमाराणां निरूहान् स्नेहनान् मृदून्।

कर्मणा विप्लुतानां च वक्ष्यामि प्रसृतैः पृथक्॥२०॥

क्षीराद् द्वौ प्रसृतौ कार्यौ मधुतैलघृतात्त्रयः।

खजेन मथितो बस्तिर्वातघ्नो बलवर्णकृत्॥२१॥

एकैकः प्रसृतस्तैलप्रसन्नाक्षौद्रसर्पिषाम्।

बिल्वादिमूलक्काथात्द्वौ कौलत्थाद्वौ स वातजित्॥२२॥

पटोलनिम्बभूतीकरास्नासप्तच्छदाम्भसः।

प्रसृतः पृथगाज्याच्च बस्तिः सर्षपकल्कवान्॥२३॥

स पञ्चतिक्तोऽभिष्यन्दकृमिकुष्ठप्रमेहहा।

चत्वारस्तैलगोमूत्रदधिमण्डाम्लकाञ्जिकात्॥२४॥

प्रसृताः सर्षपैः पिष्टैर्विद्वज्ज्ञानाहभेदनः।

पयस्येक्षुस्थिरारास्नाविदारीक्षौद्रसर्पिषाम्॥२५॥

एकैकः प्रसृतो बस्तिः कृष्णाकल्को वृषत्वकृत्।

स०-अथ-अनन्तरम्, इमान्निरूहान् स्नेहनसमर्थान् मृदून्-अतीक्ष्णान्, सुकुमाराणां नराणां कर्मणा-वमनादिना, विप्लुतानां-भ्रष्टानां, प्रसृतैः पृथगुपलक्षितान् वक्ष्यामि।

क्षीराद् द्वौ प्रसृतौ-चत्वारि पलानि, मधुतैलघृतात् त्रयः प्रसृताः-षट् पलानि, खजेन-दर्व्याकारेण, मथितो बस्तिर्वातं हन्ति बलं वर्णं च करोति। अत्र च कल्काभावात् बलाद्ये बस्तौ यः कल्कः (श्लो. २), स एव कल्प्यः।

तैलादीनां प्रत्येकं प्रसृत एकः। बिल्वादिपञ्चमूलक्काथात् द्वौ प्रसृतौ। कौलत्थात् क्काथात् द्वौ प्रसृतौ। स बस्तिर्वातजित्।

पटोलादिनां पञ्चानां क्काथात् पृथक् प्रसृतो, घृताच्च प्रसृतो, बस्तिः स सर्षपकल्कः स पञ्चतिक्त आभिष्यन्दादिहा।

तैलादिभ्यश्चतुर्भ्यश्चत्वारः प्रसृताः-आष्टौ पलानि, पिष्टैः सर्षपैः सह बस्तिर्विद्वङ्गादिजित्।

पयस्यादिक्काथानां पञ्चानां प्रसृताः पञ्च, माक्षिकघृतयोर्द्वौ प्रसृतौ, इति सप्त प्रसृताः। पिप्पलीकल्कवान् बस्तिर्वृषत्वकृत्-शुक्रकरः।

आ० र०- सुकुमारनिरूहानाह-अथेति। स निरूहः पञ्चतिक्ताख्यः। पयस्या-क्षीरिणी। पयस्यादीनां पञ्चानां क्काथः। सङ्ग्रहे तु (क. अ. ४) - " विडङ्गत्रिफलाशिग्रुफल-मुस्ताखुकर्णिजात्। कशायात् प्रसृताः पञ्च तैलादेको विमथ्य तान्॥ [निरूहः कृमिहा वैल्वपिप्पलीकल्कयोजितः। श्वदंष्ट्राश्मभिदेरण्डव्कथतैलसुरासवात्॥ प्रसृताः पञ्च चपलाकौन्तीयष्ट्याह्वकल्कवान्।] बस्तिः कवोष्णः सानाहे मुत्रेकृच्छ्रे परो मतः॥ " इति।

सिद्धबस्तीनतो वक्ष्ये सर्वदा यान् प्रयोजयेत्॥ २६॥

निर्व्यापदो बहुफलान् बलपुष्टिकरान् सुखान्।

स ० -अतः-प्रसृतेभ्यो निरूहेभ्योऽनन्तरं, निर्व्यापत्त्वादि गुणतः संज्ञया सिद्धबस्तीनतिप्रसिद्धान् वक्ष्ये-भणिष्यामि। यान् सर्वदा प्रयोजयेत्। तथा निर्व्यापदो बहुफलान् बलादिप्रदांश्च सुखांश्च। सुश्रुते चोक्तम् (चि. अ. ३८/११६)-"यस्मिन् बस्तौ यथा युक्ते ध्रुवा सिद्धिः प्रकीर्तिता। सिद्धबस्तिरिति ख्यातो मुनिभिस्तत्त्वदर्शिभिः॥ " इति।

आ० र०- सिद्धबस्तीनाह-सिद्धबस्तीनिति।

मधुतैले समे कर्षः सैन्धवाद्विपिचुर्मिसिः॥ २७॥

एरण्डमूलक्काथेन निरूहो माधुतैलिकः।

रसायनं प्रमेहार्शःकृमिगुल्मान्त्रवृद्धिनुत्॥ २८॥

स ० -मधुतैले समे-तुल्ये, सैन्धवस्य कर्षो, मिसिः द्विपिचुः-द्विकर्षप्रमाणः, एरण्डमूलक्काथेन सह माधुतैलिकोऽयं निरुहो रसायनं स्यात् प्रमेहादिजित्। "यस्मान्मधु च तैलं च प्राधान्येनात्र वर्तते। माधुतैलिक इत्येषविज्ञेयो बस्तिचिन्तकैः॥ " इति सुश्रुतः (चि. अ. ३८/११४)।

आ० र०- तत्र आधुतैलिकमाह-मधुतैल इति।

सयष्टिमधुकश्चैष चक्षुष्यो रक्तपित्तजित्।

स० -मधुयष्टियुक्तश्चैष बस्तिश्चक्षुष्यो रक्तपित्तजित्।

आ० र०- आमधुकव्काथेऽधिके पुर्वस्य गुणान्तरमाह-सयष्टीति।

यापनो घनकल्केन मधुतैलरसाज्यवान्॥ २९॥

पायुजानूरुवृषणबस्तिमेहनशूलजित्।

स० -यापनाख्यो बस्तिर्मुस्ताकल्केन सह मधुतैलमांसरसाज्ययुतः पाय्वादिशूलजित्। यापनः-प्राणधारणात्।

आ० र०- यापनं बस्तिमाह-यापन इति। मांसरसोऽत्रव्काथस्थाने।

प्रसृतांशैर्घृतक्षौद्रवसातैलैः प्रकल्पयेत्॥ ३०॥

यापनं सैन्धवार्धाक्षहपुषार्धपलान्वितम्।

स० -यापनं निरूहं घृतादिभिः प्रसृतप्रमाणैः सैन्धवार्धकर्षेण हपुषार्धपलयुतं कल्पयेत्।

आ० र०- पुर्वगुणं बस्त्यन्तरमाह-प्रसृतांशैरिति।

एरण्डमूलनिःक्काथो मधुतैलं ससैन्धवम्॥ ३१॥

एष युक्तरथो बस्तिः सवचापिप्पलीफलः।

स० -एरण्डमूलनिःक्काथो मधुतैलसैन्धवान्वित इत्येष वचापिप्पलीमदनफलान्वितो युक्तरथोऽन्वर्थनामा बस्तिः। सुश्रुते चोक्तम्(चि. अ. ३८/११५)-"रथेष्वपि हि युक्तेषु हस्त्यश्वेष्वपि योजयेत्। यस्मान्न प्रतिषिद्धोऽयमतो युक्तरथः स्मृतः॥" इति।

आ० र०- पूर्वगुणं युक्तरथाख्यं बस्तिमाह-एरण्डमुलेति।

स क्काथो मधुषड्ग्रन्थाशताह्वाहिङ्गुसैन्धवम्॥३२॥

सुरदारु च रास्ना च बस्तिर्दोषहरः शिवः।

स० -स पूर्वोक्त एरण्डमूलक्काथो मध्वादिभिः सह एष बस्तिर्दोषहृच्छिवश्च।

आ० र०- दोषहरं बस्तिमाह-स क्वात इति। षड्ग्रन्थावचा।

पञ्चमूलस्य निःक्काथस्तैलं मागधिका मधु॥३३॥

ससैन्धवः समधुकः सिद्धबस्तिरिति स्मृतः।

स० -पञ्चमूलक्काथस्तिलतैलादिकः सैन्धवमधुकसहितः सिद्धवस्तिसंज्ञो मुनिभिः स्मृतः।

आ० र०- दोषहरं सिद्धबस्तिमाह-पञ्चमुलस्येति।

द्विपञ्चमूलत्रिफलाफलबिल्वानि पाचयेत्॥३४॥

गोमूत्रे, तेन पिष्टैश्च पाठावत्सकतोयदैः।

सफलैः क्षौद्रतैलाभ्यां क्षारेण लवणेन च॥३५॥

युक्तो बस्तिः कफव्याधिपाण्डुरोगविषूचिषु।

शुक्रानिलविबन्धेषु बस्त्याटोपे च पूजितः॥३६॥

स ०-द्विपञ्चमूलादीनि गोमूत्रेण पाचयेत्। तेन-क्थितेन गोमूत्रेण, पिष्टैश्च पाठादिभिर्युक्तः कफामयादिहृत्।

आ० र०- गोमूत्रबस्तिमाह-द्विपञ्चमूलेति।

मुस्तापाठामृतैरण्डबलारास्नापुनर्नवाः।

मञ्जिष्ठारग्वधोशीरत्रायमाणाक्षरोहिणीः॥३७॥

कनीयः पञ्चमूलं च पालिकं, मदनाष्टकम्।

जलाढके पचेत्तच्च पादशेषं परिस्रुतम्॥३८॥

क्षीरद्विप्रस्थसंयुक्तं क्षीरशेषं पुनः पचेत्।

सपादजाङ्गलरसः ससर्पिर्मधुसैन्धवः॥३९॥

पिष्टैर्यष्टिमिसिश्यामाकलिङ्गकरसाञ्जनैः।

बस्तिः सुखोष्णो मांसाग्निबलशुक्रविवर्द्धनः॥४०॥

वातासृङ्मोहमेहार्शोगुल्मविण्मूत्रसङ्ग्रहान्।

विषमज्वरवीसर्पवर्ध्माध्मानप्रवाहिकाः॥४१॥

वङ्क्षणोरुकटीकुक्षिमन्याश्रोत्रशिरोरुजः।

हन्यादसृग्दरोन्मादशोफकासाश्मकुण्डलान्॥४२॥

चक्षुष्यः पुत्रदो राजा यापनानां रसायनम्।

स० -मुस्तादीनि कनीयःपञ्चमूलपर्यन्तानि पृथक् पालिकानि, मदनफलान्यष्टौ, जलाढके पचेत्। तच्च पादशेषं परिस्रुतं क्षीरशेषं पुनः पचेदिति। तावत्कषायेण सह पक्तव्यं यावत्क्षीरप्रस्थद्वयं स्यादित्यर्थः। बस्तिः सर्पिर्मधुसैन्धवयुतः पिष्टैर्यष्ट्यादिभिः सहितः सुखोष्णो मांसादिवर्द्धनो वातरक्तादीन् हन्यात्। चक्षुष्यादिगुणश्च। किम्भूतः ? सपादजाङ्गलरसः, -तत्र चतुर्विंशतिपलिको निरुहः, तस्य पादेन षट्पलानि जाङ्गलरसस्य स्युरित्यर्थः।

आ० र०- यापनराजं बस्तिमाह-मुस्तेति। अक्षं-बिभीतकम्।रोहिणी-कटुका। श्यामा-प्रियङ्गु। कुण्डलोवातकुण्डलिकाख्यो मूत्राघातः।

मृगाणां लघुवद्रा(ड्रा)णां दशमूलस्य चाम्भसा॥४३॥

हपुषामिसिगाङ्गेयीकल्कैर्वातहरः परम्।

निरुहोऽत्यर्थवृष्यश्च महास्नेहसमन्वितः॥४४॥

स०-ह्रस्वानां बृहतामुभयरूपाणां मृगाणां मांसानां तथा दशमूलस्य च क्वाथेन सह हपुषदिकल्को बस्तिः सुष्ठु वातहरो महास्नेहयुतो वृष्यश्च स्यात्।

आ० र०- अतिवृष्यं यापनमाह-मृगाणामिति। लघवो-हरिणादयः। वद्राः-वराहादयः। गाङ्गेयी-मुस्ता।

मयूरं पक्षपित्तान्त्रपादविट्तुण्डवर्जितम्।

लघुना पञ्चमूलेन पालिकेन समन्वितम्॥४५॥

पक्त्वा क्षीरजले क्षीरशेषं सघृतमाक्षिकम्।

तद्विदारीकणायष्टिशताह्वाफलकल्कवत्॥४६॥

बस्तिरीषत्पटुयुतः परमं बलशुक्रकृत्।

स०-मयूरं पक्षादिवर्जितं दशपलमात्रं ह्रस्वेन पञ्चमूलेन पलमितेन युतं क्षीरजले पक्त्वा क्षीरस्यार्धाढको जलस्यार्धढक इत्येवं कृत्वा तावत्क्वाथयेत् यावत्क्षीरावशेषं स्यात्। क्षीरं च तच्छेषं च क्षीरशेषम्। घृतमाक्षिकसहितं विदार्यादिकल्कान्वितमीषल्लवणयुक्तो बस्तिः परमं [बल]शुक्रकृत्।

आ० र०- मायूरं बस्तिमाह-मयूरमिति। पक्त्वा क्षीरजले, "द्रव्यादष्टगुणं क्षीरम्" इत्यादिपभाषया।

कल्पनेयं पृथक् कार्या तित्तिरिप्रभृतिष्वपि॥४७॥

विष्किरेषु समस्तेषु प्रतुदप्रसहेषु च।

जलचारिषु तद्वच्च मत्स्येषु क्षीरवर्जिता॥४८॥

स० -इयं च कल्पना तित्तिर्यादिष्वपि विष्किरेष्वशेषेषु प्रतुदेषु प्रसहेषु च पृथक्कार्या। तथैव जलचारिष्वपीयं कल्पना कार्या। मत्स्येषु तु क्षीरवर्जिता कल्पनेयं कार्या, मत्स्यानां क्षीरेण सह विरुद्धत्वात्।

आ० र०- मयूरविदिं विष्किरादिष्वतिदिशति-कल्पनेति। मत्स्येषु क्षिरवर्जम्।

गोधानकुलमार्जारशल्यकोन्दुरजं पलम्।

पृथक् दशपलं क्षीरे पञ्चमूलं च साधयेत्॥४९॥

तत्पयः फलवैदेहीकल्कद्विलवणान्वितम्।

ससितातैलमध्वाज्यो बस्तिर्योज्यो रसायनम्॥५०॥

व्यायाममथितोरस्कक्षीणेन्द्रियबलौजसाम्।

विबद्धशुक्रविण्मूत्रखुडवातविकारिणाम्॥५१॥

गजवाजिरथक्षोभभग्नजर्जरितात्मनाम्।

पुनर्नवत्वं कुरुते वाजीकरणमुत्तमम्॥५२॥

स० -गोधादीनां मांसं पृथक्-प्रत्येकं, दशपलप्रमाणं क्षीरे पञ्चमूलं च साधयेत्। एतत्क्षीरं मदनफलकणाकल्कसैन्धवसौवर्चलान्वितं बस्तिः शर्करातैलमधुघृतसहितो योज्यो रसायनं स्यात्। व्यायाममथितोरस्कादीनां पुनर्नवत्वं कुरुते वाजीकरणेषु मुख्यश्च।

आ० र०- गोधादिबास्तिमाह-गोधेति। पलं-मांसम्। वैदेही-पिप्पली।

सिद्धेन पयसा भोज्यमात्मगुप्तोच्चटेक्षुरैः ।

स० -आत्मगुप्तादिभिः सिद्धेन पयसा सह भोज्यम्। उच्चटा-गुञ्जा।

आ० र०- वृष्याणां बस्तीनाम् भोजने विशेषमाह-सिद्धेनेति। सङ्ग्रहे तु (क. अ. ५)-" पृथक् पलांशं विपचेत्पञ्चमूलमगोक्षुरम्। क्षीराढके चतिर्थस्थं पिष्टैर्यष्ट्यादिभिर्युतम्॥ क्षौद्रतैलाज्यसिन्हूत्थयुक्तं बस्तिः सुपूजितः। विशेषाद्बालवृद्धस्त्रीसुकुमारसुखात्मनाम्॥

तद्वत्सहाचरबलासारिवादर्भसाधितम्। क्षीरं, बस्तिस्तथाऽभीरुगुडूचीबृहतीद्वयैः॥ सिद्धं पयो मागधिकायष्टीमधुककल्कवान्। पञ्चमुलं बृहत्यादि प्रतिद्रव्यंपलोन्मितम्॥ द्विपलं शालिगोधूमयवमाषं सषष्टिकम्। तैःसिद्धं छागलं कुक्कुटाण्डरसः सिता॥ साज्यक्षौद्रद्विलावणस्तैर्बस्तिः शुक्रकृत्परम्। कल्पोऽयं शिखिगोनर्दमत्स्याद्यण्डरसेष्वपि॥ रसः कुलीरमांसस्य चटकाण्डरसान्वितः। सशर्कराघृतमधुर्बस्तिर्वृष्यतमो मतः॥ बस्तशूकरजैर्मुष्कैः किलीरचटकामिषैः। सिद्धं पयो बस्तमुष्कमुच्चटेक्षुरकं मधु॥ तैर्घृताढ्योऽल्पलवणो बस्तिर्वृष्यतमः परम्। सिद्धेन पयसा भोज्यमात्मगुप्तोच्चटेक्षुरैः॥ अतो दशादशान यस्तु बस्तीन्निषेवते। वाजीव पुश्टः सवृषो गच्छति प्रमदाशतम्॥ एते माक्षीक संयुक्ताः कुर्वन्त्यतिवृषं नरम्। नातियोगं न चायोगं स्तम्भितास्ते च कुर्वते॥ निरूहा लेखनाः प्रायो बृंहणाः स्नेहबस्तयः। यापनेषूभयं तस्मान्नेष्टं तेष्वनुवासनम्॥ मृदुत्वान्न निवर्तेरन् यस्यत्वेते प्रयोजिताः। समूत्रैर्बस्तिभिरतीक्ष्णैरास्थाप्य क्षिप्रमेव सः॥ शोफाग्निनाशपाण्डुत्वशूलार्शः परिकर्तिकाः। स्युर्ज्वरश्चातिसारश्च यापनात्यर्थसेवनात्॥ अरिष्टक्षारसिध्वाद्यस्तत्रेष्टा दीपनि क्रिया। युत्क्वा तस्मान्निषेवेत यापनान्न प्रसङ्गतः॥ मृद्वल्पौषधसंयोगात्पादहीनप्रमाणतः। अल्पकालोपयोगाच्च तेषु निष्परिहारता॥" इति। इति सिद्धबस्तयः।

स्नेहांश्चायन्त्रणान् सिद्धान् सिद्धद्रव्यैः प्रकल्पयेत्॥

स० -स्नेहांश्च-स्नेहबस्तीन्, अयन्त्रणान्-निष्परिहारान्, सिद्धान्-बहुशो दृष्टप्रत्ययान्, सिद्धद्रव्यैः-निरपायैः, प्रकल्पयेत्।

आ० र०- अथ सिद्धस्नेहाः। सिद्धबस्तिद्रव्यैरेव सिद्धस्नेहाः प्रकल्प्या इत्याह-स्नेहानिति। सङ्ग्रहे तु (क. अ. ५)-"सहाचराभीरुबलारास्नागोक्षुरकात् पृथक्। तुलां जलद्रोणशते पचेद्द्रोणवशेषित्ते॥ पुतशीते बिसद्राक्षातुगाक्षीरीनिदिग्धिकाः। महासहाक्षुद्रसहायष्टीमधु-मधूलिकाः॥ जीवकर्षभकोदीच्यमृणालोत्पलचन्दनम्। खर्जूरमामलक्यात्मगुप्ताता-मलकीकणाः॥ पटोलमेदात्वक्पत्रशीतपाक्योदनाव्हयाः। कल्कीकृत्य क्षिपेत्तस्मिन् पृथक् च प्रस्थमम्मितम्॥ रसं वराहमहिषबस्तमुष्कोद्भवं तथा। शिखिकुक्कुटहंसाण्डसस्त्रवं तैलासर्पिषी॥ धात्रीविदारीस्वरसं गव्यक्षीराढकद्वयम्। ब्रह्मभेरीमृदङ्गानां निनादैः साधितं च तत्॥ सितच्छत्रकृतच्छायं सितवस्त्रावगुण्ठितम्। आरोपितं गजस्कन्धे पुजयित्वा वृषध्वजम्॥ कृत्वा स्वस्त्यनं दद्यात्स्नेहबस्तिमयन्त्रणम्। प्रात्पस्तेनातिवृषतां श्रमयेद्वनिताशतम्। निर्वलीपलितः कान्तश्चिरञ्जीवी भवेत्स च। नष्टशुक्रक्षतक्षीणविषमज्वरिणां हितम्॥

व्यापन्नार्तवशुक्राणां पुत्रदाता रसायनम्। एवं च बस्तयोऽन्येऽपि कल्प्याः पाक्याश्च नैकशः॥ शतं वारान् सहया वा पाचयेत्सम्भवे सति।" इति।

दोषघ्नाः सपरीहारा वक्ष्यन्ते स्नेहबस्तयः।

स० -अधुना दोषघ्नाः सपरीहाराः स्नेहबस्तयो वक्ष्यन्ते।

आ० र०- निष्परिहारान् स्नेहबस्तीनुक्त्वा सपरिहारानाह। तत्र प्रतिज्ञावाक्यमाह-दोषघ्ना इति।

तानेवाह-

दशमूलं बलां रास्नामश्वगन्धां पुनर्नवाम्॥५४॥
गुडुच्यैरण्डबूतीकभार्गीवृषकरोहिषम्।
शतावरीं सहचरं काकनासां पलांशकम्॥५५॥
यवमाषातसीकोलकुलत्थान् प्रसृतोन्मितान्।
वहे विपाच्य तोयस्य द्रोणशेषेण तेन च॥५६॥
पचेत्तैलाढकं पेष्यैर्जीवनीयैः पलोन्मितैः।
अनुवासनमित्येतत्सर्ववातविकारनुत्॥५७॥

स० -दशमूलादिकं पलप्रमाणम्। काकनासा-काकजङ्घा। यवादीनि प्रसृतप्रमाणानि, जलस्य वहे-द्रोणचतुष्टये, विपाच्य, तेन च द्रोणशेषेण तैलाढकं पलांशकैः जीवनीयैः पेष्यैः सह पचेत्। एतदनुवासनमखिलपवनामयजित्।

आ० र०- दशमुलादिस्नेहमाह-दशमुलमिति। भूतीकंभुस्तृणम्। वृषकः-पाषाणभेदः। काकनासा-काकतुण्डी। वहे-द्रोणचतुष्टये।

आनूपानां वसा तद्वज्जीवनीयोपसाधिता।

स० -आनूपप्राणिनां वसा जीवनीयद्रव्यसाधिता तद्वत्पूर्वगुणा।

आ० र०- वसास्नेहमाह-आनूपानामिति। जीवनीयानां कल्कः कार्यः। द्रवं तूदकम्।

शताह्वाचिरिबिल्वाम्लैस्तैलं सिद्धं समीरणे॥५८॥

स० -शताह्वादिभिस्तैलं पक्वं पवने योज्यम्।

आ० र०- तैलमाह-शताव्हेति। चिरिबिल्वः-करञ्जः। अम्लानि-धान्याम्लादीनि।

सैन्धवेनाग्निवर्णेन तप्तं चानिलजिद् घृतम्।

स० -अग्निवर्णेन सैन्धवेन तप्तं च घृतं समीरणजिद्भवति।

आ० र०- घृतमाह-सैन्धवेनेति। सैन्धवमग्निनाऽग्निवर्णं त्त्वा घृतमध्ये निःक्षिपेत्॥

जीवन्तीं मदनं मेदां श्रावणीं मधुकं बलाम्॥५९॥

शताह्वर्षभकौ कृष्णां काकनासां शतावरीम्।

स्वगुप्तां क्षीरकाकोलीं कर्कटाख्यां शठीं वचाम्॥६०॥

पिष्ट्वा तैलघृतं क्षीरे साधयेत्तच्चतुर्गुणे।

बृंहणं वातपित्तघ्नं बलशुक्राग्निवर्धनम्॥६१॥

रजःशुक्रामयहरं पुत्रीयं चानुवासनम्।

स ०-जीवन्त्यादीन् कल्कीकृत्य तैलघृतं-यमकं, क्षीरे चतुर्गुणे साधयेत्। एतदनुवासनं बृंहणं वातपित्तघ्नं बलादिवर्धनं रजःशुक्ररोगहरं पुत्रीयं च। पुत्रीयमिति हितार्थे "पुत्राच्छ च" इति छः।

आ० र०- जीवन्त्यादियमकमाह-जिवन्तीमिति।

सैन्धवं मदनं कुष्ठं शताह्वा निचुलो वचा॥६२॥

ह्रीबेरं मधुकं भार्गी देवदारु सकट्फलम्।

नागरं पुष्करं मेदा चविका चित्रकः शठी॥६३॥

विडङ्गातिविषे श्यामा हरेणुर्नीलिनी स्थिरा।

बिल्वाजमोदचपला दन्ती रास्ना च तैः समैः॥६४॥

साध्यमेरण्डतैलं वा तैलं वा कफरोगनुत्।

वर्ध्मोदावर्तगुल्मार्शःप्लीहमेहाढ्यमारुतान्॥६५॥

आनाहमश्मरीं चाशु हन्यात्तदनुवासनम्।

स० -सैन्धवादिभिः समांशैः सामान्यपरिभाषया एरण्डतैलं तिलतैलं वा साध्यम्। द्विर्वाग्रहणात् एरण्डतैलस्यार्धं तिलतैलस्यार्धमित्यपि कल्पनीयमित्याहुः। एतदनुवासनं कफरोगजित् शीघ्रं वर्ध्मादीन् हन्यात्।

आ० र०- सैन्धवादितैलमाह-सैन्धवमिति। निचुलो-वेतसः। श्यामा-त्रिवृत्। चपला-पिप्पली। एरण्डतैलं तिलतैलं वा साध्यम्। तच्च कफरोगजिद्भवति। वर्ध्मादींश्च हन्यात्।

साधितं पञ्चमूलेन तैलं बिल्वादिनाऽथवा॥६६॥

कफघ्नं

स० -पञ्चमूलेन बिल्वादिना वा साधितं तैलं कफघ्नं कल्पयेत्।

आ० र०- बिल्वादितैलमाह-साधितमिति।

कल्पयेत्तैलं द्रव्यैर्वा कफघातिभिः।

फलैरष्टगुणैश्चाम्लैः सिद्धमन्वासनं कफे॥६७॥

स० -अथवा कफघ्नैर्द्रव्यैः फलैरष्टगुणैश्चाम्लैः सिद्धमनुवासनं कफे शस्तम्।

आ० र०- अन्यैरपि कफन्यैस्तैलकल्पनामाह-कल्पयेदिति।

आ० र०- फलतैलमाह-फलैरिति। फलैः-मदनफलैः। सङ्ग्रहे तु (क. अ. ५) -"शूलनाहे तु तद्युक्तो निरूहः पटुमुत्रवान्॥ तद्युक्तः-फलतैलयुक्तः। शिशिरस्पर्शवीर्यैश्च पिष्टैः क्षिरे चतुर्गुणे। तैलपादं घृतं सिद्धं पित्तन्घमनुवासनम्॥" इति।

मृदुबस्तिजडीभूते तीक्ष्णोऽन्यो बस्तिरिष्यते।

तीक्ष्णैर्विकर्षिते स्निग्धो मधुरः शिशिरो मृदुः॥६८॥

स ० -मृदुश्चासौ बस्तिश्च मृदुबस्तिः, मधुरस्निग्धशीतलात्मकत्वान्मृदुः, मृदुबस्तिश्चासौ जडीभूतश्च मृदुबस्तिजडीभूतः,-कोष्ठाद्बहिरनिःसरणात् कोष्ठ एवावस्थितिं कृत्वा स्थितः, तस्मिंस्तथाभूतेऽन्यो बस्तिस्तीक्ष्णः शस्यते। तीक्ष्णैः-गोमूत्रादिनिष्पादितैर्बस्तिभिः, विकर्षिते कोष्ठे सति स्निग्धादिगुणो बस्तिरिष्यते।

आ० र०- एवं बस्तीनुक्त्वा कल्पनाप्रकारमाह। तत्र मृदुनाजाडेये जाते तीक्ष्णो योज्यः, तीक्ष्णेन कर्षणे जाते मृदुर्योज्य इत्याह-मृदुबस्तीति।

तीक्ष्णत्वं मूत्रपील्वग्निलवणक्षारसर्षपैः।

प्राप्तकालं विधातव्यं क्षीराज्याद्यैस्तु मार्दवम्॥६९॥

स ० -तीक्ष्णत्वं बस्तेर्मूत्रपील्वग्निलवणक्षारसर्षपैः प्राप्तकालं - योग्येऽवसरे, विधातव्यम्। क्षीरघृताद्यैश्च बस्तेर्मार्दवं प्राप्तकालं कर्तव्यम्।

आ० र०- तीक्ष्णत्वमृदुत्वहेतूनि द्रव्याण्याह-तीक्ष्णत्वमिति।

बलकालरोगदोषप्रकृतीः प्रविभज्य योजितो बस्तिः।

स्वैः स्वैरौषधवर्गैः स्वान् स्वान् रोगान्निवर्तयति॥७०॥

स ० -बलादीन् प्रविभज्य स्वैः स्वैरौषधवर्गैः-यथायथं योग्यैः, सिद्धो बस्तिर्योजितः स्वान् स्वानामयानुपशमयति।

आ० र०- बलाद्यनुरोधेन बस्तिः कल्प्य इत्याह-बलकालेति।

उष्णार्तानां शीताञ्छीतार्तानां तथा सुखोष्णांश्च।

तद्योग्यौषधयुक्तान् बस्तीन् संतर्क्य युञ्जीत॥ ७१॥

स० -उष्णार्तानां नृणां शीतान् बस्तीन् शीतार्तानां -सुखोष्णान् बस्तीन् दद्यात्।

आ० र० - हेतुव्याधिविपरीतो बस्तिः कल्प्य इत्याह-उष्णार्तानामिति।

बस्तीन्न बृंहणीयान् दद्याद्व्याधिषु विशोधनीयेषु।

मेदस्विनो विशोध्या ये च नराः कुष्ठमेहार्ताः॥ ७२॥

आ० र०- शोधनीयेषु बृंहणीयनिषेधमाह-बस्तीनिति।

न क्षीणक्षतदुर्बलमूर्च्छितकृशशुष्कशुद्धदेहानाम्।

दद्याद्विशोधनीयान् दोषनिबद्धायुषो ये च॥ ७३॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचिता-यामष्टाङ्गहृदयसंहितायां पञ्चमे कल्पसिद्धिस्थानबस्तिकल्पो नाम चतुर्थोऽध्यायः॥ ४॥

स ० -यस्मादेते दोषैर्निबद्धजीविताः, तस्मादेतेषां दोषनिर्हरणात् प्राणसंशयः स्यादित्याह, जीवितरक्षार्थमेते न विशोध्या इति। आर्याश्चतस्रः।

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टाङ्गहृदय-टीकायां सर्वाङ्गसुन्दराख्यायां पञ्चमे कल्पसिद्धस्थाने बस्तिकल्पो नाम चतुर्थोऽध्यायः समाप्तः॥ ४॥

आ० र०-

****

पञ्चमोऽध्यायः।

अस्मादनन्तरं बस्तिव्यापत्सिद्धिर्व्याख्यायते-

अथातो बस्तिव्यापत्सिद्धिं व्याख्यास्यामः।

इति ह स्माहुरात्रेयदयो महर्षयः।

(गद्यसूत्रे॥२॥)

स०-अथात इति पूर्ववत्। (असम्यक् प्रयुक्तेषु बस्तिषु या व्यापदः, तासां साधनायास्याध्यायस्यारम्भः।)

आ० र०- बस्तिव्यापत्सिद्धिमध्यायं व्याख्यातुं प्रतिजानीते-अथेति। बस्तिव्यापदश्च द्वादशोक्ताः सङ्ग्रहे (क.अ.६) - "विबन्धगौरवाध्मानशिरोरुग्वाहनोर्ध्वगाः। कुक्षिशूलाङ्गरुग्घिध्माहृत्पीडाकर्तनस्रवाः॥ अयोगादतियोगाच्च बस्तेः स्युः षट् षडापदः।" इति।

अस्निग्धस्विन्नदेहस्य गुरुकोष्ठस्य योजितः।

शीतोऽल्पस्नेहलवणद्रव्यमात्रो घनोऽपि वा ॥१॥

बस्तिः सङ्क्षोभ्य तं दोषं दुर्बलत्वादनिर्हरन्।

करोत्ययोगं तेन स्याद्वातमूत्रशकृदग्रहः॥२॥

नाभिबस्तिरुजा दाहो हृल्लेपः श्वयथुर्गुदे।

कण्डूर्गण्डानि वैवर्ण्यमरतिर्वह्निमार्दवम्॥३॥

क्काथद्वयं प्राग्विहितं मध्यदोषेऽतिसारिणि।

उष्णस्य तस्मादेकस्य तत्र पानं प्रशस्यते॥४॥

फलवर्त्यस्तथा स्वेदाः कालं ज्ञात्वा विरेचनम्।

बिल्वमूलत्रिवृद्दारुयवकोलकुलत्थवान्॥५॥

सुरादिमूत्रवान् बस्तिः सप्राक्पेष्यस्तमानयेत्।

स ०-अस्निग्धादिगुणस्य पुंसः शिशिरस्तथाऽल्पस्नेहलवणोऽल्पद्रव्यमात्रः-अल्पद्रव्यकल्पः(ल्कः), तथा घनो-बहुद्रव्यकल्को, बस्तिर्योजितः सन् बस्तिसाध्यं दोषं सङ्क्षोभ्य दुर्बलत्वादनिर्हरन् अयोगं करोति। तेन-अयोगेन, वातादिग्रहः स्यात्। प्राक्-अतिसारचिकित्सिते (चि. अ. ९/६) क्काथद्वयं-पाचनयुगुलं-मध्य दोशेऽतिसारिणि विहितं भूतीकपिप्पल्यादिरेको बिल्वधनिको द्वितीयः, तस्मात्-क्काथद्वयात्, एकस्य-अन्यतरस्य क्काथस्योष्णस्य, तत्रावस्थायां पानं प्रशस्यते, तथा फलवर्तयः स्वेदाश्च नानाविधाः, अवस्थाश्च ज्ञात्वा विरेचनं शस्यते। तथा बिल्वादिमान् बस्तिस्तथा सुरादिमान् बस्तिः, सप्राक्पेष्यः-"बलां गुडूचीं" (क. अ. ४/१) इत्यादौ बस्तौ यः पेष्यो यवान्यादिकृत् तेन प्राक्पेष्येण सह वर्तत इति सप्राक्पेष्यः। तमत्र दत्तवस्तिनोत्क्लिष्टं दोषमानयेत्-आकर्षयेत्।

आ० र०- विबन्धाख्यां व्यापदमाह-अस्निग्धेति। द्रव्यंक्काथ्यं पेष्यं च। तं दोषं-यदर्थं दत्तः। क्काथद्वयं-"पिबेत् प्रकवथितास्तोये मध्यदोषो विशोषयन्। भुतीकपिप्पलीशुण्ठीवचाधान्यहरीतकीः॥ अथवा बिल्वधनिकामुस्तनागरवालकम्।" (हृ.चि.अ. ९१५) इत्युक्तम्। भूतीकं-कट्टृणम्। प्राक्पेष्यं-"पूतोयवानीफलबिल्वकुष्ठवचाशताव्हाघनपिप्पलीनाम्। कल्कैः (हृ.क.अ. ४१२) इत्युक्तम्। सुरा-मदिरा। आदिशब्दादन्यदप्यम्लम्।

गौरवाख्यां व्यापदं त्वाह सङ्ग्रहे (क.अ. ६)-"सशेषामे निरूहेण मृदुना दोष ईरितः। मूर्च्छयत्यनिलं मार्गं रूणध्यग्निंहिनस्ति च॥ गौरवक्लमहृच्छूलदाहसम्मोहवेष्टनम्। ततः कुर्यादुपचरेत्तं रूक्षस्वेदपाचनैः॥ पिप्पलीकट्टृणोशीरदारुमूर्वाश्टतं जलम्। पिबेत्सौवर्चलोन्मिश्रं दीपनं हृद्विशोधनम्॥ वचानागरशठ्यो वा घृतमण्डेन मूर्च्छिताः। पेयाः प्रसन्नया वा स्युररिष्टनासवेन वा॥ दारु त्रिकटुकं पथ्यां पलाशं चित्रकं शठीम्। पिष्ट्वा कुष्ठं च मूत्रेण पिबेत् क्षारांश्च दीपनान्॥ बस्तिमस्य विदध्याच्च समूत्रं दाशमूलिकम्।" इति।

युक्तोऽल्पवीर्यो दोषाढ्ये रूक्षे क्रूराशयेऽथवा॥६॥

बस्तिर्दोषावृतो रूद्धमार्गो रुन्ध्यात्समीरणम्।

स विमार्गोऽनिलः कुर्यादाध्मानं मर्मपीडनम्॥७॥

विदाहं गुदकोष्ठस्य मुष्कवङ्क्षणवेदनाम्।

रुणद्धि हृदयं शूलैरितश्चेतश्च धावति॥८॥

स्वभ्यक्तस्विन्नगात्रस्य तत्र वर्तिं प्रयोजयेत्।

बिल्वादिश्च निरूहः स्यात्पीलुसर्षपमूत्रवान्॥९॥

सरलामरदारुभ्यां साधितं चानुवासनम्।

स० -दोषाढ्ये तथा रूक्षे क्रूरकोष्ठे वा बस्तिरल्पवीर्यो दत्तो दोषैः-वाय्वाद्यवरकैरावृतः, अनन्तरं स बस्ती रुद्धमार्गः-प्रतिहतगतिप्रसरणो, वायुं रुन्ध्यात्। सोऽनिलो विमार्गग आध्मानं कुर्यात्। तथा हृदयादीनां मर्मणां व्यधनं-पीडनं, तथा गुदकोष्ठस्य विदाहं, तथा मुष्कवङ्क्षणवेदनां च कुर्यात्। तथा शूलैः-नानाविधाभिर्भग्नरुद्धमृदितपीडितावनद्धादिभिः पीडाभिः, हृदयं रुणद्धि-आवृणोति। हृदयमावृत्यानन्तरम्, इतश्चेतश्च-अनियते देशे, धावति पवनः। तत्र-अवस्थाविशेषे, सुष्ठ्वभ्यक्ताङ्गस्य स्विन्नाङ्गस्य च फलवर्तिं प्रयोजयेत्। बिल्वादिकश्च निरुहः स्यात् पीलुसर्षपमूत्रवान्। सरलदेवदारुभ्यां साधितं तैलं चानुवासनं स्यात्।

आ० र०- आध्मानाख्यां व्यापदमाह-युक्त इति। बिल्वादिः-विबन्धव्यापद्युक्तः। पीलु-पीलुफलम्।

शिरोरुजाख्यां व्यापदं त्वाह सङ्ग्रहे (क.अ. ६)-"बहुदोषेऽबले क्रूरकोष्ठे बस्तिस्तनुर्मृदुः। शीतोऽल्पश्चावृतो दोषैः प्रतिहन्ति समीरणम्॥ ऊर्ध्वं सोऽनुसरन् देहं कुर्याद्वायुः शिरोरुजम्। ग्रीवास्तम्भं प्रतिश्यायं बाधिर्यं दृष्टिविभ्रमम्॥ तमुष्णतैललवणप्रदिग्धस्विन्नमर्दितम्। तीक्ष्णैर्धूमैः प्रधमनैर्नस्यैरास्यविरेचनैः॥ विरेकैर्बस्तिभिश्चाशु योजयेदानुलोमिकैः।" इति।

वाहानाख्यां च व्यापदमाह सङ्ग्रहे (क.अ. ६)-"स्निग्धस्विन्ने महादोषे बस्तिमृद्वल्पभेषजः। उत्क्लेश्यल्पं हरेद्दोषं जनयेच्च प्रवाहिकाम्॥ शोफं बस्तावपाने च सदनं चोरुजङ्घयोः। विबद्धमारुतो जन्तुरभीक्ष्णं स प्रवाहते॥ स्वेदाभ्यङ्गान्निरुहांश्च शोधनीयानुलोमिकान्। विदध्याल्लङ्घयित्वा च वृत्तिं तस्य विरिक्तवत्॥" इति।

कुर्वतो वेगसंरोधं पीडितो वाऽतिमात्रया॥ १०॥

अस्निग्धलवणोष्णो वा बस्तिरल्पोऽल्पभेषजः।

मृदुर्वा मारुतेनोर्ध्वं विक्षिप्तो मुखनासिकात्॥ ११॥

निरेति मूर्च्छाहृल्लासतृड्वाहादीन् प्रवर्तयन्।

मूर्च्छाविकारं दृष्ट्वाऽस्य सिञ्चेच्छीताम्बुना मुखम्॥ १२॥

व्येजदाक्रमनाशाच्च प्राणायामं च कारयेत्।

पृष्ठपार्श्वोदरं मृज्यात् करैरुष्णैरधोमुखम्॥ १३॥

केशेषूत्क्षिप्य धुन्वीत भीषयेद्व्यालदंष्ट्रिभिः।

शस्त्रोल्काराजपुरुषैर्बस्तिरेति तथा ह्यधः॥ १४॥

पाणिवस्त्रैर्गलापीडं कुर्यान्न म्रियते तथा।

प्राणोदाननिरोधाद्धि सुप्रसिद्धतरायनः॥ १५॥

अपानः पवनो बस्तिं तमाश्वेवापकर्षति।

कुष्ठक्रमुककल्कं च पायेताम्लसंयुतम्॥ १६॥

ओष्ण्यात्तैक्ष्ण्यात्सरत्वाच्च बस्तिं सोऽस्यानुलोमयेत्

गोमूत्रेण त्रिवृत्पथ्याकल्कं वाऽधोनुलोमनम्॥ १७॥

पक्वाशयस्थिते स्विन्ने निरूहो दाशमूलिकः।

यवकोलकुलत्थैश्च विधेयो मूत्रसाधितैः॥ १८॥

बस्तिर्गोमूत्रसिद्धैर्वा सामृतावंशपल्लवैः।

पूतीकरञ्जत्वक्पत्रशठीदेवाह्वरोहिषैः॥ १९॥

सतैलगुडसिन्धूत्थो विरेकौषधकल्कवान्।

बिल्वादिपञ्चमूलेन सिद्धो बस्तिरुरःस्थिते॥ २०॥

शिरःस्थे नावनं धूमः प्रच्छाद्यं सर्षपैः शिरः।

स ० -वेगसंरोधं-वेगविधारणं, कुर्वतः पुंसो यः पीडितो बस्तिरतिमात्रया वा पीडितोऽस्निग्धलवणोष्णो वा तथाऽल्पो मात्रया, अल्पभेषजश्च मृदुर्वा, स तथाभूतो मारुतेनोर्ध्वं क्षिप्तो मूखनासिकात् निरेति-निर्गच्छति। मूर्च्छादीन् प्रवर्तयेत्(यन्)।

अस्य तु-तथाविधबस्तेः पुरुषस्य, मूर्च्छादिविकारं दृष्ट्वा शीताम्बुना मुखं सिञ्चेत्। तथा क्लमनाशं यावत् तं तालवृन्तादिना वीजयेत्। तथा तं पुरुषं प्राणायामं च कारयेत्, प्राणायामेन ह्यूर्ध्वं विक्षिप्तो बस्तिरधो याति। उष्णैः करैः पृष्ठं पार्श्वमुदरं च मृज्यात्। तथा तं पुरुषमधोमुखं कृत्वा केशैरुत्क्षिप्योर्ध्वं नीत्वा वपुर्धुन्वीत। तथा व्यालादिभिर्भीषयेत्। तथोर्ध्वं प्रवृत्तो बस्तिर्यस्मादधो गच्छति। तथा पाणिवस्त्रैर्गलापीडं कुर्याद्यथा न म्रियेत। एवं सति प्राणोदाननिरोधः सम्पद्यते, प्राणोदाननिरोधाद्यस्मादधोगः सुप्रसिद्धतरायनो भूत्वाऽपानो वायुस्तं बस्तिं द्रागेवापकर्षति-ऊर्ध्वादधः क्षिपति। सुष्ठु-प्रकर्षेण, प्रसिद्धतरमयनं यस्य स सुप्रसिद्धतरायनः। कुष्ठादिकल्कं चाम्लसंयुतं पाययेत्। [सः] कल्कः, अस्य-आतुरस्य, उष्णादिगुणयोगात्तं बस्तिमनुलोमयेत्। त्रिवृतादिकल्कं पीतं गोमूत्रेणाधोनुलोमनम्। पक्वाशयस्थिते दोषे स्निग्धे (स्विन्ने) निरुहो दाशमूलिको विधातव्यः। यवादिभिश्च गोमूत्रसाधितैर्बस्तिर्विधेयः। अथवा गोमूत्रसिद्धैर्गुडूच्यादिभिस्तैलगुडसैन्धवयुक्तो बस्तिर्विरेकद्रव्यकल्कवान् विधेयः। उरसि स्थिते बिल्वादिपञ्चमूलेन सिद्धो बस्तिर्विधातव्यः। शिरसि स्थिते बस्तौ नस्यं धूमश्च, शिरश्च सर्षपकल्केन प्रच्छादनीयम्।

आ० र०- ऊर्ध्वमारुताख्यां व्यापदमाह-कुर्वत इति। मृज्यात्-मर्दयेत्। भीषयेत्-त्रासयेत्। पाणिभिश्च वस्त्रैश्च। सुप्रसिद्धतरं-गुदं मेढं च, अयनमस्य स तथा। क्रमुकं-पूगः। दशमूलयवादीनां मूत्रे क्वाथः, अमृतादीनां वा सप्तानाम्। अमृता-गुदूची। त्वक् पत्रं च पूतीकरञ्जस्य। तैलादियोगस्तु द्वयोरपि क्वाथयोः, बिल्वादिक्वाथस्यापि। इत्ययोगव्यापदः।

बस्तिरत्युष्णतीक्ष्णाम्लघनोऽतिस्वेदितस्य वा॥ २१॥

अल्पे दोषे मृदौ कोष्ठे प्रयुक्तो वा पुनःपुनः।

अतियोगत्वमापन्नो भवेत्कुक्षिरुजाकरः॥ २२॥

विरेचनातियोगेन स तुल्याकृतिसाधनः।

स० -अत्युष्णतीक्ष्णाम्लघनो बस्तिः प्रयुक्तोऽतिस्वेदितस्य वा पुंसोऽल्पे दोषे तथा मृदौ कोष्ठे मुहुर्मुहुः प्रयुक्तत्वादतियोगत्वं प्राप्तोऽयम् कुक्षिरुग्जनकः स्यात्। सः-तथाविधो बस्तिः, विरेचनातियोगेन तुल्ये-सदृशे, लक्षणचिकित्सिते यस्य स एवं स्यात्।

आ० र०- अथातियोगव्यापदः। कुक्षिशूलाख्यव्यापदमाह-बस्तिरिति। सङ्ग्रहे तु (क.अ. ६)-"पृश्निपर्णी स्थिरां पद्मं काश्मर्यं मधुकोत्पले। पिष्ट्वा द्राक्षां मधूकं च क्षीरे तन्दुलधावने॥ द्राक्षायाः पक्वलोष्ठस्य प्रसादे मधुकस्य वा। विनीय सघृतं बस्तिं युञ्ज्याद्दाहेऽतियोगतः॥" इति। विरेचनतुल्यत्वोक्त्या दाहोऽप्युक्तः।

अङ्गरुगादिव्यापञ्चतुष्कं त्वाह सङ्ग्रहे (क.अ. ६) - "स्नेहस्वेदैरसम्पाद्य गुरुतीक्ष्णोऽतिमात्रकः। दुःस्थिताय प्रणिहितो बस्तिर्दुःशयिताय वा॥ अतिप्रवृत्तो मरुतंकोपयेत्स विमार्गगः। करोत्यङ्गरुजां जृम्भां स्तम्भं भेदं च पर्वणाम्॥ तं तैललवणाभ्यक्तं स्वेदितं संस्तरादिभिः। बिल्वकोलयवैरण्डवर्षाभूबृहतीद्वयैः॥ सकुलत्थैः शृतैर्मस्तुफलसौवीरकान्वितैः। आस्थापयेत्ससिन्धूत्थैर्जाङ्गलैराशितं रसैः॥ तैलेनानिलजद्रव्यविपक्वेनानुवासयेत्। मृदुकोष्ठेऽबले बस्तिरतितीक्ष्णोऽतिनिर्हरन्॥ कुर्याद्विध्मां हितं तत्र हिध्माघ्नं बृंहणं च यत्। बलाबृहत्यादिवराकाश्मर्यरससैन्धवैः। सप्रसन्नारनालाम्लैस्तैलं पक्त्वाऽनुवासयेत्। उष्णाम्बुनाऽक्षं पिप्पल्या दद्याल्लवणसंयुतम्॥ धूमलेहरसक्षीरस्वेदाश्चान्नं च वातजित्। अतितीक्ष्णः सवातो वा न वा सम्यक् प्रपीडितः॥ घट्टयेद्धृदयं बस्तिस्तत्र काशकुशोत्कटैः। स्यात्साम्लवणस्कन्धकरीरबदरीफलैः॥ शृतैर्बस्तिर्हितः सिद्धो वातघ्नैश्चानुवासनम्। मृदुकोष्ठाल्पदोषस्य रूक्षतीक्ष्णातिमात्रकः॥ हृत्वा बस्तिर्मलान् शीघ्रं वातपित्ते प्रकोपयेत्। नाभिबस्तिगुदांस्ते हि कृन्ततोऽस्य मुहुर्मुहुः॥ विवर्णस्याल्पमुत्थानं बस्तिर्निर्लेखनाद्भवेत्। स्वादुशीतौषधैस्तत्र पयस्येक्ष्वादिभिः शृतः॥ यष्ट्याह्वतिलकल्काभ्यां बस्तिः स्यात् क्षीरभोजिनः। ससर्जरसयष्ट्याह्वं जिङ्गिणीकर्दमाञ्जनम्॥ विनीय दुग्धे बस्तिः स्याद्व्यक्ताम्लरसभोजिनः। पिच्छिलश्च हितो बस्तिः स्नेहश्च मधुरैः शृतः॥" इति।

बस्तिः क्षाराम्लतीक्ष्णोष्णलवणः पैत्तिकस्य वा॥ २३॥

गुदं दहन् लिखन् क्षिण्वन् करोत्यस्य परिस्रवम्।
स विदग्धं स्रवत्यस्रं वर्णैः पित्तं च भूरिभिः॥ २४॥

बहुशश्चातिवेगेन मोहं गच्छति सोऽसकृत्।

रक्तपित्तातिसारघ्नी क्रिया तत्र प्रशस्यते॥ २५॥

दाहादिषु त्रिवृत्कल्कं मृद्वीकावारिणा पिबेत्।

तद्धि पित्तशकृद्घातान् हृत्वा दाहादिकान् जयेत्॥ २६॥

विशुद्धश्च पिबेच्छीतां यवागूं शर्करायुताम्।

युञ्ज्याद्वाऽतिविरिक्तस्य क्षीणविद्धस्य भोजनम्॥ २७॥

माषयूषेण कुल्माषान् पानं दध्यथवा सुराम्।

सिद्धिर्वस्त्यापदामेवं।

स० -क्षाराम्लतीक्ष्णोष्णलवणो बस्तिः प्रयुक्तः पैत्तिकस्य वा प्रयुक्तो गुदं दहन्निव विलिखन्निव क्षिपन्निवास्य-नरस्य, परिस्रवं करोति। सः-पुरुषः, तदा विदग्धमस्रं स्रवति। तथा बहुषो-बहून् वारान्, अतिवेगेन भूरिभिः - बहुभिः, वर्णैः पित्तं स्रवति। तथा मोहमसकृद् गच्छति। तत्रावस्थायां रक्तपित्तघ्नी तथा रक्तातिसारघ्नी क्रिया च प्रशस्यते। दाहमोहादिषु त्रिवृत्कल्कं द्राक्षाजलेन पिबेत्। यस्मात् तत्-त्रिवृत्कल्कयुतं द्राक्षावारि, पित्तशकृद्घातान् हत्वा दाहादीन् जयेत्। विशुद्धश्च सशर्करां शीतां पेयां पिबेत्। अतिविरिक्तस्य क्षीणपुरीषस्य पुंसः कुल्माषान् माषयूषेण सह भोजनं युञ्ज्यात्। दध्यथवा सुरां पानं दद्यात्। बस्त्यापदां-निरुहव्यापत्तीनां, एवं सिद्धिः-चिकित्सितं, स्यात्।

आ० र०- स्रवाख्यां व्यापदमाह-बस्तिरिति। सङ्ग्रहे तु (क.अ. ६)-"तत्रार्द्रशाल्मलीवृन्तैः क्षुण्णैराजं पयः श्रृतम्। पूतं घृतान्वितं बस्तिं दद्यादन्यांश्च पिछिलान्॥ वटादिपल्लवेष्वेवं कल्पो यवतिलेषु च। सुवर्चलोपोदकयोः कर्बुदारे च शस्यते॥ गुदे च शीतमधुरान् कुर्यात्सेकप्रलेपनान्।" इति। तथा (सङ्ग्रहे क.अ. ६)-"आमं यः कुणपं रुग्वानुपवेश्येत सारुचिः। सघनातिविषाकुष्ठनतदारुवचाः पिबेत्॥ शकृद्घातमसृक्पित्तं कफं वा योऽतिसार्यते। पक्वं तत्र स्ववर्गीयो बस्तिः श्रेष्ठं भिषग्जितम्॥ षण्णामेषां द्विसंसर्गात्त्रिंशद्भेदा भवन्ति तु। केवलैः सह षड्विंशद्विद्यात्सोपद्रबांश्च तान्॥ शूलप्रवाहिकाध्मानपरिकर्तारुचिज्वरान्। तृण्मोहदाहमूर्च्छार्दींश्चैषां विद्यादुपद्रवान्॥ तत्रामेऽन्तरपानं तु कट्वम्ललवणैर्युतम्। पाचनं शस्यते बस्तिरामे हि प्रतिषिध्यते॥ वातघ्नग्राहिवर्गीयो बस्तिः शकृति शस्यते। स्वाद्वम्लो व्यक्तलवणः स्नेहबस्तिः समीरणे॥ रक्ते रक्तेन पित्ते तु कषायस्वादुतिक्तकः। सार्यमाणे कफे

बस्तिः कषायकटुतिक्तकः॥ शकृता वायुना चामे तेन वर्चस्यथानिले। संसृष्टेऽन्तरपानम् स्यात् कट्वम्ललवणैर्युतम्॥ पित्तेनामेऽसृजा तद्वत्तयोरामेन वा पुनः। संसृष्टयोर्भवेत्पानं सकटुस्वादुतिक्तकम्॥ तथाऽऽमे कफसंसृष्टे कषायकटुतिक्तकम्। आमेन तु कफे युक्ते कषायलवणौषधम्॥ वातेन विशि पित्ते वा विद्धित्तास्त्रैस्तथाऽनिले। स्यात् कशायाम्लमधुरः संसृष्टे बस्तिरुत्तमः॥ बस्तिर्वातेन रक्ते तु कार्यः खाद्वम्लतिक्तकः। शकृच्छोणितयोः पित्तशकृतोरस्रपित्तयोः॥ बस्तिरन्योन्यसंसर्गे कषायस्वादुतिक्तकः। कफेन विशि पित्ते वा कफे विद्धित्तशोणितैः॥ कटुतिक्तकषायः स्यात्संसृष्टे बस्तिरुत्तमः। मधुरोषणतिक्तस्तु रक्ते कफविमूर्च्छिते॥ मारुते कफसंस्रुष्टे कट्वम्लवणो भवेत्। स्याद्वस्तिः कटुतिक्ताम्लः संसृष्टे वायुना कफे॥ त्रिचतुःपञ्चषट्योगानेवमेव विकल्पयेत्। युक्तिश्चैषाऽतिसारोक्ता सर्वरोगेष्वपि स्मृता॥ युगपत् षड्रसं षण्णां संसर्गे पाचनं भवेत्। निरामाणां च पञ्चानां बस्तिः षड्रसिको हितः॥ उदुम्बरशलाटूनि जम्ब्वाम्रोदुम्बरत्वचः। शङ्खं सर्जरसं लाक्षां कट्टणं च पलांशिकम्॥ पिष्ट्वा तैः सर्पिषः प्रस्थं क्षीरद्विगुणितं पचेत्। अतीसारेषु सर्वेषु पेयमेतद्यथाबलम्॥ कच्छुराधातुकीबिल्वसमङ्गारक्तमूलिभिः। मसूराश्वत्थशुङ्गैश्च यवागूः स्याज्जले श्रृतैः॥ बालोदुम्बरकट्वङ्गसमङ्गाप्लक्षपल्लवैः। मसूरधारकीपुष्पबलाभिश्च तथा भवेत्॥ नानाप्रकारा जायन्ते व्यापदो बस्तिविभ्रमात्। यथायथं यथावस्थं तांसां कुर्वीत साधनम्॥" इति निरूहव्यापदः।

स्नेहबस्तेस्तु वक्ष्यते॥ २८॥

स० -स्नेहबस्तेः-अनुवासनस्य, सिद्धिर्वक्ष्यते।

आ० र०- अथानुवासनव्यापदः। ताश्चोक्ताः सङ्ग्रहे (क. अ. ७)-"स्नेहबस्तौ मरुत्पित्तकफात्याशविडावृते। अभुक्तशूनपाव्यामदत्तेऽष्टौ व्यापदः स्मृताः॥" इति।

शीतोऽल्पो वाऽधिके वाते पित्तेऽत्युष्णः कफे मृदुः।

अतिभुक्ते गुरुर्वर्चःसञ्चयेऽल्पबलस्तथा॥ २९॥

दत्तस्तैरावृतः स्नेहो नायात्यभिभवादपि।

स० -शीतो बस्तिरल्पो वाऽधिके वाते दत्तः, तथा पित्तेऽत्युष्णः, तथा कफे मृदुः, अयोगः सम्पद्यते। अतिभुक्ते गुरुर्बस्तिर्दत्तः, तथा वर्चसः-पुरीषस्य, सञ्चयेऽल्पबलः-उभयथा मात्रया वीर्यतश्च, दत्तः, तैः-शीतादिकारणाद्वातादिभिः, स्नेहबस्तिरावृतो नायाति-गुदमार्गान्न प्रत्यागच्छति, अभिभवादप्येतैरेव।

आ० र०- तत्र पञ्चानां व्यापदां कारणमाह-शीतोऽल्प इति। गुरुः-चिरपाकः। अल्पबलः-अनुलोमनासमर्थः। शीतादिगुणस्वावृतत्वम्। अल्पस्याभिभवः।

स्तम्भोरुसदनाध्मानज्वरशूलाङ्गमर्दनैः॥ ३०॥

पाश्वरुग्वेष्टनैर्विद्याद्वायुना स्नेहमावृतम्।

स्निग्धाम्ललवणोष्णैस्तं रास्नापीतद्रुतैलिकैः॥ ३१॥

सौवीरकसुराकोलकुलत्थयवसाधितैः।

निरूहैर्निर्हरेत्सम्यक् समूत्रैः पाञ्चमूलिकैः॥ ३२॥

ताभ्यामेव च तैलाभ्यां सायं भुक्तेऽनुवासयेत्।

स० -स्तम्भोरुसादादिभिर्वायुना स्नेहमावृतं विद्यात्। तं एवंविधं, स्नेहं-स्नेहबस्तिं, निरुहैः सम्यक् स्निग्धाम्लवणोष्णैर्निर्हरेत्। तानेव निरूहानाह-सौवीरकसुरादिसाधितैस्तथा गोमूत्रान्वितैस्तथा पञ्चमूलनिर्वृत्तैः पञ्चमूलक्काथवद्भिरित्यर्थः। तथा रास्ना च पीतद्रुश्च रास्नापीतद्रु, ताभ्यां साधिते तैले रास्नापीतद्रुतैले, ते विद्यते येषां निरूहाणां तैः, क्वचित्पुटके रास्नातैलं क्वचिद्धरिद्रातैलं योज्यमित्यर्थः। ताभ्यमिति द्विवचननिर्देशात् पृथगेतत् तैलद्वयमुपयोगीति गम्यते। च-समुच्चये, न केवलं तं निरूहयेत्, रास्नातैलेन पीतद्रुतैलेन वा दोषाद्यनुरोधादनुवासयेच्च। सायं भुक्ते-न तु प्रातर्भुक्ते।

आ० र०- वाताघृतस्य लक्षणं चिकित्सितं चाह-स्तम्भोरुसदनेति। वेष्टनं-पिण्डिकोद्वेष्टनम्। पीतद्रुः-सरलः। रास्नातैलेन पीतद्रुतैलेन च संस्कृतैः। बिल्वादिपञ्चमूलयवकोलकुलत्थानां क्काथः। ताभ्यां-रास्नापीतद्रुतैलाभ्याम्।

तृड्ग्राहरागसम्मोहवैवर्ण्यतमकज्वरैः॥ ३३॥

विद्यात्पित्तावृतं स्वादुतिक्तैस्तं बस्तिभिर्हरेत्।

स० -तं तृड्ग्राहादिभिः पित्तावृतं स्नेहबस्तिं विद्यात्। स्वादुतिक्तैर्बस्तिभिर्विनिर्हरेत्।

आ० र०- पित्तावृतस्य लक्षणं चिकित्सितं चाह-तृट्दाहेति। तमकः-तमःप्रवेशः।

तन्द्राशीतज्वरालस्यप्रसेकारुचिगौरवैः॥ ३४॥

सम्मूर्च्छाग्लानिभिर्विद्याच्छ्लेष्मणा स्नेहमावृतम्।

कषायतिक्तकटुकैः सुरामूत्रोपसाधितैः॥ ३५॥

फलतैलयुतैः साम्लैर्बस्तिभिस्तं विनिर्हरेत्।

स ०-तन्द्रादिभिः कफावृतं स्नेहबस्तिं विद्यात्। तं कषायकटुतिक्तकैः सुरामूत्रोपसाधितैः फलतैलयुतैः साम्लैर्बस्तिभिः निरूहैः, विनिर्हरेत्। फलानां-उष्णवीर्याणामक्षोटादीनां, तैलं फलतैलम्। केचित्तुं फलं-मदनफलं, तिलतैलं च, ताभ्यां युतास्तैरिति व्याचक्षते।

आ० र०- कफावृतस्य लक्षणं चिकित्सितं चाह-तन्द्रेति। फलतैलं-मदनफलतैलम्।

छर्दिमूर्च्छारुचिग्लानिशूलनिद्राङ्गमर्दनैः॥ ३६॥

आमलिङ्गैः सदाहैस्तं विद्यादत्यशनावृतम्।

कटूनां लवणानां च क्काथैश्चूर्णैश्च पाचनम्॥ ३७॥

मृदुर्विरेकः सर्वं च तत्रामविहितं हितम्।

स०-छर्द्यादिभिरामलिङ्गैर्दाहयुतैः स्नेहमत्यशनावृतं विद्यात्। कटूनां लवणानां च क्काथैश्चूर्णैश्च पाचनं हितम्। तथा मृदुभिः-अतीक्ष्णैः, विरेकः। तथा तस्मिन् सर्वमामविहितमौषधं हितम्।

आ० र०- अत्यशनावृतस्य लक्षणं चिकित्सितं चाह-छर्दिमूर्च्छेति। आमं-आमाजीर्णम्। क्काथैः कट्नामेव, चूर्णैः कटूनां लवणानां च।

विण्मूत्रानिलसङ्गार्तिगुरुत्वाध्मानहृद्ग्रहैः॥३८॥

स्नेहं विडावृतं ज्ञात्वा स्नेहस्वेदैः सवर्तिभिः।

श्यामाबिल्वादिसिद्धैश्च निरुहैः सानुवासनैः॥३९॥

निर्हरेद्विधिना सम्यगुदावर्तहरेण च।

स ०-विण्मूत्रादिभिर्विडावृतं स्नेहं विदित्वा, स्नेहादिभिस्तथा श्यामादिभिः सिद्धैर्निरूहैरनुवासनैश्च, तथोदावर्तहरेण विधिना, सम्यग् निर्हरेत्।

आ० र०- विडावृतस्य लक्षणं चिकित्सितं चाह-विण्मूत्रानिलेति। अर्तिः-शूलम्। श्यामादिः-गणः। बिल्वादिपञ्चमूलम्।

अभुक्ते शूनपायौ वा पेयामात्राशितस्य वा॥४०॥

गुदे प्रणिहितः स्नेहो वेगाद्धावत्यनावृतः।

ऊर्ध्वं कायं ततः कण्ठादूर्ध्वेभ्यः खेभ्य एत्यपि॥४१॥

मूत्रश्यामात्रिवृत्सिद्धो यवकोलकुलत्थवान्।

तत्सिद्धतैलो देयः स्यान्निरूहः सानुवासनः॥४२॥

कण्ठादागच्छतः स्तम्भकण्ठग्रहविरेचनैः।

छर्दिघ्नीभिः क्रियाभिश्च तस्य कुर्यान्निबर्हणम्॥४३॥

स०-अभुक्ते स्नेहबस्तिः, तथा शूनः पायुर्यस्य तस्मिन् प्रणिहितो बस्तिः, अथवा पेयामात्रमेवाशितं येन स पेयामात्राशितस्तस्य गुदे प्रणिहितः स्नेहबस्तिः, अनावृतः सन् वेगादूर्ध्वं कायं धावति। ततः कण्ठादूर्ध्वेभ्यश्च खेभ्यः एति-पतति। तत्र गोमूत्रादिसिद्धो यो

यवादिमान् क्वाथस्तेन क्वाथेन सिद्धतैलैर्निरूहमनुवासनं [च] दद्यात्। कण्ठादागच्छतः स्नेहस्य स्तम्भकण्ठग्रहादिभिश्छर्दिघ्नीभिः क्रियाभिश्च तन्निर्हरणं कुर्यात्।

आ० र०- अभुक्तदत्तशूनपायुदत्तयोर्लक्षणं चिकित्सितं चाह-अभुक्त इति। मात्रा-स्तोकम्। पेयाशितस्य चाभुक्ततुल्यत्वान्न पृथगुद्देशः कृतः। कण्ठादेति-निर्गच्छति। ऊर्ध्वेभ्योऽपि खेभ्यः-नासानेत्रकर्णेभ्यः। श्यामात्रिवृत्यवकोलकुलत्थानां मूत्रेण क्वाथः। तेषामेव कल्केन मुत्रेण च सिद्धं तैलम्। तत्र क्वाथतैलाभ्यां निरूहः। तैलेनानुवासनः। स्तम्भः-उच्छ्वासरोधः।

नापक्वं प्रणयेत्स्नेहं गुदं स ह्युपलिम्पति।

ततः कुर्यात्सरुङ्मोहकण्डूशोफान्, क्रियाऽत्र च॥ ४४॥

तीक्ष्णो बस्तिस्तथा तैलमर्कपत्ररसे श्रृतम्।

स० -अपक्वं स्नेहं न दद्यात्। यस्मात् सः-अपक्वः स्नेहो, गुदमुपलिम्पति। ततः-उपलिप्ते गुदे, रुजाभिः सह मोहादीन् कुर्यात्। अत्र चिकित्सितं तीक्ष्णो बस्तिस्तथाऽर्कपत्ररसे श्रृतं तैलम्।

आ० र०- आमदत्तस्य लक्षणं चिकित्सितं चाह-नापक्वमिति। तैलमनुवासनार्थम्। इत्यनुवासनव्यापदः।

अथ नेत्रबस्तिशय्याप्रणेतृदोषजा व्यापदः। ताश्चोक्ताः सङ्ग्रहे (क.अ.७)-"ह्रस्वं दीर्घं तनु स्थूलं जीर्णं शिथिलबन्धनम्। पार्श्वच्छिद्रं तथा वक्रमष्टौ नेत्राणि वर्जयेत्॥
अप्राप्त्यतिगतिक्षोभकषणक्षणनस्रवाः। गुदपीडा गतिर्जिह्मा तेषां दोषा यथाक्रमम्॥
मांसलस्निग्धविषभजालवत्स्थूलवातलाः। छिद्रः क्लिन्नश्च तानष्टौ बस्तीन् कर्मसु वर्जयेत्॥
गतिवैषम्यदौर्गन्ध्यजिह्मत्वस्रुतिदुर्ग्रहाः। फेनिलच्युत्यधार्यत्वं बस्तेः स्युर्बस्तिदोषतः॥
उच्चकैरत्यवाक्शीर्षमुर्ध्वसङ्कुचितस्थितम्। उत्तानं दक्षिणं पार्श्वं स्पत शय्याः परित्यजेत्॥
मूत्राघातोऽतिसम्प्राप्तिरप्राप्तिः साधु नागतिः। आश्वागतिर्मरुत्कोपस्तृप्तिः पक्वाशयस्य च॥
तद्दोषाः स्युर्विधातव्यं यथौपयकमत्र च। सवातातिद्रुतोत्क्षिप्ततिर्यगुल्लुप्तकम्पिताः॥
अतिमन्दकबाह्यातिवेगदोषाः प्रणेतृतः।" इति।

अनुच्छ्वास्य तु बद्धे वा दत्ते निःशेष एव वा॥४५॥

प्रविश्य क्षुभितो वायुः शूलतोदकरो भवेत्।

तत्राभ्यङ्गो गुदे स्वेदो वातघ्नान्यशनानि च॥४६॥

स० -अनुच्छ्वास्य बस्तेर्वदने बद्धे सति, अथवा निःशेषं दत्ते सति, प्रविश्यान्तरे वायुः कुपितः शूलतोदकरः स्यात्। तस्मिन्नभ्यङ्गो गुदे स्वेदश्च, तथा वातहन्तृणि भोजनानि च।

आ० र०- सवातप्रणनस्य लक्षणं चिकित्सितं चाह-अनुच्छ्वास्येति।

द्रुतं प्रणीते निष्कृष्टे सहसोत्क्षिप्त एव वा।

स्यात् कटीगुदजङ्घोरुबस्तिस्तम्भार्तिभेदनम्॥४७॥

भोजनं तत्र वातघ्नं स्वेदाभ्यङ्गाः सबस्तयः।

स० -शीघ्रं प्रणीते निष्कृष्टे सहसोत्क्षिप्ते च कट्यादिषु स्तम्भपीडाभेदनानि स्युः। तत्र वातघ्नमशनं स्वेदोऽभ्यङ्गश्च।

आ० र०- अत्द्रुतोत्क्षिप्तयोर्लक्षणं चिकित्सितं चाहद्रुतमिति। प्रणीते-प्रवेशिते। निष्कृष्टे-निष्काशिते। उत्क्षिप्ते-पृष्ठवंशं प्रति नानीते।

तिर्यङ्नेत्रस्य लक्षणं चिकित्सितं चाह सङ्ग्रहे (क.अ.७)- "तिर्यग्वल्यावृतद्वारे बद्धे वाऽपि न गच्छति। नेत्रे तद्वजु निष्कृष्य संशोध्य च पुनर्नयेत्॥" इति।

पीड्यमानेऽन्तरा मुक्ते गुदे प्रतिहतोऽनिलः॥४८॥

उरःशिरोरुजं सादमूर्वोश्च जनयेद्बली।

बस्तिः स्यात्तत्र बिल्वादिफलश्यामादिमूत्रवान्॥४९॥

स० -पीड्यमाने बस्तिपुटकेऽन्तरा-मद्य एव, कदाचित्तस्मिन् मुक्ते, गुदेऽनिलः प्रतिहतो बलवान् उरःशिरोरुजमूरुसादं च जनयेत्। तत्र बिल्वादिभिर्बस्तिर्-मदनफलश्यामादिमान् स्यात्।

आ० र०- उल्लुप्तस्य लक्षणं चिकित्सितं चाह-पीड्यमान इति। फलं-मदनफलम्।

कम्पितादीनां चतुर्णां लक्षणं चिकित्सितं चाह सङ्ग्रहे (क.अ. ७)-"स्याद्दाहो दवथुः शोफः कम्पनाभिहते गुदे। कषाया मधुराः शीताः सेकास्तत्र सबस्तयः॥ अतिमात्रप्रणीतेन नेत्रेण क्षणनाद्वलेः। स्यात्सार्तिदाहनिस्तोदगुरुवर्चःप्रवर्तनम्॥ तत्र सर्पिः पिचुः क्षीरं पिच्छाबस्तिश्च शस्यते। न भावयति मन्दस्तु बाह्यश्चाशु निवर्तते॥ स्नेहस्तत्र पुनः सम्यक् प्रणेयः सिद्धिमिच्छता।" इति।

अतिप्रपीडितः कोष्ठे तिष्ठत्यायाति वा गलम्।

तत्र बस्तिर्विरेकश्च गलपीडादि कर्म च॥५०॥

स० -अतिप्रपीडितो बस्तिपुटकः कोष्ठे तिष्ठति, गलं वाऽऽयाति। तत्र बस्तिर्विरेकश्च गलपीडादि च कर्म शस्यते।

आ० र०- अतिवेगस्य लक्षणं चिकित्सितं चाह-अतिप्रपीडित इति।

वमनाद्यैर्विशुद्धं च क्षामदेहबलानलम्।

यथाऽण्डं तरुणं पूर्णं तैलपात्रं यथा तथा॥५१॥

भिषक् प्रयत्नतो रक्षेत्सर्वस्मादपचारतः।

स० -वमनविरेकाद्यैश्च विशुद्धं क्षामदेहं क्षामबलं क्षामानलं च पुरुषं वैद्यः प्रयत्नेन सर्वस्मादपचाराद्रक्षेत्। किमिव? यथा तरुणं-अभिनवं जातमण्डं, यथा च तैलपूर्णं पात्रं रक्ष्यते, तथा प्रयत्नेन रक्षेत्।

आ० र०- वमनादिशुद्धस्य विशेषतोऽपचारं निषेधतिवमनाद्यैरिति।

दद्यान्मधुरहृद्यानि ततोऽम्ललवणौ रसौ॥५२॥

स्वादुतिक्तौ ततो भूयः कषायकटुकौ ततः।

अन्योन्यप्रत्यनीकानां रसानां स्निग्धरूक्षयोः॥५३॥

व्यत्यासादुपयोगेन क्रमात्तं प्रकृतिं नयेत्।

सर्वसहः स्थिरबलो विज्ञेयः प्रकृतिं गतः॥५४॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचिता- यामष्टाङ्गहृदयसंहितायां पञ्चमे कल्पसिद्धिस्थाने बस्तिव्यापत्सिद्धिर्नाम पञ्चमोऽध्यायः॥५॥

स० - तस्मिन् मधुरहृद्यानि दद्यात्। अनन्तरमम्ललवणौ रसौ, ततः स्वादुतिक्तरसौ, ततः कषायकटुकरसौ दद्यात्।

अन्योन्यप्रत्यनीकानां-परस्परप्रतिपक्षाणां रसानां, तथा स्निग्धरूक्षयो-रन्योन्यप्रत्यनीकयोः, व्यत्यासात्-विपर्ययात्, उपयोगेन-यथास्वमुपयोगेन, यथा-मधुररसमुपयुज्य पुनरम्लाद्यन्यतमं तत्प्रतिपक्षं युञ्ज्यात्, अम्लमुपयुज्य पुनर्मधुराद्यन्यतमं तत्प्रतिपक्षं युञ्ज्यात्, एवं स्निग्धरूक्षयोरुपयोगं कुर्यात्। तथा तं पुरुषं वमनादिभिर्विशुद्धं, प्रकृतिं यथोचितां स्वां नयेत्।

सर्वसहः-अशेषक्षमः, तथा स्थिरबलः, प्रकृतिं प्राप्तः पुमान् वेद्यः।

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टाङ्गहृदयटी-कायां सर्वाङ्गसुन्दराख्यायां पञ्चमे कल्पसिद्धिस्थाने बस्ति-व्यापत्सिद्धिर्नाम पञ्चमोऽध्यायः समाप्तः॥५॥

आ० र०- शुद्धस्योपचारमाह-दद्यादिति। सङ्ग्रहे तु (क. अ. ७)-"अत्रान्तरे त्यजेदष्टौ भाष्यादीनि विशेषतः। उच्चैर्भाष्याच्छिरोगतिमिरोरःस्वरव्यथाः॥ रक्तनिष्ठेवतमकज्वराद्यास्तत्र साधनम्॥ अभ्यङ्गस्वेदनस्याधोभक्तस्नेहोपसेवनम्॥ मौनं विधिर्वातहरो यथास्वं च विकारजित्। अत्यास्यायनयानाभ्यां सन्धिमूर्धत्रिकादिरुक्। अतिचङ्क्रमणात्पादजङ्घोरुसदनादयः। तेषां

वातहरं सर्वं स्नेहस्वेदादि शस्यते। अजीर्णभोजनादामविषच्छर्दिज्वरादयः। तत्र मात्राशितीयोक्तो विधेयो विधिरामहा॥ अहितान्नाद्यथादोषं रोगाः स्युर्भेषजानि च। हलीमकादयः प्रोक्ता दिवास्वप्नात् पुरा गदाः॥ विदध्यात् कफजित्तेषु धूमरूक्षान्नलङ्घनम्। व्यवायाज्जीवितभ्रंशस्तैरस्यानिलामयैः॥ गुदोऽवलुप्यत इव भ्रमतीव च चेतना। मेढं धूमायति मनस्तमसीव प्रवेश्यते॥ जीवनीयश्रृतक्षीरसर्पिषोरुपयोजनम्। आहारो बृंहणस्तत्र वृष्यास्ते ते च बस्तयः॥ वेगरोधेर्ध्ववातत्वात् प्रागुक्ता ये सदातुराः। तेषां विबद्धे पवने सर्वदेहोपतापिनि॥ फलवर्तिं पुरा दद्यादथ बस्तिं चलापहम्। निकुम्भकुम्भाभ्युरुबूकधावनीपुनर्नवादारु महच्च पञ्चकम्। फलं च मुत्रे क्वथितं समस्तु घृतं सतैलं लवणानि पञ्च॥ निरूहितं धन्वरसेन भोजयेन्निकुम्भतैलेन ततोऽनुवासयेत्। बलां सरास्नां फलबिल्वचित्रकान् द्विपञ्चमूलं कृतमालकात्फलम्॥ यवन् कुलत्थाश्च पचेज्जले रसः समुस्तपाठेन्द्रयवैश्च कल्कवान्। सतैलसर्पिर्गुदसैन्धवो हितः सदाऽऽतुराणां बलपुष्टिवर्णदः॥ तथाऽनुवास्यं मधुकेन साधितं बालेन बिल्वेन शताव्हयाऽथवा। सजीवनीयस्तु रसोऽनुवासने निरूहणे चालवणः शिशोर्हितः॥ न चान्यदाऽऽश्वङ्गबलाभिवर्द्धनं निरूहबस्तेः शिशुवृद्धयोर्हितम्॥ निरूहबस्तेर्नैव स्यादन्यत् स्थविरबालयोः। बलाङ्गवर्द्धनं शीघ्रमादृतो योजयेदतः॥" इति।

इति हेमाद्रिटीकायामायुर्वेदरसायने।
बस्तिव्यापत्प्रकरणं सामत्स्येन निरूपितम्॥५॥

****

षष्ठोऽध्यायः।

अथ भेषजकल्पो व्याख्यातुमारभ्यते। बस्तिव्यापदां ह्युत्पन्नानां सिद्धिः-साधनं, सद्भेषजप्रयोगात्। अपि च सर्वेषां रोगाणं या सिद्धिः-प्रशमोपायः, सोऽपि सद्भेषजप्रयोगादेव।

इत्याह-

अथातो द्रव्यकल्पं व्याख्यास्यामः।
इति ह स्माहुरात्रेयादयो महर्षयः।

(गद्यसूत्रे॥२॥)

स० -भेषजस्य कल्पो-योजना, भेषजकल्पः। शेषं पूर्ववत्।
आ० र०- भेषजकल्पं व्याख्यातुं प्रतिजानीते-अथेति।

धन्वे साधारणे देशे समे सन्मृत्तिके शुचौ।
श्मशानचैत्यायतनश्वभ्रवल्मीकवर्जिते॥१॥
मृदौ प्रदक्षिणजले कुशरोहिषसंस्तृते।
अफालकृष्टेऽनाक्रान्ते पादपैर्बलवत्तरैः॥२॥
शस्यते भेषजं जातं, युक्तं वर्णरसादिभिः।
जन्त्वजग्धं दवादग्धमविदग्धं च वैकृतैः॥३॥
भूतैश्छायायातपाम्ब्वाद्यैर्यथाकालं च सेवितम्।
अवगाढमहामूलमुदीचीं दिशमाश्रितम्॥४॥

स० -धन्वदेशे, तथा साधारणे देशे, तथा समे-अनिम्नोन्नते, तथा सन्मृत्तिके, तथा श्मशानादिवर्जिते, चैत्यं-दिनचर्याध्याये (हृ. सू. अ. २/३३) उक्तम्। तथा मृदौ-सुस्पर्शे, तथा प्रदक्षिणं-अनुकूलं जलं यस्मिन्, तथा कुशरोहिषसंस्तृते, तथाऽफालकुष्टे-खिले, तथा वृक्षैर्महत्तरैरनाक्रान्ते देशे, यद्भेषजं जातं युक्तं यथास्वम् वर्णरसादिभिः, तद्भेषजं शस्यते। तथा जन्तुभिः -कीटैः, अजग्धं-अभक्षितं, दवेन-दावाग्निना, अदग्धं-अप्रुष्टं, तथाऽविदग्धं वैकृतैर्भूतैः-स्वभावं परित्यज्य धर्मबाधाद्विकृतैराकाशा(पृथिव्या)दिभिर्यदनासेवितं तदविदग्धम्। विकृतमेव वैकृतम्, प्रज्ञादित्वादण्। तथा छायादिभिर्यथाकालं कालमनतिक्रम्य सेवितं, यदा तस्य भेजषस्य वृद्धौ छायादीनामन्यतमं वस्तुजातमुपयुज्यते तदा तेन सेवितमित्यर्थः। तथाऽवगाढं-दूरं गतं, महत्-पृथु, मूलं यस्य तदवगाढमहामूलम्। तथोदिचीं-उत्तरां, दिशमाश्रितं-तामाश्रित्य स्थितम्।

आ० र०- स च देशगुणकालकल्पनाभ्नैः पञ्चधा। तत्र देशमाह-धन्व इति। धन्वे-जाङ्गले। सन्मृत्तिके-स्निग्धक्ष्णसुवर्णवर्णमधुररसमृत्तिके। आयतनं-वधस्थानं देवयजनागारं च। गुणमाह-युक्तमिति। अवगाढं-गम्भीरम्। सङ्ग्रहे तु (क. अ. ८)-"विशेषतस्त्वश्मवती स्थिरा गुर्वी श्यामा कृष्णा व स्थूलतृणवृक्षसस्याप्राया प्थ्वी स्वगुणभूयिष्ठा। नानावर्णा लघुपुष्पवती प्रविरलपाण्डुवृक्षप्ररोहाऽग्निगुणभूयिष्ठा। रूक्षा रासभभस्मवर्णा रुक्षतनुकोटर-वृक्षप्रायाऽल्परसप्ररोहाऽनिलगुणभूयिष्ठा। मृद्वीसमा श्वभ्रवत्यव्यक्तरसजला महापर्वतवृक्षा श्यामाऽऽकाशगुणभूतिष्ठा। तत्राम्बुपृथ्वीगुणभुयिष्ठासु भूमिषु जातानि विरेचनानि बृंहणानि च शस्यन्ते। अनलानिलाकाशगुणभूयिष्ठासु वमनानि। सर्वगुणयुक्तासूभयतो भागानि। आकाशगुणभूयिष्ठासु शमनानि। एवं बलवत्तमानि भवन्ति। तेषां शाखापलाशमचिरप्ररूढं वर्षावसन्तयोर्ग्राह्यम्। ग्रीष्मे मूलानि शिशिरे वा शीर्णप्ररूढपर्णानाम्। शरदि त्वक्कन्दक्षीराणि। हेमन्ते साराणि। यथर्तु पुष्पफलम्। अन्ये पुनराहुः, सौम्यान्यौषधानि सौम्येष्वृतुस्षु, आग्नेयान्याग्नेयेषु, एवमव्यापन्नान्यापूर्णतररसवीर्याणि भवन्ति।" इति। एतच्च " यथाकाअं च सेवितम्" इत्यत्र तन्त्रकारेण सङ्ग्रहीतम्।

[महेन्द्ररामकृष्णानां ब्राह्मणानां गवामपि।

तपसा तेजसा वाऽपि प्रशाम्यध्वं शिवाय वै॥ १॥

मन्त्रेणानेन मतिमान् सर्वमप्यौषधं नयेत्।]

अथ कल्याणचरितः श्राद्धः शुचिरुपोषितः।

गृह्णीयादौषधं सुस्थं काले च कल्पयेत्॥५॥

सक्षीरं तदसम्पत्तावनतिक्रान्तवत्सरम्।

ऋते गुडघृतक्षौद्रधान्यकृष्णाविडङ्गतः॥६॥

पयो बाष्कयणं ग्राह्यं विण्मूत्रं तच्च नीरुजाम्।

वयोबलवतां धातुपिच्छशृङ्गखुरादिकम्॥७॥

स० -अथेत्यानन्तर्यमङ्गलसूचकम्। भेषजमेवंविधं विदित्वाऽनन्तरं कल्याणं-स्वस्त्ययनादि, चरितं-अनुष्ठितं, येनासौ कल्याणचरितः, तथा श्राद्धः-भेषजहरणं प्रति श्रद्धावान्, तथा शुचिः-स्नानादिना शुद्धः तथोपोषितः-कृतोपवासः, एवंविधमौषधमेवंविधः पुमान् गृह्णीयात्। तच्च भेषजं [सुस्थं-] स्वस्थं कृत्वा, स्थितं काले सक्षीरं-आर्द्रं, कल्पयेत्। तदसम्पत्तौ तु तथाविधस्य सक्षीरस्यौषदस्यासम्पत्तौ, अनतिक्रान्तवत्सरं भेषजं कल्पयेत्। किं सर्वं द्रव्यमनतिक्रान्तवत्सरं कल्पयेत्? ऋत इत्यादि। गुडादीन् वर्जयित्वा परमौषधमनतिक्रान्तवत्सरं कल्पयेत्। गुडादींस्तु अतिक्रान्तवत्सरान् कल्पयेत्।

क्षीरं बष्कयण्याः सम्बन्धि ग्राह्यम्। विट् मूत्रं च, तच्चक्षीरं च, नीरुजं-अपगतदोषं, ग्राह्यम्। वयोबलवतां धातुपिच्चादिकं ग्राह्यम्। आदिग्रहणात् चिकित्सितोपयोगि केशनखचर्मादिकं गृह्यते। वयःशब्दोपादानात् विशिष्टं तरुणं वयो गृह्यते, न ह्यवयाः कश्चिदस्ति।

आ० र०- ग्रहणस्थापनावचारणावधिमाह-अथेति। श्राद्धः-श्रद्धावान्। सक्षीरं-आर्द्रम्, तदभावे शुष्कम्। तच्च वर्षावधि, घृतादीनि विना। धान्यं-शाल्यादि। कृष्णा-पिप्पिली। बाष्कयणं,-बष्कयणी-पौढवत्सा, तस्या विण्मुत्रं क्षीरं च। तन्नीरुजां-अरोगाणां, तरुणानां बलिनां च ग्राह्यम्। धात्वादिकं तद्वत्। सङ्ग्रहे तु (क. अ. ८)-"अथ मङ्गलाचारः कल्याणवृत्तिः शुचिः शुक्ल्वासाः संपूज्य देवतामश्विनौ गोब्राह्ण्णांश्च कृतोपवास उदङ्मुखः प्राङ्मुखो वागृण्हीयात्। गृहीत्वा चानुरूपगुणवद्भाजनसंस्थान्यागारेषु पूर्वोत्तरद्वारेषु निवातप्रवातैकदेशेषु नित्यपुष्पोपहारबलिकर्मसु, अग्निसलिलोपस्वेदधूमरजोमूषिकचतुष्पदामनभिगमनीयानि स्ववच्छन्नानि शिक्येष्वासज्य स्थापयेत्।" इति।

कषाययोनयः पञ्च रसा लवणवर्जिताः।

रसः कल्कः श्रृतः शीतः फाण्टश्चेति प्रकल्पना॥८॥

पञ्चधैव कषायाणां पूर्वं पुर्वं बलाधिका।

स० -कषायस्य योनयः-आकराः, लवणवर्जिता मधुरादयः पञ्च रसाः। तेभ्य एव कषायाः-स्वरसादयः, पञ्च सम्भवन्ति। लवणस्य तु स्वरसकल्पनायोगो न सम्भवति, सदैव शुष्करूपत्वात्। कल्ककल्पनाऽपि न सम्भवति, यतो यद् द्रव्यं द्रवेण सिक्तं पीण्डीभवति न तु विलीयते तत् कल्कसंज्ञामासादयति। तथा यद् द्रव्यं क्वाथयित्वा जलादुद्धियते द्रव्यावयवास्तूदकमनुप्रविशन्ति, तत्रैव श्रृतकल्पना। लवणस्य तु विलीनरूपत्वादेवं न सम्भवति इति श्रृतकल्पनाया अप्यसम्भवः। एवं शीतफाण्टयोरप्यनेनैव न्यायेनासम्भव इत्युक्तं लवणवर्ज्या रसाः कषाययोनय इति। मुनिनाऽप्युक्तं (च. सू. अ. ४/६)-["कल्पनावशतः पञ्चानां रसानां कषायसंज्ञाव्यवहार इति। लवणस्य कल्पनायोगाभावात्] मधुरकषायोऽम्लकषायस्तिक्तकषायः कटु कषायः कषायकषायश्चेति।" इति। रसानां स्वरसादि कल्पनायोगो न सम्भवति। उक्तं चैतत्। तस्मात् गुणगुणिनोरभेदोपचारादिह रसग्रहणेन तदाश्रयाणां द्रव्याणां ग्रहणं मन्तव्यम्। रसः कल्कः श्रृतः शीतः फाण्टश्चेति प्रकल्पना पञ्चधैव कषायाणां स्वरसादीनाम्। सा च कल्पना पूर्वं पूर्वं-यथापूर्वं, बलाधिका-अधिकशक्तिः। एवं फाण्टाख्या कल्पना सबला। ततोऽप्यधिकशक्तिः शीताख्या। ततोऽप्यधिकवीर्या श्रृताख्या। ततोऽप्यधिकशक्तिः कल्काख्या। कल्काख्यायां चूर्णाख्यायाश्च कल्पनाया अन्तर्भावादपृथग्ग्रहणम्।

कल्काख्यायाश्च कल्पनायाः स्वरसाख्या कल्पना अधिकशक्तिः। ननु, चूर्णादनन्तरं कल्कः क्रियते न तु कल्कादनन्तरं चूर्णम्। तस्मात् पञ्चानां कल्पनानां मध्ये चूर्णकल्पनैव निर्देष्टुं युक्ता, न तु कल्ककल्पना। युक्तमाह भवान्। किन्तु लवणस्य कषायसंज्ञायां समावेशो माभूदिति कल्पनानां मध्ये कल्क इति निर्देशः कृतो न चूर्ण इति। तस्माल्लवणे न सम्भवति कषायसंज्ञासमावेशः।

आ० र०- कल्पनामाह-कषाययोनय इति। द्रध्यादुद्धतसारभागः कषायः। लवणस्य तदभावत्वदयोनि त्वम्। ते रसादयो यथापुर्वं बलवत्तराः। [तन्त्रान्तरे-"रसः क्वाथो हिमः फाण्टः कल्कश्चूर्णं विवर्तिका। लेहः स्नेहोऽथ सन्धानं दशैता द्रव्यकल्पनाः॥सद्यः समुद्धतात् क्षुण्णात् पटनिष्पीडितात् स्त्रवेत्। द्रव्यात्तु स च निर्यासो रसः स्वरस उच्यते॥

द्विरष्टपलिके तोये क्षुण्णद्रव्यपलं स्मृतम्। तुर्यशेषं स निर्यूहः स्म्तः व्काथः कषायकः॥श्रृतः कषायो निर्यूहः व्काथो यूषः कृतयूषः प्रमथ्या च द्रव्यात्कालीकृता स्म्ता॥द्विपल मानमेतस केचिदाहुश्चतुः। पलम्।" इति।]

सद्यःसमुद्धृतात् क्षुण्णाद्याः स्त्रवेत्पटपीडितात्॥९॥

स्वरसः स समुद्दिष्टः

स ०-सद्यः-तत्क्षणं, समभूमेः सम्यगुद्धृतं-उत्खातं, अनन्तरं क्षुण्णं-पिष्टं, सद्यःसमुद्धृतक्षुण्णं, तस्माद्वस्त्रपीडिताद्यः स्त्रवेत् स स्वरसः कल्पनाकषायः समुद्दिष्टः-संज्ञायां सङ्केतितः।

आ० र०- रसलक्षणमाह-सद्य इति। यस्मिन् दिने समुद्धृतं तस्मिन्नेव दिने प्रक्षाल्य क्षूण्ं पटपीडितं च यद्रव्यं तस्य रसः।

कल्कः पिष्टो द्रवाप्लुतः।

चूर्णोऽप्लुतः

स०-द्रवेणाऽऽप्लुतः पिष्टः सन् कल्क इति कल्पनाकषायः सङ्केतितः। यत् द्रव्यं द्रवेण अप्लुतं-शुष्कमेव पिष्टं, स कल्पनाकषायश्चूर्ण इति गदितः। तेन कल्कस्यैवायं भेद इति, नासौ कल्पनेति शङ्कनीयम्।

आ० र०- कल्कलक्षणमाह-कल्क इति। शुष्कं द्रव्यं द्रवेणाप्लुत्य पिष्टं कल्कः, अनाप्लुत्य-चूर्णः। सङ्ग्हे तु (क. अ. ८) -" उपलदशनापिष्टस्तु कल्कः। सूश्न्मतान्तवच्युअश्चूर्णः। तस्य समस्तद्रव्यापरित्यागादाप्लुतोयोगाच्च कल्कादभेदः। इति। दशनपेषणे लालैव द्रवः। कल्कस्य पेषणे पाने चाप्लुतव्। पान एव। समस्य्ग्रहणेऽप्यशक्यपेषणस्य यागान्न कषायलक्षणाभावः।

श्रृतः क्काथः

स० -यत् द्रव्यं द्रवेणाऽऽप्लुत्य श्रृतं स कल्पनाकषायः क्काथ इति कथ्यते।

आ० र०- श्रृतलक्षणमाह-श्रृत इति। व्क्थनोद्धृ शुष्कद्रव्यरसः-श्रृतः। सङ्ग्रहे तु (क. अ. ८)-" स तु भेद्यान्यौ षधान्यणुशो भेदयित्वा छेद्यानि च छेदयित्वा प्रक्षाल्योदकेन शुचौ रूक्षायामधः प्रलित्पायां ताम्रायोमृन्मयान्यतमस्थाल्यां समावाप्य बव्हल्पपानीयग्राहितामौषधानामाकलय्य यावता मुक्तरसता स्यात्तावदुदकमासेचयेच्छोषयेच्च। अथाग्नावधिश्रित्य महत्यासने सुखोपविष्टः सर्वतः सततमवलोकयन् दर्व्या च विघट्टयन् मृदुना परितः समुपगच्छताऽनलेन साधयेत्। अवआर्य च सुपरिश्त्रुतं यथार्हस्पर्श प्रयुञ्जीत। क्षीरादिसहितं च द्रव्यं न सम्यङ्मुक्तरसं भवतीति वारिव्काथपुर्वकं क्षीराद्यैस्तदुपदेशेऽनुपदग्धं व्काथयेत्।" इति। तदुपदेशे- क्षीरादिव्काथोपदेशे, वारिव्काथं त्त्वा तं व्काथं क्षीराद्यैः सह समं क्षीरादिशेषं व्काथये। एवं ह्यनुपदग्धं द्रव्यं भवति। केवलक्शीरादिपाके तूपदग्धं स्यात्।

शीतो रात्रिं द्रवे स्थितः॥१०॥

स० -यत् द्रव्यं द्रवे सकलां रात्रिं स्थितं स कल्पनाकषायः शीत इत्युच्यते।

आ० र०- शीतलक्षणमाह-शीत इति। व्कथनं विना व्काथवत्सकलरात्रिस्थापितोद्धृतः-शीतः।

सद्योऽभिषुतपूतस्तु फाण्टः

स० -यत् द्रव्यं द्रवेऽभिषुत्य सद्यः पूतं क्रियते स कल्पनाकषायः फाण्ट इति सङ्केतितः।

आ० र०- फाण्टलक्षणमाह-सद्य इति। सद्यः-आला डनसमनन्तरमेव पुतः-फाण्टः। अभिषुतः-आलोडितः। आलोडनं चोष्णोदकेन। उक्तं हि सङ्ग्रहे (क. अ. ८) -"उष्णाम्भसि क्षुण्णाभिषुतपुतं फाण्टः।" इति।

तन्मानकल्पने।

युञ्ज्याद्व्याध्यादिबलतस्तथा च वचनं मुनेः॥ ११॥

मात्राया न व्यवस्थाऽस्ति व्याधिं कोष्ठं बलं वयः।

आलोच्य देशकालौ च योज्या तद्वच्च कल्पना॥ १२॥

स ०-मानं च कल्पना च मानकल्पने, तेषां-स्वरसादीनां, मानकल्पने [तन्मानकल्पने]। ते व्याध्यादिबलेन युञ्जयात्। आदिशब्देन कोष्ठबलादीनां ग्रहणम्। तत्र सम्यग्रसवीर्यादीन् दोषधात्वाद्यालोच्य प्रथममनन्तरं व्याध्यादिबलं च, ततः स्वरसादीनां मानकल्पने युञ्ज्यात्, न नियमं कृत्वेत्यत आह-तथा च वचनं मुनेः। मात्राया न व्यवस्थाऽस्ति व्याधिं कोष्ठं बलं वयः। आलोच्य देशकालौ च योज्या तद्वच्च कल्पनेति।

आ० र०- उक्तानां कल्पनानां वक्ष्यमाणानां च मानानां विषभेदानाह-तन्मानेति। व्याधिबलानुसारेण या कल्पनायया मात्रया यस्योचिता तां तया तस्य युञ्ज्यात्।

मध्यं तु मानं निर्दिष्टं स्वरसस्य चतुष्पलम्।

स० -मध्यमं मानं-मात्रा, स्वरसस्य चतुष्पलम्।

आ० र०- मन्दबुद्ध्यर्थं मध्यमं मानमुपदिश्यते। तत्र रसस्याह-मध्यमिति।

पेष्यस्य कर्षमालोड्यं तद् द्रवस्य पलत्रये॥ १३॥

स० -पेष्यस्य-उभयरूपस्य कल्कस्य चूर्णस्य वा, कर्षं मध्यमं मानम्। तच्च-पेष्यस्य कर्षं, द्रवस्य पलत्रये प्रक्षिप्यालोड्यम्।

आ० र०- पेष्यस्याह-पेष्यस्येति। कल्कचुर्णयोः कर्षतदाऽऽलोडनद्रवस्य पलत्रयम्।

क्काथं द्रव्यपले कुर्यात्प्रस्थार्धं पादशेषितम्।

स० -क्काथं द्रव्यपले, द्रवस्य प्रकृतत्वात् तस्य प्रस्थार्धं दत्त्वा, तच्च श्रपणेन पादशेषं कुर्यात्।

आ० र०- श्रृतस्याह-व्काथमिति। श्रृतेव्काथ्यद्रव्यस्य पलं द्रवस्य षोडशपलानि, चवार्यवशेष्याणि।

शीतं पले पलैः षड्भिः।

स० - शीतं कषायं पले द्रव्यस्य, षड्भिः पलैर्द्रवस्य, कुर्यात्।

आ० र०- शीतस्याह-शीतमिति। शीते द्रव्यस्य पलं द्रवस्य षट् पलानि।

चतुर्भिस्तु ततोऽपरम्॥ १४॥

स० -ततः-शीतकषायात्, अपरं-फाण्टाख्यं प्रकृतत्वात् द्रव्यस्य पले चतुर्भिर्द्रवस्य पलैः कुर्यात्। पञ्चविधायां कषायकल्पनायां मध्यमं मानम्। अस्माच्च मानात् देशकालादीन् समीक्ष्योनाधिकभावो मात्रायाः स्वबुद्ध्या कल्प्यः।

आ० र०- फाण्टस्याह-चतुर्भिरिति। फाण्टे द्रव्यस्य पलं द्रवस्य चत्वारि पलानि। अनयोरनवशेष्यत्वं व्कथनाभावात्, यावत्पूतं तावत्पेयम्। अत्र तन्त्रान्तरोक्तो विशेषः-"कर्षश्चूर्णस्य कल्कस्य गुटिकानां च सर्वशः। द्रवशुक्त्याऽवलेढव्यः पातव्यश्च चतुर्द्रवः॥ व्काथेन चूर्णपानं यत्तत्र काथप्रधानता प्रवर्तते न तेनात्र चूर्णापेक्षी चतुर्द्रवः॥ तेन द्विपले व्काथे चूर्णकर्षः। मात्रा क्षौद्रघृतादीनां कल्कव्काथेषु चूर्णवत्। आदिशब्दात् गुडतैलशर्करादीनि। षोडशाष्टचतुर्भागं वातपित्तकफार्तिषु॥ क्षौद्रं कषाये दातव्यं विपरीता तु शर्करा। इत्येके॥ उत्तमा स्यात् पलं मात्रा त्रिभिश्चाक्षैश्च मध्यमा। जघन्या सा पलार्द्धेन स्नेहव्काथ्यौषधेषु च॥ दीप्तानलं महाकाय़ं पाययन्त्यञ्जलिं जलम्। अन्ये त्वर्द्धं परित्यज्य प्रसृतिं तु चिकित्सकाः॥ व्काथत्यागमनिच्छन्तस्त्वष्टभागावशेषितम्। पारंपर्योपदेशेन वृद्धवैद्याः अलद्वयम्॥ स्याद्धितःसादितो यूषस्त्वष्टादशगुणे जले। चतुर्दशगुणे पेया यवागूः षड्गुणे जले॥

श्रृतं पञ्चगुणे भक्तं विलेपी च चतुर्गुणे। क्वाथ्यद्रव्याञ्जलिं क्षुण्णं श्रपयित्वा जलाढके॥ अर्द्धस्थितेन तेनात्र यवाग्वाद्युपयोजयेत्। वृद्धवैद्याः पलं द्रव्यम् ग्राहयन्त्याढकेऽम्णसि॥ भेषजस्यातिबाहुल्यात् कदचिदरुचिर्भवेत्। यदप्सु शतशीतासु षडङ्गादि प्रयुज्यते॥ कर्षमात्रं ततोद्रव्यं साधयेत्प्रास्थिकेऽम्भसि। अर्धस्थितं प्रयोक्तव्यं पानेपेयादिसंविधौ॥ कर्षा वा कणाशुण्ठ्योः कल्कद्रव्यस्य वा पलम्। विनीय पाचयेद्युक्त्या वारिप्रस्थेन चापरान्॥ अत्र द्वात्रिंशत्पलजले क्वाथ्यस्य कर्षार्द्ध कर्षः पलं वा तीक्ष्णसौम्यातिसौम्यत्वे सति, कणाशुण्ठ्योरिति षडङ्गादीति कल्कतिसौम्यत्वे सति, कणाशुण्ठ्योरिति षडङ्गादीति कल्कद्रव्यस्येति पदैस्तीक्ष्णादीनां ग्रहणात् यस्य कल्कोऽप्यतिसौम्यत्वात् पातुं शक्यते किं पुनः क्वाथस्तत्कल्कद्रव्यस्य। अपरान्-सार्धकर्षद्विकर्षादीन्, युक्त्या-तीक्ष्णाद्यवान्तरविशेषपर्यालोचनया, पाचयेत्। आढकेऽञ्जलिः पलं वेत्येतत प्रस्थे पलं कार्षो वेत्यनेन गतार्थमप्यरुचिर्यथा न स्यात् तथा कल्प्यमित्येवमर्थमुक्तम्। द्रव्यादष्टगुणं क्षीरं क्षीरात्तोयं चतुर्गुणम्। क्षीरावशेषः कर्तव्यः क्षीरपाके त्वयं विधिः॥ न स्यान्मुक्तरसं सम्यग् द्रव्यं क्षीरादिभिः सह। तन्निर्देशे वारिपूर्वम् पादवत्साधयेद्भिषक्॥ पूर्वं षोडशभागं वारि चतुर्भागावशेषं साधयेत्, पश्चात्तेन तुल्यानि क्षीरादीन्यावारिक्षयात्पचेत्। शुष्कं द्रव्यमुपादाय स्वरसानामसम्भवे। वारि ण्यष्टगुणे साध्यं ग्राह्यं पादावशेषितम्॥ आढकं द्रव्यचुर्णानामासुतं सलिलाढके। अहोरात्रस्थितं कुर्यात्स्वरसं स्वरसेऽसति॥ मृदौ चतुर्गुणं वारि कठिनेऽष्टगुणं स्मृतम्। कठिना त्कठिनं यत्तु तत्र षोदशिकं जलम्॥ मृद्वादिष्वकाथ्यसङ्घाते मानानुक्तौ चिकित्सकाः। मध्यस्योभयगामित्वादिच्छन्त्यष्टगुणं जलम्॥ पादशेषः स्नेहविधौ क्वाथस्तोये चतुर्गुणे।" इति।

स्नेहपाके त्वमानोक्तौ चतुर्गुणविवर्धितम्।

कल्कस्नेहद्रवं योज्यम्

स ०-स्नेहपाके विधातव्ये कल्कस्नेहद्रवाणाममानोक्तौ-मान वचनस्य विशिष्टस्यानिर्देशे, चतुर्गुणविवर्धितं कल्कस्नेहद्रवं योज्यम्। कल्कश्च स्नेहश्च द्रवश्च तेषां समाहारः कल्कस्नेहद्रवम्। तदेवं कल्कात् स्नेहश्चतुर्गुणः स्नेहात् द्रवश्चतुर्गुण इति बोध्यम्।

पञ्चप्रभृति तु द्रवं पृथक् स्नेहसमं दद्यादित्यत्र योज्यमिति।

आ० र०- स्नेहपाके मानमाह-स्नेहपाके इति। कल्काच्चतुर्गुणः स्नेहः, स्नेहाच्चतुर्गुणं द्रवम्।

अधीते शौनकः पुनः॥ १५॥

स्नेहेसिध्यति शुद्धाम्बुनिःक्काथस्वरसैः क्रमात्।

कल्कस्य योजयेदंशं चतुर्थं षष्ठमष्टमम्॥ १६॥

स ० -शौनकाख्यस्तु तन्त्रकृदधीते-एवं पठति। स्नेह इत्यादि। स्नेहः कदाचिच्छुद्धाम्बुना पच्यते कदाचिन्निःक्काथेन कदाचित्स्वरसेनेति। तैः शुद्धाम्बुनिःक्काथस्वरसैः स्नेहे सिद्धति सति क्रमेण कल्कस्यांशं चतुर्थं षष्ठमष्टमं योजयेदिति।

आ० र०- शौनकमतमाह-अधीत इति। निष्क्काथे द्रवे कल्कात्षड्गुणः स्नेहः, स्वरसेऽष्टगुणः स्नेहः, अन्यत्र चतुर्गुणः। क्षीरादिषु शुद्धाम्बुप्रक्षेपस्यावकाशत्वात् रसव्काथयोः परस्परमन्यैर्वा सङ्करे सामान्यपरिभाषाविषयत्वात्। सङ्कीर्णं हि द्रवान्तरम्। "शणस्य कोविदारस्य वृषस्य ककुभस्य च। कल्काढ्यात्वात्प्रशंसन्ति पुष्पकल्कं चतुर्थकम्॥" इति।

पृथक् स्नेहसमं दद्यात्पञ्चप्रभृति तु द्रवम्।

आ० र०- विशेषान्तरमाह-पृथक् स्नेहसममिति। यत्र चतुर्भ्योऽधिकानि द्रवाणि तत्र तु परस्परसाम्येन मिलितानि स्नेहाच्चतुर्गुणानि। सङ्घहेऽप्युक्तम् (क. अ. ८)-"समुदितद्रवस्य पादेन सेहो योज्यः।" इति। सर्वद्रवाणां युगापत्प्रक्षेपः, अथैकध्यं प्रति संसृज्याधिश्रित्य च निर्यूहवत्साधयेत्।" इति (क. अ. ८) सङ्घहवचनात्। अनिरूपितकल्पनं च भैषज्यं कल्कीकुर्यात्। कल्कानुक्तौ निरूपितकल्पनमिति, "यतः व्काथस्ततः कष्कः केवलकाथभाषिते।" इति वचनात्।

स्नेहपाकलक्षणमधुना लक्षयन्नाह-

नाङ्गुलिग्राहिता कल्के न स्नेहेऽग्नौ सशब्दता॥ १७॥

वर्णादिसम्पच्च यदा तदैनं शीघ्रमाहरेत्।

घृतस्य फेनोपशमस्तैलस्य तु तदुद्भवः॥ १८॥

स० -कल्कविषयेऽङ्गुलिग्राहित्वं यदा न भवति, अग्नौ प्रक्षिप्ते वा स्नेहे सशब्दता-चटचटायित्वं न भवति, तथा वर्णगन्धरसस्पर्शानां यदा सम्पत्-शुभत्वं स्यात्, तदा-तस्मिन् काले, अश्यामलच्छायामन्तं स्नेहं शीघ्रमाहरेत्। अग्रितः स्नेहस्य कटाहस्थितस्य स कालोऽवतरण इत्यर्थः। अन्यदपि स्नेहपाकलक्षणमस्ति-घृतस्येति। घृताख्यस्य स्नेहस्य सम्यक्पाकं प्राप्तस्य फेनोपशमो यदा जायते, तैलाख्यस्य च स्नेहस्य पच्यमानस्य तदुद्भवः-फेनोत्पत्तिः स्यात्, तदा घृततैलयोः पाको भवति।

आ० र०- पक्वस्नेहहलक्षणमाह-नाङ्गुलिग्राहितेति। उक्तं च वृन्देन (ज्वरधिकारे श्लो २६५) -"स्नेहकल्को यदाऽङ्गुल्या वर्तितो व्बर्तिवद्भवेत्। वह्नौ क्षिप्ते च नो शब्दस्तदा सिद्धं विनिर्दिशेत्॥शब्दस्योपरमे प्राप्ते फेनस्योपरमे तथा। गन्धवर्णरसानां च सम्पत्तौ सिद्ध्यादिशेत्।" इति। घृततैलयोःफेनोपशमोद्भवौ विशेषौ।

लेहस्य तन्तुमत्ताऽप्सु मज्जनं सरणं न च।

स० -लेहस्य पाकं प्राप्तस्य तन्तुमत्ता-तन्तुप्रादुर्भावः पाकः। तथाऽप्सु मज्जनं पाकलक्षणं सरणासरणरूपतया द्विधा सम्भवत्यत इदमाह-सरणं न च। सर्वलेहस्याप्सु मज्जनं भवति न तु सरणं-अवयवशो गमनम्, तथाऽपि तस्य पाकः सम्पन्न इति वेद्यम्।

आ० र०- पक्केलेहलक्षणमाह-लेहस्येति। तन्तुमत्वमुदकमज्जनमविसरणं च। स्नेहलेहौव्काथभेदौ। तयोर्मानं "उत्तमास्यात्पलं मात्रा" इत्यादिनोक्तम्, व्काथ्यौषधशब्देन लेहस्यापि ग्रहणात्।

पाकस्तु त्रिविधो मन्दश्चिक्कणः खरचिक्कणः॥१९॥

मन्दः कल्कसमे किट्टे चिक्कणो मदनोपमे।

किञ्चित्सीदति कृष्णे च वर्त्य(र्ति)माने च पश्चिमः॥२०॥

दग्धोऽत ऊर्ध्वं निष्कार्यः स्यादामस्त्वग्निसादकृत्।

स० -पाकस्त्रिप्रकारो मन्दश्चिक्कणः खरचिक्कणाख्यः [च]। स्नेहपाकविधौ किट्टाख्ये वस्तुजाते कल्कसमे यथा कल्कोऽङ्गुलिनाऽवष्टभ्नाति, तथा किट्टेऽपि स्नेहपाकस्याङ्गुलिग्राहिता न

भवति, स स्नेहपाको मन्द उच्यते। मदनोपमे किट्टे सत्येवमङ्गुलिग्राहिणि स्नेहपाकस्य स चिक्कणः पाकः। किञ्चित्-ईषत्, किट्टे सीदति सति तथा वर्णतः कृष्णे च तस्मिन्, तथा वर्त्य(र्ति)माने-वर्तिमा(तां)गच्छति सति, पश्चिमः-खरचिक्कणाख्यः पाकः। अतः अस्मात् खरचिक्कणात्, ऊर्ध्वं-अनन्तरं, दग्धो भवति स्नेहः। स च निष्कार्यः स्यात्-यथानिरूपितकार्यकरणो न भवेत्, निर्वीर्यत्वात्। आमः-ईषत्पाकः स्नेहः, पुनरग्निसादकृत्।

आ० र०- स्नेहपाकभेदानाह-पाकस्त्विति। तत्र कल्कसमे किट्टे मन्दः। पाकेन स्नेहात्पृथग्भूतः कल्कः-किट्टः। वैवर्ण्याद्यभावात् कल्कसमत्वम्। मदनोपमे चिक्कणः। मदनं मधूच्छिष्टम्। पश्चिमः-खरचिक्कणः। सीदति-ह्रायति। अत ऊर्ध्वं-पश्चिमादूर्ध्वम् दग्धः, स च निष्फलः। मन्दादर्वाक्-आमः, स चाग्निमान्द्यकृत्।

मृदुर्नस्ये, खरोऽभ्यङ्गे, पाने बस्तौ च चिक्कणः॥२१॥

स० -मृदुः-मन्दपाकः स्नेहो, नस्ये-तद्विषये, प्रयोज्यः। खरः-खरचिक्कणः स्नेहः, अभ्यङ्गे-तद्विषये, प्रयोज्यः। पाने तथा बस्तौ-तद्विषये, चिक्कणः प्रयोज्यः।

आ० र०- त्रयाणां विषयभेदानाह-मृदुरिति।

अधुना मानसङ्ख्यायाः यथास्वं संज्ञासंविधानार्थमाह-

शाणं पाणितलं मुष्टिं कुडवं प्रस्थमाढकम्।
द्रोणं वहं च क्रमशो विजानीयाच्चतुर्गुणम्॥२२॥

स० -शाणादयो वहपर्यन्ताः क्रमेण चतुर्गुणाः पाणितलादिसंज्ञा वेद्याः।

आ० र०- मानभेदानाह-शणमिति। शाणादयोऽष्टौ यथोत्तरं चतुर्गुणाः। शाणमानं तु सङ्ग्रहेणोक्तम् (क. अ. ८)- "षड्रश्यो-मरीचिः। ताः षट्-सर्षपः। रेऽष्टौ-तण्डुलः। तौ-धान्यमाषः। तौ-यवः। अतः परं चतुर्गुणवृच्या अण्डिकामाषकशाणाः।" इति। वंशी-वंशरन्ध्रप्रविष्टरश्मिस्थं रजः।

द्विगुणं योजयेदार्द्रं कुडवादि तथा द्रवम्।

स० -शुष्कार्द्रयोरेकस्मिन् योगे तुल्यपरिमाणेन निर्दिष्टयोः शुष्कद्रव्यादार्द्रं द्रव्यं द्विगुणं दत्त्वा योजयेत्। शुष्कार्द्रयोर्वा द्रव्ययोस्तुल्यपरिमाणनिर्दिष्टयोः शुष्कद्रव्याभावे सत्यार्द्रं द्रव्यं द्विगुणं कृत्वा योजयेत्। शुष्कद्रवद्रव्यययोरेकस्मिन् योगे तुल्यपरिमाणेन निर्दिष्टयोः शुष्कद्रव्यात् द्रवद्रव्यम् कुडवादिपरिमाण संज्ञया निर्दिष्टं द्विगुणं कृत्वा योजयेत्।

आ० र०- आर्द्रद्रवयोर्विशेषमाह-द्विगुणमिति। आद्रं त्वौषधं द्विगुणं योजयेत्, पलमित्युक्ते पलद्वयम्। कुडवादि द्रवं च, कुडवैत्युक्ते कुडवद्वयम्।" वासाकुटजकूष्माण्ड-शतपुष्पासहाचराः। नित्यमार्द्राः प्रयोक्तव्या मानतो द्विगुणा न ते॥" इत्येके।

पेषणालोडने वारि स्नेहपाकेच निर्द्रवे॥२३॥

कल्पयेत्सदृशान् भागान् प्रमाणं यत्र नोदितम्।

कल्कीकुर्याच्च भैषज्यमनिरुपितकल्पनम्॥२४॥

अज्ञानुक्तौ तु मूलं स्यादप्रसिद्धौ तदेव तु।

स० -निर्द्रवे-अनुक्तद्रवे, पेषणालोडनार्थं वारि योजयेत्। स्नेहपाके चानुक्तद्रवे वार्येव योजयेत्।

आ० र०- अनुक्तज्ञानार्थमाह-पेषणालोडन इति। पेषणालोडनस्नेहपाकेष्वनुक्तद्रवेषु वारि योज्यम्। प्रमाणानुक्तौ समभागत्वम्। कल्पनानुक्तौ कल्कः। अज्ञानुक्तौ मूलम्। अप्रसिद्धौ तदेव। यथा-हरीतकीत्युक्ते फलम्।" अनिर्दिष्टाप्रसिद्धेषु मूलं ग्राह्यं त्वगादिषु।" इति (क. अ. ८) सङ्ग्रहवचनात्।

यत्र यत्र प्रयोगे द्रव्याणां परिमाणं विशिष्टं नोक्तं तत्र तत्र द्रव्याणां सदृशान् भागान् कल्पयेत्।

[षड्वंश्यस्तु मरीची स्यात्, षण्मरीच्यस्तु सर्षपः।

तण्डुलः सर्षपास्त्वष्टौ, धान्यमाषस्तु तौ, यवः॥ १॥

तावण्डिका चतुर्भिस्तैर्माषकः शाणकस्तथा।]

द्वौ शाणौ वटकः कोलं बदरं द्रंक्षणश्च, तौ॥ २५॥

अक्षम् पिचुः पाणितलं सुवर्णं कवलग्रहः।

कर्षो बिडालपदकं तिन्दुकः पाणिमानिका॥ २६॥

शब्दान्यत्वमभिन्नेऽर्थे शुक्तिरष्टमिका पिचू।

पलं प्रकुञ्चो बिल्वं च मुष्टिराम्रं चतुर्थिका॥ २७॥

द्वे पले प्रसृतस्तौ द्वावञ्जलिस्तौ तु मानिका।

आढकं भाजनं कंसो, द्रोणः कुम्भो घटोऽर्मणम्॥ २८॥

तुला पलशतं, तानि विंशतिर्भार उच्यते।

स० -द्वौ शाणौ वटकः कोलं बदरं द्रंक्षणश्चेत्यत्र शब्दान्यत्वम्, न तु तत्त्वतो भेदः। तौ द्वौ द्रंक्षणावक्षं तथा पिचुस्तथा पाणितलं तथा सुवर्णं तथा कवलग्रहस्तथा कर्षस्तथा बिडालपदं तथा तिन्दुकस्तथा पाणिमानिका, इत्यत्राभिन्नेऽर्थे शब्दानेकत्वम्। तथा द्वौ पिचू शक्तिस्तथाऽष्टमिका, इत्यत्रापि शब्दान्यत्वमर्थस्यतिक्येसति। पलं प्रकुञ्चो बिल्वं च मुष्टिराम्रं चतुर्थिका, इत्यत्रापि शब्दानां वैलक्षण्ये सति नार्थतो भेदः। द्वे पले प्रसृत इत्युच्यते। तौ द्वौ प्रसृतावञ्जलिः कथ्यते। तौ द्वावञ्जली मानिका, -अष्टौ पलानीत्येव। आढकादीनां शब्दनां स्वरूपतो भिन्नानां नार्थतो भेदः। तथैव द्रोणादीनां शब्दानाम्। पलशतं तुला निगद्यते। तानि-पलशतनि, विंशतिर्भार उच्यते। क्काथादीनां तूत्तमादिमात्राः सङ्ग्रहादवधार्याः। सङ्ग्रहे त्वेवं पठ्यते (क. अ. ८)-"क्काथो निर्यूहः। तत्र भेद्यान्यौषधान्यणुशो भेदयित्वा छेद्यानि च छेदयित्वा प्रक्षाल्योदकेन शुचौ रूक्षायामधःप्रलिप्तायां ताम्रायोमृन्मयाद्यन्यतमायां स्थाल्यां समावाप्य बह्वल्पपानीयग्राहितामौषधानामाकलय्य यावता मुक्तरसता स्यात् तावदुदकमासेचयेच्छोषयेच्च। [अग्रावधिश्रयेत्। यावन्मात्रोदकदाने तथा तदवशिष्टत्वे च तत्र

नियमसामर्थ्यात् क्काथ्यद्रव्यपरिमाणस्य। अत्रेयत्परिमाणानि द्रव्याणि, उदकमियत्प्रमाणं, तदवशिष्टता चेयत्प्रमाणा, इति न नियमोक्तिरेवंविधा विद्यते। किं तर्हि? अभ्यूहनीयमेतत्सर्वमिति। अत्र विधिः।] अथाग्नावधिश्रित्य महत्यासने सुखोपविष्टः सर्वतः सततमवलोकयन् दर्व्या च विघट्टयन् मृदुना च परितः समुपगच्छताऽनलेन साधयेत्। अवतार्य च सुपरिस्रुतं यथार्हस्पर्शं प्रयुञ्जीत। क्षीरादिसहितं च द्रव्यं न सम्यङ्मुक्तरसं भवतीति वारिक्काथपूर्वकं क्षीराद्यैस्तदुपदेशेऽनुपदग्धं क्काथयेत्। शीतसलिलाप्लुतं तु निशापर्युषितं पूतं शीतः कषायः। उष्णाम्भसि क्षुण्णाभिषुतः पूतः फाण्ट इति। तत्र सम्यग्रसवीर्यादीन्यौषधस्य समीक्ष्य व्याध्यातुरादिबलतश्च निर्यासादीनां कल्पनां मात्रां च संप्रयोजयेत्। तथा च केचिदाहुः। मात्राया न व्यवस्थाऽस्ति व्याधिं कोष्ठं बलं वयः। आलोच्य देशकालौ च भैषज्यमवचारयेत्॥[एवं च सर्वमभ्यूह्यात्र कर्तव्यं निश्चितं कृत्वोक्तेन विधिनेति।] एतदेवमुपदिष्टं बुद्धिमतां ज्ञानप्रबोधाय। यथा तु सर्वे भिषजो विज्ञास्यन्ति तथैवोपदेक्ष्यत इति। निर्यासे मध्यमा मात्रा चतुष्पलम्। कल्कचूर्णयोः कर्षः पलत्रयं तदालोडने। निर्यूहे भेषजपलमुदकार्धप्रस्थेऽधिशत्य पादशेषमवतारयेत्। शीतफाण्टयोरौषधपलं षड्भिश्चतुर्भिरम्बुपलैरासुतमिति।" इति। तथा शाणपरिमाणस्य पाणितलवाचकस्य [च] किमपि परिमाणं नोक्तं येनासौ [न] परिच्छिद्यत इति न वाच्यम्, सङ्ग्रहे तत्परिमाणस्योक्तत्वात्। तत्र ह्येवमुक्तम् (सं.क.अ.८)-"षड्वंश्यो मरीची। ताः षट् मरीच्यः सर्षप उच्यते। अष्टौ सर्षपास्तण्डुलः। तौ द्वौ तण्डुलावेको धान्यमाषः। तौ द्वौ धान्यमाषौ यवः। अतः परं चतुर्गुणवृध्द्याऽण्डिकामाषकशाणकर्षपलकुडवप्रस्थाढकद्रोणवहाः कल्प्यन्ते। [एवं चतुर्भिर्माषकैः शाणस्य परिमाणं परिच्छिद्यते।] धरणं तु पलस्य दशमो भागः। माषकस्य तु पर्यायो हेमः। कर्षस्य षोडशिका। आढकस्य तु पर्यायाः कंसः पात्रं भाजनं च। द्रोणस्य पर्यायो नल्वणः, तथा अर्मणः, तथोन्मानः, तथा घटः कुम्भः कलशश्च। द्रोणद्वयस्य च शूर्पः।" इति।

आ० र०- संज्ञान्तरमाह-द्वौ शाणाविति। शाणद्वयस्य वटकादयश्चतस्रः संज्ञाः। वटकद्वयस्याक्षादयो नव षोडशिका पलद्वयस्य प्रसृतः। प्रसृतद्वयस्याञ्जलिः कुडवश्च। अञ्जलिद्वयस्य मानिका। आढकादयस्तिस्र एकार्थाः। द्रोणादयश्चतस्रः [च]। पलशतं-तुला। विंशतिस्तु भारः। सङ्ग्रहे तु (क. अ. ८) -"धरणं तु पलस्य दशमो भागः। माषकस्य पर्यायो हेमो धानकश्च। पलद्वयस्याष्टमानम्। द्रोणद्वयस्य शूर्पः।" इति।

हिमवद्विन्ध्यशैलाभ्यां प्रायो व्याप्ता वसुन्धरा॥२९॥

सौम्यं पथ्यं च तत्राद्यमाग्नेयं वैन्ध्यमौषधम्॥२९ १/२॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचिता-यामष्टाङ्गहृदयसंहितायां पञ्चमे कल्पसिद्धिस्थाने द्रव्यकल्पो नाम षष्ठोऽध्यायः॥६॥

स० -हिमवत्पर्वतेन विन्ध्यशैलेन च बाहुल्येन वसुन्धरा व्याप्ता। तत्र-तयोर्मध्यात्, आद्यं-हैमवतमौषधं, सौम्यं पथ्यं च स्वभावाद्भवति। वैन्ध्यं चौषधमाग्नेयं-न तथा देहस्य सदा पथ्यं, स्यादिति।

इति श्रीमृगाङ्कदत्तपुत्रश्रीमदरुणदत्तविरचितायामष्टाङ्गहृदय- टीकायां सर्वाङ्गसुन्दरा-ख्यायां पञ्चमे कल्पसिद्धिस्थाने द्रव्यकल्पो नाम षष्ठोऽध्यायः समाप्तः॥६॥

आ० र०- शैलाभेदाद्द्रव्यविशेषमाह-हिमवदिति।

इति हेमाद्रिटीकायामायुर्वेदरसायने।

द्रव्यकल्पप्रकरणं सामस्त्येन निरूपितम्॥